Funding by IKS-MoE

Funding by IKS-MoE

Bharatiya
Vidya Bhavan
New Delhi
110001

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya

Funding by IKS-MoE

Funding by IKS-MoE

॥ श्रीः ॥

श्रीमद्धर्मराजाध्वरीन्द्रप्रणीता.

वेदान्तपरिभाषा.

उदासीनस्वामिश्रीमदमरदासविरचितमणिप्रभाख्यटीका-
संवलितया तदात्मजरामकृष्णाध्वरिकृत
शिखामणिटीकया विभूषिता ।

श्रीकाशीनिवासिनिर्मलपं० स्वामिगोविन्दसिंहसाधुना
परिश्रमेण सुसंस्कृता ।

सेयं
क्षेमराज श्रीकृष्णदासश्रेष्ठिना
मुम्बय्यां
(खेतवाडी ७ वीं गली खम्बाटा लैन)
स्वकीये "श्रीवेङ्कटेश्वर" स्टीम्-मुद्रणयन्त्रालये
मुद्रयित्वा प्रकाशिता ।

संवत् १९६८, शके १८३३.

Sri Sankaracharya Sa
vidyalaya

अस्य ग्रन्थस्य पुनर्मुद्रणादिसर्वाधिकाराः प्रकाशकाधीनाः सन्ति ।

Funding by IKS-MoE

M.S. Padmanabha Sharma

॥ श्रीः ॥

समणिप्रभाशिखामणिसहिताया वेदान्तपरिभाषाया

वेदान्ततत्त्वसमीक्षाख्यभूमिका ।

पण्डितस्वामिश्री ६ राममिश्रशास्त्रिपरिशोधितशास्त्रदीपिकाभूमिकायाः
श्रीमदुदासीनपण्डितस्वामिश्रीवालरामपरिशोधितयोगभाष्यभूमिकायाश्चप्रत्युत्तरविचाररूपतया काशीनिवासिनिर्मलपं० स्वामिश्रीगोविन्दसिंहेन साधुना संगृहीता ।

अज्ञेभ्यो मतिदायिनी विपदि या सन्त्रासविध्वंसिनी
वादिव्यूहविलेशयप्रमथने शक्तिः परा गारुडी ॥
मोहध्वान्तविमर्दिनी सुकृतिनां सद्धर्मसंदर्शिनी
सद्विद्याजननी सदा विजयतां श्रीशांकरी भारती ॥

अथाहोरात्रसत्यानृतरागद्वेषशीतोष्णसुखदुःखभावाभावधर्माधर्माद्यनेकविधपरस्परप्रतिद्वन्द्विपदार्थपरिपूरिते कदापि केनापि केनचिदपि प्रकारेणाचिन्तनीयेऽनिर्वचनीये विचित्रेऽस्मिन् संसारे संचरत्सु सुखदुःखमयेषु देवासुरतिर्यग्योनिमानुषेषु त्रिगुणात्मनः प्रधानस्यापि परिणामात्, परमाण्वादेर्ब्रह्माण्डपर्यन्तस्योत्पत्तिस्थितिप्रलयकारणस्येश्वरस्येच्छया वा, धर्माधर्मसाधनानामिष्टानिष्टफलसम्बन्धकारिणां कर्मणां वा, शुभाशुभानां विपाकस्वभावाद्वा, स्वयमेवानेकप्रकारमुत्पद्यमानस्य तिष्ठतो विनश्यतो वा, नियतवृत्तेः स्थावरजङ्गमस्य न कदाचित्काचिदवस्था सा या न संभवतीति सम्यग्विमृशतो विशेषविचारशीलस्य विदुषो नहि कस्यचिदपि तत्तद्विशेषविशिष्टस्पष्टकल्पितनानाविधमतमतान्तरेऽनवरतात्यन्ताग्रहस्तथापि स्वभावोऽयमाधुनिकाचार्याणां यत्ते सुप्रतिष्ठितं सद्युक्तिप्रमाणाभ्यामुपनिबद्धं सुपरीक्षकैः सम्यक् परीक्षितमपि प्राचीनपूर्वजैर्लोकोपकाराय वा स्वात्मप्रख्यापनाय वा केनचित्सूक्ष्म थेन करुणया वा प्रचारितमप्रतिहतं राद्धान्तमखिलीकृत्य न खलुस्वस्मिन त्वमर्जयन्ते ।

तथाहि—शिष्यते—अनुशिष्यतेऽपूर्वोऽर्थो बोध्यतेऽज्ञे। एवाभिधीयते । वेदोपजीविस्मृतिपुराणादि [illegible] मि मा शुचः ॥ ६६ ॥ अ० १८

र्यकरत्वेन च तद्व्यवहारः । अत एव छन्दोव्याकरणाभिधानकोषादिषडङ्गलक्षणग्रन्था अपि शास्त्राणि भवंति ।

अत एव धर्मशास्त्रप्रवर्तकानांप्राचीनानां–

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥ १ ॥

इत्यादिसारगर्भितवचनैर्बुभुत्सुजनेष्टानिष्टावबोधके वाङ्मात्रे शास्त्रत्वव्यवहारोऽप्युपपद्यते । तच्च शास्त्रं द्विविधं, ऐहिकाभ्युदयावबोधकं परमपुरुषार्थावबोधकञ्च । आद्यं यथा शिल्पचिकित्साधर्मराजनीतिनृत्यगीताद्यवबोधकम् । द्वितीयञ्च दर्शनात्मकं–तानिच सांख्यवैशेषिकन्यायपातंजलमीमांसावेदान्ताख्यानिषट् । एतानि तत्त्वज्ञानार्थं वेदान् विचार्याधिकारिभेदेनैककार्यकरत्वरूपसंगत्याचक्रमेण कपिलकणादगोतमपतञ्जलिजैमिनिवेदव्यासाख्यमुनिषट्कप्रणीतानि । अत एव वेदा अपि पूर्वाचार्यैर्मन्दमध्यमोत्तमाधिकारिणो निरीक्ष्य कर्मकाण्डोपासनाकाण्डज्ञानकाण्डभेदेन विभक्ता इति निश्चीयते । एवं च परमपुरुषार्थनिरूपणपरं सर्वं शास्त्रं मन्दमध्यमोत्तमाधिकारिभेदेन त्रेधा प्रवृत्तमिति न तिरोहितमेतत् । तत्रापि मन्दाधिकृतोद्देशेन प्रवृत्तः परमकारुणिको भगवान् जैमिनिर्यावद्वेदार्थविचाररूपां द्वादशाध्यायीं पूर्वमीमांसानाम्नीं सूत्रात्मनोपनिबबन्ध, विधिमंत्रनामधेयनिषेधार्थवादात्मके वेदे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्यादिन्यायेन विधिवाक्यानामेव प्राधान्यमन्येषाञ्च तच्छेषत्वमपि सुस्पष्टमेव बोधयामास । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'राजा राजसूयेन यजेत स्वाराज्यकामः' 'श्येनेनाभिचरन् यजेत शत्रुवधकामः' इत्यादिविधिवाक्यान्यपि तत्तद्विषयसम्पर्कसमुद्भवानित्यसुखाभिलाषिणं वर्णाश्रमाभिमानिनं रागद्वेषादितो दग्धहृदयं सर्वथागतधियं स्वात्मनि श्रद्धामात्रावशेषं कामुकमेवाधिकुर्वन्ति एतादृशाधिकृतो- नैव–'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः' इत्यादिवेदवाक्यानि 'न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत्सर्वकर्माणि विद्वान् युक्तः समाचरन्' यादि स्मृतिशिरोभूतानि भगवद्वाक्यानि च संलग्नानि भवन्ति । अनेनैव भगवद्- विदुषो वस्तुतः कर्मानधिकारोऽपि सूचितो भवति । एवं पूर्वमीमांसाशास्त्र- किञ्चिदपि तत् कर्म यत्फलाभिसन्धिशून्यं, नापि कश्चिदेतादृशो लोके श्चाकामुकोऽपि विविधक्लेशसाध्यां विघ्नविशेषबहुलांधनधान्यादिविना- तामनुसंज्वरेत् । अविपश्चितामेव पूर्वमीमांसाप्रतिपा- तामितिबोधयता परमकारुणिकेन भगवता

Funding by IKS-MoE

वासुदेवेन परमप्रियमर्जुनं निमित्तीकृत्य "यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ॥ वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥ ४२ ॥ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्तानां तयाऽपहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते" ॥ ४४ ॥ अ० २ ॥ इत्यादिवह्वर्थकवचनामृतेन समासिक्तोऽयं लोक इति-अनेनैवोक्तैतादृशमूढबुद्धीनां समाध्यनधिकारोपि स्पष्टमेव भगवतोक्त इति ध्येयम् ।

ततश्च—

कुर्वते कर्म भोगाय कर्म कर्तुश्च भुंजते ।
नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते ॥
व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम् ।

इत्यादिन्यायगर्भिताभियुक्तवचनेन—

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि संमोहं सर्गे यान्ति परंतप ॥ २७ ॥
येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ॥
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥ अ० ॥ ७ ॥

इत्यादिभगवद्वाक्यैश्चेश्वरानुग्रहाद्वा सञ्चितजन्मजन्मान्तरीयाशुभकर्मणांक्षयाद्वा प्रबलपुण्यपुञ्जसत्त्वसमुद्रेकाद्वा कदाचिज्जन्मान्तरे तेषामेवेच्छाद्वेषादिसमुद्भूतद्वन्द्वमोहनाशे सति भगवति वासुदेवे दृढा भक्तिरुत्पद्यते । त एवार्द्धप्रबुद्धा मध्यमाधिकारिणो भवन्ति । ते च वेदैकदेशात्मकं 'ओमित्येतदक्षरमुद्गीथमुपासीत' 'ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे' 'य एतदेवं विद्वान् साधुसामेत्युपासते' 'अन्नं ब्रह्मेत्युपासीत' मनो ब्रह्मेत्युपासीत' 'आत्मानमेव प्रियमुपासीत' इत्याद्युपासनावबोधकविधिवाक्यव्यूहमेव श्रुतिशिरोभूतं मन्यमानास्तत्रानुरक्ता भवन्ति । एतादृशमध्यमाधिकृतोद्देशेनैव कपिलकणादगोतमपतञ्जलिप्रणीतशास्त्राणां यथायथं प्रवृत्तिरिति निश्चीयते । भगवान् वासुदेवोऽपि परमप्रियशिष्यमर्जुनमेतादृशमध्यमाधिकारिणमेव मत्वा स्वकीये यावदुपदेशावसाने—

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमतिस्ततो वक्ष्यामि ते हितम् ॥ ६४ ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ ६५ ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥ अ० १८

Funding by IKS-MoE

इत्यादिपरमपूज्यवचनैः सर्वधर्मपरित्यागपूर्वकस्वात्मपरायणतामेव बोधयामास । अतएवार्जुनमभिमुखीकृत्य स्वकीयसमुपदिष्टोपास्त्यात्मकमर्थं तत्र तत्र भगवान् ‘इमं राजर्षयो विदुः–भक्ताराजर्षयस्तथा–राजविद्या राजगुह्यं’–इत्यादिवाक्यै राजविद्या’ शब्देन व्याजहार नतु ‘ब्रह्मविद्या’ शब्देनेत्यवगम्यते ॥

ब्रह्मविद्या च पराविद्याऽपरनाम्नी तत्र तत्रोपनिषत्सु शमदमादिसाधनचतुष्टयसम्पन्नान् भगवदाराधनादितो निर्धूतकल्मषानुत्तमानेवाधिकृत्य ‘अधीहि भगवन् ब्रह्मविद्याम्’ ‘ब्रह्मविद्यां प्रवक्ष्यामि’ ‘रहस्यं ब्रह्मविद्यायाम्’ ‘तस्मै सहोवाच ब्रह्मविद्यां वरिष्ठाम्’ ‘परमं ब्रह्मविद्याया’ ‘ब्रह्मविद्याप्रबोधो हि केनोपायेन जायते’ ‘अध्येमि ब्रह्मविद्याम्’ ‘नाम वै ब्रह्मविद्यां’ ‘वाग्वै विज्ञापयति ब्रह्मविद्याम्’ ‘विज्ञानेन वै विजानाति ब्रह्मविद्याम्’ ‘ब्रह्मविद्यया सर्वं भविष्यन्तः’ ‘इयं ब्रह्मविद्या सर्वोपनिषद्विद्या वा’ ‘अनया ब्रह्मविद्यया ब्रह्मणः पन्थानमारूढाः’ ‘ब्रह्मविद्यां सर्वविद्याप्रतिष्ठाम्’ ‘तां पुरोवाचांगिरसे ब्रह्मविद्याम्’ ‘प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्’ ‘तेषामेवैतां ब्रह्मविद्यां वदेत’ इत्यादि श्रुतिशेखरैरनेकधा प्रवृत्ता भगवदुपास्त्यपरनाम्नी राजविद्यातो भिन्नैवेत्यवसीयते । एतादृशब्रह्मविद्याविष्करणाभिप्रायेणैव प्रवृत्तं ‘अथातो ब्रह्मजिज्ञासा’ इत्यादि चतुरध्यायात्मकमुत्तरमीमांसाऽपरनामकं भगवद्वेदव्यासप्रणीतं वेदान्तशास्त्रमिति व्यवह्रियते । अत्रच–‘न कर्मणा नप्रजया न धनेन त्यागेनैकेनामृतत्वमानशुः’ ‘नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः’–नान्यैर्देवैस्तपसा कर्मणा वा’ ‘ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तुतं पश्यते ध्यायमानः । शान्तो दान्तः समस्तितिक्षुः समाहितोभूत्वात्मन्येवात्मानं पश्येत’

संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया ।
प्रव्रजन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः ॥ १ ॥
त्यजधर्ममधर्मञ्च उभे सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजासि तं त्यज ॥ २ ॥ बृहस्पतिः ।

इत्यादिश्रुतिस्मृतिशतकोपदिष्टो विवेकवैराग्यादिसाधनचतुष्टयसम्पन्नानामुत्तमानामेवाधिकार इत्यवगम्यते।अत एव हि ‘अथातो ब्रह्मजिज्ञासा’इति सूत्रस्थस्य अथशब्दस्य कैश्चित्प्राचीनैरनवधानपूर्वकाभिमतां कर्माधिगमानन्तर्यार्थकतां व्युदस्य साधनचतुष्टयसंम्पत्त्यानन्तर्यार्थकतां संस्थापयामासुः सर्वशास्त्रविदां वरिष्ठाः श्रीशंकराचार्याः। श्रीभाष्याचार्यास्तु‘संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति’इति वृत्तात्कर्माधिगमादनन्तरं ‘ब्रह्मविविदिषेति’इतिच केषाञ्चित् पूर्वाचार्याणां वचनं प्रमाणतयोपदर्शयन्तः अथातो ब्रह्मजिज्ञासेतिसूत्रस्थाथशब्दस्य कर्माधिगमानन्तर्यार्थत्वमा-

स्थाय पूर्वमीमांसापरिशिष्टचतुरध्यायी–संकर्षणकाण्डोपेतविंशत्यध्यायी–स्वरूपयोः पूर्वोत्तरमीमांसयोरेकशास्त्रत्वमाहुः । अत्रोच्यते–अधिगमनमधिगम इति भावघञन्ताधिगमशब्देन किं कर्मणां साक्षात्कारो विवक्षितः प्राप्तिर्वा स्वीकरणं वा । नाद्यः तत्रापि किं कर्मसाक्षात्कारस्य स्वतन्त्ररूपेण ब्रह्मविचारकारणत्वं किं वा तदन्तर्गतिमात्रम् । नाद्यः विवेकादीनामन्येषामपि श्रुतिस्मृतिप्रसिद्धानां विद्यमानत्वात्–नद्वितीयः तत्रापि किं विविदिषाद्वारा ब्रह्मविचारोपयुक्ततया तदानन्तर्यमथशब्दार्थतया विवक्षितम् उत ब्रह्मविचारकालेऽपि कर्मणां करणीयतया तदानन्तर्यमथशब्दार्थं इति । नाद्यः आनन्तर्योक्तिद्वाराऽधिकारिविशेषणसमर्पको ह्यथशब्दः ततश्च कर्मावबोधानन्तर्ये तद्बोधस्य कर्मविचारं विना असिद्धे विचारितकर्मत्वमधिकारिविशेषणं लभ्यते । नच विविदिषोपयुक्तस्य विचारितकर्मत्वस्याधिकारिविशेषणत्वमत्र वक्तव्यम्–अधिकारं विना कृतमकृतमिति शंकानिराकरणद्वारायं निर्णय उपयुज्यते तदेवाधिकारिविशेषणम् । वेदान्तविचारे च उत्कटविविदिषादिनिर्णयेनैव तादृशशंकाया निराससम्भवात् । न विविदिषाप्राचीनस्य विचारितकर्मत्वस्य पृथङ् निर्णयोऽपेक्षितः । तस्य विविदिषाद्वारैव विचारोपयुक्तत्वात् द्वितीये तु कर्मसहितवेदान्तविचारस्य ततः प्राक् कर्मविचारं विना कर्तुमशक्यतया वेदान्तविचारारंभे कर्मसमानकाले विचारितकर्मत्वनिर्णय उपयुक्तो भवेत् । नतु तदस्ति । कर्मानुष्ठानसहित एव ब्रह्मविचारः स्वकार्योपयुक्त इत्यत्र प्रमाणाभावात् । ननु विविदिषावाक्येन कर्मणामपि मोक्षार्थत्वविधानात् ज्ञानैकसाध्ये मोक्षे तद्द्वाराकर्मोपयोगस्य वक्तव्यतया ज्ञानसाधनश्रवणादिभिः समुचितानि कर्माणि भविष्यन्तीति चेत् न विविदिषावाक्यं विविदिषार्थमेव कर्माणि विधत्त इति "अतएव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥ शमदमाद्युपेतः स्यात्तथापितु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ॥ २७ ॥ अ० ३ पा० ४ शा० इत्यादि ब्रह्मसूत्रे–

कषायपक्तिः कर्माणि ज्ञानं तु परमागतिः ।
कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते ॥ १ ॥

इत्यादिस्मृतिभिश्च स्पष्टमेव । अपिच 'कर्मणा पितृलोक' इत्यादिश्रुत्या नित्यनैमित्तिकयज्ञादिकर्मभिः पैत्रोऽर्यमादिपितृदेवतासम्बन्धी लोको भोगभूमिविशेषोऽधिगम्यो निश्चितो भवति । तथा 'विद्ययादेवलोक' इतिश्रुत्या विद्यया उपासनात्मकमानसक्रियया देवानामिन्द्रादिहिरण्यगर्भान्तानां लोकोऽधिगम्यो निश्चितो भवति । एवमीश्वरार्पणबुद्ध्याऽनुष्ठितयोः कर्मोपासनयोस्तु 'कषायपक्तिः कर्माणि' इति स्मृतिबोधितं

Funding by IKS-MoE

चित्तस्य कषायाणां बहुतरजन्मपरंपराहितोत्तरोत्तरजन्मादिहेतुभूतदृढतररागद्वेषादिसंस्काराणां नाशनमेव साध्यं फलमस्ति । अथवा 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति श्रुतिवाक्यात् विविदिषासंन्यासपूर्वकश्रवणप्रवृत्तिफलोपहितोत्कटज्ञानेच्छावेदनं मोक्षजनकतत्त्वज्ञानं वा तत्फलम् । विविदिषन्ति–इत्यत्रहि विदज्ञाने इत्यस्माद्धाधोरिच्छायां सन्प्रत्ययः । तत्र यदि यज्ञेन इत्यादिपदैः करणत्वेनोपस्थितानां प्रधानीभूतसन्प्रत्ययार्थे इच्छायामन्वयः तदा विविदिषाफलमितिपक्षः । यदितु प्रकृत्यर्थे ज्ञानेऽन्वयस्तदा ज्ञानमेव फलमितिपक्षः । अश्वेन ग्रामं जिगमिषतीत्यादिवाक्ये प्रकृत्यर्थगमने अश्वस्य करणत्वेनान्वयबोधदर्शनादिति भावः ॥

तत्र कथं कर्मविचारतदवबोधानन्तर्यं ब्रह्मविचारस्येतिचेत् । उच्यते । अत्रहि येनास्मिञ्जन्मनि कर्मविचारः कृतस्तेनैव वेदान्तविचारः कर्तुं शक्यते नान्येनेतिशंकको मन्यते । तथाहि । अस्मिञ् शास्त्रे निर्विशेषब्रह्मविद्याया निरूपणं सविशेषब्रह्मविद्याया दहरोपासनादिरूपायाः कर्मानवबद्धायास्तदवबद्धायाश्चान्तरादित्यादिविद्यायाश्च निरूपणं तदनुष्ठानार्थमेव भविष्यति । तत्र कर्मावबद्धोपासनस्य कर्मसमुच्चयःस्पष्ट एव । एवं निर्विशेषविद्यानुष्ठानकालेऽपि 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति निर्विशेषब्रह्मवित्त्वेन श्रुतिस्मृतिप्रसिद्धानां जनकादीनां कर्मदर्शनात् कर्मकर्तव्यतावगम्यते । नच कर्मणैवहीति वाक्यं विद्यानुष्ठानकाले न जनकादिषु कर्म प्रतिपादयति किन्तु तेषु विविदिषोपयुक्तं कर्म प्रतिपादयतीति समञ्जसम् । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीतिवाक्ये ब्राह्मणग्रहणेन विविदिषोपयुक्ते कर्मणि ब्राह्मणानामेवाधिकारात् । नच विविदिषाकामस्याधिकारिणोऽर्थसिद्धस्योद्देश्यतया न ब्राह्मण्येन विशेषणं युक्तमितिवाच्यम् । 'राजा स्वाराज्यकामो राजसूयेन यजेत' इत्यत्र राजकर्तृकप्रयोगविधिपक्षे राजकर्तृके प्रयोगे तदन्यस्यासामर्थ्येनाधिकारासम्भवात् । एवं यथा राजत्वस्यार्थादधिकारिकोटिप्रवेशः फलयागविधिसम्बन्धपक्षेप्राप्तयागोद्देशेन फलसम्बन्धस्य राजत्वजातेश्च कर्त्रवच्छेदद्वारा विधानासम्भवेऽपि फलसम्बन्धमात्रविधिं स्वीकृत्य कर्तृविशेषापेक्षायां स्वाराज्यकामपदं राजानुवादकपदसमभिव्याहारेण वस्तुगत्या तत्परमेव पर्यवस्यति इति स एवार्थात्कर्ताधिकारी च भविष्यति इति वा स्वीक्रियते, तद्वत् प्रकृतेऽपि भविष्यतीति अतो विविदिषार्थे कर्मणि ब्राह्मणानामेवाधिकारात् जनकादिषु दृश्यमानं कर्म मोक्षार्थमेवेति ज्ञानैकसाध्ये मोक्षे ज्ञानांगतया तस्य निवेशोवक्तव्य इति निष्प्रपञ्चब्रह्मसाक्षात्कारोपयुक्तायां तदुपासनायां कर्मसाहित्यं सिद्धमिति चेत् । न । विविदिषावाक्येन

यादृशा नित्यनैमित्तिककर्मप्रयोगाः पापक्षयार्थत्वेन प्रसिद्धास्तेषां विविदिषासंयोगमात्रं क्रियते–इति । अनाश्रितः कर्मफलं कार्यं कर्मकरोतियः । स संन्यासी च योगीच' इत्यादिस्तुतिबलान्निरभिसन्धिकर्मकर्तुर्मुमुक्षुत्वमवगम्यते । तस्यैव च कर्मणः 'आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते' इत्युत्तरश्लोके योगपदोदितायां चित्तशुद्धौ विनियोगः । तथाच गीतावचने कर्मफलमनाश्रित इत्युक्त्या प्रसिद्धानि यान्यग्निहोत्रादीनि फलवन्ति कर्माणि तेष्वेव फलाभिसन्धिपरित्यागे ज्ञानार्थतावगमान्मुमुक्षुणा क्रियमाणानि कर्माणि प्रसिद्धकर्मभ्यो भिद्यन्त इति सिध्यति । तदैकार्थ्याय विविदिषावाक्येऽपि प्रसिद्धानामेव कर्मणां विनियोगः स्वीकर्तव्यः । अनाश्रितः कर्मफलमिति वचनेन काम्यानामपि कर्मणां ज्ञानार्थतास्तीत्यपि सिध्यतीति द्रष्टव्यम् । ततश्च प्राप्तकर्मोद्देशेन फलसम्बन्धविधौ ब्राह्मणत्वस्य कर्तृविशेषणतया विधाने वाक्यभेदः स्यात् । तदनुवादमात्रेणाख्याताक्षिप्तः कर्ता वस्तुगत्या स एव पर्यवसितो भवति 'राजा स्वाराज्यकामो राजसूयेन यजेत' इति वाक्य इवेति युक्तम् । राजसूयस्यानिर्ज्ञातकर्तृविशेषतया कर्त्राकांक्षायां तथाभ्युपगमेऽपि त्रैवर्णिकतयानिर्ज्ञातकर्तृकाणां भावनानां विविदिषावाक्ये विविदिषार्थत्वेन विधीयमानानां कर्तृविशेषानपेक्षतया अनुवादमात्रेण विशेषपर्यवसानासंभवात् । तस्मात्तत्र ब्राह्मणपदं त्रैवर्णिकोपलक्षणमेव । ततश्च जनकादिषु दृश्यमानस्य कर्मणो विविदिषार्थत्वे न कोऽपि विरोधः । नच प्रत्यवायपरिहारार्थमप्युपासनाकाले नित्यनैमित्तिकानि कर्माणि कर्तव्यानि । ततश्च वेदान्तशास्त्रनिरूपणीया सर्वाप्युपासना कर्मसमुच्चितैवेति तत्तदुपासनाफलकामेनाधिकारिणा वेदान्तविचारमात्रेण कर्मसमुच्चिततत्तदुपासनायाः कर्तुमशक्यतया कर्मविचारोऽपि कर्तव्यः प्राप्नोतीत्युभयोरेकः कर्ता सिध्यतीतिचेत् । न श्रवणमनननिदिध्यासनरूपे निर्विशेषविद्यानुष्ठाने परिव्राज एवाधिकारोऽवगम्यते 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' इत्यादिवचनैः । तत्र हि मोक्षार्थतया पारिव्राज्यविधानात् । ज्ञानैकसाध्ये मोक्षे साक्षात्कारणत्वासम्भवेन द्वारापेक्षायां 'तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्' इति श्रुतिवचनेन 'निःसारमेव संसारं' इत्यादिस्मृत्या च द्वारतया ज्ञानस्य प्रतिपादनात् । तत्रापि प्रमाणसाध्ये द्वारापेक्षायां संन्यस्य श्रवणं कुर्यादिति वचनेन श्रवणस्य द्वारताप्रतिपादनात् । श्रवणे च दृष्टेन चित्तविक्षेपाभावेनोपयोगसम्भवेनादृष्टं कल्पनीयमिति अवघातविधिवत् प्रकारान्तरेण चित्तविक्षेपाभावसंपादनं वारयन्नियमविधिः पर्यवस्यति । 'नचैवं ब्राह्मणो निर्वेदमायात्, ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति श्रुत्या 'मुखजानामयं धर्मो वैष्णवं लिङ्गधारणम् । बाहुजातोरुजातानां नायं धर्मः प्रश-

Funding by IKS-MoE

स्यते' इति स्मृत्या च ब्राह्मणानामेव संन्यासविधानात् जनकादिष्वात्मविद्याप्रदर्शनमनुपपन्नं स्यादिति वाच्यम् । तेषां

"दिने दिने च वेदान्तश्रवणाद्भक्तिसंयुतात् ।
गुरुशुश्रूषया लब्धात् कृच्छ्राशीतिफलं भवेत् ॥"

इति पापक्षयार्थस्य प्रतिषेधाभावेन शूद्रादिवत् करणे प्रत्यवायाभावेन वेदान्तार्थनिर्णयरूपदृष्टप्रयोजनार्थस्य च सम्भवात् तच्च जन्मांतरे विद्यापरिपाकोपयुक्तं भविष्यति । संन्यासिनस्तु तत्त्वसाक्षात्कारोपयुक्तसकलवैदिकांगसहितश्रवणाधिकारसम्भवादसति प्रतिबन्धेऽस्मिन्नेव जन्मनि विद्या परिपच्यते । दहरोपासनया देवत्वं गतानां तु वैदिककर्मकृतचित्तविक्षेपनिवृत्तेः स्वत एव विद्यमानतया स्वयं दिने बर्हिषि लवननियम इव संन्यासनियमो न प्रवर्त्तते इति प्रैषाद्युच्चारणपूर्वकवैदिकलौकिककर्मपरित्यागात्मकसंन्यासनियमाभावेऽपि ब्रह्मलोक एव विद्यापरिपाकसंभवात् क्रममुक्तिफलसगुणविद्याविधानान्यथानुपपत्त्यासंन्यासं विनापि विद्यापरिपाक इति कल्पनोपपत्तेश्चापुनरावृत्तिश्रवणे न काचिदनुपपत्तिः । अतो विवेकादिसम्पन्नस्य मोक्षपर्यन्तश्रवणाधिकारिणः परिव्राजोऽग्निहोत्रादिकर्मसु अधिकाराभावेन तदकरणे प्रत्यवायाभावात् ॥

न निर्विशेषविद्यानुष्ठानकाले कर्माणि कर्तव्यानि । अतो न निर्विशेषविद्याधिकारिणि विचारितकर्मत्वस्योपयोगोऽस्ति इति सुस्थितम् । ननुपूर्वोत्तरमीमांसयोरेकपुरुषाध्येतव्यताप्रयोजकमेकग्रन्थत्वं शक्यं व्युत्पादयितुम्, तथाहि, अथातो धर्मजिज्ञासेत्यत्र हि अथशब्देन कृत्स्नवेदाध्ययनानन्तर्यमुच्यते । अतःशब्देन कृत्स्नस्य विवक्षितार्थत्वमुच्यते । तदनुसारेण धर्मशब्दः कृत्स्नवेदार्थपर इत्येव वक्तुमुचितम् । कृत्स्नवेदाध्ययनस्य कृत्स्नवेदार्थविचार एवानन्तर्योक्तिरुचिता तदेकदेशाध्ययनमेव धर्मशब्दस्य यथाश्रुतार्थत्वे आनन्तर्यप्रतियोगितया वक्तुमुचितम् । उपनिषदध्ययनान्तर्यस्य धर्मविचारेऽनुपयोगात् । एवं कृत्स्नवेदविवक्षितार्थत्वहेतुरपि धर्मशब्दस्य वेदार्थपरतां न्यायतौल्यादुपदर्शयति । धर्मस्य हि वेदविवक्षितत्वाद्विचारणीयत्वे उच्यमाने यो यो वेदविवक्षितः स विचारणीय इति प्राप्नोति ततश्चोपनिषदर्थस्यापि विचारणीयता प्राप्नोति । वेदविवक्षितत्वाविशेषात् । यद्वा धर्मशब्दः अलौकिकश्रेयःसाधनताप्रवृत्तिनिमित्तकः सन् ज्योतिष्टोमादिवद् ब्रह्मणोपि शक्त्यैवाभिधायकः "एष ह्येव साधुकर्म कारयाति तं यमेभ्यो लोकेभ्यो उन्निनीषते" इति श्रुत्या ब्रह्मणोऽपि श्रेयःसाधनताबोधनात् ननु श्रेयःसाधनतामात्रार्थत्वे श्येनादीनामपि तथात्वात्

Funding by IKS-MoE

धर्मता स्यात् । तद्व्यावृत्त्यर्थं बलवदनिष्टाननुबन्धित्वमपि वक्तव्यम् । तथाच न ब्रह्मसाधारण्यम् 'एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' इतिवचनेन ब्रह्मणोपिबलवदनिष्टानुबन्धित्वादितिचेत् । न । बलवदनिष्टाननुबन्धित्वं किं साधनविशेषणं उत श्रेयोविशेषणम् । आद्येऽपि किं तदविनाभूतत्वं बलवदनिष्टानुबन्धित्वम्, उत तज्जननयोग्यत्वम् । नाद्यः । श्येनादीनामपि प्रायश्चित्ते सति नरकाजनकतया तद्विनाभूतत्वात् धर्मता स्यात् । द्वितीये तु सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति वचनानुसारेणाभिचारफलकत्वस्यापि सिद्धौ नित्यप्रयोगेऽपि सत्यामभिचारकामनायां वैरिविपत्तिफलकत्वस्यापि सम्भवात् बलवदनिष्टजननयोग्यत्वमस्तीति धर्मता न स्यात् । नापि श्रेयोविशेषणं तदिति द्वितीयः पक्षः । तथा सति श्येनादीनां धर्मता स्यात् । तज्जन्यश्रेयसोऽनिष्टानुबन्धनाभावात् । तस्मादेवं बलवदनिष्टाननुबन्धित्वं वक्तव्यम् । बलवदनिष्टप्रयोजकश्रेयोगतोद्देश्यताप्रतियोग्यनुष्ठाननिष्पन्नभिन्नताविशिष्टत्वम् । तच्च श्रेयःसाधनविशेषणम् उद्देश्यताया अनिष्टप्रयोजकत्वं स्वजन्ययागानुष्ठानद्वारकं बोध्यम् । तथाच यदा वैरिविपत्तिकामनां विना दर्शपूर्णमासावनुष्ठीयेते तदा तत्प्रयोगफलपापक्षयगतोद्देश्यताया नरकप्रयोजकत्वाभावेन तत्प्रतियोग्यनुष्ठाननिष्पन्नस्य कर्मणो निरुक्तं बलवदनिष्टाननुबन्धित्वमस्त्येवेति न दोषः । वैरिविपत्त्यर्थप्रयोगे तु निरुक्तं नास्ति इति श्येनादिवत् अस्याधर्मत्वमेव एतादृशं बलवदनिष्टाननुबन्धित्वं ब्रह्मणोऽप्यस्ति । तस्यानुष्ठेयत्वाभावेनानुष्ठाननिष्पन्नभिन्नतायाः सत्त्वात् । तथाच निरुक्तेन प्रवृत्तिनिमित्तेन धर्मशब्दः कर्मब्रह्मसाधारणः सिध्यति । तथाचाथातो धर्मजिज्ञासेति प्रतिज्ञा कर्मब्रह्मसाधारणीति सिद्धम् । एवमेकप्रतिज्ञाक्रोडीकृतत्वात् 'अथातो धर्मजिज्ञासा' इत्यारभ्य 'अनावृत्तिः शब्दात्' इत्यन्तमन्तर्गतेन संकर्षणकाण्डेन सह विंशतिलक्षणीरूपमेकं शास्त्रं सिध्यति । ननु संकर्षेण षोडशलक्षणी कर्ममीमांसा जैमिनिकृता चतुर्लक्षणीब्रह्ममीमांसा च व्यासदेवप्रणीता जैमिनिव्यासदेवयोश्च विरुद्धसिद्धान्ताभिनिवेशोऽवगम्यते । तथाहि शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥ अ० ३॥ पा० २॥ शा० । परामर्शंजैमिनिरचोदनाचापवदतिहि ॥ १ ॥ अ० ३ ॥ पा० ४ ॥ शा० इतिसूत्राभ्यां ब्रह्मसंन्यासापलापं जैमिनिमतत्वेनानूद्य अधिकोपदेशात्तुबादरायणस्यैवंतद्दर्शनात् ॥९॥ अ० ३ ॥ पा० ४॥ शा० ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १६ ॥ अ० ३ ॥ पा० ॥ ४ ॥ शा० ॥ इतिसूत्राभ्यांब्रह्मसंन्यासस्वीकारःबादरायणमतत्वेन दर्शितः । परंजैमिनिर्मुख्यत्वात् ॥ ३ ॥ अ० ४ ॥ पा० ३ ॥ शा० तद्भूतस्यतुनातद्भावोजैमिनेरपि ४० ॥ अ० ३ ॥ पा० ४ ॥ शा० इतिसूत्राभ्यां ब्रह्मसंन्यासयोरुपगमो जैमिनिमतत्वेनापिं दर्शितः इति चेत् । न । विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥ अ०

२ ॥ पा० २ ॥ शा० इति न्यायेन सांख्यमतवत् जैमिनिमतमपि पूर्वोत्तरवचनविरोधेनानादेयमिति. सूचनाय तद्दर्शनोपपत्तेः । तथाच विरुद्धसिद्धान्ताभिनिविष्टकविकृतनिवन्धयोः कथमेकतास्यात् । अपिच निबन्धयोरप्यस्ति विरोधः । आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम् तस्मादनित्यमुच्यते ॥ १ ॥ अ०, ॥ पा० २ ॥ जैमि० ॥ इत्यक्रियार्थानामप्रामाण्यमाशंक्यविधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ॥ ७ ॥ अ० पा० २ जैमि० इति तेषामेवविधिस्तावकत्वेन जैमिनिना प्रामाण्यं व्यवस्थापितम् । इदञ्च वेदान्तवाक्यसाधारणम् आम्नायशब्दस्यवेदमात्रपरत्वात् व्यासदेवेन तु 'शास्त्रयोनित्वात् ॥ ३ ॥ अ० १ ॥ पा० १ ॥ शा० इति वेदान्तानां ब्रह्मणि प्रामाण्यमुपक्षिप्य तत्तु समन्वयात् ॥ ४ ॥ अ १० ॥ पा० १ ॥ शा० इति सूत्रेणार्थवादाधिकरणोक्तं वेदान्तेषु क्रियाशेषत्वं पूर्वपक्षीकृत्यस्वातन्त्र्येण ब्रह्मणि प्रामाण्यं प्रतिष्ठापितम् । एवमेव नवमाध्याये जैमिनितंत्रे 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ॥ ६ ॥ अ० ९ ॥ पा० १ ॥ जैमि० इत्यादि सूत्रे देवतानिराकरणम् । व्यासतन्त्रेतु मन्त्रार्थवादादिप्रामाण्याभ्युपगमेन 'तदुपर्यपि वादरायणः सम्भवात्' ॥ ॥ ३६ ॥ अ० ॥ १ ॥ पा० ३ ॥ शा० इत्यादिना देवताविग्रहादिकं व्यवस्थापितम् तत्कथमेकनिवन्धत्वमितिचेत् । न । तावद्विरुद्धमताभिनिविष्टपुरुषप्रणीतत्वमेकनिबन्धविरोधिविरुद्धाभिप्रायशीलानामपिकिञ्चिदर्थविशेषमुद्दिश्य समयवन्धपूर्वकमेवनिबन्धनिर्मातृत्वोपपत्तेः । दृश्यते हि विरुद्धसिद्धान्ताभिनिविष्टयोरपि वामनजयादित्ययोः काशिकाख्यैकनिबन्धनिर्मातृत्वम् निवन्धतस्तु विरोधोनास्त्येव अथातो धर्मजिज्ञासा इति हि द्वे प्रतिज्ञे एकविंशतिलक्षणीसाधारणी तस्यां अथ शब्दः, कर्मब्रह्मसाधारणः द्वितियातु कर्मकाण्डमात्रविषया तस्यां धर्मशब्दः केवलकर्ममात्रपरः इति प्रतिज्ञाद्वयश्चैकेन सूत्रेणावृत्त्या सुसम्पादमेव । सूत्राणामावृत्त्याऽनेकार्थत्वस्यालङ्कारत्वात्, अत एव 'अथातः' शेषलक्षणम् १ ॥ अ० ३ ॥ पा० १ ॥ जैमि० इति सूत्रं द्विलक्षण्याः परं शिष्टं यावत् किञ्चन लक्षणम् तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणम् ।

इति अविशिष्टदशाध्यायीप्रतिज्ञापरत्वेन व्याख्याय तृतीयाध्यायप्रतिज्ञापरत्वेनापि व्याख्यातम् शेषः परार्थत्वात् ॥ २ ॥ अ० ३ ॥ पा० १ ॥ जै० इति सूत्रं तु द्वितीयप्रतिज्ञायां लक्षणप्रतिपादनपरतया संगतम् तद्वत् चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥ अ० १ पा० ॥ १ ॥ जै० इति सूत्रं द्वितीयप्रतिज्ञायां लक्षणप्रतिपादकतया समनुगतं भविष्यति । तत्रच कर्मणि चोदनायाः प्रामाण्ये प्रतिज्ञाते तत्प्रामाण्यनिरूपणं प्रथमाध्यायार्थत्वेन प्रतिज्ञायते 'तस्य निमित्तं परीष्टिः ॥ ३ ॥ अ० १ ॥ पा० १ ॥ जै० इति तदनुसारेण आम्नायस्य, इति सूत्रे

Funding by IKS-MoE

चोदनासमभिव्याहृतानामेव सिद्धार्थपरत्वेन प्रतीयमानानामप्रामाण्यमाशंक्य 'विधिनात्वेकवाक्यत्वात्' इति सूत्रेण तेष्वेव विधेयस्तावकत्वमुच्यते इति न वेदान्तविषयक 'शास्त्रयोनित्वात्' 'तत्तुसमन्वयात्' इतिसूत्रयोर्विरोधः । न देवतादेवतान्तराभावादितिसूत्रेण न देवानां कर्मण्यधिकारः, स्वोद्देश्यदेवतान्तराभावादितिप्रतिपादयता मन्त्रार्थवादप्रामाण्यानुसारेण जैमिनिना देवतादिकं स्वीकृतमेवेति तदीयतन्त्रगतं नावमिकाधिकरणम् अपूर्वमेव धर्माणांप्रयोजकम् न देवता तत्र तस्य गुणत्वादित्येवमर्थपरम्, नतु देवतास्वरूपनिराकरणपरम् । देवतायाश्च गुणत्वं देवतोद्देश्यकत्यागरूपे यागे उद्देश्यकारकत्वेनेति तत्सत्यपि फलदातृत्वे न प्राधान्येन तेन विरुध्यते अतो न निबन्धतो विरोध इति सिद्धमेकनिबन्धत्वं विंशतिलक्षण्याः । एक निबन्धाध्ययने चैकएवाधिकारी भवति। एवञ्च पूर्वोत्तरमीमांसाध्ययनस्यैककर्तृत्वे सिद्धे युगपदध्येतुमशक्यत्वात् क्रमापेक्षायां यथा अग्निहोत्रयवागूपाकयोरर्थात् क्रम आश्रीयते पूर्वं यवागूपाकस्ततोऽग्निहोत्रहोमः यवागूपाकं विना यवागूरूपद्रव्यासिद्धौ होमस्यैवानिष्पत्तेः, तथा पूर्वमीमांसाया उत्तरमीमांसापेक्षणात् सैव पूर्वं कर्त्तव्या । अर्थक्रमानुसारेण पूर्वमीमांसागतप्रामाण्यविचारः श्रुत्यादिविषयकः सर्वत्रापि वेदान्तविचारेऽपेक्षितः शब्दान्तरादिभिः कृतः धर्मभेदविचारो विद्याभेदविचारेऽपेक्षितः श्रुतिलिङ्गादितत्प्राबल्यविचारः प्रायशोऽपेक्षितः । सर्वत्र श्रुत्यादिभिः कृतः क्रमविचारः सृष्ट्यादिक्रमे अर्चिरादिमार्गक्रमे च अपेक्षितः । अतिदेशादिविचारोपि तस्यैतस्य तदेवरूपं यदमुष्यरूपम् इत्यादिवाक्यार्थनिर्णयेऽपेक्षितः 'प्रदानवदेवतदुक्तम्' ॥४३॥ अ०३॥ पा०३॥ शा०६ कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् इत्यादौसंमतित्वेनपूर्वमीमांसागतन्यायानाम् उदाहृतत्वात् तदर्थज्ञानार्थमप्यपेक्षा-अस्त्येव तथापाठक्रमानुसारेण क्रमः सिध्यति । स्वाध्यायोऽध्येतव्य इति विधिना क्रमविशेषविशिष्टमक्षरराशिं स्वाध्यायशब्दोदितम् अधीयीत इति विधाने व्युत्क्रमेणाध्ययने क्रियमाणे स्वाध्यायाध्ययनत्वासम्भवात् । स्वाध्यायाक्षराणां यः क्रमः तदनुरूपः अध्ययनक्रमः इतिपर्यवसिते वर्णानां स्वतः क्रमासम्भवात् पाठोपाधिकः क्रमः प्राप्नोति । स च पाठोऽध्ययनविधिना विधीयमानोऽध्येतृगतः अक्षरक्रमकल्पको न भवति तस्यैवाद्यापि क्रमविशेषाज्ञान् किन्त्वनादिसम्प्रदायागतः पूर्वपूर्वाध्यापकपाठः । तथाच यथा पूर्वपूर्वाध्यापकपाठानुसारेणाध्ययनक्रमः कल्प्यते तथा तदनुसारेण विचारक्रमोऽपि कल्पनीयः । तथा च कर्मकाण्डस्य पूर्वं पाठात् ज्ञानकाण्डस्य चानंतरं पाठात् तद्विचारयोरपि तथैव क्रमः प्राप्नोति । एवं मुख्यप्रवृत्तिक्रमाभ्यामपि पूर्वोत्तरमीमांसाविचारयोः क्रमः कल्पनीयः । तथाच सिद्धं कर्मविचारान्तरमेव

ब्रह्मविचार इति । अत्रोच्यते । शास्त्रं हि वाक्यविशेषः 'तस्यैकत्वे प्रयोजकमेतत् । अर्थैकत्वादेकं वाक्यं साकांक्षंचेद्विभागे स्यात् ॥ ४६ ॥ अ० २-पा० १-जैमि० इति सूत्रे यद्यर्थशब्दः प्रयोजनपरः तदा एकफलत्वमेकवाक्यतायां प्रयोजकम् यदा प्रधानविशेष्यपरः तदा तदेकत्वमिति यथायथं प्रकृते द्वयमपि नास्तीति दर्शयितुमुभयग्रहणम् । पूर्वोत्तरमीमांसयोरर्थभेदस्तद्ग्रन्थपर्यालोचनयाऽवगम्यते । नचावान्तरार्थभेदेन अवान्तरवाक्यभेदे सत्यपि महावाक्यैक्यवद्धर्मब्रह्मरूपावान्तरार्थभेदे सत्यपि वेदार्थरूपो वा अलौकिकश्रेयःसाधनरूपो वा एको महावाक्यार्थो भविष्यतीति प्रकृते महावाक्यमेकमित्युच्यत इति वाच्यम् । तादृशैकवाक्यताग्राहकप्रमाणाभावात् । यच्च तावदुक्तं प्रतिज्ञासाधारण्यं तदपिन सम्भवति । धर्मशब्दस्य प्रथमसूत्रस्थस्य चोदनासूत्रानुसारेण ज्योतिष्टोमादिमात्रपरत्वावगमात् । चोदनासूत्रं हि 'चोदनाचोपदेशश्च विधिश्चैकार्थवाचकः' इत्यभियुक्तव्यवहारानुसारेण निर्णीतविधिपदैकार्थ्यचोदनाशब्दसहितमलौकिकविधिगम्यश्रेयःसाधनत्वमेव धर्मशब्दप्रवृत्तिनिमित्तं दर्शयति । नचैतत् प्रथमसूत्रस्य प्रतिज्ञाद्वयपरत्वमभ्युपेत्य द्वितीयप्रतिज्ञान्तर्गतधर्मशब्दव्याख्यानपरमिति क्लिष्टकल्पनायां किञ्चिन्नियामकमस्ति । नच प्रथमसूत्रान्तर्गतधर्मशब्दस्य धर्मब्रह्मोभयसाधारण्ये कृत्स्नवेदाध्ययनानन्तर्यप्रतिपादकेनाथशब्देन कृत्स्नवेदविवक्षितार्थत्वरूपहेतुप्रतिपादकेनातः शब्देन चावगते तन्निर्वाहाय तथा कल्पनीयमिति वाच्यम् । वेदविवक्षितार्थत्वरूपहेतुर्हि यदि व्याप्त्यभिप्रायेण प्रयुक्तः स्यात् तदा खलु वेदविवक्षितत्वात् धर्मस्य विचारणीयत्वे उच्यमाने तत्सामान्याद्ब्रह्मणोऽपि विचारणीयत्वं प्राप्नोति इति धर्मशब्द उभयपरः स्यात् । तत्र यदि यो यो वेदविवक्षितः स विचारणीय इति व्याप्तिः प्रतिपाद्यते तदा दृष्टान्तालाभः । यदि च यो यो वेदविवक्षितार्थः सोऽधीतवेदविचारणीयः इति व्याप्तिर्विवक्षिता तदा असच्छास्त्रविवक्षितोऽप्यर्थोऽधीतवेदविचारणीय इत्यपि दूषणं प्राप्नोति । तस्मान्नायं व्याप्त्यभिप्रायेण प्रयुज्यते किन्तु विषनिर्हरणादि मन्त्रवत् प्रतीयमानेऽर्थे वेदतात्पर्याभावात् तद्विचारो व्यर्थः । प्रमाफलपर्यवसानासम्भवादिति शंकायामविवक्षाकारणाभावात् वेदस्य स्वार्थे विवक्षाऽस्त्येवेति धर्मविचारः कर्त्तव्यः इति एतावन्मात्रमुच्यते । नतु तत्र वेदस्य कृत्स्नत्वमप्याहत्यैवोच्यते किन्तु पूर्वकाण्डस्य विवक्षितत्वादिति विशिष्य नोच्यते । तथोक्तौ हि तद्व्यावर्त्यो वेदान्तभागः इति सोऽविवक्षितार्थ इति शंका प्रसरेदिति तत्सामान्यात् पूर्वकाण्डार्थोऽप्यविवक्षितोऽस्त्विति पुनः शंका प्रसरेदिति अथशब्देनापि धर्मविचारस्य वेदाध्ययनानन्तर्योक्तौ न वेदः पूर्वभागेन विशेषयितुं शक्यते । पूर्वभागमात्राध्ययनस्य स्वाध्यायविहितत्वाभावेन तदानन्तर्यो-

Funding by IKS-MoE

क्तिर्निर्मूला स्यादिति तथाच शंकाविशेषोन्मेषो माभूदिति अथातःशब्दार्थयोः पूर्वभागानिवेशमात्रेण लक्षणसूत्रपर्यालोचनया प्रतीयमानं सूत्रार्थं परित्यज्यार्थान्तरकल्पनमनुचितम् । नच धर्मशब्दस्य धर्मब्रह्मोभयसाधारण्याभावे 'ये च वेदविदो विप्रा ये त्वध्यात्मविदो जनाः ॥ ते सर्वेपि वदन्त्येनं कृष्णं धर्मं सनातनम् । इति धर्मशब्दस्य परमेश्वरसाधारण्येन व्यवहारोऽनुपपन्नः स्यादिति वाच्यम् । यथा 'प्रणम्रेषु महीपेषु प्रसादो मूर्तिमानयम्' इति मूर्तप्रसादरूपत्वेन स्तुतिपरं तथा सनातनधर्मत्वेन स्तुतिपरमेव नतु तच्छक्तिनिर्णायकमिति । अत एव व्यासदेवेनापि 'फलमत उपपत्तेः' ॥ ॥ ३८ ॥ अ० । पा० २॥ शा० इत्यतःशब्देन प्रकृतं ब्रह्मफलदातृत्वेनोपक्षिप्य तत्प्रतिद्वन्द्वितया जैमिनीयमतोपन्यासे ज्योतिष्टोमादिमात्रपरो धर्मशब्दः एव' । धर्मं जैमिनिरतएव ॥ ४० ॥ अ० ३॥ पा० २॥ शा० इति प्रयुक्तः 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' इति सृष्ट्यारम्भे देवैः क्रियमाणे धर्मे प्रथमत्वव्यवहारोऽपि धर्मशब्दस्योभयसाधारण्यं व्यावर्त्तयति । अन्यथा ततः पूर्वं ब्रह्मरूपधर्मस्य विद्यमानतया देवानुष्ठीयमानयज्ञस्य प्रथमधर्मत्वं न स्यात् । अतो न धर्मपदशक्तिपर्यालोचनायामपि साधारणी प्रतिज्ञा लभ्यते । 'आम्नायस्य क्रियार्थत्वात्' इत्यादिपूर्वपक्षसूत्रपर्य्यालोचनया वेदान्तर्गतसिद्धवस्तुप्रतिपादककृत्स्नवाक्यसाधारणं पूर्वपक्षः प्रतीयते । तदनुसारेण सिद्धान्तोऽपिसर्वसाधारण इत्येव प्रतीयते । नच तत्क्लेशेन व्याख्याय शास्त्रैकत्वसमर्थने किंचन प्रमाणमस्ति । न च यथाश्रुतजैमिनिसूत्रपर्य्यालोचनया विरोधेऽवगम्यमानेऽपि व्यासेन तेषां स्वविरुद्धमर्थान्तरं परिकल्प्य तदेकशास्त्राभिप्रायेण सूत्राणि प्रणीतानीतिकल्पनायां किंचिन्नियामकमस्ति, प्रत्युत तन्मतोपमर्दकतयैव सूत्रप्रणयनस्य स्वरसतः प्रतीयमानत्वात् ।

नच— पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ १ ॥

इति योगियाज्ञवल्क्योक्त्या मीमांसाया एकत्वेन व्यवहारोऽस्ति, अन्यथा विद्यास्थानानां पञ्चदशसंख्याकत्वं स्यादिति वाच्यम् । तथात्वे पुराणानामपि सर्वेषामेकग्रंथता स्यात् एवं न्याययोरप्येकग्रन्थता स्यात् । नचैकवेदार्थोपयोगितया तदिष्टमेवेति वाच्यम् । तथात्वे चतुर्दशत्वमपि विद्यास्थानानां न स्यात् । वेदांगेष्वपि षडंगत्वव्यवहारो लुप्येत । तस्मात् एकेन मीमांसात्वेन धर्मेण भिन्ननिबन्धयोः क्रोडीकारमभिप्रेत्य चतुर्दशत्वेन परिगणनमिति न तावता एकग्रन्थत्वसिद्धिरिति । अस्तु वा एकग्रन्थत्वसिद्धिः तथापि कथं कृत्स्नमेकेनाध्येयमितिसिध्यति । न ह्येको ग्रन्थः कृत्स्न एकेनाध्येय इत्यत्र किंचिन्नियामकमस्ति, अपितु यस्य यावानंश उपयुक्तस्तेन तावानध्येयः । नहि ज्वरनिवृत्तिकामेन तन्निवर्तकौषधिपरिज्ञानाय ज्वरचिकित्सामारभ्य

वाजीकरणान्तवैद्यशास्त्रं पठनीयम्, तत्र तथा निर्बन्धकशास्त्राभावात् । अधिकारिभेदाच्च न कृत्स्नचिकित्साशास्त्राध्ययनमेकेनेति यदुच्येत तत्प्रकृतेऽपि समानम् । अधिकारिभेदस्य दर्शितत्वात्कर्मावबोधकामस्तत्राधिकारी ब्रह्मावबोधकामश्च वेदान्तविचारे इति न विचारशास्त्रद्वयमेकेन पठनीयमित्यत्रकिञ्चिद्वचनमस्ति । स्वाध्यायविधिस्त्वक्षरावाप्तिपर्यन्तो न विचारद्वयस्यैककर्तृकत्वं प्रयोजयतीति न कश्चिद्विरोधः ॥

किञ्च कर्मफलस्वर्गादेरनित्यत्वेन विरक्तस्य न तत्राधिकारः । नच दृढविविदिषार्थमपि तत्राधिकारः कल्पनीयः । जन्मान्तरकृतैः कर्मभिरपि तत्सिद्धिसम्भवात् । नितरां श्रेयो निश्रेयसं ब्रह्मस्वरूपभूतं नित्यं सुखं तत्फलकं ब्रह्मज्ञानम् । तच्च धर्मज्ञानवन्न स्वोत्पत्त्यनन्तरं फलात् प्राचीनमान्तरमनुष्ठानमपेक्षते । तथा च मोक्षस्य न ज्ञानोत्पाद्यतया ज्ञानफलत्वम् । अपितु कण्ठचामीकरवत् ज्ञानाभिव्यंग्यतया । तथाच ज्ञानैकफलस्य मोक्षस्य न कर्मफलवदनित्यत्वमिति भावः । मोक्षजनकब्रह्मज्ञानफलकत्वं विचारस्य चित्तदोषनिवृत्तिद्वारा द्रष्टव्यम् । तथाच विचारयोः फलभेदात् भेद इतिसिद्धं समीहितम् ॥

अत्रैव स्वपरिशोधितशास्त्रदीपिकाया भूमिकायां श्रीभाष्यकाराणां मतमुज्जीवयन्तोऽस्मद्गुरुचरणा अपि वेदाविरोधितर्कोपन्यासपुरःसरं वेदार्थविचाररूपत्वेन हेतुना पूर्वोत्तरमीमांसयोरेकशास्त्रतां साधयन्तोऽन्यानपि विचारणीयान् कतिपयतर्कान् प्रतिपादयन्ति । पूर्वं तावत् नचास्य हेतोः समीहितसाधकत्वं नह्यभेदविरोधिविरुद्धधर्माक्रान्तयोः पदार्थयोः केनचिदुभयवृत्तिधर्मेणैक्यं सम्भावयितुं शक्यम् । अन्यथा पृथिवीजलयोरपि रसवत्त्वेनैक्यं प्रसज्येत । विरुद्धधर्माक्रान्तत्वञ्च पूर्वोत्तरमीमांसयोः कर्मकाण्डज्ञानकाण्डप्रतिपादकत्वेनातिरोहितमेव । ज्ञानकर्मणोर्विरोधश्च 'ज्ञानाग्निदग्धकर्माणं' 'ज्ञानाग्निः सर्व कर्माणि भस्मसात् कुरुते तथा' इत्यादि भगवद्वाक्यैः स्पष्ट एव प्रतीयते इत्यहोरात्रवद्विरुद्धार्थप्रतिपादकयोः पूर्वोत्तरमीमांसयोः कथमेकता स्यादिति । अपिच सायणभाष्यादावनैकान्तिकोऽयं हेतुः । नहि सायणादिभिर्वेदविरोधितर्कोपन्यासपुरःसरंवेदभाष्यमभाषि, नापि तद्वेदार्थविचाररूपत्वाभाववत् तस्मादनैकान्तिकमिदं लिंगं न प्रकृतसाध्यसाधनायालमिति निश्चीयते ॥

अथ पूर्वकाण्डे तत्तदर्थावबोधकश्रुतिषु तत्तत्प्रकरणावसानेनाभ्यासोऽर्थपरिसमाप्तिबोधको दृश्यते, वेदान्तेषु तु ' न स पुनरावर्तते न स पुनरावर्तते ' इत्याद्यभ्यासोऽर्थपरिसमाप्तिबोधको दृश्यते अतः पूर्वोत्तरमीमासयोरैक्यं सम्भाव्यमिति वाच्यम् । नष्टप्रचारे उच्छिन्नशाखाप्राये पूर्वकाण्डे तत्तदर्थबोधकश्रुतिषु तत्तत्प्रकरणावसानेऽर्थपरिसमाप्तिबोधकोऽभ्यासो नास्तीति कथं श्रीचरणैर्निश्चीयते । नाहि

यथोत्तरमीमांसायां विचारितविद्यानां तत्र तत्रोपनिषत्स्वानुपूर्व्या उपलम्भः तथा पूर्वमीमांसाविचारितश्रुतीनामानुपूर्वी कुत्रचिदुपलभ्यते येनाभ्यासो निश्चीयेत अपिचाम्नायमात्रस्य मुख्यतया क्रियार्थकत्वमतदर्थानाञ्चानर्थक्यमाशंक्य "विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इतिसूत्रेणेतरयावच्छ्रुतिवाक्यानां विधिस्तावकत्वेनसाफल्यंसिद्धान्तयन् महर्षिजैमिनिः श्रुतिदृष्टरीतिमनुकुर्वन्नापि कथंपादान्ते वा प्रकरणान्ते वा पदावृत्तिं वा वाक्यावृत्ति वा कुर्य्यात् । परमर्षिर्व्यासदेवश्च "तत्तुसमन्वयात्" इतिसूत्रेणाम्नायमात्रस्य साक्षात्परंपरया परब्रह्मार्थकत्वेनं सिद्धान्तयन् साक्षात् तत्परश्रुतिदृष्टरीतिमनुकुर्वंश्चपादान्ते वा प्रकरणान्ते वा कथं न वाक्यावृत्तिं वा सूत्रावृत्तिं वा कुर्य्यात् । नहि सहोदरयोरपि चैत्रमैत्रयोर्देवदत्तेन शिष्येण चैत्रस्य यत्र प्रामाण्यं गृहीतमिति यज्ञदत्तो गुरुरपि तस्य तत्रैव प्रामाण्यं गृह्णीयान्नत्वन्यस्यान्यत्रेति नियमः किन्त्वावयोरिव गुरुशिष्ययोरपि व्यासजैमिन्योर्भिन्नसिद्धान्ताभिरुच्योरेकेन परब्रह्मपरश्रुतीनां मुख्यत्वाभिप्रायेण तद्दृष्टरीतिमनुकुर्वता वाक्यावृत्तिरादृता नत्वितरेण विधिवाक्येषु मुख्यत्वाभिप्रायवतेति पूर्वोत्तरमीमांसयोः पृथक् शास्त्रत्वाभ्युपगमे न कश्चिद्विरोधः । किञ्च वेदान्तवाक्येष्वपि किं यत्रार्थपरिसमाप्तिस्तत्रैवाभ्यासः यद्वा यत्राभ्यासस्तत्रैवार्थपरिसमाप्तिः नाद्यःवाजसनेयिब्राह्मणोपनिषदि भूयसां तत्तद्विद्यारूपार्थानांतत्र तत्र समाप्तिसत्त्वेपि अभ्यासापरिदर्शनात् अतएव न द्वितीयः तत्रैव कुत्राप्यभ्यासाभावेनार्थपरिसमाप्त्यभावप्रसंगात् तथाच तत्रोपदिष्टब्रह्मविद्यादिरूपाणामर्थानांपर्यवसानमन्यत्रापेक्षणीयं भवेत् नचैतद्विदुषामभिमतमिति श्रीचरणा एवास्मिन्नर्थे साक्षिणस्सन्तु—अपिच पूर्वकाण्डेपिऋग्वेदीयैतरेयब्राह्मणे पञ्चिकान्तेऽध्यायान्ते च 'एकविंशत्या एकविंशत्येति' 'भवति भवति' इत्यादिरूप एकपदाभ्यासो दृश्यते तथा ऐतरेयारण्यकेपि आरण्यकान्ते 'अह्नोरूपमह्नोरूपम्' इत्यादि पदद्वयस्याध्यायान्तेच ' भवन्ति भवन्ति ' इत्याद्येकपदस्याभ्यासो दृश्यते अतो नाभ्यासस्यार्थपरिसमाप्तिबोधकत्वं ।किन्तु सायणभाष्याद्युक्तरीत्याऽध्यायपञ्चिकादिसमाप्तिसूचकत्वमेव निश्चीयते ।

अत एव तु 'द्वादशाहवदुभयविधं बादरायणोऽतः अ० ४ पा० ४ सू० १२ इत्युत्तरकाण्डे पूर्वकाण्डोदितार्थमुदाहरणरूपेणावलम्ब्य पूर्वोत्तरमीमांसयोःपृथक् शास्त्रतां सूचयामासुः श्रीव्यासदेवाः । एकशास्त्रत्वेतु 'द्वादशाहवत्' इत्युदाहरणमेव भज्येत नहि तच्छास्त्रप्रोक्ता अर्थास्तच्छास्त्र एव दृष्टान्तीभूताः कस्यचित्स्वार्थं साधयन्त उपलभ्यन्ते नापि यदुदाहरणत्वेनोपन्यस्तं तदुपजीव्यं भवति अन्यथा 'पञ्चवृत्तिर्मनोवद्व्यपदिश्यते' १२ अ० २॥ पा० ४॥ शा० ॥ इत्युत्तरकाण्डे प्रमाणविपर्ययविकल्प-

निद्रास्मृतयः, इत्यादि योगशास्त्रप्रसिद्धा मनसः पञ्चवृत्तयो गृह्यन्ते तस्याप्युपजीव्यत्वमुत्तरमीमांसया सहैक्यञ्च स्यात् ।

अपिच श्रुतिस्मृत्योः प्रत्यक्षानुमानशब्दाभ्यां व्यवहरणेन व्यासजैमिनितन्त्रयोः समानतन्त्रत्वेऽपि न द्वयोः संभूयैकतन्त्रता अन्यथा परस्परसिद्धसंकेतसंग्रहमात्रेण तन्त्राणामेकतन्त्रत्वे 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानपरोधात् । अ० १ पा० ४ सू० २३ ॥ इत्युत्तरकाण्डे प्रकृतिशब्देन कारणग्रहणे सांख्यशास्त्रेणैक्यं स्यात् अतएवोभयत्रापशूद्राधिकरणमपि पूर्वोत्तरमीमांसयोः पृथक्शास्त्रत्वानुमापकमन्यथा यावत् क्लिष्टकल्पितप्रयोजनानां तत एव सिद्धिसम्भवेऽपशूद्राधिकरणं व्यर्थं स्यादेव । अपिच ॥

'इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥ १ ॥

इतियाज्ञवल्क्यवचनमपि न सिद्धसाध्यरूपे धर्मद्वैविध्ये प्रमाणम् किन्तु 'इज्याचारादीनां मध्ये योगेनात्मदर्शनरूपं धर्म्मं परमत्वेन बोधयति तथाच योगशास्त्रोक्तोपासनाऽपरपर्यायमात्मदर्शनमेव परमो धर्मः ननूत्तरमीमांसानिरूप्यः तत्र ब्रह्मण एव निरूप्यत्वेन पृथक् प्रतिज्ञातत्वात् । अत एव पूर्वोत्तरमीमांसयोः पृथक्शास्त्रत्वेशास्त्रषट्कादिव्यवहारोऽप्युपपद्यते नायं व्यवहारोऽर्वाचीनो यदवान्तरविशेषमादायापि समर्थनीयो भवेत् किन्तु—

बाह्यस्तेनाभिभाषी बहिरुदवसितं पाति तर्कोऽप्रतिष्ठो ।
मीमांसा प्रातिहार्यं भजति गुणगणं यस्य संख्याति सांख्यः ॥
हृत्पीठे योगशुद्धे निहितमुपनिषद्वाहवृन्दैः परं मे ।
भाग्यं श्रीलक्ष्मणार्यो जगति विजयते यस्य लेशाः शिवाद्याः ॥ १ ॥

इति भारतटीकाद्ये नीलकण्ठः 'षड्दर्शनानि मेंऽगानि' इति कुलार्णवे शंकरः 'सात्त्विकंतत्रवेदान्तंमीमांसाराजसंमतम्' इतिदेवीभागवतेव्यासः । 'दर्शनानि षडेवाहि इतिच, इत्यादिप्रमाणैरत्यन्तप्राचीन एव एवं युक्तिप्रमाणसहस्रेण सिद्धस्य' शास्त्रषट्कादिव्यवहारस्यावान्तराविशेषमादाय समर्थनमप्यनुचितमेव फलजिज्ञास्यभेदेन पूर्वोत्तरमीमांसयोर्भेदाभिधानं तूक्तमेव । अत एव जिज्ञास्ये भूतत्वभव्यत्वलक्षणवैलक्षण्यं पुरस्कृत्य क्रमोपक्रान्तयोःपूर्वोत्तरमीमांसयोः क्रमविवक्षाऽसम्भवाभिधानमपि साधु यतो ज्ञानजन्यचिकीर्षया यत्ने सति यागादिर्धर्मो भवति तथाच धर्मजिज्ञासासूत्रगतधर्मशब्दो वस्तुगत्या जन्यं यच्छ्रेयःसाधनं तदेव प्रतिपादयतीतिप्रथमसूत्रपर्यालोचनयैवोत्पद्यमानो भव्यो विषयः सिद्धयति भूतं च निर्विकारं नित्य-

निर्वृतं सदासिद्धस्वभावमत एव न पुरुषव्यापारापेक्षा नच भूतब्रह्मनिरूपणपरे शास्त्रे प्रतीकाद्युपासनाया अपि क्रियासमभिहारेणाभिधानात् पूर्वोत्तरमीमांसयोः क्रमविवक्षाऽसम्भवाभिधानमयुक्तमेवेति वाच्यम् वेदान्तानां निर्विशेषप्रकरणगतानां प्राधान्येनाखण्डवस्तुमात्रपरत्वं नतूपासनापरत्वं तस्याः तत्र प्रासङ्गिकत्वात् इतितु “अथातोब्रह्मजिज्ञासा’ इतिप्रथमसूत्रपर्य्यालोचनयैव निश्चीयते अन्यथा ‘अथातोब्रह्मोपासनाजिज्ञासा’ इत्येवासूत्रयिष्यत् द्वन्द्वानन्तरंशेषलक्षणषष्ठ्याचसमीहितसिद्धिरप्यभविष्यत् अतो लोके सहोदरेषु सबलयोर्ज्येष्ठकनिष्ठयोः निर्बलस्य मध्यमस्यान्यतरेणसह गौणतयानिर्वाहवदुपासनाकाण्डस्यापिनिर्वाहः साधुरेव नच यथा यत्किञ्चित्स्वाध्यायाध्ययनानन्तर्यं धर्मजिज्ञासायांब्रह्मजिज्ञासायाञ्च समानमेवं नित्यनैमित्तिकादियत्किञ्चित्कर्माधिगमानन्तर्यं ब्रह्मजिज्ञासायामपि सुवचं यतो भवत्पक्षेपि-संन्यासिनामेव ज्ञानाधिकारितायाव्यवस्थापनेन संन्यासप्रतिनियतकर्मविगमानन्तर्यस्य भवतोऽप्यापतितत्वात् ब्रह्मचर्यस्य च सर्वाश्रमप्रकृतित्वेन तदनन्तरमेव संन्यासाधिकारिताया वक्तव्यत्वेन तदवगमानन्तर्यस्यावश्याभ्युपेयत्वादिति वाच्यम्।संन्यासब्रह्मचर्यप्रतिनियतस्मार्तकर्मविगमानन्तर्यं ब्रह्मजिज्ञासाया वक्तव्यत्वेपि पूर्वकाण्डाभिहितश्रौतकर्माधिगमानन्तर्याभिधानस्यायुक्तत्वात् तथाच कथं ‘संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वासिद्धिरिति, इतिवाक्यंसार्थकं स्यात् । अत एव विदुरधर्मव्याधादीनां ब्रह्मविदां पुराणेषु कीर्तनमपि साधूपपद्यते नहि यथा श्रौतकर्मणां किञ्चिन्न्यूने निष्फलत्वं तथा वेदान्तरूपस्वाध्यायस्यापि रूपान्तरेणाध्ययने श्रवणे वा निष्फलता भवति रूपांतरेण श्रवणञ्च ‘श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः’ इत्यादिवाक्यैः स्पष्टमेव । नच अधीत्य विधिवद्वेदान् पुत्राँश्चोत्पाद्य धर्मतः । इष्ट्वाच शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत्’ इति स्मृतिः कर्मस्वधिकृतस्यैव स्पष्टं मोक्षाधिकारं ब्रूते अतःकर्मब्रह्ममीमांसयोः शेषशेषिभावोपि इतिवाच्यम् ‘यदहरेव विरजेत्तदहरेव प्रव्रजेत्’–इत्यादिश्रुत्या क्रमविवक्षानियमस्य निरस्तत्वात् नच कर्मणामदृष्टद्वारा सामान्यतः कार्यमात्रं प्रति साधारणकारणत्वेऽपि तत्तत्कार्यविशेषे तत्तदसाधारणरूपेणैव कारणतायावक्तव्यत्वात् असाधारणकारणत्वमप्यावश्यकमिति रूपविशेषेण साधारणासाधारणकारणतायाः सुवचतया वेदान्तवाक्यजन्यवाक्यार्थप्रत्ययोत्पत्तयेऽपि गुणप्रधानभूतपूर्वापरपदार्थाकांक्षासन्निधियोग्यतानुसन्धानवत्तेषामनुसन्धानमप्यावश्यकमितिवाच्यम् पूर्वोक्तप्रकारेण कथञ्चित्कर्मणां विविदिषोत्पादकत्वेऽपिशाब्दबुद्धावकिञ्चित्करत्वान्नह्याकांक्षादिसामग्रीसमवधाने शाब्दबुद्धिः स्वात्मोत्पत्तौ विदिदिषामन्तराकिञ्चिदप्यपेक्षते अन्यथा ‘दशमस्त्वमसि-इत्यादौ शाब्दबुद्ध्यभावप्रसंगादत्रैव वेदान्ताविरुद्धतन्मूलन्यायबलेनयोग्यत्वान्नधा

Funding by IKS-MoE

रणे तद्भिन्नस्य कर्मादेरन्यथासिद्धत्वमपि स्पष्टमेवेति सिद्धं साधनचतुष्टयसम्पत्त्यानन्तर्यार्थकत्वमथातोब्रह्मजिज्ञासेतिसूत्रनिष्ठाथशब्दस्येति सर्वमवदातम् एवमधिकारिविषयप्रयोजनाद्यनेकभेदभिन्नयोः पूर्वोत्तरमीमांसयोः पृथक्शास्त्रत्वेसिद्धे तत्त्वमस्यादिमहावाक्योत्थाखण्डार्थबुद्धिरेवाज्ञानतत्कार्यं विनाशयन्ती कैवल्यं सम्पादयतीत्यपि निर्विवादमेव ॥

यत्तु कश्चिदुदासीनो बालरामःस्वपरिशोधितयोगभाष्यस्थयोगतत्त्वसमीक्षाख्यभूमिकायां वेदान्तशास्त्रसिद्धान्तमुन्मूलयन्निव “प्रसंख्यानधर्ममेघसम्प्रज्ञाताद्यवस्थापन्नं ध्यानं विज्ञानजननद्वारा कैवल्यहेतुः, ज्ञानप्रसादपरवैराग्यध्रुवस्मृत्याद्यवस्थापन्नं च साक्षात्कैवल्यहेतुः” इत्याद्यनल्पजल्पितैर्ध्यानमेव मुख्यतयाकैवल्योपायत्वेन व्यवस्थापयति तदपि ‘ज्ञानादेव कैवल्यं नान्यः पन्था विद्यते अयनाय’ ‘नहि ज्ञानेन सदृशं ज्ञानं लब्ध्वा परां शान्ति’ ‘सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते’ इत्यादिश्रुतिस्मृतिविरुद्धत्वान्मन्दधियामेव शोभनम्। नच या विषयभोगवासना सोपनिषच्छ्रवणांगभूतया योगांगयमादिसम्पत्त्या निवर्तते प्रमाणप्रमेयगतासम्भावना तु श्रवणमननाभ्यां निवर्तिष्यते इति न तदर्थंनिदिध्यासनाद्यपेक्षा तथापि या तु यद्यपि वेदान्ता ब्रह्म बोधयन्त्येव ब्रह्मच केनापि मानेन न बाधितमथापि तदहं न साक्षात्कुर्वे किन्तु तन्ममापरोक्षमेव भाति इत्यादिभ्रान्तितत्संस्कारपरंपरारूपा विपरीतभावना सा यावदनुवर्त्तिष्यते न तावद् विद्याऽप्रतिबद्धं स्वफलं प्रसोतुमर्हत्यतस्तदपनोदनपुरःसरमुपनिषद्भिर्बोधितं सर्वमानाबाधितं सच्चिदादिलक्षणं ब्रह्मैवाहमस्मि तच्च सर्वदा साक्षात्कुर्वे इत्येवं नैजं रूपमध्यक्षयितुं विज्ञानावस्थापर्यन्तं निदिध्यासनमवश्यं शरणीकरणीयमिति वाच्यम्। वेदान्तशास्त्रे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नस्य सम्यक् श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वंपदार्थविवेचनपूर्वकमहावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षोभवतीति सिद्धान्तितम् तत्र “शृण्वन्तोऽप्यत्र बहवो यं न विदुः” इत्यादिश्रुत्या श्रुतोपनिषत्कस्यापि बुद्धिमांद्यादिनाकेनचित्प्रतिबन्धेन वाक्यार्थविषयापरोक्षप्रमित्यनुत्पत्तौ तदुत्पादनद्वारा निदिध्यासनादीनां कथंचिदुपयुक्तत्वेपि तेषां साक्षात्कैवल्यसाधनता तु वेदान्तबहिष्कृतेषुतमोवहेषु मन्देष्वेव शोभते नतु विज्ञेष्विति स्पष्टमेव। नच प्रसंख्यानापरपर्यायस्य निदिध्यासनस्य ब्रह्मसाक्षात्कारकरणत्वे “ततस्तु तं पश्याति निष्कलंध्यायमानः” “अथतद्दर्शनाभ्युपायो योगः” श्रद्धाभक्तिध्यानयोगादवेहि” “अपि संराधने प्रत्यक्षानुमानाभ्याम्” २४ ॥ अ० ३ ॥ पा०२॥शा० युञ्जन्नेवं सदात्मानं योगी नियतमानसः।शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥ त्यादिश्रुतिस्मृतिवचनानि प्रमाणानीति रेकणीयम्। प्याद्रप्रिय ! न वयमिमानि

Funding by IKS-MoE

प्रमाणानि नैव सन्तीति निषेधयामः किं तर्हि तेषां मन्दाधिकृतोद्देशेन प्रवृत्तिरिति वेदान्तहार्दं बोधयामः तथाहि श्रवणमननाभ्यां निर्विचिकित्से विषये स्थापितस्य धारणावतश्चेतस एकाकारवृत्तिप्रवाहत्वमेव निदिध्यासनं वाच्यम् तदेवच "तत्र प्रत्ययैकतानताध्यानम्" इतिसंक्षिप्तशब्दपरम्परया कीर्तयन्ति जरद्विद्न्तः नत्वस्थेमबहुललोलीभूत, इत्यादि प्रकृतानुपयुक्तशब्दव्यूहेन । एतादृशध्यानाभिप्रायेणैवं भगवान् परमप्रियमर्जुनमभिमुखीकृत्य "आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत्" इत्यादिपूज्यवचनविशेषैः साधारणजनतामुपदिदेश । भूयश्च 'योऽयं योगस्त्वया प्रोक्तः, चंचलं हि मनः कृष्ण, इत्याद्युक्तया भगवदुक्तेर्थे स्वात्मानधिकारं सूचयन्तं ' अयतिः श्रद्धयोपेतः, इत्यादिना जन्मान्तरीयसद्गत्यभिप्रायेण जिज्ञासयन्तश्चार्जुनं भगवानपि 'प्राप्य पुण्यकृतांल्लोकान्' 'यतते च ततो भूयः संसिद्धौ कुरुनंदन' 'अनेकजन्मसंसिद्धस्ततो याति परांगतिम्' इत्यादिनाषष्ठेसविस्तरमभ्यासयोगं निरूप्य पश्चात् सप्तमे ज्ञानी त्वात्मैव मे मतम्' 'बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते' इत्यादिना ज्ञानविज्ञानयोगमुक्तवान् अतो ज्ञायते न ध्यानापरनामकनिदिध्यासनस्य ब्रह्मसाक्षात्कारे साक्षात्कारणत्वं किन्तु भगवदुपदिष्टमार्गेण जन्मपरंपरायां कृतपरिश्रमस्यैव चरमे जन्मनिचोपासनाद्विमलस्वान्तस्यपटुकरणस्याधिकारिणो गुरुमुखान्महावाक्यश्रवणमात्रेणाप्रतिहतस्वात्मसाक्षात्कारो भवतीति नाविदितं वेदान्तविदाम् अत एव 'तरति शोकमात्मवित्' ' सयोहवैतत्परमं ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्मविदाप्नोति परम्' आचार्यवान् पुरुषो वेद' 'आत्मा वा अरे द्रष्टव्यः' 'तंत्वौपनिषदंपुरुषंपृच्छामि' पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥ अ० ॥ ३ ॥ पा० ॥ ४ ॥ शा० इत्यादि श्रुतिस्मृतिवाक्यानामपि स्वार्थे प्रामाण्यं सम्पद्यते अत एव च

"विपर्यस्तोनिदिध्यासेत्किंध्यानमविपर्ययात् ।
देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम् ॥ ६१ ॥
अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुम् ।
विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ॥ ६२ ॥
प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते ।
कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ॥ ६३ ॥
विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तुते ।
अबाधिकां व्यवहृतिं पश्यन् ध्यायाम्यहं कुतः ॥ ६४ ॥
विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥ ६५ ॥"

Funding by IKS-MoE

इत्यादीनि वृद्धवाक्यान्यपि स्वार्थेसार्थकानि भवन्ति अन्यथा वेदान्तसिद्धान्त एव व्याकुलीकृतः स्यादिति विदांकुर्वन्तु सूक्ष्मधीकाः सुधियः ।

किञ्च भवदीयं तत्र प्रत्ययैकतानतास्वरूपं निदिध्यासनापरनामकं ध्यानं तद्वति तत्प्रकारात्मकं वा तदभाववति तत्प्रकारात्मकं वा, आद्ये तदपि परोक्षध्येयप्रत्ययात्मकमपरोक्षध्येयप्रत्ययात्मकं वा, आद्ये परोक्षस्य विषयस्य वर्षसहस्रेण ध्यानशतेनाप्यपरोक्षीकर्तुमशक्यत्वात् तथाच कथं कैवल्यसम्पादकं तद् अदृष्टद्वारकत्वेन चेत् तर्हि वेदान्तसिद्धान्त एव व्याकुलीकृतः स्याद्यतो नहि वेदान्तेषु कुत्राप्यदृष्टस्य कैवल्यसम्पादकत्वं निरूपितमिति वृद्धिमिच्छतो मूलमपकिरतो गतं स्यादिति द्वितीयेपि ध्येयं पूर्वं कथमपरोक्षीकृतं यद्यद्विषयिका पश्चात् 'तत्र प्रत्ययैकतानताजाता ततोऽपि पूर्वस्माद्ध्यानाच्चेत्पूर्वधानव्यवस्थापातः गुरुरवश्रवणमात्राच्चेत्सिद्धं नःसमीहितं यतो वयमपि शब्दादेव ध्येयसाक्षात्कारं स्वीकुर्मः प्रथमद्वितीयेऽपि स्वरूपतो विषयतश्च सर्वथा मिथ्याभूतायास्तत्र प्रत्ययैकतानतायाः कदापिकैवल्यसम्पादकत्वासम्भवात् तस्माद्ध्यानस्य स्वान्तस्थैर्यमन्तरा सर्वथाऽनुपयुक्तत्वे सिद्धेऽकामेनापि गुरुमुखनिःसृतमहावाक्यादेव स्वात्मसाक्षात्कारकरणमङ्गीकरणीयमित्यलं वृथा प्रयासेनेति । न च संवादिभ्रमात् प्रवृत्त्यापि मणिकिरणेमणिबुद्ध्या मणिलाभवत् यस्मिन् कस्मिंश्चिदध्यस्तध्येयविषयके ध्याने सत्यपि सर्वाध्यस्ताधिष्ठानं चिदात्मकं स्वात्मब्रह्म स्वयमेव संस्फुरिष्यतीति वाच्यम् । अङ्ग वंचितोसि सिद्धान्तात् प्रकृतानुपयुक्तैर्मिथ्या भूतैर्दृष्टान्तैः यतः संवादिभ्रमात्प्रवृत्तिरपि स्वात्मसम्पत्तये कथञ्चिद्विषयसादृश्यमपेक्षते नहि परस्परविपरीतस्वभावयोश्चिदचिदोः कथञ्चित्सादृश्यं शक्यतेऽपि वक्तुं तथाच कथंकारं समीहितसिद्धिः, अस्ति भाति प्रियात्मना सर्वत्र साजात्यं सिद्धं चेत् तदप्यनाहार्यप्रत्ययविषयत्वेन वा आहार्यप्रत्ययविषयत्वेन वा सिद्धमिति वक्तव्यं आद्ये तस्य निःसन्देहब्रह्मज्ञानात्मकत्वेन 'ध्यायन्तु संशयापन्ना इति वृद्धवाक्येन संतुष्यताम् द्वितीयेऽप्याहार्यारोपस्य कथमपि फलासम्पादकत्वेन कैवल्यानिष्पत्तेः स्वान्तसंशोधनमात्रमेव ध्यानफलं नत्वन्यदितिचेत्तर्हि जीव्यतां चिरम् ।

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैः ॥ १ ॥

इत्यादि वृद्धवाक्यान्यपि त्वत्पक्षमेवहि पोषयन्तु । एतेन 'आ प्रायणात् तत्रापि हिं दृष्टम् ॥ १२ ॥ अ० ४ ॥ पा० ॥ १ ॥ शा० इत्यधिकरणे 'विकल्पोऽविशिष्टफलत्वात् ॥ ५९ ॥ अ० ॥ ३ ॥ पा० ३ ॥ शा० इत्यधि करणे च दहराद्यहंग्रहोपासकानां प्रसंख्यानादुपास्यसगुणब्रह्मसाक्षात्काराङ्गीकारोऽपि समाहितः स्वान्तसंशोधनद्वारामहावाक्यार्थबोधं प्रति तस्यहेतुत्वेन स्वीकृतत्वात् । नचैक

साहि सत्कारदीर्घकालनैरन्तर्यसेविता सती दृढभूमिर्विशेषसाक्षात्काराय प्रभवति कामिनीभावनेव स्त्रैणपुंसः, :इत्यादिभामतीवाक्येन विरोध इति शंक्यम् एतस्यापि “शृण्वन्तोऽप्यत्र बहवो यं न विद्युः, इत्यादि श्रुतिप्रोक्तमन्दाधिकृताभिप्रायकत्वेन स्वार्थे साफल्यात् । अन्यथा ‘अत्रोच्यते’ इतिस्वसिद्धान्ताभिप्रायकशब्दोपन्यासपूर्वकं ‘का पुनरियं ब्रह्मोपासना नाम किं शाब्दज्ञानमात्रसंततिराहो निर्विचिकित्सशाब्दज्ञानसंततिः यदि शाब्दज्ञानमात्रसन्ततिः किमियमभ्यस्यमानाप्यविद्यां समुच्छेत्तुमर्हतितत्त्वविनिश्चयस्तदभ्यासो वा सवासनं विपर्यासमुन्मूलयेत् नसंशयाभ्यासः सामान्यमात्रदर्शनाभ्यासो वा नहि स्थाणुर्वापुरुषो वेति वाऽऽरोहपरिणाहवद् द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुष एवेति निश्चयाय पर्याप्नुते विशेषदर्शनात्” इत्यादि पुनरपि ‘अत्रोच्यते’ इति स्वसिद्धान्ताविष्कारं शब्दमुपन्यस्य ‘सत्यं सदेव सौम्येत्युपक्रमात्तत्त्वमसीत्यन्तात् शब्दाद्ब्रह्ममीमांसोपकरणादसकृदभ्यस्ताद्निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्तप्रत्यगात्मतत्त्वावबोधे जातेऽपिअविद्यासंस्कारानुवृत्तावनुवर्तन्ते सांसारिकाः प्रत्ययास्तद्व्यवहाराश्च तथापि तानप्यर्थं व्यवहारप्रत्ययान् मिथ्येति मन्यमानो विद्वान्न श्रद्धत्ते पित्तोपहतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम् इत्यादि च सर्वं भामतीकाराणां लेखनं परस्परं विरुध्येत तस्मात् प्रमाणपरिगणनायां प्रसंख्यानस्य कुत्राप्यपरिगणनात् तज्जन्यब्रह्मसाक्षात्कारस्वीकरणमपि सर्वथा वेदान्ततत्त्वानभिज्ञेष्वेव शोभनं नतु वेदान्तविज्ञेषु । नच काकतालीयसंवादिवराटकसंख्याविशेषाहार्यज्ञानवदर्थाबाधेन प्रमाणत्वोपपत्तिरिति वाच्यम् अप्रमाणमूलकस्य प्रमाणत्वायोगात् चाहार्यवृत्तेश्चोपासनावृत्तिवत् ज्ञानभिन्नमानसक्रियारूपतया इच्छादिवदबाधितार्थविषयत्वेऽपि प्रमात्वानभ्युपगमात् नच ।

वेदान्तवाक्यजज्ञानभावनाजाऽपरोक्षधीः ।
मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते ॥ १ ॥

इतिकल्पतरुकृतवचनविरोध इति वाच्यम् । एतस्यापि मन्दाधिकृतोद्देशेन सार्थक्यात् अत एव च ‘अभिव्यक्तचैतन्याभिन्नत्वमर्थस्यापरोक्ष्यं तत्तु नित्याभिव्यक्तजीवचैतन्याभिन्ने ब्रह्मणि स्वाभाविकम्’ अत एव ‘यत्साक्षादपरोक्षाद्ब्रह्म, इतिश्रुतिःघटादीनामपरोक्षचैतन्याभेदाध्यासोपाधिकं तदेव प्रत्यक्षोऽयंघटःप्रत्यक्षंपश्यामीत्यादिव्यवहारालम्बनं ज्ञानस्यापरोक्ष्यमपरोक्षार्थव्यवहारानुकूलज्ञानत्वं तत्स्वस्य सुखादेश्च प्रकाशरूपे नित्याभिव्यक्तसाक्षिचैतन्ये चाक्षुषादिवृत्त्यभिव्यक्तचैतन्येवानुगतं स्वाभाविकंचाक्षुषादिवृत्तिषुतत्तदभिव्यक्तचैतन्याभेदाध्यासोपाधिकं नतु जातिरूपम् । इन्द्रि-

Funding by IKS-MoE

यजन्यत्वाद्युपाधिरूपं वा ज्ञानानामापरोक्ष्यम् अपरोक्षज्ञानविषयत्वमर्थापरोक्ष्यमितियुक्तम् तत्तांशविषयप्रत्यभिज्ञायां तत्तांशे चातिप्रसक्तेः साक्ष्यव्यापनाच्च एवं च तत्त्वमस्यादिशब्दजन्यमपरोक्षजीवाभिन्नब्रह्मज्ञानमपरोक्षमेव भवति श्रावणजन्ये ब्रह्मज्ञाने क्लृप्तकरणभावस्य शब्दस्यैवाविद्यानिवर्त्तके चरमसाक्षात्कारेऽपि करणत्वोपपत्तेर्न तत्र करणान्तरं कल्पनीयमिति इत्यादि परिमलग्रन्थोऽप्युपपद्यते अन्यथा मूलकृतटीकाकृतोक्तीनां मिथः पूर्वोत्तरविरोधेऽनवधारितार्थकं वेदान्तशास्त्रं विफलतामेवेयात् तस्मात्प्रसंख्यानाद्ब्रह्मसाक्षात्काराभिधानं शास्त्रकृतांलांगलजीवनवत् मन्दाधिकृतोद्देशेनगौणमेवेतिनिर्विवादम् ॥

अथ मास्तु प्रसंख्यानस्य ब्रह्मसाक्षात्कारे साक्षात्करणत्वं 'दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः' 'मनसैवेदमाप्तव्यम्' 'एषोऽणुरात्माचेतसावेदितव्यः' 'सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्' शास्त्राचार्योपदेशशमादिसंस्कृतंमनआत्मज्ञानेकारणमिति गीताभाष्याच्च महावाक्यविचाराधिगतब्रह्मात्मैक्यावगतिमूलकप्रसंख्यानसहकृतमन्तःकरणमेव ब्रह्मसाक्षात्कारे करणं न महावाक्यमात्रं प्रसंख्यानमात्रं वा सर्वशाखाप्रत्ययन्यायेन तथैव लाभात् कामिनीसाक्षात्कारेऽपि प्रसंख्यानसहकृतमनस एव करणत्वाङ्गीकाराच्च तथाचाहुर्भामतीपतयः—"न ब्रह्म ज्ञानमात्रं सांसारिकधर्मनिवृतिकरणमपि तु साक्षात्कारपर्यन्तं ब्रह्मसाक्षात्कारश्चान्तःकरणवृत्तिभेदः श्रवणमननादिजनितसंस्कारसचिवमनोजन्मा षड्जादिभेदसाक्षात्कार इव गान्धर्वशास्त्रश्रवणाभ्याससंस्कृतमनोयोनिः" इति । हन्त भो विचित्रं ते स्वसिद्धान्ते स्वान्तस्थैर्यं यतः पूर्वं नानाविधश्रुतिस्मृतीतिहासपुराणैः प्रमाणितमपि प्रसंख्यानमधुना स्वयमेव दूषितमिव परिहाय तत्स्थाने च बुद्धौ वा मनसि वा चित्ते वा अन्तःकरणे वा ब्रह्मात्मसाक्षात्कारकरणतां व्यवस्थापयसि अत्रापि च श्रुतिस्मृतिसहकृतंभामतीकृद्वचनं प्रमाणत्वेनोपन्यस्यन् श्रुतिस्मृतीनां भामतीकाराणाञ्च स्वात्मन इवानवस्थितसिद्धान्तमेवार्थयसे । किञ्च प्रसंख्यानसहकृतान्तःकरणस्य ब्रह्मसाक्षात्कारे करणत्वं बुद्धित्वेन वा मनस्त्वेन वा चेतस्त्वेन वा वाच्यं तच्च न संघटते जडाया बुद्धेः स्वयं स्फुरणरूपब्रह्मविषयीकर्तुमशक्यत्वात् प्रत्युत 'बुद्धेर्द्रष्टा बुद्धेः साक्षी' इत्यादि श्रुत्या ब्रह्मण एव बुद्ध्यादिजडवर्गावभासकत्वं श्रूयते अत एव मनस्त्वेन चेतस्त्वेन वा अन्तःकरणस्य ब्रह्मसाक्षात्कारकरणत्वमपि मनोरथमात्रं नहि स्वरूपतो जडीभूतं वस्तु स्वाभाविकप्रकाशस्वरूपं पदार्थं प्रकाशयितुमलं श्रुत्यर्थश्चान्यथाप्युपपद्यत इति कृतं क्लिष्टकल्पनया । अपिच कमपि सिद्धान्तमनवलम्ब्य शास्त्रमात्रं मिश्रीकुर्वन्निव लेखने प्रवृत्तो भवानत्र प्रष्टव्यो यत्कस्यासि-

द्धान्ते 'महावाक्यविचाराधिगतब्रह्मात्मैक्यावगतिमूलकप्रसंख्यानसहकृतमन्तःकरणमेव ब्रह्मसाक्षात्कारेकरणं सत्कैवल्यहेतुरिति' नतावत्सांख्यस्य तत्सिद्धान्त एतादृशपरिभाषाया अप्यप्रचारात् अत एव न कणाद्गोतमपतञ्जल्यादीनां निरूपणीयविषयप्रक्रियाभेदेन तेषां सिद्धान्तेऽप्येतादृशपरिभाषाया अनुल्लेखात् परिशिष्टाश्च वेदान्तास्तत्र च न मनोबुद्ध्यादीनां शब्दानां पर्यायार्थकत्वं किन्तु ।

मनो बुद्धिरहंकारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥ १ ॥

इत्यादिप्राचीनोक्त्याऽन्तःकरणावस्थाविशेषवाचकत्वमेव वाच्यम् तत्रापि ब्रह्मणो मनोमात्रगोचरत्वस्वीकारे तदवगाहिज्ञानं संशयात्मकमेव स्यात् तथाच पुनरपिब्रह्मसाक्षात्कारार्थं कारणान्तरमपेक्षणीयमवशिष्यते । यदि च वेदान्तेऽपि बहुधा मनःशब्दोऽन्तःकरणपर्यायार्थको दृश्यतेऽतस्तदभिप्रायेणैवैष वाग्जालविस्तर इति तदा तत्रापि वाच्यं किं मनसोनिन्द्रियत्त्वेन ब्रह्मसाक्षात्कारे करणत्वमिन्द्रियत्वेन वा नाद्यः अनिन्द्रियजन्यज्ञानस्य साक्षात्कारत्वाभावात् तथैव त्वयाप्यभ्युपगमाच्च नापि द्वितीयः 'कस्येष-खल्वीदृशो महिमाऽतीन्द्रियभूतस्य' 'अतीन्द्रियं गुणातीतम्' 'बुद्धिग्राह्यमतीन्द्रियम्' इत्यादि श्रुतिस्मृतिविरोधेन वृथाप्रयासमात्रत्त्वात् बुद्धेश्चेन्द्रियत्वाभावेऽपि यथा तद्ग्राह्यत्वं वेदान्तेषु तत्र तत्रोक्तं तत्तत एवपरिश्रमेणानुसंन्धेयमित्युपरम्यते ग्रन्थभूयस्त्वभीत्येति ।

अपिच भूरिपरिश्रमेण मनस इन्द्रियत्वं वदन् भवानत्र प्रष्टव्यः किं व्युत्पत्तिनिमित्तान्मनस इन्द्रियत्वमुतप्रवृत्तिनिमित्तात् आहोस्वित्स्मृत्यादिप्रमाणात् अथवा ब्रह्मसूत्रकृतांगीकृतत्वात् यद्वा शंकराचार्याद्यभिमतत्वात् बाधकासद्भावाद्वा जैनबौद्धाद्युद्बोधनाद्वा न तावदाद्यः इन्द्रलिंगत्वरूपव्युत्त्पत्या मनस इन्द्रियत्वसाधने महदहङ्कारयोरपीन्द्रियत्वप्रसंगात् नहि वस्तुतोऽतथाभूतेष्वर्थेषु व्युत्त्पतिमात्रेण ताद्रूप्यं व्यवस्थापयितुं शक्यते अन्यथा इन्द्रदृष्टेषु विषयेष्विन्द्रजुष्टेषु भोग्येष्विन्द्रसृष्टेषु घटादिष्विन्द्रदत्तेषु ग्रामादिषु चेन्द्रियत्वव्यवहारप्रसंगात् नापि द्वितीयः तत्रापि सांख्याद्यभिमतस्य सात्त्विकाहङ्कारोपादानकत्वमात्रस्येन्द्रियत्वप्रवृत्तिनिमित्तस्य स्वीकारे तेषां परस्परं वैलक्षण्येऽपि किञ्चिन्नियामकं वाच्यं कार्यविचित्रतायां च कारणवैचित्र्यस्यावश्यमपेक्षणीयत्वादतस्तदनभिधानात् प्रतिज्ञामात्रमेतत्सांख्यानां न त्विन्द्रियत्वप्रवृत्तिनिमित्ताभिधानमिति स्वयमेव विचारयन्तु विद्वांसः । अपिच 'उभयात्मकमत्र मनः' इति सांख्योक्त्या मनसि ज्ञानेन्द्रियत्वकर्मेन्द्रियत्वरूपधर्मद्वयस्य समावेशो वाच्यस्तथाचैवमपि न भवत्समीहितसिद्धिः नहि विशेषतो ज्ञानेन्द्रियेण सम्पाद्यमंशतो

Funding by IKS-MoE

ज्ञानेन्द्रियेण सम्पाद्यं भवति अन्यथा वानरोऽपि पठनपाठनादिव्यवहारार्हः स्यात् अन्तःकरणत्वेन चेत् तथापि सांख्यमतेनं वक्तव्ये सङ्कल्प एव मनसो व्यापारो वाच्यो नचासौ ब्रह्मसाक्षात्कारात्मकोऽतः सांख्यसिद्धान्तेन : मनस इन्द्रियत्वसाधनेपि विफलप्रयास एव भवताम् । एवमेव 'भौतिकसात्त्विकांशोपादानकत्वमिन्द्रियत्वमित्यपि स्वकपोलकल्पनामात्रं नतु वेदान्तेषु कुत्राप्येवमुपदिश्यते ज्ञानेन्द्रियत्वसामान्ये प्रवृत्तिनिमित्तमिदमिति चेत् तदपि व्यस्ततत्तद्भौतिकसात्त्विकांशोपादानकत्वं वा समस्तसात्त्विकांशोपादानकत्वं वेति वाच्यम् आद्ये मनस्यव्याप्तिः द्वितीये श्रोत्रादावव्याप्तिः अन्यतरत्वस्यान्यतरस्मिन्नभावेन तन्निवेशोपि न दोषोद्धारको बुद्ध्यादावतिव्याप्तिश्चातो वेदान्तसिद्धान्ते मनस इन्द्रियत्वसाधनं मनोरथमात्रमेवावशिष्टं तच्च न कश्चिद्वारयितुंक्षम इत्युपरम्यते । एवं तार्किकाद्यभिमतेन मनस इन्द्रियत्वसाधनमप्यबोधविजृम्भणं शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वस्य मनस्यभावात् नहिं स्वस्मिन् स्वस्य संयोग इति विदुषामनुभवः । प्रतियोगित्वेनेति चेच्छ्रोत्रादावव्याप्तिः अन्यतरत्वस्यान्यतरस्मिन्नभावात्तन्निवेशोपि निरर्थक एव तर्कविद्भिः कुत्राप्यकृतत्वाच्च । अपिच प्रतियोगित्वेन स्वसंयोगाश्रयं मन इति बुद्ध्या मनसीन्द्रियलक्षणसमन्वयं मन्यमानो भवान् तार्किकशैलीमपि किञ्चित्परिशीलयतु नहि ते तत्तत्पदार्थनिर्वचनं प्रकुर्वन्तस्तं तं पदार्थं केनापि रूपेण नाम्नापि निर्वचनान्तः संगृह्णन्ति यथा गन्धवत्त्वमित्यत्र पृथिवीं शृंगशासनादिमत्त्वमित्यत्र गां वा, प्रत्युत निर्वचनीयपदार्थस्य निर्वचनेऽज्ञातोप्युपस्थितावन्योऽन्याश्रयत्वेन तन्निर्वचनमेव दूषयन्ति तथैव प्रकृतेपि निर्वचने मनःसन्निवेशात् मनो वाऽनिन्द्रियं निर्वचनं वा दुष्टमिति द्वयोरेकं वाच्यं निर्वचनं च तार्किकाणां मनसीन्द्रियत्वं च भवतामित्युभयत्रैव प्रबलः पक्षोऽतो न वयं कमपि पक्षं कक्षीकुर्मः । प्रयोगादपि मनो नेन्द्रियं शब्देतरोद्भूतविशेषगुणानाश्रयत्वविशिष्टज्ञानकारणीभूतस्वसंयोगानाश्रयत्वात् कालवत्-मनो नेन्द्रियं ज्ञानसामान्ये कारणत्वात् आत्मवत् । मनो नेन्द्रियं बाह्यविषयेष्वस्वतन्त्रत्वात् यन्नैवं तन्नैवं यथा श्रोत्रादि । इन्द्रियाणांबाह्यविषयत्वमेवेति तु 'परांचिखानि व्यतृणत्स्वयम्भूस्तस्मात्पराक् प्रश्यति नान्तरात्मन्' इतिश्रुतेः । एवं मनो नेन्द्रियमभौतिकत्वात् यन्नैवं तन्नैवं यथाघ्राणादि घ्राणादीनां भौतिकत्वञ्च 'घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः' ॥ १२ ॥ इतिगौतमीयसूत्रे स्पष्टम् तार्किकमतेघ्राणादिपञ्चस्वेवेन्द्रियत्वमित्यप्येतत्सूत्रेणैव स्पष्टम् एवमार्षग्रन्थेषु कुत्रापि मनस इन्द्रियत्वानिरूपणात् प्रत्युत 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिंगम्' ॥ १६ ॥ इतिसूत्रस्य भाष्ये 'अनिन्द्रियनिमित्ताः स्मृत्यादयः करणान्तरनिमित्ता भवितुमर्हन्ति, इत्यादि वात्स्यायनोक्त्या मनसोऽनिन्द्रियत्वनिरूपणाच्च तार्किकमतेन मनस इन्द्रियत्वनिरूपणं न तत्सिद्धान्तग्रन्थापरिशीलनम-

Funding by IKS-MoE

न्तरा किञ्चिदन्यत्सूचकमिति नूनं निश्चीयते । एवं स्मृत्यादिप्रमाणादितितृतीयपक्षोपि न क्षोदक्षमः 'दशेन्द्रियाणि' महा० उप० ॥ नासिका लोचने जिह्वा त्वक् श्रोत्रञ्चेन्द्रियाणिच । याज्ञ० पञ्चकर्मेन्द्रियाण्यत्र पञ्चबुद्धीन्द्रियाणिच ॥ अग्निपु० इत्यादिश्रुतिस्मृतीतिहासपुराणेषु मनस इन्द्रियत्वानिरूपणात् 'नचेन्द्रियाणां मनश्चास्मि' 'इन्द्रियाणि दशैकं च, इत्यादिभगवद्गीतावचनैर्मनस इन्द्रियत्वसिद्धिरिति वाच्यम् 'भूतानामस्मि चेतना, इतिवत् सम्बन्धे 'नक्षत्राणामहं शशी- इतिवत् किञ्चिदुभयवृत्तिज्ञानकरणत्वादिधर्ममादाय निर्द्धारणे वा षष्ठ्युपपत्तेः 'इन्द्रियाणि दशैकं च' इत्यस्य शंकरभाष्यञ्च 'इन्द्रियाणि दश श्रोत्रादीनि पञ्च बुद्ध्युत्पादकत्वाद्बुद्धीन्द्रियाणि वाक्पाण्यादीनि पञ्च कर्मनिर्वर्तकत्वात् कर्मेन्द्रियाणि तानि दश एकञ्च किं तन्मन' इत्याकारकं तथा च कथमनेन मनस इन्द्रियत्वाभिधानमिति सुविचारयन्तु सुधियः । नापि चतुर्थः पक्षः ब्रह्मसूत्रकृद्भिर्मनसः कुत्रापीन्द्रियत्वानभिधानात् नच 'त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्' ७॥ अ० २ पा० ४ शा० इति सूत्रेणैकादशेन्द्रियाणामभिधानमिति वाच्यम् सूत्रार्थाऽपरिज्ञानात् स च 'ते वागादयः श्रेष्ठादन्यत्र श्रेष्ठात्प्राणादन्ये तत्त्वान्तराणीति प्रतिज्ञा तद्व्यपदेशादित्यस्य उत्पत्तिव्यपदेशात् उत्पतिव्यपदेशः प्राणेऽप्यस्तीति व्यभिचारवारणायश्रेष्ठादन्यत्रेति हेतावपि विशेषणम् इन्द्रियाणीति 'मनः सर्वेन्द्रियाणि चेत्येतच्छ्रुतिगतशब्दानुकरणम्' इत्येवं रूपः परिमलोक्तो बोध्यस्तथाच कथमनेन सूत्रेण मनस इन्द्रियत्वाभिधानं नहीन्द्रियाणां मनसश्च प्राणतस्तत्त्वान्तराभिधाने मनसोऽपीन्द्रियत्वं बलादायाति । नापि पञ्चमः, उक्तसूत्रभाष्ये शंकराचार्यादिभिः सांख्यस्मृत्यभिप्रायेण मनस इन्द्रियत्वाभिधानात् तेषां स्वासिद्धान्तश्च 'इन्द्रियाणि श्रोत्रादीनि पञ्च' अ० ३-४२ इत्यादिगीताभाष्येऽवलोकनीयः । नापि षष्ठः 'इन्द्रियेभ्यः परं मनः' 'इन्द्रियाणि हयानाहुः कठोप० 'आत्मेन्द्रियमनोयुक्तं' कठोप० 'हृदीन्द्रियाणि मनसा सन्निवेश्य' श्वेताश्व० एकत्वं प्राणमनसोरिन्द्रियाणां तथैवच, ऐतरेयोपनि० 'इन्द्रियैर्मनसि सम्पद्यमानैः' इन्द्रियं मनोऽन्नम्' प्रश्न० यस्त्विन्द्रियाणि मनसो, इन्द्रियाणि मनो बुद्धिः-गीता० इत्यादि वाक्यानां मनसः पृथङ्निर्देशेन बाधकत्वात् । नापिसप्तमः 'अनिन्द्रियं तु मनः' इतिन्यायदीपिकायां धर्मभूषणाख्येनजैनेन 'मनोविज्ञानं सर्वं इतिन्यायबिन्दुटीकायां धर्मोत्तराख्येणबौद्धेन च मनस इन्द्रियत्वास्वीकारात् । एवं गोबलीवर्दन्यायेन मनसीन्द्रियत्वाभिधानमपि कुशकाशावलम्बनम् । व्याप्यवृत्तिधर्मेण तत्तद्व्यवहारनिर्वाहे व्यापकवृत्तिधर्मोपस्थितेरन्यथासिद्धत्वात् । अपिच-वाचस्पतिमिश्रेणस्वयमेव गोबलीवर्दन्यायमनादृत्य 'मनो नेन्द्रियं त्रैकाल्यगोचर-

Funding by IKS-MoE

त्वात् यन्नैवं तन्नैवं यथा श्रोत्रादि इत्यनुमानेन मनस इन्द्रियत्वं निरस्तम् तथाच कथं तेषां मते मनस इन्द्रियत्वमित्यभ्रान्तो ब्रूयात् । एवं मनस इन्द्रियत्वे निरस्ते तज्जन्यज्ञानमपि न साक्षात्कारात्मकमिति सुस्थितम् । तर्हि कथं ब्रह्मात्मसाक्षात्कार इति चेत् 'तद्धाऽस्य विजज्ञौ' 'तमसः पारं दर्शयति' 'आचार्यवान् पुरुषोवेद' 'तस्य तावदेवचिरम्' इत्यादिश्रुतिष्वाचार्योपदेशानन्तरमेव ब्रह्मसाक्षात्कारोदये जीवन्मुक्तिश्रवणात् 'वेदान्तविज्ञानसुनिश्चितार्थाः' इति ध्यानान्तरनैराकांक्ष्यश्रवणात् 'तन्त्वौपनिषदं पुरुषम्' इति ब्रह्मण उपनिषदेकगम्यत्वश्रवणाच्च औपनिषदं महावाक्यमेव ब्रह्मसाक्षात्कारे करणं न मनः 'यन्मनसा न मनुते' इति तस्य ब्रह्मसाक्षात्कारकरणत्वनिषेधात् । नचापक्वमनोविषयमिदं येनाहुर्मनोमतमिति वाक्यशेषे मनोमात्रग्रहणात् । नचैवं 'यद्वाचानभ्युदितम्' इति शब्दस्यापि तत्करणत्वं निषिध्यत इति शंक्यम् मनःकरणत्ववादिनामपि शब्दस्य निर्विशेषे परोक्षज्ञानकरणत्वस्याभ्युपगतत्वेन तस्य 'यतोवाचो निवर्तन्ते अप्राप्यमनसा सह, इतिश्रुत्यनुरोधेन शब्दार्थप्राप्तिरूपशक्तिमुखेन शब्दस्य तत्करणत्वनिषेधे तात्पर्यस्य वक्तव्यतया शक्यसम्बन्धरूपलक्षणामुखेन तस्य तत्करणत्वाविरोधात् । नच मनसैवानुद्रष्टव्यम् इतिश्रुतिसिद्धं मनसोपि तत्करणत्वं न पराकर्तुं शक्यमितिवाच्यम् शाब्दसाक्षात्कारजननेऽपि तदैकाग्र्यस्यापेक्षितत्वेन हेतुत्वमात्रेण तृतीयोपपत्तेः 'मनसा ह्येष पश्यति मनसा शृणोति' इत्यादौ तथादर्शनात् इत्थञ्च कृतं समाधिना अलंवा प्रसंख्यानसहकृतेन मनसा, शब्दादेवापरोक्षज्ञानस्यासिद्धत्वात् । तथाचोक्तं नारदीये । तत्त्वमस्यादिवाक्योत्थज्ञानं मोक्षस्यसाधनम् इति । अत एव वाक्यजन्ययादृष्ट्याआत्मानं परब्रह्मत्वेन पश्यन् सन्निन्द्रो नाम देवता मामेव विजानीहीति प्रतर्दनं प्रत्युपदिशतीत्यर्थकं 'शास्त्रदृष्ट्यातूपदेशोवामदेवादिवत् ॥ ३१ अ० १॥ पा० १ ॥ शा० इतिब्रह्मसूत्रमपि संगच्छते नचक्षुखादिसाज्ञात्कारे मनसः करणत्वाभावेपि 'अहमेवेदं सर्वसर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः, इति श्रुत्युक्ते स्वप्ने ब्रह्मसाक्षात्कारे गर्भस्थवामदेवसाक्षात्कारेच करणान्तरासम्भवेन मनस एव करणत्वमितिवाच्यम् स्वाप्निकब्रह्मसाक्षात्काराभिधानेन तत्त्वविदोजाग्रत्संस्कारदार्ढ्याभिप्रायवतीश्रुतिः न स्वप्ने ब्रह्मसाक्षात्कारं ब्रूते अन्यथानिद्रादोषसहकृतजाग्रत्संस्कारजः प्रत्ययः स्वप्न इति निर्वचनमेव भज्येत मनसःसाक्षात्कारकरणत्वनिराकरणात् स्वप्नेऽहमेवेदंसर्वमित्यादिज्ञानस्य साक्षिभास्यात्मकत्वाच्च न मनसःसंकल्पविकल्पप्रत्ययं विहायान्यत्रोपयोगःअतएव पूर्वजन्मन्येव साधनसंपत्तिसहकृतमहावाक्यश्रवणमात्रेण कृतब्रह्मात्मसाक्षात्कारवतोऽदृष्टविशेषप्रतिबन्धवशात् गर्भेशयानस्य वामदेवस्यापि 'अहमेव मनुरभवं सूयश्च, इत्यादि प्रत्यय उपपद्यते नायं मानसिकःकिंवत्न्तःकरणवृत्तिविशेषात्मको यथाचार्यं तथोपपा-

दर्यिष्यते अधस्तात् यत्तु शब्दोनाऽपरोक्षधीहेतुःशब्दत्वात् स्वर्गापूर्वबोधकशब्दवदित्यनुमानेन शब्देऽपरोक्षधीहेतुत्वाभावसाधनं तदपि शब्दोऽपरोक्षधीहेतुः 'इन्द्रियग्राह्यत्वात् आलोकवत् इत्यनुमानेनसत्प्रतिपक्षत्वाद्दशमस्त्वमसि, इत्यादौव्यभिचारादयोग्यविषयत्वस्योपाधित्वाच्चकल्पनामात्रम् नच दशमस्त्वमसीत्यत्रापि नेदं शाब्दं ज्ञानं किन्तु शब्दस्य सहकारित्वेनेन्द्रियस्यैवसाक्षात्कारकरणत्वाभ्युपगमाच्चाक्षुषमिति वाच्यम् बहुलतमे तमसि लोचनहीनस्यापि तद्वाक्यादपरोक्षभ्रमनिवर्त्तकस्य दशमोऽस्मीत्यपरोक्षज्ञानस्य दर्शनान्नेन्द्रियकरणकं तत् । नच तादृशस्थलेभ्रमस्यैवाभावाद्भ्रमसत्त्वेऽपि निश्चयाभावेनाप्तस्य दशमस्त्वमसीत्युपदेशे प्रवृत्तेरसम्भवाच्च परिशेषाच्चाक्षुषमेवेति वाच्यम् । तादृशस्थले भ्रम एव न संभवति भ्रमसत्त्वेऽपीत्याद्युक्त्या मनस्येव पूर्वपक्षं सिद्धांतञ्च कुर्वाणो भवानत्र समाहितो भवतु, मध्याह्ने स्वकीयग्रामाद्दशममन्धंसमादायगच्छतां कुविन्दानां गाढतमिस्रायाञ्च ग्रामान्तरे प्राप्तानां 'नद्यां ममार दशमः' इति भवति भ्रमोऽन्धस्यापि संख्याग्रहणे समर्थत्वात् अत एव ।

नवसंख्याहतज्ञानो दशमो विभ्रमात्तदा ।
नवेति दशमोऽस्मीति वीक्षमाणोऽपि तान्नव ॥ १ ॥

इति वृद्धवाक्यमप्युपपद्यते यच्च भ्रमसत्त्वेऽपि निश्चयाभावाभिधानं तदपि किमाप्तस्य निश्चयाभावो भ्रमवतो वा नाद्यः बहुलतमेऽपि तमसि तेषां भिन्न भिन्न स्वश्रवणमात्रेण वा त्वाचस्पर्शेनं वा 'इमे दश' इति निश्चयस्य सम्भवात् । नापि द्वितीयः आप्तोपदेशमात्रेणान्धस्यापि दशमोऽहमस्मीति प्रत्ययात् । नच नहि दशमस्त्वमसीति श्रवणमात्रेण दशमोऽस्मीत्यभिमन्यतेऽपितु वक्तुराप्तत्वनिश्चयायेतरान् सर्वान् परिगणय्यात्मानं दशमत्वेनं प्रत्येति इत्थञ्च प्रसंख्यानापरपर्यायं गणनमेव दशमप्रत्यक्षहेतुः शब्दस्तु सहकारिमात्रमिति न शब्दस्य प्रत्यक्षकरणत्वोक्तिसम्भव इति वाच्यं निवृत्तोऽपि विवादो दशमप्रत्यक्षे गणनस्य वा हेतुता शब्दस्य वेत्येतावानवशिष्टः तत्राप्येवं विचार्यं यदाप्तोपदेशात् प्राग्भ्रान्तैः शतधा परस्परं कृतमपिपरिगणनं न दशमसाक्षात्कारायालं पश्चाद्दशमोऽस्तीत्याप्तोपदेशेन जातेऽपि परोक्षज्ञाने तत्साक्षात्काराय पुनः परिगणने नवगणनानन्तरं दशमस्त्वमसीति पुनराप्तोक्त्या तमन्धं प्रमुखीकृत्यप्रभवति सर्वेषां वयंदश इत्यप्रतिहतसाक्षात्कारः तथाचात्र शब्दसहकृतं गणनं वा गणनासहकृतः शब्दो वा हेतुरिति स्वयमेव चिन्तयन्तु षड्शास्त्रनिष्णाता भवन्तोऽतो न वयमत्राधिकं वक्तुमीहामहे किन्तु ।

न स्मृतो दशमोऽस्तीति श्रुत्वाऽऽप्तवचनं तदा ।
परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥

त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः ।
अपरोक्षतया ज्ञात्वा हृष्यत्येवन रोदिति ॥

इत्यादि वृद्धवाक्यानि तात्पर्यरूपेण भवत्स्वान्ते संस्फुरन्त्विति समीहामहे । अथ यदि हि तत्त्वमसीति सकृदेवोच्यमाने तद्धास्य विजज्ञाविति श्रुत्याऽऽम्नायेत स्यादपि तदा शब्दापरोक्षवादिनां मनोरथपूरणं तदेव तु न नवकृत्व उपदेशानन्तरं विजज्ञावित्याम्नातवती श्रुतिः एवञ्चात्राप्यर्थतः प्रसंख्यानापरपर्यायोऽभ्यास एव श्रुत्याहृत इति भातीति न सा श्रुतिरपि शब्दकरणकब्रह्मसाक्षात्कारतात्पर्यवतीति वाच्यम् न वयं भवदीयं श्रुतेरार्थिकतात्पर्यं निर्मूलयामः किन्तु 'अभ्यासवैराग्याभ्यांतन्निरोधः ॥ १२ ॥ यो० सू० ॥ अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते इत्यादि प्रमाणैर्विवेकस्रोतउद्घाटनायाविवेकदर्शनाभ्यासं विषयस्रोतःखिलीकरणाय वैराग्यञ्च समर्थयामः तत्रैतावान् विशेषो यदभ्यासवैराग्योभयाधीनमनोवृत्तिनिरोधे यत्नशीलस्याधिकारिणो गुरुमुखान्महावाक्यश्रवणमात्रेणब्रह्मात्मसाक्षात्कारो भवतीत्यसकृदवोचाम । अत एव पूर्वजन्माभ्यस्तयोगेनास्मिन् जन्मनि तदनुष्ठानं विनैव जनकादीनां ज्ञानोत्पादः योगादिना स्वान्तसंशुद्धौ गुरुमुखान्निर्गतमहावाक्यश्रवणमात्रस्याविशिष्टत्वात् । अत एवाज्ञानबहुलान् जन्ममरणशीलान् जीवान् 'यं यं वापि स्मरन् भावम्, 'प्रयाणकाले मनसाऽचलेन' इत्याद्यभ्यासयोगगर्भितवचनैरुपदिदेशभगवान् वासुदेवः । आत्मज्ञानिनांसद्गतिश्च 'ज्ञानीत्वात्मैव मे मतम् । इत्युक्त्वा पश्चात् बहूनां जन्मनां किञ्चित्किञ्चित्पुण्योपचयहेतूनामन्ते चरमे जन्मनि सर्वसुकृतविपाकरूपे वासुदेवः सर्वमिति ज्ञानवान् सन् मां निरुपाधिप्रेमास्पदं प्रपद्यते सर्वदासमस्तप्रेमविषयत्वेन सकलमिदमहञ्चवासुदेव इति दृष्ट्या भजते स एवंविधो महात्मात्यन्तशुद्धान्तःकरणत्वात् जीवन्मुक्तः सर्वोत्कृष्टो न तत्समोऽन्योस्ति अत एव स दुर्लभः । इत्येवंविधस्फुटार्थकैः ॥

आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् ॥
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥ १ ॥
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

इत्यादिपूज्यवाक्यैर्बोधयामास । अत एव स्वात्मब्रह्मव्यतिरेकेण वस्तुमात्रं तुच्छं विन्दन् विद्वान् मरणसमयेऽपि न कदाचिद्विकलतां भजते नह्यलातचक्रं वा गन्धर्वनगरं वा स्वाप्निकपदार्थान् वा नभोनैल्यं वा विकलोऽपि कश्चिद्याथातथ्येन निश्चिनोति किमु प्रबुद्धः । यत्तु ।

पुरुषापराधमलिना धिषणा निरवद्यचक्षुरुदयाऽपि यथा ।
नफलाय मर्त्यविषया भवति श्रुतिसम्भवापि तथात्मनिधीः ॥ १ ॥

Funding by IKS-MoE

इत्यादि सर्वज्ञमुनिवाक्येन विपरीतभावनाऽपनोदनाय ध्रुवायाः स्मृतेरावश्यकत्वाभिधानं तदपितुच्छं नहि दशमोऽहमस्मीतिज्ञाने जातेऽन्धोऽपि स्वात्मस्मरणमपेक्षते नापि पुरुषापराधेन ब्रह्मणापि नाहं दशम इति विपरीतं तस्मिन् भावयितुं शक्यते निश्चितेऽपि पदार्थे समुदेति विपरीतभावनाभूतप्रेतादौविश्वासशीलानां मन्दबुद्धीनां नतुकृतधियां विपश्चितामिति सर्वं रमणीयम् ।

एवमन्तःकरणशुद्धिद्वारा मुमुक्षोरधिकारसम्पादनमात्रे लब्धावकाशस्य योगशास्त्रस्य न वेदान्तार्थप्रतिपादकत्वमन्यथा पृथङ्निरूपणानुपपत्तेः मोक्षस्य ज्ञानैकसाध्यत्वात् प्रारब्धभोगात्मकदृष्टदुःखस्य कथमपि वारयितुमशक्यत्वात् प्रारब्धकर्मणां योगेननाशासम्भवात् प्रत्युतज्ञानाग्नेरेव सर्वकर्मभस्मसात् प्रतिपादनात् । अधिकारिकाणां यावदधिकारं योगेनापि मुक्त्यसम्भवात् तेषामप्रतिहतस्वात्मसाक्षात्कारेण मुक्तस्वरूपत्वात् ज्ञानसप्तभूमिकालाभस्य पुरुषार्थत्वाभावात् तासां केषुचिददृष्टविशेषात्स्वतःसंस्फुरणात् सिद्धसाध्ययोर्ज्ञानयोगयोः समुच्चयासम्भवाच्च न वेदान्तप्रतिपाद्येऽर्थे साक्षाद्योगस्योपयोगः । एवं कारणान्तरानिरूपणात् ब्रह्मात्मसाक्षात्कारस्य महावाक्यैकजन्यत्वाच्चापरोक्षार्थविषयत्वं ज्ञानस्यऽपरोक्षत्वमित्यपि सुस्थितम् अर्थापरोक्षत्वं : तु नापरोक्षज्ञानविषयत्वं किन्तु तत्तत्पुरुषीयचैतन्याभिन्नत्वमतो नान्योऽन्याश्रयः अन्तःकरणतद्धर्माणां साक्षिणि कल्पिततया तदभेदसत्त्वात् बाह्यचैतन्ये कल्पितानां घटादीनां बाह्यचैतन्ये वृत्तिकृत् तत्तत्पुरुषीयचैतन्याभेदाभिव्यक्त्या तदभेदसत्त्वाच्च नचाप्यव्याप्तिः । एवं च सर्वदा सर्वपुरुषचैतन्याभिन्नत्वात् 'यत्साक्षादपरोक्षाद्ब्रह्म' इति श्रुत्या स्वत एवापरोक्षं ब्रह्मेति अपरोक्षार्थविषयत्वात् शाब्दस्यापि ब्रह्मज्ञानस्यापरोक्षत्ववाचोयुक्तिर्युक्तैव अयं भावः द्विविधोहि विद्याधिकारी कृतोपास्तिरकृतोपास्तिश्च तत्र य उपास्यसाक्षात्कारपर्यन्तामुपास्तिं कृत्वा तत्त्वज्ञानाय प्रवृत्तस्तस्य वासनाक्षयमनोनाशयोर्दृढतरत्वेन ज्ञानादूर्ध्वं जीवन्मुक्तिः स्वत एवसिध्यति इदानींतनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुरौत्सुक्यमात्रात् सहसा विद्यायां प्रवर्तते सचोपास्तिंविनापि चिज्जडविवेकमात्रेणैव च मनोनाशवासनाक्षयौ तात्कालिकौ सम्पाद्य शमदमादिसम्पत्त्या श्रवणमनननिदिध्यासनानि सम्पादयति तेषां दृढाभ्यासानन्तरं गुरुमुखान्महावाक्यश्रवणमात्रेण सर्वबंधविच्छेदितत्त्वज्ञानमुदेति अविद्याग्रन्थिरब्रह्मत्वं हृदयग्रन्थिः संशयाः कर्माणि सर्वकामत्वं मृत्युः पुनर्जन्म चेत्यनेकविधो बन्धो ज्ञानान्निवर्तते तथाच श्रूयते । 'यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य' मुण्ड० । ब्रह्म वेद ब्रह्मैव भवति, मुण्ड० । भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे । मुण्ड० सत्यं ज्ञानमनन्तं ब्रह्म योवेदनिहितंगुहायांपरमे व्योमन्सोऽश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेति ॥ तैत्तिरीय० तमेवविदि-

त्वातिमृत्युमेति । श्वेताश्व० यस्तु विज्ञानवान् भवत्यमनस्कः सदाशुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जायते । कठ० य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति । बृहदा० सेयं विदेहमुक्तिः सत्यपि देहे ज्ञानोत्पत्तिसमकालीनाब्रह्मण्यविद्याध्यारोपितानामुक्तबन्धानामविद्यानाशे सति निवृत्तौ पुनरुत्पत्त्यसम्भवात् अतः शैथिल्यहेत्वभावात्तत्त्वज्ञानं तस्यानुवर्त्तते मनोनाशवासनाक्षयेतु दृढाभ्यासाभावाद्भोगप्रदेन प्रारब्धेन कर्मणा बाध्यमानत्वाच्च सवातप्रदेशप्रदीपवत् सहसा निवर्त्तते अत इदानींतनस्य तत्त्वज्ञानिनः प्राक् सिद्धे तत्त्वज्ञाने न प्रयत्नान्तरापेक्षा किन्त्वादेहपातं येनकेनापिनटनेन बुध्यतेकार्यमेवतत् । अज्ञप्रबोधान्नैवान्यत्कार्यमस्तीहतद्विदः इत्यादि वृद्धोक्त्याऽज्ञप्रबोधमात्रमवशिष्यते । स च यथावत् प्रमाणप्रमेयविभागनिबन्धनः तत्र सत्स्वपि सहस्रेषु वेदान्तप्रकरणेषु परं यथा सकलशास्त्रमर्मविच्छ्रीमद्धर्मराजाध्वरिकृतवेदान्तपरिभाषानामकं प्रकरणं स्वकीयसद्गुणैः सर्वतो लब्धप्रतिष्ठं न तथान्यत् अस्य खल्वष्टौ परिच्छेदाः तत्र प्रथमे सपरिकरप्रत्यक्षनिरूपणं द्वितीयेऽनुमानं तृतीये, उपमानं चतुर्थे शब्दः पञ्चमे अर्थापत्तिः षष्ठेऽनुपलब्धिः सप्तमे वेदान्तस्य विषयः अष्टमे वेदान्तप्रयोजनमिति परिच्छेदाष्टकस्य संक्षेपतोभिधेयार्थनिरूपणं तदिदं मूलमात्रं विविधटीकासंवलितं वा बहुधामुद्रितमपिपरिशोधकानामालस्याद्वा यन्त्राधिकारिणामनपेक्षणाद्वा न स्वात्मीयां पवित्रतामानर्ज तदिदं साधुभिः प्रार्थितैर्विद्वच्छिरोभूषणैरुदासीनवर्य्यैः शरण्यैः श्रीमदमरदासनामधेयैर्मूलकृत्तनूजरामकृष्णकृतशिखामणिटीकायुतं सम्यक्परिशोध्यतदुपरिमणिप्रभाख्यविवृत्त्याविभूषितम् लब्धश्चतेभ्यःप्रार्थनयाऽऽर्यजीर्णनिबन्धोद्धारकेण क्षेमराजश्रीकृष्णदासेनश्रेष्ठिना तेनैवप्रार्थितेनचमयापिमुद्रायंत्रेनिक्षिप्तमिदंप्रकरणरत्नंभूयोपियथामतिपरिशोधितमिति तदवलोकयन्तोऽनन्तगुणगरीयांसो विद्वांसः पुंदोषसाधारणान्मत्स्खलितमपिपरिशोधयन्तोजनतामुपकुर्वन्त्वनुगृह्णन्तुचमामिति मुहुः प्रार्थयते कश्चित् ।

काशीनिवासिनिर्मल पं० स्वामिगोविन्दसिंहः साधुः ।

॥ श्रीः ॥

वेदान्तपरिभाषायाविषयानुक्रमणिका ।

विषयाः	पृष्ठांकाः
मङ्गलाचरणम्	१
मोक्षस्यपरमपुरुषार्थत्वप्रदर्शनम्	१४
प्रमालक्षणम्	१९
प्रमाणसंख्याप्रदर्शनम्	३८
प्रत्यक्षेऽन्तःकरणवृत्तिनिरूपणम्	४३
मनस इन्द्रियत्वखण्डनम्	४९
प्रत्यक्षसामान्यलक्षणम्	५५
वृत्तेर्बहिर्निर्गमप्रकारः	५७
प्रत्यक्षे शंकासमाधिः	५९
शब्दादपरोक्षज्ञाननिरूपणम्	६३
वह्न्यनुमितिस्थले पर्वतांशेप्रत्यक्षत्वप्रतिपादनम्	६४
प्रसङ्गाज्जातिखण्डनम्	६८
समवायखण्डनम्	७१
ज्ञानप्रत्यक्षनिष्कृष्टलक्षणम्	७४
विषयप्रत्यक्षलक्षणम्	७५
विषयप्रत्यक्षेशंकासमाधिः	७८
विषयप्रत्यक्षस्य निष्कृष्टलक्षणम्	८७
वृत्तेश्चातुर्विध्यम्	८८
सविकल्पनिर्विकल्पभेदात् प्रत्यक्षं द्विविधम्	८८
इन्द्रियजन्यत्वस्य प्रत्यक्षेतन्त्रत्वाभावः	९१
वेदान्तानामखण्डार्थपरत्वम्	१००
जीवसाक्षीश्वरसाक्षिभेदात् प्रत्यक्षं पुनर्द्विविधम्	१०२
मायागतैकत्वनिरूपणम्	१०५
मायाविशिष्टस्य जगत्कर्तृत्वम्	११८
शुक्तिरजते प्रत्यक्षविचारः	१२१
अन्यथाख्यातिखण्डनम् ...	१३३
अनिर्वचनीयरजतोत्पत्तिः	१३५
परिणामादिलक्षणम्	१४१
रजतस्य साक्षिण्यध्यासः	१४२
विविधाध्यासिकप्रत्ययः	१४८
रजतज्ञाने गुरुमतप्रवेशशंका	१५१
व्यावहारिकप्रातिभासिकपदार्थानां भेदप्रदर्शनम्	१५५
स्वाप्नपदार्थविचारः	१६१
द्विविधकार्यविनाशः	१६७
अन्यथाख्यात्यनिर्वचनीयख्यात्योर्भेदः	१७३
उक्तप्रत्यक्षं पुनर्द्विविधम् ...	१७७
अनुमाननिरूपणम्	१८३
व्याप्तिनिरूपणम्	१९७
अनुमानस्य सिद्धान्ते उपयोगः	२१५
मिथ्यात्वानुमानम्	२१७
मिथ्यात्वलक्षणम्	२२०
मिथ्यात्वेप्रमाणम्	२२१
प्रपञ्चमिथ्यात्वे शंकासमाधिः ...	२२१
त्रिविधसत्तानिरूपणम्	२२३

Funding by IKS-MoE

वेदान्तपरिभाषाया-अनुक्रमणिका ।

विषयाः पृष्ठांकाः

उपमाननिरूपणम् २२६
आगमनिरूपणम् २३८
प्रमाणीभूतवाक्यलक्षणम् २३९
शाब्दवोधे कारणानि २४१
आकांक्षाप्रसङ्गेनबलाबलाधिकरणविचारः २४४
योग्यतादिविचारः २५८
शक्यलक्ष्यभेदेनपदार्थों द्विविधः २६५
पदशक्तिविचारः २६८
लक्षणाविचारः २७३
सिद्धान्ते लक्षणां विनापि विर्वाहः २७५
वाक्यैकवाक्यताविचारः २८१
तात्पर्य्यनिरूपणम् २८५
वेदनित्यत्वादिविचारः ३०१
अर्थापत्तिनिरूपणम् ३०७
अर्थापत्तिर्द्विविधा ३१०
श्रुतार्थापत्तिः पुनर्द्विविधा ३११
अनुपलब्धिनिरूपणम् ३१७
अभावे चातुर्विध्यम्.... .... ३२५

विषयाः पृष्ठांकाः

स्वतःप्रामाण्यवादः ३३२
प्रमाणविषयनिरूपणम् ३४०
लक्षणं द्विविधम् ३४१
कर्तृलक्षणम् ३४३
जगतो जन्मक्रमनिरूपणम् ३५३
प्रलयनिरूपणम् ३६७
सृष्टिवाक्यतात्पर्यनिरूपणम् ३७६
जीवस्वरूपविचारः ३८१
त्वंपदार्थनिरूपणम् ३८३
जीवस्यावस्थात्रयनिरूपणम् ३८६
तत्त्वंपदार्थयोरैक्यनिरूपणम् ४००
प्रयोजननिरूपणम् ४०६
अपरोक्षज्ञानेमतभेदः.... .... ४१३
श्रवणादिनिरूपणम् ४२३
शमादिनिरूपणम् ४३०
सगुणोपासकानां ब्रह्मलोकगतानां मुक्तिः ४३२
ब्रह्मात्मसाक्षात्कारवतः प्रारब्धादिकर्मविचारः ४३५

यहांपर वेदान्तपरिभाषाछोटीटीका तथाहिंदीभाषाटीकासहितभी छपी है ।

इति वेदान्तपरिभाषाया विषयानुक्रमणिका समाप्ता ।

Funding by IKS-MoE

[illegible] शर्मा



काशीनिवासिनिर्मल पं०स्वामिश्रीगोविन्द सिंहसाधुः।

Funding by IKS-MoE

Funding by IKS-MoE

अथ वेदांतपरिभाषा.

शिखामणि-टीकया तट्टीकामणिप्रभया चोपेता ।

श्रीगणेशाय नमः ।

यतः सर्वं जातं किल जगदिदं चेतनघनात्
प्रविष्टो यस्तस्मिन्नियमयति वै कार्य्यकरणम् ॥
पुनश्चान्ते यस्मिन्विशति खलु भंगा इव तिमौ[1]
नमामस्तं कृष्णं निखिलजनपूज्यं हृदिशयम् ॥ १ ॥
श्रीकृष्णं सुरसंघसेवितपदं संकल्पकल्पद्रुमं
मंजीरादिविभूषितांघ्रियुगलं सत्पीतपट्टाम्बरम् ॥
चञ्चत्कांचनकाञ्चिभूषितकटिं तं नौमि मेघप्रभं
विद्वज्जालविशालभालतिलकीभूता यतः सज्जनाः ॥ २ ॥
विनायकमहं वन्दे विनाय्रकोपशान्तये
जनकोपि यमभ्यर्च्य जघान त्रिपुरं पुरा ॥ ३ ॥
श्रीनानकाख्यं प्रणमामि मार्गः स्पष्टीकृतो येन तमोविरोधी ॥
यत्कीर्तिरुस्रा इव चित्रभानोर्व्याप्ता पृथिव्यां जनपापहर्त्री ॥ ४ ॥
यदुक्तिभानूरजनीमिवार्कस्तमोविनाशी कृपयोपदिष्टः ॥
अगाधबोधं परमं गुरुं तं नमामि भक्त्या परमात्मरूपम् ॥ ५ ॥
येषां प्रसादादचिरं मया वै प्राप्तं दुरापं खलु शास्त्रजातम् ॥
विद्वद्वरिष्ठान्प्रणमाम्यहं तान्विद्याप्रदातॄन्परमार्थनिष्ठान् ॥ ६ ॥
यदुपकारमुद्धर्त्तुन्नशक्नोम्यब्दकोटिभिः ॥
ब्रह्मविज्ञानपादांस्तान्प्रणमामि पुनः पुनः ॥ ७ ॥

---

[1] तिमौ समुद्रे ॥ "पाथोधिसिंधुमकरालयवारिराशिगंगाधरेन्दुजनकास्तिमिरूर्मिमाली" इति कोशात् ॥

Funding by IKS-MoE

नाहं शक्नोमि व्याख्याने तथापीश्वरतुष्टये ॥
व्याकरोमि हि वेदान्तशिखामणिं यथामति ॥ ८ ॥
विदुषोऽतिकृपाविष्टान्प्रेरयित्वा हि केशवः ॥
शोधयिष्यति स्वकीयमिति मत्वा न संशयः ॥ ९ ॥

ग्रंथादौ ग्रंथमध्ये ग्रंथान्ते च मंगलमाचरणीयमिति शिष्टाचारात् “मंगलादीनि[1] हि शास्त्राणि प्रथंते वीरपुरुषाणि च भवंति आयुष्मत्पुरुषाणि च अध्येतारश्च सिद्धार्था यथा स्युः” इति महाभाष्योक्तेश्च चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तये मनसि कृतं शुद्धाद्वयसच्चिदानंदादिलक्षणस्वेष्टपरमात्मदेवतानमस्कारात्मकं शिष्टाचारानुमितस्मृत्यनुमितश्रुतिप्रमाणकं मंगलं शिष्यशिक्षार्थं श्रोतृव्याख्यातॄणामनायासेन मंगलाचरणाय च दृष्टांतकीर्तनपुरस्सरं प्रपंचस्य ब्रह्माविद्याकार्यत्वं तद्विद्यानिवर्त्यत्वं च बोधयन्निबध्नाति ॥

शि॰म॰–नैदाघभानुकिरणेष्विव वारिपूरः सर्वो विभाति यदबोधवशात्प्रपंचः ॥ मालाफणीव च निमीलति यत्प्रबोधात्तद्ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥ १ ॥

म॰ प्र॰–(नैदाघेत्यादिना) तत् प्रत्यगभिन्नत्वाद्वितियत्वादिविशेषरूपेणाज्ञातं सन्निखिलकार्यकारणं प्रत्यगभिन्नत्वाद्वितीयत्वादिविशेषरूपेण ज्ञातं सन्निखिलाज्ञानादिनिवर्तकं च ब्रह्म–त्रिविधपरिच्छेदात्यंताभाववद्वस्तु नौमि नमस्करोमि तथाच ब्रह्मकर्मकस्वापकर्षबोधनपूर्वकब्रह्मोत्कर्षबोधनानुकूलव्यापारानुकूलवर्तमानकृत्याश्रयोऽहमिति शाब्दबोधः । ननु ब्रह्मणः सुखासुखसाधनाभिन्नत्वेनापुरुषार्थत्वात्कथमुत्कर्षबोधनानुकूलव्यापारः संभवतीत्यत आह (सुखमिति) आनंदरूपमिति यावत् । ननु दुःखहेतोर्द्वैतस्य सत्त्वात्कथं ब्रह्मणः सुखरूपत्वमित्यत आह (अद्वयमिति) पारमार्थिंकद्वैतात्यंताभाववदित्यर्थः । ननु द्वितीयस्य जीवस्य सत्त्वात्कथं ब्रह्मणोऽद्वयत्वमित्याशंक्याह) आत्मरूपमिति) शुद्धप्रत्यगभिन्नमित्यर्थः । नन्वेवमपि द्वितीयस्यानात्मरूपप्रपंचस्य सत्त्वात्कथमद्वितीयत्वमित्याशंक्य प्रपंचस्याविद्याप्रयुक्तत्वेन ज्ञाननिवर्त्यत्वेन च मिथ्यात्वमित्यभिप्रेत्याह (नैदाघेति) निदाघशब्दोहि ग्रीष्मर्तुवाचकः निदाघे भवो नैदाघः नैदाघश्चासौभानुर्नैदाघभानुः तस्य किरणास्तेषुनैदाघभानुकिरणेष्विव–यथा भूतलसंबद्धैर्निदाघापरपर्यायग्रीष्मर्तुकालीनसूर्यकिरणैरवच्छिन्न-

---

[1] मंगलानुष्ठानप्रयोजनान्याह मंगलादीनीत्यादिना ॥ अध्ययनस्याविच्छेदात्प्रथंते कृतमंगलशास्त्रश्रोतॄणां परैरपराजया द्वीरपुरुषाणि शास्त्रानुष्ठाने धर्म्मोपचयादायुर्वर्द्धनादायुष्मत्पुरुषाणि इदानीं ग्रन्थे मंगलनिबंधस्य फलमाह अध्येतारश्चेति सिद्धार्था-अध्ययननिवृत्तिरेवाध्ययनसमाप्तिरेव तेषां सिद्धिः सिद्धिविषयोर्थ इत्यर्थ इतिभाष्यार्थः ।

Funding by IKS-MoE

चैतन्ये वारिपूरो-जलसमूहो विषयतासंबंधेन ज्ञानाश्रयस्तद्वत् यद्बोधवशात् यस्य सच्चिदानंदलक्षणस्य ब्रह्मणोऽबोधोऽज्ञानं तस्य वशः-शक्तिः "वशः शक्तिप्रभुत्वयोः" इति कोशात् । तस्मात्-ब्रह्मविषयकाज्ञाननिष्ठसामर्थ्यात् सर्वो निखिलः प्रपंचो नामरूपाद्यात्मको विभाति-विषयतासंबंधेन भानाश्रयस्तद्ब्रह्म नौमीति संबंधः । प्रपंचस्य ब्रह्माज्ञानकार्यत्वमुक्त्वा तज्ज्ञाननिवर्त्यत्वमाह (मालेति) यथा मालोपाधिकचैतन्यज्ञानेन मालोपाधिकचैतन्याज्ञानकार्यफण्यादिकं निमीलति नाशं प्राप्नोति पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्रैकालिकात्यंताभावप्रतियोगित्वप्रकारकप्रतीतिविषयो भवतीति यावत् तद्वत् यत्प्रबोधात् यस्य सच्चिदानंदलक्षणस्य ब्रह्मणस्तत्त्वमस्यादिवाक्यजन्याप्रतिबद्धवृत्त्यात्मकयथार्थज्ञानात्सर्वः प्रपंचो निमीलति-पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्रैकालिकात्यंताभावप्रतियोगितां प्राप्नोति तद्ब्रह्म नौमीत्यर्थः ॥ १ ॥

शि०म०-आसेतोरासुमेरोरपि भुवि विदितान् धर्मराजाध्वरीन्द्रान् वन्देऽहं तर्कचूडामणिमणिजननक्षीरधींस्तातपादान् ॥ यत्कारुण्यान्मयाऽभूदधिगतमधिकं दुर्ग्रहं सूक्ष्मधीकैरप्यात्तं शास्त्रजातं जगति मखकृता रामकृष्णाह्वयेन ॥ २ ॥ वेदांतपरिभाषाख्यां सोऽहं तातविनिर्मिताम् ॥ व्याकरोमि कृतिं सर्वश्रुत्यंतार्थप्रकाशिकाम् ॥ ३ ॥

मातरं पितरं चैव साक्षात्प्रत्यक्षदेवताम् ॥
सदा गृही निषेवेत दृढसर्वप्रयत्नतः ॥ १ ॥
तुष्टायां मातरि शिवे तुष्टे पितरि पार्वति ॥
तव प्रीतिर्भवेद्देवि परं ब्रह्म प्रसीदति ॥ २ ॥

म० प्र०-इत्यादीश्वरोक्तवाक्यात्पितुः शिवात्मकत्वेन स्वाभिलषितार्थसंप्राप्तये तातनत्यात्मकं स्वहृद्याचरितमंगलं शिष्यशिक्षाद्युक्तप्रयोजनाय धर्मराजाध्वरीन्द्रपुत्रो रामकृष्णसंज्ञकः पितृमहत्त्वबोधनपुरस्सरमुपनिबध्नाति (आसेतोरित्यादिना) जगति पृथिव्यां मखकृता-यथाधिकारं निखिलश्रौतस्मार्तकर्मकर्त्रा रामकृष्णाह्वयेन रामकृष्णसंज्ञकेन मया अधिकं-विस्तृतं दुर्ग्रहं-बहुसाधनसंपाद्यबोधविषयीभूतं सूक्ष्मधीकैरत्यंतसूक्ष्मार्थावगाहिबुद्धिमद्भिरात्तमपि-गृहीतमपि नतु धर्मादिवदत्यंतायोग्यं शास्त्रजातम्-श्रुतिस्मृतिलक्षणशास्त्रप्रतिपाद्यंनिखिलं वस्तु यत्कारुण्यात्-येषां धर्मराजाध्वरीन्द्रसंज्ञकपितॄणां कारुण्यात्-कृपाकटाक्षमात्रहेतुतोऽधिगतं ज्ञातमभूत-आसीत् आसेतोरासुमेरोरपि भुवि विदितान् सेतुं-रामसेतुमभिव्याप्य सुमेरुं-हेमाद्रिमामर्यादीकृत्य सेतुम्-आमर्यादीकृत्य सुमेरुमभिव्याप्येतिवा सेतुमभिव्याप्यसुमे-

Funding by IKS-MoE

रुमभिव्याप्येतिवा भुवि–पृथिव्यां विदितानपि–ज्ञातानेव तर्कचूडामणिमणिजननक्षीरधीन्न तर्कचूडामणिसंज्ञको यो ग्रंथः सएवमणिर्मणिरिव मणिस्तस्यजननेन–जननहेतुत्वेन क्षीरधीन् महोदधिसदृशान्न तातपादान् मयूरव्यंसकादिगणस्याकृतिगणत्वात्पादशब्दस्य तदंतर्भावसंभवेन पूर्वप्रयोगाभावसंभवात्ताताश्च तेपादाश्चपूज्यास्ते तथातान्न–पूज्यपितॄन् धर्मराजाध्वरीन्द्रान् धर्माणां श्रुतिस्मृतिविहितानां यज्ञादीनां राजानो–अतिशयेनानुष्ठातारस्ते तथा धर्मराजाश्च तेऽध्वरीन्द्राः अध्वरिणां यागवतां दीक्षितानामिन्द्रा धर्मोपदेष्टारस्ते तथा तान्धर्मराजाध्वरीन्द्रसंज्ञकानहं वंदे इत्यर्थः ॥ २ ॥

शिष्यावधानाय व्याख्यानकरणप्रतिज्ञां करोति (वेदांतेति) सर्वश्रुत्यंतार्थप्रकाशिकांसर्वोनिखिलो यः श्रुतेर्वेदस्यांतार्थो–निर्णीतब्रह्मात्मैक्यादिरूपोर्थस्तस्य प्रकाशिकां–तद्विषयकबोधजनकां सर्ववेदस्योत्तरकाण्डात्मकवाक्यरूपो योंतस्तदर्थविषयकबोधजनकामितिवा तातविनिर्मितां–तातेनोक्तनामकपित्रा विनिर्मितां–विशेषेण–सम्यग्वेदांतार्थविचारेण रचितां वेदांतपरिभाषाख्यां–वेदांतपरिभाषानामिकां कृतिं–शब्दराश्यात्मकव्यक्तिं व्याकरोमि–तद्घटकीभूतशब्दार्थान् प्रकटीकरोमि । एतावता सर्वोर्थस्तत्र वर्तते । मया तु तस्य प्रादुर्भावमात्रं क्रियत इति बोध्यत इत्यर्थः ॥ ३ ॥

मू०–यदविद्याविलासेन भूतभौतिकसृष्टयः ॥
तन्नौमि परमात्मानं सच्चिदानंदविग्रहम् ॥ १ ॥

शि०म०–प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन्निर्विघ्नपरिसमाप्तये मंगलमाचरितं शिष्यशिक्षायै ग्रंथतो निबध्नाति (यदविद्येति) तं परमात्मानं नौमीति संबंधः । जीवाभिन्नं ब्रह्म शास्त्रप्रमेयमिति सूचयितुमात्मशब्दः । नन्वेवं तस्यैव तमेव प्रति उत्कर्षापकर्षाभावान्नमस्कार्यतानुपपत्तिरित्याशंक्य कल्पितभेदमादायाविद्याप्रतिबिंबं कर्तृत्वादिविशिष्टमपकृष्टरूपं नमस्कर्त्तृ तद्व्यावृत्तं सर्वज्ञत्वादिविशिष्टमुत्कृष्टरूपं नमस्कार्यमित्यभिप्रेत्याह (परमिति) ॥

म० प्र०–ग्रंथस्याध्ययनाध्यापनादिरूपमेधाविप्रवृत्तिप्रयोजकीभूतविषयप्रयोजनवत्तां दर्शयन् कृतमंगलकत्वं बोधयति (प्रेक्षावत्प्रवृत्त्यर्थमिति) प्रेक्षावतां–प्रज्ञावतामध्ययनाध्यापनादिरूपा या प्रवृत्तिस्तत्सिद्ध्यर्थमित्यर्थः (ग्रंथतइति) शब्दत इत्यर्थः (निबध्नातीति) अत्रायं शाब्दबोधः–मेधाविप्रवृत्तिफलकमंगलोपनिबंधनकालीनविषयप्रयोजनविषयकबोधजननानुकूलव्यापारानुकूलकृत्याश्रयो निर्विघ्नग्रंथसमाप्तिप्रयोजकीभूतातीतकालीनकृतिविषयतावदभिन्नमंगलविषयकशिष्यशिक्षाफलकवाक्यघटकपदघटकवर्णस्मारकमास्यादिसंयोगानुकूलव्यापारानुकूलकृतिमानेकत्वान्न–

लीढो ग्रंथकार इति । ननु भवन्मते जीवब्रह्मणोरभेदेनोत्कर्षापकर्षाभावान्नमस्कर्तृनमस्कार्यतानुपपत्तिरित्याशंक्य कल्पितभेदमादाय समाधत्ते (नन्वेवमिति) जीवपरमात्मनोरभेदे सतीत्यर्थः। तस्यैव–जीवाभिन्नपरमात्मन एव तमेव प्रतिजीवाभिन्नपरमात्मानं प्रत्येव कल्पितभेदमौपाधिकभेदम् (अविद्याप्रतिबिंबमिति) तमोगुणप्रधानाऽविद्याप्रतिबिंबाभिन्नकर्तृत्वादिविशिष्टमित्यर्थः । तद्व्यावृत्तम्--कर्तृत्वादिविशिष्टापकृष्टरूपाद्भिन्नम् एकस्यैव परमात्मनः कर्तृत्वादिविशिष्टान्तःकरणतादात्म्यापन्नत्वेन नमस्कर्तृत्वं सर्वज्ञत्वादिविशिष्टत्वेन नमस्कार्यत्वमिति भावः । नचेह परं नौमीति निर्देशात्तटस्थस्वरूपलक्षणलक्षितनिरुपाधिकपरमात्मन एव नमस्कारविषयत्वं प्रतीयतेऽतः कथं सोपाधिकस्य सर्वज्ञत्वादिविशिष्टस्यनमस्कार्यत्वं त्वयोच्यते इति,वाच्यम् । "विशिष्टं शुद्धान्नातिरिच्यते" इतिन्यायेन तस्य शुद्धानतिरेकादिति ॥

शि०म०–ननु ब्रह्मणि लक्षणप्रमाणाभावेन तस्यैवासिद्धेः कथं जीवब्रह्माभेदः शास्त्रार्थ इतिचेत् । न तावत्प्रमाणाभावःभूतभौतिकोत्पत्तेरेव तत्रप्रमाणत्वात् । तथाहि"विवादविषयीभूतानि भूतभौतिकानि स्वोपादानगोचरापरोक्षज्ञानवत्प्रणीतानि कार्यत्वात् घटवत्" नच परिदृश्यमानपृथिव्यादौ प्रत्यक्षेण कार्यत्वसिद्धावप्यतीन्द्रिये तदसिद्धेर्भागासिद्धो हेतुरिति वाच्यम् । तत्रापि पृथिवीत्वादिना कार्यत्वकल्पनात् ॥

म०प्र०–लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायमाश्रित्याशंकते (नन्विति) तस्यैव ब्रह्मणएव असिद्धेः–अनिश्चयात्, भूतभौतिकोत्पत्तेरेव–एवशब्दस्याप्यर्थकत्वेन विवादगोचरीभूतभौतिकनिष्ठकार्यत्वरूपहेतोरपि, अपिशब्देन श्रुतिसमुच्चयः । तत्र–ब्रह्मणि प्रमाणत्वात्--प्रमितिजनकत्वात् विवादविषयीभूतानि--ईश्वरजन्यत्वाजन्यत्वप्रकारकविवादास्पदानि (स्वोपादानेति), स्वं–कार्यं तस्य यदुपादानं तद्गोचरं यदपरोक्षज्ञानं तद्वता प्रणीतानि रचितानीत्यर्थः । कार्यत्वात्–जन्यत्वात् कृतिजन्यत्वाद्वा तथाच न साध्यहेत्वोरभेद इति । न चात्र स्वोपादानगोचरापरोक्षज्ञानवज्जन्यत्वरूपसाध्यं न संभवति कार्यमात्रंप्रत्यन्वयव्यतिरेकाभ्यां कृतेरेवहेतुत्वेनेच्छाजनकज्ञानस्यभूतभौतिकोत्पत्तावन्यथासिद्धत्वात्पक्षदृष्टांतोभयवृत्त्येकस्वत्वस्याभावेन तद्घटितोपादानगोचरेत्यादिसाध्यस्यासंभवाच्चेति वाच्यम् । कार्यमात्रे कृतिमद्वदन्वयव्यतिरेकाभ्यां स्वोपादानगोचरापरोक्षज्ञानवत्त्वेनापि हेतुत्वस्वीकारात् । पक्षदृष्टांतान्यतरत्वरूपस्यानुगतस्वत्वस्य संभवाच्चेति । कार्यत्वहेतौ भागासिद्ध्याख्यस्वरूपासिद्धिमाशंक्य परिहरति (नचेत्यादिना) परिदृश्यमानपृथिव्यादौ–अस्मदादिचक्षुरादिजन्यज्ञानविषयीभूतपंचीकृतपृथिव्यादौ, प्रत्यक्षेण–इंद्रियस्वरूपप्रत्यक्षप्रमाणेन, कार्यत्वसिद्धावपि–कार्यत्वविषयकनिश्चयेपि,

अतीन्द्रिये—इंद्रियाग्राह्यापंचीकृतपृथिव्यादौ, तदसिद्धेः—कार्यत्वनिश्चयाभावात् । भागासिद्धो हेतुः—पक्षस्यापंचीकृतपृथिव्यादिरूपैकांशेऽवर्तमानः कार्यत्वरूपी हेतुः । नचेतिनिषेधप्रतिज्ञायां हेतुमाह (तत्रापीति) अपंचीकृतपृथिव्यादावपीत्यर्थः । (पृथिवीत्वादिनेति) अपंचीकृतपृथिवी जन्या पृथिवीत्वात घटवदिति पृथिवीत्वादिना कार्यत्वस्यानुमानादित्यर्थः ॥

शि०म०—नचाप्रयोजकत्वं लाघवानुगृहीतेन प्रत्यक्षेण घटादौ कार्यत्वेनैव कर्तृजन्यत्वावगमात् ॥

म०प्र०—ननूक्तपक्षेकार्यत्वरूपहेतुरस्तूक्तसाध्यं माभूद्विपक्षे बाधकतर्काभाव इति कार्यत्वहेतोर्व्यभिचारित्वेन स्वोक्तसाध्यविषयकानुमितिजननासमर्थत्वमित्याशंक्य निराकरोति (नचाप्रयोजकत्वमिति) अनुकूलतर्काभावेन कार्यत्वहेतोरुक्तसाध्याव्याप्यत्वं नेत्यर्थः । यत्र जन्यपदार्थे कार्यत्वं तत्र स्वोपादानगोचरापरोक्षज्ञानवज्जन्यत्वमिति सामान्यकार्यकारणभावस्वीकारे लाघवं यत्र घटत्वं तत्र स्वोपादानगोचरापरोक्षज्ञानवत्कुलालजन्यत्वं यत्र पटत्वं तत्र स्वोपादानगोचरापरोक्षज्ञानवत्कुविंदजन्यत्वमिति विशेपकार्यकारणभावस्वीकारे गौरवमित्यभिप्रेत्यानुकूलतर्कं सूचयन्नचेत्युक्तप्रतिज्ञायां हेतुमाह (लाघवेति) लाघवानुगृहीतेन—उक्तलाघवसहकृतेन प्रत्यक्षेण—इन्द्रियरूपप्रत्यक्षप्रमाणेन गृहीतो यो घटादिनिष्ठकार्यत्वरूपसामान्यधर्मस्तस्यैव स्वोपादानगोचरापरोक्षज्ञानवत्कर्तृजन्यत्वनिरूपितव्याप्त्यवगमेन पक्षे कार्यत्वस्य त्वयापि स्वीकारात्कार्यत्वरूपहेतुबलात्स्वोपादानगोचरापरोक्षज्ञानवज्जन्यत्वमपि त्वया स्वीकरणीयमित्यर्थः । तथाचोक्तपक्षे यदि स्वोपादानगोचरापरोक्षज्ञानवज्जन्यत्वरूपसाध्यं न स्यात्तर्हि कार्यत्वमपि नस्यादिति विपक्षबाधकानुकूलतर्कसत्त्वम् । नचेष्टापत्तिः । उक्तभूतभौतिकजगन्नित्यत्वापत्त्याऽपसिद्धांतापत्तेः । नचान्वयव्यतिरेकाभ्यां घटत्वाद्यवच्छिन्नं प्रति स्वोपादानगोचरापरोक्षज्ञानवत्कुलालादेरेव हेतुत्वादेतादृशकार्यकारणभावे मानाभावेन कथमुक्तानिष्टापादनं संभवतीति वाच्यम् । घटत्वपटत्वादिना स्वोपादानगोचरापरोक्षज्ञानवत्कुलालत्वकुविंदत्वादिनाचानेकधर्मेणानंतकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं कार्यं प्रतिस्वोपादानगोचरापरोक्षज्ञानवत्वेन हेतुत्वकल्पनस्यैवोचितत्वात् “ यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि स एव” इति न्यायेन जन्यपदार्थत्वस्वोपादानगोचरापरोक्षज्ञानवत्वाभ्यां सामान्यकार्यकारणभावस्यावश्यकत्वाच्च । नच तादृशन्यायोनिष्प्रमाणक इति वाच्यम् । कार्यत्वावच्छिन्नाभावे स्वोपादानगोचरापरोक्षज्ञानवत्तत्तदभावकूटस्य प्रयोजकत्वकल्पनापेक्षया. स्वोपादानगोचरापरोक्षज्ञानवत्वावच्छिन्नाभावस्यैवैकस्य प्रयोजकत्वे लाघवेनोक्तन्यायस्याप्रमाणकत्वकथनस्यात्यंतायुक्तत्वादिति भावः ॥

Funding by IKS-MoE

शि०म०—अत एव न नाना किंचिज्ज्ञकर्तृसिद्ध्या अर्थांतरं लाघवादेकस्यैव कर्तुः सर्वज्ञस्य सकर्तृकत्वानुमितौ विषयत्वात् ॥

म० प्र०—ननु स्वोपादानगोचरापरोक्षज्ञानवज्जन्यत्वमात्रस्योक्तपक्षे साध्यत्वेऽदृष्टद्वारा स्वोपादानगोचरापरोक्षज्ञानवदस्मदादिजन्यत्वमादायार्थांतरसिद्धसाधने स्यातामित्याशंक्यादृष्टाद्वारकत्वेन स्वोपादानगोचरापरोक्षज्ञानवज्जन्यताया विशेषणीयत्वं लाघवं चाभिप्रेत्याह (अतइति) अदृष्टाद्वारकत्वेन स्वोपादानगोचरापरोक्षज्ञानवज्जन्यताया विशेषणीयत्वाद्वक्ष्यमाणहेतोश्चेत्यर्थः । नन्वेवमप्युक्तानुमानं उक्तभूतभौतिकानि नोक्तकर्तृजन्यानि शरीराजन्यत्वादात्मवद्यन्नैवं तन्नैवं घटवद्वेत्यनुमानेन सत्प्रतिपक्षितम् । किंचोक्तेश्वरसाधकानुमाने शरीरजन्यत्वमुपाधिरपि संभवति । तस्य घटादौ साध्यव्यापकत्वात्पक्षेसाधनाव्यापकत्वाच्च । नचेश्वरस्य मायारूपशरीरसत्त्वात्कथमुक्तोपाधेः पक्षे साधनाव्यापकत्वमिति वाच्यम् । हस्ताद्यवयवेष्वतिव्याप्तिवारणाय शरीरलक्षणेंऽत्यावयवित्वस्यावश्यं निवेशनियतया मायाया आकाशाद्याकारपरिणामतयांत्यावयवित्वस्यासंभवेनांत्यावयवित्वे सति सुखदुःखादिज्ञानावच्छेदकतायोग्यतात्यंताभावानधिकरणत्वरूपशरीरलक्षणस्य मायायामसंभवात् । नच पक्षे स्वोपादानगोचरापरोक्षज्ञानवज्जन्यत्वरूपसाध्यसंदेहेन शरीरजन्यत्वस्य साध्यव्यापकत्वसंशयान्नोपाधित्वनिश्चय इति वाच्यम् । हेतावुपाधिनिश्चयेहि हेतौ सोपाधिकत्वहेतुना व्यभिचारनिश्चय एव भवति । हेतावुपाधिसंदेहे तु हेतौ व्यभिचारसंदेह आवश्यकः व्याप्यसंदेहेन व्यापकसंदेहस्यानुभवसिद्धत्वात् व्यभिचारज्ञानसामान्यं हि व्याप्तिज्ञानप्रतिबंधकमिति संदिग्धोपाधेरपि दूषकत्वात् । नचोपाधेः संदेहाज्जायमानो व्यभिचारसंदेहो न घटादौ संभवति । तत्र हेतुसत्त्वेपि साध्योपाध्योर्द्वयोरेव निश्चितत्वेन साध्यसंदेहासंभवादपितु पक्ष एव व्यभिचारसंदेहो वाच्यः । नच स व्याप्तिज्ञानप्रतिबंधकः पक्षे व्यभिचारसंदेहस्य तदप्रतिबंधकत्वादन्यथानुमितेः पूर्वं सर्वत्रैव पक्षे साध्यसंदेहसंभवेन तत्र हेतोर्निश्चयादनुमानमात्रोच्छेदप्रसंगः स्यादितिवाच्यम् । उद्देश्यतावच्छेदकावच्छिन्नः साध्यसंदेहवांश्च पक्षः पक्षभिन्नत्वे सति साध्यसंदेहविशिष्टत्वरूपधर्मेण पक्षसमश्च तदन्यतरव्यभिचारसंशयस्यापि व्याप्तिज्ञानप्रतिबंधकत्वात् । नचैवमुक्तरीत्यानुमानमात्रोच्छेदापत्तिरिति वाच्यम् । उपाध्यनधिकरणहेतौ धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्याद्यनुकूलतर्केण व्यभिचारसंदेहस्यासंभवात् ॥

शि०म०—ततश्चानुमानं जगन्निर्मातरि सर्वेश्वरे प्रमाणं तथाच “यतो वा इमानि भूतानि जायंते” “यः सर्वज्ञ सर्ववित्” ॥

Funding by IKS-MoE

म० प्र०–अत एव व्यभिचारसंशयस्यापिं व्याप्तिज्ञानप्रतिबंधकत्वादेवानुकूलतर्कविरहदशायां पक्षेतरत्वं संदिग्धोपाधिरित्यभिधानं ग्रंथकृतां संगच्छते इति । तथाच कथमुक्तानुमानादीश्वरसिद्धिरिति चेत् न तावदस्मदीयपूर्वोक्तेश्वरसाधकानुमाने त्वदीयानुमानेन सत्प्रतिपक्षितत्त्वं त्वदीयानुमाने विपक्षबाधकानुकूलतर्काभावात् शरीराजन्यत्वंहेतौ शरीररूपविशेषणस्यासिद्धिवारकस्यापिं व्यभिचारावारकत्वेन व्यर्थतया शरीरविशेषणावच्छेदेन व्याप्तिग्रहासंभवेन व्याप्यत्वासिद्धेश्च । नच त्वदीयेश्वरसाधकानुमानेऽप्यनुकूलतर्काभाव इति वाच्यं जन्यपदार्थत्वेन स्वोपादानगोचरापरोक्षज्ञानवत्त्वेन च कार्यकारणभावबाधरूपस्यानुकूलतर्कस्य लाघवानुगृहीतेनेत्यादिवाक्ये दर्शितत्वात् । अस्मदीयानुमाने शरीरजन्यत्वरूपोपाधिरपि न संभवति । अनुकूलतर्काभावजन्यव्यभिचारसंदेहस्यैव व्याप्तिनिश्चयप्रतिबंधकत्वेन जन्यपदार्थत्वेन स्वोपादानगोचरापरोक्षज्ञानवत्त्वेन च कार्यकारणभावप्रसिद्धिबाधरूपस्य विपक्षबाधकानुकूलतर्कस्य सत्त्वेन कार्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्याव्यापकत्वेन शरीरजन्यत्वस्य साध्याव्यापकत्वनिश्चयेन साधनाव्यापकत्वेन साध्यव्याप्याव्यापकत्वेन शरीरजन्यत्वस्य साध्याव्यापकत्वनिश्चयेन साधनाव्यापकत्वेन साध्यव्यापकत्वेन वा संदिग्धोपाधित्वासंभवादित्येतत्सर्वं हृदि निधायाह (ततश्चेति) सत्प्रतिपक्षितत्वादिदूषणाभावादेवेत्यर्थः । नन्वनुमानस्यैवेश्वरसाधकत्वे तत्प्रतिपादकवेदोपनिषद्भागस्याध्ययनवैफल्यमित्याशंक्याह (तथाचेति) तथैवेत्यर्थः । योऽक्षराख्यः सर्वज्ञः सामान्यरूपेणसर्वविषयकज्ञानवान् । ननु पदार्थत्वादिरूपसामान्यधर्मेण सर्वविषयकज्ञानवत्त्वं जीवानामपि संभवतीति कथमनेन वाक्येनेश्वरसिद्धिरित्याशंक्याह (सर्वविदिति) घटत्वपटत्वादिरूपतत्तद्विशेषधर्मेणापि सर्वविषयकज्ञानवानित्यर्थः । सामान्येन–समष्टिरूपेण मायाख्योपाधिना सर्वं जानातीति सर्वज्ञः विशेषेण–व्यष्टिरूपेणाविद्याख्योपाधिनानंतजीवभावमापन्नः स एव सर्वस्वोपाधिं तत्सृष्टं च वेत्तीति सर्वविदिति वा सर्वज्ञसर्ववित्पदयोरर्थः ॥

शि०म०–यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्मनामरूपमन्नं च जायते” इत्यादिश्रुतिश्च सर्वज्ञेश्वरे प्रमाणं नापि लक्षणाभावः नामरूपसृष्टिकर्तृत्वस्य नामरूपात्मकप्रपंचाध्यासाधिष्ठानत्वस्य वा तदाकारेण परिणममानमायाधिष्ठानत्वस्य वा ब्रह्मलक्षणत्वात्तदेतदाह (यदविद्याविलासेन भूतभौतिकसृष्टयः) इति । यस्याविद्या यदविद्या षष्ठ्यर्थस्तु संबंधमात्रं “शेषे षष्ठी” इति संबंधसामान्ये षष्ठीस्मरणात् ॥

म० प्र०–नन्वेवमपिं प्रजापतिविशेषः कश्चिज्जीव एव सर्वज्ञत्वादिविशेषणवान्स्यादित्याशंक्याह (यस्य ज्ञानमयं तप इति) यस्य–भगवतः ज्ञानमयं–सत्त्वप्रधानमायायाः सृज्यमानसर्वपदार्थविषयकज्ञानाख्यविकार एव तपः नतु प्रजापतीनामिव

क्लेशरूपं तस्माद्यथोक्तसर्वज्ञत्वादिविशिष्टादेतद्ब्रह्मकार्यलक्षणहिरण्यगर्भाख्यं ब्रह्म नामदेवदत्तयज्ञदत्तादिलक्षणं रूपं–शुक्लादिस्वरूपं तदप्यभिव्यक्तं "तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ॥ अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्" इति पूर्व वाक्येऽन्नपदवेदनीयाव्यक्तनामरूपसृष्टेरभिधानात् । अन्नंच–यवव्रीह्यादिलक्षणम् । जायते उत्पद्यते ब्रह्मादीनामुत्पत्तिक्रमोऽन्नात्प्राण इत्यादि पूर्वमंत्रोक्त एव द्रष्टव्यः "यः कालकालो गुणी सर्वविद्यः" इत्यादिश्रुतय आदिपदेन ग्राह्या इत्यर्थः । ब्रह्मण्यनुमानादिप्रमाणं कथयित्वा लक्षणाभावभ्रमं निवारयति (नापीति) (नामेति) सर्जनरूपसृष्टिकर्तृत्वं ब्रह्मणो लक्षणमित्युक्ते ब्रह्मणः स्वनिष्ठजन्यतानिरूपितजनकत्वाभावादसंभवः स्यादतो रूपेत्युक्तं रूपसृष्टिकर्तृत्वमित्युक्ते नाम्नः कर्तृत्वं ब्रह्मणोऽन्यस्यस्यात्तथाचसिद्धांतहानिरतो नामेत्युक्तमिति पदयोः साफल्यमिति । ननु जीवानामपि यत्किंचिन्नामरूपकर्तृत्वस्य सत्त्वेन तत्रातिव्याप्तिरित्याशंक्य द्वितीयलक्षणमाह (नामरूपात्मकेति) अध्यासाधिष्ठानत्वमित्युक्तेब्रह्मणःस्वान्याध्यासाधिष्ठानत्वेपि स्वाध्यासाधिष्ठानत्वाभावेन सामान्यतोऽध्यासाधिष्ठानत्वरूपलक्षणस्यासंभववारणाय प्रपंचेत्युक्तम् । प्रपंचशब्दस्य समुदायार्थकत्वेन ब्रह्मणोपि तदंतःपातित्वात्पुनरसंभववारणाय 'नामरूपात्मकेति' प्रपंचविशेषणमिति । नन्वेवमपि शुक्त्यादीदमंशावच्छिन्नचैतन्यानामपि यत्किंचिन्नामरूपात्मकप्रपंचाध्यासाधिष्ठानत्वेनोक्तलक्षणस्य तत्रातिव्याप्तिरित्यरुच्या लक्षणांतरमाह (तदाकारेणेति) निखिलनामरूपात्मकप्रपंचाकारेणेत्यर्थः । यद्यपि मायाध्यासाधिष्ठानत्वमित्येव लक्षणं संभवति तथापि ब्रह्मणो मायाध्यासाधिष्ठानत्वस्य सार्वदिकत्वेनोक्तलक्षणस्य स्वरूपलक्षणत्वभ्रमवारणाय नामरूपात्मकप्रपंचस्य ब्रह्मान्याधिष्ठानकत्वभ्रमवारणाय च तदाकारेण परिणममानेत्युक्तमिति ॥

शि०म०–तद्विशेषलाभस्त्वर्थात् । अन्यथा निर्विशेषसामान्यव्यवहारानुपपत्तेः । स च विवरणाचार्य्यमते आश्रयाश्रयिभावः आचार्य्यवाचस्पतिमतेविषयविषयिभावः । यद्वा 'यस्येति कर्मणि षष्ठी' तत्रापि तद्विधानात् । शंकरभगवत्पादैरपि ब्रह्मजिज्ञासेत्यत्र ब्रह्मण इति कर्मणि षष्ठीत्यभिधानात्तद्विषयत्वं चोभयसाधारणम् ॥

म०प्र०–ननु षष्ठ्या संबंधसामान्यलाभेपि संबंधविशेषलाभः कथमित्याशंक्याह (तद्विशेषेति) षष्ठ्यर्थसंबंधसामान्यस्य संबंधविशेषघटितत्वेन विशेषसंबंधं विनाऽनुपपद्यमानत्वरूपार्थापत्तिप्रमाणात्संबंधविशेषज्ञानं भवतीत्यर्थः । षष्ठ्यर्थसंबंधसामान्यं विशेषसंबंधं विनाऽनुपपद्यमानं विशेषसंबंधं कल्पयतीतिभावः । षष्ठ्यर्थसंबंधसामान्यघटकीभूतसंबंधविशेषानंगीकारे बाधकमाह (अन्यथेति) षष्ठ्यर्थसंबंधसामान्य-

घटकीभूतसंबंधविशेषानंगीकारे निर्विशेषसामान्यव्यवहारानुपपत्तेः–निर्गतो–निवृत्तो विशेषो–विशेषसंबंधो यस्मिन्षष्ठ्यर्थसंबंधसामान्ये तत्तथा निर्विशेषं च तत्सामान्यं निर्विशेषसामान्यं तस्मिन्विशेषसंबंधाघटितषष्ठ्यर्थसंबंधसामान्ये यदविद्येत्यत्र षष्ठ्यर्थसंबंधः क इति त्वां प्रति कस्यचित्प्रश्ने सत्यत्राश्रयाश्रयिभावरूपो विषयविषयिभावरूपो वा षष्ठ्यर्थसंबंध इति समाधानात्मकशब्दस्वरूपव्यवहारानुपपत्तेः । यद्वा निर्विशेषे विशेषशून्ये विशेषाघटिते निर्विशेषं न सामान्यमित्याकारको यः सामान्यप्रतियोगिकभेदविषयकव्यवहारस्तदनुपपत्तेरित्यर्थः (सचेति) षष्ठ्यर्थसंबंधसामान्यघटकीभूतसंबंधविशेष एवेत्यर्थः । अर्थापत्त्यादिप्रमाणकल्पनागौरवमभिप्रेत्याह (यद्वेति) तत्रापि–कर्मण्यपि तद्विधानात्–"कर्तृकर्मणोः कृति" इति सूत्रेण षष्ठीविधानात् । नन्वेवं विवरणाचार्यस्य ब्रह्माविद्ययोराश्रयाश्रयिभावस्वरूपसंबंधस्याभिमतत्त्वेन विवरणाचार्यमते ब्रह्माविद्ययोर्विषयविषयिभावरूपसंबंधो न सिध्येदित्याशंक्याह (तद्विषयत्वंचेति) ब्रह्मणोऽविद्याविषयत्वं चोभयसाधारणम्–उभयोर्विवरणाचार्याचार्यवाचस्पत्योरंगीकृतमित्यर्थः । तथाच विवरणाचार्यस्य ब्रह्माविद्ययोराश्रयाश्रयिभावरूपसंबंधाभिधानस्याविद्याया जीव एवाश्रयो ब्रह्म तु विषय एवेत्याचार्यवाचस्पत्यभिमताविद्यायाभिन्नाश्रयविषयकत्वनिरासतात्पर्यकत्वेन ब्रह्माविद्ययोर्विषयविषयिभावनिरासे तात्पर्याभावेन विवरणाचार्यमतेप्यविद्याया ब्रह्मविषयकत्वसत्त्वेनब्रह्मणोऽविद्याविषयत्वमुभयमततुल्यमितिभावः ॥

शि०म०अविद्या नाम विद्यानिवर्त्या अनिर्वचनीया अनादिभावरूपेति वक्ष्यते । तद्विलासश्च तज्जनितवृत्तिविशेषः, परमेश्वरस्येक्षणसंकल्पप्रयत्नरूपः "तदैक्षत सोऽकामयत तन्मनोऽकुरुत" इत्यादिश्रुतिसिद्धः तेन सहकारिणा भूतानि पंचसूक्ष्माण्यपंचीकृतानि वियदादीनि भौतिकानि च तदुपादानानि पंचीकृतानि परिदृश्यमानपृथिव्यादीनि तेषां सृष्टयो भवंतीत्यध्याहारः । अत्र भूतभौतिकग्रहणं नामरूपमात्रोपलक्षणार्थं सृष्टिग्रहणं च स्थितिप्रलयोपलक्षणार्थम् । अन्यथा शब्दप्रपंचस्य स्थितिप्रलययोश्चाग्रहणे ब्रह्मणोऽद्वितीयत्वासिद्धिप्रसंगः । एवं प्रमाणं तटस्थलक्षणंच प्रदर्श्य स्वरूपलक्षणमाह (सदिति) यद्यपि सदादि प्रत्येकं लक्षणं तथापि प्रयोजनसूचनार्थमानंदग्रहणम् । नचैवं चित्पदं व्यर्थम्, आनंदस्य पुरुषार्थत्वद्योतनाय तदुपादानात् ॥ १ ॥

म०प्र०–ननूक्तप्रकारेण ब्रह्मणोलक्षणप्रमाणसिद्धत्वेप्यविद्याया लक्षणाभावेन कथं तयोर्विषयविषयीभावादिरूपसंबंधकल्पनेत्याशंक्याह (अविद्यानामेति) भावरूपाऽवि-

Funding by IKS-MoE

द्येत्युक्ते घटादावतिव्याप्तिः स्यात्तद्वारणायानादीति । अनादिभावरूपाविद्येत्युक्ते आत्मन्यतिव्याप्तिः स्यादतोऽनिर्वचनीयेति । अविद्यासंबंधेऽतिव्याप्तिवारणाय विद्यानिवर्त्येति । नचाविद्यासंबंधस्यापि विद्यानिवर्त्यत्वादेः सत्त्वादविद्यासंबंधेऽतिव्याप्तिः स्यादिति वाच्यम् । साक्षादित्यस्यापि निवेशादिति (ईक्षणेति) ईक्षणं—स्रष्टव्योत्पत्त्यनुकूलस्रष्टव्यविषयकदर्शनम्, संकल्पः—सर्जनानुकूलेच्छात्मकः, प्रयत्नः—सर्जनानुकूलकृतिरित्यर्थः । तत्—सदाख्यं ब्रह्म, ऐक्षत—स्रष्टव्योत्पत्त्यनुकूलस्रष्टव्यविषयकदर्शनं कृतवत् । सः—परमात्मा, अकामयत—सूक्ष्मशरीरापेक्षया द्वितीयं मम स्थूलशरीरं जायेतेतीच्छां कृतवान् । तत्—स्रष्टव्यालोचनक्षमं, मनः—मनःपदवाच्यं संकल्पादिलक्षणमकुरुत—मायाविशिष्टपरमात्मा कृतवानित्यर्थः । तदुपादानानि—अपंचीकृतभूतोपादानकानि । अत्र—यदविद्येत्यादिश्लोके, भूतभौतिकग्रहणम्—भूतभौतिकयोर्भूतभौतिकरूपार्थयोर्ग्रहणं—ज्ञानं यस्माद्भूतभौतिकपदात्तद्भूतभौतिकग्रहणमितिसमासेन भूतभौतिकपदं नामरूपमात्रोपलक्षणार्थं—लक्षणया वृत्त्या सकलनामरूपज्ञापनार्थं सृष्टिग्रहणं—सृष्टिपदं स्थितिप्रलयोपलक्षणार्थं—लक्षणया स्थितिप्रलययोर्ज्ञापनार्थम् । ननु यथाश्रुते प्रमाणांतरविरोधाभावाद्भूतभौतिकादिशब्देन लक्षणया निखिलनामरूपादीनां ज्ञापनमयुक्तमित्याशंक्याह (अन्यथेति) भूतभौतिकशब्दस्य लक्षणया निखिलनामरूपज्ञापतार्थकत्वानंगीकारे सृष्टिपदस्य च लक्षणया स्थितिप्रलयज्ञापनार्थकत्वानंगीकारेचेत्यर्थः । ननु सदादिपदानां लक्षणया सत्यादिरूपैकब्रह्मबोधकत्वात्पौनरुक्त्यमित्याशंक्याह (यद्यपीति) एवम्—उक्तप्रकारेणानंदपदसाफल्येपि । तदुपादानात्—चित्पदस्वीकारात् ॥

शि॰म॰—ज्ञायमानानंदस्यैव पुरुषार्थत्वात् न चाहं जानामि सुखी त्यादि प्रत्यक्षविरोधात् "आनंदंब्रह्मण" इति श्रुतिविरोधाच्च नज्ञानादिरूपं ब्रह्मेतिवाच्यम् ।"सत्यं ज्ञानमनंतं ब्रह्म" "विज्ञानमानंदं ब्रह्म" "आनंदो ब्रह्म" इत्यादिश्रुतेः ब्रह्मणः सच्चिदानंदात्मकतावगमेन 'राहोः शिरः' आत्मनश्चैतन्यम्' इतिवद्भेदश्रुतिप्रत्यक्षयोरुपचरितार्थत्वात् ॥ १ ॥

म॰ प्र॰—ननु चित्पदोपादानेन कथमानंदस्य पुरुषार्थत्वद्योतनं भवतीत्याशंक्याह (ज्ञायमानेति) नच चेतनरूपज्ञानेन चेतनरूपानंदस्य ज्ञायमानत्वानुपपन्नत्वेनाज्ञायमानानंदप्रसक्त्या च "ज्ञायमानानंदस्यैव पुरुषार्थत्वात्" इत्युक्तिरयुक्तेति वाच्यम् । ज्ञायमानानंदस्येत्यनेनापरोक्षत्वप्रकारकव्यवहारयोग्यसुखस्यैव विवक्षितत्वादुक्तव्यवहारयोग्यत्वं चानावृतचिद्रूपत्वेनानावृतचित्तादात्म्येन वेति ज्ञापनार्थत्वेन ज्ञायमानानंदस्यैव पुरुषार्थत्वादित्युक्तेः सार्थक्यमिति । ननु ज्ञानानंदाभ्यां ब्रह्मणो

Funding by IKS-MoE

भेदस्य ब्रह्म न ज्ञानानंदमित्याकारकप्रत्यक्षादिसिद्धत्वेन कथं ज्ञानानंदाभ्यां ब्रह्मणो भेद इत्याशंक्य ब्रह्मणो ज्ञानानंदाभ्यां भेदं निराकरोति (नचेति) (सच्चिदानंदात्मकत्वावगमेनेति) । नच सत्यं ज्ञानमित्यादौ ज्ञानपदस्य "यः सर्वज्ञः" इत्यादिश्रुत्यनुरोधाज्जानातीति ज्ञानमिति कर्तृल्युडंतत्वांगीकारेण मत्वर्थीयार्शआद्यच्प्रत्ययान्तत्वेन वा ज्ञानपदेन ज्ञानाश्रय एवोक्तः । एवमानंदमित्यस्याप्यानंदोऽस्यास्तीत्यानंदमिति मत्वर्थीयाच्प्रत्ययांतत्वेनानंदवदित्यर्थोऽन्यथानंदशब्दस्य नियतपुंस्त्वेन नपुंसकत्वानापत्तेरिति कथं ब्रह्मणो ज्ञानानंदाभ्यां भेदाभाव इति वाच्यम्। "यः सर्वज्ञः" इत्यादिश्रुतेर्मायावृत्त्यात्मकसर्वविषयकज्ञानपरत्वेनाप्युपपत्त्या " केवलो निर्गुणः " इत्यादिश्रुत्यनुरोधेन ज्ञप्तिर्ज्ञानमिति ज्ञानशब्दस्य भावल्युडंतत्वस्यैवाश्रयणादानंदशब्दे क्लीबतायाः छांदसत्वेनाप्युपपत्तेर्गुणगुणिभावसंपादकसमवायसंबंधस्यासंभवाच्चेति । भेदश्रुतिप्रत्यक्षयोः–भेदविषयकोक्तश्रुतिप्रत्यक्षयोः उपचरितार्थत्वात । उपचरित–आरोपितोऽर्थोभेदरूपोविषयोययोस्तौ तथातयोर्भावस्तत्त्वं तस्मात् कल्पितभेदस्वरूपार्थविषयकत्वादितियावत् ॥ १ ॥

सू०–यदंतेवासिपंचास्यैर्निरस्ता भेदिवारणाः ॥
तंप्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥ २ ॥
श्रीमद्वेङ्कटनाथाख्यान् वेलांगुडिनिवासिनः ॥
जगद्गुरूनहं वन्दे सर्वतंत्रप्रवर्त्तकान् ॥ ३ ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जिनी ॥
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥ ४ ॥

शि०म०–"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥
तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः"

इति सुबालोपनिषच्छ्रुत्या गुरुनमस्कारः कर्तव्यत्वेन समधिगतः तत्र परमगुरून् नमस्कृत्य साक्षाद्विद्यागुरूनाचार्यान् प्रणमति यदंतेवासिपंचास्यैः इत्यादि द्वाभ्याम् ॥ २ ॥ ३ ॥ चिकीर्षितस्य ग्रंथस्योपादेयतासिद्धये स्वकीर्त्यनुवृत्तये च स्वस्य नानाविधग्रंथकर्तृतामाह (येनेति) ननु मोक्षसाधनब्रह्मज्ञानस्य शारीरकमीमांसाश्रवणसाध्यत्वेन तत्रैवप्रेक्षावतां प्रवृत्त्युपपत्तेर्नैतद्ग्रंथारम्भ इत्याशंक्य ॥

म० प्र०–प्रकाशंते अपरोक्षा भवंति (तत्रेति) गुरुनमस्कारादिरूपभक्तेः कर्तव्यत्वेन समधिगतत्वे सतीत्यर्थः । परममूले (यदंतइति) अंते–समीपे विद्याप्राप्त्याकांक्षया

वस्तुं शीलं येषां तेंऽतेवासिनः–शिष्या यस्यांतेवासिनो–यदंतेवासिनस्त एव पंचास्याः–सिंहाः–अभयत्वातिरस्कृतत्त्वादिधर्मेण सिंहसदृशास्ते तथा तैर्यदंतेवासिपंचास्यैर्वारणा–गजा निरस्ताः–ध्वस्ताः । ननु शिष्याणां भिक्षाचर्याद्यनुष्ठानेन कृशत्वात्कथं प्रसिद्धगजध्वंसकत्वमित्याशंक्य नात्र वारणपदेन प्रसिद्धगजग्रहणं किंतु भेदवादिनां गजसदृशानां ग्रहणमित्यभिप्रेत्याह (भेदीति) भेदवादिरूपेत्यर्थः । तं–पूर्वोक्तयच्छब्दवाच्यं यतीनां–यत्नशीलानां परमहंसपरिव्राजकानामिन्द्रं स्वामिनं नृसिंहसंज्ञकं परमं गुरुं गुरोर्गुरुं प्रणौमि–प्रकर्षेण–मनोवाक्कायप्रणिधानेन नौमि नमस्करोमीत्यर्थः । परममूले (येनेति) येन–धर्मराजाध्वरीन्द्रेण दशटीकाविभंजिनी चिंतमणिव्याख्यानभूतानां दशटीकानां दूषणबोधिका विद्वन्मनोरमा प्रेक्षावच्चित्ताह्लादकरा चिंतामणौ टीका कृता । तेन धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते–क्रियत इत्यर्थः । एतद्ग्रंथारम्भाभावे हेतुमाह (तत्रैवेति) शारीरकमीमांसायामेवेत्यर्थः । शारीरकमीमांसायामेव प्रवृत्त्युपपत्तौ हेतुमाह मोक्षसाधनेत्यादिना ॥

मू०– तेन बोधाय मंदानां वेदान्तार्थावलंबिनी ॥
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥ ५ ॥

शि०म०–मेधाविनामतिविततगहनगम्भीरेषु सूत्रभाष्यादिषु आदावेव प्रवृत्तिसम्भवेऽपि मंदधियां तत्र प्रवृत्त्यनुपपत्तेस्तदनुग्रहार्थमेतद्ग्रंथारम्भ इत्याह (तेनेति) तेन धर्मराजाध्वरीन्द्रेण बोधाय ब्रह्मबोधाय स एव कुत इत्यत आह (वेदान्तार्थावलंबिनीति). यद्यपि प्रमाणमालादौ संक्षेपतो वेदान्तार्थनिरूपणात्तेनापि मंदानुग्रहस्तथापि न सर्वस्य वेदान्तशास्त्रार्थस्य प्रतिपादनं तत्रेति ध्येयम् । स्वकीयग्रंथस्य निःश्रेयसप्रयोजनवच्छारीरकमीमांसया संगतिं दर्शयितुं करिष्यमाणप्रमाणनिरूपणस्य ॥

म०प्र०–मंदधियामनुग्रहायैतद्ग्रंथारंभे हेतुमाह (मेधाविनामिति) अतिविततत्त्वं शब्दतो विस्तृतत्वं, गहनत्वं–दुष्प्रवेशार्थकत्त्वं–गम्भीरत्वं–अतलस्पर्शत्वं अयमेवार्थस्तस्य नान्य इतीयत्ताबुद्धिविषयताशून्यत्वमिति तदर्थभेद इति आदावेव–एतद्ग्रंथाध्ययनात्पूर्वमेव, तत्र–सूत्रभाष्यादिषु, तदनुग्रहार्थं–मंदबुद्ध्यनुग्रहार्थम् । तेनापि–प्रमाणमालादिनापि, तत्र–प्रमाणमालादौ संगतिं–शारीरकमीमांसाया यन्निःश्रेयसरूपं परमप्रयोजनं तदेवस्वकीयग्रंथस्यापीत्येककार्य्यकारित्वरूपसंगतिं दर्शयितुमिति । एककार्य्यकारित्वरूपसंगतिविषयकदर्शनानुकूलव्यापारविषयकेच्छावानित्यर्थः । अस्य

Funding by IKS-MoE

साधयतीत्यनेनान्वयः । न च "प्रयोजनं विना मंदोपि न प्रवर्त्तत" इति न्यायेन स्वकीयग्रंथस्य निःश्रेयसप्रयोजनवच्छारीरकमीमांसया सहैककार्य्यकारित्वरूपसंगतिविषयकदर्शनानुकूलव्यापारविषयकेच्छा व्यर्थेति वाच्यम् । निःश्रेयसप्रयोजनवच्छारीरकमीमांसया सह संगतिप्रदर्शनस्य स्वकीयग्रंथे प्रयोजनरूपोऽनुबंधोस्तीति प्रदर्शनार्थकत्वात् । नच ज्ञानद्वारा तत्त्वमस्यादिवाक्यानामेव परमनिःश्रेयसप्रयोजनकत्वाच्छारीरकमीमांसायाः परमनिःश्रेयसरूपप्रयोजनवत्त्वस्यैवासिद्धत्वात्कथं परमनिःश्रेयसरूपप्रयोजनवच्छारीरकमीमांसया सहैककार्य्यकारित्वरूपसंगतिप्रदर्शनेन स्वकीयग्रंथस्य प्रयोजनरूपानुबंधनत्त्वं बोध्यते इति वाच्यम् । यथा प्रधानयागस्य यत्स्वर्गरूपं फलं तदेव प्रयाजाद्यंगानां तथा प्रधानस्य तत्त्वमस्यादिवाक्यस्य ज्ञानद्वारा यत्परमनिःश्रेयसरूपं फलं तदेव फलं तत्त्वमस्यादिमहावाक्यांगभूतशारीरकमीमांसाया अपीतिप्रधानफलेनैवांगानां फलवत्त्वादिति । ननु शारीकमीमांसायाः प्रधानतत्त्वमस्यादिमहावाक्योपकारकत्वेन परमनिःश्रेयसप्रयोजनकत्वेपि त्वत्प्रणीतग्रंथस्य प्रधानतत्त्वमस्यादिमहावाक्योपकारकत्वाभावान्न परमनिःश्रेयसप्रयोजनकत्वमित्याशंक्य शारीरकमीमांसावदेतस्यापि प्रधानोपकारकत्वमभिप्रेत्याह (करिष्यमाणेति) करिष्यमाणं प्रमाणनिरूपणं यस्मिन् ग्रंथे स तथा तस्य प्रमाणनिरूपणाधिकरणग्रंथस्येत्यर्थः ॥ ९ ॥

मू०–इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः "न स पुनरावर्तते" इत्यादिश्रुत्या तस्य नित्यत्वावधारणात् ॥

शि०म०–परंपरया निःश्रेयसोपयोगं दर्शयन् शास्त्रस्य प्रथमं तत्साधनतां साधयति (इहेत्यादिना) सचेत्यत्रवेदांतविचारसाध्यादित्यध्याहारः तथाच वेदान्तविचारसाध्याद्ब्रह्मज्ञानान्मोक्ष एव भवतीति प्रथमं संबंधः । मोक्षस्य विचारफलत्वे हेतुमाह (पुरुषार्थइति) पुरुषेण वेदांतश्रवणाधिकारिणार्थ्यमान इत्यर्थः । तथाच काम्यमाना निषिद्धाधिकारिविशेषणत्वान्मोक्षस्य तत्फलतेति भावः । अत्रैव कामनायां विनिगमकमाह (परमेति) नित्येत्यर्थः । परमते वियदादेरपि नित्यत्वात्सिद्धान्ते जीवाविद्यादेरनादित्वान्मोक्ष एवेति एवकारे तद्व्यवच्छेदाशंकां निराकर्तुं धर्मार्थकाममोक्षाख्येष्वित्युक्तम् । ननु मोक्षस्य विचारफलत्ववन्नित्यत्वमपि संदिग्धमित्याशंक्य तन्नित्यत्वस्य लोकेप्रसिद्धत्वादित्याह (इह

Funding by IKS-MoE

खलु इति) नच तत्प्रसिद्धिरपि देहात्मप्रसिद्धिवन्निर्मूलत्वादप्रमाणं श्रुतिमूलत्वादित्याह (नसपुनरिति) मुक्तो न पुनः संसारी भवतीत्यर्थः ॥

म० प्र०–(परंपरयेति) मोक्षतत्त्वज्ञानप्रपंचमिथ्यात्वशास्त्रप्रतिपाद्यब्रह्मप्रतिपादनद्वारा स्वकीयग्रंथस्य प्रधानतत्त्वमस्यादिमहावाक्योपकारकत्वरूपपरंपरयेत्यर्थः । उपयोगं–संबंधं शास्त्रस्य–शारीरकमीसांसारूपशास्त्रस्य तत्साधनतां–ज्ञानद्वारा मोक्षकारणताम् । ननु मूले शास्त्रस्य ज्ञानद्वारापि मोक्षसाधनत्वं न प्रतीयत इत्यत आह (सचेत्यत्रेति) इत्यत ऊर्द्धमित्यर्थः । (तथाचेति) वेदान्तविचारसाध्यादित्यस्याध्याहारे कृते सतीत्यर्थः । यत्र वेदादिविहितयज्ञादिकर्माधिकारिविशेषणत्वं तत्र वेदादिविहितयज्ञादिकर्मसाध्यत्वमिति व्याप्तेः स्वर्गादौ दृष्टत्वेन वेदांतविचाराधिकारिपुरुषेणार्थ्यमानत्वान्मोक्षस्यापि वेदांतविचाराधिकारिपुरुषविशेषणत्वेन वेदांतविचारसाध्यत्वमित्यभिप्रेत्याह (मोक्षस्येति) विचारफलत्वे–ज्ञानद्वारा विचारसाध्यत्वे (तथाचेति) मोक्षस्य वेदांतश्रवणाधिकारिपुरुषेणार्थ्यमानत्वे सतीत्यर्थः (काम्यमानेति) काम्यमानं च तदनिषिद्धं च तत्काम्यमानानिषिद्धंकाम्यमानानिषिद्धंचतदधिकारिविशेषणं च तत्काम्यमानानिषिद्धाधिकारिविशेषणं तस्य भावस्तत्त्वमितिसमासस्तथाचकाम्यमानत्वे सत्यनिषिद्धत्वेच सत्यधिकारिव्यावर्त्तकत्वादित्यर्थः । अनिषिद्धाधिकारिविशेषणत्वादित्युक्ते दुःखनिवृत्तिकामवेदादिविहितदुःखनिवृत्तिसाधनयज्ञादिकर्माधिकारिपुरुषनिष्ठवर्तमानदुःखेऽनिषिद्धत्वे सत्यधिकारिविशेषणत्वस्य सत्त्वेन वेदादिविहितेन साध्यत्वरूपसाध्याभावेनच दुःखे व्यभिचारवारणाय काम्यमानेत्युक्तम् । काम्यमानाधिकारिविशेषणत्वादित्युक्ते ब्राह्मणहननपापादिनिवृत्तिकामवेदादिविहितप्रायश्चित्तरूपकर्माधिकारिपुरुषविशेषणविशेषणत्वेनाधिकारिपुरुषविशेषणब्राह्मणहननादौ व्यभिचारवारणायानिषिद्धेति । काम्यमानानिषिद्धत्वादित्युक्ते निष्ठीवनादौ व्यभिचारवारणायाधिकारिविशेषणेत्युक्तमिति (तत्फलतेति) ज्ञानद्वारा विचारफलतेत्यर्थः । यत्रकाम्यमानत्वे सत्यनिषिद्धत्वे चसत्याधिकारिविशेषणत्वं तत्र वेदविहितेन साध्यत्वमिति व्याप्तेर्मोक्षस्याधिकारिविशेषणत्वादमृतत्वकामेन वेदांतविचारः कर्त्तव्य इत्यर्थकं “श्रोतव्यः” “अथातोब्रह्मजिज्ञासा” इत्यादिशास्त्रविहितेन विचारेण साध्यत्वमितिभावः । अत्रैव–मोक्षे एव येषामाकाशादिषु पुरुषार्थत्वभ्रांतिस्तेषामभिप्रायेणाह (परमतेइति) (तद्व्यवच्छेदेति) आकाशादिव्यावृत्तीत्यर्थः । नित्यत्वादाकाशादीनां पुमर्थत्वं प्रसक्तं तेषां व्यावृत्त्यर्थमेवकार इति नच भ्रामितव्यं येषां धर्मादीनां पुरुषार्थत्वेन प्रसिद्धिस्तद्व्यवच्छेदार्थकत्वादेवकारस्येति भावः (मोक्षस्य विचारफलत्ववदिति) यथा लोके विचारस्य जयविजयादिफलदर्शनान्मोक्षस्य विचारफलत्वे संदेहस्तद्वदित्यर्थः (तत्प्रसिद्धिरिति) मोक्षस्य नित्यत्वप्रतीतिरित्यर्थः । (अप्रमाण-

Funding by IKS-MoE

मिति) अप्रमेत्यर्थः । तस्या अप्रमात्वे हेतुमाह (निर्मूलत्वादिति) परममूले इहेति शास्त्रे वेदे चेत्यर्थः । खलु–प्रसिद्धेषु धर्मादिषु, धर्मः–वेदविहितयागादिस्तज्जन्यपुण्याख्यादृष्टविशेषो वा, अर्थः–धनम्, कामः–पाणिगृहीतस्त्रीसंभोगादिरित्यर्थः ॥

मू०–इतरेषां त्रयाणां तु प्रत्यक्षेण “तद्यथेह कर्मचितो लोकः क्षीयतएवमेवामुत्र पुण्यचितो लोकः क्षीयते” इत्यादिश्रुत्याचानित्यत्वावगमाच्च सच ब्रह्मज्ञानात् ॥

शि०म०–ननु काम्यमानत्वं धर्मादीनामप्यविशिष्टं नचानित्यत्वात्ततो विरक्तिरेवास्येति वाच्यम् । तेषामपि पुरुषार्थत्वादिना नित्यत्वानुमानादित्याशंक्य वह्न्यनौष्ण्यानुमानवद्बाधितविषयंतदित्याह (इतरेषामिति) त्रयाणां मध्ये द्वयोरर्थकामयोःप्रत्यक्षेणानित्यत्वावगमादित्यर्थः । अन्यथा धर्मस्यातीन्द्रियत्वेन त्रयाणां प्रत्यक्षेणानित्यत्वावगमादित्यनुपपत्तेः । यद्वा प्रत्यक्षेण प्रत्यक्षादिसिद्धेन कार्यत्वलिंगेनेत्यर्थः । तथाच कार्यत्वलिंगकानित्यत्वानुमानबाधितं त्रयाणां नित्यत्वानुमानमिति भावः । नन्वनुमानयोः समबलत्वान्न नित्यत्वबाध इत्याशंक्य श्रुतिमूलत्वात्प्रबलमानित्यत्वानुमानमित्याह (तद्यथेति) इहअस्मिन् लोके धर्माधर्मकर्मनिर्मितो लोक्यते इतिलोको–घटादिर्यथाक्षीयते तथालोकांतरे पुण्यनिर्मितो लोकः स्वर्गादिर्नश्यतीत्यर्थः । ननु “अपामसोमममृता अभूम” “अगन्मज्योतिरविदामदेवान्” “अक्षय्यं हवै चातुर्मास्ययाजिनः सुकृतं भवति” इत्यादिश्रुत्या स्वर्गादेरपि नित्यत्वमवगम्यत इतिचेन्न । यत्कृतकं तदनित्यमिति सामान्यतो दृष्टानुमानानुगृहीतं तद्यथेत्यादिश्रुतिविरोधेनाक्षय्यमित्यादिश्रुतेः प्रलयपर्यंतस्थायिफलाभिप्रायत्वात् । नन्वस्तु वदांतविचारस्य ब्रह्मज्ञानद्वारा निःश्रेयसहेतुत्वं तथापि प्रमाणनिरूपणस्य तदुपयोगाभावान्न शास्त्रसंगतिरित्याशंक्य यतः शास्त्रप्रतिपाद्यं ब्रह्म तत्प्रयोजनंच मोक्षसाधनब्रह्मज्ञानं च प्रमाणाधीनमतः परंपरया निःश्रेयसोपयोगीति प्रमाणनिरूपणं शास्त्रसंगतमित्यभिप्रायेग ॥

म० प्र०–अविशिष्टं–समानं ततः–धर्मादिभ्यः अस्य–मुमुक्षोः तेषामपि–धर्मादीनामपि (अनुमानादिति) धर्मादयो नित्याः पुरुषार्थत्वान्मोक्षवदित्यनुमानादित्यर्थः (तदिति) धर्मादिषुनित्यत्वानुमानमित्यर्थः । अन्यथा–उक्तार्थानंगीकारे (अनुमानेति)–धर्मादयोऽनित्याः कार्यत्वात् घटवदित्यनुमानेत्यर्थः (अपामेति)

Funding by IKS-MoE

अगन्मेत्यत्र वर्णव्यत्ययः छान्दसस्तथाचागमन्नित्यर्थः । अत्र "सोमं पीत्वाऽमृता भविष्यामस्तथा प्रकाशवन्मार्गं गत्वा देवादीन् प्राप्स्याम" इति च वक्तव्ये भविष्यति फलादौ भूतप्रयोगः फलादेरसंदिग्धत्वज्ञापनायेति बोध्यमिति (इति सामान्यतोदृष्टानुमानेति) यत्कृतकं तदनित्यमिति वाक्यबोधितान्वयव्यतिरेक्यनुमानेत्यर्थः । (तथापीति) वेदांतविचारस्य ब्रह्मज्ञानद्वारानिःश्रेयसहेतुत्वेपीत्यर्थः । तदुपयोगाभावात्–निःश्रेयसे संबंधाभावात् इत्याशंक्येत्यभिप्रायेण तन्निरूपणं प्रतिजानीते इत्यन्वयः ॥

मू०–इति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपंचं निरूप्यते ॥

शि० म०–तन्निरूपणं शिष्यावधानाय प्रतिजानीते (इतिब्रह्मेति) तर्हि तत्प्रमाणनिरूपणमेव तदुपयोगित्वाच्छास्त्रसंगतंस्यादित्याशंक्य प्रमाणनिरूपणस्य प्रमाणसामान्यलक्षणप्रमाणेयत्तादिसापेक्षत्वात्तन्निरूपणमपि तत्परिकरत्वाच्छास्त्रसंगतमित्याह (सप्रपंचमिति) नच सप्रपंच तत्प्रमाणनिरूपणस्यैव प्रतिज्ञातत्वे सति विषयप्रयोजनयोरुत्तरत्र निरूपणमसंगतं स्यात्तयोरप्रतिज्ञातत्वादिति वाच्यम् । कृतस्य प्रमाणनिरूपणस्य शास्त्रविषयप्रयोजनोपयोगं दर्शयितुं प्रासंगिकतन्निरूपणसंभवात् ॥

म० प्र०–अभिप्रायमेवाह (इतीति) अस्मादेवहेतोरित्यर्थः । हेतुमेव स्फुटीकरोति (परंपरयेति) शास्त्रप्रतिपाद्यब्रह्मादिप्रतिपादनरूपपरंपरयेत्यर्थः (निःश्रेयसोपयोगीति) प्रमाणनिरूपणमितिशेषः । प्रमाणनिरूपणस्य निःश्रेयसोपयोगित्वमेव कुत इत्याशंक्याह (अत इति) शास्त्रप्रतिपाद्यब्रह्मादीनां प्रमाणाधीनत्वादित्यर्थः । अतः शब्दार्थमेवस्फुटीकरोति (यतइति) यस्मात्कारणात् शास्त्रप्रतिपाद्यब्रह्मादीनामज्ञातत्वरूपकारणादित्यर्थः । तन्निरूपणं–प्रमाणनिरूपणं परममूले (इतीति) मोक्षस्य ब्रह्मज्ञानसाध्यत्वरूपहेतोरित्यर्थः (तर्हीति) शास्त्रप्रतिपाद्यब्रह्मादीनां प्रमाणाधीनत्वेन शास्त्रप्रतिपाद्यब्रह्मादिप्रमाणनिरूपणस्य परंपरया निःश्रेयसोपयोगित्वात् शारीरकरूपशास्त्रसंगतत्वेपीत्यर्थः (तत्प्रमाणनिरूपणमेवेति) शास्त्रप्रतिपाद्यब्रह्मादिषु यत्प्रमाणं वेदांतवाक्यादिरूपं प्रमाणं तन्निरूपणमेव शास्त्रसंगतं स्यान्नतुप्रमाणसामान्यलक्षणप्रमाणेयत्तादिशास्त्रसंगतमित्यर्थः । ब्रह्मादिप्रमाणनिरूपणस्य शास्त्रसंगतत्वे हेतुमाह (तदुपयोगित्वादिति) ब्रह्मादिप्रमाणनिरूपणस्य परंपरया निःश्रेयसे संबंधादित्यर्थः । इत्याशंक्येत्याहेत्यन्वयः । इतिशब्दार्थमेवाह (तन्निरूपणमिति)

प्रमाणसामान्यलक्षणादिनिरूपणमित्यर्थः । प्रमाणसामान्यलक्षणादिनिरूपणस्य शास्त्रसंगतत्वेहेतुमाह (तत्परिकरत्वादिति) प्रमाणसामान्यलक्षणादिनिरूपणस्य शास्त्रप्रतिपाद्यब्रह्मादिप्रमाणनिरूपणं प्रतिकारणत्वादित्यर्थः । तस्य तत्परिकरत्वेहेतुमाह (प्रमाणनिरूपणस्येत्यादिना) शास्त्रप्रतिपाद्यब्रह्मादिप्रमाणनिरूपणस्येत्यर्थः (तत्प्रमाणेति) शास्त्रप्रतिपाद्यब्रह्मादिप्रमाणेत्यर्थः (तयोरिति) विषयप्रयोजनयोरित्यर्थः (उपयोगंदर्शयितुमिति) संबंधविषयकबोधेच्छावतेत्यर्थः (प्रासंगिकेति) प्रासंगिकयोः स्मृतयोस्तयोर्विषयप्रयोजनयोः प्रतिपादनस्योपपत्तेरित्यर्थः ॥

शि॰ म॰–अत एव चिंतामणौ प्रमाणतत्त्वप्रतिज्ञायामपि मोक्षेश्वरादिनिरूपणं यद्वा सप्रपंचत्वं त्रितयविशेषणं तथाच जगदुपादानत्वसच्चिदानंदात्मकत्वजीवाभिन्नत्वलक्षणपरिकरोपेतं ब्रह्मतज्ज्ञानं च वेदांतजन्यत्वस्वप्रकाशकर्मनिरपेक्षमोक्षसाधनत्वादिलक्षणप्रपंचोपलक्षितं तत्प्रमाणमपि प्रमाणांतरागृहीतसिद्धब्रह्मविषयापरोक्षज्ञानजनकवेदान्तत्वादिरूपपरिकरोपेतं निरूप्यत इत्यर्थः । यद्यपि प्रपंचशब्दान्निर्गुणत्वजीवाभेदस्वप्रकाशत्वसिद्धबोधिवेदांतत्वादीनामेव परिकरत्वेन निर्देशे सगुणत्वजीवभेदपरप्रकाशत्वचक्षुरनुमानादीनामप्रतिज्ञापत्तिः तथापि धर्माभासचैत्यवंदनादिवन्निराकर्तव्यतया परिकरत्वोपपत्तिरिति द्रष्टव्यम्॥

म॰प्र॰–(अत एवेति) प्रासंगिकार्थनिरूपणस्यासंगतत्वासंभवादेवेत्यर्थः । चिंतामणौ–गंगेशोपाध्यायसंज्ञककृतचिंतामण्याख्यग्रंथे (प्रमाणतत्त्वेति) तत्त्वं विलंबिते नृत्ये स्वरूपे परमात्मनीति कोशात्, प्रत्यक्षादिप्रमाणस्वरूपेत्यर्थः । परिकरोपेतं–परिवारोपेतं ब्रह्मेत्यस्य निरूप्यत इत्यनेनान्वयः (स्वप्रकाशेति) स्वप्रकाशः कर्मनिरपेक्षो योब्रह्मरूपोमोक्षस्तत्साधनत्वं तद्विषयकाज्ञाननिवृत्तिरूपप्राप्तिसाधनत्वमित्यर्थः । आदिपदेन संसर्गानवगाहित्वादीनां संग्रहः उपलक्षितं–विशिष्टं–अस्यतज्ज्ञानंचेत्यनेनान्वयः । वेदांतत्वादीत्यादिपदेन संसर्गानवगाहिबोधजनकत्वादीनां संग्रहः (स्वप्रकाशत्वेति) स्वप्रकाशकर्मनिरपेक्षमोक्षसाधनत्वेत्यर्थः । अत्र निर्गुणत्वजीवाभेदरूपः प्रपंचो–ब्रह्मप्रपंचः स्वप्रकाशत्वशब्दोक्तप्रपंचस्तु ज्ञानप्रपंचः स्वप्रकाशत्वांतोब्रह्मप्रपंचो ज्ञानप्रपंचस्तु पूर्वोक्त एवेति वा सिद्धबोधिवेदांतत्वादिरूपोज्ञानकरणप्रपंच इति भेद इति विभावनीयमिति (अप्रतिज्ञापत्तिरिति) तथाचात्मनिष्ठसगुणत्वादीनां निरूपणमसंगतमितिभावः (चैत्यवंदनादीति) चैत्यमायतने बुद्धवेद्येचोद्देश्यपादपे इति मेदिनीकोशादायतनादिवंदनेत्यर्थः (प्रमाणनिरूपणमिति) प्रमाणत्वधर्मप्रकारकज्ञानानुकूलव्यापारमित्यर्थः ॥

Funding by IKS-MoE

मू०—तत्र प्रमाकरणं प्रमाणं तत्र स्मृतिव्यावृत्तं प्रमात्वम् ॥

शि० म०—एवं प्रमाणनिरूपणं प्रतिज्ञाय तल्लक्षणमाह (तत्रेति) प्रमाणे निरूपणीय इत्यर्थः । असाधारणकारणत्वे सति व्यापारवत्त्वं करणत्वं तेन लिंगपरामर्शादौ प्रमित्यसाधारणकारणे सव्यापारेच मनसिनातिप्रसंगः । ननु विषयेऽतिव्याप्तिः तस्येन्द्रियसन्निकर्षद्वाराप्रत्यक्षप्रमाऽसाधारणकारणत्वादितिचेत् नतावद्विषयः प्रत्यक्षमात्रेहेतुः तदभावेपि भ्रमप्रत्यक्षोदयान्नचप्रत्यक्षप्रमायामेकदा सुखतदाकारवृत्त्योरभ्युपगमात् । नापि बाह्यप्रत्यक्षप्रमितौ सुखादिप्रत्यक्षस्थले क्लृप्तप्रत्यक्षप्रमासामग्र्यैव तदुपपत्तेः । प्रमालक्षणमाह (तत्रेति) प्रमाकरणत्वावगमाय प्रमायां निरूपणीयायामित्यर्थः । नचास्य लक्षगस्य स्मृतावव्याप्तिरलक्ष्यत्वादित्याह (स्मृतीति) ॥

म०प्र०—परममूले करणं प्रमाणमित्युक्ते छिदादिकरणकुठारादिष्वतिव्याप्तिः स्यात्तद्वारणाय ज्ञानार्थकं 'मा' पदं दुष्टचक्षुरादेर्भ्रमज्ञानकरणत्वाद्दुष्टचक्षुरादावतिव्याप्तिः स्यात्तद्वारणाय 'प्र' पदं, प्रमाप्रमाणमित्युक्तेऽसंभवः स्यादतः करणमित्युक्तमिति बोध्यम् (असाधारणकारणत्वे सतीति) कार्यत्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वे सतीत्यर्थः । तेन—करणत्वस्योक्तस्वरूपत्वेन (लिंगपरामर्शादाविति) अनुमित्यादिप्रमाऽसाधारणकारणे लिंगपरामर्शचक्षुरादीन्द्रियसन्निकर्षादौ व्यापारवत्त्वोपादानेन नातिव्याप्तिः सत्यंतपदोपादानेन तु सव्यापारे मनसि नातिव्याप्तिरित्यर्थः । नचैवमपि मनसोपि जन्यज्ञानत्वरूपोयःकार्यत्वव्याप्यो धर्मस्तदवच्छिन्नकार्यतानिरूपितकारणताशालित्वरूपासाधारणत्वस्य सत्त्वेन मनस्यऽतिव्याप्तिस्तदवस्थेति वाच्यम् । मनसः प्रमात्वावच्छिन्ननिखिलप्रमांप्रति कारणत्वेन प्रमाणलक्षणप्रविष्टकरणत्वघटकासाधारणत्वस्य प्रमात्वव्याप्यधर्मावच्छिन्नकार्यतानिरूपितकारणतामात्रशालित्वरूपत्वेनोक्तासाधारणत्वस्य मनस्यभावादिति । तस्य—विषयस्य प्रत्यक्षमात्रे—प्रत्यक्षत्वावच्छिन्ननिखिलप्रत्यक्षे तदभावेपि—ज्ञानलक्षणादिप्रत्यासत्तेर्निराकरिष्यमाणत्वेनेंद्रियसन्निकृष्टविषयाभावेपि (अभ्युपगमादिति) तथाचाज्ञायमानसुखादिकंनास्त्येवेतिभावः । स्थले—काले (क्लृप्तेति) मनोऽदृष्टादिकंचेत्याकारिकायोभयवादिसंमतसुखादिप्रत्यक्षसामग्रीतयैवबाह्यप्रत्यक्षोपपत्तेरित्यर्थः । वस्तुतस्त्वसाधारणकारणत्वे सतीत्यादिवाक्योक्तकरणलक्षणे विषयभिन्नत्वे सतीति विशेषणस्य निवेशनीयतया प्रतियोगितासंबंधेन व्यापारवत्त्वविवक्षया वा विषये नातिव्याप्तिः संभवतीत्यपिबोध्यम् । परममूले (स्मृतिव्यावृत्तमिति) स्मृत्यवृत्तीत्यर्थः ।

Funding by IKS-MoE

मू०—अनधिगताबाधितार्थविषयज्ञानत्वं स्मृतिसाधारणंत्वबाधितार्थविषयकज्ञानत्वम् ॥

शि०म०—ननु स्मृतेरप्यविसंवादिप्रवृत्तिजनकत्वात्तद्व्यावृत्तप्रमालक्षणकथनमयुक्तमितिचेत् नहि प्रवृत्त्यंगप्रामाण्यमिह निरूपणीयं व्यावृत्तिव्यवहारान्यतरप्रयोजनाय प्रमात्वस्याभिधानात् स्मृतावतिव्याप्तिवारणायानधिगतेति विषयविशेषणम् । अनिर्वचनीयविषयभ्रमेतिव्याप्तिवारणार्थमुक्तमबाधितेति, ज्ञानपदं स्वरूपकथनार्थम् इच्छाकृतिसंस्काराणामनधिगतपदेनैववारणात् । यद्वा । चक्षुरादीनामपि फलद्वाराघटादिविषयत्वाभ्युपगमात्तत्रातिव्याप्तिवारणार्थमुक्तं (ज्ञानेति) ज्ञप्तिश्चात्र भावव्युत्पत्त्या विवक्षिता । अतो न तत्करणे तत्रातिव्याप्तिः । स्मृतावपि यदि प्रामाण्यव्यवहारस्तदातत्साधारणं लक्षणमाह (स्मृतीति) इच्छादावतिव्याप्तिवारणाय ज्ञानत्वमित्युक्तम् ॥

म० प्र०—(तद्व्यावृत्तेति) स्मृत्यवृत्तीत्यर्थः स्मृत्यवृत्तिप्रमालक्षणकथनस्यायुक्तत्वेहेतुमाह (स्मृतेरपीति) (अविसंवादीति) सफलेत्यर्थः नियतसफलप्रवृत्तित्वावच्छिन्नप्रवृत्तिं प्रति प्रमाज्ञानं कारणमिति प्रवृत्तिसाधनं प्रामाण्यमस्मिन्ग्रंथेननिरूपणीयमित्यभिप्रेत्याह (नहीति) (व्यावृत्तीति) प्रमापदवाच्या स्वेतरेभ्योभिद्यते प्रमात्वाद्यन्नैवं तन्नैवमित्यादीतरभेदानुमितीत्यर्थः (अनिर्वचनीयेति) अनिर्वचनीयश्चासौ विषयोऽनिर्वचनीयविषयस्तत्र यो भ्रमस्तत्र । यद्वाऽनिर्वचनीयो विषयो यस्य स तथा सचासौ भ्रमः स तथा तत्रेत्यर्थः । नच भ्रमस्य देशांतरवृत्तिज्ञातविषयकत्वेनानधिगतार्थविषयकत्वस्याभावात्कथं तत्रातिव्याप्तिरिति वाच्यम् । भ्रमात्पूर्वं भ्रमकालीनोत्पत्तिमदनिर्वचनीयरजतादिविषयकज्ञानाभावेन भ्रमस्य ज्ञातविषयकत्वरूपाधिगतविषयकत्वस्याभावादनधिगतार्थविषयकत्वस्य भ्रमे सत्त्वादिति (तत्रेति) चक्षुरादावित्यर्थः । अतः ज्ञानपदेन भावव्युत्पत्त्याज्ञप्तेर्विवक्षितत्वात् तत्करणे—प्रमाकरणे तत्र—चक्षुरादौ। ननु स्मृतिनिष्ठमप्रामाण्यमंगीकृतं चेत्तर्हि स्मृत्तिज्ञानानामप्रमात्वेन सफलप्रवृत्तिजनकत्वं नस्यान्नचेष्टापत्तिरितिवाच्यं स्मृतीनां सफलप्रवृत्तिजनकत्वस्य सर्वैः स्वीकृतत्वादित्याशंक्याह (स्मृतावपीति) (तत्साधारणमिति) स्मृतिवृत्तीत्यर्थः । परममूले (स्मृतिसाधारणमिति) स्मृतिवृत्तीत्यर्थः ॥

मू०—नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपिपूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविशिष्टविषयत्वेन न तत्राव्याप्तिः ॥

शि० म०—नन्वेकस्मिन् घटे प्रत्यक्षेण यदा निरंतराणि ज्ञानान्युत्पद्यंते तत्र द्वितीयादिज्ञानेषु पूर्वपूर्वज्ञानाविषयीकृतार्थेषु प्रथमलक्षणस्याव्याप्तिरित्यत आह (नीरूपस्येति) ननु नीरूपस्य कालस्य कथं चाक्षुषत्वं द्रव्यचाक्षुषतायां महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य तंत्रत्वादितिचेन्नेदानीं घटो वर्तते इति प्रतीतेः नीरूपस्यापि तस्य चाक्षुषत्वात् अन्यथा चक्षुरवगते घटे वर्तमानतासंदेहापत्तेः नचोक्तप्रयोजकाभावेन तत्तत्प्रतीतिरेवासिद्धेति वाच्यम् । अनन्यथासिद्धप्रतीतिबलेन तस्य ॥

म० प्र०—प्रत्यक्षेण—इन्द्रियेण निरंतराणि—व्यवधानशून्यकालिकानि, तत्र—तेषु ज्ञानेषुमध्ये (नीरूपस्यकालस्येति) नीरूपकालनिष्ठं चाक्षुषत्वं चक्षुर्जन्यज्ञानविषयत्वं कथं कथंशब्दस्याऽऽक्षेपार्थकत्वेन न कथमपीत्यर्थः । द्रव्यचाक्षुषतायां द्रव्यनिष्ठचक्षुर्जन्यज्ञानविषयत्वरूपकार्ये—महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्यतंत्रत्वात् महत्त्वाधिकरणाधिकरणकोद्भूतरूपनिष्ठकारणत्वात् (इदानींघटो वर्त्ततइतिप्रतीतेरिति) मूलेकालविषयकचाक्षुषप्रत्यक्षात्मकप्रतीतेरुक्तत्वेपि प्रतीतितदभिलापकशब्दयोः समानविषयकत्वेन वर्त्तमानकालीनवृत्तिताश्रयो वर्त्तमानकालीनो घट इत्यर्थककालविषयकचाक्षुषप्रत्यक्षात्मकप्रतीत्यभिलापकशब्दविषयसमानविषयकप्रतीतेरित्यर्थः । तस्य—कालस्य (अन्यथेति) नीरूपस्य कालस्य चाक्षुषत्वानंगीकारे इत्यर्थः । (वर्तमानतासंदेहापत्तेरिति) घटविषयकवर्तमानतासंदेहप्रतिबंधकवर्तमानकालविषयकनिश्चयाभावेन वर्त्तमानकालिकघटोस्ति नवेति घटे वर्तमानकालवृत्तित्वस्य संदेहापत्तेरित्यर्थः । उक्तप्रयोजकाभावेन—काले महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वरूपचाक्षुषप्रत्यक्षप्रतीतिकारणाभावेन, तत्प्रतीतिः—इदानीं घटो वर्तत इत्याकारकप्रत्यक्षप्रतीतिः (अनन्यथासिद्धेति) वर्तमानकालरूपविषयं विनाऽनुपपद्यमानेत्यर्थः । तस्य महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य ॥

शि० म०—कालव्यतिरिक्तद्रव्यचाक्षुषतायां प्रयोजकत्वकल्पनात् अन्यथा प्रयोजकानुसारेण प्रतीतिकल्पने नीरूपस्य रूपस्याचाक्षुषत्वापत्तेः । नन्वेवमपि निरंतरोत्पन्नघटादिप्रत्यक्षे अव्याप्तिस्तदवस्थैव तस्यतत्तत्क्षणतत्तत्संबंधांशे अज्ञातार्थावगाहित्वेऽपि घटांशे तदभावादितिचेन्न इष्टापत्तेः अत एव न शाब्दप्रमायाः पदार्थांशे प्रमात्वं नच द्वितीयादिज्ञानस्य घटांशे प्रामाण्याभावेप्रवर्त्तकत्वानुपपत्तिः स्मृतिवदबाधितविषयत्वेन तदुपपत्तेः अत एवेदानीमहं सुखीत्यादिधारावाहिकबुद्धौ नाव्याप्तिः तस्याः पूर्वपूर्वज्ञानाविषयक्षणविशेषविशिष्टविषयत्वात् ॥

Funding by IKS-MoE

म० प्र०—(कालेति) कालव्यतिरिक्तद्रव्यनिष्ठचक्षुर्जन्यज्ञानविषयत्वरूपकार्यनिरूपितकारणत्वकल्पनादित्यर्थः । अन्यथेत्यस्यैवविवरणं प्रयोजकानुसारेण प्रतीतिकल्पने इति (नीरूपस्येति) यदिमहत्त्वसमानाधिकरणोद्भूतरूपात्मककारणानुसारेण चाक्षुषप्रतीतिस्त्वयास्वीक्रियते तदा तव मते रूपादिषु चाक्षुषत्वाभावव्यावृत्त्यर्थं चाक्षुषप्रतीतिरूपकार्यशरीरे द्रव्यपदस्य निवेशो नस्यात् । महत्त्वसमानाधिकरणोद्भूतरूपात्मककारणानुसारेण चाक्षुषप्रत्यक्षात्मकंप्रतीतिस्त्वया स्वीकारात्तथाच रूपादावुक्तकारणाभावेन चाक्षुषप्रत्यक्षविषयत्वं न स्यादितिभावः । एवमपि—नीरूपस्य कालस्य चक्षुर्जन्यज्ञानविषयत्वस्वीकारेपि, घटादिप्रत्यक्षे—घटादिप्रत्यक्षमध्ये द्वितीयादिघटादिप्रत्यक्षे (तस्येति) तत्तत्क्षणांशे तत्तत्क्षणसंबंधांशे च द्वितीयादिघटादिप्रत्यक्षस्येत्यर्थः । तदभावात्—अज्ञातार्थविषयकत्वाभावात् । इष्टापत्तेः—घटांशविषयकद्वितीयादिघटादिज्ञानेऽप्रमात्वस्वीकारात् । अतएव—पदार्थांशे शाब्दप्रमाया अज्ञातार्थावगाहित्वाभावादेव (नप्रमात्वमिति) शाब्दवाक्यार्थज्ञानात्प्रागेव पदार्थांशस्य पदाधिगतत्वेन पदार्थांशे शाब्दज्ञानस्याज्ञातार्थावगाहित्वाभावेनाप्रमात्त्वम् । संसर्गांशे तु वाक्यजन्यज्ञानस्याज्ञातार्थावगाहित्वेन प्रमात्वमितिभावः । (स्मृतिवदिति) यथास्मृतेरबाधितार्थविषयकत्वेन प्रवर्त्तकत्वं तद्वदित्यर्थः । तदुपपत्तेः—प्रवर्त्तकत्वोपपत्तेः । अतएव—वक्ष्यमाणहेतोरेव । धारावाहिकबुद्धौ—धारावाहिकबुद्धिघटकद्वितीयादिज्ञाने अतःशब्दार्थमेवाह (तस्याइति) द्वितीयादि इदानीमहंसुखीति धारावाहिकबुद्धेरित्यर्थः। क्षणविशेषविशिष्टेति) विलक्षणक्षणविशेषविशिष्टसुखेत्यर्थः ॥

शि० म०—नन्वेवमनुमित्यादौ क्षणस्फुरणं स्यात् इदानीं पर्वतो वह्निमानिदानीं गौरानयनसंसृष्टा इदानीं मदीयागौरेतत्सदृशी इदानीममुमर्थं कल्पयामीति सर्वज्ञानेषु कालस्यानुभूयमानत्वादितिचेत् किमनुमितौ पक्षविशेषणतया कालभानं साध्यविशेषणतया वा । नाद्यः, सन्निकृष्टपर्वते जायमानानुमितेस्तदंशे प्रत्यक्षतया तत्रतज्ज्ञानस्येष्टत्वात् । असन्निकृष्टेच तस्मिन् तत्प्रतीतेरेवासिद्धेः । न द्वितीयः, अनुमितेः साध्यांशे व्यापकतावच्छेदकमात्रप्रकारकत्वेन तत्रकालप्रकारत्वायोगात् । अन्यथाऽनुमित्यनंतरं वह्नौ द्विहस्तत्रिहस्तत्वादिप्रकारकसंशयाभावप्रसंगात, तत्कालीनवाह्निसिद्ध्यर्थं धूमकालस्य पक्षतावच्छेदकत्वादिप्रयासानुपपत्तेश्च ॥

म०प्र०—एवं—कालस्य प्रत्यक्षनिरूपितविषयत्वस्वीकारे । अनुमित्यादौक्षणस्फुरणं—अनुमित्यादिंनिरूपितक्षणनिष्ठविषयत्वम् । इतिसर्वज्ञानेषुकालस्यानुभूयमानत्वात्—कालस्योक्तसर्वज्ञाननिरूपितविषयत्वाश्रयत्वात् । अनुमितौ पक्षविशेषणतया कालभानं—

अनुमितिनिरूपितं पक्षनिष्ठविशेष्यतानिरूपितकालनिष्ठविशेषणताख्यविषयताऽभिन्नकालनिष्ठविषयत्वम्। तदंशे—सन्निकृष्टपर्वतांशे। तत्र—अनुमितौ—तज्ज्ञानस्येष्टत्वात्—पक्षनिष्ठविशेष्यतानिरूपितकालनिष्ठविशेषणताऽऽख्यविषयताऽभिन्नकालनिष्ठविषयत्वस्येष्टत्वात्। तस्मिन्—पर्वते—तत्प्रतीतेरेवकालावगाह्यनुमित्यात्मकप्रतीतेरेव। तत्र—साध्यांशविषयकानुमितौ। तत्प्रकारकत्वेति पाठे तु कालप्रकारकत्वेत्यर्थः। साध्यांशविषयकानुमितेः कालप्रकारकत्वायोगे हेतुमाह (अनुमितेःसाध्यांशे इति) वह्न्यादिरूपसाध्यांशविषयकपर्वतोवह्निमानित्याद्यनुमितेर्वह्नित्वादिरूपसाध्यतावच्छेदकमात्रप्रकारकत्वेनेत्यर्थः (अन्यथेति) वह्न्यादिरूपसाध्यांशविषयकपर्वतोवह्निमानित्याद्यनुमितेर्वह्नित्वादिरूपसाध्यतावच्छेदकमात्रप्रकारकत्वानंगीकारे इत्यर्थः। (संशयाभावप्रसंगादिति) वह्न्यादिसाध्यांशविषयकपर्वतोवह्निमानित्याद्यनुमितेर्वह्नित्वादिसाध्यतावच्छेदकमात्रप्रकारकत्वानंगीकर्तृमतेवह्निनिष्ठद्विहस्तत्वादीनामपिसाध्यांशविषयकानुमितिविषयत्वसत्त्वादितिशेषः (तत्कालीनेति) धूमकालीनेत्यर्थः (धूमकालस्येति) धूमादिलिंगविशिष्टपर्वतादौ धूमकालीनपर्वतोवह्निमानित्याकारकानुमितिवादिमते धूमकालनिष्ठपक्षतावच्छेदकत्वादिनिरूपणानुकूलप्रयासवैयर्थ्यापत्तेरित्यर्थः। वह्न्यादिसाध्यांशविषयकानुमितेर्व्यापकतावच्छेदकातिरिक्तप्रकारकत्वाभ्युपगमेन साध्यांशेधूमकालीनत्वस्यापि भानाद्धूमकालीनवह्निसिद्ध्यर्थं धूमकालस्य पक्षतावच्छेदकत्वायप्रयासो न कर्तव्य इतिभावः॥

शि०म०—अत एव शाब्दज्ञानादावपि न कालोल्लेखः। दशमस्त्वमसि तत्त्वमसीत्यादिवत्सन्निकृष्टपदार्थांशे शब्दजन्यस्यापि ज्ञानस्य तत्र प्रत्यक्षतया कालस्फुरणस्येष्टत्वात्। असन्निकृष्टेच तस्मिन् पदवाक्यार्थभिन्नस्य कालस्य भानायोगात्। नाप्युपमितौ तत्स्फुरणं सन्निकृष्टे गविकालभानस्येष्टत्वात्। व्यवहितेच तस्मिन्नुपमितेः कालविषयत्वे तदनन्तरं मदीयागौरिदानींमद्गृहेवर्त्तते नवेति संदेहानुपपत्तेः। अत एव नार्थापत्तौ क्षणस्फुरणाशंकावकाशः, तस्या अनुमितिसमानयोगक्षेमत्वेन कल्पनीयत्रिभोजनांशे उपपादकतावच्छेदकमात्रप्रकारकतया कालविशेषणकत्वायोगात्। तदेतदाह (कालस्येन्द्रियेति) प्रत्यक्षप्रमाणजन्यानुभवविषयत्वाभ्युपगमात्॥

म०प्र०—अतएव—वक्ष्यमाणहेतोरेव (शाब्दज्ञानादावपिनकालोल्लेखइति) अत्रादिपदमापाततः प्राप्तम्। उपमित्यादिनिरूपितकालनिष्ठविषयत्वस्य वक्ष्यमाणग्रंथे एवनिराकरणात्तथाच शाब्दबुद्धित्वावच्छिन्नशाब्दबुद्धिसामान्यनिरूपितकालनिष्ठविषयतानेत्यर्थः। अतःशब्दोक्तहेतुमेवाह (दशमइति) ज्ञानस्य प्रत्यक्षतयेत्यन्वयः, तत्र—शब्दजन्यज्ञाने कालस्फुरणस्य—कालनिष्ठविषयत्वस्य। असन्निकृष्टे—इन्द्रियासंबद्धपदार्थे—तस्मिन्—शब्दजन्यज्ञाने—भानायोगात्—विषयत्वायोगात् (नाप्युपमिताविति) उपमिति-

त्वावच्छिन्नोपमितिनिरूपितकालनिष्ठविषयत्वापादनमपि नसंभवतीत्यर्थः (सन्निकृष्टेइति) सन्निकृष्टगोपदार्थविशेषणीभूतकाले उपमित्यात्मकस्फुरणस्यांगीकृतत्वादित्यर्थः।तस्मिन्न गोपदार्थे।अतएव–वक्ष्यमाणहेतोरेवेत्यर्थः (नार्थापत्ताविति) अर्थापत्तित्वावच्छिन्नार्थापत्तिनिरूपितक्षणनिष्ठविषयत्वशंकावसरोनेत्यर्थः । अतःशब्दार्थमेवाह (तस्या इति) कल्पनीयरात्रिभोजनांशे–तस्याः–अर्थापत्तेः–कालविशेषणकत्वायोगात्–कालप्रकारकत्वायोगादित्यर्थः । तस्याः कालप्रकारकत्वायोगे हेतुमाह (उपपादकतेति) पीनत्वोपपादकं रात्रिभोजनमुपपादकतावच्छेदकं रात्रिभोजनत्वं तन्मात्रविशेषणकतयेत्यर्थः । रात्रिभोजनमर्थापत्त्याकल्पयामीत्याकारकाभिलापकवाक्यसत्त्वेनार्थापत्तेरुपपादकमात्रप्रकारकत्वमितिभावः । अर्थापत्तेरुपपादकतावच्छेदकमात्रप्रकारकत्वमपि कुतो ज्ञातमित्याशंक्याह (अनुमितीति) समानयोगक्षेमत्वेन–तुल्यसामग्रीकत्वेन ॥

शि०म०–नन्वेवं शाब्दधारावाहिकद्वितीयादिज्ञानेष्वव्याप्तिः तत्र क्षणाविषयत्वानभ्युपगमादितिचेन्न, इतरसंमृष्टतया ज्ञाने तत्संसर्गानुभवाभावलक्षणाया जिज्ञासालक्षणायाश्चाकांक्षायाः शाब्दज्ञानकारणस्य पदार्थज्ञानस्यचाभावेन तत्र धारावाहिकबुद्धेरेवासिद्धेः । नच प्रथमशाब्दज्ञानकारणस्य पदार्थज्ञानस्य विनाशेपि शब्दजनितवाक्यार्थज्ञानादेव पदार्थविषयात् द्वितीयादिशाब्दज्ञानं संभवतीति वाच्यम् । तस्य पदार्थविषयत्वेपि पदजन्यपदार्थस्मृतित्वाभावेनाकारणत्वात् । पदजन्यपदार्थस्मृतेरेव तत्त्वात् । अन्यथा पदलिंगानुमेयपदार्थस्याप्यन्वयबोधापत्तिः । नच घटं पटं चानय:इत्यत्रेवपदार्थस्मरणांतरकल्पनात् द्वितीयादिज्ञानसंभव इतिवाच्यं तथापि पदस्मृतिपदार्थस्मरणतात्पर्यज्ञानैर्वाक्यार्थज्ञानजननसमये प्रथमवाक्यार्थज्ञानस्य नष्टत्वेन तत्राव्याप्त्यनवकाशात् ॥

म० प्र०–(एवमिति) असन्निकृष्टार्थविषयकशब्दजन्यज्ञाननिरूपितकालनिष्ठविषयत्वानंगीकारे सतीत्यर्थः (शाब्देति) असन्निकृष्टार्थविषयकशब्दजन्येत्यर्थः । (तत्रेति) असन्निकृष्टार्थविषयकेषु शब्दजन्यधारावाहिकद्वितीयादिज्ञानेष्वित्यर्थः (इतरसंसृष्टतयाज्ञानेइति) पदार्थांतरसंसर्गावगाहिज्ञाने सतीत्यर्थः। पदस्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षेति नयायिकमतमनुसृत्याकांक्षास्वरूपमाह (तत्संसर्गेति) पदार्थांतरसंसर्गेत्यर्थः । पदार्थानांपरस्परजिज्ञासाविषयत्वयोग्यत्वमाकांक्षेति मूलकर्तृमतमंगीकृत्याकांक्षास्वरूपमाह (जिज्ञासेति) जिज्ञासालक्षणंलक्षणघटकं यस्या आकांक्षायाः सा तथा तस्या इत्यर्थः। तत्र–असन्निकृष्टपदार्थेषु, तस्य–असन्निकृष्टार्थविषयकशब्दजन्यप्रथमवाक्यार्थज्ञानस्य, तत्त्वात्–शाब्दबुद्धिं प्रति कारणत्वात् । अन्यथा–पदजन्यपदार्थस्मृतेः शाब्दबुद्धिं प्रति-

हेतुत्वानंगीकारे (पदलिंगानुमेयपदार्थस्येति) इदं पदं मत्पुत्रोच्चरितं मत्पुत्रकृतिजन्यत्वे सति पदत्वात्, दिनांतरीयमत्पुत्रोच्चारितपदवदिति पदघटितलिंगानुमेयपदार्थस्य अथवा मत्पुत्रोच्चरितपदानि नित्यानि पदत्वात्, वैदिकपदवदिति पदात्मकलिंगेनानुमेयस्य पदार्थस्य मत्पुत्रोच्चरितत्वादिरूपार्थस्यान्वयवोधापत्तिः घटमानयेत्यादिशब्दजन्यज्ञानविषयत्वापत्तिस्त्वदभिमतस्य पदजन्यपदार्थोपस्थितिभिन्नस्य पदार्थज्ञानस्य सत्त्वादित्यर्थः (इत्यत्रैवेति) अत्र यथाऽऽनयपदस्य पुनः स्मृतिद्वारा पुनरानयपदार्थस्मरणं तद्वदित्यर्थः (तथापीति) पदार्थानां स्मरणांतरकल्पनेन द्वितीयादिशाब्दज्ञानसंभवेपीत्यर्थः । तत्र–द्वितीयादिशाब्दज्ञाने ॥

शि०म०–अत एव न धारावाहिकद्वितीयाद्यनुमितावव्याप्तिः अनुमित्सया द्वितीयानुमितिसंभवेपि अनुमितीष्टसाधनतायाः प्रकृतव्याप्तेश्च समूहालंबनस्मृतिस्ततोनुमित्सातदुत्तरक्षणेऽनुमितिरित्यभ्युपगमेन तदाप्रथमानुमितेर्विनष्टत्वेन तस्या ज्ञातार्थविषयत्वाभावात् । ननु धारावाहिकप्रत्यक्षबुद्धावव्याप्तिरेव तत्र रूपादिरहितस्य क्षणविशेषस्याविषयत्वेनानधिगतार्थविषयत्वाभावात् । नचेदानीं काले घट इति प्रतीतिबलात्कालस्य नीरूपत्वेपि चाक्षुषत्वं साधितमिति वाच्यं तथा सत्याकाशे बलाका इति प्रतीत्या तस्यापि प्रत्यक्षतापत्तिः । नच प्रतीत्यनुसारेण महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वस्य कालाकाशव्यतिरिक्तद्रव्यचाक्षुषतायामेव प्रयोजकत्वकल्पनात्तस्याप्यनुमतं चाक्षुषत्वमिति वाच्यम् । आकाशस्य प्रत्यक्षताभ्युपगतौ तत्सद्भावे शब्दलिंगकानुमानप्रमाणानुसरणानुपपत्तेः । अप्रत्यक्षेह्याकाशे बालास्तलमलिनताद्यध्यस्यंतीति भाष्यकारवचनविरोधाच्च ॥

म० प्र०–अतएव–वक्ष्यमाणहेतोरेव । अनुमितौ–असन्निकृष्टसाध्यादिविषयकानुमितौ अतःशब्दोक्तहेतुमेवाह (अनुमित्सयेति) समूहालंबनस्मृतिः–प्रकृतानुमितिरिष्टसाधनं प्रकृतव्याप्तिश्चेत्याकारकसमूहालंबनस्मृतिः । तदा–अनुमित्सोत्तरक्षणे तस्याः–असन्निकृष्टसाध्यादिविषयकद्वितीयाऽनुमितेः तत्र–धारावाहिकप्रत्यक्षबुद्धौ तथासति–इदानीं घटो वर्त्तते इत्यादिप्रतीतिबलात्कालनिष्ठचाक्षुषत्वाभ्युपगमे सति बलाका–बकपंक्तिः तस्यापि–आकाशस्यापि । कालाकाशव्यतिरिक्तद्रव्यचाक्षुषतायामेव–कालाकाशव्यतिरिक्तद्रव्यनिष्ठचक्षुर्जन्यज्ञानविषयत्वरूपकार्यनिरूपितमेव । प्रयोजकत्वकल्पनात्–कारणत्वज्ञानात् । तस्यापि–आकाशस्यापि । तत्सद्भावे–आकाशसत्त्वे (शब्दलिंगकानुमानेति) पंचीकृतपृथिवीआकाशवतीशब्दवत्त्वाद्यन्नैवं तन्नैवमात्मवदित्याकारकशब्दरूपकार्यलिंगकानुमानेत्यर्थः । यद्वा लक्षणया वृत्त्याशब्दः पृथिव्या-

Funding by IKS-MoE

घष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वाद्यन्नैवं तन्नैवं रूपादिवदितिशब्दपक्षकानुमानेत्यर्थः (तलेति) कटाहाकारेत्यर्थः ॥

मू०–किंच सिद्धांते धारावाहिकबुद्धिस्थले न ज्ञानभेदः किंतु यावद्घटस्फुरणं तावद् घटाकारान्तःकरणवृत्तिरेकैव ॥

शि०म०–नच सुरभिचंदनमिति प्रत्यक्षे सौरभस्येवाकाशे बलाकेत्यादावाकाशस्य ज्ञानांतरोपनीतस्य भानात्तदंशे परोक्षवृत्तेर्वाभ्युपगमाद्चाक्षुषत्वं तस्यास्त्विति वाच्यं, तर्हितद्वदेवसर्वप्रत्यक्षेपिं कालभानोपपत्तेर्न चाक्षुषत्वं तस्येत्यरुचेराह (किंचेति) ननु धारावाहिकप्रत्यक्षस्थलेपि ज्ञानभेद एवान्यथा जागराद्यघटादिज्ञानस्य मुहूर्त्तघटिकादिपर्यंतमवस्थानं तदनंतरं विनाश इत्यत्र नियामकाभावेन सर्वकार्यविरोधिसुषुप्तिपर्यंतावस्थायित्वाभ्युपगमे प्रातरनुभूतघटस्यानुभवनाशजन्यसंकाराभावेन मध्येस्मरणानुपपत्तिःप्रतिबंधकसत्वेन घटाभावज्ञानानुपपत्तिश्चेत्याशंकते (किंत्विति) किंघटादिगोचरवृत्तेरौपचारिकज्ञानस्य एकत्वं निराक्रियते किंवाचैतन्यरूपज्ञानस्य तत्र नाद्य इत्याह (यावदिति) यावत्कालमस्ति प्रकाशते घट इति व्यवहारः तावत्कालं तदाकारवृत्तिरेकैवलाघवादिति भावः ॥

म० प्र०–(अचाक्षुषत्वमिति) तस्याकाशस्याचाक्षुषत्वं लौकिकसन्निकर्षेण चक्षुर्जन्यज्ञानविषयत्वाभावोस्त्वित्यर्थः । आकाशस्य लौकिकंसन्निकर्षेण चक्षुर्जन्यज्ञानाविषयत्वाभावेहेतुमाह (आकाशेइति) उपनीतस्य–आकाशे बलाकेतिप्रतीतितः पूर्वशब्दादिजन्यज्ञानलक्षणप्रत्यासत्तिमत आकाशस्य आकाशे बलाकेत्यादौभानात्–आकाशे बलाकेत्यादिप्रत्यक्षप्रतीतिंनिरूपितविषयत्वादित्यर्थः । ननु ज्ञानलक्षणप्रत्यासत्तेर्मूले खंडितत्वेन कथमाकाशस्य ज्ञानलक्षणप्रत्यासत्तिजन्याकाशे बलाकेत्यादिप्रत्यक्षप्रतीतिविषयत्वमुच्यते इत्यत आह (तदंशेइति) आकाशांशे इत्यर्थः (परोक्षवृत्तेरिति) बलाकाभिरिन्द्रियसन्निकर्षकाले एव स्मृत्यनुमित्याद्यात्मकपरोक्षवृत्तेर्वास्वीकारादित्यर्थः लौकिकसन्निकर्षजन्यज्ञानविषत्वाभावे स्वपरयोः संमतदृष्टांतमाह (सुरभिचंदनमिति) (प्रत्यक्षेसौरभस्येवेति) यथाऽऽघ्रातसौरभस्य सुरभिचंदनमिति प्रत्यक्षघटकीभूतस्मृत्यात्मकज्ञानाविषयत्वमनाघ्रातसौरभस्य तु सुरभिचंदनमिति प्रत्यक्षघटकीभूतचंदनखंडत्वालिंगजन्यानुमित्यात्मकवृत्तिविषयत्वं तद्वदित्यर्थः (तर्हीति) आकाशनिष्ठचाक्षुषत्वाभावेंगीकृते सतीत्यर्थः । तद्वदेव–आकाशवदेव–सर्वप्रत्यक्षेपिकालभानोपपत्तेः इदानीं घटो वर्त्तते इत्यादिसर्वप्रत्यक्षघटकीभूतस्मृत्याद्यात्मकप्रतीतिनिरूपितकालनिष्ठविषयत्वो-

Funding by IKS-MoE

पपंत्तेः । तस्य–कालस्य, परममूले (धारावाहिकबुद्धिस्थले इति) पराभिमतधारावाहिकबुद्धिकालेउक्तबुद्धिविषयेवेत्यर्थः । स्थलेपि–कालेपि घटादिंविषयेपीतिवा–अन्यथा–पराभिमतधारावाहिकप्रत्यक्षकाले ज्ञानभेदानंगीकारे (जागरेति) जागरावस्थायां प्रथमोत्पन्नघटादिज्ञानस्येत्यर्थः (प्रतिबंधकसत्त्वेनेति) घटाभावज्ञानस्य प्रतिबंधकं यत् घटज्ञानं तस्य सत्त्वेनेत्यर्थः । औपचारिकज्ञानस्य–लाक्षणिकज्ञानपदेन व्यवह्रीयमाणज्ञानस्य तत्र–पक्षद्वयमध्ये यावत्कालं–यत्परिमाणकेकाले घटोस्ति–सत्तावान्घटः प्रकाशतेघटः–ज्ञानविषयोघटः तावत्कालं–तत्परिमाणकेकाले (तदाकारेति) घटाकारेत्यर्थः ॥

मू०–नतु नाना वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यंतं स्थायित्वाभ्युपगमात् ॥

शि० म०–एवकारव्यवच्छेद्यमाह (नन्विति) गौरवादितिभावः । तर्हि ततोप्यातिलाघवात्सुषुप्तिपर्यंतं वृत्तिरेकैव । नच मध्ये अदृष्टविशेषान्नाशः तस्य साधारणकारणत्वात् । नच वृत्तेः स्वविषयविरोधिघटाभावादिवृत्तिनाश्यत्वं स्वोत्तरपटवृत्तेरपि तन्नाशकत्वात् । नापिस्वोत्तरवृत्तेर्नाशकत्वं घटादिवृत्तेरौदासीन्यसमये नाशाभावप्रसंगात् इत्याशंक्याह (वृत्तेरिति) वृत्तिपदंप्रकृताभिप्रायं तथाच वृत्तेः स्वविरोध्युत्पत्तिपर्यंतं स्थायित्वाभ्युपगमादित्यर्थः । तेन स्वोत्तरवृत्त्यौदासीन्यादीनां संग्रहः फलबलेन सुषुप्तिवदौदासीन्यसमयस्यापि निवर्त्तकत्वात् । अन्यथा यथाश्रुतेऽखंडाकारवृत्तेः स्वोत्तरवृत्त्यंतराभावादविनाशप्रसंगः ॥

म०प्र०–तर्हि–पराभिमतधारावाहिकबुद्धिकाले वृत्तेरेकत्वाभ्युपगमे सति । (ततोपीति) पराभिमतधारावाहिकबुद्धिकाले वृत्तिनिष्ठैकत्वाभ्युपगमरूपलाघवादपीत्यर्थः । नन्वदृष्टविशेषेण तस्या नाशोभविष्यतीत्याशंक्य नहि वृत्तिनाशकासाधारणकारणमंतरेण साधारणकारणादृष्टेनैव तस्या नाशो भवतीत्यभिप्रायेणाह (नचेति) तस्य–अदृष्टस्य (स्वविषयेति) स्वंघटाकारवृत्तिस्तस्या विषयोघटस्तद्विरोधी घटाभावादिस्तत्र या वृत्तिस्तया नाश्यत्वमित्यर्थः स्वोत्तरपटवृत्तेरपि–घटाकारवृत्त्युत्तरपटाकारवृत्तेरपि । ननूत्तरवृत्तेरेव नाशकतास्यादित्याशंक्याह (नापीति) स्वोत्तरवृत्तेः–वृत्त्युत्तरवृत्तेः नाशकत्वं–पूर्ववृत्तिनाशकत्वमपिनास्तीत्यर्थः । वृत्तिपदं–स्वविरोधिवृत्त्युत्पत्तिपर्यंतमितिवाक्यघटकीभूतवृत्तिपदम् । (प्रकृताभिप्रायमिति) प्रकृतं वृत्तिविरोधिनमभिप्रैति विषयीकरोतीति । प्रकृताभिप्रायं–प्रकृते वृत्तिविरोधिन्यभिप्रायस्तात्पर्यं यस्य–वृत्तिपदस्य तत्तथेति वा । तथाच वृत्तिविरोध्यर्थकमेव वृत्तिपदं वृत्तिपदस्यैव

Funding by IKS-MoE

व्याख्यानं स्वविरोधीति। नतूत्तरवृत्तिरेव पूर्ववृत्तेर्निवर्त्तिकेत्यभिप्रायेण मूलेवृत्तिपदमित्यर्थः। यद्वा प्रकृते न वृत्तिप्रसंगेनाभिप्रायो मनोऽनवधानकाले मूले उल्लेखनं यस्य वृत्तिपदस्य तत्तथाव्यर्थत्वेनानुपादेयमेवेत्यर्थः (तथाचेति) वृत्तिपदस्यानुपादेयत्वे सतीत्यर्थः। तेन–वृत्तिपदस्यानिवेशेन फलबलेन–औदासीन्यकाले वृत्तीनां ध्वंसरूपकार्यदर्शनान्यथानुपपत्त्या अन्यथा–औदासीन्यसमयस्य वृत्तिनिवर्त्तकत्वानंगीकारे यथाश्रुते–उत्तरवृत्तिरेव पूर्ववृत्तिनिवर्तिकेति यथाश्रुतार्थस्वीकारे अन्यथेत्यस्यैवविवरणं यथाश्रुते इतीतिवा (अखंडाकारवृत्तेरिति) यदाऽखंडाकारवृत्त्युत्तरवृत्त्यंतरं नास्ति तदाऽखंडाकारवृत्तेर्नाशो न स्यादुत्तरवृत्तेरेव पूर्ववृत्तिनाशकत्वाभ्युपगमान्नाशस्तु भवत्येवान्यथा द्वैतापत्तेरितिभावः॥

सू०–तथाच तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशंकाऽपि॥

शि० म०–नन्वेवमपि स्वोत्तरवृत्त्यौदासीन्यसमयादीनां कथं विरोधित्वमनुगतविरोधितावच्छेदकाभावादितिचेन्न। मण्यादीनामनुगतप्रतिबंधकतावच्छेदकाभावेपि मणित्वादिना दाहप्रतिबंधकतास्वीकारात्। सर्वत्र च विरोध्यननुगमस्यादोषत्वात्। द्वितीयं निरस्यति (तथाचेति) यथाघटादौ तदाकारवृत्तिरेका तथा चैतन्यरूपं मुख्यज्ञानमपि यावद्घटस्फुरणं तत्रैकमित्यर्थः। ननु निरुपाधिकचैतन्यस्य स्वत एकत्वेपि तस्य घटज्ञानत्वाभावात् घटाकारवृत्त्युपहितस्य च तज्ज्ञानत्वेपि तदुपाधिभेदेन भेदावश्यंभावान्नैकत्वं युक्तमित्याशंक्य घटावच्छिन्नं तद्वृत्त्यवच्छिन्नमपि ज्ञानं तयोरेकदेशस्थत्वान्नभिद्यत इत्याह (तत्प्रतिफलितेति)॥

म० प्र०–विरोधित्वं–पूर्ववृत्तिनाशकत्वम् अनुगतविरोधितावच्छेदकाभावात्–परस्परविलक्षणेष्वौदासीन्यसमयादिषुसंबद्धैकनिवर्त्तकतावच्छेदकाभावात् (अनुगतेति) संबद्धैकेत्यर्थः (मणित्वादिनेति) दाहत्वावच्छिन्नंप्रति मणित्वेन मंत्रत्वेन वा प्रतिबंधकतेति मण्यादिनिष्ठमणित्वाद्यवच्छिन्नप्रतिबंधकतास्वीकारादित्यर्थः। नन्वेवं दाहप्रतिबंधकमण्यादिषु नानाप्रतिबंधकतावच्छेदकस्वीकारे मण्यादिष्वेकदाहप्रतिबंधकतावच्छेदकानिश्चयेन मण्यादिषु दाहप्रतिबंधकताग्रहोनस्यादित्याशंक्याह (सर्वत्रेति) सर्वत्र–सर्वविरोधिषु विरोध्यननुगमस्यैकविरोधितावच्छेदकाभावस्य मण्यादिनिष्ठप्रतिबंधकताग्रहप्रतिबंधकत्वरूपदोषत्वं नास्ति किंतु नानाविरोधिष्वेकाविरोधितावच्छेदकसंभवे नानाविरोधितावच्छेदकाभ्युपगमस्य प्रतिबंधकताग्रहप्रतिबंधक-

त्वरूपदोषत्वमित्यर्थः । तत्र–घटादौ । ननु निरुपाधिकचैतन्यरूपस्य ज्ञानस्य किमेकत्वं त्वयाऽभ्युपगम्यते किंवा घटाकारवृत्त्युपहितचैतन्यस्य, नाद्य इत्याह (निरुपाधिकेति) स्वतः–उपाधिसंपर्काद्विना तस्य–निरुपाधिकचैतन्यस्य (घटज्ञानत्वाभावादिति) अस्याग्रे निरुपाधिकचैतन्यस्यैकत्वाभ्युपगमः पराभिमतधारावाहिकबुद्धिकालेद्वितीयादिघटादिज्ञानेष्वव्याप्तिवारणेऽनुपयुक्त इतिशेषः । द्वितीयं निराकरोति (घटाकारेति) तज्ज्ञानत्वेपि–वटज्ञानत्वेपि (तदुपाधिभेदेनेति) तस्य–घटादिज्ञानस्य ये उपाधयो घटादितदाकारावृत्तिरूपास्तेषां भेदेनेत्यर्थः । (तद्वृत्त्यवच्छिन्नमपीति) अत्रापिशब्दश्चार्थे । तथाच घटावच्छिन्नं घटाकारवृत्त्यवच्छिन्नं च चैतन्यं न भिद्यते इत्यर्थः । परममूले (तत्प्रतिफलितेति) घटाद्याकारवृत्तिप्रतिबिंबितेत्यर्थः । परममूले (तत्रेति) पराभिमतधारावाहिकबुद्धिकाले इत्यर्थः । परममूले (तावत्कालीनमिति) वृत्तिकालीनमित्यर्थः (एवमपीति) पराभिमतधारावाहिकबुद्धिकाले तवमतेघटादिज्ञानस्यैकत्वेन पराभिमतधारावाहिकबुद्धिकालेद्वितीयादिघटादिज्ञानेष्वव्याप्त्यभावेपीत्यर्थः ॥

शि०म०–दिनभेदेन जायमानस्य घटादिज्ञानस्य नानात्वात् । तस्य च दिनांतरावगतघटादिविषयत्वेन तत्राव्याप्तिः । नचानधिगतपदेन स्वाव्यवहितपूर्वक्षणवर्तिस्वसमानाधिकरणज्ञानाविषयविषयकत्वंविवक्षितमतोनोक्तदोष इति वाच्यं तथापि स्मृतावतिव्याप्तेः । ननु स्वविषयसमानविषयकज्ञानाजन्यत्वमनधिगतविषयपदेन विवक्षितमितिचेन्न स्वविषयसमानविषयकपदेन स्वविषयानतिरिक्तविषयत्वविवक्षायामुपनीतभानपक्षेऽनुमितौ संशयोत्तरप्रत्यक्षे च ॥

म० प्र०–दिनभेदेनजायमानस्य–दिनांतररूपदिनविशेषवृत्तिजन्याश्रयस्य नानात्वात्–पूर्वदिनवृत्तिज्ञानाद्भिन्नत्वात । तस्य–दिनांतरीयघटादिज्ञानस्य । तत्र–दिनांतरीये घटादिज्ञाने । अनधिगतपदेन–अनधिगतार्थविषयशब्देन (स्वाव्यवहितेति) स्वं घटइतिज्ञानं तदव्यवहितपूर्वक्षणवर्त्तियत्स्वसमानाधिकरणज्ञानं पटादिज्ञानं तदविषयविषयकत्वं घटज्ञाने इति लक्षणसमन्वयः । स्वसमानाधिकरणत्वं च परमते एकात्मवृत्तित्वं वेदांतिमतेत्वेकांतःकरणवृत्तित्वरूपमितिविभागः । स्वसमानाधिकरणज्ञानाविषयविषयकत्वमित्युक्ते अतीतदिने ज्ञातघटे एतत्कालीनोयंघट इति ज्ञानस्य दिनांतरीयघटादिज्ञानविषयविषयकत्वेनातीतदिने ज्ञातघटे एतत्कालीनघटादिज्ञानेऽव्याप्तिः स्यात्तद्वारणाय स्वाव्यवहितपूर्वक्षणवर्तीति ज्ञानविशेषणं, स्वाव्यवहितपूर्वक्षणवर्तिज्ञानाविषयविषयकत्वमित्युक्तेऽयंघट इत्यादिज्ञानस्य पुरुषांतरीयोयंघट इत्यादिज्ञानविषयविषयकत्वेनेश्वरीयसकलविषयकज्ञानविषयविषयकत्वेन चासंभवः स्यात्तद्वारणाय

Funding by IKS-MoE

स्वसमानाधिकरणेति । अत्र सर्वत्र यस्मिँल्लक्षणसमन्वयेच्छा तत्स्वशब्देन ग्राह्यमित्यपि बोध्यमिति । अतः–अनधिगतार्थविषयशब्दस्योक्तविवक्षितार्थपरत्वात् । नोक्तदोषः–एतत्कालीनघटादिज्ञाने उक्ताव्याप्तिरूपोदोषोन । तथापि–घटादिज्ञानेऽव्याप्त्यभावेपि (स्मृतावतिव्याप्तेरिति) मात्रादिस्मृतेर्मात्रादिस्मृत्यव्यवहितपूर्वक्षणवर्तिस्वसमानाधिकरणघटादिज्ञानाविषयविषयकत्वादितिशेषः (स्वविषयेति) स्वविषयाभिन्नविषयकज्ञानाजन्यत्वमित्यर्थः । (स्वविषयानतिरिक्तेति) स्वविषयविषयकत्वे सति स्वविषयानतिरिक्तविषयकत्वमित्यर्थः । एतदर्थाकरणेवक्ष्यमाणोपनीतभानपक्षे इत्युक्तिरनुपपन्नास्यादनुपनीतभानपक्षेप्यनुमितेः स्वविषयानतिरिक्तविषयकज्ञानाजन्यत्वाभावात् । उपनीतभानपक्षे–अलौकिकसन्निकर्षजन्यज्ञानविषयवह्न्यादिसाध्येऽनुमितिरूपभानस्यालौकिकसन्निकर्षजन्यज्ञानविषयधूमादिहेतावलौकिकसन्निकर्षजन्यज्ञानविषयवह्न्यादिसाध्यनिरूपितव्याप्तिस्मरणरूपभानस्यवा स्वीकर्तृमते अनुमितावित्यादिसप्तम्यन्तानामव्याप्तेरित्यनेनान्वयः । तथाहि स्वं वह्निविषयकानुमितिस्तस्या यो विषयो वह्न्यादिरूपो विषयस्तस्मादनधिकविषयकं ज्ञानमनुमितिपूर्वकालीनं व्याप्तिस्मरणात्मकं ज्ञानं तज्जन्यत्वस्यानुमितित्वावच्छिन्नानुमितौ सत्त्वेनाव्याप्तिः । एवं स्वं स्थाणुरेवेत्याकारकसंशयोत्तरप्रत्यक्षं तस्य विषयः स्थाणुस्तस्मादनधिकविषयकज्ञानंवक्रकोटरादिविषयकविशेषदर्शनात्मकं ज्ञानं तज्जन्यत्वस्य संशयोत्तरप्रत्यक्षेसत्त्वादव्याप्तिरिति ॥

शि०म०–मतांतरे शाब्दज्ञाने च अव्याप्तेः . प्रमुष्टतत्ताकस्मृतावतिव्याप्तेश्च । नापि स्वविषयान्यूनविषयकत्वं सर्वेश्वरज्ञानमादाय लक्षणस्यासंभवप्रसंगात् । अथ . स्वविषयान्यूनानतिरिक्तविषयकत्वं तद्विवक्षितं ततश्च संशयोत्तरप्रत्यक्षानुमितिशाब्दज्ञानेषु नाव्याप्तिः ईश्वरज्ञानमादायापि नासंभवः ॥

म० प्र०–(मतांतरेशाब्दज्ञानेइति) मूलकारमतातिरिक्तमते शाब्दज्ञानत्वावच्छिन्नशाब्दज्ञाने इत्यर्थः । मूलकारमतेपि व्यक्तिमात्रार्थकतत्त्वमस्यादिवाक्याति रिक्तनीलोत्पलादिवाक्यजन्यशाब्दज्ञानेऽव्याप्त्यापादनसंभवेपि तत्त्वमस्यादिपदेषु लक्षणाया अस्वीकारात्तत्त्वमस्यादिवाक्यजन्यज्ञानविषयाधिकविषयकतत्त्वंपदवाच्याऽर्थज्ञानस्य तत्त्वमस्यादिवाक्यजन्याखंडवस्तुविषयकशाब्दज्ञानंप्रति कारणत्वेन तत्त्वमस्यादिवाक्यजन्यज्ञाने लक्षणसत्त्वेन शाब्दज्ञानत्वावच्छिन्ने शाब्दज्ञानेऽव्याप्त्यभावेन मूलकारादन्येषामाचार्याणां मते शाब्दज्ञानत्वावच्छिन्नशाब्दज्ञानस्य शाब्दज्ञानन्यूनविषयकपदार्थोपस्थितिजन्यत्वेन शाब्दज्ञानत्वावच्छिन्नशाब्दज्ञानेऽव्याप्तिरितिभावः । स्मृतित्वेनानुभवत्वेन च स्मृत्यनुभवयोः कार्यकारणभावमभिप्रेत्यप्रमुष्टतत्ताकस्मृतावतिव्याप्तिमाह (प्रमुष्टतत्ताकेति) मातेत्याकारकप्रमुष्टतत्ताकस्मरणस्य प्रमुष्टतत्ताकस्मृतिविषयाधिकविषयकपूर्वा

नुभवजन्यत्वेपि प्रमुष्टतत्ताकस्मृतिविषयानधिकविषयकप्रमुष्टतत्ताकस्मृत्यजन्यत्वस्य सत्त्वात्तत्रातिव्याप्तिरितिभावः (स्वविषयान्यूनविषयकत्वमिति) अस्याग्रे स्वविषयसमानविषयकशब्देन विवक्षितमितिशेषः । तथाच स्वविषयान्यूनविषयकज्ञानाजन्यत्वमित्यर्थः । मतांतरेशाब्दज्ञानादौ न्यूनविषयकपदार्थज्ञानादिजन्यत्वेनाव्याप्त्यभावेपि मूलकृन्मते तत्त्वमस्यादिवाक्यजन्यज्ञाने स्वविषयान्यूनविषयकपदार्थज्ञानजन्यत्वेनाव्याप्तिमभिप्रेत्यासंभवमेवाह (सर्वेश्वरज्ञानमिति) (तदिति) स्वविषयसमानविषयकत्वमित्यर्थः (ततश्चेति) चशब्दस्यैवकारार्थकत्वेन स्वविषयसमानविषयकशब्दस्य स्वविषयान्यूनानतिरिक्तविषयकपरत्वादेवेत्यर्थः ॥

शि॰म॰–व्याप्तिज्ञानपदार्थस्मरणयोर्न्यूनविषयत्वादीश्वरज्ञानस्यचाधिकविषयत्वादितिचेन्न । तथापि प्रमुष्टतत्ताकस्मृतावतिव्याप्तितादवस्थ्यात् । तत्त्वमसीतिवाक्यजन्याभेदज्ञानस्य तत्त्वंपदलक्षितस्वरूपोपस्थितिजन्यत्वेन तत्राव्याप्तेश्च । नचानधिगतविषयपदेन संस्काराजन्यत्वं विवक्षितं स्मृतिश्च तज्जन्येति नातिव्याप्तिः । लिंगकरणतावादिमते संस्कारलिंगकानुमितौ सिद्धांतप्रत्यभिज्ञायामनुमितिमात्रेचाव्याप्तेः अनधिगतपदेनैव भ्रमेऽतिप्रसंगनिरासेनाबाधितपदवैयर्थ्यापत्तेः । भवन्मते ब्रह्मव्यतिरिक्तसकलपदार्थज्ञानस्य भ्रमतया पूर्वपूर्वानुभवसंस्कारजन्यत्वेनतत्राव्याप्तेश्च । नच संस्कारत्वेन तदजन्यत्वंभ्रमस्तुदोषत्वेनैव तज्जन्य इतिवाच्यम् । रजतादिभ्रमे चाकचिक्यादिदोषवद्ब्रह्मातिरिक्तघटादिप्रपंचज्ञाने मूलाविद्याया एवदोषत्वाभ्युपगमात् । तस्मादुक्तप्रमालक्षणमयुक्तमिति ॥

म॰ प्र॰–(न्यूनविषयत्वादिति) पर्वतादिपक्षस्य वह्न्यादिसाध्यस्य पक्षसाध्यसंयोगादेश्चानुमितिनिरूपितविषयत्वं व्याप्तिज्ञानस्यतु साध्यविषयकत्वेपि पर्वताद्यविषयकत्वादनुमितिन्यूनविषयकत्वं शाब्दज्ञानस्य तु संसर्गावगाहित्वादधिकविषयकत्वेन पदार्थस्मृतेः पदार्थसंसर्गावगाहिशाब्दज्ञानन्यूनविषयकत्वेन तज्जन्यत्वेपि नाव्याप्तिरितिभावः (अतिव्याप्तितादवस्थ्यादिति) पूर्वानुभवस्य प्रमुष्टतत्ताकस्मृतिविषयाधिकविषयकत्वेन प्रमुष्टतत्ताकस्मृतिविषयान्यूनानतिरिक्तविषयकप्रमुष्टतत्ताकस्मृत्यात्मकमेवज्ञानं ग्राह्यं तदजन्यत्वस्य प्रमुष्टतत्ताकस्मृतौ सत्त्वेनातिव्याप्तितादवस्थ्यादित्यर्थः । संस्काराजन्यत्वं संस्कारनिष्ठजनकतानिरूपितजन्यतानाश्रयत्वं (संस्कारलिंगकानुमिताविति) अयंपुरुषो मातृविषयकस्मृतिमान्मातृविषयकसंस्कारवत्वान्मद्वदित्याकारकसंस्कारहेतुकानुमितावव्याप्तेरित्यर्थः । अत्र हेतुसिद्धिस्तु अयं पुरुषो मातृविषयकसंस्कारवान्पूर्वकालीनमातृविषयकानुभववत्त्वान्मद्वदित्यनुमानेन बोध्या । तत्रानुभवसि-

द्धिरपि अयंपुरुषो मातृविषयकानुभववान्मातृविषयकशब्दवत्त्वादित्यनुमानेन बोध्येति (दोषत्वेनैवेतिं) दोषत्वावच्छिन्नायासंस्कारनिष्ठजनकतातन्निरूपितजन्यतावान् भ्रमो नतु संस्कारत्वावच्छिन्नायासंस्कारनिष्ठजनकता तन्निरूपितजन्यतावानित्यर्थः (चाकचिक्यादिदोषवदिंति) अत्रादिपदेन सावयवत्वदूरदेशवृत्तित्वादिकविषयनिष्ठदोषाः पित्तादिकरणनिष्ठदोषामैत्रादेः शुक्त्यादिविशेषांशावच्छिन्नचैतन्यावरकाज्ञानरजतस्मरणंचेत्यादिप्रमातृनिष्ठदोषाश्च ग्राह्या इति (मूलाविद्यायाएवेति) नसंस्कारस्येतिशेषः तथाच संस्कारस्य दोषत्वेन न हेतुता किंतुसंस्कारत्वेनैव हेतुतेति ब्रह्मव्यतिरिक्तसकलपदार्थज्ञानेऽव्याप्तिस्तदवस्थाऽबाधितपदवैयर्थ्यंच तदवस्थमितिभावः ॥

शि० म०—अत्रब्रूमः अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमात्वम् अनधिगतत्वंच स्वाव्यवहितपूर्वक्षणवर्तिधर्माविषयविषयकत्वेन नियतत्वं तेन स्मृतेस्तादृशसंस्कारविषयविषयकत्वात्तत्रनातिव्याप्तिः ।

म० प्र०—अनधिगतत्वंच—ज्ञाननिष्ठमनधिगतार्थविषयकत्वंच (स्वाव्यवहितपूर्वक्षणवर्तीति) स्वाव्यवहितपूर्वक्षणवर्त्तिधर्माविषयविषयकत्वनिरूपिताधिकरणतावत्त्वं तथाच स्त्रमयंघट इति ज्ञानं तस्मादव्यवहितपूर्वक्षणवर्तिधर्मः पट इत्यादिज्ञानात्मको धर्मस्तस्य विषयः पटादिस्तद्भिन्नवटविषयकत्वनिरूपिताधिकरणतावत्त्वमयंघट इति ज्ञाने इति लक्षणसमन्वयः । अत्रस्वाव्यवहितपूर्वक्षणवर्तिधर्माविषयविषयकत्वाधिकरणत्वं विहाय स्वाव्यवहितपूर्वक्षणवर्तिधर्माविषयविषयकत्वेन नियतत्वमित्युक्तिर्यत्र स्वाव्यवहितपूर्वक्षणवर्तिधर्माविषयविषयकत्वं तत्र स्मृतिभिन्नत्वमिति स्वाव्यवहितपूर्वक्षणवर्त्तिधर्माविषयविषयकत्वस्य स्मृतिभिन्नत्वव्याप्यता बोधनार्थेति । नचेश्वरघटादिज्ञानमादाय पुरुषांतरघटादिज्ञानमादायच लक्षणासंभवरूपो दोष इतिवाच्यं 'स्वसमानाधिकरणेति' धर्मविशेषणस्यापि निवेशनीयत्वात् । नचैवमीश्वरादिघटादिज्ञानमादाय लक्षणासंभवरूपदोषासंभवेन यद्वेत्यादिवक्ष्यमाणग्रंथस्य नन्वीश्वरज्ञानमादाय इत्याद्यवतरणानुपपत्तिरितिवाच्यं, वक्ष्यमाणावतरणस्य यथाश्रुतलक्षणाभिप्रायेणोपपत्तेः । कस्मिंश्चित्पुस्तके स्वाव्यवहितपूर्वक्षणवर्तिधर्माविषयविषयकत्वेन नियतत्वमित्यस्य स्थाने स्वाव्यवहितपूर्वक्षणवर्तिधर्मविषयविषयकत्वेनानियतत्वमितिपाठोस्ति । तस्य स्वाव्यवहितपूर्वक्षणवर्त्तिधर्मविषयविषयकत्वनिरूपिताधिकरणताशून्यत्वमित्यर्थः । अत्रापि स्वाव्यवहितपूर्वक्षणवर्त्तिधर्मविषयविषयकत्वाधिकरणताशून्यत्वं विहाय स्वाव्यवहितपूर्वक्षणवर्तिधर्मविषयविषयकत्वेनानियतत्वमित्युक्तिर्यत्र स्मृतित्वं तत्र स्वाव्यवहितपूर्वक्षणवर्तिधर्मविषयविषयकत्वमितिस्मृतित्वस्य स्वाव्यवहितपूर्वक्षणवर्तिधर्मविषयविषयकत्वव्याप्यताबोधनार्थेति । अत्र ज्ञानपदंविहायधर्मपदोपादानेन स्वाव्यव-

Funding by IKS-MoE

हितपूर्वक्षणवर्ति धर्मशब्देन संस्कारस्यापि ग्रहणसंभवेन स्मृतौ नातिव्याप्तिरित्याह (तेनोति) ज्ञानपदं विहाय धर्मपदोपादानेनेत्यर्थः । (तादृशेति) स्वाव्यवहितपूर्वक्षणवर्त्तिधर्माभिन्नेत्यर्थः ॥

शि०म०–ब्रह्मव्यतिरिक्तसकलप्रपंचज्ञानस्य संस्कारजन्यत्वेपि तादृशसंस्काराविषयविषयत्वान्नाव्याप्तिः । ननु तत्त्वमसीतिवाक्यजन्याखण्डाकारज्ञाने तथाप्यव्याप्तिः । तत्र लाक्षणिकतत्त्वंपदजन्याभेदोपस्थितेः स्वाव्यवहितपूर्वक्षणवर्तित्वादितिचेत् न । सांप्रदायिकमते प्रथमप्रमालक्षणे तस्य लक्ष्यत्वाभावेनेष्टापत्तेः । नचाप्रमात्वे तस्य भेदप्रतिभासविरोधित्वं नस्यादिति वाच्यं, तस्याबाधितविरोध्यर्थविषयतया तन्निवर्तकत्वोपपत्तेः ॥

म०प्र०–पूर्वोक्तां ब्रह्मव्यतिरिक्तसकलप्रपंचज्ञानेऽव्याप्तिं निराकरोति (ब्रह्मव्यतिरिक्तसकलप्रपंचज्ञानस्येति) अस्य नाव्याप्तिरित्यनेनान्वयः । ब्रह्मव्यतिरिक्तसकलप्रपंचज्ञानेनाव्याप्तिरितिप्रतिज्ञायां हेतुमाह (संस्कारजन्यत्वेपीति) ब्रह्मव्यतिरिक्तसकलपदार्थज्ञानस्य भ्रमतया वृत्त्यात्मकेघटादिज्ञाने इदं ज्ञानमित्यनुभवोभवत्यहं ज्ञानमित्यनुभवः कुतो न भवति नियामकाभावादित्याकारकाशंकानिवृत्त्यर्थं यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्यत्वं तस्य तदाकारानुभवविषयत्वमित्याकारकसमाधानविषयत्वेन च पूर्वपूर्वानुभवसंस्कारजन्यत्वेपीत्यर्थः । नच ब्रह्मव्यतिरिक्तसकलपदार्थज्ञानस्य स्मृतित्वापत्तिरितिवाच्यम् । संस्कारमात्राजन्यत्वाद्विषयत्वप्रतिबंधकाभावत्वभिन्नधर्मेण स्मृतिप्रागभावाजन्यत्वाच्चेति (तादृशेति) एतत्कल्पीयब्रह्मव्यतिरिक्ततत्तत्पदार्थविषयकज्ञानजनकीभूताः संस्काराः पूर्वकल्पीयतत्तत्पदार्थविषयकाएतत्कल्पीयब्रह्मव्यतिरिक्ततत्तत्पदार्थज्ञानानित्वेतत्कल्पीयब्रह्मव्यातिरिक्ततत्तत्पदार्थविषयकाणीति स्वाव्यवहितपूर्वक्षणवर्तिधर्माभिन्नसंस्काराविषयविषयकत्वादित्यर्थः । (तथापीति) ब्रह्मव्यतिरिक्तसकलपदार्थज्ञानेष्वव्याप्त्यभावेपीत्यर्थः । (तत्रेति) तत्त्वमस्यादिवाक्यजन्याखंडाकारज्ञाने इत्यर्थः । (वर्त्तित्वादिति) अस्याग्रे स्वाव्यवहितपूर्वक्षणवर्त्तिलाक्षणिकतत्त्वंपदजन्याभेदोपस्थितिरूपधर्मविषयविषयकत्वादितिशेषः । नेतिप्रतिज्ञायां हेतुमाह (इष्टापत्तेरिति) इष्टापत्तौ हेतुमाह (सांप्रदायिकमतेइति) भाष्यकारादीनां मते इत्यर्थः । प्रथमप्रमालक्षणे–अनधिगताबाधितार्थविषयकज्ञानत्वं प्रमात्वमिति लक्षणे. तस्य–वाक्यजन्याखंडाकारज्ञानस्य, (भेदप्रतिभासविरोधित्वं नस्यादिति) भ्रांतिसिद्धपारमार्थिकेशजीवभेदज्ञाननिवर्त्तकत्वं नस्यादित्यर्थः । तथाच तत्त्वमस्यादिवाक्यजन्याखण्डाकारज्ञानस्यभ्रांतिसिद्धपारमार्थिकेशजीवादिभेदज्ञाननिवर्त्तकत्वस्वीकाररूपासिद्धांतहानिः स्यादितिभावः । नच वाच्यमितिप्रतिज्ञायांहेतुमाह (तन्निवर्त्तकत्वोपपत्तेरि-

Funding by IKS-MoE

ति । भ्रांतिसिद्धपारमार्थिकेशजीवभेदादिप्रतिभासनाशकत्वोपपत्तेरित्यर्थः । तस्यभेदंप्रतिभासनिवर्तकत्वोपपत्तौ हेतुमाह (तस्येति) तत्त्वमस्यादिवाक्यजन्याखंडाकारज्ञानस्येत्यर्थः । अबाधितविरोध्यर्थविषयतया—प्रत्यक्षादिप्रमाणांतरेणाबाधितो भेदविरोधीचयोर्थऐक्यरूपोर्थस्तद्विषयतया ॥

शि० म०—ज्ञानस्य भेदज्ञाननिवर्तकतायां गौरवेणानधिगतविषयकत्वस्यातंत्रत्वात्तदुक्तमष्टवर्णके विवरणाचार्यैः तत्त्वमसीतिवाक्यस्य जीवब्रह्मपदार्थप्रतीतिसमये प्रतिपन्नैक्यविषयतयाऽनुवादप्राप्तावपिभेदप्रतिभासविरोधितया प्रामाण्यमिति । ग्रन्थकृन्मतेतु तत्त्वमसीतिवाक्यजन्यमभेदज्ञानं प्रथमलक्षणेपिलक्ष्यमेव । नचाधिगताभेदविषयत्वादव्याप्तिः । तत्त्वंपदाभ्यांशक्त्याकर्तृत्वसर्वज्ञत्वादि विशिष्टजीवब्रह्मणोरुपस्थितावपि विशिष्टयोरन्वयानुपपत्त्याविशेष्ययोरेवाभेदान्वय इति चतुर्थेग्रन्थकृता वक्ष्यमाणत्वेन पदार्थस्मृतिसमये अभेदान्वयस्याप्रतिपत्तेः । नच शाब्दप्रमायामुपनीतभानपक्षेऽनुमितौचाव्याप्तिः पदार्थव्याप्त्योरव्यवहितपूर्वक्षणवर्तिस्मृतिविषयत्वादितिवाच्यम् ॥

म० प्र०—ननु यथार्थज्ञानस्यानधिगताबाधितभ्रांतिसिद्धभेदविरोध्यभेदरूपार्थविषयकत्वेनैव भेदप्रतिभासनिवर्तकत्वं, नत्वबाधितभ्रांतिसिद्धभेदविरोध्यभेदरूपार्थविषयकत्वमात्रेण कल्पितभेदप्रतिभासनिवर्तकत्वमनाधिगताबाधितभ्रांतिसिद्धभेदविरोध्यभेदरूपार्थविषयकत्वेनैव घटादियथार्थज्ञानस्य भ्रांतिसिद्धभेदप्रतिभासनिवर्त्तकताया दृष्टत्वात्कथं तत्त्वमस्यादिवाक्यजन्यज्ञानस्याबाधितभ्रांतिसिद्धपारमार्थिकेशजीवभेदविरोध्यभेदरूपार्थविषयकत्वेनैव भेदप्रतिभासनिवर्त्तकत्वं त्वयोच्यते इत्यत आह (ज्ञानस्येति) ज्ञाननिष्ठस्यानधिगतविषयकत्वस्यअनधिगताबाधितभेदविरोध्यर्थविषयकत्वस्य, भेदज्ञाननिवर्त्तकतायामतंत्रत्वात्—यत्र ज्ञानेऽनधिगताबाधितभेदविरोध्यभेदार्थविषयकत्वं तत्र ज्ञाने भेदप्रतिभासनिवर्तकत्वमितिभेदप्रतिभासनिवर्तकतानिरूपितव्याप्यत्वाभावात् । ननु तस्य भेदप्रतिभासनिवर्त्तकतानिरूपितव्याप्यत्वाभावः कुतो निश्चित इत्याशंक्य तत्र हेतुमाह (गौरवेणेति) ज्ञानस्याबाधितभेदाविरोध्यभेदार्थविषयकत्वेन भेदप्रतिभासनिवर्त्तकत्वापेक्षया ज्ञानस्यानाधिगताबाधितभेदाविरोध्यभेदार्थविषयकत्वेन भेदप्रतिभासनिवर्त्तकतायां गौरवेणेत्यर्थः (तत्त्वमसीति वाक्यस्येति) ब्रह्मजीवपदार्थप्रतीतिसमयेलक्षणया वृत्त्या शुद्धपदार्थोपस्थितिसमये तत्त्वमस्यादिवाक्यस्य निश्चितैक्यविषयकत्वेन हेतुना, अनुवादप्राप्तावपि—अप्रामाण्यप्राप्तावपि अभेदप्रतिभासविरोधितया—भेदप्रतिभासविरोधिज्ञानजनकतया, प्रामाण्यं—प्रमाकरणत्वं संभवतीत्यर्थः । ननु सांप्रदायिकमतवत्किं ग्रंथकृन्मतेपि तत्त्वमस्यादिवाक्य-

जन्याखंडाकारज्ञानस्य प्रथमप्रमालक्षणालक्ष्यत्वमित्याशंक्याह (ग्रंथकृदिति) नचेति प्रतिज्ञायां हेतुमाह (पदार्थेति) सर्वज्ञत्वादिविशिष्टयोस्तत्त्वंपदार्थयोः स्मृतिसमये इत्यर्थः । अभेदान्वयस्याप्रतिपत्तौ हेतुमाह (तत्त्वंपदाभ्यामिति) शाब्दप्रमायामित्यस्याव्याप्तिरित्यनेनान्वयः शाब्दप्रमायामुपनीतभानपक्षे संशयोत्तरप्रत्यक्षानुमित्योश्चेत्यस्य स्थाने शाब्दप्रमायामुपनीतभानपक्षेऽनुमितौचेतिपाठः साधुः । अव्याप्तौहेतुमाह (पदार्थेति) । (स्मृतिविषयत्वादिति) अस्याग्रे शाब्दानुमित्योः स्वाव्यवहितपूर्वक्षणवर्त्तिव्याप्तिपदार्थविषयकस्मृतिरूपधर्मविषयविषयकत्वाधिकरणत्वादिति शेषः ॥

शि०म०–तयोरज्ञातसाध्यवाक्यार्थांश एव प्रमात्वाभ्युपगमेन ज्ञातार्थांशे तदप्रमात्वस्येष्टत्वात । यद्वा अनधिगतविषयपदेन स्वसमानविषयकसंस्काराजन्यत्वं विवक्षितम् । स्वसमानविषयत्वं स्वान्यूनविषयत्वं, तेन प्रमुष्टतत्ताकस्मृतौ नातिव्याप्तिः । शाब्दप्रमातुपदार्थस्मृतिजन्यापि न संस्कारजन्या अनुमितिः प्रत्यभिज्ञाच न्यूनविषयतज्जन्येति नाव्याप्तिः ब्रह्मव्यतिरिक्तघटादिसकलप्रमायाःसंस्कारजन्यत्वेपि तस्याभिन्नविषयत्वान्नाव्याप्तिः अथवा स्वान्यूनविषयकानुभवाजन्यत्वंविवक्षितं, तच्च तत्त्वेन तदजन्यत्वमतः सर्वदोषनिरासः । ततश्च युक्तमिदं प्रमालक्षणमिति तदेतत्सर्वमभिसंधायाह (इतिनाव्याप्तिशंकापीति)

म० प्र०–तयोः–शाब्दानुमित्योः । नन्वीश्वरज्ञानमादाय पुरुषांतरज्ञानमादायचोक्तानधिगतलक्षणे उक्तासंभवरूपदोषस्तदवस्थ इत्यत आह (यद्वेति) स्वान्यूनविषयत्वं स्वविषयविषयकत्वे सति स्वविषयान्यूनविषयकत्वमत एव] वक्ष्यमाणब्रह्मव्यतिरिक्तेत्यादिग्रंथानुपपत्तिर्नास्ति तेन–स्वान्यूनविषयकत्वरूपस्वसमानविषयकत्वविवक्षणेन । (न्यूनविषयकतज्जन्येति) लिंगपरामर्शकरणत्वस्य निराकृतत्वेन लिंगपरामर्शजन्यसंस्कारस्याकारणत्वाद्व्याप्तिज्ञानजन्यसंस्कार एव ग्राह्यः । सतुस्वन्यूनविषयकस्तज्जन्यत्वेनानुमित्यादेर्नाव्याप्तिरित्यर्थः । ननु तथापि स्मृतावतिव्याप्तिः स्मृतेरपि स्मृत्यनुभवयोः स्मृतित्वेनानुभवत्वेन कार्यकारणभावस्वीकर्तृमते स्वविषयविषयकस्वविषयान्यूनविषयकतत्तत्स्मृतिजन्यसंस्काराजन्यत्वादित्यत आह (अथवेति) ननु सर्वज्ञानानां स्वान्यूनविषयकेश्वरज्ञानजन्यत्वेनासंभव इत्याशंक्याह (तच्चेति) स्वान्यूनविषयकानुभवाजन्यत्वंचेत्यर्थः । तत्त्वेन तदजन्यत्वं–स्वान्यूनविषयकानुभवत्वावच्छिन्नानुभवनिष्ठजनकतानिरूपितजन्यताऽभाववत्त्वरूपम् । अतः–ईश्वरज्ञानस्य ज्ञानत्वावच्छिन्नजनकतायाः सत्वेन पूर्वोक्ताजन्यत्वस्य सर्वज्ञानेषु सत्वात् ॥

मू०–ननु सिद्धान्ते घटादेर्मिथ्यात्वेन बाधितत्वात्तज्ज्ञानं कथं प्रमाणम् । उच्यते ॥

शि०म०–इदानीं लक्षणद्वयस्याव्याप्तिमाशंकते (नन्विति) । (कथं प्रमाणमिति) उक्तप्रमालक्षणवन्नभवतीत्यर्थः । यद्वा । ननु यदीदं लक्षणं सर्वमतसाधारणं तदा धारावाहिकबुद्धावव्याप्तिः, यदि सिद्धांते एवेदं लक्षणं तदा ब्रह्मज्ञानस्यैव सिद्धांते प्रमात्वतया मिथ्याभूतघटादिज्ञानस्याप्रमात्वात्तत्राव्याप्तिनिराकरणानुपपत्तेः । अनधिगतपदवैयर्थ्यंचेत्याशयेन शंकते (नन्विति) । (कथंप्रमाणमिति) प्रमात्वेन लक्ष्यं न भवतीत्यर्थः । घटादिज्ञानमपि लक्ष्यमेव प्रमात्वव्यवहारात्तद्व्यवहारार्थमेवात्र लक्षणप्रणयनादित्याशयेनाह (उच्यते इति) ॥

म० प्र०–परममूले (तज्ज्ञानमिति) घटादिज्ञानमित्यर्थः । परममूले, कथंप्रमाणं–प्रमाकथम् । घटादिज्ञानस्य प्रमात्वाभावेहेतुमाह परममूले (बाधितत्वादिति) घटादेर्बाधितत्वे हेतुमाह परममूले (सिद्धांते इति) । (उक्तेति) उक्तं यत्प्रमालक्षणद्वयं तद्वद्घटादिज्ञानं न भवतीत्यर्थः । इदंलक्षणं–अनधिगतपदार्थघटितप्रथमलक्षणं सर्वमतसाधारणं–सर्वनैयायिकादिमतवृत्ति सर्ववादिनां संमतमितियावत् । धारावाहिकबुद्धौ–धारावाहिकबुद्धिघटकीभूतद्वितीयादिज्ञाने (अव्याप्तिरिति) परमते धारावाहिकबुद्धेः स्वीकृतत्वेन धारावाहिकबुद्धिघटकीभूतद्वितीयादिज्ञानस्याज्ञातार्थविषयकत्वाभावादितिशेषः । तदेत्यस्य तत्राव्याप्तिनिराकरणानुपपत्तिरित्यनेनान्वयः । तत्र–घटादिज्ञाने घटादिज्ञानेऽव्याप्तिनिराकरणानुपपत्तौ हेतुमाह (मिथ्याभूतेति) मिथ्याभूतघटादिज्ञानस्याप्रमात्वे हेतुमाह (ब्रह्मज्ञानस्यैवेति) (वैयर्थ्यंचेति) ब्रह्मव्यतिरिक्ततत्तत्पदार्थविषयकस्मृतेर्बाधितार्थविषयकत्वेन स्मृतौलक्षणस्याप्रवृत्तेरितिशेषः । नचानधिगतविशेषणस्य ब्रह्मस्मृतौ लक्षणासंबंधफलकत्वेन कथं वैयर्थ्यमिति वाच्यम्, ब्रह्मस्मृतौ लक्षणस्येष्टत्वात् । नच ब्रह्मस्मृतेः प्रमात्वेन तत्करणस्याप्यभ्युपेयत्वेन सप्तमप्रमाणाभ्युपगमापत्तिरिति वाच्यम्, ब्रह्मस्मृतेर्वाक्यजन्यवृत्त्यात्मकज्ञानजन्यत्वेन ब्रह्मस्मृतिजनकीभूतज्ञानरूपव्यापारद्वारा शब्दप्रमाणस्यैव ब्रह्मस्मृतिजनकत्वेन तत्करणस्य शब्दप्रमाणे एवांतर्भावादिति । (प्रमात्वेनेति) प्रमात्वावच्छिन्नं यल्लक्ष्यत्वं तद्वन्नभवतीत्यर्थः । (प्रमात्वेति) घटादिज्ञाने इतिशेषः । नन्वेवं यथार्थस्मृतेरपि नियतसंवादिप्रवृत्तिजनकत्वेन प्रमात्वाल्लक्ष्यत्वेनाधिगतपदवैयर्थ्यं तदवस्थमेवेत्याशंक्येतरव्यावृत्तिप्रमात्वप्रकारकव्यवहारान्यतरप्रयोजनोपयोग्येवप्रामाण्यमत्रनिरूपणीयं नतु संवादिप्रवृत्त्युपयुक्तप्रामाण्यमत्रनिरूपणीयमित्यनधिगतविशेषणस्य साफल्यमभिप्रेत्याह (तद्व्यवहारार्थमेवेति) घटादिज्ञानेष्वितरव्यावृत्तिप्रमात्वप्रकारकव्यवहारान्यत–

रप्रयोजनार्थमेवात्रास्मिन् ग्रंथे उक्तप्रमालक्षणप्रणयनान्नतुज्ञानानां संवादिप्रवृत्तिजनकत्वबोधार्थं लक्षणप्रणयनमित्येवकारार्थ इत्यर्थः ॥

मू०—ब्रह्मसाक्षात्कारानंतरं हि घटादीनां बाधः “यत्रत्वस्य सर्वमात्मेवाभूत्तत्केन कं पश्येत्” इतिश्रुतेः । नतु संसारदशायांबाधः “यत्रहि द्वैतमिवभवति तदितर इतरं पश्यति” इतिश्रुतेः । तथाचाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः ॥

शि० म०—तर्हि सिद्धांते घटादिज्ञानस्यापि लक्ष्यत्वेन तत्राव्याप्तिर्दुर्वारा तद्विषयस्य शुक्तिरूप्यवद्बाधितत्वादित्याशंक्य तद्वत्संसारदशायां घटादिप्रपंचस्य न बाध इत्याह (ब्रह्मेति) घटादीनां बाधस्तुस्वोपादाननिवृत्तिरूपो ग्राह्यः । ननु “नेहनानास्ति” इत्यादिश्रुत्या कालत्रये घटादेर्बाधावगतेः कथं संसारदशायामबाध इत्याशंक्य पारमार्थिकत्वावच्छिन्नवदत्यंताभावावगमेपि अध्यासविरोधिनः स्वोपादाननिवृत्तिलक्षणबाधस्य मुक्तिदशायामेवावगमादित्याह (यत्रेति) (नतु संसारदशायामिति) स्वोपादाननिवृत्तिलक्षणो बाध इत्यनुषंगः । प्रपंचस्य संसारदशायां बाधाभावे हेतुमाह (यत्रहीति) नन्वेवमप्यबाधितपदेन कालत्रयाबाध्यत्वस्यार्थविशेषणत्वेनोक्तत्वात्तद्घटितलक्षणाव्याप्तिस्तदवस्थेत्यत आह (तथाचेति) संसारदशायामबाधितत्वे सिद्धे सतीत्यर्थः (संसारदशायामिति) संसारकालीनस्वोपादाननिवृत्त्यप्रतियोगित्वलक्षणमेवाबाधितत्वं लक्षणेविवक्षितमित्यर्थः ॥

म० प्र०—तर्हि घटादिज्ञाने प्रमात्वव्यवहारे सति अव्याप्तिर्दुर्वारेति वाक्यबोधिताव्याप्त्यंशेहेतुमाह (घटादिज्ञानस्येति) दुर्वारांशे हेतुमाह (तद्विषयस्येति) घटादिज्ञानविषयस्येत्यर्थः । तद्वत्—शुक्तिरूप्यवत्, स्वोपादाननिवृत्तिरूपः—स्वोपादानेन सह स्वनिवृत्तिरूपः, पारमार्थिकत्वावच्छिन्नतदत्यंताभावावगमेपिपारमार्थिकत्वावच्छिन्नप्रतियोगिताकप्रपंचात्यंताभावेबोधेपि, अध्यासविरोधिनः प्रपञ्चतत्प्रतीतिविरोधिनः स्वोपादाननिवृत्तिलक्षणबाधस्य—स्वोपादानेन सह स्वनिवृत्तिलक्षणबाधस्य । एवमपि—प्रपंचस्य संसारदशायां बाधाभावेपि । उक्तत्वात्—निरूपणार्हत्वात् । स्वोपादाननिवृत्त्यप्रतियोगित्वलक्षणं—स्वोपादाननाशेन सह यः स्वनाशस्तस्याप्रतियोगित्वस्वरूपम् ॥

Funding by IKS-MoE

मू०—तदुक्तम्—

देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः ॥

लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ॥ १ ॥ इति

आआत्मनिश्चयाद्ब्रह्मसाक्षात्कारपर्यन्तमित्यर्थः । लौकिकमिति घटादिज्ञानमित्यर्थः । तानि प्रमाणानि षट् प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिभेदात् ॥

शि० म०—उक्तघटादिज्ञानप्रामाण्यमभियुक्तवचनेनापि प्रथयति (तदुक्तमिति) लौकिकप्रमाणस्यात्मनिश्चयेनानुत्पाद्यत्वादज्ञाप्यत्वाच्च पंचम्यनुपपत्तिरित्यत आह (आ आत्मनिश्चयादिति) ब्रह्मनिश्चयः संसारदशायामप्यस्तीत्यत उक्तं (ब्रह्मसाक्षात्कारेति) ननु लौकिकशब्देनप्रत्यक्षादिजन्यज्ञानमात्राभिधाने स्वर्गेष्टसाधनतादिज्ञानस्यालौकिकस्य वैदिकलिङ्गादिपदजन्यस्याप्रामाण्यं सर्वदावाप्रामाण्यं स्यादित्याशंक्य ब्रह्मव्यतिरिक्तवस्तुज्ञानं सर्वंतेनाविवक्षितमित्याह (घटादीति) सामान्यलक्षणाधीनोविभाग इत्यतःप्रमाणं लक्षयित्वा विभजते (तानीति) प्रत्यक्षमेकं प्रमाणमितिचार्वाकाः । प्रत्यक्षानुमाने इति काणादसुगतमतानुसारिणः । शब्देन सहत्रीणि प्रमाणानीतिसांख्याः । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीतिनैयायिकाः । अर्थापत्त्या सह प्रमाणानिपंचेतिप्राभाकराः । एवं प्रमाणविभागमन्याव्याचक्षते तान्प्रत्याह (षडिति) ॥

म० प्र०—प्रथयति—बोधयति । परममूले (देहात्मप्रत्ययइति) यद्वद्यथादेहात्मप्रत्ययः ब्राह्मणोहं क्षत्रियोहं वैश्योहमित्यादि प्रत्ययः, प्रमाणत्वेनकल्पितः—प्रमात्वप्रकारकनिश्चयविषयः । यद्वा कल्पितो भ्रमोपि ब्राह्मणोहमित्यादिदेहात्मप्रत्ययो ब्राह्मणोहमित्यादिप्रत्ययस्य कर्मणि प्रवृत्त्यादिरूपव्यवहारसाधनतया वैदिकपुरुषैः प्रमात्वेनेष्यते तद्वत्तथेदं साक्षिरूपप्रत्यक्षसिद्धं लौकिकं लौकिकसामग्रीजन्यं प्रत्यक्षादिकमात्मनिश्चयात् । आ आत्मनिश्चयादित्यत्राङो मर्यादार्थकत्वेनापरोक्षयथार्थब्रह्माभिन्नात्मनिश्चयात्पूर्वस्मिन्व्यवहारकाले बाधकाभावात्प्रमाणं व्यावहारिकप्रामाण्याश्रयप्रमारूपमिष्यतां वेदान्तानां तु कालत्रयाबाध्यब्रह्माभिन्नात्मबोधकत्वात्तत्त्वावेदकप्रामाण्यमिति तु शब्दार्थः । प्रमातृत्वस्य कल्पितत्वेपि विषयाबाधाज्ज्ञानानांप्रामाण्यमिति भाव इत्यर्थः । (ब्रह्मनिश्चयइति) ब्रह्मास्तीत्याकारकब्रह्मनिश्चयः संसारदशायामप्यस्ति । तथाच घटादिज्ञानस्य प्रमात्वं नस्यात् (आ आत्मनिश्चयादितिं) मर्यादाकरणादतो निश्चयपदस्य ब्रह्माभिन्नात्मसाक्षात्काररूपोऽर्थः स्वीकरणीय इत्यर्थः । (प्रत्यक्षादीति) अत्रा-

दिपदेनलौकिकानुमानलोकिकोपमानलौकिकशब्दादीनां ग्रहणम् । मात्रपदंत्ववधारणार्थकम् । तथाचोक्तप्रत्यक्षादिप्रमाणेभ्यो जन्यज्ञानस्यैवाभिधाने इत्यर्थः (स्वर्गेष्टेति) स्वर्गाभिन्नो य इष्ट इच्छाविषयस्तन्निरूपिता या यागादिनिष्ठसाधनता तदादिविषयकज्ञानस्येत्यर्थः । (अप्रमाण्यं–सर्व दावाप्रामाण्यमिति) लौकिकपदेन वैदिकज्ञानस्यानादानादितिशेषः ॥

मू०–तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणम् ॥

शि०म०–अनुमानादीनां च पृथक्प्रामाण्यं तत्तन्निरूपणावसरे वक्ष्यामः । तत्र प्रत्यक्षस्य ज्येष्ठत्वात्प्रथमं तन्निरूपयति (तत्रेति) प्रमाणानांमध्ये इत्यर्थः । प्रमाकरणत्वमनुमानादावपीत्यत उक्तं (प्रत्यक्षेति) तावति चोक्ते भ्रमप्रत्यक्षकरणेऽतिप्रसंग इत्यतउक्तं (प्रमेति) नन्वयुक्तमिदं प्रत्यक्षप्रमाणलक्षणं प्रत्यक्षप्रमायाःप्रत्यक्षप्रमाणजन्यज्ञानरूपत्वेन परस्पराश्रयत्वात्. नचेन्द्रियजन्यज्ञानत्वं तथा स्मृत्यनुमित्यादेर्मनोजन्यत्वेन प्रत्यक्षत्त्वापत्तेः । ईश्वरज्ञानस्येन्द्रियाजन्यत्वेनाप्रत्यक्षत्वापत्तेश्चनापीन्द्रियत्वेनेन्द्रियजन्यत्त्वं साक्षात्वं स्मृतेरनुमितेश्च मनस्त्वेन तज्जन्यत्वेन नातिव्याप्तिरितिवाच्यम् । तथापि सिद्धान्ते मनसोऽनिन्द्रियतया सुखादिप्रत्यक्षे भ्रमेचाव्याप्तेः । नच विषयजन्यज्ञानत्वं मनोविशेष्यकानुमित्यादौ तत्प्रसंगात् सुखादिप्रत्यक्षभ्रमयोरव्यापकत्वाच्च । अत एव न विषयत्वेन तज्जन्यज्ञानत्वं साक्षात्त्वम् ॥

म०प्र–तत्र–प्रत्यक्षादिप्रमाणानां मध्ये, तावतिचोक्ते–प्रत्यक्षकरणमित्यस्यैवोक्ते । (परस्पराश्रयत्वादिति) प्रत्यक्षप्रमाणज्ञाने सति प्रत्यक्षप्रमाणजन्यज्ञानरूपप्रत्यक्ष प्रमायाज्ञानं प्रत्यक्षप्रमाज्ञाने प्रत्यक्षप्रमाघटितप्रत्यक्षप्रमाणज्ञानमित्यन्योन्याश्रयादित्यर्थः । तथा प्रत्यक्षत्वम् । नचेति प्रतिज्ञायां हेतुमाह (स्मृतीति)। (इन्द्रियत्वेनेन्द्रियजन्यत्वमिति) इन्द्रियत्वावच्छिन्नायेंद्रियनिष्ठाजनकतातन्निरूपितजन्यत्वमित्यर्थः । एवंच सति नस्मृत्यादावतिव्याप्तिरित्याह (स्मृतेरिति) तथापि–स्मृत्यादावतिव्याप्त्यभावेपि (मनोविशेष्यकेति) मन इन्द्रियं प्रत्यक्षज्ञानकरणत्वाच्चक्षुरादिवदित्यादि मनःपक्षकानुमितौ मनसः पक्षत्वेन मनसो विषयत्वं मनसो निखिलज्ञानं प्रति हेतुत्वेन मनोविशेष्यकानुमितेः पक्षीभूतमनोऽभिन्नविषयजन्यत्वमप्यस्ति । इतरपक्षकानुमितौ तु पक्षज्ञानस्य हेतुत्वेन नपक्षजन्यत्वमिति मनोविशेष्यकेत्युक्तमित्यर्थः । तत्प्रसंगात्–प्रत्यक्षत्वप्रसंगात्, प्रत्यक्षप्रमालक्षणातिव्याप्तेरितिवा । (अव्यापकत्वाच्चेति) एकदासुखादितदाकारवृत्त्योरभ्युपगमात्प्रत्यक्षलक्षणस्य सुखादिप्रत्यक्षेवृत्तित्वाभावेनाव्याप्ते-

Funding by IKS-MoE

श्चेत्यर्थः । अत एव—भ्रमसुखादिप्रत्यक्षयोरव्यापकत्वादेवेत्यर्थः । यद्यपि मनसो ज्ञानत्वावच्छिन्नज्ञानं प्रति मनस्त्वेन कारणत्वादुक्तप्रत्यक्षलक्षणस्य विषयत्वावच्छिन्नजनकताघटितत्वेन मनोविशेष्यकानुमितावुक्तप्रत्यक्षलक्षणस्य नातिव्याप्तिस्तथापि सुखादिज्ञानेऽव्याप्तिरस्त्येवेति नेदं लक्षणं सम्यगिति भावः ॥

शि॰म॰—किंच न विषयत्वं साक्षात्कारकारणतावच्छेदकं केवलविषयत्वस्यानुमेयसाधारणत्वात् । प्रत्यक्षज्ञानविषयत्वस्य तु तदपेक्षत्वेनानवच्छेदकत्वात् तत्तज्ज्ञानविषयत्वस्यच ज्ञानकालमात्रेवर्त्तमानस्य तत्तत्पूर्वभाविजनकतानवच्छेदकत्वात् । नच ज्ञातकरणाजन्यज्ञानत्वंज्ञानाजन्यज्ञानत्वंवा ज्ञानाकरणकज्ञानत्वंवा साक्षात्त्वम् । आद्यस्यस्मृतौ लिंगकरणत्वनिरासेनानुमिताद्यप्यतिव्याप्तेः । द्वितीयस्य विशेषणज्ञानकारणतावादिमते विशिष्टज्ञाने मतान्तरेप्रत्यक्षज्ञानमात्रस्यैवेश्वरज्ञानजन्यतया तत्राव्यापकत्वात् तृतीयलक्षणस्य पूर्वानुभूतेः संस्कारोपक्षीणत्वेन स्मृत्यकरणतया तत्रातिव्याप्तेः संस्कारद्वाराकरणत्वेतु प्रत्यभिज्ञायामव्याप्तेः । नच पूर्वानुभवस्य तत्तास्मरणोपक्षीणत्वेन तत्राहेतुत्वं विशेषणज्ञानकारणत्वानभ्युपगमेन तत्तास्मरणकल्पने मानाभावात् ॥

म॰ प्र॰—इदानीं विषयत्वस्य साक्षात्कारकारणतावच्छेदकत्वासंभवमभिप्रेत्याह (किंचेति) । (नविषयत्वमिति) साक्षात्काररूपंयत्कार्य्यं तन्निष्ठकार्य्यतानिरूपिताविषयनिष्ठायाकारणता तदवच्छेदकं विषयत्वं नेत्यर्थः । यत्रविषयत्वंतत्रप्रत्यक्षज्ञानजनकत्वमितीयंव्याप्तिर्नयुक्ताविषयत्वस्यानुमेयवह्न्यादौसत्त्वेप्यनुमेयवह्न्यादेःस्वविषयकप्रत्यक्षज्ञानाजनकत्वादित्यभिप्रेत्य नेतिप्रतिज्ञायांहेतुमाह (केवलेति) ननु केवलविषयत्वस्य प्रत्यक्षकारणतावच्छेदकत्वासंभवेपि प्रत्यक्षज्ञानविषयत्वं प्रत्यक्षज्ञाननिष्ठकार्य्यतानिरूपितविषयनिष्ठकारणतावच्छेदकमस्त्वित्याशंक्य नेति पूर्वोक्तप्रतिज्ञायामेवहेतुमाह (प्रत्यक्षज्ञानविषयत्वस्येति) । (तदपेक्षत्वेनेति) प्रत्यक्षज्ञानापेक्षत्वेनेत्यर्थः । कार्य्योत्तरभाविधर्मस्य पूर्वभाविजनकतावच्छेदकताया अदृष्टत्वात्प्रत्यक्षज्ञानविषयत्वस्य प्रत्यक्षज्ञानोत्तरभावित्वेन प्रत्यक्षज्ञानपूर्वभाविजनकतावच्छेदकत्वं न संभवतीति भावः । नन्वेवमपि घटनिष्ठमयंघट इति ज्ञानविषयत्वं प्रत्यक्षघटज्ञाननिष्ठकार्य्यतानिरूपितघटनिष्ठकारणतावच्छेदकं पटनिष्ठमयं पट इतिज्ञानविषयत्वं प्रत्यक्षपटज्ञाननिष्ठकार्य्यतानिरूपितपटनिष्ठकारणतावच्छेदकमित्येवं तत्तज्ज्ञानविषयत्वमेव कारणतावच्छेदकमस्त्वित्याशंक्य पूर्वोक्तदोषस्यैव सत्त्वान्नैवमित्याह (तत्तदिति) ज्ञानकालमात्रे—घटादिबोधसमयेएव । वादिमते—नैयायिकादिमते । मतांतरे—विशेषणज्ञाननिष्ठकारणतानभ्युपगंतृमते । तत्र—जन्यज्ञाने (अव्यापकत्वादिति)

Funding by IKS-MoE

ईश्वरज्ञानेलक्षणसत्त्वेनाव्याप्तेरित्यर्थः । तत्र–स्मृतौ (पूर्वानुभवस्य तत्रास्मरणोपक्षीणत्वेनेति) पूर्वानुभवस्यतद्देशकालादिस्मरणोपक्षीणत्वेन । तत्र–प्रत्यभिज्ञायां, पूर्वानुभवस्यहेतुत्वंनास्तीत्यर्थः (मानाभावादिति) यदिविशिष्टबुद्धिंप्रतिविशेषणज्ञानस्य कारणत्वं स्यात्तदा पूर्वानुभवस्य संस्कारद्वारातत्तास्मरणोपक्षीणत्वेनाहेतुत्वमपि स्यान्नैवमस्त्यतः संस्कारद्वारा पूर्वानुभवस्य प्रत्यभिज्ञांप्रति हेतुत्वादव्याप्तिस्तदवस्थेतिभावः ॥

मू०–प्रत्यक्षप्रमात्वत्र चैतन्यमेव ॥

शि०म०–अनुमित्यादेस्सन्निहितांशे प्रत्यक्षत्वेन तत्राव्याप्तेः । नच साक्षात्त्वं जातिः सिद्धांते वृत्तीनां ज्ञानत्वाभावात् । ज्ञानस्वरूपस्य ब्रह्मण एकत्वेन तस्यैकव्यक्तिकत्वेन जातित्वायोगात् । निश्चयत्वादिना सांकर्य्यप्रसंगाच्च । नच निश्चयत्वं न जातिः, वैपरीत्यापत्तेः भूतत्वमूर्त्तत्ववदुभयस्याप्यजातित्वापत्तेः । ततश्च प्रत्यक्षप्रमाणं दुर्निरूपमित्याशंक्याह (प्रत्यक्षेति) अयमर्थः, ज्ञानत्वमेव ज्ञानस्य प्रत्यक्षलक्षणं ज्ञानंच ब्रह्मव 'सत्यंज्ञानम्' इत्यादिश्रुतेः । इदं च लक्षणं ज्ञानस्य प्रत्यक्षत्वव्यवहार प्रयोजकं तत्तद्विषयांशे ज्ञानस्य प्रत्यक्षत्वव्यवहारप्रयोजकं चानुपदमेव स्फुटीभविष्यति । चैतन्यरूपमेव ज्ञानमबाधितघटादि वृत्त्यवच्छिन्नं घटादिप्रमेत्युच्यते । अत एव विशिष्टं चैतन्यं प्राति चक्षुरादेःकरणत्वाच्चक्षुरादि भवति प्रत्यक्षप्रमाणमिति ॥

म० प्र०–(साक्षात्वंजातिरिति) तथाच प्रत्यक्षत्वविशिष्टप्रमाकरणं प्रत्यक्षप्रमाणमित्यर्थः । नन्वपरोक्षज्ञानवृत्तिजातिरूपं साक्षात्त्वं किंवृत्तिनिष्ठं ब्रह्मनिष्ठं वा नाद्य इत्यभिप्रेत्य हेतुमाह (सिद्धांतेइति) नद्वितीय इत्यभिप्रेत्यहेतुमाह (ज्ञानस्वरूपस्येति) तस्य–साक्षात्त्वस्य (सांकर्य्यप्रसंगाच्चेति) निश्चयत्वात्यन्ताभाववति संशये साक्षात्त्वमस्ति । साक्षात्त्वात्यन्ताभाववत्यनुमित्यादौ निश्चयत्वमस्ति । उभयंत्वयं घट इत्यादिज्ञानेषु वर्त्तते इति निश्चयत्वादिना सांकर्य्यप्रसंगाच्चेत्यर्थः । ननु संकररूपजातित्वबाधकेनैकधर्मनिष्ठजातित्वाभावबोधः क्रियते नतूभयधर्मनिष्ठजातित्वस्याभावबोधो जन्यते इत्यभिप्रायेणाशंक्य तान्निषेधयति (नचेति) । (उभयस्यापीति) अपिशब्दस्य निश्चयार्थकत्वेन साक्षात्त्वनिश्चयत्वरूपोभयधर्मस्यैव संकररूपदोषेणाजातित्वापादनान्नत्वेकधर्मस्य संकरेणाजातित्वापादानं क्रियते इत्येवकारार्थः । कुतः इति चेत्तत्राह (वैपरीत्यापत्तेरिति) निश्चयत्वस्य जातित्वे संकरो बाधको नतु साक्षात्त्वस्य जातित्वे संकरो बाधक इत्यत्र विनिगमनाविरहेण साक्षात्त्वस्यैव जातित्वापत्तेरित्यर्थः । यद्यपि कारणतावच्छेदकतया जातिसिद्धिस्वी-

कारेण क्रियात्वावच्छिन्नां क्रियां प्रति मूर्तत्वेन कारणत्वमिति कारणतावच्छेदकतया मूर्तत्वजातिः सिध्यतीति भूतत्वमूर्तत्ववदितिदृष्टांतानुपपत्तिस्तथाप्यसतिबाधके कारणतावच्छेदकादीनां जातित्वाभ्युपगमेन संकररूपबाधकवशादुभयं न जातिरिति कस्यचिन्मताभिप्रायेण दृष्टान्तोपपत्तिरितिभावः । (ज्ञानत्वमेवज्ञानस्येति) ज्ञाननिष्ठज्ञानत्वमेव प्रत्यक्षलक्षणं ज्ञाननिष्ठप्रत्यक्षत्वव्यवहारप्रयोजकं ज्ञाननिष्ठप्रत्यक्षत्वप्रयोजकं चेत्यर्थः । प्रयोजकं व्यापकम् । तत्तद्विषयांशे–घटपटादिरूपविषये, ज्ञानस्य–घटादिज्ञानस्य, अनुपदमेव–अग्रिमग्रंथेएव, अतएव–वृत्त्यवच्छिन्नचैतन्यस्य प्रमात्वादेव ॥

मू०–"यत्साक्षादपरोक्षात्" इतिश्रुतेः । अपरोक्षादित्यस्यापरोक्षमित्यर्थः । ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति । उच्यते । चैतन्यस्यानादित्वेपि तदभिव्यंजकान्तःकरणवृत्तिरिन्द्रियसन्निकर्षादिना जायते इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते ज्ञानावच्छेदकत्वाच्च वृत्तौ ज्ञानत्वोपचारः ॥

शि० म०–आत्मनः प्रत्यक्षत्वे प्रमाणमाह (यत्साक्षादिति) ब्रह्मणः प्रमाणव्यापारद्वारकं प्रत्यक्षत्वं व्यावर्त्तयितुं श्रुतौ साक्षादिति विशेषणम्, अपरोक्षप्रमाणांतरात्तस्योत्पत्तिज्ञप्त्योरभावादित्यत आह (अपरोक्षादित्यस्येति) चक्षुरादेः प्रमारूपं चैतन्यं प्रत्यक्षकरणत्वादप्रामाण्यं किंवाघटादिप्रमारूपंप्रति । नाद्यः चैतन्यस्यस्वप्रकाशत्वेन स्वात्मनिप्रमाणव्यापारानपेक्षतया तत्करणाभावस्येष्टत्वादित्याशयेन परिहरति (उच्यतेइति). द्वितीयंप्रत्याह (चैतन्यस्येति) चैतन्यस्यस्वरूपतोऽनादित्वेनेन्द्रियाजन्यत्वेपि वृत्तिविशिष्टचैतन्यमिन्द्रियजन्यं तदेवघटादिप्रत्यक्षप्रमेत्युच्यते इत्यन्वयः । अत एव तस्येन्द्रियजन्यत्वेहेतुमाह (तदभिव्यंजकेति) तत्प्रातिबिंबग्राहीत्यर्थः । ननु वृत्तौ ज्ञानव्यवहारदर्शनात्स्वरूपेणेन्द्रियजन्यत्वाच्च सैवप्रत्यक्षप्रमा नवृत्तिविशिष्टंचैतन्यमित्याशंक्य 'सत्यं ज्ञानम्' इत्यादिश्रुत्या तस्यैव मुख्यज्ञानत्वावगमात् । वृत्तेश्च जडान्तःकरणधर्मत्वेन जडत्वात् ज्ञानव्यवहारस्य च तत्र गौणत्वेनाप्युपपत्तिर्नसाज्ञानमित्याह (वृत्ताविति) उपचारेहेतुमाह (ज्ञानेति)

म० प्र०–प्रमाणव्यापारद्वारकं–विषयचक्षुरादिप्रमाणसन्निकर्षरूपव्यापारद्वारकं, अपरोक्षप्रमाणांतरात्–अपरोक्षमनोरूपप्रमाणांतरात्, तस्य–ब्रह्मणः, अभावादित्यस्याग्रे पंचम्यनुपपत्तिरितिशेषः । परममूले (यत्साक्षादिति) यत्परमात्मतत्त्वं

Funding by IKS-MoE

ब्रह्मबृहत्तमंसाक्षात् प्रमाणं विनैवापरोक्षादपरोक्षं, नतु घटादिवद्वृत्तिव्याप्यत्वेनेत्यर्थः । अत एव–अन्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य घटादिप्रत्यक्षप्रमारूपत्त्वादेव, तस्य–चैतन्यस्य, सैव–वृत्तिरेव, इत्याशंक्यनसाज्ञानमित्याहेत्यन्वयः । ज्ञानशब्दस्य प्रवृत्तिनिमित्तंयज्ज्ञानत्वं तस्याभावरूपंहेतुंवृत्तावभिप्रेत्यनसाज्ञानमितिप्रतिज्ञायां हेतुमाह (सत्यमित्यादिना) । (तस्यैवेति) चैतन्यस्यैवेत्यर्थः एवकारव्यावर्त्यंवृत्तिनिष्ठज्ञानत्वाभावेहेतुमाह (वृत्तेश्चेति) वृत्तेस्त्वित्यर्थः । नन्वेवं वृत्तौ ज्ञानव्यवहारः कथमित्यत आह (ज्ञानेति) तत्र–वृत्तौ, गौणत्वेनापि–ज्ञानावच्छेदकत्वेनापि, वृत्तौज्ञानपदस्यलाक्षणिकत्वेनापीतिवा । यद्वा ननु वृत्तौ ज्ञानव्यवहारसत्त्वान्नसाज्ञानमिति त्वयाकथमुच्यते इत्याशंक्योक्तप्रतिज्ञामुपपादयति (ज्ञानेति) ननु वृत्तौज्ञानव्यवहारोमुख्य एवं किंनस्यादित्याशंक्य मैवमित्यभिप्रेत्यहेतुमाह) वृत्तेश्चेति नन्वेवं क्वापिज्ञानव्यवहारो मुख्यो न स्यादित्याशंक्य मैवमित्यभिप्रेत्यहेतुमाह (तस्यैवेति) ननु ब्रह्मणो मुख्यज्ञानत्वे प्रमाणाभाव इत्याशंक्य ब्रह्मणोज्ञानत्वसत्त्वेप्रमाणमाह सत्यमिति ॥

मू०–तदुक्तं विवरणे–अन्तःकरणवृत्तौ ज्ञानत्वोपचारादिति ननुनिरवयवस्यान्तःकरणस्य परिणामात्मिका वृत्तिः कथम् । इत्थम्–नतावदन्तःकरणं निरवयवं सादिद्रव्यत्वेन सावयवत्वात् । सादित्वंच "तन्मनोऽसृजत" इत्यादिश्रुतेः ॥

शि० म०–नचायमपसिद्धान्त इत्याह (तदुक्तमिति) नन्वात्मभिन्नमेव ज्ञानं तच्चेन्द्रियजन्यत्वात्प्रत्यक्षं नान्तःकरणवृत्तिविशिष्टं चैतन्यं अन्तःकरणपरिणामात्मिकायावृत्तेरेवानुपपत्तेः । तथाहिअन्तःकरणं न परिणामि निरवयवत्वादाकाशवत् निरवयवत्वंच । सुखाद्युपलब्धिः करणजन्या इन्द्रियजन्यावा कार्य्यत्वात् प्रत्यक्षज्ञानत्वाद्वा घटतज्ज्ञानवदिति धर्मिग्राहकानुमानाल्लाघवानुगृहीतात्सिध्यतीति । नहेत्वसिद्धिरितिनैयायिकःशंकते (नन्विति) कथमित्याक्षेपः । अन्तःकरणं परिणामि सावयवत्वान्मृद्वदित्यनुमानेन बाधादपरिणामित्वानुमानं न युक्तमित्याह (इत्थमिति) ननु धर्मिग्राहकानुमानान्मनसोनिरवयवत्वसिद्धेरासिद्धिरित्याशंक्याह (नतावदिति) अयमाशयः–नतावदुक्तानुमानात्तत्सिद्धिः शरीरप्राणसंयोगादिद्वारा तत्करणशरीरादिकमादायार्थान्तरात् । नापि द्वितीयानुमानादिन्द्रियत्वेन तत्सिद्धिः मनस इन्द्रियत्वस्य निराकरिष्यमाणत्वात । किंच नान्तःकरणं निरवयवं सादि-

द्रव्यत्वाद् घटवदित्यनुमानान्निरवयवत्वासिद्धिरित्याह (सादिद्रव्यत्वेनेति) रूपादौव्यभिचारवारणाय द्रव्यपदंगगनादौतद्वारणाय सादीति तवमतेप्यनुमानस्यैव मनसि प्रमाणत्वेनानुसरणीयतया तेनचलाघवादनादित्वेनैवसिद्धेर्विशेषणासिद्धौ हेतुरित्याशंक्य मन्मते मनस्सिद्धौ तत्सादित्वेच श्रुतिरेवभगवती प्रमाणमित्याह (सादित्वंचेति) अवगम्यते इतिशेषः । तथाच "तद्ब्रह्ममनः असृजत" इतिश्रुतेरवगम्यत इतिजातम् ॥

म० प्र०–(लाघवानुगृहीतादिति) मनसः सावयवत्वस्वीकारे तस्यानंतावयवप्रागभावादिकल्पनेन गौरवं स्यादतो लाघवसहकृतानुमानादेव निरवयवत्वादिधर्मसिद्धिरित्यर्थः (नहेत्वसिद्धिरिति) निरवयवत्वरूपहेतोः पक्षावृत्तित्वरूपस्वरूपासिद्धिर्नास्तीत्यर्थः । धर्मिग्राहकानुमानात्–सुखाद्युपलब्धिः करणजन्या कार्यत्वात्पटादिवदित्यादिधर्मिग्राहकानुमानात् असिद्धिः–अन्तःकरणं परिणामिसावयवत्वादित्यनुमाने सावयवत्वरूपहेतोःपक्षावृत्तित्वरूपासिद्धिः, उक्तानुमानात्–लाघवानुगृहीतात्सुखाद्युपलब्धिः करणजन्याकार्य्यत्वात् घटवदित्युक्तानुमानात्, तत्सिद्धिः–धर्मिसिद्धिद्वारा निरवयवत्वसिद्धिः (तत्करणेति) सुखाद्युपलब्धिकरणेत्यर्थः । अर्थांतरात्–तवानभीष्टमनोऽतिरिक्तार्थसिद्धेः, द्वितीयानुमानात्-सुखाद्युपलब्धिरिन्द्रियजन्या प्रत्यक्षज्ञानत्वादितिद्वितीयानुमानात् । निरवयवत्वासिद्धिः–निरवयवत्वरूपहेतोरन्तःकरणरूपपक्षावृत्तित्वरूपस्वरूपासिद्धिः (तद्वारणायेति) व्यभिचारवारणायेत्यर्थः । नैयायिकमते व्यभिचारवारणमिदं स्वमतेगगनादेः सावयवत्वस्यांगीकृतत्वेन व्यभिचाराभावात् । नच यदिस्वमते आकाशस्य निरवयवत्वं नेष्टं चेत्तर्हि 'तस्मान्निरंशं सद्यथावियत्' इतिविद्यारण्योक्तिः कथंसंगच्छेतइतिवाच्यम्, तथापि परमताभिप्रायेणाकाशनिष्ठनिरवयवत्वबोधनादिति । तवमते–वेदांतिनस्तवसिद्धांते (तेनचेति) अव्ययानामनेकार्थत्वेनच शब्दस्यावधारणार्थकत्वेनोक्तानुमानेनैवेत्यर्थः।विशेषणासिद्धः-सादित्वरूपविशेषणासिद्धस्वरूपासिद्धः॥

मू०-वृत्तिरूपज्ञानस्य मनोधर्मत्वेच "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वम्मनएव" इतिश्रुतिर्मानम् । धीशब्देन वृत्तिरूपज्ञानाभिधानम् । अत एव कामादेरपि मनोधर्मत्वम् । ननु कामादेरन्तःकरणधर्मत्वेऽहमिच्छाम्यहंजानाम्यहंबिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते ॥

शि०म०-ननुनान्तःकरणस्य सावयवत्वेन परिणामित्वं अंत्यावयविनि घटादौ व्यभिचारात्। नचतद्भिन्नत्वविशेषितं तत्परिणामेहेतुः अन्तःकरणस्यांत्यावयविभिन्नत्वे प्रमाणाभावात्सादिद्रव्यत्वस्य घटादौव्यभिचारेण तत्राप्रमाणत्वादित्यस्वरसादाह (वृत्तिरूपज्ञानस्येति) धीशब्दस्य ज्ञानशब्दपर्य्यायत्वमजानानंप्रत्याह (धीशब्देनेति) ननु ज्ञानं नान्तःकरणोपादानकं मानसप्रत्यक्षत्वात् कामनादिवत्। नच श्रुतिविरोधः मनोजन्यपरतयापि तदुपपत्तेरित्याशंक्य मृद्घटइत्यादिवत् सामानाधिकरण्यश्रुतिरुपादानपरैवातएव दृष्टान्तः साध्यविकल इत्याह (अतएवेति) उक्तश्रुतेरेवेत्यर्थः। ननु न ज्ञानेच्छादेर्मनोधर्मत्वमहंजानाम्यहमिच्छामीत्यात्मधर्मत्वावगाहिप्रत्यक्षानुभवविरोधात् कामादिश्रुतिश्च लांगलं जीवनमितिवत् हेतावुपचरितार्थेत्याशंकते नन्विति ॥

म० प्र०-तद्भिन्नत्वविशेषितंतत्-अंत्यावयविभिन्नत्वविशेषणविशिष्टं सावयवत्वं, परिणामे-अन्तःकरणस्योपादानसमसत्ताकवृत्त्यात्मककार्य्यवत्त्वे । नन्वन्तःकरणमंत्यावयविभिन्नं सादिद्रव्यत्वात्कपालादिवदित्यनुमानादंत्यावयविभिन्नत्वासिद्धिरित्याशंक्याह (सादिद्रव्यत्वस्येति) तत्र-मनसोऽन्त्यावयविभिन्नत्वे । परममूले (कामइति) कामः-स्त्र्यादिविषयसंबंधाभिलाषः, संकल्पः-दुष्टेष्वपिविषयेष्वशोभनत्वादर्शनेन शोभनाध्यासः, विचिकित्सा-संशयज्ञानम् । श्रद्धा-अदृष्टार्थेषु कर्मसु देवतादिषु चास्तिक्यबुद्धिः, अश्रद्धा-उक्तेषुतद्विपरीतबुद्धिः, धृतिर्धारणं देहाद्यवसादेनसत्युत्तंभनं, अधृतिः-तद्विपर्ययः-ह्रीः-अकार्य्यप्रवृत्त्यारंभप्रतिबंधिका लोकलज्जा, धीः-घटाद्याकारावृत्तिः, भीः-भयमित्यर्थः । श्रुतिविरोधः-मनएवेतिश्रुतिविरोधः, (मनोजन्यपरतयापीति) मनएवेत्यस्याः श्रुतेर्मनो जन्यमेवेत्यर्थकतयापीत्यर्थः । सामानाधिकरण्यश्रुतिः-इत्येतत्सर्वंमन इतिसामानाधिकरण्यश्रुतिः, उपादानपरैव-मनसउपादानत्वाभिप्रायिका, अत एव-कामनादीनां मनउपादानकत्वादेव, दृष्टांतः-कामनादिवदितिदृष्टान्तः। नन्वेवं कामादिश्रुतेः कागतिरित्यत आह (कामादीति) हेतावुपचरितार्था निमित्तकारणरूपहेत्वभिन्नोयोऽमुख्यार्थस्तद्विषया । यद्वा कामादिश्रुतिर्हेतौनिंमित्तकारणेबोधजनिकासत्युपचरितार्थेतियोजना ॥

शि०म०-नचान्तःकरणधर्मस्य ज्ञानादेरात्मन्यध्यासः परस्परविरुद्धधर्मवदन्तःकरणात्मनोरैक्याध्यासाभावात्, धर्म्यैक्याध्यासस्य धर्माध्यासव्यापकत्वात् अहमित्यन्तःकरणाभेद आत्मन्यध्यस्यते इतिचेन्न जाड्यचैतन्यादिविरुद्धधर्मवत्त्वेन भेदावगमात् । भेदाग्रहस्याध्यासहेतुत्वात् । किंच नानवगतयोस्तयोर्भेदाग्रहः केवलभेदाग्रहेण सुषुप्तावध्या-

Funding by IKS-MoE

सादर्शनेन तस्याहेतुत्वात् नाप्यवगतयोरात्मान्तःकरणयोर्भेदाग्रहादध्यासः अनुमानेन 'तन्मनोसृजत' इत्यादिश्रुत्याच मनोऽवगमसमये तस्यात्मभिन्नत्वेनागवतेः । नच स्फटिकविवेकग्रहेपि लोहितः स्फटिक इतिलौहित्याध्यासदर्शनात्तद्वदन्तःकरणस्यैक्याध्यासाभावेप्यस्तुतद्धर्माध्यास इति वाच्यम् । तत्र कुसुमच्छायाग्रहणेन तद्धर्माध्यासोपपत्तेः धर्मिधर्म्यंतरप्रतिबिंबैक्याध्यासयोरन्यतरस्यैव धर्माध्यासव्यापकत्वात् ॥

म० प्र०—नन्वात्मान्तःकरणधर्मिणोरैक्याध्यासाभावेप्यन्तःकरणधर्मज्ञानादेरात्मन्यध्यासः स्यादित्यत आह (धर्म्यैक्येति) यत्र धर्माध्यासस्तत्रधर्म्यैक्याध्यास इति धर्म्यैक्याध्यासस्य धर्माध्यासव्यापकत्वादित्यर्थः । तथाचात्मनि व्यापकधर्म्यैक्याध्यासाभावेन तद्व्याप्यधर्माध्यासाभाव इतिभावः । अध्यस्यते—ज्ञायते । नन्वात्मान्तःकरणयोर्भेदावगमेपि तयोरैक्याध्यासः स्यादित्यत आह (भेदाग्रहस्येति) अनवगतयोरात्मान्तःकरणयोर्भेदाग्रहोऽध्यासहेतुरुतावगतात्मन्तःकरणयोर्भेदाग्रहोध्यासहेतुः नाद्य इत्याह (नानवगतयोरिति) केवलभेदाग्रहेण केवलोऽज्ञातधर्मिप्रतियोगिको योभेदस्तस्याज्ञानेन तस्य—अज्ञातधर्मिप्रतियोगिकभेदाग्रहस्य न द्वितीय इत्याह (नाप्यवगतयोरिति) अध्यासः—अन्तःकरणधर्मज्ञानादीनामात्मन्यारोपः (अनुमानेनेति) सुखाद्युपलब्धिः करणजन्या कार्य्यत्वात् घटज्ञानादिवदित्यनुमानेनेत्यर्थः, । तत्—ब्रह्म संकल्पादिकार्यक्षममितिवा । अस्मिन्पक्षे तदिति मनोविशेषणं मनःसर्जनकर्तुर्ब्रह्मणोऽध्याहारश्चेति बोध्यम् । तस्य—अन्तःकरणस्य, स्फटिकविवेकग्रहेपि—स्फटिकानुयोगिकजपाकुसमप्रतियोगिको यो विवेको भेदस्तस्य ज्ञानेपि । तद्वदन्तःकरणस्य—आत्मसंबद्धान्तःकरणस्य । यद्वातद्वदित्यस्य स्फटिकेलौहित्याध्यासवदित्यर्थः । अस्मिन्पक्षे दृष्टांतोपपादनार्थं स्फटिकविवेकग्रहेपीत्यादि पंचम्यंतमिति । तत्र कुसुमच्छायग्रहणेन—स्फटिके कुसुमप्रतिबिंबग्रहणेन, तद्धर्माध्यासोपपत्तेः—कुसुमधर्मलौहित्याध्यासोपपत्तेः । ननु धर्माध्यासव्यापकस्य धर्म्यैक्याध्यासस्याभावात्कथंस्फटिके कुसुमधर्मलौहित्यादिज्ञानोपपत्तिरित्याशंक्योपपत्तिमेव हेतुनोपपादयति (धर्मिधर्म्यंतरप्रतिबिंबैक्याध्यासयोरिति) धर्मिणोर्द्वयोर्यऐक्याध्यासो धर्म्यन्तरप्रतिबिंबस्य धर्मिणा सह यऐक्याध्यासश्च तयोरित्यर्थः ॥

मू०—उच्यते ॥

शि० म०—नचात्मा मनः प्रतिबिंबग्राही नीरूपत्वात्, किंच नाहमित्यध्यास इदं रजतमितिवत् द्वैरूप्यावभासाभावात्, तस्माद्ध्यासव्यापकाभावादात्मान्तःकरणयोर्नतादात्म्याध्यासः ततश्च सुतरांनतद्धर्माध्यास इति परिहरति (उच्यतइति) अयंभावः—नतावद्विवेकग्रहा-

Funding by IKS-MoE

द्ध्यासाभावः आत्मान्तःकरणयोरागमानुमानादिना परोक्षविवेकग्रहेप्यपरोक्षविवेकग्रहाभावात् । नापिद्वैरूप्यावभासाभावः अयःपिण्डे अयोवह्निरितिद्वैरूप्यावभासाभावेपि अयो दहतीति द्वैरूप्यावभासवदयमात्माहंमन इतिद्वैरूप्यानवभासेप्यहमुपलभे दुःखीत्युपलब्धृत्वदुःखित्वादिरूपेणात्मान्तःकरणयोर्द्वैरूप्यावभासदर्शनादिति ॥

म० प्र०—ननु यथास्फटिकः कुसुमप्रतिबिंबग्राही तथात्मापि मनः प्रतिबिंबग्राह्यस्तु तथाचात्मनि मनःप्रतिबिंबैक्याध्याससत्त्वेन धर्माध्यासव्यापकप्रतिबिंबैक्याध्याससत्त्वाद्दात्मनिज्ञानादिमनोधर्माध्यासोपपत्तिरित्यभिप्रायेणाशंक्य निराकरोति (नचेति) । (नाहमित्यध्यासइति) अहमित्यध्यासोनेत्यन्वयः । द्वैरूप्यावभासस्य धर्म्यध्यासव्यापकत्वमभिप्रेत्याहमित्यध्यासो नेति प्रतिज्ञायां हेतुमाह(इदमिति) तस्मात्—द्वैरूप्यावभासाभावात्, ततश्च—द्विविधधर्माध्यासव्यापकाभावादेव, इति—इत्याशंक्य, विवेकग्रहात्—आत्मान्तःकरणयोर्भेदज्ञानात्, विवेकग्रहेपि—भेदज्ञानेपि, (अयःपिंडेइति) यथायस्यायोवह्निरित्यकारकस्य वह्नित्वप्रकारकस्य वह्निप्रकारकस्य वाभानस्याभावेप्ययोदहतीत्यारकमयसोऽयस्त्वेन भानं वह्नेर्दहनक्रियाकर्तृत्वेनभानमभ्युपेयते तथाऽयमात्माऽतिसन्निहितात्मस्वरूपोहं मनो भवामीत्याकारकानुभवस्य मनस्त्वप्रकारकस्य मनःप्रकारकस्य वाऽभावेप्यहमुपलभे दुःखी उपलंभाश्रयोहं दुःखविशिष्ट इत्याकारकमात्मन उपलंभाश्रयत्वेनान्तःकरणस्य दुःखित्वेन भानं भवत्येवेत्यर्थः । अतएवशारीरकप्रथमसूत्रभाष्यस्य रत्नप्रभाख्यायांटीकायां कार्य्याध्यासेष्वहमितिप्रथमाध्यासः । नच द्वैरूप्यावभासाभावादहमितिनाध्यास इति वाच्यम् अयोदहतीतिवदहमुपलभ इतिदृग्दृश्यांशभानादित्युक्तम् । गुरुचरणास्तु यत्र पदद्वयोपस्थाप्यार्थयोरभेदव्यवहारस्तत्र पदद्वयोपस्थाप्यांशद्वयभानं, यत्रस्त्वेकपदोपस्थाप्यांशद्वयव्यवहारस्तत्रैकपदोपस्थाप्यांशद्वयभानमिति नियमसत्वेनाहमित्यत्राप्यन्तःकरणरूपारोपितांशस्य सद्रूपाधिष्ठानांशस्य च भानं संभवतीत्याहुः ॥

मू०—अयःपिंडस्यदग्धृत्वाभावेपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासाद्यथायोदहतीतिव्यवहारस्तथा सुखाद्याकारपरिणाम्यन्तःकरणैक्याध्यासादहंसुखी अहंदुःखीत्यादिव्यवहारो जायते ॥

शि० म०—नन्वेवमप्यहं मन इत्यभेदव्यवहाराभावान्नतादात्म्याध्यास इत्याशंक्याहं दुःखी सुखीत्यादिव्यवहारोप्ययोदहतीतिवत्तादात्म्यव्यवहारत्वात्तादात्म्याध्यासपूर्वक एव अन्यथा तादात्म्यव्यवहारानुपपत्तेरित्याह (अयःपिंडस्येति) नन्वयःपिंडव्यतिरेकेण वह्नेर्दहनक्रियाश्रयत्ववन्मनसआत्मव्यतिरेकेण दुःखाद्याश्रयत्वादर्शनान्नाध्या-

सावकाश इतिचेत्, न, श्रुतिस्मृतिन्यायैरात्मान्तःकरणयोर्भेदेन प्रसिद्धत्वात् । तथाहि आत्माज्ञानरूपः स्वयंप्रकाशः सर्वगतः "अत्रायं पुरुषः स्वयंज्योतिराकाशवत्सर्वगतश्च नित्यः "इत्यादि श्रुतिसिद्धः अहंकारभिन्नश्च सएवाधस्तात्स उपरिष्टादितिभूमाख्यब्रह्मणस्सर्वात्मत्वमभिधायाऽथातोऽहंकारादेशइति अहंकारस्यापि सार्वात्म्यमुक्त्वा अथातआत्मादेश इत्यात्मनोऽहंकाराद्भेदेन निर्देशादहंकारस्तु जडाऽविद्योपादानत्वाज्जडः परप्रकाश्यः मध्यमपरिमाणः ॥

म० प्र० –एवमपि–आत्मान्तःकरणयोरहमुपलभे दुःखीत्युपलब्धृत्वदुःखित्वादिरूपेणद्वैरूप्यावभासदर्शनेपि, नतादात्म्याध्यासः–आत्मान्तःकरणयोरैक्याध्यासो न, अन्यथा–आत्मान्तःकरणयोरभेदाध्यासानंगीकारे, तादात्म्यव्यवहारानुपपत्तेः–अहंसुखीदुःखीत्याद्यैक्यविषयकशब्दात्मकव्यवहारासिद्धेः, अयःपिण्डव्यतिरेकेणवह्नेः–महानसादावयःपिण्डतादात्म्याभावविशिष्टवह्नेः, मनस आत्मव्यतिरेकेण–आत्मप्रतियोगिकभेदविशिष्टस्य मनस आत्मतादात्म्याभावविशिष्टमनस इतियावत् । आत्मनोज्ञानादिरूपत्वे श्रुतिरूपं प्रमाणमाह (अत्रेति) स्वप्नावस्थायामित्यर्थः । अहंकारभिन्नश्च–अहंकारप्रतियोगिकभेदाश्रयश्चात्मा, (सएवेति) भूमैवेत्यर्थः । "सएवाधस्तात्सउपरिष्टात्सपश्चात्सपुरस्तात्स दक्षिणतः सउत्तरतः सएवेदंसर्वम्" इति भूमवाक्यं भूमव्यतिरिक्तं किमपि वस्तुनास्तीतिप्रतिपादयद्यदिवा नमहिम्नीतिपूर्वप्रतिज्ञातार्थे हेतुत्वेनोक्तम् । यत्रनान्यत्पश्यतीत्यधिकरणाधिकर्तव्यनिर्देशात्सएवेति परोक्षनिर्देशाच्च द्रष्टुर्जीवादन्यो भूमेतिशंकावारणाय भूमानमेवाहमात्मना निर्दिशति (अथातइति) अथात इत्यव्ययसमुदायस्यानन्तर्यमर्थः । तथाच भूम्नोनिर्देशानंतरमहंकारादेशः । भूमैवाहमित्येवमाकारेणादिश्यते इत्यहंकारादेश इत्यर्थः । अहंकारस्यापि–अहंप्रत्ययविषयस्य जीवस्यापि, अविवेकिभिर्देहाहंकारादिसंघातोप्यहमिति–निर्दिश्यतेऽतस्तस्यात्मत्वशंकावारयितुमाह (अथातइति) भूम्नोहंप्रत्ययविषयस्वरूपेणनिर्देशानंतरम् । आत्मादेशः–आत्मनैवकेवलेन सत्स्वरूपेण शुद्धेनादिश्यते इत्यात्मादेश इत्ययमर्थो भाष्यकारादिमार्गेण । मूलकारेण तु अथातोहंकारादेश इत्यादिवाक्यमहंकाररूपमनःपरम् । तस्य सर्वरूपत्वकथनमुपासनार्थमित्यभिप्रायेणाथातोहंकारादेश इतिवाक्यमुक्तमित्यर्थः ॥

मू०–नन्वन्तःकरणस्येन्द्रियतयातीन्द्रियत्वात्कथं प्रत्यक्षविषयतेति ॥

शि०म०–"बुद्धेर्गुणेनात्मगुणेनचैव ह्याराग्रमात्रोह्यवरोपि दृष्टः" इतिश्रुतेः । तथा क्रियाश्रयो विद्यानिवर्त्यश्च विज्ञानं यज्ञं तनुते सुधीः स्वप्नोभूत्वेमं लोकमनुसंचरति ॥

यदा पश्चैव लीयन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च नेङ्गते तत्र परमात्मानमश्नुते ॥ १ ॥
भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ।
क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ २ ॥

इत्यादिवचनसिद्धः, तथाहङ्कारोहमिति व्यावृत्तः, आत्माच सन्निति सर्वविषयानुवृत्तः तथाचात्माहंकाराद्भिद्यते अनुवृत्तत्वात्, यदनुवृत्तं तद्व्यावृत्ताद्भिन्नं यथा कुसुमेभ्यःसूत्रमिति, ततश्च श्रुतिस्मृतिन्यायसिद्धोयमात्माहंकारयोर्भेदः । नन्वेवमपि नाहंकारमिश्रस्यात्मनः अहंप्रत्ययविषयत्वं तस्येन्द्रियत्वेनातीन्द्रियत्वादिति चोदयति (नन्विति) ॥

म० प्र०–बुद्ध्यपरपर्यायाहंकारस्य मध्यमपरिमाणकत्वे हेतुमाह (बुद्धेर्गुणेनेति) सूक्ष्मत्वादिरूपेण बुद्धिधर्मेण अराग्रमात्रः–सूक्ष्मः, दृष्टः–ज्ञातः, आत्मगुणेन–स्वरूपभूतगुणेन, शुद्धत्वविभुत्वादिरूपेण, अवरो–नवरः श्रेष्ठो यस्मात्सतथा दृष्ट इत्यर्थः । क्रियाश्रयोविद्यानिवर्त्यश्चेत्यस्येत्यादिवचनसिद्ध इत्यनेनान्वयः । वचनान्येवाह (विज्ञानमित्यादिना) विज्ञानं–बुद्ध्यात्मकाहंकारः, यज्ञं–वैदिकंकर्म, तनुते–करोति, सधीः–धियाविशिष्टः, स्वप्नोभूत्वा–स्वप्नाकारेणपरिणतधियोवभासकत्वेन स्वप्नाकारोभूत्वाइमं लोकंजागरितलक्षणं कार्य्यकरणसंघातमकं, अनुसंचरति–प्राप्नोति । यदा–यस्मिन्विद्याकाले, ज्ञानानि–ज्ञानसाधनानीन्द्रियाणि, नेंगते–नचेष्टते, लीयते इतियावत् । तत्र–तस्मिन् ज्ञानकाले (भिद्यतेइति) तस्मिन्परब्रह्मणि । कथंभूते परब्रह्मणि परावरे, परं–कारणंच तच्चावरं–कार्यंतत्परावरम् । यद्वा परे–हिरण्यगर्भादयोऽवरा–निकृष्टायस्मात्तत्परावरं . तस्मिन्, दृष्टे–साक्षात्कृते सति, हृदयग्रंथिः–अविद्याहंकारोवा, भिद्यते–नश्यति । सर्वसंशयाः–प्रमाणप्रमेयगोचरानिखिलसंशयाः, छिद्यंते–नश्यंति । अस्य–विदुषः, कर्माणि–प्रारब्धव्यतिरिक्तकर्माणि, क्षीयंते नश्यंतीत्यर्थः । अहमितिव्यावृत्तः–अहमितिवृत्तिप्रतिबिंबितचिद्विषयत्वात्परिच्छिन्नस्वरूपः, सन्नितिसर्वविषयानुवृत्तः–घटः सन् पटः सन्नित्यादिप्रत्ययविषयसर्वविषयसंबद्धस्वरूपः । एवमपि–आत्माहंकारयोर्भेदेपि, अहंकारमिश्रस्य–अहंकारविशिष्टस्य, अहंकारविशिष्टस्यात्मनोऽपरोक्षाहंप्रत्ययविषयत्वेविशिष्टवृत्तिधर्मस्य विशेषणवृत्तित्वनियम इतिन्यायेनाहंकारस्यापि प्रत्यक्षत्वं वक्तुं त्वया नहि शक्यते इत्याशयेन हेतुमाह (तस्येति) अहंकारस्येत्यर्थः ॥

मू०–उच्यते । नतावदन्तःकरणमिन्द्रियमित्यत्र मानमस्ति । मनःषष्ठानीन्द्रियाणीति भगवद्गीतावचनं प्रमाणमितिचेत्, न, अनिन्द्रियेणापि मनसा षट्त्वसंख्यापूरणाविरोधात् ॥

शि०म०-इन्द्रियत्वे प्रमाणाभावेनातीन्द्रियत्वासिद्धेः प्रत्यक्षोहंकार इत्याह (उच्यते इतिं) अस्तीन्द्रियत्वे प्रमाणमिति चेत्किं मनस इन्द्रियत्वे श्रुतिः प्रमाणम्, उत स्मृतिः, अनुमानंवा। नाद्यः तथाविधश्रुतेरनुपलंभादित्याह (नतावदिति) द्वितीयपक्षमुत्थापयति (मनःषष्ठानीति) उक्तस्मृतेर्मनस इन्द्रियगतषट्त्वसंख्यापूरकत्वे प्रमाणत्वान्नसातदिन्द्रियत्वे प्रमाणमित्याह (नेति) ननु इन्द्रियसंख्यापूरणेन मनसोपीन्द्रियत्वमनुमीयते इति तृतीयं पक्षमाशंक्याप्रयोजकत्वादनुमानं नयुक्तमित्याह (अनिंद्रियेणेति) ॥

म० प्र०-(इन्द्रियत्वे प्रमाणाभावेनेति) मनस इन्द्रियत्वे प्रमाणाभावेनेत्यर्थः । नचेंद्रियाणां मनश्चास्मीति वाक्यं मनसइंद्रियत्वे प्रमाणं स्यादिति वाच्यम् । 'नक्षत्राणामहंशशी' इति वाक्यस्य शशिनो नक्षत्रतायामप्रामाण्यवत् 'इन्द्रियाणां मनश्चास्मि' इतिवाक्यस्यापि मनस इंद्रियत्वेऽप्रमाणत्वादितिभावः । तथाविधश्रुतेः-मनस इंद्रियत्वबोधकश्रुतेः । द्वितीयपक्षं-मनस इंद्रियत्वे स्मृतिः प्रमाणमित्याकारकपक्षम् । उक्तस्मृतेः-मनःषष्ठानीन्द्रियाणीतिस्मृतेः । सा-मनःषष्ठानीन्द्रियाणीतिस्मृतिः, तदिंद्रियत्वे-मनस इंद्रियत्वे, इंद्रियसंख्यापूरणेन-मनस इंद्रियनिष्ठषट्त्वसंख्यापूरकत्वेन, अनुमीयते-मनइंद्रियमिन्द्रियगतषट्त्वसंख्यापूरकत्वादित्यनुमीयते (अप्रयोजकत्वादिति) पक्षे साध्याभावेपि हेतुमत्त्वे बाधकतर्कासत्त्वादिन्द्रियगतषट्संख्यापूरकत्वरूपहेतोरिंद्रियत्वरूपसाध्यनिरूपितव्याप्तिशून्यत्वादितियावत् । नच यदिमनसइंद्रियत्वं नस्यात्तर्हि मनसइंद्रियगतषट्त्वसंख्यापूरकत्वमपि नस्यादिति विपक्षबाधकतर्कसत्त्वेन कथंविपक्षबाधकतर्कासत्त्वमितिवाच्यम् । मनसीन्द्रियत्वाभावेपि मनसइंद्रियनिष्ठषट्त्वसंख्यापूरकत्वाभ्युपगमेन यत्रेन्द्रियत्वाभावस्तत्रेन्द्रियगतषट्त्वसंख्यापूरकत्वाभाव इतिव्याप्त्यसिद्ध्योर्विपक्षबाधकतर्कानुदयादित्यर्थः ॥

मू०-नहीन्द्रियगतसंख्यापूरणमिन्द्रियेणैवेति नियमः। "यजमानपंचमा इडांभक्षयन्ति" इत्यत्र ऋत्विग्गतपंचत्वसंख्याया अनृत्विजापि यजमानेन पूरणदर्शनात् ॥

शि०म०-किंच मनः इंद्रियं इंद्रियगतषट्त्वसंख्यापूरकत्वादित्यनुमाने विशेषव्याप्तिर्मूलमुत सामान्यव्याप्तिर्वा, नाद्यः दृष्टांताभावादित्याह (नहीति) ननु यद्यद्गतसंख्यापूरकं तत्तज्जातीयं यथापशौ प्रतिप्रस्थातृषष्ठा ऋत्विज इत्यत्र ऋत्विग्गतसंख्यापूरकः प्रतिप्रस्थाता ऋत्विग्जातीय इति सामान्यव्याप्तिपक्षमाशंक्य निराकरोति (यजमानेति) । अनृत्विजा-

पीति) ननु यजमानस्य ब्राह्मणत्वेन ऋत्विक्साजात्यमस्तीति न व्यभिचार इतिचेत, न, यद्यत्पदावगतयद्गतसंख्यापूरकं तत्तत्पदार्थतावच्छेदकेन रूपेण तज्जातीयमिति व्याप्तेर्विवक्षितत्वात् ॥

म० प्र०-अनुमाने-अनुमानरूपवाक्येऽनुमितौ वा, विशेषव्याप्तिः-यत्रेन्द्रियनिष्ठषट्त्वसंख्यापूरकत्वं तत्रेन्द्रियत्वमितिविशेषव्याप्तिः, (दृष्टान्ताभावादिति) पक्षीभूतमनस एवेन्द्रियनिष्ठषट्त्वसंख्यापूरकत्वेन दृष्टांताभावादित्यर्थः । नच चक्षुरादिर्दृष्टांतोस्त्विवतिवाच्यम्, चक्षुःषष्ठानीन्द्रियाणीत्यादि प्रमाणभूतवचनाभावेन चक्षुरादेरदृष्टान्तत्वात् । नच मन इंद्रियमिंद्रियनिष्ठषट्त्वसंख्यापूरकत्वाद्यन्नैवं तन्नैवमात्मवदिति व्यतिरेकिदृष्टांतोस्त्वितिवाच्यम्, व्यतिरेकव्याप्तेः साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगादिति परममूलवाक्येन खंडितत्वादिति । (यद्यद्गतेति) यत्-यादृशंवस्तु, यद्गतसंख्यापूरकं-यादृशवस्तुनिष्ठसंख्यापूरकं, तत्-तादृशंवस्तु, तज्जातीयम्-तादृशवस्तुनिष्ठधर्मवत्, पशौ-पशुयागे, प्रतिप्रस्थातृषष्ठाः-प्रतिप्रस्थाता प्रतिप्रस्थातृसंज्ञकः ऋत्विक् षष्ठः-षट्त्वसंख्यापूरको येषु ऋत्विक्पदवाच्येषु ते तथेत्यर्थः । नव्यभिचारः-यजमाने व्यभिचाराभावः (यद्यत्पदावगतयद्गतेति) यत्प्रकृतेप्रतिप्रस्थातृसंज्ञकं वस्तु, यत्पदावगतयद्गतसंख्यापूरकम्-ऋक्पदावगतऋत्विग्निष्ठसंख्यापूरकं, तत्-प्रतिप्रस्थातृसंज्ञकंवस्तु, तत्पदार्थतावच्छेदकेन-ऋत्विक्पदार्थतावच्छेदकेन रूपेण, ऋत्विक्त्वधर्मेण तज्जातीयम्-ऋत्विक्सजातीयमित्यर्थः ॥

मू०-'वेदानध्यापयामास महाभारतपंचमान्' इत्यादौवेदगतपंचत्वसंख्याया अवेदेनापि भारतेन पूरणदर्शनात्। 'इंद्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः' ॥

शि०म०-ब्राह्मणत्वस्य चापदार्थतावच्छेदकत्वात् । नचात्रऋत्विक्पदाश्रवणाद्ब्राह्मणपदाध्याहारेणाप्यन्वयसंभवात् ब्राह्मणत्वं पदार्थतावच्छेदकमिति वाच्यम् । चत्वार ऋत्विज इत्यृत्विक्पदस्य श्रुतत्वेन तस्यैवानुषंगाद्ब्राह्मणपदाध्याहारे नियमाभावाच्च। नन्वर्थाध्याहारवादिमते यजमानपंचमा इडांभक्षयंतीत्यत्र यजमानेहेतोरेवाभावान्नव्यभिचार इत्याशंक्याऽसंदिग्धव्यभिचारमाह (वेदानिति) नहि पौरुषेये पुराणत्वेन प्रसिद्धे भारते वेदत्वशंकापीति भावः । ननु मन इन्द्रियं तत्त्वेबाधकाभावाच्चक्षुर्वदित्यनुमानं मानमित्याशंक्यहेत्वासिद्ध्या दूषयति (इन्द्रियेभ्यइति) यद्यप्यर्थेभ्यः परं मन इत्यर्थाद्भिन्नं मनोवगतं तथापि चकारादिन्द्रियभेदसिद्धिः ॥

म० प्र०–ननु यद्यत्पदावगतयद्गतसंख्यापूरकं तत्तत्पदार्थतावच्छेदकरूपेण तज्जातीयमितिव्याप्तेर्विवक्षितत्वेपि यजमाने ब्राह्मणत्वेन ऋत्विक्साजात्याद्यजमानेव्यभिचाराभावोस्त्येवेत्यापातत आशंक्याह (ब्राह्मणत्वस्यचेति) अत्र चकारस्य पंचम्यंतेनान्वयः । तथाचप्रतिप्रस्थातरि मनुष्यत्वादिना ऋत्विक्साजात्यवारणाय यद्यद्गतसंख्यापूरकं तत्तज्जातीयमितिव्याप्तिस्थाने यद्यत्पदावगतयद्गतेत्यादिवाक्यबोधितव्याप्तेस्तवापि विवक्षितत्वेन यजमानपंचमा इडांभक्षयंतीत्यत्र यजमानस्य ऋत्विक्पदार्थतावच्छेदकऋत्विक्त्वाभावाद्यजमानेव्यभिचारस्तदवस्थ इतिभावः । अत्र–यजमानपंचमा इडांभक्षयंतीत्यस्मिन्वाक्ये, अन्वयसंभवात्–यजमानपंचमा इत्यस्य ब्राह्मणपदार्थेनान्वयसंभवात् । उक्तान्वयव्याप्तेः संभवादितिवा । यजमाने–तत्पदार्थतावच्छेदकधर्मेण तज्जातीयस्वरूपसाध्यशून्येयजमाने, हेतोरेव–यत्पदावगतयद्गतसंख्यापूरकत्वरूपहेतोरेव । परममूले (पूरणदर्शनादिति) यद्यत्पदावगतयद्गतेत्यादिव्याप्तेर्विवक्षितत्वेन न मनस इन्द्रियत्वसिद्धिरितिभावः । (पुराणत्वेन प्रसिद्धे इति) यद्यपि लोकेभारतस्येतिहासत्वेन प्रसिद्धिर्नपुराणेन तथापि ॥

सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच ॥
वंश्यानुचरितं चैव पुराणं पंचलक्षणम् ॥

इतिपुराणलक्षणस्य भारते सत्त्वाद्भारतस्य पुराणत्वेनापि प्रसिद्धिरितिभावः । यस्य यद्रूपत्वे वाधकाभावस्तस्य तद्रूपत्वमिति व्याप्तिमभिप्रेत्यहेतुमाह (तत्त्वेवाधकाभावादिति) मनस इन्द्रियत्वेवाधकाभावादित्यर्थः । मानम्–मनसइन्द्रियत्वे प्रमाणं, हेत्वसिद्ध्या–तत्त्वेबाधकाभावादितिहेतोः पक्षावृत्तित्वरूपस्वरूपासिद्ध्या, दूषयतीत्यतः पूर्वमनुमानमितिशेषः । अर्थात्–अर्थेभ्यः (मनोवगतमिति) अस्यार्थेनत्विन्द्रियेभ्यो भिन्नं मनोवगतमितिशेषः । चकारात्–अर्थेभ्यश्चेत्यत्रचकारात् (इन्द्रियभेदसिद्धिरिति) चकारस्येन्द्रियसमुच्चायकत्वेनार्थेन्द्रियेभ्योमनःपरं भिन्नमुत्कृष्टंचेत्यर्थकरणेन मनोनिष्ठेन्द्रियप्रतियोगिकभेदनिश्चय इत्यर्थः ॥

मू०–इत्यादि श्रुत्यामनसोऽनिन्द्रियत्वावगमाच्च । नचैवं मनसोऽनिन्द्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्कारत्वं न स्यादिन्द्रियाजन्यत्वादिति वाच्यम् । नहीन्द्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वमनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः । ईश्वरज्ञानस्यानिन्द्रियजन्यस्य साक्षात्त्वानापत्तेश्च ॥

Funding by IKS-MoE

शि० म०-"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिचं" इत्यादिश्रुतिरादिपदग्राह्या । चकारो भिन्नक्रमः सचश्रुत्येत्यनेन संबध्यते । तथाच श्रुत्या त्रिविधोऽयमहंकारोमहत्तत्वाद्धि जायते ॥

"इन्द्रियाणांततःसृष्टिर्गुणद्वारामहामुने" ॥

इत्यादिपुराणवचनैर्मनसोऽनिन्द्रियत्वावगमादित्यर्थः । ननु सुखाद्युपलब्धिरिन्द्रियजन्या प्रत्यक्षत्वाद्रूपादिप्रत्यक्षवदित्यनुमानं मनस इन्द्रियत्वे प्रमाणम्, अन्यथा सुखादिज्ञानस्य साक्षात्त्वं न स्यादित्याशंक्य निराकरोति (नचैवमिति) किमिन्द्रियजन्यत्वे प्रत्यक्षत्वमात्रं हेतुरुत प्रत्यक्षज्ञानत्वम्, आद्ये घटादौ व्यभिचार इत्यभिप्रेत्य द्वितीये हेतोरप्रयोजकत्वमाह (नहीति)। (अनुमित्यादेरिति) तवमतइति शेषः । नन्विन्द्रियत्वेन तज्जन्यत्वमेवसाक्षात्त्वप्रयोजकम् अनुमित्यादेश्च मनस्त्वेन तज्जन्यत्वान्नातिप्रसंग इत्यत आह (ईश्वरज्ञानस्येति)

म० प्र०-चकारः-अवगमाच्चेत्यत्रचकारः । भिन्नक्रमः-स्वस्थानभिन्नस्थानकः । सच-चकारश्च तथाचेत्यस्येत्यर्थ इत्यनेनान्वयः । गुणद्वारा त्रिविधः सत्त्वादिगुणैः सात्त्विकराजसतामसात्मकः । नच सांख्यशास्त्रे मनसइन्द्रियेषु परिगणनसत्त्वात्कथमेतद्वाक्यान्मनसोऽनिन्द्रियत्वसिद्धिरिति वाच्यम् । यस्य पुराणस्येदंवाक्यमस्ति तस्मिन्पुराणेऽहंकारपदेन मनसोग्रहणेनेन्द्रियेषु मनसोऽपरिगणनादिति । प्रत्यक्षत्वात्-अपरोक्षज्ञानत्वात् । अन्यथा-मनसइन्द्रियत्वानंगीकारे । परममूले (एवमिति) श्रुत्यादिभिरित्यर्थः । प्रत्यक्षत्वमात्रम्-अपरोक्षत्वमेव, हेतुः-ज्ञापकम् । (अप्रयोजकत्वमाहेति) ईश्वरज्ञानेइन्द्रियजन्यत्वाभावेपि प्रत्यक्षत्वस्य सत्त्वेन प्रत्यक्षत्वंनेन्द्रियजन्यत्वव्याप्यमित्यप्रयोजकत्वमभिप्रेत्याहेत्यर्थः । नच यदि सुखादिज्ञानस्येन्द्रियजन्यत्वं नस्यात्तर्हिसुखादिज्ञानस्यापरोक्षज्ञानत्वमपि न स्यादित्यनुकूलतर्कसत्त्वेन कथं हेतोरप्रयोजकत्वकथनमिति वाच्यम्,ईश्वरीयज्ञानस्येन्द्रियजन्यत्वाभावेप्यपरोक्षज्ञानत्वस्य सत्त्वेन व्यतिरेकव्याप्त्यासिद्ध्या तर्कानुदयादिति । परममूले (नहीति) हि यस्मादिन्द्रियजन्यत्वव्याप्यंज्ञानस्य प्रत्यक्षत्वं न भवति तस्मादिन्द्रियाजन्यत्वेन सुखादिज्ञानेऽप्रत्यक्षत्वं नापादनीयमित्यर्थः। यद्वा हि यस्मात्, ज्ञानस्येन्द्रियजन्यत्वाभिन्नं साक्षात्त्वं न भवति तस्मादिन्द्रियाजन्यत्वेन सुखादिज्ञानेऽप्रत्यक्षत्वं नापादनीयमित्यर्थः । इन्द्रियजन्यत्वस्यज्ञाननिष्ठप्रत्यक्षत्वव्यापकत्वे ज्ञानगतेन्द्रियजन्यत्वाभिन्नप्रत्यक्षत्वाभ्युपगमेवा किंबाधकमित्याशंक्य नेति प्रतिज्ञायां हेतुमाह परममूले (अनुमित्यादेरिति) इन्द्रियत्वेनतज्जन्यत्वम् इन्द्रियत्वावच्छिन्नेन्द्रियनिष्ठजनकतानिरूपितजन्यत्वम् । तज्जन्यत्वात्-मनोजन्यत्वात्, नातिप्रसंगः अनिष्टापादानं न संभवति ॥

मू०—सिद्धान्ते प्रत्यक्षत्वप्रयोजकं किमितिचेत् ॥

शि०म०—ननूक्तं ज्ञानस्य प्रत्यक्षलक्षणं ज्ञानत्वं न, प्रत्यक्षप्रमाणलक्षणोपयोगिचक्षुरादेश्चैतन्यरूपप्रत्यक्षप्रमाकरणत्वाभावात् । वृत्तिविशिष्टचैतन्यरूपप्रमाकरणत्वस्य प्रत्यक्षप्रमाणलक्षणत्वे सति व्याप्तिज्ञानादेरप्यबाधितवह्न्यादिवृत्तिविशिष्टचैतन्यरूपप्रमाकरणत्वेन प्रत्यक्षप्रमाणत्वापत्तेः । नचान्यज्ज्ञानस्य तत्तद्विषयांशे प्रत्यक्षत्वव्यवहारप्रयोजकमस्ति, इन्द्रियजन्यत्वादेस्त्वयैवनिराकृतत्वात् । विषयावच्छिन्नचैतन्याभिन्नत्वस्य च प्रत्यक्षविषयाव्यापकत्वेन प्रत्यक्षत्वमात्रप्रयोजकत्वाभावादित्याशयेनाक्षिपति (सिद्धांतइति) नतावज्ज्ञानगतं प्रत्यक्षलक्षणं विषयव्यावृत्तत्वान्नप्रत्यक्षत्वव्यवहारप्रयोजकमित्याक्षेपः; सर्वमतेप्युभयसाधारणस्य प्रत्यक्षलक्षणस्य वक्तुमशक्यत्वेन तद्व्यावृत्तेरदोषत्वात् ॥

म० प्र०—(ज्ञानस्येति) ज्ञाननिष्ठं ज्ञानत्वं चित्त्वं तदभिन्नं यत्प्रत्यक्षलक्षणमुक्तं तत्प्रत्यक्षप्रमाणलक्षणोपयोगि न भवति । यद्वा चेतनापरपर्यायज्ञानाभिन्नं यत्प्रत्यक्षं तस्य लक्षणमसाधारणोधर्मो ज्ञानत्वं चित्त्वमुक्तं तत्प्रत्यक्षप्रमाणलक्षणज्ञानोपयोगि न भवतीत्यर्थः । तस्य प्रत्यक्षप्रमाणलक्षणोपयोगित्वाभावेहेतुमाह (चक्षुरादेरिति) अन्यत्—चित्त्वादन्यत् (ज्ञानस्येति) ज्ञाननिष्ठस्तत्तद्विषयाभिन्नांशनिरूपितोयः प्रत्यक्षत्वप्रकारकव्यवहारस्तद्व्याप्यंतद्व्यापकंचेत्यर्थः । ननु प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वं प्रत्यक्षत्वस्यप्रत्यक्षत्वप्रकारकव्यवहारस्य च व्याप्यं व्यापकंचास्त्वित्याशंक्य मैवमित्यभिप्रेत्यहेतुमाह (विषयेति) इतः पूर्वं प्रमाणचैतन्यस्येतिशेषः । प्रत्यक्षविषयाव्यापकत्वेन—प्रत्यक्षोयोघटादिविषयस्वद्वृत्तित्वेन । (प्रत्यक्षत्वमात्रेति) ज्ञानघटादिविषयेतदुभयवृत्तिप्रत्यक्षत्वस्य प्रत्यक्षत्वप्रकारकव्यवहारत्वावच्छिन्ननिखिलव्यवहारस्य च प्रयोजकत्वाभावादित्यर्थः । आक्षिपति—पूर्वपक्षं करोति, प्रश्नं करोतीति यावत् । परममूले (प्रत्यक्षत्वप्रयोजकमिति) प्रत्यक्षत्वप्रत्यक्षत्वप्रकारकव्यवहारव्याप्यंतद्व्यापकंचेत्यर्थः । (नतावदिति) नतावदित्याक्षेप इत्यन्वयः । तथाच विषयव्यावृत्तत्वात्—चित्त्वस्य घटादिविषयेष्ववर्तमानत्वात्, चित्त्वरूपं ज्ञानगतं—ज्ञाननिष्ठं, यत्प्रत्यक्षलक्षणं तज्ज्ञानविषयगतप्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकं न भवतीत्याक्षेपः—प्रश्नस्तावन्न संभवतीत्यर्थः । उभयसाधारणस्यघटादिज्ञानतद्विषयोभयवर्त्तमानस्य, प्रत्यक्षलक्षणस्य—प्रत्यक्षत्वप्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकस्य—तद्व्यावृत्तेः—ज्ञानगतप्रत्यक्षलक्षणस्य प्रत्यक्षघटादिविषयेष्वसत्त्वस्य ॥

Funding by IKS-MoE

मू०–किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं पृच्छसि किंवा विषयगतस्य । आद्ये प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेद इति ब्रूमः । तथाहि त्रिविधं चैतन्यम्–विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यं चेति । तत्र घटाद्यवच्छिन्नचैतन्यं विषयचैतन्यम् ॥

शि०म०–आक्षेप्त्रा ज्ञानगतं विषयगतं वाऽनुमितितद्विषयादावतिव्याप्तत्वान्नप्रत्यक्षलक्षणमित्येवाक्षेप्तव्यं, यद्येवमाक्षिपसि तदा ज्ञानविषयगतयोः प्रत्यक्षलक्षणयोरनतिप्रसक्तयोर्निरुच्यमानत्वान्नायमाक्षेपो युक्त इत्याह (ज्ञानगतस्येत्यादिना । आद्येइति) ज्ञानगततत्तद्विषयप्रत्यक्षत्वप्रयोजकस्यैव प्रत्यक्षप्रमाणलक्षणोपयोगित्वेन प्रधानत्वाद्विषयप्रत्यक्षलक्षणस्य च विषये प्रत्यक्षत्वव्यवहारस्य प्रयोजकांतरेणैवोपपत्तेस्तस्यालक्ष्यत्वमित्येतल्लक्षणाव्याप्तिनिरासार्थत्वात्प्रथमं तन्निरूपणमिति ध्येयम् । नन्वद्वितीयचैतन्यस्य कुतः प्रमाणता कुतोवा प्रमाणस्य सतस्तस्य विषयचैतन्याभेद इत्याशंक्य प्रथमाद्वितीये ब्रह्मण्यौपाधिकं प्रमाणप्रमेयादिभेदमुपपादयति (तथाहीति)॥

म०प्र०–आक्षेप्त्रा–प्रश्नकर्त्रा । (ज्ञानगतमिति) ज्ञानगतंचित्त्वं नप्रत्यक्षलक्षणं–ज्ञाननिष्ठप्रत्यक्षत्वस्य ज्ञाननिष्ठप्रत्यक्षत्वप्रकारकव्यवहारस्य च व्याप्यं व्यापकंच न संभवतीत्यर्थः । (विषयगतंवेति) विषयनिष्ठंचैतन्याश्रितत्वं न प्रत्यक्षलक्षणं विषयनिष्ठप्रत्यक्षत्वविषयनिष्ठप्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकं न संभवतीत्यर्थः । इत्येवाक्षेप्तव्यमित्याकारकप्रश्नः कर्त्तव्यः । प्रत्यक्षलक्षणयोः–प्रत्यक्षत्वप्रयोजकयोः प्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकयोर्वा । ननु विषयगतप्रत्यक्षत्वस्य विषयनिष्ठप्रत्यक्षत्वप्रकारकव्यवहारस्य वा प्रयोजकं विहाय ज्ञानगतप्रत्यक्षत्वस्य ज्ञाननिष्ठप्रत्यक्षत्वप्रकारकव्यवहारस्य वा प्रयोजकस्यादौ निरूपणं कस्माद्धेतोर्मूलकृता कृतमित्याशंक्याह (ज्ञानगततत्तद्विषयप्रत्यक्षत्वप्रयोजकस्यैवेति) ज्ञानगतंयत्तद्विषयनिरूपितं प्रत्यक्षत्वं प्रत्यक्षप्रकारकव्यवहारोवा तस्ययत्प्रयोजकं प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वरूपं तस्यैवप्रधानत्वात्प्रथमं तन्निरूपणमित्यन्वयः । तस्य प्राधान्येहेतुमाह (प्रत्यक्षप्रमाणलक्षणोपयोगित्वेनेति) ज्ञानगततत्तद्विषयनिरूपितप्रत्यक्षत्वस्य प्राधान्ये एव हेत्वंतरंचाह (विषयप्रत्यक्षलक्षणस्य चेति) अत्र चकारः स्वस्थानभिन्नस्थानकः, सचनिरासार्थत्वादित्यनेन संबध्यते । तथाच एतल्लक्षणस्य प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्याकारस्य ज्ञानगतप्रत्यक्षत्वज्ञापकस्य या प्रत्यक्षघटा-

Funding by IKS-MoE

दिविषयेऽव्याप्तिस्तस्या इतिएवंप्रकारेण योनिरासस्तदर्थकत्वात्तच्छेषत्वाच्चविषयप्रत्यक्षलक्षणस्येत्यर्थः । इतिशब्दोक्तंनिरासप्रकारमेवाह (तस्येति) प्रत्यक्षघटादिविषयस्येत्यर्थः । तस्याऽलक्ष्यत्वेहेतुमाह (विषयेइति) प्रयोजकांतरेण–प्रमातृचैतन्याभिन्नत्वरूपेण विषयनिष्ठप्रत्यक्षत्वप्रत्यक्षत्वप्रकारकव्यवहारव्याप्येन तयोर्व्यापकेनच (कुतः प्रमाणतेति) प्रमाणत्वस्य वृत्तिंघटितत्वेनाद्वितीये ब्रह्मणि वृत्त्यभावेन तस्य प्रमाणत्वं नसंभवतीति भावः । प्रथमम्–आदौ ॥

मू०–अन्तःकरणवृत्त्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम् ।

अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् ॥

शि०म०–नन्वेकस्य क्रियाकर्मत्वविरोधात्कथं प्रमाणप्रमेयभाव इत्याशंक्य चैतन्यस्य कर्त्तृरूपान्तःकरणावच्छिन्नत्वेन प्रमातृत्ववत्तद्वृत्तिलक्षणक्रियातत्कर्मघटाद्यवच्छिन्नत्वात्प्रमाणप्रमेयभाव इति दर्शयितुं प्रमातृचैतन्यस्वरूपमाह (अन्तःकरणेति) यद्वा प्रकृतज्ञानप्रत्यक्षलक्षणोपयोगित्वात्प्रथमं प्रमाणविषयचैतन्यस्वरूपमभिधाय वक्ष्यमाणविषयप्रत्यक्षत्वनिरूपकं प्रमातृचैतन्यं लक्षयति (अन्तःकरणेति) नन्वस्त्वन्तःकरणमनिन्द्रियतया प्रत्यक्षं तथाप्यांतरस्य बहिर्निर्गमनाभावेन कथं परिणामात्मिका वृत्तिः । नचादित्यादिपर्य्यंतं दीर्घप्रभाकारेण परिणामदर्शनात्तद्वृत्तिरुपपन्नेति वाच्यम्, अन्तःकरणस्याचाक्षुषत्वात् सौरालोकस्यैव नयनरश्मिसंपृक्तस्य दीर्घप्रभाकारेण प्रतिभानात् । किंचान्तःकरणस्याणुत्वेतस्य प्राणनक्रियाश्रयस्य दूरवर्त्तिध्रुवादिपर्य्यंतं गमने तदवच्छिन्नजीवस्यापि गतत्वेन देहस्य निर्ज्जीवत्वापत्तिःविभुत्वेनिष्क्रियत्वापत्तिःमध्यमपरिमाणत्वे देहानुरूपपरिमाणस्य तस्य देहवन्मंदगामित्वेन झटिति विषयप्रतिभासानुपपत्तिः । किंच चक्षुरादिसंयुक्तस्य घटादेश्चैतन्यप्रकाशेनैवस्फुरणोपपत्तौ अन्तःकरणवृत्तिवैफल्यं ततश्चनान्तःकरणवृत्त्यवच्छिन्नं प्रमाणचैतन्यमिति ॥

स०प्र–वृत्तौक्रियात्वेन वृत्तिविंशिष्टेक्रियात्वमारोप्याशंकते (नन्वेकस्येति) अद्वितीयब्रह्मण इत्यर्थः । (प्रकृतज्ञानप्रत्यक्षलक्षणेति) प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वरूपं यत्प्रकृतं ज्ञानप्रत्यक्षलक्षणं ज्ञाननिष्ठप्रत्यक्षप्रयोजकं ज्ञाननिष्ठप्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकं वा तत्रोपयोगित्वादित्यर्थः । अन्तःकरणं प्रत्यक्षमस्त्वित्यन्वयः । परिणामदर्शनात्–अन्तःकरणस्य परिणामदर्शनात् (तद्वृत्तिरिति) अन्तःकरणवृत्तिरित्यर्थः । तथाचान्तःकरणस्यादित्यादिपर्य्यंतदीर्घप्रभाकारपरिणामं दृष्टांतीकृत्यान्तःकरणस्य वृत्तिरपिकल्पनीयेतिभावः । आदित्यादिपर्य्यंतदीर्घप्रभाकारस्य

Funding by IKS-MoE

चाक्षुषत्वमभिप्रेत्य नचेति प्रतिज्ञायां हेतुमाह (अन्तःकरणस्येति) ननु तर्हिकस्यादित्यादिपर्य्यंतदीर्घप्रभाकारेण परिणामः स्यादित्याशंक्याह (सौरेति) सूर्य्यसंबंधीत्यर्थः । संपृक्तस्य–संबद्धस्य, प्रतिभानात्–चक्षुषाज्ञानात्, तस्य–अन्तःकरणस्य । प्राणनक्रियाश्रयस्य प्राणव्यापाररूपक्रियाश्रयस्य (तदवच्छिन्नेति)अन्तःकरणावच्छिन्नेत्यर्थः । देहानुरूपपरिमाणस्य–देहपरिमाणतुल्यपरिमाणस्य, चैतन्यप्रकाशेनैव–चैतन्याभिन्नज्ञानेनैव स्फुरणोपपत्तौ–घटोस्तीत्यादिव्यवहारोपपत्तौ, ततश्च–अन्तःकरणवृत्तेर्वैयर्थ्याच्च ॥

सू०–तत्र यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते स एव परिणामो वृत्तिरित्युच्यते ॥

शि० म०–उच्यते मनोमध्यमपरिमाणमेव न सर्वगतं अनित्यत्वात् । प्राणनशक्त्याश्रयस्य तस्यैवोत्क्रांतिगत्यादिश्रवणाच्च । नचाणु देहव्यापि सुखाद्युपलब्धेः । नचांतरस्य तस्य बहिर्निर्गमनाभावान्नवृत्त्युपादानत्वं स्वतोबहिर्निर्गमनाभावेपि चक्षुरादिद्वाराध्रुवादिविषयदेशगमनोपपत्तेः । नच स्वतोगमनशीलस्य सहायानपक्षेति सांप्रतं तडागोदकस्य कुल्याद्वाराकेदारप्रवेशदर्शनात् । नचास्य मध्यमपरिमाणत्वे झटिति ध्रुवादिप्रतिभासानुपपत्तिः, अतिस्वच्छविरलतैजसद्रव्यत्वेन सवितृकिरणवच्छीघ्रप्रसरोपपत्तेः । तद्वृत्तिश्चविषयानुरूपपरिमाणा तडागोदकेचतुष्कोणकेदारानुरूपपरिमाणस्य कृशानौचायःपिण्डपरिमाणस्य दर्शनेनान्तःकरणस्य विषयानुरूपपरिमाणवृत्तिजनकत्वात् । अतएव सा द्रव्यंनगुणः परिमाणवत्त्वात् । नचान्तःकरणस्य निःस्पर्शत्वादनारंभकत्वं, द्रव्यारंभकतायां सावयवस्यैव प्रयोजकत्वात् । नचान्तःकरणनिर्गमनेदेहस्य निर्जीवत्वं, चक्षुरादेरिवान्तःकरणस्य ध्रुवादिपर्य्यंतगमनेपि देहसंबंधाविरोधात् । यथाचसप्रयोजनावृत्तिस्तथाग्रेवक्ष्यते ततश्चान्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यमिति तदेतदभिप्रेत्याह (तत्रयथेत्यादिना)

म० प्र०–प्राणनशक्त्याश्रयस्य–प्राणव्यापारानुकूलशक्त्याश्रयस्य, तस्य–अन्तःकरणस्य, स्वतः–चक्षुरादिसहकारिणं विना, अस्य–अन्तःकरणस्य । (विरलेति)

Funding by IKS-MoE

अघनीभूतेत्यर्थः । केदारानुरूपपरिमाणस्य–केदारपरिमाणतुल्यपरिमाणस्य, कृशानौ–वह्नौ, अयःपिंडपरिमाणस्य–अयःपिंडपरिमाणतुल्यपरिमाणस्य । (विषयानुरूपपरिमाणेति) विषयपरिमाणतुल्यपरिमाणकेत्यर्थः । अतएव–वक्ष्यमाणहेतोरेव–यत्र निःस्पर्शत्वं तत्र द्रव्यानारंभकत्वमितिव्याप्त्या निःस्पर्शत्वेन हेतुः, नान्तःकरणस्य द्रव्यानारंभकतास्वीकारे द्रव्यारंभकतायां स्पर्शवत्त्वस्यैव प्रयोजकत्वं वाच्यम् । तदनुपपन्नमेकस्मिन्नपि परमाणौ स्पर्शवत्त्वस्य विद्यमानत्वेनैकस्यापि परमाणोर्द्व्यणुकद्रव्यारंभकतापत्तेरतो न स्पर्शवत्त्वं द्रव्यारंभकताया ज्ञापकमित्यभिप्रेत्याह (द्रव्येति) सावयवत्वस्यैव–अंत्यावयविभिन्नत्वे सति सावयवत्वस्यैव, प्रयोजकत्वात् द्रव्यारंभकताज्ञापकत्वात् ॥

मू०–अनुमित्यादिस्थले तु नान्तःकरणस्य वह्न्यादिदेशगमनं, वह्न्यादेश्चक्षुराद्यसन्निकर्षात् । तथा चायंघट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्रदेशे समवधानात्तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात् ॥

शि०म०–ननु चक्षुरादीन्द्रियद्वारापर्वतादावन्तःकरणनिर्गमनेन तद्वृत्तेर्विषयसंबंधितया तदवच्छिन्नचैत्तन्यस्य विषयचैतन्याभेदादुक्तलक्षणस्य तत्रातिव्याप्तिरित्यत आह (अनुमित्यादिस्थले इति) नन्ववच्छिन्नपदेनोपलक्षितोक्तौ उक्तस्थलेऽतिव्याप्तिः विशिष्टाभिधानेच वृत्तिविषयोर्भेदेन तद्विशिष्टयोरपिचैतन्ययोर्भेदादुक्तलक्षणस्य घटादिप्रत्यक्षलक्षणाव्याप्तिरित्याशंक्योपहितस्य तेनविवक्षितत्वान्नदोष इत्याह (तथाचेति) चक्षुरादिसन्निकर्षस्थले मनोनिर्गमने सिद्धे सतीत्यर्थः । तदुभयावच्छिन्नं–विषयवृत्त्युपहितं उपाधिविशेषणयोर्भेदोवक्ष्यते इतिभावः । ननूपाधिविशेषणयोरीषद्भेदेपि तयोः समानयोगक्षेमत्वेन तदुपहितयोरपि भेद एवेत्याशंक्य नहि विशेषणयोरिवोपाध्योस्स्वरूपेणभेदकत्वं किंतुभिन्नदेशस्थत्वेनेत्याह (विभाजकयोरपीति) भिन्नदेशस्थत्वेनोपधेयभेदप्रयोजकयोरित्यर्थः ॥

म० प्र०–तद्वृत्तेः–अन्तःकरणवृत्तेः, विषयसंबंधितया–वह्न्यादिरूपविषय–संबंधवत्त्वेन, तदवच्छिन्नचैतन्यस्य–वृत्त्यवच्छिन्नचैतन्यस्य, उक्तलक्षणस्य–प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वरूपलक्षणस्य, तत्र–अनुमित्यात्मकवह्न्यादि-

Funding by IKS-MoE

ज्ञाने । परममूले (अनुमित्यादिस्थले इति) अनुमित्यादेःस्थलमधिकरणं कालस्तस्मिन्ननुमित्यादिकालेइत्यर्थः । उक्तस्थले—अनुमित्याद्यात्मकवह्न्यादिज्ञाने (अतिव्याप्तिरिति) शुद्धचैतन्यस्यकदाचिद्वृत्तिविषयाभ्यामुपलक्षितत्वसंभवादतिव्याप्तिरित्यर्थः । विशिष्टाभिधाने—वृत्तिरूपविशेषणविशिष्टविषयरूपविशेषणविशिष्टचैतन्याभिधाने तद्विशिष्टयोः—वृत्तिविषयरूपविशेषणविशिष्टयो उक्तलक्षणस्य—प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वरूपलक्षणस्य घटादिप्रत्यक्षलक्षणाव्याप्तिः—घटादिप्रत्यक्षस्वरूपज्ञानेअसंभवः । तेन—अवच्छिन्नपदेन । ननूपाधिविशेषणयोः कोभेद इत्याशंक्याह (उपाधिविशेषणयोरिति) ईषद्भेदेपि—कार्य्यानन्वयित्वेनकार्य्यान्वयित्वेन चस्वल्पभेदेपि समानयोराक्षेपत्वेन—कार्यान्वयित्वकार्य्यानन्वयित्वेतरसमानलक्षणकत्वेन, तदुपहितयोः—वृत्तिविषयोपहितयोः, भेदएव—वृत्तिविशिष्टचैतन्ययोरिवभेद एव (उपधेयभेदप्रयोजकयोरिति) उपधीयते उपाधिना पृथक्क्रियते यत्तदुपधेयमुपहितं तथाचोपहितभेदज्ञापकयोरित्यर्थः । परममूले (एकदेशस्थत्वेनेति) घटादुपहितचैतन्यरूपैकदेशस्थत्वेनेत्यर्थः ॥

मू०—अत एव मठांतर्वर्त्तिघटावच्छिन्नाकाशो न मठावच्छिन्नाकाशाद्भिद्यते । तथा चायं घट इति प्रत्यक्षस्थले घटाकारवृत्तेर्घट संयोगितया घटावच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया तत्र घटज्ञानस्य घटाकारांशे प्रत्यक्षत्वं सुखदुःखाद्यवच्छिन्नचैतन्यस्य तद्वृत्त्यवच्छिन्नचैतन्यस्य च नियमेनैकदेशस्थितोपाधिद्वयावच्छिन्नत्वान्नियमेनाहंसुखीदुःखीत्यादिज्ञानस्य प्रत्यक्षत्वम् । नन्वेवं स्ववृत्तिसुखादिस्मरणस्यापि सुखाद्यंशेप्रत्यक्षतापत्तिरितिचेत्, न ॥

शि०म०—ननूपाध्योरपि स्वरूपेणैव भेदकत्वं लाघवादित्यत आह (अतएवेति) तथाच प्रामाणिकत्वाद्गौरवं नदोष इतिभावः । (तथाचेति) एकदेशस्थत्वेनोपाध्योरभेदकत्वे सिद्ध इत्यर्थः । ननु सुखादिप्रत्यक्षस्थले चक्षुरादिसन्निकर्षस्यान्तःकरणवृत्तिहेतोरभावेन सुखादिवृत्त्यनुदयात्कथं चैतन्यस्य तदंशेप्रत्यक्षत्वमित्याशंक्य तस्य बाह्यविषयवृत्तावेवेन्द्रियापेक्षासुखादिवृत्तिस्तु स्वत एवेत्याह (सुखेति । प्रत्यक्षत्वमिति) सुखाद्यंश इतिशेषः । ननूपाध्योः स्वरूपेणैवभेदकत्वं युक्तमन्यथातदाहंसुखीत्यादिस्मृतावतिव्याप्तिरिति चोदयति (नन्विति) ॥

म० प्र०—स्वरूपेणैवभेदकत्वं स्वगतासाधारणधर्मावच्छिन्नमेवभेदबुद्धिजनकत्वं, लाघवात् उपाध्योर्भिन्नदेशस्थत्वेन भेदकत्वापेक्षयास्वरूपेण भेदकत्वे लाघवात् । परममूले (अतएवेति) उपाध्योरेकदेशस्थत्वेन भेदबुद्ध्यजनकत्वादेवेत्यर्थः । तथाच एकदेशस्थत्वेनोपाध्योरभेदकत्वेसिद्धे सति, प्रामाणिकत्वात् उपाध्योर्भिन्नदेशस्थत्वेन भेदकत्वस्य आप्तवाक्यार्थापत्तिरूपप्रमाणसिद्धत्वात् । परममूले (तद्वृत्तीति) घटाकारवृत्तीत्यर्थः । परममूले (तत्रेति) अयंघट इति प्रत्यक्षकाले इत्यर्थः । चैतन्यस्य सुखादिज्ञानात्मकचैतन्यस्य, तदंशेप्रत्यक्षत्वं सुखाद्यंशनिरूपितप्रत्यक्षत्वं, तस्य अंतःकरणस्य । स्वतः चक्षुरादीन्द्रियसन्निकर्षविना ।(परममूले) एकदेशस्थितोपाधिद्वयावच्छिन्नत्वादिति) एकस्मिन्नन्तःकरणस्वरूपदेशेस्थितं यदुपाधिद्वयं सुखादितदाकारवृत्तिश्च तदवच्छिन्नत्वादित्यर्थः । अन्यथा भिन्नदेशस्थत्वेन भेदकत्वस्वीकारेसति । तदा पूर्वकाले ॥

सू०—तत्रस्मर्यमाणसुखस्यातीतत्वेन स्मृतिरूपान्तःकरणवृत्तेर्वर्तमानत्वेन तत्रोपाध्योर्भिन्नकालिकतया तत्तदवच्छिन्नचैतन्ययोर्भेदादुपाध्योरेकदेशस्थत्वे सति एककालिकत्वस्यैवोपधेयाभेदप्रयोजकत्वात् । यदिचैकदेशस्थत्वमात्रमुपधेयाभेदप्रयोजकं तदा पूर्वमहंसुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्त्तमानत्वं विषयविशेषणं देयम् ॥

शि०प्र०—ननूपाध्योरेककालीनत्वं नोपधेयाभेदप्रयोजकं भिन्नकालीनयोरेकदेशस्थयोर्घटमठयोर्भेदकत्वप्रसंगात् । नचोपधेयाभेदसमये तयोः समकालत्वं विवक्षितमिति वाच्यम् । उपधेयाभेदसिद्धावेककालीनोपाधिद्वयावच्छेदस्तस्माच्चोपधेयाभेद इतिपरस्पराश्रयत्वाल्लाघवेनैकदेशस्थत्वस्यैवाभेदप्रयोजकत्वाच्चेत्यरुच्या पक्षांतरमाह (यदिचेति) तथाच स्मर्य्यमाणसुखादेरवर्त्तमानत्वेन तद्वृत्त्यवच्छिन्नचैतन्यस्य वर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वरूपलक्षणाभावान्नातिव्याप्तिरितिभावः ॥

म० प्र०—परममूले (तत्रस्मर्य्यमाणेति) स्ववृत्तिसुखादिस्मरणेन्तःकरणेवा प्रथमपक्षेऽभेदो निरूपितत्वं वासप्तम्यर्थः । प्रथमपक्षेस्मर्य्यमाणपदार्थैकदेशस्मृतावभेदान्वयः । प्रथमपक्षद्वितीयपक्षेस्मर्य्यमाणपदं विषयतावत्परमित्यर्थः । परममूले तत्रोपाध्योरिति । तत्रान्तःकरणे उपाध्योःसुखादितद्विषयकस्मृत्यात्मकवृत्तिरूपोपाध्योरित्यर्थः । एककालीनत्वम् एककालवृत्तित्वं, नोपधेयाभेदप्रयोजकम् उपहिताभेदसंपादकं न ।

(भेदकत्वप्रसंगादिति) ययोरुपाध्योरेकदेशस्थत्वे सति भिन्नकालीनत्वंतयोरुपाध्योरुपहितभेदकत्वं सुखादि—तदाहंसुखीत्यादिसुखादिविषयकस्मृत्यात्मकवृत्तिरूपोपाधिवत्तथाच घटमठनिष्ठैककालीनत्ववत् घटमठनिष्ठभिन्नकालीनत्वस्यापि सत्त्वात्, घटमठयोर्भेदकत्वप्रसंगः स्यादितिभावः । यद्वैककालिकत्वस्येत्यस्यैककालोत्पत्तिमत्त्वमेककालिकत्वमित्यर्थं ज्ञात्वेयमाशंका बोध्येति । (उपधेयाभेदसमये तयोःसमकालत्वमिति) तयोरुपाध्योरुपहिताभेदसमयाभिन्नो यः समकालस्तद्वृत्तित्वमेककालीनत्वशब्देन विवक्षितमित्यर्थः । उपधेयाभेदसिद्धौ—उपहिताभेदज्ञाने सति, एककालीनोपाधिद्वयावच्छेदः—एककालवृत्त्युपाधिद्वयनिश्चयः, तस्मात्—एककालीनोपाधिद्वयज्ञानात्, उपधेयाभेदः—उपहिताभेदज्ञानम्, लाघवेन—उपाध्योरेकदेशस्थत्वेसत्येककालिकत्वापेक्षयैकदेशस्थत्वे लाघवेन (अभेदप्रयोजकत्वाच्चेति) तथाचतदाहंसुखीत्यादिस्मृतावतिव्याप्तिस्तदवस्थेतिभावः । परममूले (एकदेशस्थत्वमात्रमिति) उपाध्योरेकदेशवृत्तित्वमात्रमित्यर्थः । तथाच—विषयविशेषणत्वेन वर्त्तमानत्वस्य निवेशे सति नातिव्याप्तिः—तदाहंसुखीत्यादिस्मृतावतिव्याप्त्यभावः ॥

मू०—नन्वेवं स्वकीयधर्माधर्मौवर्तमानौ यदा शब्दादिना ज्ञायेते तदा तादृशशाब्दज्ञानादावतिव्याप्तिः ॥

शि०म०-यद्वा विषयेवर्तमानत्वाभिधानं तस्योपलक्षणत्वशंकानिरासार्थं न तद्घटितलक्षणाभिप्रायम् । अवर्त्तमानस्यानुपाधित्वेन विषयोपहितचैतन्येनैवोक्तातिव्याप्तिनिराकरणात् । अत एव वक्ष्यति। उपाधिस्तुकार्य्यानन्वयी व्यावर्त्तको वर्तमान इति भावः । ननु सुखादिस्मृतावतिव्याप्त्यभावेपि धार्मिको भवानधार्मिकस्त्वमित्यादिवाक्यजन्यवृत्त्यवच्छिन्नचैतन्यं प्रति धर्माधर्मयोर्वर्तमानत्वेनोपाधितया तस्य तदुपहितचैतन्याभिन्नतया तत्रातिव्याप्तिः अहमदृष्टवान् भोगवत्त्वादित्यनुमानजन्यज्ञानेचातिव्याप्तिरितिशंकते (नन्वेवमिति) पुण्यकर्मायमित्यादौधर्मादेर्वर्तमानत्वेपि भिन्नदेशस्थत्वादनुपाधित्वमित्यत उक्तं स्वकीयेति ॥

म०प्र०—तस्य—विषयस्य (निरासार्थमिति) वस्तुतस्तु अवच्छिन्नपदेनोपहितस्याभिधानाद्विषयनिष्ठोपलक्षणत्वशंकानुदयेन वर्तमानत्वंविषयविशेषणं व्यर्थमेवेतिभावः । न तद्घटितलक्षणाभिप्रायम्—विषयविशेषणत्वेन वर्तमानत्वाभिधानं वर्तमानत्वघटितं प्रत्यक्षज्ञानलक्षणमित्यभिप्रायकं न । (उक्तातिव्याप्तीति) तदाहं सुखीत्यादिस्मृताबुक्तातिव्याप्तीत्यर्थः । अतएव—अवर्तमानविषयादेरनुपाधित्वादेव, 'वक्ष्यति' मूलकारइतिशेषः । कार्य्यानन्वयी—विधेयानन्वयी (धार्मिकोभवानिति) सुखवत्त्वदुःखवत्त्वाभ्यां

Funding by IKS-MoE

हेतुभ्यां धार्मिकत्वाधार्मिकत्वज्ञानम् । मुखप्रसादमालिन्याभ्यां तु सुखित्वदुःखित्वज्ञानम् । मुखप्रसादमालिन्ययोस्तु मुखावयवविकाससंकोचयोरंतर्भावः । तथाच-धार्मिको भवानित्यादिवाक्यानुपपत्तिर्नास्तीतिभावः । वृत्त्यवच्छिन्नचैतन्यं प्रति धर्माधर्मयोः–वृत्त्यवच्छिन्नचैतन्यविषययोर्धर्माधर्मयोः, उपाधितया–धर्माद्यवच्छिन्नचैतन्योपाधितया, तस्य–धर्माधर्मादिविषयकवाक्यजन्यवृत्त्यवच्छिन्नचैतन्यस्य, तदुपहितचैतन्याभिन्नतया–धर्माधर्मोपहितचैतन्याभिन्नतया, तत्र–धार्मिकोभवानित्यादिवाक्यजन्यज्ञाने, अनुपाधित्वं–उपधेयाभेदप्रयोजकोपाधित्वात्यंताभावः ॥

मू०–तत्र धर्माद्यवच्छिन्नचैतन्यतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादितिचेत्, न, योग्यत्वस्यापि विषयविशेषणत्वात् । अंतःकरणधर्मत्वाविशेषेपि किंचिद्योग्यं किंचिदयोग्यमित्यत्र फलबलकल्प्यः स्वभाव एव शरणम् । अन्यथा न्यायमतेप्यात्मधर्मत्वाविशेषेपिसुखादिवद्धर्मादेः प्रत्यक्षत्वापत्तिर्दुर्वारा । नचैवमपिसुखस्य वर्त्तमानतादशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षतास्यादितिवाच्यं इष्टत्वात् ॥

शि० म०–योग्यविषयावच्छिन्नचैतन्याभिन्नत्वं प्रमाणचैतन्यस्य विषयांशेप्रत्यक्षत्वप्रयोजकमिहविवक्षितं धर्मादिज्ञानेचायोग्यविषयत्वान्नातिव्याप्तिरित्याह (नेति) । (योग्यत्वस्येति) प्रत्यक्षयोग्यत्वस्येत्यर्थः । क्वचिदपि स्वभावांनाश्रयबाधकमाह (अन्यथेति) ननु योग्यत्वविशेषणदानेपि सुखवर्तमानतासमये त्वंसुखीत्यादिवाक्यजन्यज्ञानस्य तादृशचैतन्याभिन्नत्वात्तत्रातिव्याप्तिः । नचपदज्ञानपदार्थस्मरणादिना सुखस्य विनष्टत्वाच्छाब्दज्ञानसमये तन्निवर्तते इतिवाच्यम् चंदनादिविषयजन्यसुखस्य यावद्विषयमनुवर्तमानत्वाभ्युपगमादित्याशंक्य तस्यापिप्रत्यक्षज्ञानत्वेन लक्ष्यत्वाभ्युपगमान्नदोष इत्याह (नचैवमिति) ॥

म० प्र०–परममूले (तत्रेति) धार्मिकोभवानित्यादिवाक्यजन्यज्ञानादावित्यर्थः । (योग्येति) प्रमाणचैतन्यस्य योग्यविषयावच्छिन्नचैतन्याभिन्नत्वमित्यन्वयः । विषयांशे प्रत्यक्षत्वप्रयोजकं–घटादिज्ञाननिष्ठघटादिविषयाभिन्नांशनिरूपितप्रत्यक्षत्वप्रयोजकं, इह–प्रमाणचैतन्यस्यविषयावच्छिन्नचैतन्याभिन्नत्वमितिवाक्ये, प्रत्यक्षयोग्यत्वस्य–तत्तदिंद्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यत्वस्य । ननु सुखादेर्धर्मादेश्चान्तःकरणधर्म-

त्वाविशेषात्कस्यचिद्योग्यत्वं कस्यचिन्नयोग्यत्वमित्यत्र किंनियामकमितितत्राह परममूले (अन्तःकरणेति) । परममूले (फलबलकल्प्यइति) कतिचित्पदार्थेषु प्रत्यक्षरूपकार्य्यसत्त्वासत्त्वकल्प्य इत्यर्थः । परममूले (अन्यथेति) पदार्थानांकार्य्यानुपपत्तिकल्प्यस्वभावविशेषस्यानंगीकारे इत्यर्थः । वाक्यजन्यज्ञानस्य–अहंसुखीत्याकारकज्ञानस्य, तादृशचैतन्याभिन्नत्वात्–योग्यंसुखरूपविषयावच्छिन्नचैतन्याभिन्नत्वात्, तत्र–त्वंसुखीत्यादिवाक्यजन्यज्ञाने । (विनष्टत्वादिति)–नैयायिकस्य तव मतेयोग्यविसुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वनियमादितिशेषः । तत्–सुखं, निवर्त्तते–नास्ति । यावद्विषयं–चंदनादिविषयैःसहेन्द्रियसंबंधसत्त्वपर्य्यंतम् । (अभ्युपगमादिति) वेदांतिनात्वयेतिशेषः । तस्यापि–सुखस्य वर्त्तमानदशायां त्वं सुखीत्यादिवाक्यजन्यज्ञानस्यापि (नदोष इति) सुखस्य वर्त्तमानतादशायां त्वंसुखीत्यादिवाक्यजन्येऽहंसुख्यस्मीतिज्ञानेऽतिव्याप्तिरूपोदोषो नास्तीत्यर्थः ॥

मू०–दशमस्त्वमसीत्यादौ सन्निकृष्टविषये शब्दादप्यपरोक्षज्ञानाभ्युपगमात् ॥

शि०म०–ननु त्वं सुखीत्यादिवाक्यात्कथमपरोक्षज्ञानं वाक्यस्य ज्योतिष्टोमादिवाक्यवत्परोक्षज्ञानजनकत्वात्, अन्यथा कलमबीजादपि यवांकुरोत्पत्त्यापत्तेरित्याशंक्याह (दशमस्त्वमसीति) अयमाशयः–न तावत्त्वं सुखीत्यादिवाक्यं नस्वविषयापरोक्षज्ञानजनकं वाक्यत्वात् ज्योतिष्टोमादिवाक्यवदित्यनुमानादस्यापरोक्षाज्ञानाहेतुत्वं अयोग्यविषयत्वस्य तत्रोपाधित्वात् दशमस्त्वमासि तत्त्वमसीत्यादिवाक्ये व्यभिचाराच्च । नच तज्जन्यमपिदशमत्वादिज्ञानामिन्द्रियाद्यजन्यत्वान्नप्रत्यक्षामिति न व्यभिचार इतिवाच्यम्, इन्द्रियजन्यत्वस्य विषयजन्यत्वस्यच प्रत्यक्षलक्षणस्य दूषितत्वात् । नचैवमपि दशमस्त्वमसीत्यत्रेन्द्रियमेवापरोक्षज्ञानमुत्पादयति निमीलितनयनस्यापि त्वगिन्द्रियव्यापारसंभवात् । तत्त्वमसीत्यत्रचान्तःकरणमेव श्रवणादिना निरस्तासंभावनाशंकंब्रह्मापरोक्षज्ञानं जनयतीतिसांप्रतमिन्द्रियाद्दशमत्वज्ञाने तच्छब्दश्रवणात्प्रागपि तत्र तत्प्रसंगात् ॥

म० प्र०–अन्यजनकपदार्थादन्योत्पत्तिस्वीकारे दोषमाह (अन्यथेति) अन्यजनकादन्योत्पत्तिस्वीकारे इत्यर्थः (कलमबीजादिति) "कलमः पुंसि लेखन्यां शालौ पाटच्चरेपिच" इति मेदिनीकोशाल्लेखनीबीजाद्व्रीहिबीजाद्वेत्यर्थः । तस्य–त्वंसुखीत्यादिवाक्यस्य (तत्रेति) वाक्यत्वरूपहेतावित्यर्थः । वाक्यत्वरूपहेतोः स्वरूपसंबंधेनायोग्यविषयकत्वरूपोपाधिमत्त्वमितिभावः । नच प्रत्यक्षयोग्यवह्न्यादि-

Funding by IKS-MoE

विषयकानुमानादिप्रमाणेषु स्वविषयापरोक्षज्ञानजनकत्वाभावरूपसाध्यसत्त्वेप्ययोग्यविषयकत्वरूपोपाधेरभावेन कथमुक्तोपाधेः साध्यव्यापकत्वमिति वाच्यम् । ज्ञानत्वानधिकरणत्वादिरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्य विवक्षितत्वात् । दशमस्त्वमसीत्यादिवाक्यजन्यज्ञाने इन्द्रियजन्यत्वादिरूपापरोक्षत्वस्याभावान्नदशमस्त्वमसीत्यादिवाक्ये व्यभिचार इत्यभिप्रायेणाशंकते (तज्जन्यमपीति) दशमस्त्वमसीत्यादिवाक्यजन्यमपीत्यर्थः (इन्द्रियादीति) अत्रादिशब्दार्थोविषय इति । प्रत्यक्षलक्षणस्य—प्रत्यक्षत्वस्य प्रत्यक्षत्वप्रकारकव्यवहारव्यापकस्यवा । एवमपि—इन्द्रियजन्यत्वादेःप्रत्यक्षलक्षणस्य दूषितत्वेपि (इत्यत्रेति) इत्यादिवाक्यविषयेदशमे इत्यर्थः । नन्वंधादेर्दशमे चक्षुषः सन्निकर्षासंभवात्कथमिन्द्रियस्य दशमे ज्ञानजनकत्वमित्याशंक्योत्पादयतीतिशब्दोक्तप्रतिज्ञायां हेतुमाह (निर्मीलितेति) नन्वेवमपि तत्वमस्यादिवाक्यविषये कथं चक्षुरादीन्द्रियं ज्ञानमुत्पादयतीत्याशंक्य तत्त्वं पदार्थभेदादौ चक्षुरादेर्ज्ञानाजनकत्वेपि तत्रश्रवणादिसहकृतमनस एव ज्ञानजनकत्वसंभवान्नैवमित्यभिप्रेत्याह (तत्त्वमसीत्यत्रेति) इत्यादिवाक्यविषये इत्यर्थः । (तच्छब्देति) दशमस्त्वमसीत्यादिशब्दइत्यर्थः । तत्र—दशमे, तत्प्रसंगात्—प्रत्यक्षज्ञानप्रसंगात् ॥

सू०—अत एव पर्वतोवह्निमानित्यादिज्ञानमपि वह्न्यंशे परोक्षं,पर्वतांशेऽपरोक्षम् । पर्वताद्यवच्छिन्नचैतन्यस्य बहिर्निःसृतान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्यच परस्परं भेदाभावाद्वह्न्यंशे त्वन्तःकरणवृत्तिनिर्गमनाभावेन वह्न्यवच्छिन्नचैतन्यस्य प्रमाणचैतन्यस्य च परस्परं भेदात् ॥

शि०म०—नच शब्दसहकृतमिन्द्रियं तत्र करणमिति वाच्यम् । इन्द्रियस्य घटादिप्रत्यक्षे तदनपेक्षणात् । प्रत्यक्षविशेषेच तदपेक्षत्वे मानाभावात् । नच तत्र परोक्षज्ञानमेव शब्दादुत्पद्यते इति युक्तमपरोक्षभ्रमाज्ञानयोरनिवृत्तिप्रसंगात् । अत एव तत्त्वमसीत्यत्रनपरोक्षज्ञानशंकावकाशः, अविद्यातन्मूलसंसारानिवृत्तिप्रसंगात । शब्दजन्यस्यैव ज्ञानस्य तत्त्वमस्यादिवाक्योत्थमित्यादि नारदीयवचनेनाविद्यातन्मूलसंसारनिवर्त्तकत्वावगमादिति । ननु तत्त्वमसि त्वंसुखीत्यादिवाक्यजन्यज्ञानस्येन्द्रियाजन्यस्यापि योग्यवर्तमानविषयत्वमात्रेण प्रत्यक्षत्वाभ्युपगमे पर्वतोवह्निमानित्याद्यनुमितेरपि प्रत्यक्षत्वापत्तिरित्याशंक्य किमिन्द्रियसन्निकृष्टे जायमानानुमितेः प्रत्यक्षत्वमापाद्यते, असंनिकृष्टेवा । आद्येपि

Funding by IKS-MoE

किं पर्वतांशे तदापादनं वह्न्यंशेवा, नाद्य इष्टत्वादित्याह (अतएवेति) विषयचैतन्याभिन्नज्ञानस्य योग्यवर्तमानविषयस्य प्रत्यक्षत्वाभ्युपगमादित्यर्थः । पर्वतो वह्निमानित्यादिज्ञानमपि त्वसुखीत्यादिज्ञानवत् सन्निकृष्टपर्वतांशे प्रत्यक्षत्वेनेष्टमित्युक्तं तत्र हेतुमाह (पर्वतावच्छिन्नेति) आद्ये द्वितीयं दूषयति (वह्न्यंशे इति) नचैवं तज्ज्ञानस्य वह्न्यंशप्रत्यक्षत्वाभावेन तत्र दृढालक्षणातिव्याप्तिः । योग्यवर्तमानविषयत्वेपि वृत्तिविशिष्टचैतन्यस्य विषयचैतन्यभेदादित्याह (वह्न्यंशेत्विति) ॥

म० प्र०—तत्र—दशमविषयकज्ञाने, तदनपेक्षणात्—शब्दानपेक्षणात् । नन्विन्द्रियंदशमादिप्रत्यक्षविशेषे शब्दमपेक्षते नतु प्रत्यक्षत्वावच्छिन्नप्रत्यक्षजनन इत्याशंक्य मैवमित्यभिप्रेत्य हेतुमाह (प्रत्यक्षविशेषइति) तदपेक्षत्वे—इंद्रियस्यशब्दापेक्षत्वे, तत्र—दशमे (अपरोक्षभ्रमाज्ञानयोरिति) अत्रापरोक्षेच ते भ्रमाज्ञाने—अपरोक्षभ्रमाज्ञाने, तयोरितिसमासः । तथाचापरोक्षज्ञानस्यैवापरोक्षभ्रमादिनिवर्त्तकत्वेन दशमेदशमं न जानामीत्याकारकं यदपरोक्षाज्ञानं दशमो मृत इत्याद्यपरोक्षभ्रमश्चतयोरनिवृत्तिप्रसंगादित्यर्थः । अतएव—वक्ष्यमाणहेतोरेव, इत्यत्र—इत्यादिवाक्याविषये कुतोऽनिवृत्तिप्रसंगइत्याशंक्यानिवृत्तिप्रसंगेहेतुमाह (शब्दजन्यस्यैवेति) शब्दजन्यापरोक्षज्ञानस्यैवेत्यर्थः । अभिन्नज्ञानस्य—प्रमाणचैतन्यरूपज्ञानस्य, योग्यवर्तमानविषयस्य—तत्तदिन्द्रियतत्तत्साक्ष्यन्यतरयोग्यवर्त्तमानघटादिविषयकस्य, द्वितीयं—वह्न्यंशेपर्वतोवह्निमानितिज्ञानस्य प्रत्यक्षत्वापादनमितिद्वितीयपक्षम् । एवं—वह्न्यंशेपर्वतो वह्निमानितिज्ञानस्य परोक्षत्वस्वीकारे सति, तज्ज्ञानस्य—पर्वतोवह्निमानितिज्ञानस्य, तत्र—पर्वतोवह्निमानितिज्ञाने (लक्षणेति) प्रत्यक्षलक्षणेत्यर्थः ॥

तथाचानुभवः पर्वतं पश्यामि वह्निमनुमिनोमीति।न्यायमते च पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिः ॥

शि० म०—नन्वनुमित्यादिसाधारणं प्रत्यक्षलक्षणं परिकल्प्य पर्वतो वह्निमानित्यादिज्ञानस्य प्रसिद्धानुमितिभावस्य लक्षणेन प्रत्यक्षत्ववर्णनं न युक्तम्। उक्तं भट्टपादैः ॥

"सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः ॥
न सर्वलोकसिद्धस्य लक्षणेन निवर्त्तनम्" ॥ १ ॥

इत्याशंक्य सा प्रसिद्धिर्वह्न्यंशे न पर्वतांशे इत्याह (तथाचेति) यथा पर्वतो वह्निमानिति ज्ञानस्य निरुक्तप्रयोजकं तदभावश्च प्रत्यक्षत्वाप्रत्यक्षत्वयोः प्रमाणम् । तथा पर्वतं पश्यामि वह्निमनुमिनोमीत्यनुभवोपीत्यर्थः ।

न केवलं तज्ज्ञानस्य साधकसत्त्वात्पर्वतांशे प्रत्यक्षत्वम् । अपितुबाधकादपीत्याह (न्यायमते इति) यद्वा तथाऽनुभवस्तत्प्रकारकानुभवः यत्साधितंज्ञानस्य परोक्षत्वमपरोक्षत्वंचांशभेदेन सच पर्वतं पश्यामि वह्निमनुमिनोमीत्यादिरूपः । अयमपि तदासंगच्छते यद्यस्यांशभेदेन परोक्षत्वापरोक्षत्वे स्यातामन्यथा पर्वतांशेप्यनुमितिरिति वदतो नैयायिकस्य मते पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिरित्यर्थः ॥

म० प्र०—प्रसिद्धानुमितिभावस्य—प्रसिद्धोनैयायिकानां निश्चितोऽनुमितिभावोऽनुमितित्वं यस्मिन्पर्वतोवह्निमानित्यादिज्ञाने तत्तथा तस्य नैयायिकादिनिश्चितानुमितित्वस्येतियावत् । लक्षणेन—ज्ञानप्रत्यक्षत्वादिप्रयोजकेन, प्रत्यक्षत्ववर्णनं—पर्वतांशनिरूपितप्रत्यक्षत्वकथनं, सिद्धानुगममात्रम्—लोकप्रसिद्धप्रत्यक्षत्वानुमितित्वादिपदार्थस्याज्ञानिजनबोधाय वाक्येन प्रतिपादनमेव, परीक्षकैः—शास्त्रार्थनिरूपणकुशलैः, साप्रसिद्धिः—पर्वतोवह्निमानितिज्ञानमनुमितिरित्याकारिकलौकिकीबुद्धिः, वह्न्यंशे—वह्न्यंशविषयकपर्वतोवह्निमानितिज्ञाने । वह्न्यंशनिरूपितानुमितित्वप्रकारिका वा । नपर्वतांशे—पर्वतांशविषयकपर्वतोवह्निमानितिज्ञानेसाप्रसिद्धिर्नास्ति । पर्वतांशनिरूपितानुमितित्वप्रकारिकापर्वतोवह्निमानितिज्ञानेप्रसिद्धिर्नास्तीतिवा । यत्र ज्ञाने प्रमाणचैतन्यस्य योग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्र ज्ञानेप्रत्यक्षत्वं, यत्र ज्ञानेप्रमाणचैतन्यस्य योग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वाभावस्तत्रज्ञाने विषयांशनिरूपितपरोक्षत्वमितिव्याप्तिमाश्रित्याह (यथेत्यादिना) पर्वतोवह्निमानितिज्ञानस्य निरुक्तप्रयोजकं प्रमाणचैतन्यस्ययोग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वरूपं तदभावश्च—निरुक्तप्रयोजकाभावश्च पर्वतोवह्निमानितिज्ञानस्य पर्वतांशनिरूपितप्रत्यक्षत्ववह्न्यंशनिरूपिताप्रत्यक्षत्वयोर्यथा प्रमाणमनुमितिरूपप्रमितिजनकमित्यर्थः । तथाचानुभव इत्यत्र चकारःसमुच्चयार्थकापिशब्दार्थकोऽनुभवपदोत्तररूपभिन्नस्थानकश्चेत्यभिप्रेत्यदार्ष्टांतिकमाह (तथेति) अनुभवोपीत्यस्य पर्वतोवह्निमानितिज्ञानस्य प्रत्यक्षत्वाप्रत्यक्षत्वयोः प्रमाणमित्यनेनान्वयः (नकेवलमिति) तज्ज्ञानस्य—पर्वतोवह्निमानितिज्ञानस्य, केवलं साधकसत्वात्—पर्वतांशनिरूपितप्रत्यक्षत्वस्य निरुक्तप्रयोजकरूपसाधकसत्त्वादेव न प्रत्यक्षत्वम् । अपितु—किंतु, बाधकादपि—पर्वतोवह्निमानितिज्ञानस्यपर्वतांशनिरूपितप्रत्यक्षत्वास्वीकारे पर्वतमनुमिनोमीत्यनुव्यवसायापत्तिरूपबाधकादपि प्रत्यक्षत्वमित्यर्थः (तत्प्रकारकानुभवइति) ज्ञानस्य—पर्वतोवह्निमानितिज्ञानस्य, अंशभेदेन वह्न्याद्यंशविशेषनिरूपितं यत्परोक्षत्वमपरोक्षत्वं साधितं तत्प्रकारकानुभव इत्यर्थः । पर्वतोवह्निमानितिज्ञानस्यांशभेदेन परोक्षत्वापरोक्षत्वसाधकानुभवमेव दर्शयति (सचेति) पर्वतोवह्निमानितिज्ञानस्य पर्वताद्यंशनिरूपितापरो-

क्षत्वानुमितित्वसाधक एवेत्यर्थः । अस्य–पर्वतोवह्निमानितिज्ञानस्य (अंशभेदेनेति) पर्वताद्यंशनिरूपितेत्यर्थः । अन्यथा–पर्वतांशे पर्वतोवह्निमानितिज्ञानस्यानुमितित्वस्वीकारे ॥

मू०–असन्निकृष्टपक्षकानुमितौ तु सर्वांशेपि ज्ञानं परोक्षम्, सुरभिचंदनमित्यादिज्ञानमपि चंदनखंडाशेऽपरोक्षम् ,सौरभांशे परोक्षम्, सौरभ्यस्य चक्षुरिंद्रियायोग्यतया योग्यत्वघटितस्य निरुक्तलक्षणस्याभावात् ॥

शि० म०–द्वितीयं दूषयति (असन्निकृष्टेति) असन्निकृष्टपक्षकानुमितिस्थले वह्न्यंश इव तदितरसर्वांशेपि तज्ज्ञानं परोक्षमित्यर्थः । नन्वेवमपि सुरभिचंदनमिति ज्ञानस्य चंदनांश इव सौरभ्यांशे प्रत्यक्षत्वाभावेन तत्रयोग्यत्वघटितलक्षणातिव्याप्तिर्दुर्वारा इतिचेत्सत्यं तज्ज्ञानं चंदनखंडांशे प्रत्यक्षं, सौरभ्यांशे परोक्षमिति, तथापि तत्तदिन्द्रियघटितयोग्यत्वघटितस्य विवक्षितस्य लक्षणस्य तत्राभावान्नदोष इत्याह(सुरभीति परोक्षमिति) आघ्रातपूर्वे तस्मिन् तज्ज्ञानं स्मृतिः । अनाघ्रातपूर्वेतु चंदनखंडत्वादिलिंगकानुमितिरित्यर्थः ॥

म० प्र०–द्वितीयम्–इन्द्रियासन्निकृष्टपक्षकानुमितौ प्रत्यक्षत्वमापाद्यते इति द्वितीयपक्षम् । परममूले (असन्निकृष्टपक्षकानुमिताविति) असन्निकृष्टपक्षकपर्वतोवह्निमानित्याकारकान्तःकरणवृत्तिरूपानुमितौ, ज्ञानं–प्रतिबिम्बितचैतन्यरूपं ज्ञानं, असन्निकृष्टपक्षकपर्वतोवह्निमानित्यनुमितिघटकीभूतचैतन्यरूपं ज्ञानं वा । सर्वांशेपि परोक्षं पक्षसाध्यादिनिखिलांशनिरूपितपरोक्षत्वविशिष्टमित्यर्थः । अत्रज्ञानपदाभावेतु परोक्षमित्यस्य परोक्षत्वमित्यर्थो बोद्धव्य इति । असन्निकृष्टपक्षकानुमितिस्थले–पर्वतो वह्निमानित्याद्याकारिकासन्निकृष्टपर्वतपक्षकानुमितिरूपाधिकरणे, वह्न्यंशेइव–वह्न्यंशनिरूपितपरोक्षत्वमिव तदितरसर्वांशेपि–वह्नीतरपर्वतादिनिखिलांशेपि । तज्ज्ञानम्–असन्निकृष्टपक्षकपर्वतोवह्निमानितिज्ञानम् । एवमपि–पर्वतोवह्निमानित्याद्यनुमितावतिव्याप्त्यभावेपि (चंदनांशेइव) चंदनाशनिरूपितप्रत्यक्षत्वमिव । सौरभ्यांशेप्रत्यक्षत्वाभावेन–वेदांतिमते सुरभिचंदनमितिज्ञानस्यसौरभ्यांशे स्मृत्याद्यात्मकत्वेन सौरभ्यांशनिरूपितप्रत्यक्षत्वाभावेन । तत्र–सौरभ्यांशविषयकसुरभिचंदनमितिज्ञाने, अतिव्याप्तिः–वृत्तिसौरभ्यांशरूपोपाध्योरेकदेशस्थत्वात्सौरभ्यस्य योग्यविषयत्वाच्चातिव्याप्तिः । तज्ज्ञानं–सुरभिचदनमितिज्ञानं, चंदनखंडांशेप्रत्यक्षम्–चंदनखंडांशनिरूपितप्रत्यक्षत्वविशिष्टंसौरभ्यांशेपरोक्षम्–सौरभ्यांशनिरूपितपरोक्षत्वविशिष्टम् । इतिशब्दस्यसत्यमित्यने-

Funding by IKS-MoE

नान्वयः । तथापि सौरभ्यांशविषयकसुरभिचंदनमितिज्ञानस्यपरोक्षत्वेपितत्रसौरभ्यांशविषयकसुरभिचंदनमितिज्ञाने न दोषः । ज्ञानप्रत्यक्षत्वादिप्रयोजकस्यातिव्याप्तिरूपदोषोनास्ति । परममूले (इत्यादिज्ञानमिति) अत्रमधुरमाम्रफलमित्यादिज्ञानमादिपदार्थइति । आघ्रातपूर्वेतस्मिन्—पूर्वमाघ्रात आघ्रातपूर्वस्तस्मिन्नाघ्रातपूर्वे चंदन खंडे, तज्ज्ञानं—सुरभिचंदनमित्याकारकसौरभ्यांशविषयकज्ञानम् । अनाघ्रातपूर्वे—पूर्वमनाघ्रातःअनाघ्रातपूर्वस्तस्मिन्ननाघ्रातपूर्वे अस्य तज्ज्ञानमित्यनेनान्वयः ॥

मू०—नचैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्वं न स्यादिति वाच्यमिष्टत्वात् ॥

शि०म०—ननु पर्वतोवह्निमानित्यादिज्ञानं सन्निकृष्टपर्वतांशेपि न प्रत्यक्षम् । तत्त्वे बाधकसत्त्वात् असन्निकृष्टविषयानुमितिवत् । नच हेत्वासिद्धिः परोक्षेपि ज्ञाने तदभ्युपगमे जातिसांकर्यप्रसंगेन प्रसिद्धजातिभावस्य तत्र जातित्वानुपपत्तेरेव बाधकत्वात् । नच तवापि ज्ञानस्य परोक्षत्वे पर्वतं पश्यामीत्यनुभवानुपपत्तिः, तस्य पर्वतगोचरलिंगपरामर्शादिप्रत्यक्षविषयत्वात् । ततश्च तज्ज्ञाने प्रत्यक्षलक्षणातिव्याप्तिरित्याशंक्य निराकरोति (नचैवमिति) एवं शब्दार्थमाह (एकत्रेति) साक्षात्त्वादेर्जातित्वाभ्युपगमेहि तदनुपपत्तिर्बाधिकास्यात्तदेवनास्ति, जात्युपाध्युदासीनस्य धर्ममात्रस्यैव तस्याभ्युपगमादित्याह (इष्टत्वादिति) ॥

म० प्र०—तत्त्वे--सन्निकृष्टपर्वतादिविषयकपर्वतोवह्निमानित्यादिज्ञानस्य प्रत्यक्षत्वे यत्र यस्य धर्मस्य बाधकसत्त्वं तत्र तस्य धर्मस्याभाव इति व्याप्तिमभिप्रेत्य हेतुमाह (बाधकसत्त्वादिति । असन्निकृष्टविषयानुमितिवदिति) असन्निकृष्टपर्वतादिविषयकपर्वतोवह्निमानित्याद्यनुमितिनिष्ठपर्वतादिपक्षाद्यपरोक्षतायाः पर्वतादिभिः साकं सन्निकर्षाभावरूपबाधकसत्त्ववदित्यर्थः । परोक्षेपिज्ञाने—सन्निकृष्टपर्वताद्यंशेपि परोक्षपर्वतोवह्निमानित्यादिज्ञाने, तदभ्युपगमे--सन्निकृष्टपर्वतादिविषयकत्वावच्छेदेनापरोक्षत्वाभ्युपगमे, जातिसांकर्य्यप्रसंगेन—परस्परात्यंताभावसमानाधिकरणप्रत्यक्षत्वानुमितित्वरू धर्मयोरेकत्रसमावेशरूपसांकर्य्यप्राप्त्या (प्रसिद्धजातिभावस्येति) प्रसिद्धः शास्त्रा निपुणपुरुषैर्निश्चितोजातिभावो जातित्वं यस्मिन्ननुमितित्वे तत्तथा तस्य, प्रसिद्धजातित्वानुमितित्वस्य जातित्वानुपपत्तेरेव, तत्र—सन्निकृष्टपर्वतादिविषयकपर्वतोवह्निमानित्यादिज्ञानप्रत्यक्षत्वे, बाधकत्वादित्यर्थः । तवापि--नैयायिकस्य, तवापि ज्ञानस्य—

---

१ स्वाश्रयाश्रयत्वसंबन्धेन हेतोर्वृत्तिर्बोध्या । एवं साकर्य्यं तदाश्रयोपरोक्षत्वापरोक्षत्वेतयोराश्रयोज्ञानमिति ॥

Funding by IKS-MoE

सन्निकृष्टपर्वतादि विषयकपर्वतोवह्निमानित्यादिज्ञानस्य नचेति–प्रतिज्ञायांहेतुमाह (तस्येति) पर्वतं पश्यामीत्यनुभवात्मकानुव्यवसायस्यानुमितित्वनिष्ठजातित्वानुपपत्तिरूपबाधकवशादनुमितिघटकसन्निकृष्टपर्वतादिविषयकपर्वत इति ज्ञानविषयत्वाभावेनानुमितेः पूर्वं जायमानप्रत्यक्षात्मकलिंगपरामर्शादिघटकपर्वतविषयकप्रत्यक्षात्मकज्ञानविषयकत्वादित्यर्थः । ततश्च–उक्तानुमानादेव, तज्ज्ञाने–सन्निकृष्टपर्वतादिविषयकपर्वतोवह्निमानितिज्ञाने, प्रत्यक्षलक्षणातिव्याप्तिः–प्रत्यक्षलक्षणस्य प्रमाणचैतन्ययोग्यवर्त्तमानविषयचैतन्ययोरभेदरूपस्यातिव्याप्तिः । तदनुपपत्तिः–प्रत्यक्षत्वादेर्जातित्वानुपपत्तिः, बाधिका–सन्निकृष्टपर्वतादिविषयकपर्वतो वह्निमानित्यादिज्ञानस्य प्रत्यक्षत्वादिबाधिका, तदेव–प्रत्यक्षत्वादेर्जातित्वमेव, जात्युपाध्युदासीनस्य–जातित्वोपाधित्वरहितस्य, धर्ममात्रस्यैव–धर्मस्वरूपस्यैव, तस्य–प्रत्यक्षत्वादेः ॥

मू०–जातित्वोपाधित्वपरिभाषायाः सकलप्रमाणागोचरतयाऽप्रामाणिकत्वात् । घटोऽयमित्यादिप्रत्यक्षं हि घटत्वादिसद्भावे मानं, नतु तस्य जातित्वेपि ॥

शि० म०–ननु घटत्वादिवत्परोक्षत्वापरोक्षत्वयोरपि जातित्वप्रसिद्धेरवश्यं तदुपेयमित्याशंक्य घटत्वादावपि लोके न तत्प्रसिद्धिः । शास्त्रेच तत्प्रसिद्धिः शब्दगतवृद्ध्यादिसंज्ञावत्परिभाषामात्रत्वात् । न स्वार्थेप्रमाणं, नचैषा यूपाहवनीयादिप्रसिद्धिवत् प्रमाणमूला येनपरिभाषापि स्वार्थंसाधयेदित्याह (जातित्वेति) ननु नीलघटत्वादावुपाधित्वप्रसिद्धिवत्घटत्वादौजातित्वप्रसिद्धिरपि स्वार्थेप्रमाणमित्याशंक्य सापि निर्मूलत्वादप्रमाणमित्याह (उपाधित्वेति) ननु घटत्वनीलघटत्वादौ जातित्वोपाधित्वयोः प्रमाणसिद्धत्वात् तत्प्रसिद्धेः प्रमाणमूलत्वाभावोऽसिद्ध इत्यत आह (सकलेति) घटत्वनीलघटत्वयोर्जातित्वोपाधित्वयोरिति शेषः।अत एव घटत्वादेर्जातित्वे प्रमाणमाशंक्य निरस्यति (घटोयमिति) ॥

म० प्र०–तदुपेयम्–परोक्षत्वापरोक्षत्वनिष्ठजातित्वमुपेयम्, नतत्प्रसिद्धिः–जातित्वप्रसिद्ध्यत्यंताभावः (शास्त्रेचतत्प्रसिद्धिरिति) शास्त्रजन्यघटत्वादिविषयकजातित्वप्रकारकप्रसिद्धिः । स्वार्थे–घटत्वादिनिष्ठजातित्वरूपविषये, न प्रमाणमित्यर्थः । तस्याः स्वविषयेप्रमाणत्वाभावेहेतुमाह (परिभाषामात्रत्वादिति) घटत्वादिकं जातिरितिप्रसिद्धेः । संकेतमात्रत्वादित्यर्थः । प्रसिद्धेः संकेतमात्रत्वेन स्वविषये प्रमाणत्वाभावे दृष्टांतमाह (शब्देति) एषा–घटत्वंजातिरित्याद्याका-

राघटत्वादिविषयकजातित्वप्रकारकप्रसिद्धिः (यूपेति) दृष्टादृष्टसंस्कारवान् काष्ठविशेषोयूपः होमाधारसंस्कृताग्निराहवनीय इत्यादिप्रसिद्धिवदित्यर्थः । येन—प्रमाणमूलकत्वहेतुना, परिभाषा—संकेतः, स्वार्थ—स्वविषयं, सापि नीलघटत्वादावुपाधित्वप्रसिद्धिरपि । तत्प्रसिद्धेः—घटत्वादौजातित्वादिप्रसिद्धेः घटत्वनीलघटत्वादौजातित्वोपाधित्वप्रसिद्धेः प्रमाणमूलकत्वाभावस्यासिद्धत्वेहेतुमाह (घटत्वेति) प्रमाणसिद्धत्वात्—घटोऽयंघटोऽयमित्यादिप्रमाणसिद्धत्वात् । अतएव—प्रमाणाभावादेवं ॥

मू०—जातित्वरूपसाध्याप्रसिद्धौ तत्साधकानुमानस्याप्यनवकाशत्वात् ॥

शि०म०—घटत्वादेर्जातित्वे किं प्रत्यक्षमनुमानंवा मानं तत्राद्यन्निरस्य द्वितीयं निरस्यति (जातित्वेति) घटत्वादिकं जातिः उपाधिभिन्नसामान्यधर्मत्वात्सत्तावदित्यनुमानं; न तज्जातित्वे मानं, नित्यैकानेकसमवेतत्वलक्षणजातित्वाप्रसिद्धौ तन्निरूपितव्याप्त्यादिज्ञानाभावेन तत्साध्यकानुमानायोगादित्यर्थः । ननु नित्यत्वादिघटितजातित्वाप्रसिद्धावपि तद्घटकनित्यत्वैकत्वानेकसमवेतत्वानामात्माकाशघटादिषु प्रसिद्धत्वात् घटत्वादौ नित्यत्वसंशयानंतरं तद्विशिष्टे तत्रैकत्वसंशयः, ततस्तदुभयविशिष्टे अनेकसमवेतत्त्वसंशय इति संशयरूपसाध्यप्रसिद्धेः पूर्वपूर्वस्योत्तरोत्तरानुमाने पक्षतावच्छेदकत्वेन निश्चयरूपविशिष्टसाध्यप्रसिद्धेर्वा संभवात्तत्साध्यकानुमानं संभवतीतिचेन्न नित्यत्वैकत्वप्रसिद्धावपि समवायस्याप्रामाणिकत्वेन तद्घटितसाध्याप्रसिद्धेः ॥

म० प्र०—तत्र—घटत्वादेर्जातित्वे किंप्रत्यक्षमनुमानंवा मानमितिपक्षद्वयमध्ये आद्यं घटत्वादेर्जातित्वे प्रत्यक्षं मानमितिपक्षं द्वितीयं घटत्वादेर्जातित्वेऽनुमानं मानमिति द्वितीयपक्षं जातिः—जातित्ववत् (उपाधिभिन्नेति) अनिर्वचनीयबहुपदार्थघटितधर्मान्यतरधर्मरूपोपाधिभिन्नत्वे सति नित्यत्वे सत्यनेकव्यक्तिवृत्तिधर्मत्वादित्यर्थः । घटादौ व्यभिचारनिरासाय नित्यत्वे सतीत्युक्तम् । अखंडोपाधिरूपाभावत्वादौ व्यभिचारनिरासायोपाधिभिन्नत्वे सतीति जलपरमाणुरूपादौव्यभिचारनिवृत्तयेऽनेकव्यक्तिवृत्तित्वमिति । तज्जातित्वे—घटत्वादिनिष्ठजातित्वे (तन्निरूपितेति) जातित्वनिरूपितेत्यर्थः । नित्यत्वादिघटितजातित्वाप्रसिद्धावपि तत्साधकानुमानं संभवतीत्यन्वयः (तत्साध्यकेति) घटत्वादेर्जातित्वसाधकेत्यर्थः । कुतः संभवतीत्याशंक्याह (इतिसंशयरूपसाध्यप्रसिद्धेरिति) इति

शब्दोक्तप्रकारमेवाह (घटत्वादाविति) नित्यत्वसंशयानंतरं घटत्वं नित्यं घटत्वमनित्यमितिवादिविप्रतिपत्तेर्घटत्वं नित्यं नवेति नित्यत्वसंशयानंतरं–तद्विशिष्टे तत्र–अनित्यत्वविशिष्टघटत्वे–एकत्वसंशयः––नित्यत्वविशिष्टं घटत्वमेकंनवेत्येकत्वसंशयः । तदुभयविशिष्टे––नित्यत्वैकत्वविशिष्टघटत्वे: अनेकसमवेतत्वसंशयः–नित्यत्वैकत्वविशिष्टं घटत्वमनेकसमवेतं नवेत्यनेकसमवेतत्वसंशयः । ननुनित्यत्वादीनामप्रसिद्धत्वात्संशयरूपसाध्यप्रसिद्ध्यभाव इत्याशंक्यमैवमित्यभिप्रेत्य संशयरूपसाध्यप्रसिद्धिसत्त्वे हेतुमाह (तद्धटकेति) जातित्वघटकेत्यर्थः । अनुमानं संभवतीति प्रतिज्ञायामेवहेत्वंतरमाह (निश्चयेति) कुतःनिश्चयरूपविशिष्टसाध्यप्रसिद्धिसत्त्वमित्याशंक्याह (पूर्वपूर्वस्येति) घटत्वं नित्यं गुणकर्माभावभिन्नत्वेसति निरवयवत्वादात्मवत्, नित्यघटत्वमेकं नित्यत्वे सति समवायेनानेकवृत्तित्वात्सत्तावत्, नित्यैकघटत्वमनेकसमवेतमुपाधिभिन्नसामान्यधर्मत्वात्सत्तावदिति पूर्वपूर्वस्योत्तरोत्तरानुमाने पक्षतावच्छेदकत्वेनेत्यर्थः (तद्घटितेति) समवायघटितेत्यर्थः ॥

मू०–समवायासिंद्ध्या ब्रह्मभिन्नसकलप्रपंचस्यानित्यतया च नित्यत्वसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च एवमेवोपाधित्वं निरसनीयम् ॥

शि० म०–नच रूपीघट इति ज्ञानं संबंधविषयकं विशिष्टज्ञानत्वाद्दंडी पुरुष इति ज्ञानवदित्यनुमानं समवाये मानमितिवाच्यं, घटाभाववद्भूतलमितिज्ञानवत्स्वरूपसंबंधमादायापि तदुपपत्तेः । इहतंतुषुपटसमवाय इतिप्रत्यक्षं तंतुषुपटसंबंधे प्रमाणं, नतुनित्यसंबंधत्वलक्षणसमवायेपि ब्रह्मभिन्ननिखिलप्रपंचस्यानित्यत्वागमेन तादृशनित्यसंबंधासिद्धेरिति । ननु संयोगभिन्नसाक्षात्संबंधत्वं समवायत्वं, तत्र नित्यत्वाप्रवेशेन तंतुषु पटसमवायाभ्युपगमेपि न प्रपंचानित्यत्वश्रुतिविरोधः । ततश्चानेकसमवेतत्वघटितसाध्यप्रसिद्धिरपि सुसंपादेति यदिब्रूयात्तदाभ्युपेत्यान्यत्र समवायं प्रकृते तदभावेन तद्घटितसाध्यस्य बाधितत्वान्नानुमानावकाश इत्याह (समवायासिद्ध्येति) इह तंतुषु पटसमवाय इति प्रत्यक्षेणान्यत्रसमवायसिद्धावपि इहघटत्वमिति प्रतीतेः सत्त्वे सत्त्वमितिवत्स्वरूपसंबंधेनाप्युपपत्तेर्नघटत्वादौसमवायासिद्धिरितिभावः । (अनित्यतयेति) सृष्टिवाक्यावगतकार्यत्वस्यनिखिलप्रपंचस्य कृतकत्वानुमानेन तद्यथेहेत्यादि श्रुत्याचानित्यत्वावगमादितिभावः (असिद्धेरिति) बाधादित्यर्थः । उक्तदूषणमुपाधित्वेऽप्यतिदिशति (एवमिति) नीलघटत्वादेरुपाधित्वे प्रमाणाभावादित्यर्थः ॥

Funding by IKS-MoE

म० प्र०—(स्वरूपसंबंधमिति) स्वरूपसंबंधश्च संबंधिद्वयसत्त्वं संबंधिद्वयं च रूपंघटश्चरूपस्यरूपत्वेन संबंधित्वं स्वरूपेणसंबंधत्वमितिभावः । तदुपपत्तेः रूपीघट इति ज्ञानोपपत्तेः (तादृशेति) समवायाभिन्नेत्यर्थः (संयोगभिन्नेति) नच स्वरूपसंबंधस्य संयोगभिन्नसाक्षात्संबंधत्वेन स्वरूपसंबंधेतिव्याप्तिरितिवाच्यम् । संयोगभिन्नेत्यनेन संयोगस्वरूपसंबंधभिन्नेत्यस्य विवक्षितत्वादिति, तत्र—संयोगभिन्नसाक्षात्संबंधत्वरूपसमवायत्वे, ततश्च—समवायसिद्धेरेव । अन्यत्र—घटत्वादिजात्यतिरिक्ततंतुषु । प्रकृते—घटत्वादौ, इह—एषु, अन्यत्र—घटत्वादिजात्यतिरिक्ततंतुषु इह—घटे । सत्त्वे—सत्तायाम् । सृष्टिवाक्यावगतकार्यत्वस्य—सृष्टिवाक्यैरवगतंकार्यत्वं यस्मिन्प्रपंचे स तथा तस्य कार्यत्वाश्रयस्य, परममूले (एवमिति) नीलघटत्वादेरुपाधित्वपरिभाषानप्रामाणिकीनीलोयंघट इत्यादिप्रत्यक्षस्य नीलघटत्वादिसद्भावे मानतया नीलघटत्वादेरुपाधित्वेऽमानत्वादुपाधित्वरूपसाध्याप्रसिद्ध्या तत्साधकानुमानानवकाशादित्यादिरीत्या निरसनीयमित्यर्थः ॥

सू०—पर्वतोवह्निमानित्यादौ पर्वतांशे वह्न्यंशेचान्तःकरणवृत्तिभेदांगीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये वृत्तौ न कश्चिद्विरोधः ॥

शि० म०—ननु परोक्षत्वापरोक्षत्वयोर्जातित्वाभावेपि विरुद्धयोः कथमेकत्र ज्ञाने वृत्तिरित्याशंक्य किंवृत्तौ तयोर्वृत्त्यनुपपत्तिश्चैतन्येवा । आद्ये तदाश्रयवृत्त्योर्भेदान्नविरोध इत्यभिप्रेत्य द्वितीये संयोगतदत्यंताभाववदवच्छेदकभेदेन चैतन्येवृत्त्यभ्युपगमान्नविरोध इत्याह (पर्वतइति) ननु घटाकारान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्य तद्गतपरिमाणाद्यवच्छिन्नचैतन्याभिन्नतया तस्य तदंशेपि प्रत्यक्षत्वापत्तिः । नचस्वाकारान्तःकरणवृत्त्युपहितत्वस्यापि विषयविशेषणत्वान्नातिप्रसंग इति वाच्यम्, शुक्तिरूप्यादेरविद्यावृत्त्युपहितस्यान्तःकरणवृत्त्युपहितत्वाभावेन भ्रमप्रत्यक्षाव्याप्तेः । सर्वेश्वरज्ञानस्य मायावृत्तिरूपत्वेन तदवच्छिन्नचैतन्यस्य प्रपंचाकारान्तःकरणवृत्त्युपहितविषयचैतन्याभिन्नत्वाभावेन तत्राव्याप्तेश्च । नच तदाकारवृत्त्युपहितत्वं विषयविशेषणं साच काचिन्मायावृत्तिः क्वचिदन्तःकरणवृत्तिरिति परमेश्वरज्ञानादौ नाव्याप्तिरिवाच्यम्, अस्मदादेर्घटज्ञानसमयेपरिमाणादेः सर्वगतपरमेश्वरीयमायावृत्तिगोचरत्वेन तदंशे तत्प्रसंगतादवस्थ्यात् । किंचसुरभिचंदनमिति ज्ञानेसौरभांशे प्रत्यक्षतास्यादेव स्वाकारवृत्त्युपहितयोग्यविषयचैतन्याभिन्नत्वात् ॥

Funding by IKS-MoE

म० प्र०–विरुद्धयोः–एककाले एकाधिकरणे संबंधशून्ययोः परोक्षत्वापरोक्षत्वयोः । वृत्तिः–संबंधः । वृत्तौ–वृत्त्यात्मकज्ञाने । तयोः–परोक्षत्वापरोक्षत्वयोः । वृत्त्यनुपपत्तिः–संबंधानुपपत्तिः । तदाश्रयवृत्त्योः–परोक्षत्वापरोक्षत्वाश्रयवृत्त्यात्मकज्ञानयोः, नविरोधः–एकज्ञानेपरोक्षत्वापरोक्षत्वयोः संबंधानुपपत्तिर्नभवति । अवच्छेदकभेदेन–अन्तःकरणपरिणामरूपवृत्त्यभिन्नावच्छेदकभेदेन । वृत्त्यभ्युपगमात्–संबंधाभ्युपगमात् परममूले (चैतन्ये इति) पर्वतादिषुप्रमात्मकचैतन्येइत्यर्थः (तद्गतेति) घटादिगतेत्यर्थः । तस्य–घटज्ञानस्य, तदंशे–परिमाणाद्यंशे वृत्त्युपहितत्वस्य–वृत्तिप्रतिबिंबितत्वस्य वृत्तिविषयत्वस्य वा (तदवच्छिन्नेति): मायावृत्त्यवच्छिन्नेत्यर्थः (प्रपंचाकारेति) निखिलवस्त्वाकारेत्यर्थः । तत्र–सर्वेश्वरज्ञाने (तदाकारेति) विषयाकारेत्यर्थः । साच–वृत्तिः (परमेश्वरज्ञानादाविति) अत्रभ्रमप्रत्यक्षमादिशब्दार्थः । तदंशे–परिमाणाद्यंशे (तत्प्रसंगेति) घटज्ञानस्यप्रत्यक्षत्वप्रसंगेत्यर्थः (स्वाकारेति) सौरभाकारेत्यर्थः ॥

शि० म०–नच तत्तदिन्द्रिययोग्यत्वं योग्यपदेन विवक्षितम्, तथासतिशुक्तिरूप्यभ्रमे स्वाप्नगजादिभ्रमेचाव्याप्तेः । अन्तःकरणतद्धर्माणामिन्द्रियायोग्यत्वेन तज्ज्ञानेष्वव्याप्तेश्च । ननु तत्तदिन्द्रियसाक्ष्यन्यतरयोग्यत्वमिहविषयविशेषणं विवक्षितमन्तःकरणतद्धर्माणां साक्षियोग्यत्वान्नदोष इतिचेत्, न, धर्म्मादेरपि प्रमाणव्यापारद्वारासाक्षिवेद्यत्वेन तज्ज्ञानेतिव्याप्तेः । केवलसाक्षियोग्यत्वविवक्षायांच साक्षिपदेनान्तःकरणोपहितचैतन्याभिधाने जीवसाक्ष्ययोग्यधर्माधर्मादिगोचरेश्वरप्रत्यक्षे तथाप्यव्याप्तिः, केवलसाक्षियोग्यत्वमत्रविवक्षितं, तच्चोभयसाक्षियोग्यसाधारणमितिपरमेश्वरज्ञाने नाव्याप्तिरितिचेत् न, जीवेश्वरसाक्षिसाधारणस्य साक्षित्वस्यानिर्वचनात् । निवर्चनेवा धर्मादावीश्वरसाक्षियोग्यत्वमादाय तज्ज्ञानेऽतिव्याप्तेस्तादवस्थ्यात्, नच जीवसाक्षियोग्यत्वघटितमेवेह प्रयोजकं विवक्षितं जीवप्रत्यक्षस्यैव लक्ष्यत्वान्नेश्वरप्रत्यक्षेऽव्याप्तिर्दोष इति वाच्यम्, तदन्यस्य प्रत्यक्षसामान्यलक्षणस्याभावात् । तदुक्तं प्रत्यक्षलक्षणं नयुक्तमिति ॥

म० प्र०–तथासति–योग्यपदेन तत्तदिन्द्रिययोग्यत्वस्य विवक्षितत्वेसति (अव्याप्तेरिति) शुक्तिरूप्यभ्रमादिविषयाणां तत्तदिन्द्रिययोग्यत्वाभावादितिशेषः । इहज्ञानप्रत्यक्षत्वादिप्रयोजके, नदोषः–अव्याप्तिरूपदोषात्यंताभावः (प्रमाणव्यापारद्वारेति) प्रमाणं व्याप्तिज्ञानादिकंतेषां व्यापारः तत्संस्कारादिरूपः तद्द्वाराऽहंधर्मवान्सुखित्वादिति साक्षिवेद्यत्वेन, अथवा प्रमाणं व्याप्तिज्ञानादिकं तेषां व्यापार-

कार्य्यमनुमित्यादिकं तद्द्वारासाक्षिवेद्यत्वेनेत्यर्थः । केवलसाक्षियोग्यत्वविवक्षायाम्–प्रामाण्यव्यापाराद्वारकसाक्षियोग्यत्वविवक्षायाम् । अत्र–ज्ञानप्रत्यक्षत्वादिप्रयोजके । तत्र–केवलसाक्षियोग्यत्वंच उभयसाक्षियोग्यसाधारणम्–जीवेश्वरसाक्षियोग्येषुपदार्थेषु वृत्ति ?। साधारणस्य–वृत्तेः, निर्वचने–मायान्तःकरणान्यतरोपहितत्वं जीवेश्वरसाक्षित्वमितिनिर्वचने, तज्ज्ञाने–धर्मादिज्ञाने इह–ज्ञानप्रत्यक्षत्वादौ, एतदन्यस्य–प्रमाणचैतन्यस्य तत्तदिन्द्रियतत्तज्जीवसाक्ष्यन्यतरयोग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वरूपलक्षणाद्भिन्नस्य, प्रत्यक्षसामान्यलक्षणस्य–जीवेश्वरप्रत्यक्षवृत्तिप्रत्यक्षत्वादिप्रयोजकस्य, तत्–तस्माज्जीवेश्वरप्रत्यक्षवृत्त्यैकप्रत्यक्षत्वादिप्रयोजकाभावात् ॥

मू०–तथाच तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम् ॥

शि०म०–उच्यते तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यतत्तत्साक्षिजन्यतत्तदाकारवृत्त्युपहितविषयावच्छिन्नचैतन्याभिन्नत्वंतत्तत्साक्षिजन्यतत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य तत्तद्विषयांशेप्रत्यक्षत्वं साक्षीच ज्ञानोपादानोपहितं चैतन्यं वृत्तिलक्षणज्ञानोपादानंच मायान्तःकरणमिति तदुपहितयोर्जीवेश्वरयोस्साक्षिणोर्नलक्षणाव्याप्तिः । तथाच घटज्ञानस्य न तद्गतपरिमाणांशे प्रत्यक्षत्वंतस्य तदापरमेश्वरीयसाक्षिजन्यवृत्तिगोचरत्वेपि तद्वृत्तेरस्मदादिसाक्ष्यजन्यत्वेन तत्साक्षिजन्यस्वाकारवृत्त्युपहितविषयचैतन्याभिन्नत्वाभावान्नापि धर्मादिज्ञानेऽतिव्याप्तिः।तस्यास्मदादिसाक्षियोग्यत्वाभावात्तदेतत्सर्वमभिप्रेत्याह (तथाचेति) लक्षणप्रविष्टविशेषणानां प्रयोजनेसिद्धेसतीत्यर्थः । ननूक्तप्रत्यक्षलक्षणस्य घटादावतिव्याप्तिरित्याशंक्य तादृशवृत्त्यवच्छिन्नचैतन्यस्यैवात्रलक्ष्यत्वात्तद्व्यावृत्तिर्नदोष इत्याह (तत्तदाकारेति) ॥

म० प्र०–(तत्तदिन्द्रियेति) तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यश्चासौ तत्तत्साक्षिजन्यतत्तदाकारवृत्त्युपहितविषयस्तदवच्छिन्नचैतन्यनिरूपिताभेदवत्त्वं तत्तत्साक्षिजन्यतत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य घटपटादिविषयाभिन्नांशनिरूपितप्रत्यक्षत्वमित्यर्थः । वृत्त्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वमित्युक्तेऽयंघट इत्यादिज्ञानस्य परिमाणाद्यंशे प्रत्यक्षत्वं स्यात्तद्वारणाय तत्तदाकार वृत्त्युपहितेति विषयविशेषणम् । यद्यद्विषयनिरूपितं ज्ञाननिष्ठंप्रत्यक्षत्वंविवक्षितं तत्तदाकारवृत्त्युपहितत्वमपि विषयस्यापेक्षितमिति तदर्थः । परिमाणाद्याकारेश्वरवृत्त्युपहितत्वस्य परिमाणादिविषयेषु सत्त्वेन पुनरयंघट इत्यादिज्ञानेष्वतिव्याप्तेः सत्त्वात्तद्वारणाय

तत्तत्साक्षिजन्येति वृत्तिविशेषणं वृत्तिं प्रत्युपाधेः कारणत्वेनोपहिते आरोपाच्चैतन्यस्य विवर्तकारणत्वस्वीकाराद्वा यद्यत्साक्षिज्ञानस्यापरोक्षत्वमपेक्षितं तत्तत्साक्षिजन्यत्वं वृत्तेर्विवक्षितमिति तदर्थः । धार्मिकोहमित्यादौप्रमाणद्वारा धर्मादिज्ञानेतिव्याप्तिनिरासाय तत्तत्केवलसाक्षियोग्येतिविषयविशेषणम् । जीवस्यघटादिप्रत्यक्षेऽव्याप्तिवारणायेन्द्रियेति, सौरभांशविषयकसुरभिचंदनमितिज्ञानेऽतिव्याप्तिवारणाय तत्तदितीन्द्रियविशेषणम् । यद्यदिन्द्रियजन्यज्ञानेऽपरोक्षत्वमपेक्षितं तत्तदिन्द्रिययोग्यत्वं विवक्षितमितितदर्थः । असंभववारणायान्यतरेति साक्षिण एव स्वविषयकव्यवहारजनकत्वेन साक्षिणः केवलसाक्षियोग्यत्वान्नतत्त्वमस्यादिवाक्यजन्यज्ञानेऽव्याप्तिः । अयंघटः इत्यादिज्ञानेषु परिमाणाद्यंशनिरूपितप्रत्यक्षत्वापत्तिवारणाय विषयोपाधिवृत्तेस्तत्तत्साक्षिजन्यत्वस्य तत्तदाकारत्वस्यच कीर्तनाच्चैतन्योपाधिवृत्तेस्तत्तत्साक्षिजन्यत्वस्य तत्तदाकारत्वस्यच वारयितुमशक्यत्वेन चैतन्योपाधिवृत्तेस्तत्तत्साक्षिजन्यत्वस्य तत्तदाकारत्वस्यच कीर्तनं, नत्वतिव्याप्त्यादिनिरासार्थमितिध्येयमिति (लक्षणेति) ज्ञानप्रत्यक्षत्वादिप्रयोजकेत्यर्थः । उक्तप्रत्यक्षलक्षणस्य—उक्तप्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकस्य (तादृशेति) तत्तत्साक्षिजन्यतत्तदाकारेत्यर्थः । अत्र—उक्तप्रत्यक्षलक्षणे तद्व्यावृत्तिः—उक्तलक्षणस्य घटादिष्ववृत्तित्वम् ॥

मू०—द्वितीये घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम् ॥

शि० म०—विषयस्य प्रत्यक्षत्वे प्रयोजकांतरानिरूपणात्सोप्यत्र लक्ष्यएवेत्याशंक्य तत्रान्यत्प्रयोजकमस्तीत्याह (घटादेरिति) तुशब्दो लक्षणांतरव्यावृत्त्यर्थः । इन्द्रियजन्यज्ञानविषयत्वं स्वज्ञानजनकेन्द्रियसन्निकर्षाश्रयत्वमन्यद्वा, विषयप्रत्यक्षलक्षणं न भवतीत्यर्थः । न्यायमते अनुमितेर्मनइन्द्रियजन्यत्वेन तद्विषयपरमाण्वादावुक्तलक्षणस्यातिव्यापकत्वादन्तःकरणतद्धर्म्मादिष्वव्यापकत्वाच्चेतिभावः । (प्रमात्रभिन्नत्वमिति) यद्यपि प्रत्यक्षज्ञानविषयत्वं विषयस्य प्रत्यक्षत्वंज्ञानेच प्रत्यक्षत्वं पूर्वोक्तविषयचैतन्याभिन्नत्वं विवक्षितमितिस्वांशेप्रत्यक्षमनुमित्यादिज्ञानमादायानुमेयादौ नातिप्रसंगः । तद्विषयत्वंच तादृशवृत्त्यवच्छिन्नचैतन्यस्य यद्विषयांशे प्रत्यक्षत्वं तत्त्वमिति न सौरभादौ तत्प्रसंगः । यद्वा योग्यत्वेसति विषयचैतन्याभिन्नप्रमाणचैतन्यविषयत्वं घटादेर्विषयस्य प्रत्यक्षत्वं तथापि विषयस्यापरोक्षत्वं संविदभेदादिति विवरणे तत्र तत्र च सांप्रदायिकैः प्रमात्रभेदस्यैव विषयप्रत्यक्षलक्षणत्वेनाभिधानादेवमुक्तम् ॥

Funding by IKS-MoE

स० प्र०—सोपि-घटादिविषयोपि, अत्र—उक्तलक्षणे, तत्र—घटादिनिष्ठप्रत्यक्षत्वादौ (लक्षणांतरव्यावृत्त्यर्थ इति)—तुशब्दस्यभिन्नस्थानकत्वेन प्रमात्रभिन्नत्वमेवघटादिविषयस्य प्रत्यक्षत्वं नत्वन्यदितिलक्षणांतरव्यावृत्त्यर्थ इत्यर्थः । एतदेवदर्शयति (इन्द्रियजन्येति । स्वज्ञानेति) घटादिविषयज्ञानेत्यर्थः । अन्यद्वा—ज्ञानाकरणकज्ञानविषयत्वमित्यादिवा (परमाण्वादाविति) अत्रेन्द्रियादिरादिपदार्थः (अतिव्यापकत्वादिति) अतिव्याप्तिग्रस्तत्वादित्यर्थः (अव्यापकत्वादिति) द्विविधलक्षणस्याव्याप्तिग्रस्तत्वादित्यर्थः । इति—अस्माद्धेतोः । स्वांशेप्रत्यक्षं—अनुमित्याद्यंशेचित्त्वरूपप्रत्यक्षत्ववत्, अनुमित्यादिज्ञानं अनुमित्यादिरूपं ज्ञानमनुमिनोमीत्याद्यनुव्यवसायरूपानुमित्यादिविषयकज्ञानं वा । नातिप्रसंगः—नातित्याप्तिः । तद्विषयत्वं—पूर्वोक्तापरोक्षज्ञानविषयत्वम् (तादृशवृत्तीति) तत्तत्साक्षिजन्यतत्तदाकारवृत्तीत्यर्थः । (यद्विषयांशेइति) यद्विषयाभिन्नांशनिरूपितेत्यर्थः । तत्त्वं—तादृशविषयनिष्ठविषयत्वम् । इति—अस्माद्धेतोः, नसौरभादौतत्प्रसंगः—चंदनाकारवृत्त्यवच्छिन्नचैतन्यनिष्ठसौरभांशनिरूपितप्रत्यक्षत्वाभावेन सुरभिचंदनमितिज्ञानेसति नसौरभादौप्रत्यक्षत्वप्रसक्तिः । तथापि—घटादिविषयनिष्ठपूर्वोक्तप्रत्यक्षत्वसंभवेपि, संविदभेदात्—प्रमातृरूपचैतन्याभेदात् इतिविवरणेऽभिधानादित्यन्वयः । तत्र तत्र—तस्मिन्तस्मिन्वेदांतग्रंथे, एवमुक्तम्—घटादिविषयस्य प्रमात्रभिन्नत्वघटादिविषयस्यापरोक्षत्वमुक्तम् ॥

मू०—ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभेदः, अहमिदं पश्यामीतिभेदानुभवविरोधादितिचेत् ॥

शि०प्र०—नच विज्ञानवादापत्तिः, यत्किंचित्साम्यस्य सर्वसिद्धांतेपि तुल्यत्वात् । विषयस्य संविदभेदेपि विज्ञानक्षणिकत्वविषयासत्त्वानभ्युपगमेन सर्वसाम्याभावात् । ननु प्रमात्रभेदोह्यन्तःकरणविशिष्टचैतन्याभेदः, सच न विषयस्य प्रत्यक्षत्वव्यवहारप्रयोजकः, जडस्य घटादेस्तदभेदायोगात् । नच प्रमात्रभेदज्ञानविषयत्वं विषयस्य प्रत्यक्षत्वमन्तःकरणस्येन्द्रियद्वारा घटादिदेशनिर्गमनेन तदवच्छिन्नस्य प्रमातुर्विषयचैतन्याभिन्नतया घटस्सन्निति विषयचैतन्याभेदप्रत्ययस्यतदभेदप्रत्ययत्वात् । अनुमित्यादिस्थलेच प्रमातुर्विषयचैतन्याद्भिन्नतया वह्न्यादौ तदभेदप्रत्ययस्य प्रमात्रभेदप्रत्ययत्वाभावान्नातिव्याप्तिरितिवाच्यम् । विषयचैतन्यस्य तदाप्रमात्रभेदेप्यहं मनुष्य इतिवदहंघट इति प्रतीत्यापत्त्या अहमिमंपश्यामीतिप्रमातृभेदप्रत्यक्षविरोधेनच घटस्सन्नित्यादिप्रतीतेस्तदभेदविषयत्वाभावात्, ततश्च न युक्तमिदं लक्षणमिति चोदयति (नन्विति) ॥

Funding by IKS-MoE

म० प्र०–विज्ञानवादापत्तिः–बौद्धमतप्रवेशः (तुल्यत्वादिति) यथानैयायिकमतेघटादीनामनित्यत्वादिकंतथाममनयोपिघटादीनामनित्यत्वादिकमित्यादिरीत्या यत्किचितसाम्यस्य तुल्यत्वादित्यर्थः । ननु–तवमतेबौद्धमतसर्वसाम्येन बौद्धमतप्रवेशस्तदवस्थ्य इत्याशंक्य, मैवमित्यभिप्रेत्यहेतुमाह (सर्वसाम्याभावादिति)–स्वमतेबौद्धमतसर्वसाम्याभावेहेतुमाह (विषयस्येति) तदभेदायोगात्–अन्तःकरणविशिष्टचैतन्याभेदायोगात् । प्रमात्रभेदज्ञानविषयत्वं–घटादिविषयस्य प्रमात्रासह यदभेदज्ञानं घटः सन्नित्यादिज्ञानं तद्विषयत्वम् । ननु सन्घट इति ज्ञानस्य विषयचैतन्याभेदप्रत्ययत्वेन प्रमात्रभेदज्ञानत्वाभावात्कथं प्रमात्रभेदज्ञानविषयत्वं विषयस्य प्रत्यक्षत्वमित्याशंक्य, उक्तप्रतिज्ञायां हेतुमाह (घटः सन्निति) विषयचैतन्याभेदप्रत्ययस्य–विषयचैतत्येन साकं योघटादीनामभेदप्रत्ययस्तस्य, तदभेदप्रत्ययत्वात्–प्रमात्रभेदप्रत्ययत्वात् उक्तप्रत्ययस्य प्रमात्रभेदप्रत्ययत्वेहेतुमाह (अंतःकरणस्येत्यादिना) नन्वेवमनुमेयवह्न्यादेरपि वह्निःसन्नित्यादिप्रत्ययविषयत्वादनुमेयवह्न्यादावतित्याप्तिरित्याशंक्याह (अनुमित्यादिस्थलेइति) अनुमित्यादिकाले इत्यर्थः वह्न्यादौ–अनुमेयवह्न्यादौ, अस्यनातिव्याप्तिरित्यनेनान्वयः । अनुमेयवह्न्यादावतिव्याप्त्यभावेहेतुमाह (तदभेदप्रत्ययस्येति) वह्निः सन्नित्यादिविषयचैतन्याभेदप्रत्ययस्येत्यर्थः । तदभेदप्रत्ययस्य प्रमातृचैतन्याभेदप्रत्ययत्वाभावेहेतुमाह (प्रमातुरिति) नच वाच्यमितिप्रतिज्ञायांहेतुमाह (घटःसन्नित्यादिप्रतीतेरिति । तदभेदेति) प्रमातृचैतन्याभेदेत्यर्थः । घटस्सन्नित्यादिप्रत्ययस्य प्रमातृचैतन्याभेदविषयत्वाभावेहेतुद्वयमाह (विषयचैतन्यस्येत्यादिना) तदा–अयंघटइतिज्ञानकाले । ततश्च–प्रमात्रभेदज्ञानविषयत्वासंभवाच्च ॥

सू०–उच्यते । प्रमात्रभेदोनाम न तावदैक्यं किंतु प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः । तथाच घटादेः स्वावच्छिन्नचैतन्याध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता अधिष्ठानसत्तातिरिक्ताया आरोपितसत्ताया अनंगीकारात् । विषयचैतन्यंच पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्तानान्येति सिद्धं घटादेरपरोक्षत्वम् ॥

शि०म०–सिद्धांतवादी तु प्रमात्रभिन्नत्वं नाम न तावदैक्यं नवा तदभेदभ्रमविषयत्वं किंत्वन्यदेव तद्विवक्षितमित्याह (उच्यते इति)

ननु प्रमातृप्रमेयनिष्ठसत्ताजातेरेकत्वेन तन्निष्ठसत्तातिरिक्तसत्ताया अप्रसिद्धिः प्रसिद्धौ वा वह्न्यादेरनुमेयस्यापि प्रमातृनिष्ठसत्तावत्त्वेनातिव्याप्तिः, प्रमातृरूपत्वविवक्षायां घटस्सन्नित्यादिप्रतीतिसिद्धाया घटादिसत्तायाः प्रमातृलक्षणसत्तातिरिक्तत्वेन तत्र लक्षणाव्याप्तिरित्यत आह (तथाचेति) प्रमातृलक्षणसत्तातिरिक्तसत्ताकत्वाभावे लक्षणे विवक्षिते साति घटादेरपरोक्षत्वं सिद्धमिति संबंधः । किंघटादेरतिरिक्तसत्ताजातिमत्त्वात् तत्राव्याप्तिः अबाधितत्त्वलक्षणसत्ताधर्मवत्त्वाद्वा प्रमातृव्यतिरिक्तविषयचैतन्यलक्षणसत्तावत्त्वाद्वा । तत्राद्यमतिरिक्तसत्ताजात्यनभ्युपगमान्निराकृत्य द्वितीयं निरस्यति (घटादेरिति) ननु घटादेरपि घटःसन्नित्यादि प्रतीतिबलादस्त्वतिरिक्तंसत्त्वं नचासौ भ्रमः तथाप्यनिर्वचनीयसत्त्वधर्मसंभवादित्यत आह (अधिष्ठानेति) तत्प्रतीतेरधिष्ठानसत्ताविषयत्वेन तदंशे अन्यथाख्यातित्वान्नानिर्वचनीयसत्त्वसिद्धिरितिभावः । तृतीयं निराचष्टे विषयेति ॥

म० प्र०—तत्—प्रमात्रभिन्नत्वम् (तन्निष्ठेति) प्रमातृचैतन्यनिष्ठेत्यर्थः (अप्रसिद्धिरिति) तथाचप्रतियोगिज्ञानभावान्नाभावज्ञानमितिभावः । प्रसिद्धौवा—प्रमातृप्रमेयचैतन्यनिष्ठायासत्तारूपाजातिस्तदतिरिक्तापि, क्वचित्काचित्सत्तास्तीत्यंगीकारे अतिव्याप्तौहेतुमाह (वह्न्यादेरिति) प्रमातृरूपत्वविवक्षायाम्—प्रमातृसत्ताशब्देन प्रमातृचैतन्याभिन्नसत्ताविवक्षायाम्, तत्र—घटादौ, तत्राद्यं—पक्षत्रये आद्यम् । तत्प्रतीतेः—घटःसन्नित्यादिप्रतीतेः । तदंशे—सत्तांशविषयकघटः सन्नित्यादिज्ञाने (सिद्धिरिति) घटादावितिशेषः । परममूले (पूर्वोक्तेति) यथा तडागोदकं छिद्रान्निर्गत्येत्यादिवाक्योक्तेत्यर्थः । परममूले (प्रमातृसत्तैवेति) प्रमातृचैतन्याभिन्नसत्तैवेत्यर्थः ॥

मू०—अनुमित्यादिस्थलेन्तःकरणस्य वह्न्यादिदेशानिर्गमनाभावेनवह्न्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकतयावह्न्यादि सत्ताप्रमातृसत्तातोभिन्नेति नातिव्याप्तिः । नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मयोः प्रत्यक्षत्वापत्तिः धर्माद्यवच्छिन्नचैतन्यस्य प्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमातृसत्ताऽनतिरेकादितिचेत् न, योग्यत्वस्यापिविषयविशेषणत्वात् । नन्वेवमपि रूपी घट

इति प्रत्यक्षस्थले घटगतपरिमाणादेःप्रत्यक्षत्वापत्तिः रूपावच्छिन्नचैतन्यस्य, परिमाणाद्यवच्छिन्नचैतन्यस्य चैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृचैतन्याभेदे परिमाणाद्यवच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया परिमाणादिसत्तायाः प्रमातृसत्तातिरिक्तत्वाभावादितिचेत्, न तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात् । रूपाकारवृत्तिदशायां परिमाणाद्याकारवृत्त्यभावेन परिमाणाद्याकारवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्यभावात् ॥

शि०म०–ननु चैतन्यसत्तातिरिक्तसत्ताकत्वाभाव एव लक्षणमस्तु तस्य घटादावपि सत्त्वाल्लाघवाच्चेत्याशंक्य प्रमातृविशेषणव्यावर्त्यमाह (अनुमित्यादीति) ननु प्रमातृत्वघटितलक्षणस्य वह्न्यादावतिव्याप्त्यभावेपि स्ववृत्तिधर्मादावतिव्याप्तिर्दुर्वारा इति शंकते (नन्वेवमपीति । योग्यत्वस्येति) तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्तरयोग्यत्वस्येत्यर्थः ॥

म० प्र०–चैतन्यसत्ता–चैतन्याभिन्नसत्ता, लक्षणम्–घटादिनिष्ठं प्रत्यक्षत्वं घटादिनिष्ठप्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकं वा (तस्येति) घटादावपीत्यपिशब्दस्य तस्येत्यनेनान्वयः । तथाच चैतन्याभिन्नसत्तातिरिक्तसत्ताकत्वाभावरूपविषयप्रत्यक्षलक्षणस्यापीत्यर्थः । लाघवाच्च–अन्तःकरणविशिष्टचैतन्यरूपप्रमातृचैतन्यनिवेशाभावेनास्मिंल्लक्षणेलाघवाच्च । परममूले (नन्वेवमपि रूपीति) योग्यत्वे सति प्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यत्वमिति घटादिविषयनिष्ठप्रत्यक्षत्वनिर्वचनेन धर्मादावतिव्याप्त्यभावेपीत्यर्थः। परममूले (तत्तदाकारवृत्तीति) तत्तद्विषयकवृत्तीत्यर्थः ॥

मू०–नन्वेवं वृत्तावतिव्याप्तिः अनवस्थाभियावृत्तिगोचरवृत्त्यनंगीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादितिचेत् ॥

शि०म०–नन्वेवं, वृत्तावतिव्याप्तिःतस्याः स्वगोचरत्वे मानाभावात वृत्त्यन्तराभ्युपगमे अनवस्थानाच्च । तत्र स्वाकारवृत्त्युपहितत्त्वघटितलक्षणाभावात् नच वृत्तिःस्वविषया ज्ञानत्वाद्ब्रह्मस्वरूपनित्यज्ञानवदित्यनुमानं तत्र मानमितिवाच्यम्, वृत्तौज्ञानत्वाभावेन हेतोः स्वरूपासिद्धत्वात, वृत्तिलक्षणज्ञानत्वविवक्षायां दृष्टांते साधनवैकल्यात, उभयसा-

Funding by IKS-MoE

धारणस्य च ज्ञानत्वस्याभावात् । ज्ञानपदवाच्यत्वमुभयसाधारणमितिचेत् न, चक्षुरादेरपि करणव्युत्पत्त्या तत्पदवाच्यत्वेन व्यभिचारात् । वृत्तौज्ञानपदस्यगौणत्वेन तत्पदवाच्यत्वाभावात्--आत्मत्वस्योपाधित्वात् । वृत्तिर्नस्वविषया, जडत्वात्, घटवदित्यनुमानेन प्रतिरोधाच्च । किंच वृत्तेः स्वविषयत्वे आत्मवत्स्वप्रकाशत्वापत्तिः, नचेष्टापत्तिः, आत्मैव स्वप्रकाश इतिसिद्धान्तभंगापत्तेः । नच वृत्तिरपिस्वप्रकाशा स्वसत्तायां प्रकाशाव्यभिचारित्वावगमात् आत्मवदिति वाच्यम्, सुखादौ व्यभिचारात् । नचतत्रापीष्टं स्वप्रकाशत्वम्, तत्र तदाकारवृत्त्यभ्युपगमात् स्वप्रकाशात्मसंबंधेनैवान्येषां प्रकाशोपपत्तावनेकस्वप्रकाशत्वकल्पने गौरवात् । आत्मैवास्य ज्योतिरिति श्रुतिविरोधाच्च । तस्मान्नयुक्तं वृत्तेः स्वविषयत्वम् । ततश्च दृढा तत्र लक्षणाव्याप्तिरितिशंकते (नन्वेवमिति) स्वाकारवृत्त्युपहितत्वस्य प्रमातृविशेषणत्वे इत्यर्थः ॥

म० प्र०–एवं–तत्तदाकारवृत्त्युपहितत्वस्य प्रमातृविशेषणत्वे, ननु वृत्तावव्याप्त्यभिधानमनुपपन्नमित्याशंक्याव्याप्तौहेतुमाह (तत्रेति) वृत्तावित्यर्थः । वृत्तौ लक्षणाभावे हेतुद्वयमाह (तस्याइत्यादिनेति) तस्याः–वृत्तेरित्यर्थः (नित्यज्ञानवदिति) नच चितः स्वविषयत्वे जडत्वापत्तिरिति वाच्यम्, स्वभिन्नचिद्विषयत्वस्य जडत्वप्रयोजकत्वादिति । तत्र–वृत्तिनिष्ठस्वविषयकत्वे । तत्पदवाच्यत्वेन–ज्ञानपदवाच्यत्वेन, ज्ञानपदवाच्यत्वरूपहेतोः स्वरूपासिद्धिमप्याह (तत्पदवाच्यत्वाभावादिति) ज्ञानपदवाच्यत्वाभावादित्यर्थः । वृत्तौज्ञानपदवाच्यत्वाभावेहेतुमाह (वृत्ताविति) गौणत्वेन–लाक्षणिकत्वेन, वृत्तावमुख्यज्ञानत्वमादाय हेतावुपाधिमप्याह (आत्मत्वस्येति) प्रतिरोधाच्च–बाधाच्च, सत्प्रतिपक्षितत्वाच्च वा । स्वसत्तायाम्–स्वनिष्ठविद्यमानत्वेसति (प्रकाशाव्यभिचारित्वेति) ज्ञानव्यभिचारित्वेत्यर्थः । (सुखादौव्यभिचारादिति) सुखादौस्वप्रकाशत्वरूपसाध्याभावेपि सुखादेर्ज्ञातसत्ताकत्वाद्यदासुखादिकं भवति तदैवसुखादिज्ञानसत्त्वेन सुखादेः स्वसत्तायां प्रकाशाव्यभिचारित्वसत्त्वादित्यर्थः । तत्रापि–सुखादावपि । (अस्येति) कार्य्यकरणसंघातरूपदृश्यस्येत्यर्थः ॥

सू०–न, अनवस्थाभिया वृत्तेर्वृत्त्यंतराविषयत्वेपि स्वविषयत्वाभ्युपगमेन स्वविषयवृत्त्युपहितप्रमातृचैतन्यसत्ताभिन्नसत्ताकत्वस्य तत्रापि संभवात् ॥

Funding by IKS-MoE

शि० म०-परिहरति (नानवस्थेति) इदमत्राकूतमस्ति तावद्वृत्तिगोचरानुभवः घटमहंजनामीति, स च न वृत्त्यंतरम् । तत्रापि वृत्त्यंतराभ्युपगतावनवस्थानात् । नच चैतन्यमेव तदनुभवस्तथासति व्यवहितपदार्थस्यापि तेन भानप्रसंगात् । सन्निहितप्रकाशकत्वेच घटज्ञानसमये तद्गतपरिमाणादेरपि तत्प्रसंगात् । स्वसत्तायां प्रकाशव्यभिचारादावरणभंगार्थं परिमाणादौ वृत्त्यभ्युपगम इतिचेत्, तर्हि सुखादेर्वृत्तिंविनापि चैतन्येन प्रकाशप्रसंगात् । यदिच प्रत्यक्षत्वसिद्धये चैतन्यलक्षणानुभवस्याविनाशिनस्संस्कारजनकत्वाभावेन स्मरणोपपत्तये च सुखादौतदाकारवृत्त्युपगम इति, तदाप्रकृतेऽपि तुल्यम् । एवं चवृत्तिःस्वविषया अन्याप्रकाश्यत्वेसति प्रकाश्यमानत्वादात्मवदित्यनुमानं वृत्तेःस्वविषयत्वे प्रमाणम् ॥

म० प्र०-तदनुभवः-वृत्तिविविषयकानुभवः । तथासति-चैतन्यस्य वृत्तिविषयकानुभवरूपत्वांगीकारे सति, तेन-चैतन्येन । ननु चैतन्यस्य सन्निहितपदार्थप्रकाशकत्वमेव नतुव्यवहितप्रकाशकत्वं तथाच व्यवहितभानापत्तिर्नदोष इत्याशंक्याह (सन्निहितेति । तद्गतेति) घटगतेत्यर्थः (स्वसत्तायामिति) यत्रस्वसत्तायां प्रकाशव्यभिचारित्वं तत्रावरणभंगार्थं वृत्यभ्युपगमइति व्याप्त्याघटगतपरिमाणादौ वृत्तेरावश्यकत्वेन घटज्ञानसमये परिमाणादिविषयकवृत्तिंविना चैतन्येन घटगतपरिमाणादेर्भानापत्तिर्नेतिभावः । तर्हि-आवरणभंगार्थं वृत्त्यभ्युपगमे (प्रकाशप्रसंगादिति) सुखादीनांप्रकाशाव्यभिचारित्वेनावरणाभावादितिशेषः । प्रकृतेपि-वृत्तिरूपज्ञानेपि तुल्यं-वृत्तौवृत्यंतराभ्युपगमेऽनवस्थाभियावृत्तावपि प्रत्यक्षत्वसिद्धये स्मरणोपपत्तये च स्वविषयकत्वं स्वीकरणीयमिति तुल्यम् । एवंच-वृत्तेः प्रत्यक्षत्वादिसिद्धये स्वविषयकत्वेऽवश्यकेच सति अन्याप्रकाश्यत्वेसति-स्वसजातीयान्याविषयत्वे सति, प्रकाश्यमानत्वात्-चिद्दृश्यत्वात्, घटादौ व्यभिचारवारणाय सत्यंतम् । तुच्छेव्यभिचारवारणाय प्रकाश्यमानत्वादित्युक्तम् । (स्वविषयत्वे प्रमाणमिति) । नचैवमेकस्यैकदाकर्तृकर्मत्वविरोध इति वाच्यम्, नैयायिकमते सर्वं ज्ञानं गुण इत्यनुमितिवदनुव्यवसायवच्च वृत्तेः स्वविषयत्वाभ्युपगमे विरोधाभावादिति ॥

सू०—एवं चान्तःकरणतद्धर्मादीनां केवलसाक्षिविषयत्वेऽपि तत्तदाकारवृत्त्यभ्युपगमेनोक्तलक्षणस्य तत्रापि सत्त्वात् नाव्याप्तिः । न चान्तःकरणतद्धर्मादीनां वृत्तिविषयत्वाभ्युपगमे

Funding by IKS-MoE

केवलसाक्षिवेद्यत्वाभ्युपगमविरोध इति वाच्यम्, नहि वृत्तिं विना साक्षिविषयत्वं केवलसाक्षिवेद्यत्वं किंत्विन्द्रियानुमानादिप्रमाणव्यापारमंतरेण साक्षिविषयत्वम् ॥

शि०म०–नचात्मत्वमुपाधिः सर्वं ज्ञानं गुण इत्यनुमितेर्न्यायमतेपि स्वविषयत्वाभ्युपगमेन तत्र व्यभिचारेणोपाधेस्साध्याव्यापकत्वात् । अत एव नस्वविषयत्वाभावसाधकेन जडत्वेनास्य प्रतिरोधः उक्तानुमितौ व्यभिचारात् । नच वृत्तेःस्वाविषयत्वे स्वप्रकाशत्वापत्तिः, जडत्वेन तस्याःस्वावच्छिन्नचैतन्यप्रकाश्यत्वाभ्युपगमादिति । एवं वृत्तावव्याप्तिंनिराकृत्य प्रातिभासिकरजतादावन्तःकरणे तद्धर्मेषु च कामादिषु नाव्याप्तिरित्याह (एवंचेति) उक्तन्यायेनान्तःकरणादावपि स्वाकारवृत्तिविषयत्वे सिद्धे इत्यर्थः । तर्हिकथमन्तःकरणादेःकेवलसाक्षिवेद्यत्वप्रवाद इत्याशंक्य प्रमाणव्यापारानपेक्षसाक्षिविषयत्वं केवलसाक्षिवेद्यत्वं ततो न विरोध इत्याशयवानाह (केवलेति) इममाशयमजानानस्यापसिद्धान्तशंकां निराकरोति (नचेति) स्वाशयमुद्घाटयति (नहीति) ॥

म० प्र०–नचेति प्रतिज्ञायां हेतुमाह (उपाधेरिति) उपाधिनिष्ठसाध्याव्यापकत्वे हेतुमाह (तत्रव्यभिचारेणेति) सर्वं ज्ञानं गुणः गुणत्वव्याप्यजातिमत्त्वादित्यनुमानजन्यानुमितौ व्यापकीभूतोपाध्यभावे सति स्वविषयत्वरूपसाध्यस्य सत्त्वेनेत्यर्थः । व्यभिचारसत्त्वे हेतुमाह (सर्वमित्यादिना । स्वविषयत्वाभ्युपगमेनेति) सर्वं ज्ञानं गुण इत्यनुमितेः सर्वज्ञानवृत्तिगुणत्वविषयकत्वेन स्वस्या अपिसर्वान्तःपातित्वादितिशेषः । अतएव–वक्ष्यमाणहेतोरेव, अस्य–वृत्तिः स्वविषयेत्यादिनोक्तानुमानस्य, प्रतिरोधः–बाधितत्वं सत्प्रतिपक्षितत्त्वं वा । वक्ष्यमाणहेतुमाह । (उक्तानुमिताविति) ननु प्रातिभासिकरजतस्यान्तःकरणतद्धर्मकामादेश्च केवलसाक्षिविषयत्वेनवृत्तिविषयत्वाभावात्प्रातिभासिकरजतादावव्याप्तिरित्याशंकां मनसि निधायाह (एवमित्यादिना) उक्तन्यायेन–इदमत्राकूतमित्यादिवाक्यसंदर्भोक्तन्यायेन तर्हि–अन्तःकरणादीनां वृत्तिविषयत्वाभ्युपगमे सति । ततः–केवलसाक्षिवेद्यत्वस्य प्रमाणव्यापारमन्तरेण साक्षिविषयत्वरूपत्वात्, नविरोधः–अन्तःकरणादिषु केवलसाक्षिवेद्यत्वस्यानुपपत्तिर्नास्ति ॥

मू०–अत एवाहंकारटीकायामाचार्य्यैरहमाकारान्तःकरणवृत्तिरंगीकृता । अत एव च प्रातिभासिकरजतस्थले रजताकारा-

विद्यावृत्तिः सांप्रदायिकैरंगीकृता । तथाचान्तःकरणतद्धर्मादिषु केवलसाक्षिवेद्येषु वृत्त्युपहितत्वघटितलक्षणस्य सत्त्वान्नाव्याप्तिः ॥

शि० म०-नचायमपराद्धान्त इत्याह (अतएवेति) अहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यस्य विषयभावमापद्यते इत्यहंकारटीकाविवरण इत्यर्थः । अव्याप्तिनिराकरणमुपसंहरति (तथाचेति) आदिपदाच्छुक्तिरूप्यादिपरिग्रहः । नतु ब्रह्मणो ज्ञानरूपत्वेनात्रालक्ष्यतया तत्रातिव्याप्तिः, तस्य प्रमातृसत्तारूपत्वेन तदतिरिक्तसत्ताशून्यत्वात् । घटादेश्चप्रमातृसत्तातिरिक्तव्यावहारिकसत्ताकत्वेन तत्राव्याप्तिः । अन्यथा तत्र संसारकालीनबाधाभावलक्षणव्यावहारिकसत्तानभ्युपगमे घटादिज्ञाने पूर्वोक्तप्रमालक्षणस्याव्याप्तिप्रसंगः । नचान्तःकरणविशिष्टचैतन्यस्य प्रमातृचैतन्यशब्दार्थतया तन्निष्ठसत्ताया व्यावहारिकसत्तारूपत्वाद्ब्रह्मणश्चतद्व्यतिरिक्तपारमार्थिकसत्ताकत्वेन तत्र नातिव्याप्तिः । अत एव घटादौ नाव्याप्तिः, तस्य प्रमातृनिष्ठव्यावहारिकसत्ताश्रयत्वादिति वाच्यम् ॥

म० प्र०-अयम्-अन्तःकरणादिषु वृत्तिविषयत्वाभ्युपगमः, अपराद्धांतः-भाष्यकारादीनामसंमतः । परममूले (अतएवेति) यतो न वृत्तेः केवलपदव्यावर्त्यत्वमत एवाहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यविषयभावमापद्यते इत्यहंकारटीकायामाचार्य्यैरहमित्याकारान्तःकरणविषयावृत्तिरंगीकृतेत्यर्थः ।; अहंवृत्त्यवच्छिन्नं-अहंवृत्तिविशिष्टं, चैतन्यस्यविषयभावं-चैतन्यनिरूपितविषयत्वम्, अहंकारटीकाविवरणे-चतुःसूत्र्या यद्भाष्यं तदुपरि पंचपादिकाख्याटीका तत्रस्थोहंकारनिरूपणपरो ग्रंथस्तदुपरि यद्विवरणं तस्मिन् । परममूले (सांप्रदायिकैरिति) सर्वज्ञमुनिप्रमुखैरित्यर्थः। परममूले (तथाचेति) अन्तःकरणादीनांवृत्तिविषयस्त्वे निर्विवादेसतीत्यर्थः । अत्र-विषयप्रत्यक्षलक्षणे । तत्र-ब्रह्मणि, तस्य-ब्रह्मणः, प्रमातृसत्तारूपत्वेन-प्रमातुःया सत्ता स्वरूपं पारमार्थिकीसत्तावा तद्रूपत्वेन, तत्र-घटादिषु, अव्याप्तिः-असंभवः । यदि प्रातिभासिकशुक्तिरजतादीनामधिष्ठानसत्तातिरिक्तसत्ताकत्वाभावोंगीक्रियते तर्हि तेषु लक्षणसत्वादव्याप्तिपदस्यान्याप्तिरूपएवत्थोंग्राह्य इति । अन्यथेत्यस्यैवार्थमाह (तत्रेत्यादिना) घटादिष्वित्यर्थः (संसारकालीनबाधाभावलक्षणेति) संसारकालीनबाधाप्रतियोगित्वलक्षणेत्यर्थः । पूर्वोक्तप्रमालक्षणस्य-अबाधितार्थविषयकज्ञानत्वरूपपूर्वोक्तप्रमालक्षणस्य (तन्निष्ठेति) प्रमातृचैतन्यनिष्ठेत्यर्थः । तत्र-ब्रह्मणि, अत एव प्रमातृसत्तायाः व्यावहारिकसत्तारूपत्वादेव, वक्ष्यमाणहेतोरेवेतिवा । तस्य-घटादेः ॥

शि०म०-तथापि व्यावहारिकसत्तायास्सर्वत्रैकत्वेन वह्न्यादावतिव्याप्तेः शुक्तिरूप्यादेस्तूलाविद्याकार्यत्वपक्षे तदतिरिक्तप्रातिभासिकसत्ताश्रयत्वेन तत्राव्याप्तेश्च । किंच नेदं विषयस्य प्रत्यक्षसामान्यलक्षणम् । योग्यत्वस्यैवातीन्द्रियधर्मादिव्यावृत्तस्य सामान्यलक्षणत्वोपपत्तौ विशेषणवैयर्थ्यात् । ननु प्रमातृचैतन्याध्यस्तत्वमेव प्रमातृभिन्नत्वमिह विवक्षितं, तेनपारमार्थिके ब्रह्मणि नातिव्याप्तिः, घटादेश्च स्वज्ञानसमये प्रमातृचैतन्याध्यस्ततया] नाव्याप्तिः, वह्न्याद्यधिष्ठानचैतन्यस्यानुमितिदशायां प्रमातृव्यतिरिक्ततया तद्विषयवह्न्यादौ नातिव्याप्तिरितिचेत्, न, प्रमातृशब्देनान्तःकरणोपलक्षितचैतन्याभिधाने वह्न्यादेरपि तदुपलक्षितचैतन्याध्यस्तत्वेन तत्रातिव्याप्तेस्तादवस्थ्यात् । विशिष्टाभिधानेच घटादिज्ञाने तदधिष्ठानचैतन्यस्यान्तःकरणोपहितचैतन्याभेदेपि विशिष्टं प्रत्यभेदाभावेन तत्राव्याप्तेः, प्रातिभासिकरजतस्य शुक्त्यवच्छिन्नचैतन्याध्यस्तस्य स्वप्नाद्युपलब्धगजादेश्च मायापरिणामत्वपक्षे तदवच्छिन्नचैतन्याध्यस्तस्य प्रमातृचैतन्याध्यस्तत्वाभावेन तत्राव्याप्तेश्च ॥

म० प्र०-तथापि-घटादीनांप्रमातृचैतन्यनिष्ठव्यावहारिकसत्ताश्रयत्वेपि (तदतिरिक्तेति) प्रमातृचैतन्यनिष्ठसंसारकालीनबाधाभावलक्षणव्यावहारिकसत्तात्तिरिक्तेत्यर्थः । शुक्तिरजतादेर्मूलाविद्याकार्य्यत्वपक्षे प्रमातृचैतन्यनिष्ठसंसारकालीनबाधाप्रतियोगित्वलक्षणव्यावहारिकसत्तावत्त्वेन शुक्तिरजतादौ लक्षणंसत्वमभिप्रेत्याह (तूलाविद्येति) इदं-स्वाकारवृत्त्युपहितप्रमातृचैतन्याभिन्नत्वे सति योग्यत्वम् । प्रत्यक्षसामान्यलक्षणं-प्रत्यक्षत्वस्वरूपंप्रत्यक्षत्वप्रयोजकं वा प्रत्यक्षत्वप्रकारकव्यवहारप्रयोजकं वा-योग्यत्वस्यैव-तत्तदिन्द्रियसन्निकर्षकालीनतत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरविषयत्वयोग्यत्वस्यैव (विशेषणेति) स्वाकारवृत्त्युपहितप्रमातृचैतन्याभिन्नत्वरूपविशेषणेत्यर्थः । स्वोक्तं विषयप्रत्यक्षलक्षणमुपपादयितुं शंकते (नन्वित्यादिना) इह-उक्तविषयप्रत्यक्षलक्षणवाक्ये (तदुपलक्षितेति): शुद्धचैतन्यरूपान्तःकरणोपलक्षितेत्यर्थः । तत्र-अनुमेयवह्न्यादौ (विशिष्टेति) अन्तःकरणविशिष्टचैतन्येत्यर्थः (घटादिज्ञानेइति) सतीतिशेषः (तदधिष्ठानेति) घटाद्यधिष्ठानेत्यर्थः (विशिष्टंप्रतीति) अन्तःकरणस्य घटादिना सहाभेदाभावेन घटादावन्तःकरणविशिष्टचैतन्यनिरूपिताभेदाभावेनेत्यर्थः । तत्र-घटादौ (अव्याप्तेरिति) सुखादीनामपिविशेषणीभूतान्तःकरणेऽध्यस्तत्वाभावेन सुखादावपि लक्षणासत्त्वाल्लक्षणासंभवादित्यर्थः (तदवच्छिन्नेति) मायावच्छिन्नेत्यर्थः) तत्र-शुक्तिरजतादौअव्याप्तेश्च-असंभवाच्च ॥

Funding by IKS-MoE

शि० म०—किंचैवमन्तःकरणाविद्ययोरप्रत्यक्षत्वापत्तिः, तयोर्विशिष्टचैतन्याध्यस्तत्वाभावात्, नह्यन्तःकरणविशिष्टचैतन्येऽन्तःकरणमध्यस्यते। अपिचास्मिन् पक्षे स्वाकारवृत्त्युपहितेतिविशेषणवैयर्थ्यापत्तिः। घटज्ञानसमये परिमाणादेरन्तःकरणविशिष्टचैतन्याध्यस्तत्वाभावेन प्रमातृपदेनैव तत्रातिव्याप्त्यभावात्। तस्माद्दुर्घटं घटादेः प्रत्यक्षत्वमिति। 'उच्यते' प्रमातृचैतन्याभिन्नत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वं, प्रमात्रभिन्नत्वं चान्तःकरणावच्छिन्नचैतन्याभेदज्ञानविषयत्वमिह विवक्षितं तेन घटमहंजानामीत्यन्तःकरणविशिष्टभेदानुभवेपि घटस्सान्निति तदुपहितचैतन्याभेदज्ञाने विरोधाभावेन तत्र नाव्याप्तिः। परिमाणादेश्च तदातदभेदज्ञानाविषयत्वान्नातिव्याप्तिः। अनुमित्यादिस्थले तु वह्न्यवच्छिन्नचैन्यस्यान्तःकरणानुपहितत्वेन वह्न्यादेस्तदभेदज्ञानविषयत्वाभावान्न प्रत्यक्षत्वम्। अतएव शुक्तिरूप्यस्वाप्नगजादेस्साक्ष्यभेदज्ञानविषयत्वात्प्रत्यक्षत्वमेव॥

म० प्र०—तयोः—अविद्यान्तःकरणयोः (विशिष्टेति) अंतःकरणविशिष्टेत्यर्थः। अविद्यान्तःकरणयोरन्तःकरणविशिष्टचैतन्याध्यस्तत्वाभावमेवोपपादयति (नहीति) (अन्तःकरणमिति) अविद्यान्तःकरणंचेत्यर्थः। अतो न व्याख्यानेन्यूनतेति (अध्यस्यतेइति) अविद्याध्यासस्यसुषुप्तावन्तःकरणाभावेपि सत्त्वेनान्तःकरणाध्यासात्पूर्वमंतःकरणाभावेनचाविद्यान्तःकरणयोरध्यासेऽन्तःकरणस्य कारणत्वयोग्यत्वाभावादितिशेषः। अस्मिन्पक्षे—प्रमातृचैतन्यशब्देनान्तःकरणविशिष्टचैतन्याभिधानपक्षे। अंतःकरणविशिष्टचैतन्याध्यस्तत्वाभावेन—विशेषणीभूतान्तःकरणे घटादिपरिमाणादेरध्यासाभावेनान्तःकरणविशिष्टचैतन्यनिरूपिताध्यस्तत्वाभावेन; तत्र—घटादिगतपरिमाणादौ। तस्मात्—उक्तदूषणकलापात् (प्रमातृचैतन्याभिन्नत्वेसतीति) अत्र योग्यत्वमित्यस्य प्रत्यक्षयोग्यत्वमित्यर्थे उच्यमाने आत्माश्रयसत्त्वेन प्रमातृचैतन्याभिन्नत्वसमानाधिकरणकमयंघटोयंपटइत्याद्याकारकव्यवहारयोग्यत्वं तत्तत्केवलसाक्षितत्तन्द्रियान्यतरविषयत्वयोग्यत्वं वा घटादिविषयनिष्ठप्रत्यक्षत्वमिति लक्षणवाक्यार्थस्तथाच नात्माश्रय इति भावः (अन्तःकरणावच्छिन्नेति) अन्तःकरणावच्छिन्नमन्तःकरणोपहितं यच्चैतन्यं तेन सहयोविषयस्याभेदो विषयनिष्ठप्रमातृसत्तातिरिक्तसत्ताकत्वाभावरूपस्तस्य यज्ज्ञानमयंघटोस्तीत्याद्याकारकं तद्विषयत्वमित्यर्थः। इह—उक्तलक्षणवाक्ये, तेन—प्रमात्रभिन्नत्वस्यान्तःकरणोपहितचैतन्याभेदज्ञानविषयत्वरूपतयाविवक्षितत्वेन, अन्तःकरणविशिष्टभेदानुभवेपि—अन्तःकरणविशिष्टचैतन्याद्घटादेर्भेदज्ञानेपि (तदुपहितेति) अन्तःकरणोपहितेत्यर्थः। तत्र—घटादौ, नाव्याप्तिः—नासंभवः, तदा—अयंघटोस्तीत्यादिज्ञानकाले (तदभेदज्ञानेति) घटादिपरिमाणादिकंसदित्यन्तःकरणोपहिताभे-

Funding by IKS-MoE

दज्ञानेत्यर्थः । अनुमित्यादिस्थले—अनुमित्यादिविषयवह्न्यादौ, अस्य न प्रत्यक्षमित्यनेनान्वयः (वह्न्यादेरिति) अनुमेयवह्न्यादेः सन्वह्निरित्यादिप्रत्ययविषयत्वेप्यन्तःकरणोपहिताभेदप्रत्ययविषयत्वाभावादित्यर्थः । अतएव—प्रमात्रभिन्नत्वस्योक्तस्वरूपत्वादेव ॥

शि०म०—एवमविद्यान्तःकरणयोरपि प्रत्यक्षत्वमुपपादनीयम् । इदंचलक्षणंविषयस्य तत्तत्प्रत्यक्षत्वव्यवहारप्रयोजकमिति न विशेषणवैयर्थ्यम् । सामान्यलक्षणं तु योग्यत्वमेव, तच्चेन्द्रियसाक्ष्यन्यतरयोग्यत्वं, तत्तु फलबलकल्प्यमिति न धर्मादावतिव्याप्तिः । घटाभावादेश्चानुपलब्धस्यापि इन्द्रियसाक्ष्ययोग्यत्वान्नप्रत्यक्षत्वम्, यथाचेन्द्रियायोग्यत्वम् । तथाग्रे वक्ष्यते । विशेषलक्षणेच योग्यत्वं तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यत्वं विवक्षितमिति न सौरभादावतिव्याप्तिः । अत एव शास्त्रप्रतिपाद्ये ब्रह्मणि न तत्प्रसंगः, स्वप्रकाशस्य तस्य विवक्षितयोग्यत्वाभावात् । यद्वा योग्यत्वे सति स्वाकारवृत्त्युपहितसाक्षिचैतन्याध्यस्तत्वं विषयस्य प्रत्यक्षत्वं, तथाच घटादेः शुद्धचैतन्याध्यस्तस्यापि स्वज्ञानसमये स्वाधिष्ठानचैतन्यस्य साक्ष्यभेदेन साक्षिण्यध्यस्ततया सिद्धमपरोक्षत्वम् । प्रातिभासिकरजतस्य च साक्षिण्यध्यासान्नाव्याप्तिः । वक्ष्यतिच—“विषयचैतन्ये अध्यस्तमपि रजतं साक्षिण्यध्यस्तम्” इति अत एव स्वप्नोपलब्धगजादेश्च प्रत्यक्षत्वं, तदेन्द्रियोपरमेप्यन्तःकरणांगीकारात् । तस्यच स्वविशिष्टाध्यासाभावेपि स्वोपहितचैतन्येऽध्यस्तत्वात् । अविद्यायास्तु चिन्मात्राश्रितत्वेपि स्वज्ञानसमये साक्षिण्यध्यासात्प्रत्यक्षत्वं, परिमाणादेश्च घटाकारवृत्तिदशायां साक्षिण्यध्यस्तत्वेपि तस्य स्वाकारवृत्त्युपहितत्वाभावान्नातिव्याप्तिः ॥

म०प्र०—एवं—शुक्तिरजतादिवत् (उपपादनीयमिति) अन्तःकरणादेरप्यहं सन्नज्ञानं सदित्याद्यन्तःकरणोपहितचैतन्याभेदज्ञानविषयत्वादिति शेषः । (तत्तत्प्रत्यक्षत्वेति) देवदत्तयज्ञदत्तादिसंवंधिप्रत्यक्षत्वेत्यर्थः (विशेषणेति) प्रमात्रभिन्नत्वे सतीति विशेषणेत्यर्थः । सामान्यलक्षणम्—देवदत्ताद्यनिरूपितं यत्प्रत्यक्षं तन्निष्ठप्रत्यक्षत्वस्वरूपं तन्निष्ठप्रत्यक्षत्वादिप्रयोजकं वा।इन्द्रियसाक्ष्यन्यतरयोग्यत्वं—इन्द्रियसन्निकर्षकालीनेन्द्रियकेवलसाक्ष्यन्यतरविषयत्वयोग्यत्वं, फलबलकल्प्यम्—घटः प्रत्यक्ष इत्यादिव्यवहाररूपकार्य्यान्यथानुपपत्त्या कल्प्यम्, अनुपलब्धस्यापि—अनुपलब्धिप्रमाणगम्यस्यापि । अपिशब्देनानुमानादिप्रमाणसमुच्चयः । विशेषलक्षणे—देवदत्तादीनां घटादिषु यः प्रत्यक्षत्वप्रकारको व्यवहारस्तत्प्रयोजके, प्रमातृचैत-

न्यांभिन्नत्वे सति योग्यत्वरूपे सौरभादावित्यत्र रसादिरादिपदार्थ इति । अतएव–वक्ष्यमाणहेतोरेव, न तत्प्रसंगः–विषयप्रत्यक्षलक्षणातिव्याप्तिर्न । ननु यदाघटादावयंघट इत्येव प्रत्ययो जातो नतु सन् घट इत्यादिप्रमातृचैतन्याभेदप्रत्ययो जातस्तदा घटादौ प्रमातृचैतन्याभेदप्रत्ययविषयत्वाभावेन प्रमातृचैतन्याभिन्नत्वाभावात्, घटादौ प्रत्यक्षत्वं न स्यादित्यत आह (यद्वेति । स्वज्ञानेति) घटादिज्ञानेत्यर्थः (स्वाधिष्ठानेति) घटाद्यधिष्ठानेत्यर्थः । अतएव–उक्तप्रत्यक्षत्वस्वीकारादेव, वक्ष्यमाणहेतोरेववा, अन्तःकरणादेरप्युक्तप्रत्यक्षमस्तीत्याह (तस्य चेति) अन्तःकरणस्यचेत्यर्थः (स्वविशिष्टेति) अन्तःकरणविविष्टचैतन्येत्यर्थः । अध्यस्तत्वादित्यस्य प्रत्यक्षत्वमित्यनेनान्वयः । तस्य–साक्षिचैतन्यस्य (स्वाकारेति) परिमाणाद्याकारेत्यर्थः ॥

मू०–तदयं निर्गलितोर्थः स्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वे सति योग्यत्वं विषयस्य प्रत्यक्षत्वम् । तत्र संयोगसंयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यंजकवृत्तिजनने विनियोगः ॥

शि०म०-तदेतत्सर्व मनसि निधायाह (तदयंनिर्गलितोर्थइति । प्रत्यक्षत्वमिति) तत्तत्प्रत्यक्षत्वव्यवहारप्रयोजकमित्यर्थः । सौत्रांतिकास्तु संवेदनगतो विषयाकारप्रतिबिंबस्तथाविधबिम्बसन्निधानपुरःसरः प्रतिबिंबत्वात् दर्पणादिगतमुखादिप्रतिबिंबवदिति नित्यानुमेया विषया इत्याहुः । ततश्च विषयस्य प्रत्यक्षलक्षणकथनं न युक्तमिति चेत् न, घटमहं पश्यामीति विषयस्यापरोक्षत्वस्यानुभवसिद्धत्वात् । उक्तलिंगाद्यप्रतिसंधानेपि घटाद्यनुभवदर्शनाच्च । किंच घटादेर्ननित्यानुमेयत्वम्, तथा सत्यन्वयव्यतिरेकावगतज्ञानहेतुभावयोरिन्द्रियतत्सन्निकर्षयोर्वैयर्थ्यप्रसङ्गः, त्वन्मते घटादिज्ञानस्यानुमितिरूपत्वेन तत्रानुपयोगात् तस्मात्सिद्धं घटादेरपरोक्षत्वम् । नन्विन्द्रियतत्सन्निकर्षवैयर्थ्यं सिद्धांतेपि तुल्यं, चैतन्यरूपस्य घटादिज्ञानस्येन्द्रियसन्निकर्षाजन्यत्वादित्याशंक्य तयोर्वृत्तिजनने विनियोगान्न वैयर्थ्यमित्याह (तत्रेति) एवं घटादेः प्रत्यक्षत्वे सिद्धेसंयोगसंयुक्ततादात्म्यसंयुक्ताभिन्नतादात्म्यानामिन्द्रियसन्निकर्षाणामिन्द्रियस्य च घटतद्गतरूपतद्धर्मरूपत्वाद्यवच्छिन्नचैतन्याभिव्यंजकवृत्तिजनने विनियोग इत्यर्थः ॥

म० प्र०–परमसूले (तदयमिति) तस्य पूर्वोक्तलक्षणस्यायं तदयं–तस्मात्पूर्वोक्तनिवेशादयं, तदयमिति वा, सचासावयं तदयमिति वा विग्रहः । परमसूले । योग्यत्वं–तत्तदिन्द्रियतत्तत्केवलसाक्ष्यन्यतरविषयत्वयोग्यत्वम् । तत्तदितिदेवदत्तादीत्यर्थः । सौत्रांतिकाः–सौत्रांतिकसंज्ञका बुद्धशिष्याः । शब्दात्पक्षज्ञानमभिप्रेत्यतेऽनुमानमाहुरित्याह (संवेदनगतइति) बुद्धिगत इत्यर्थः । दर्पणादिषु घटादिषु घटादिप्रतिबिंबे सिद्धसाधनतावारणाय दृष्टांतासिद्धिवारणाय चेदं विशेषणमिति (तथाविधेति) विषयाकारप्रतिबिंबसदृशेत्यर्थः । ततश्च–सौत्रांतिकमते विषयाणांनित्यानुमेयत्वादेव, अप्रतिसंधानेपि–अज्ञानेपि । तथासति–नित्यानुमेयत्वे–सति । ज्ञानहेतुभावयोः–ज्ञानहेतुत्वयोः कुतस्तयोर्वैयर्थ्यमित्याशंक्य तत्र हेतुमाह (त्वन्मते इति) सौत्रांतिकस्य तव मत इत्यर्थः । तत्र–घटादिज्ञाने (अनुपयोगादिति) नच लिंगादिज्ञानार्थमिन्द्रियतत्सन्निकर्षयोः स्वीकारान्नतयोरानर्थक्यमिति वाच्यम्, त्वन्मते लिंगादिज्ञानस्याप्यनुमित्याद्यात्मकत्वादिति । तस्मात्–इन्द्रियतत्सन्निकर्षयोर्वैयर्थ्यापत्त्यादिदोषात् तयोः–इन्द्रियतत्सन्निकर्षयोः (चैतन्याभिव्यंजकेति) चैतन्यविषयकावरणनिवर्तिकाचैतन्यप्रतिबिंबग्राहिका वा या वृत्तिस्तज्जनने विनियोगः संबंधः, कारणतेत्यर्थः । तथाच सिद्धांते इन्द्रियादीनां न वैयर्थ्यमिति भावः ॥

मू०-साच वृत्तिश्चतुर्विधा--संशयो निश्चयो गर्वः स्मरणमिति ।
एवं सति वृत्तिभेदेनैकमप्यन्तःकरणं मन इति बुद्धिरिति
अहंकार इति चित्तमिति चाख्यायते । तदुक्तम्--
मनोबुद्धिरहंकारश्चित्तं करणमंतरम् ॥
संशयो निश्चयो गर्वः स्मरणं विषया इमे ॥ १ ॥
तच्च प्रत्यक्ष द्विविधं--सविकल्पकनिर्विकल्पकभेदात् ॥

शि० म०–नन्वेवमपि चैतन्यस्यैव ज्ञानत्वात्तत्तत्सन्निकर्षस्य तत्रानुपयोगस्तदवस्थ इत्याशंक्य यथैकमप्यन्तःकरणं चतुर्विधवृत्त्यवच्छिन्नं चतुर्विधमित्युच्यते । एवमजन्यमपि चैतन्यमिंद्रियसान्निकर्षजन्यवृत्त्यवच्छिन्नं तज्जन्यमित्याशयेनाह (साचेति) यद्यपि वृत्तिविशिष्टं चैतन्यमादिमदित्यत्रविशिष्टचैतन्यस्येन्द्रियसान्निकर्षजन्यत्वमुक्तमेव तथापि तस्यैवदृष्टांतमुखेनात्रोपपादनान्नपौनरुक्त्यम्, अन्यथा यथाश्रुते प्रत्यक्षनिरूपणप्रस्तावेअन्तःकरणचातुर्विध्यनिरूपणमसंगतं स्यादिति द्रष्टव्यम् । उक्तार्थे संमतिमाह (तदुक्तमिति) एवं विषयप्रत्यक्षत्वे प्रयोजकांतरनिरू

Funding by IKS-MoE

पणात्तद्व्यावृत्तमपि ज्ञानस्यप्रत्यक्षत्वप्रयोजकं निर्दुष्टमित्युक्तमिदानीं तद्विभजते (तच्चेति) ॥

म० प्र०--एवमपि--इंद्रियतत्सन्निकर्षयोश्चैतन्याभिव्यंजकवृत्तिजनने उपयोगेपि, तत्र-चैतन्यरूपज्ञाने (चतुर्विधमिति) संशयाकारवृत्तिमदन्तःकरणं मनः, निश्चयाकारवृत्तिमदन्तःकरणं बुद्धिः, गर्वाकारवृत्तिमदन्तःकरणमहंकारः, स्मरणाकारवृत्तिमदन्तःकरणं चित्तमितिचतुर्विधमित्यर्थः । तत्–चैतन्यं । परममूले (साचेति) चैतन्याभिव्यंजिकात्वित्यर्थः । परममूले । एवंसति–वृत्तेर्नानात्वेसति । परममूले (विषयाइमेइति) इमे संशयादयो विषया अन्तःकरणे मन आदिशब्दप्रवृत्तिनिमित्ता अन्तःकरणस्य कार्याणीतिवेत्यर्थः । ननु चैतन्यस्यासादित्वेपीत्यादिग्रंथे वृत्तिविशिष्टचैतन्ये इन्द्रियजन्यत्वस्योक्तत्वात्पौनरुक्त्यमित्याशंक्याह (यद्यपीति) तस्य–वृत्तिविशिष्टचैतन्येपूर्वोक्तेन्द्रियजन्यत्वस्यैव, दृष्टांतमुखेन–यथैकमप्यन्तःकरणमित्यादिवाक्योक्तदृष्टांतद्वारा । अत्र–एवं सतीत्यादिमूले । अन्यथेत्यस्यैव व्याख्यानं यथाश्रुते इति, पूर्वोक्तव्यवस्थानंगीकारे सतीति तदर्थः । एवं–उक्तेन प्रकारेण अस्येत्युक्तमित्यनेनान्वयः । प्रयोजकांतरनिरूपणात्–ज्ञानगतप्रत्यक्षत्वप्रयोजकातिरिक्तप्रयोजककथनात् । तद्व्यावृत्तम्–प्रत्यक्षविषयावृत्ति । तत्–प्रत्यक्षम् ॥

मू०–तत्र सविकल्पकं वैशिष्ट्यावगाहि ज्ञानं यथा घटमहं जानामीत्यादि ज्ञानम् । निर्विकल्पकं तु संसर्गानवगाहि ज्ञानम् । यथा सोऽयं देवदत्तः ॥

शि० म०–सर्ववादिसंमतत्वेन सकलव्यवहारहेतुत्वेन प्रथमोद्दिष्टं सविकल्पकंप्रथमं निरूपयति (तत्रेति) तयोर्मध्ये इत्यर्थः (वैशिष्ट्यावगाहीति) नतु विशेषणज्ञानजन्यं तज्जन्यत्वस्य प्रमाणाभावेनानभ्युपगमादित्यर्थः । वैशिष्ट्यावगाहित्वमिच्छादावपीत्यत उक्तं ज्ञानमिति । ज्ञानत्वं च निर्विकल्पकेपीति वैशिष्ट्यावगाहीत्युक्तम् (संसर्गानवगाहीति) ननु सविकल्पकस्य विशेषणज्ञानजन्यत्वमभ्युपगतं न वा आद्ये तदेव सविकल्पकस्य लक्षणमस्तु नचेत्कुतो निर्विकल्पकसिद्धिः, न खलुतदनभ्युपगमे जागराद्यसविकल्पकज्ञानं स्वसमानाधिकरणविशेषणज्ञानजन्यंविशिष्टज्ञानत्वादित्यनुमानं भवति । नच पूर्वं न विवेचितमित्यनुभवोनिर्विकल्पके प्रमाणमल्पविशेषणविषयत्वेनापितदुपपत्तेः । तस्मादुदाहरणाभावान्नयुक्तं निर्विकल्पकलक्षणमित्याशंक्य लोकवेदयोः प्रत्यक्षसिद्धं तदित्याह (यथेति) ॥

म० प्र०–सविकल्पकप्रत्यक्षस्य प्रथमोद्दिष्टत्वेहेतुमाह (सर्ववादिसंमतत्वेनेति) येन निर्विकल्पकज्ञानं स्वीक्रियते तस्यापि सविकल्पकज्ञानं संमतमिति भावः । सविकल्पकज्ञानस्य सर्ववादिसंमतत्वेहेतुमाह (सकलेति) विषयितासंबंधेन सह विद्यमानोविकल्पोविशेष्यविशेषणयोः संसर्गो यत्र ज्ञाने तत्तथा वैशिष्ट्यविषयकमित्यर्थमभिप्रेत्याह । परममूले (वैशिष्ट्येति) सविकल्पकज्ञानस्य विशेषणज्ञानजन्यत्वाभावे हेतुमाह (तज्जन्यत्वस्येति) सविकल्पकज्ञाननिष्ठविशेषणज्ञानजन्यत्वस्यानभ्युपगमादित्यर्थः।नन्वनुमानान्निर्विकल्पकज्ञानसिद्धिर्भवत्वित्याशंक्याह (नखल्विति) तदनभ्युपगमे–सविकल्पज्ञानस्यविशेषणज्ञानजन्यत्वानभ्युपगमे, जागराद्यसविकल्पकं–जागरावस्थायामादावुत्पन्नंसविकल्पकम्–सविकल्पकज्ञानजन्ये द्वितीयादिज्ञाने सिद्धसाधनता निवृत्त्यै आद्येति विशेषणम् । स्वप्नावस्थायां संस्कारजन्ये आद्यसविकल्पकज्ञाने बाधवारणायजागरेति(स्वसमानाधिकरणेति) सविकल्पकज्ञानाधिकरणवृत्तीत्यर्थः।नविवेचितम्–किंचिद्विशेषणविशिष्टत्वेन न ज्ञातं (अल्पविशेषणविषयत्वेनेति) बहुभिर्विशेषणैर्न ज्ञातं किंत्वल्पविशेषणैर्ज्ञातमित्यल्पविशेषणविषयकत्वेनापि पूर्वोक्तानुभवोपपत्तेरित्यर्थः । उदाहरणाभावात्–लक्ष्याभावात् । लोकवेदयोरिति–लौकिकवैदिकवाक्यजन्यंप्रत्यक्षसिद्धं साक्षिरूपप्रत्यक्षेण निश्चितं तन्निर्विकल्पकात्मकं ज्ञानमित्यर्थः ॥

मू०–तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानम् । ननु शाब्दमिदं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वादितिचेन्न ॥

शि० म०–यद्यपि ज्ञानं स्वविषयमप्यभेदावगाहित्वे प्रमाणं तथाप्यर्थात् संसर्गानवगाहित्वसिद्धिरिति भावः । ननु सोयं देवदत्त इत्यैक्यप्रत्यभिज्ञयैव वाक्यप्रयोगाद्देशकालोपलक्षितदेवदत्तलक्षणाभेदविषयमिन्द्रियजन्यमप्यस्ति प्रत्यक्षमिति–कथं शाब्दमेवोदाहृतमिति चेत्सत्यमभेदविषयज्ञानमिन्द्रियजन्यमिति तथापि तन्ननिर्विकल्पकं सन्निकर्षवशादुपलक्षणदेशकालादेरपि तत्र भानसंभवात्, शाब्देतु ज्ञाने–तात्पर्य्यविषयस्यैव भाननियमादभेदमात्रविषयत्वमित्यतो निर्विकल्पकमिति भावः । प्रकृष्टप्रकाशश्चंद्रः 'सत्यंज्ञानमनंतं ब्रह्म' इत्यवान्तरवाक्यमादिपदग्राह्यं, ननु सोयं देवदत्त इत्यादिवाक्यजन्यं ज्ञानं न प्रत्यक्षमिन्द्रियाजन्यत्वाज्ज्योतिष्टोमादिवाक्यजन्यज्ञानवदिति चोदयति (ननु शाब्दमिति) ॥

म०प्र०–ननु वृत्तेः स्वविषयत्वाभ्युपगमेन स्वविषयकसोयं देवदत्त इत्यादिवाक्यजन्यज्ञानस्य देवदत्ताद्यभेदविषयकप्रमारूपत्वेपि तस्य संसर्गानवगाहित्वे प्रमाणाभाव

इत्याशंक्याह (यद्यपीति) स्वविषयमपि–शब्देन देवदत्तादिविषयकं च ज्ञानं सोयं देवदत्त इत्यादिवाक्यजन्यज्ञानं यद्यप्यभेदावगाहित्वे–देवदत्ताद्यभेदे प्रमाणं–प्रमारूपमित्यर्थः । सोयं देवदत्त इत्यादिवाक्यजन्यज्ञानस्य संसर्गानवगाहित्वे प्रमाणाभावेन नेदं निर्विकल्पकज्ञानोदाहरणं संभवतीति भावः । अर्थात्–स्वनिष्ठाभेदावगाहित्वमुपपन्नं सत्स्वनिष्ठसंसर्गानवगाहित्वं कल्पयतीत्यर्थापत्तिप्रमाणात् । वाक्यप्रयोगात्–सोयंदेवदत्त इत्यादिवाक्योच्चारणात्, तत्–देवदत्तलक्षणाभेदविषयकेन्द्रियजन्यज्ञानं, सन्निकर्षवशात्–देवदत्तशरीरेणसहयदिन्द्रियसंबंधस्तद्बलात् तत्र–देवदत्तशरीरे भानसंभवात्–एकसंबंधिज्ञानमपरसंबंधिस्मारकमिति न्यायेन ज्ञानसंभवात् । ननु शाब्दज्ञानस्याप्युपलक्षणदेशकालादिविषयकत्वं कुतो न भवतीत्याशंक्याह (शाब्देत्विति) भाननियमात्–विषयत्वस्य नियमेन सत्त्वात्, तात्पर्यविषयत्वस्य शाब्दबोधविषयत्वनिष्ठव्याप्तिनिरूपकत्वादिति यावत् (निर्विकल्पकमिति) शाब्दज्ञानमितिशेषः इत्यवांतरवाक्यजन्यज्ञानमादिपदग्राह्यमित्यस्य स्थाने इत्यवांतरवाक्यमादिपदग्राह्यमितिपाठः साधुः (चोदयतीति) निर्विकल्पकप्रत्यक्षलक्षणमभिधाय वाक्यजन्यज्ञानस्य तल्लक्ष्यत्वाभिधानमत्यंतासंगतमिति शंकाकर्तुरभिप्राय इति ॥

मू०–नहीन्द्रियजन्यत्वं प्रत्यक्षत्वे तन्त्रं दूषितत्वात् । किन्तु योग्यवर्त्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमित्युक्तम् ॥

शि० म०–इन्द्रियजन्यत्वस्यानुमित्यादिसाधारणत्वेन सुखादिप्रत्यक्षाव्यापकत्वेन च प्रत्यक्षत्वप्रयोजकत्वस्य निराकृतत्वात् । नेदं तत्प्रयोजकमित्याह (नहीति) तथाच सुखादिप्रत्यक्षेव्यभिचारादप्रयोजकत्वाच्च, नानुमानावतार इति भावः । ननु प्रयोजकांतरानिरूपणादिन्द्रियत्वेन तज्जन्यत्वमेव प्रयोजकमित्याशंकते (किंत्विति) प्रयोजकान्तरमुक्तं स्मारयति (योग्येति) विषयस्य यदि चैतन्यं प्रत्युपलक्षणत्वं तदा सुखादिस्मरणे प्रत्यक्षत्ववारणाय वर्त्तमानपदमिति ध्येयम् (उक्तमिति) उक्तप्रायमित्यर्थः ॥

म०प्र०–(इन्द्रियजन्यत्वस्येति) इन्द्रियजन्यत्वस्य प्रत्यक्षत्वप्रयोजकत्वस्य निराकृतत्वादित्यन्वयः । तस्य निराकृतत्वे परमतमभिसंधाय हेतुमाह (अनुमित्यादिसाधारणत्वेनेति) परमतेऽनुमित्यादेर्मनोरूपेन्द्रियजन्यत्वस्य सत्त्वादितिशेषः । तस्य निराकृतत्वे एव स्वमतमादाय हेत्वंतरमाह (सुखादीति) अव्यापकत्वेन–अवृत्तित्वेन प्रयोजकत्वस्य–व्याप्यत्वस्य व्यापकत्वस्यवा इदम्–इन्द्रियजन्यत्वम् तत्प्रयोज-

कम्–प्रत्यक्ष्यत्वव्याप्यंव्यापकं वा (सुखादिप्रत्यक्षव्यभिचारादिति) सुखादिप्रत्यक्षे प्रत्यक्षत्वाभावाभावरूपप्रत्यक्षत्वसत्त्वेपीन्द्रियाजन्यत्वसत्त्वादिति शेषः । (अप्रयोजकत्वाच्चेति) अनुकूलतर्कविधुरत्वाच्चेत्यर्थः । नच यदि पक्षेप्रत्यक्षत्वाभावो न स्यात्तर्हीन्द्रियाजन्यत्वमपि न स्यादित्यनुकूलतर्कोंस्तीति वाच्यम् । सुखादिप्रत्यक्षे प्रत्यक्षत्वाभावाभावसत्त्वेपीन्द्रियाजन्यत्वस्य सत्त्वात्तर्कमूलभूतव्यतिरेकव्याप्त्यभावेन तर्कानुदयादिति । प्रयोजकांतरानिरूपणात्–ज्ञानगतप्रत्यक्षत्वस्य प्रत्यक्षत्वव्यवहारस्य वेन्द्रियजन्यत्वातिरिक्तप्रयोजकानिरूपणात् । प्रयोजकवाक्यप्रविष्टवर्त्तमानपदतात्पर्य्यमाह (विषयस्येति । उपलक्षणत्वमिति) नतु विशेषणत्वमुपाधित्वंवेतिशेषः (उक्तप्रायमिति प्रायेणोक्तमित्यर्थः । यद्यपि प्रमाणचैतन्यस्य योग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं पूर्वमुक्तं तथापि प्रमाणचैतन्यस्य योग्यवर्त्तमानविषयावच्छिन्नचैतन्याभिन्नत्वे योग्यवर्त्तमानविषयकत्वे सति प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वेचात्यंतवैलक्षण्याभावादेवमुक्तमितिभावः ॥

सू०–तथाच सोयं देवदत्त इतिवाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निसृतान्तःकरणवृत्त्यभ्युपगमेन देवदत्तावच्छिन्नचैतन्यस्य वृत्त्यवच्छिन्नचैतन्याभेदेन सोयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वम् । एवं तत्त्वमसीत्यादि वाक्यजन्यज्ञानस्यापि तत्र प्रमातुरेव विषयतया तदुभयाभेदस्य सत्त्वात् ॥

शि० म०–नन्वस्त्वन्यदपि–प्रत्यक्षत्वप्रयोजकं तथापि नेदं प्रत्यक्षं व्यवहितदेशकालादिविशिष्टदेवदत्ताकारवृत्त्यवच्छिन्नचैतन्यस्य विषयचैतन्यभिन्नत्वादित्याशंक्य, नहि देशकालादिसंसर्गविषयमिदं शाब्दज्ञानं किंत्वभेदविषयकम् । अभेदश्च–देवदत्तलक्षणस्सन्निहित इतितज्ज्ञानं प्रत्यक्षामित्याह (तथाचेति) निरुक्तस्य प्रयोजकत्वेसिद्धे इत्यर्थः । नन्वेवमपि–तत्त्वमसीत्यादिवाक्यजन्यज्ञानं कथं व्यवहितसर्वज्ञत्वादिविशिष्टविषयं प्रत्यक्षं कथं वा तज्ज्ञानं तत्पदार्थाभेदविषयं नाहमीश्वर इत्यादिप्रत्यक्षविरोधादित्याशंक्य नहि तज्ज्ञानं कर्तृत्त्वसर्वज्ञत्वादिविशिष्टाभेदविषयं येन तद्विरोधः स्यात्, किंतु तत्त्वंपदलक्ष्यस्वरूपविषयं तच्च सन्निहितमेवेति तद्विषयमपि ज्ञानं प्रत्यक्षमित्याह (एवमिति) ॥

Funding by IKS-MoE

म० प्र०—अन्यत्—इन्द्रियजन्यत्वादिभ्योभिन्नम्, इदम्—शाब्दज्ञानम् (व्यवहितेति) तच्छब्दज्ञानाज्जायमाना या व्यवहितदेशकालादिविशिष्टदेवदत्ताकारवृत्तिस्तदवच्छिन्नचैतन्यस्येत्यर्थः । एवमपि—पूर्वोक्तस्यप्रत्यक्षत्वादि प्रयोजकत्वेऽपि कथं प्रत्यक्षमित्यन्वयः (व्यवहितेति) ईश्वरस्य व्यापित्वेन तद्धर्माणांमनोरूपेन्द्रियसंबद्धत्वेनेन्द्रियासंबद्धत्वरूपव्यवहितत्वाभावेनास्मदादिप्रत्यक्षायोग्यत्वरूपव्यवहितत्ववदित्यर्थः । तज्ज्ञानम्—तत्त्वमस्यादिवाक्यजन्यज्ञानम्, येन—तत्त्वमस्यादिवाक्यजन्यज्ञानस्य कर्तृत्वादिविशिष्टविषयकत्वेन, तद्विरोधः—तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वानुपपत्तिः । तच्च—तत्त्वंपदलक्ष्यस्वरूपंच । परममूले (एवमिति) सोयंदेवदत्त इत्यादिवाक्यजन्यज्ञानवदित्यर्थः । परममूले—ज्ञानस्यापीत्यस्य प्रत्यक्षत्वमितिपूर्वेणान्वयः । परममूले (तत्रेति) तत्त्वमसीत्यादिवाक्यजन्यज्ञाने इत्यर्थः । परममूले (प्रमातुरेवेति) तत्त्वंपदलक्ष्यस्यैवेत्यर्थः । परममूले (तदुभयेति) तत्त्वंपदलक्ष्योभयेत्यर्थः । नचैवमपि तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वं न संभवति, तत्र शुद्धचैतन्यस्यैव विषयत्वेन योग्यवर्तमानविषयावच्छिन्नचैतन्याभावादिति वाच्यम्, योग्यवर्त्तमानविषयावच्छिन्नशब्देन योग्यवर्त्तमानोपाधिव्यावर्त्यचैतन्यस्यविवक्षितत्वात्, तस्यचान्तःकरणादेर्योग्यवर्त्तमानोपाधित्वेनात्रापिसंभवादिति ॥

मू०—ननु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगाहितया कथं निर्विकल्पकत्वम् । 'उच्यते' वाक्यजन्यज्ञानविषयत्वेहि न पदार्थसंसर्गत्वं तंत्रम्, अनभिमतसंसर्गस्यापि वाक्यजन्यज्ञानविषयत्वापत्तेः । किंतु तात्पर्य्यविषयत्वं प्रकृतेच "सदेव सोम्येदमग्र आसीत्" इत्युपक्रम्य 'तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्य्यमवसितमिति कथं तात्पर्य्याविषयं संसर्गमवबोधयेत् ॥

शि०म०—नन्वेवमपि तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्य न निर्विकल्पकत्वं गामानयेत्यादौ वाक्यजन्यज्ञानवत्संसर्गावगाहित्वादित्याक्षिपति (नन्विति) गामानय दंडेनेत्यत्र मुख्यार्थानामन्वययोग्यत्वात्तज्जन्यज्ञानस्य गोकर्मकदंडकरणकानयनक्रियासंसर्गविषयत्वेपि तत्त्वमसीत्यादौ मुख्यार्थानामन्वयानुपपत्तेः । लक्षितस्य च पदार्थस्यैकत्वेनेतरेतरसंसर्गाभावात्तज्ज्ञाने संसर्गावगाहित्वानुमानं बाधितमित्याह

Funding by IKS-MoE

(उच्यते इति) ननु तत्त्वमसीत्यादौ न लक्षणा तत्त्वं पदार्थयोरीश्वरजीवयोः स्वामिभृत्यभावादिनैवान्वयोपपत्तेर्लक्षणाबीजाभावात्ततश्च तज्जन्यं ज्ञानं संसर्गविषयमेवेत्याशंक्य किंस्वामिभृत्यभावादेः पदार्थसंसर्गत्वाद्वाक्यगम्यत्वं तात्पर्य्यविषयत्वाद्वा । नाद्यः भोजनप्रकरणे सैंधवमानयेत्यत्रानभिमतस्याश्वादिसंसर्गस्य यष्टीः प्रवेशयेत्यत्र दंडसंसर्गस्यच वाक्यजन्यज्ञानविषयत्वापत्तेरित्याह (वाक्येति) नद्वितीयः अद्वितीयस्य ब्रह्मण एवतात्पर्य्यविषयत्वादित्याह (प्रकृतेचेति) अयं भावः । अद्वितीयं ब्रह्मवाक्यार्थः ‘‘सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयम्’’ इत्युपक्रान्तस्य ॥

म० प्र०–एवमपि–तत्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेपि, संसर्गावगाहित्वात्–पदार्थसंसर्गावगाहित्वात्, मुख्यार्थानां–शक्तिवृत्त्योपस्थितानांगवादिपदार्थानां, तज्जन्यज्ञानस्य–गामानयेत्यादिवाक्यजन्यज्ञानस्य । (आनयनक्रियेति) आनयनक्रियायाः कृत्या सह यः संसर्गः कृतेर्युष्मदर्थेनयः संसर्गश्च तद्विषयत्वेपीत्यर्थः । मुख्यार्थानां–वाच्यार्थानाम्, तज्ज्ञाने–तत्त्वमसीत्यादिवाक्यजन्यज्ञाने, इत्यादौ–इत्यादिवाक्यघटकतत्त्वंपदादौ, तत्त्वंपदादौ लक्षणाभावे हेतुमाह (लक्षणाबीजाभावादिति) अन्वयानुपपात्तिरूपलक्षणाबीजाभावादित्यर्थः । उक्तलक्षणाबीजाभावे हेतुमाह (तत्त्वं पदार्थयोरिति) ततश्च–अन्वयानुपपात्तिरूपलक्षणाबीजाभावादेव, इत्युपक्रांतस्य–इत्याकारकब्रह्मोपदेशाद्यारंभविषयस्य ॥

शि०म०–ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति तेनैव रूपेणोपसंहृतस्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीति नव कृत्वोऽभ्यस्तस्य प्रमाणान्तरानवगतस्य ‘‘येनाश्रुतं श्रुतं भवति’’ इत्यादि वाक्यात्प्ररोचितस्य मृल्लोहतप्तपरशुग्रहणादिदृष्टान्तैरद्वितीयत्वेनोपपादितस्यब्रह्मणोज्ञानात् । ‘‘आचार्य्यवान् पुरुषो वेद तस्य तावदेवचिरं यावन्नविमोक्ष्ये’’ इत्याचार्य्योपदेशजानितान्निर्विचिकित्सात् निरतिशयानंदलक्षणमोक्षफलस्यावगतेस्तस्यैव तात्पर्यविषयत्वात् ।

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ॥
अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये ॥ १ ॥

इत्युपक्रमादेस्तात्पर्य्यग्राहकत्वाभ्युपगमात् । स्वामिभृत्यभावादिस्तु न वाक्यार्थः, तत्रोपक्रमाद्यभावेन तात्पर्य्याविषयत्वात् । किंच न तावदिदं वाक्यं राजपुरुष इत्यादिवदीश्वरजीवयोः स्वामिभृत्यभावं

Funding by IKS-MoE

प्रतिपादयति, तत्त्वमसीति समानाधिकरणवाक्यात्तदप्रतीतेः, नापि मृद्घट इतिवत्तादात्म्यं जीवेश्वरयोरनादित्वेन तादात्म्यप्रयोजककार्य्यकारणभावादेरभावेन तदयोगात् । केचित्तुपदानामर्थवत्त्वायलक्षणापरिहारार्थं च भिन्नाभिन्नंब्रह्मवाक्यार्थ इति । तन्न, मिथ्याभेदस्य तत्त्वावेदकश्रुतिप्रतिपाद्यत्वायोगात् । किञ्चवाक्यस्य भिन्नाभिन्नब्रह्मपरत्वे तद्रूपस्य प्रमाणसिद्धत्वान्मुक्तिदशायामपि ब्रह्मणो भिन्नाभिन्नत्वापत्तौ संसारादविशेषप्रसंगः । ननु "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिशास्त्रान्तरे तज्ज्ञानाद्भेदनिवृत्तिश्रवणान्मुक्तावत्यंताभिन्नं ब्रह्मेतिचेत्, न, तावद्भेदनं शाब्दज्ञानं तदभ्यासो वा श्रुतब्रह्मणः कृतश्रवणाभ्यासस्यापि यथापूर्वं संसारोपलब्धेः ॥

म० प्र०–ऐतदात्म्यं–एततसदाख्यंकारणं ब्रह्म आत्मा स्वरूपं यस्यसर्वस्य जगतस्तदेतदात्मं तस्य भावऐतदाम्यं ब्रह्मात्मकम् । तेनैवरूपेण–अद्वितीयब्रह्मस्वरूपेणैव, उपसंहृत्येत्यस्य स्थाने उपसंहृतस्येतिपाठः साधुरिति । अभ्यस्तस्य–पुनःपुनः प्रतिपादनविषयस्य (तप्तपरशुग्रहणादिदृष्टांतैरिति) यथासत्यानृतभाषिपुरुषाभ्यां तप्तपरशुग्रहणस्य तुल्यत्वेपिसत्याभिसंधस्य जयो नानृताभिसंधस्य जयस्तद्वत्प्रलयकालेविद्वदविद्वत्पुरुषयोर्ब्रह्मणि लयस्य समानेप्यविदुष एव पुनर्जन्म न विदुषः पुनर्जन्मेत्येतदर्थपरपुरुषंसोम्योतहस्तगृहीतमानयंतीत्यादिवाक्यप्रदर्शिततप्तपरशुग्रहणादिदृष्टान्तैरित्यर्थः । तस्यैव–अद्वितीयब्रह्मणएव । ननु ब्रह्मणि तात्पर्य्यग्राहकाभावात्कथं ब्रह्मणस्तात्पर्य्यविषयत्वमित्याशंक्यमैवमित्याभिप्रेत्य तत्र हेतुमाह (उपक्रमेति) तत्राज्ञातत्वमबाधितत्वं प्रयोजनवत्त्वंचेतिं त्रिविधंतात्पर्यलिंगं प्रामाण्यशरीरघटकमर्थनिष्ठमुपक्रमोपसंहारयोरैकरूप्यमभ्यासोर्थवादश्चेति । त्रिविधं तु शब्दनिष्ठमिति विभागोऽत्रबोध्यः । तत्र–स्वामिभृत्यभावादौ, तदप्रतीतेः–स्वामिभृत्यभावाद्यप्रतीतेः, तादात्म्यं–भिन्नत्वेसत्यभिन्नसत्ताकत्वरूपं, नतु भिन्नाभिन्नत्वरूपं, विरुद्धयोर्भेदाभेदयोरेकत्रासंभवात् (तादात्म्यप्रयोजकेति) तादात्म्यव्यापकेत्यर्थः । तदयोगात्–तादात्म्यासंभवात् (वाक्यार्थइति) तत्त्वमसीतिवाक्यस्यभिन्नाभिन्नंब्रह्मत्वमसीत्यर्थ इतियावत् । (तत्त्वावेदकेति) अद्वितीयपरमात्मावेदकेत्यर्थः । तद्रूपस्य–जीवाद्भिन्नाभिन्नरूपब्रह्मणः, तज्ज्ञानात्–अद्वितीयब्रह्मज्ञानात् । शाब्दज्ञानं–शब्दजन्यपरोक्षज्ञानम् ॥

शि० म०–नापि साक्षात्कारः, तस्य भिन्नाभिन्नब्रह्मविषयकस्य स्वविषयभेदनिवर्तकत्वायोगात् स्वविषयाभावतथा भेदनिवर्तकत्वे अभेदस्यापितन्निवृत्तिप्रसंगात् अत्यंताभेदविषयक एव साक्षात्कार

Funding by IKS-MoE

इतिचेत्, न, भेदानिवृत्तेःपूर्वमत्यंताभेदाभावेन तस्यापरोक्षज्ञानविषयत्वासिद्धेः, भावेचास्मन्मतप्रवेशापत्तेः । तस्मान्नभिन्नाभिन्नं ब्रह्मवाक्यार्थः । इत्यलमतिविस्तरेण । एवं सत्यादिवाक्यजन्यज्ञानस्यापि संसर्गागोचरत्वमुपपादनीयम् ननु सत्यादिवाक्यस्य सत्यत्वादिविशिष्टार्थबोधकत्वात्कथं तज्जन्यज्ञानस्य संसर्गागोचरत्वम् । किंच नेदंसंसर्गानवगाहि, अस्य लक्षणवाक्यत्वेन लक्ष्येलक्षणवैशिष्ट्यबोधकत्वात् । किंच नैतज्जन्यज्ञानं प्रातिपदिकार्थमात्रावगाहि सर्वत्रलक्षणस्य व्यावृत्तिव्यवहारप्रयोजनतया सत्यादिवाक्यस्यापि तत्पदवाच्यत्वेनातद्व्यावृत्तत्वेन च ब्रह्मबोधकत्वे प्रातिपदिकार्थमात्रावगाहित्वायोगात् । किंचास्य प्रातिपदिकार्थमात्रबोधकत्वमपि शक्त्या लक्षणया वा । नाद्यः, वाक्येशक्तेरनभ्युपगमात्, सत्यादिपदानां बाधायोग्यत्वादिविशिष्टतत्तत्पदार्थशक्ततया परिपूर्णानंदवस्तुनासामर्थ्याभावात । अत एव नद्वितीयः, वाक्यस्य क्वचिदप्यशक्तत्वेन शक्त्यसंबंधलक्षणलक्षणायोगात्, पदानांच विनिगमनाविरहेण प्रत्येकलक्षकत्वायोगात्, मुख्यार्थानामन्वययोग्यत्वेनान्वयानुपपत्त्यभावाच्च । नहि तया विना लक्षणासंभवति, तथात्वे वा पदांतरवैयर्थ्यप्रसंगात् । अपिच सत्यादिपदानां नैकार्थमात्रपरत्वं, तथासतिहस्तः कर इत्यादिवत्पर्यायतापत्तेः ॥

म० प्र०—तस्य—साक्षात्कारस्य (स्वविषयभेदेति) वृत्त्यात्मकज्ञानस्य स्वविषयव्यतिरिक्ताज्ञानादिनिवर्तकत्वेन स्वविषयभेदनिवर्तकत्वासंभवादित्यर्थः । स्वविषयाभावतया—भेदसाक्षात्कारविषयाभेदाभावरूपतया । तन्निवृत्तिप्रसंगात्—अभेदस्यापि स्वविषयभेदाभावरूपतया साक्षात्कारेण नाशप्रसंगात् । तस्य—अत्यंताभेदस्य, तज्जन्यज्ञानस्य—सत्यादिवाक्यजन्यज्ञानस्य, इदं—सत्यादिवाक्यं संसर्गानवगाहिबोधजनकम्, अस्य—सत्यादिवाक्यस्य, एतज्जन्यज्ञानं—सत्यादिवाक्यजन्यज्ञानम् (प्रातिपदिकार्थमात्रावगाहीति) यस्मिन्प्रातिपदिके उच्चरिते सति यस्यार्थस्य नियमेनोपस्थितिः सतत्प्रातिपदिकार्थस्तदवगाहीत्यर्थः । सर्वत्र—सर्वस्य, लक्षणस्य—लक्षणवाक्यस्य, तत्पदवाच्यत्वेन—सत्यादिपदवाच्यत्वेन, अतद्व्यावृत्तित्वेन—अब्रह्मव्यावृत्तत्वेन । अस्य—सत्यादिलक्षणवाक्यादेः (बाधायोग्यत्वादीति) अत्रादिपदेन—जडभिन्नत्वापरिच्छिन्नत्वादीनां ग्रह इति । अतएव—वक्ष्यमाणहेतोरेव, (शक्यसंबंधलक्षणेति) शक्यसंबंधस्वरूपेत्यर्थः । तयाविना—अन्वयानुपपत्त्याविना । तथात्वेवा—अन्वयानुपपत्त्याविनासत्यपरिपूर्णानंदवस्तुनिलक्षणास्वीकारेवा (पदान्तरेति) सत्यादिवाक्यघटकलक्षणावृत्तिमत्पदातिरिक्तपदेत्यर्थः ॥

शि० म०—एवं च प्रयोगः । सत्यादिवाक्यं संसृष्टार्थबोधकं स्वोपस्थापितपदार्थान्योन्यसंसर्गबोधकंवा वाक्यत्वात्, ज्योतिष्टोमादिवाक्यवत् । नच जरद्गवादिवाक्ये व्यभिचारः, तस्याकांक्षादिमत्त्वाभावेन वाक्याभासत्वात् । आकांक्षासत्तियोग्यतावंति पदानि वाक्यमितिहिवाक्यविदः । नच विपक्षे बाधकतर्काभावः, संसर्गबोधकत्वे वाक्यत्वाभावप्रसंगस्यैव बाधकत्वात् । तस्मान्न सत्यादिवाक्यजन्यज्ञानं निर्विकल्पकमिति । उच्यते । सत्यादिवाक्यं संसर्गागोचरज्ञानजनकं स्वरूपलक्षणवाक्यत्वात् । प्रातिपदिकार्थमात्रपरत्वाद्वा, प्रकृष्टप्रकाशश्चंद्र इति वाक्यवत् । नच दृष्टांते साधनवैकल्यमस्मिन् ज्योतिर्मंडले कश्चंद्र इति प्रातिपदिकार्थमात्रविषयप्रश्नदर्शनेन प्रतिवचनस्यापि तत्प्रातिपदिकार्थमात्रपरत्वात् । अन्यथा प्रतिवचनस्य प्रश्नाननुरूपत्वापत्तिः । नच प्रश्नेचन्द्रासाधारणधर्मस्यातद्व्यावृत्तेश्चंद्रपदवाच्यत्वस्य वा विषयत्वात्, सोपि न तन्मात्रपर इति वाच्यम्, असाधारणधर्मस्य प्रकाशविशेषस्य चन्द्रेप्रत्यक्षेणावगतत्वात् । अतएव नातद्व्यावृत्तिपरः प्रश्नः, चन्द्रोऽचन्द्राद्व्यावृत्त इति निश्चितत्वात् । नापि चंद्रपदवाच्यत्वं तद्विषयः, चंद्रश्चंद्रपदवाच्य इति ज्ञानत्वात् । तर्हिकथं संशय इतिचेत्, न, चंद्रत्वस्य तद्वैशिष्टयस्य वा चंद्रपदवाच्यत्वस्य ज्ञानेपि तत्कुत्रेत्यज्ञानेन तत्र तत्संशयसंभवात् । अतएव लोके तदनुभवः चंद्रश्चंद्रपदवाच्य इति 'जानामि तत्स्वरूपं तु न जानामि तदेव किम्' इति, पृच्छामीति ॥

म० प्र०—संसृष्टार्थबोधकं—परस्परसंसर्गवदर्थविषयकबोधजनकम् (स्वोपस्थापितेति) स्वंसत्यादिवाक्यघटकपदानितैरुपस्थापिताः स्मृताः ये पदार्थास्तेषां योऽन्योन्यसंसर्गस्तद्विषयकबोधजनकमित्यर्थः । (जरद्गववाक्येइति) ॥

"जरद्गवःकंबलपादुकाभ्यांद्वारिस्थितोगायतिमद्रकाणि ॥
तंपृच्छतिब्राह्मणीपुत्रकामाराजन्रुमायांलशुनस्यकोर्थः" ॥

इति जरद्गववाक्ये इत्यर्थः । तस्य-जरद्गवादिवाक्यस्य, विपक्षे—हेतोः साध्याप्रयोजकत्वे (तत्प्रातिपदिकार्थेति) चंद्रस्वरूपप्रातिपदिकार्थेत्यर्थः (अन्यथेति) प्रकृष्टप्रकाशश्चंद्र इति वाक्यस्य चंद्रप्रातिपदिकार्थमात्रपरत्वानंगीकारे, चंद्रासाधारणधर्मस्य—प्रकाशविशेषस्य, सोपि—अस्मिन्ज्योतिर्मंडलेकश्चंद्रइति प्रश्नोपि, तन्मात्रपरः—चंद्रप्रातिपदिकार्थपरः, अतएव—वक्ष्यमाणहेतोरेव तद्विषयः—उक्तप्रश्नवाक्यविषयः, तर्हि—चंद्रासाधारणधर्मादीनांज्ञातत्वे (चंद्रत्वस्येति) चंद्रेचंद्रपदवाच्यत्वस्य ज्ञानेपि तच्चंद्रत्वं चंद्रत्ववैशिष्टयं वा कुत्रेति चंद्रत्वस्य चंद्रत्ववैशिष्टयस्य वाऽज्ञानेन

तत्रचंद्रत्वे चंद्रत्ववैशिष्ट्ये वा प्रश्नकर्तुः संशयसंभवादित्यर्थः । अतएव-चंद्रत्वादौसंशयसंभवादेव, तदनुभवः-चंद्रत्वादौसंशयसंभवादेव तदनुभवः चंद्रस्वरूपविषयकाज्ञानविषयकानुभवबोधकवाक्यम् प्रश्नकर्त्रनुभवबोधकवाक्यमिति वा ॥

शि० प्र०-नचैवमपि लक्षणवाक्यादतद्व्यावृत्तिवैशिष्ट्यप्रतीतेर्विशिष्टार्थपरत्वात् दृष्टान्तदार्ष्टांतिकयोस्साधनवैकल्यं साध्यबाधश्चेति युक्तमतद्व्यावृत्तिवाचकपदाभावेन साक्षादबोधकस्य लक्षणवाक्यस्यार्थात्तद्बोधकत्वेपि तत्परत्वाभावात् । नहि गामानयेति वाक्यमर्थादश्वानयनव्यावृत्तिबोधकमपि तत्परंभवति, तथाचाहुः शबरस्वामिनः 'यश्चार्थादर्थोनसचोदनार्थः' इति ब्रह्मणश्चातद्व्यावृत्तिस्वरूपत्वेन तत्र तद्वैशिष्ट्याभावात् । चंद्रेत्वतद्व्यावृत्तेश्चंद्रत्वस्वरूपत्वेपि तस्य तत्प्रातिपदिकार्थत्वेन वाक्यस्यैव प्रातिपदिकार्थमात्रपरत्वस्यानपायात् । नच लक्षणानुपपत्तिः अर्थवादवद्वाक्येपि लक्षणास्वीकारात्, लाघवेन ज्ञाप्यसंबंधस्यैव लक्षणात्वात् । अथवा एकपद एव लक्षणा । नच नियामकाभावः, विशेष्यवाचकपदत्वस्यनियामकत्वात् ॥

म० प्र०-एवमपि-चंद्रस्वरूपविषयकाज्ञानेपि, विशिष्टार्थपरत्वात्-लक्षणवाक्यस्यातद्व्यावृत्तिविशिष्टार्थपरत्वात् (साधनेति) द्वितीयहेतोरभावइत्यर्थः । साध्यबाधश्च-साध्याभावश्च (अतद्व्यावृत्तीति) असदादिप्रतियोगिकभेदेत्यर्थः । साक्षात्--अर्थापत्तिप्रमाणंविना, अबोधकस्य-असदादिप्रतियोगिकभेदविषयकबोधाजनकस्य । अर्थात्-असदादिप्रतियोगिकभेदं विना सत्यत्वादिबोधनमनुपपन्नं सदसदादिप्रतियोगिकभेदं बोधयतीत्यर्थापत्तिप्रमाणात् । तद्बोधकत्वेपिअसदादिप्रतियोगिकभेदविषयकबोधजनकत्वेपि, तत्परत्वाभावात्-असदादिप्रतियोगिकभेदविषयकतात्पर्य्याभावात् । अर्थात्-गवानयनेऽश्वानयनप्रतियोगिकभेदं विना गवानयनबोधनमनुपपन्नं सदश्वानयनप्रतियोगिकभेदं गवानयने कल्पयतीत्यर्थापत्तिप्रमाणात् । तत्परं-गवानयनेऽश्वानयनप्रतियोगिकभेदविषयकतात्पर्य्यवत् । अर्थादर्थः-अर्थापत्तिप्रमाणात्प्राप्तोर्थः; चोदनार्थः-विध्यर्थः । पक्षे दृष्टांतेच द्वितीयसाधनवैकल्यं परिहृत्य पक्षेसाध्यबाधोपि न युक्त इति प्रतिज्ञायां हेतुमाह (ब्रह्मणश्चेति) तत्र-ब्रह्मणि, तद्वैशिष्ट्याभावात्-असदादिप्रतियोगिकभेदसंसर्गाभावात् । दृष्टांतेपि साध्यबाधो न युक्त इति प्रतिज्ञायांहेतुमाह (चंद्रेत्विति) अतद्व्यावृत्तेः-चंद्रभिन्नप्रतियोगिकभेदस्य । तस्य-चंद्रत्वरूपचंद्रभिन्नप्रतियोगिकभेदस्य, तत्प्रातिपदिकार्थत्वेन-चंद्रप्रातिपदिकार्थत्वेन, वाक्यस्यैव-प्रकृष्टप्रकाशश्चन्द्र इति वाक्यस्यैव, वाक्येपि-स्वरूपलक्षणवाक्येपि । ननु वाक्येशक्त्यभावाच्छक्यसंबंधरूपलक्षणानुपप-

त्तिरित्युक्तमित्याशंक्य शक्यसंबंधरूपलक्षणायां शक्तेरपि प्रवेशाद्गौरवमभिप्रेत्य वाक्येलक्षणास्वीकारे हेतुमाह (लाघवेनेति) । (ज्ञाप्येति) स्वजन्यबोधविषयेत्यर्थः। स्वंपदं वाक्यं वा ग्राह्यमिति (विशेष्यवाचकपदत्वस्यनियामकत्वादिति) ननु विशेष्यवाचकपदत्वस्यलक्षणानियामकत्वं कुतोऽवगतमितिचेत्, न, गंभीरायां नद्यां घोष इत्यादिवाक्ये विशेष्यवाचकपदस्य लक्षणानंगीकारेविशेषणवाचकपदोत्तरश्रूयमाणविभक्तेः साधुत्वार्थकत्वेन विशेष्यवाचकपदोत्तरश्रूयमाणविभक्तेरेवाधिकरणतार्थकत्वेन प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमभंगापत्त्या विशेष्यवाचकपदत्वस्य लक्षणानियामकत्वस्यावगतत्वादिति ॥

शि०म०–नच पदान्तरवैयर्थ्यं तत्समभिव्याहारवशादेव तस्य तत्परत्वावगमात् एतावतैव वाक्यं तत्परमित्युच्यते । अतएव गंभीरायां नद्यां घोषः प्रतिवसति, चित्रगुमानयेत्यत्र नदीपदगोपदयोस्तीरादिपदार्थलक्षणायामपि न पदान्तरवैयर्थ्यम्। यद्वा सर्वपदैरेव लक्षणाया ज्ञानानंदात्मकवस्तूपस्थितिः नत्वेकैकपदात्, स्वरूपलक्षणस्य सच्चिदानंदात्मकस्यैकैकेनालाभात्। ततश्च प्रतिपदं लक्षणाभ्युपगमेपि न पदांतरवैयर्थ्यम्। ननु प्रकृष्टप्रकाशादिपदेषु सत्यादिपदेषु च जहल्लक्षणायां चंद्राद्यन्यस्य प्रतीत्यापत्तिः अजहल्लक्षणायां विशिष्टार्थप्रतिपत्तिर्दुर्वारेतिचेत्, न, जहदजहल्लक्षणायां चंद्रादेरेव वाच्यैकदेशस्योपस्थितिरिति सांप्रदायिकाः । गौरनित्येत्यादिवद्विशिष्टशक्तस्य पदस्य वाच्यैकदेशविशेष्यपरत्वेपि न लक्षणाशक्यैव तस्य स्वातंत्र्येणोपस्थितत्वात्। स्वतंत्रोपस्थितये हि सा अत एव गौर्नित्येत्यत्र गोत्वस्य स्वातंत्र्येणोपस्थितये लक्षणेत्यस्मत्पितृचरणाः । युक्तंचैतत्–अनवस्थादोषाभावात् । लक्षणापक्षे हि प्रमाणांतरानवगतस्य ब्रह्मणः शक्यान्यरूपेण लक्षणया नोपस्थितिः, तदुपस्थितिश्च पदांतरेणेत्यनवस्था । नचात्रपर्यायताशंकापि विशिष्टशक्त्यभ्युपगमात् । नचैवं लक्षणानभ्युपगमे शक्त्युपस्थितानां वृत्तिविशेषबाधायोग्यत्वापरिच्छिन्नत्वसर्वात्मत्वविशिष्टपदार्थानां भेदेनपरस्परान्वयबोधापत्तिरित्युक्तमितिवाच्यम् ॥

म०प्र०–पदान्तरवैयर्थ्यम्–विशेष्यवाचकब्रह्मपदस्य लक्षणास्वीकारे सत्यादिपदानां वैयर्थ्यम् । (तत्समभिव्याहारवशादिति) पदान्तरसमभिव्याहाराभावे विशेष्यवाचकपदस्यलक्षणानुपपत्त्या पदान्तरसभिव्याहारबलादेव । तस्य–विशेष्यवाचकपदस्य, तत्परत्वावगमात्–सच्चित्परिपूर्णाद्यर्थपरत्वावगमादित्यर्थः । एतावतापदांतरसमभिव्याहारवशाद्विशेषवाचकपदस्य सच्चित्परिपूर्णाद्यर्थपरत्वमात्रेण । वाक्यं–

सत्यादिवाक्यम् । अतएव–पदान्तरसमभिव्याहारबलाद्विशेष्यवाचकपदस्य विवक्षितार्थपरत्वावगमादेव । अजहल्लक्षणायां–प्रकृष्टपदस्य प्रकाशपदस्य वा शक्यार्थसंबंधिनिप्रकृष्टप्रकाशविशिष्टेऽजहल्लक्षणायाम्, विशिष्टार्थप्रतिपत्तिः–प्रकृष्टप्रकाशविशिष्टश्चंद्र इति विशिष्टार्थप्रतिपत्तिः, तस्य–विशेष्यांशस्य, स्वातन्त्र्येण–अन्याविशेषणत्वेन । अत एव स्वातंत्र्येणोपस्थितयेलक्षणास्वीकारादेव । (शक्यान्यरूपेणेति) शक्यभिन्नस्वरूपत्वेन लक्षणयायोपस्थितिःसानसंभवतिमानांतरेण ज्ञातेहि लक्षणास्वीकारात् ब्रह्मणस्तुमानांतरेणाज्ञातत्वादतस्तस्यज्ञानं लक्षणया पदांतरेण वाच्यमिति पदांतरस्यापि पदांतरापेक्षेत्यनवस्थास्यादित्यर्थः । अत्र–पितृचरणमतेसत्यादिपदेषु । (वृत्तिविशेषेति) अंत्रविशिष्टपदस्य द्वंद्वांते श्रूयमाणत्वेन प्रत्येकमन्वयः । तथाच वृत्तिविशेषविशिष्टचैतन्यं ज्ञानपदार्थोऽबाधायोग्यत्वविशिष्टसत्यपदार्थोऽपरिच्छिन्नत्वविशिष्टमनंतपदार्थः सर्वात्मत्वविशिष्टं ब्रह्मपदार्थ इति विभाग इत्यर्थः ॥

मू०–इदमेव तत्त्वमस्यादिवाक्यानामखंडार्थत्वं यत्संसर्गानवगाहियथार्थज्ञानजनकत्वमिति ॥

शि०म०–तात्पर्य्यविषयाभेदस्य विशिष्टपदार्थेषु असंभवेन प्रकाशविशेषोपलक्षितचंद्रस्यैव सत्यज्ञानपरिपूर्णात्मकस्य तदभेदलक्षणस्य ब्रह्मणः शाब्दज्ञानविषयत्वात् । अत एव सोऽयंदेवदत्तस्तत्त्वमसीत्यत्र शक्त्यादिविशिष्टपदार्थोपस्थितावपि योग्यताबलाद्विशेष्यस्वरूपमेवाभेदान्वययोग्यं बोधविषय इति चतुर्थे वक्ष्यते, ततश्च सिद्धं सत्यादिवाक्यजन्यज्ञानस्य निर्विकल्पकत्वमिति । एवं "तत्त्वमासि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म" इत्यादिमहावाक्यस्य सत्याद्यवांतरवाक्यस्य च प्रातिपदिकार्थमात्रपरत्वात् तन्मात्रावगाहिज्ञानजनकत्वमुक्तम् । इदानीमखंडार्थत्वप्रसिद्धिरपि निर्विकल्पकहेतुत्वे प्रमाणमित्याह (इदमेवेति) यत्संसर्गानवगाहियथार्थज्ञानजनकत्वमिदमेवतत्त्वमस्यादिवाक्यानामखंडार्थत्वं, नतुनिर्भेदवस्तुपरत्वं, तस्य भेदाभावविशिष्टवस्तुपरत्वस्य निर्घटंभूतलमित्यादिवाक्यसाधारण्यात्प्रकृते तदभावाच्च । नचान्यदखंडार्थत्वं तस्यानिर्वचनादितिभावः । राजपुरुष इत्यादौ संसर्गपरे वाक्ये अतिव्याप्तिवारणायोक्तं, संसर्गानवगाहीति, तत्रैवाभेदतात्पर्य्यभ्रमात् पदार्थसंसर्गानवगाहि तदभेदभ्रमजनके तत्प्रसंगवारणाय (यथार्थेति) ॥

म० प्र०–(सत्येति) तदभेदलक्षणस्य–सत्याद्यभेदस्वरूपस्य, सत्यज्ञानपरिपूर्णाद्यात्मकब्रह्मण इत्यर्थः । अतएव–तात्पर्यविषयार्थस्यैव, शाब्दबोधविषयत्वादेव ।

(विशिष्टेति) तद्देशतत्कालतद्वस्तुएतद्देशैतत्कालैतद्वस्तुविशिष्टेत्यर्थः । (विशेष्येति) देवदत्तपिण्डमात्रेत्यर्थः । अभेदान्वययोग्यम्—अभेदेनयोऽन्वयस्तद्योग्यं तद्वत् । ततश्च—सत्यादिवाक्यजन्यज्ञानस्यपदार्थसंसर्गानवगाहित्वादेव, परत्वात्—तात्पर्यवत्त्वात् । (तन्मात्रेति) प्रातिपदिकार्थमात्रेत्यर्थः । अखंडार्थत्वप्रसिद्धिरपि—तत्त्वमस्यादिवाक्यानामखंडार्थकत्वप्रसिद्धिरपि, निर्विकल्पकहेतुत्वे—तत्त्वमस्यादिवाक्यानांनिर्विकल्पकज्ञानहेतुत्त्वे (निर्भेदवस्तुपरत्वमिति ।) अत्रभेदशब्दो भिद्यमानघटादिविशेषपरो भेदस्याभावो निर्भेदं निर्गतोभेदो यस्मिन्वातन्निर्भेदंभेदमतिक्रान्तं वस्तु निर्भेदमितिवाविग्रहस्ततोवस्तुशब्देन कर्मधारयः । तथाच घटादिविशेषप्रतियोगिकाभावरूपवस्तुपरत्वमुक्ताभावविशिष्टवस्तुपरत्वं वेत्यर्थः (भेदाभावेति) घटादिस्वरूपविशेषप्रतियोगिकाभावेत्यर्थः । प्रकृते—सत्यादिवाक्ये (तदभावाच्चेति) घटादिद्वैतरूपविशेषाभावबोधकशब्दाभावेन निर्भेदवस्तुपरत्वाभावाच्चेत्यर्थः । (अतिव्याप्तिवारणायेति) यथार्थज्ञानजनकत्वरूपाखंडार्थकवाक्यलक्षणातिव्याप्तिवारणायेत्यर्थः । तत्रैव—राज्ञः पुरुषइत्यादिवाक्येएव (तदभेदेति) राजपुरुषाभेदेत्यर्थः । (तत्प्रसंगेति) लक्षणातिव्याप्तीत्यर्थः ॥

मू०—तदुक्तम्—

संसर्गासंगिसम्यग्धीहेतुतायागिरामियम् ।
उक्ताखंडार्थतायद्वातत्प्रातिपदिकार्थता ॥ १ ॥

शि० म०—अत्रचस्ववाच्यार्थनिरूपितसंसर्गागोचरत्वं स्वोपस्थापितपदार्थसंसर्गागोचरत्वं वा संसर्गानवगाहिपदेन विवक्षितमिति, तेन तत्राप्राप्तयोः प्राप्तिः संयोगः नित्यः संबंधः समवाय इत्यादौ लक्षणवाक्ये नाव्याप्तिः । विषंभुंक्ष्वेत्यादौ च नातिव्याप्तिः, लक्षणया तदुपस्थितशत्रुगृहभोजनादौ कर्तव्यताभावसंसर्गावगाहिज्ञानजनकत्वात् । इदं चोपलक्षणं प्रातिपदिकार्थमात्रपरत्वमखंडार्थत्वमित्यपि द्रष्टव्यम् । अतएवोभयत्र चित्सुखाचार्यसंमातिमाह (तदुक्तमिति) यासंसर्गासंगिसम्यग्धीहेतुता इयमखंडार्थतोक्तेतिसंबंधः । लक्ष्यं निर्दिशति (गिरामिति) कार्यकारणभावरहितद्रव्यविषयसमानाधिकरणापर्यायशब्दानामित्यर्थः ॥

म० प्र०—ननु संसर्गानवगाहिशब्दस्य संसर्गावगाहिभिन्नेत्यर्थकत्वस्वीकारे अप्राप्तयोः प्राप्तिः संयोगः नित्यः संबंधः समवाय इत्यादिवाक्येष्वव्याप्तिस्तत्र संयोगसमवायरूपसंसर्गावगाहित्वादित्याशंक्याह (अत्रचेति) संसर्गानवगाहियथार्थज्ञान-

Funding by IKS-MoE

जनकत्वमित्याकारकेऽखंडार्थकवाक्यलक्षणवाक्ये इत्यर्थः । (स्ववाच्यार्थेति) वाक्यघटकपदवाच्यार्थेत्यर्थः । ननु संसर्गानवगाहिशब्देन स्ववाच्यार्थनिरूपितसंसर्गागोचरत्वस्य विवक्षितत्वे विषंभुंक्ष्वेत्यादिवाक्यस्य स्ववाच्यार्थनिरूपितसंसर्गागोचरयथार्थज्ञानकत्वाद्विषंभुंक्ष्वेत्यादिवाक्येऽतिव्याप्तिरित्यरुच्या पक्षांतरमाह (स्वोपस्थापितेति) शक्तिलक्षणान्यतरसंबंधेन वाक्यघटकपदोपस्थापितेत्यर्थः (इति तेन तत्रेति) अखंडार्थकवाक्यलक्षणे इति उक्तेनप्रकारेणतेनसंसर्गानवगाहिशब्देनोक्तार्थस्य विवक्षितत्वेनेत्यर्थः । लक्षणया–वाक्यलक्षणया (तदुपस्थितेति) वाक्योपस्थितेत्यर्थः । अप्राप्तयोरित्यादिसंयोगादिलक्षणवाक्ययोः संयोगसमवायरूपसंबंधस्यैवविवक्षितत्वेन पदार्थानां परस्परंसंबंधस्याविवक्षितत्वात्संयोगादिसंबंध एवैतयोर्वाक्ययोरर्थ इति भावः । अतएव–तत्त्वमस्यादिवाक्यानां संसर्गानवगाहियथार्थज्ञानजनकत्वाद्यखंडार्थकत्वसंभवादेव । उभयत्र–तत्त्वमस्यादिवाक्यानामुक्तद्विविधाखंडार्थकत्वे (कार्य्येति) मृद्घट इत्यादिशब्दानां लक्ष्यत्ववारणाय कार्य्यकारणभावरहितेति नीलंरूपमित्यादिशब्दानां लक्ष्यत्ववारणाय द्रव्यविषयेति घटः पटश्चेत्यादिशब्दानां लक्ष्यत्ववारणाय समानाधिकरणेति घटकलशादिशब्दानां लक्ष्यत्ववारणायापर्यायेति ॥

मू०–प्रातिपदिकार्थमात्रपरत्वमखंडार्थत्वमिति चतुर्थपादार्थः ।

तच्च प्रत्यक्षं पुनर्द्विविधं–जीवसाक्षि ईश्वरसाक्षिचेति । तत्र जीवो नामान्तःकरणावच्छिन्नचैतन्यं, तत्साक्षि तु अन्तःकरणोपहितचैतन्यम् । अन्तःकरणस्य विशेषणत्वोपाधित्वाभ्यामनयोर्भेदः ॥

शि०म०–ननु तत्प्रातिपदिकार्थेत्यस्य चतुर्थपादस्य साकांक्षत्वादानर्थक्यमखंडार्थत्वपदालुषंगेच, संसर्गपरेहि वाक्ये प्रातिपदिकार्थप्रतिपादकत्वसत्त्वादतिव्याप्तिरित्याशंक्याह (प्रातिपदिकार्थेति) यस्य वाक्यस्य यत्प्रातिपदिकार्थमात्रपरत्वं तस्य तत्राखंडार्थत्वम्, अतोनान्यत्र तत्प्रसंग इति तत्पदघटितलक्षणाभिप्रायं तद्ग्रहणमितिद्रष्टव्यम् । एवं सविकल्पकनिर्विकल्पकभेदात् द्वैविध्येन निरूपितस्य प्रत्यक्षज्ञानस्य प्रकारांतरेणद्वैविध्यमाह (तच्चेति) द्वैविध्यप्रकारमेवाह (जीवेति) साक्षिपदं तज्जन्यपरं तथाच जीवसाक्षिजन्यमीश्वरसाक्षिजन्यमिति द्विविधमित्यर्थः । अतएवैवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यमित्युत्तरग्रंथोपि संगच्छते । अन्यथास्य साक्षिद्वैविध्यप्रतिपादन-

परत्वे प्रत्यक्षज्ञानद्वैविध्यं निरूपितमित्युत्तरग्रंथो विरुध्येत । नच साक्षिद्वैविध्यादत्रार्थसिद्धस्य ज्ञानद्वैविध्यस्योत्तरत्रानुवादो न विरुध्यते इति युक्तम् । तथापि सविकल्पकनिर्विकल्पकभेदेन प्रत्यक्षज्ञाननिरूपणानंतरं साक्षिद्वैविध्यनिरूपणस्यासंगतत्वापत्तेः प्रत्यक्षज्ञानद्वैविध्यं साक्षिद्वैविध्यनिरूपणाधीनमिति तन्निरूपयति (तत्रेत्यादिना) । जीवोनामेति) यद्यपि जीवस्सप्तमे निरूपयिष्यते इति नेह तन्निरूपणं युक्तं तथापि जीवतत्साक्षिणोर्भेदं निरूपयितुं जीवस्वरूपकथनमित्यवधेयम् । अत एव व्यावर्तकान्तःकरणस्यैकत्वाज्जीवतत्साक्षिणोरभेदमाशंक्य निराचष्टे (अन्तःकरणस्येति) ॥

म०प्र०–आनर्थक्यं–स्वार्थाबोधकत्वम् । वाक्ये–घटमानयेत्यादिवाक्ये । नत्वेवं तत्प्रातिपदिकार्थतेत्यत्र तत्पदस्यवैयर्थ्यं गिरामित्यस्य पूर्ववाक्ये उक्तत्वात् । किंच सोयंदेवदत्त इतिवाक्यीयप्रातिपदिकार्थमात्रप्रतिपादकतारूपाखंडार्थतायास्तत्त्वमस्यादिवाक्येष्वतिप्रसंगः स्यात्, तत्त्वमस्यादिवाक्यीयप्रातिपदिकार्थमात्रप्रतिपादकतारूपाखंडार्थतायाः सोयंदेवदत्त इतिवाक्येऽतिप्रसंगश्च स्यात् । उभयोःप्रातिपदिकार्थमात्रप्रतिपादकत्त्वसत्वादित्याशंक्याह (यस्यवाक्यस्येति) तस्य–तादृशवाक्यस्य, तत्र–तस्मिन्प्रातिपदिकार्थमात्रे, अतः–तत्त्वमस्यादिवाक्यानामुक्ताखंडार्थकत्वात् । अन्यत्र सोयंदेवदत्तइतिवाक्यीयाखंडार्थशून्ये तत्त्वमस्यादिवाक्ये तत्त्वमस्यादिवाक्यीयाखंडार्थताशून्ये सोयंदेवदत्तइतिवाक्येच, तत्प्रसंगः–उक्ताखंडार्थतयोः प्रसक्तिः (इतितत्पदघटितलक्षणाभिप्रायमिति) इति उक्तस्वरूपे तत्पदघटितलक्षणेयस्यवाक्यस्येत्यादिपदघटितलक्षणेऽभिप्रायस्तात्पर्य्यम् । यस्य–तत्प्रातिपदिकार्थतेत्यत्रगृह्यमाणतत्पदस्य तत्तथातद्ग्रहणम्–तत्प्रातिपदिकार्थतेत्यत्र गृह्यमाणतत्पदमित्यर्थः । भेदात्–सविकल्पकत्वादिविशेषात् । तथाच–साक्षिपदस्य साक्षिजन्यपरत्वेसति, जीवसाक्षिजन्यं–जीवस्य यःसाक्षी तज्जन्यम् । ईश्वरसाक्षिजन्यम्–ईश्वरस्य यः साक्षीतज्जन्यम् । अतएव–साक्षिशब्दस्यसाक्षिजन्यपरत्वादेव अतएव–जीवतत्साक्षिणोर्भेदस्यनिरूपणीयत्वादेव, अस्यनिराचष्टे इत्यनेनान्वयः ॥

मू०–विशेषणं च कार्य्यान्वयिव्यावर्तकम् । उपाधिश्च कार्यानन्वयी व्यावर्तको वर्तमानश्च । यथारूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणम् । कर्णशष्कुल्यवच्छिन्नं नभःश्रोत्रमित्यत्र कर्णशष्कुल्युपाधिः । अयमेवोपाधिः नैयायिकैः परि-

Funding by IKS-MoE

चायक इत्युच्यते । प्रकृते चान्तःकरणस्य जडतया विषयभासकत्वायोगेन विषयभासकचैतन्योपाधित्वम् ॥

शि० म०–ननु विशेषणोपाध्योर्वर्तमानव्यावर्तकत्वेन भेदाभावादन्तःकरणविशिष्टतदुपहितचैतन्ययोर्जीवतत्साक्षिणोरभेदइत्यत आह (विशेषणंचेति) । (कार्य्यान्वयीति) अवच्छेद्यं यदन्वयि तद्वयीत्यर्थः । एवमुत्तरत्रापि कार्य्यपदं व्याख्येयम् । तथाच कार्य्यान्वयित्वे सति व्यावर्तकं विशेषणं पर्य्यवस्यति, तेन घटपटौ पश्यति देवदत्त इत्यत्र घटपटयोरेकदर्शनक्रियान्वयित्वेपि अव्यावर्तकत्वान्नपरस्परविशेषणत्वापत्तिरिति भावः । ननु कर्णशष्कुलिर्नोपाधिः परिचायकत्वात्तथाचोपाधिलक्षणातिव्याप्तिस्तत्रेत्याशंक्याह (अयमेवेति) नन्वेवमपि चैतन्यस्य जीवत्वान्वये तत्रान्तःकरणं विशेषणं न साक्षित्वान्वय इत्यत्र किंविनिगमकमित्याशंक्य तस्य कर्तृत्वादिलक्षणजीवत्वान्वयित्वाद्विशेषणत्वं विषयावभासकसाक्षित्वानन्वयित्वादुपाधित्वमित्यभिप्रेत्याह (प्रकृतेचेति) नन्वयुक्तं जीवसाक्षिलक्षणं प्रमातृप्रमाणतत्फलव्यतिरेकेण तस्यैवासिद्धेः, नहि लक्षणेनैव तत्सिद्धिस्सिद्ध एव लक्ष्ये तत्प्रणयनात् ॥

म०प्र०–वर्त्तमानव्यावर्त्तकत्वेन–वर्तमानत्वेसतिव्यावर्त्तकत्वेन, अवच्छेद्यं–व्यावर्त्यं, यदन्वयि–येन सहान्वयि । तदान्वंयि–तेनसहान्वयि, उत्तरत्रापि–वक्ष्यमाणोपाधिलक्षणेपि, कार्य्यन्वयित्वेसति–अवच्छेद्यंयदन्वयितदन्वयित्वे सति, विधेयान्वयित्वेसतीति यावत् । तेन–विशेषणलक्षणस्यव्यावर्तकघटितत्वेन, परिचायकत्वात्–कर्णशष्कुलेः परिचायकसंज्ञावत्त्वात् । तत्र–कर्णशष्कुलौ । एवमपि–कर्णशष्कुलावतिव्याप्त्यभावेपि, (चैतन्यस्येति) चैतन्यनिष्ठजविन्वान्वये सति । तत्र–चैतन्येन्तःकरणं विशेषणमित्यर्थः । (नसाक्षित्वान्वयेइति) चैतन्यस्यसाक्षित्वान्वयेसत्यन्तःकरणं विशेषणं नेत्यर्थः । तस्य–अन्तःकरणस्य । (तत्फलेति) प्रमातृप्रमाणकार्य्यैत्यर्थः । तस्यैव–जीवसाक्षिणएव, तत्सिद्धिः–जीवसाक्षिसिद्धिः, तत्प्रणयनात्–लक्षणप्रणयनात् ॥

मू०–अयं च जीवसाक्षी प्रत्यात्मं नाना एकत्वे चैत्रावगते मैत्रस्याप्यनुसंधानप्रसंगः ॥

शि० म०–नच प्रत्यक्षमत्रक्रमते वादिविवादाभावप्रसंगात्, नचविषयावभासकाभावे जगदांध्यप्रसंगाद्भासकतया तस्य सिद्धिरितिवाच्यम्, प्रमाणचैतन्यस्यविषयावभासकरूपत्वाच्चक्षुरादेस्तत्तत्करणत्वा-

Funding by IKS-MoE

त्प्रमातुश्च तदाश्रयत्वादतिरिक्तस्य विषयावभासकस्याभावादनपेक्षितत्वाच्च, तस्मात्प्रमाणप्रयोजनयोरसंभवात्प्रमात्रतिरिक्तस्साक्षी दुर्निरूप इत्याशंक्याह (अयंचेति) अयमाशयः। जीवसाक्षी तावदंगीकर्त्तव्यः। अन्यथा विषयानुसंधानानुपपत्तेः। नचान्यथोपपत्तिः चक्षुरादिकरणतज्जन्यज्ञानानां नानात्वेनाननुगततया सर्वविषयानुसंधातृत्वायोगात् । प्रमातुश्चानुगतत्वेपि स्वानुसंधानार्थमन्यापेक्षत्वात् साक्षिणस्तु ब्रह्माभेदेन स्वप्रकाशतया, निरपेक्षस्यैव स्वपरविषयानुसंधानोपपत्तेः। ननु जीवसाक्षिणो ब्रह्माभेदेन स्वप्रकाशत्वे तद्वदेवसर्वविषयानुसंधातृत्वापत्तौ चैत्रावगते मैत्रस्याप्यनुसंधानप्रसंग इति चेत्किंमैत्रसाक्षिणश्चैत्रावगतविषयानुसंधातृत्वं स्वप्रकाशचैतन्याभेदादापाद्यते सर्वज्ञत्वादिविशिष्टचैतन्याभेदाद्वा चैत्रोपहितचैतन्याभेदाद्वा । नाद्यः, तस्य निर्विकारित्वेन तदभेदस्य सर्वविषयानुसंधानानापादकत्वात्। नद्वितीयः, अन्तःकरणोपहितस्य जीवसाक्षिणः परमेश्वरेण मायाविशिष्टेन तदुपहितेन वाऽत्यंतभेदाभ्युपगमात ॥

म०प्र०–प्रत्यक्षं–प्रत्यक्षप्रमाणम्, अत्र–जीवसाक्षिणि, क्रमते–प्रवर्तते (जगदांध्येति) जगतिभासकाभावेत्यर्थः । तस्य–जीवसाक्षिणः । ननु विषयावभासकप्रमाणचैतन्यस्य जनकतया जीवसाक्षिणः सिद्धिः स्यादित्याशंक्य मैवमित्यभिप्रेत्याह (चक्षुरादेरिति) तत्तत्कारणत्वात्–चक्षुरादेस्तत्तद्वृत्तिं प्रति करणत्वेन तत्तद्वृत्तिविशिष्टचैतन्यरूपप्रमाणचैतन्यं प्रत्यपि करणत्वात् । ननु प्रमाणचैतन्याश्रयतया जीवसाक्षिणः सिद्धिः स्यादित्याशंक्याह (प्रमातुरिति) तदाश्रयत्वात्–प्रमातुः तत्तद्वृत्त्याश्रयत्वेन तत्तद्वृत्तिविशिष्टचैतन्यरूपप्रमाणचैतन्यंप्रत्यप्याश्रयत्वात्। ननुप्रमाणचैतन्यादतिरिक्तएवविषयावभासकोजीवसाक्षिशब्दवाच्योस्तीत्याशंक्याह (अतिरिक्तस्येति) प्रमाणचैतन्यातिरिक्तस्येत्यर्थः । तस्मात्–पूर्वोक्तहेतुकलापात् । अन्यथा–जीवसाक्ष्यनंगीकारे, अन्यथोपपत्तिः–जीवसाक्षिव्यतिरिक्तप्रमाणचैतन्येनैवविषयज्ञानोपपत्तिः । अननुगततया–सर्वविषयासंबद्धतया, अनुगतत्वेपि–सर्वविषयसंबद्धत्वेपि, स्वानुसंधानार्थम्–प्रमातृज्ञानार्थम्, तद्वदेव,–ब्रह्मवदेव, तस्य–निरुपाधिकस्वप्रकाशब्रह्मणः, तदभेदस्य–निरुपाधिकस्वप्रकाशब्रह्मणा सह मैत्रसाक्षिणोऽभेदस्य । तदुपहितेन वा–मायोपहितेनवा ॥

मू०–ईश्वरसाक्षी तु मायोपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् ॥

शि०म०-न तृतीयः चैत्रमैत्रान्तःकरणयोर्भिन्नदेशस्थत्वेन तदुपहितचैतन्ययोरभेदशंकानवकाशात् । ततश्चानुसंधानानुपपत्तिः साक्षिणि प्रमाणं तथा साक्षीचेताकेवलोनिर्गुणश्चेत्यागमोपि प्रमात्राद्यतिरेकिणि साक्षिणि प्रमाणम् । नचायमीश्वरविषयः, मायाविशिष्टेतस्मिन्केवलो निर्गुण इतिविशेषणानुपपत्तेः । तस्मादस्त्यतिरिक्तजीवसाक्षी सच प्रत्यात्मं नानेत्यनवद्यम् । नन्वस्तु जीवस्य प्रमात्रादिभावातिरेकेणान्तःकरणोपहितत्वेन रूपेण साक्षित्वं तथापि नेश्वरसाक्षित्वसिद्धिः धर्मिग्राहकमानेन लाघवानुगृहीतेन नित्यज्ञानाश्रयतयैवतत्सिद्धेः मायाविशिष्टस्य जडतया ज्ञानत्वाभावाच्च । ततश्च प्रत्यक्षज्ञानं जीवसाक्षिजन्यं तद्जन्यंचेत्येवविभागो युक्त इत्याशंक्य नहि मायाविशिष्ट चैतन्यमीश्वरसाक्षि किंतुमायोपहितम् । नचैवं धर्मिग्राहकमानविरोधाद्बाधितं तस्येश्वरसाक्षित्वम्, अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वेन लाघवोपहितयोरपिकर्त्रैकत्वज्ञाननित्यत्वयोरनुमानाविषयत्वादित्यभिप्रेत्याह (ईश्वरसाक्षीत्विति) ननु ईश्वरसाक्ष्यपि नाना साक्षित्वाज्जीवसाक्षिवत् । ततश्च तद्वदेवसकलविषयाननुसंधानोपपत्तौ सोपि किंचिज्ज्ञस्स्यादित्याशंक्य किमीश्वरसाक्षिणः स्वरूपेण नानात्वमुपाधिस्थत्वेन वा । नाद्यः, एकमेवाद्वितीयमित्यादिश्रुत्या चैतन्यरूपस्य तस्यैकत्वावगमात् । नद्वितीय इत्याह (तच्चेति) ॥

म०प्र०-(तदुपहितेति) चैत्रमैत्रान्तःकरणोपहितेत्यर्थः । ततश्च—चक्षुरादिकरणतज्जन्यज्ञानानांनानात्वेनाननुगततयासर्वविषयावभासत्वायोगादेव, अयम्—साक्षीचेता इत्याद्यागमः । तस्मात्—साक्षीचेता इत्याद्यागमप्रमाणसत्त्वात्, नेश्वरसाक्षित्वसिद्धिः—ईश्वरनिष्ठज्ञानरूपत्वनिश्चयो नास्ति (धर्मिग्राहकानुमानेनेति) क्षित्यंकुरादिकं सकर्तृकं कार्य्यत्वात्,घटादिवदित्याद्याकारेणेश्वररूपधर्मिसाधकेनानुमानेनक्षित्यादिकर्तुरनेकत्वानित्यज्ञानादिमत्त्वस्वीकारेगौरवमेकत्वादिस्वीकारे लाघवमिति लाघवसहकृतेन ज्ञानाश्रयत्वेन सिद्धिः, नतु ज्ञानस्वरूपत्वेनेत्यर्थः ।ईश्वरसाक्षि—ईश्वरप्रकाशकम् । (धर्मिग्राहकमानविरोधादिति) मायोपहितचैतन्यस्येश्वरप्रकाशकत्वस्वीकारे क्षित्यादिकर्तुर्लाघववशादेकत्वस्वपरविषयकनित्यज्ञानाद्याश्रयत्वसाधकानुमानविरोधान्मायोपहितस्येश्वरसाक्षित्वं बाधितमित्यर्थः। (व्यापकतावच्छेदकेति) प्रकृतेकर्तृजन्यत्वरूपव्यापकतावच्छेदकेत्यर्थः । उपहितयोः—प्राप्तयोः, ततश्च—ईश्वरसाक्षिणोनानात्वादेव, तद्वदेव—जीववदेव ॥

शि० म०—ननु केयं मायानाम यदुपहितं चैतन्यमीश्वरसाक्षि स्यात न तावन्मिथ्याज्ञानतत्संस्कारकर्माणि तेषां सादित्वेनानादीश्वरोपाधि-

त्वाभावात्, नापि ज्ञानप्रागभावः, तस्यानादित्वेपि नानात्वेन तदुपाधित्वायोगात् । अन्यथेश्वरतत्साक्षिणोरप्यनेकत्वापत्तेः अनादिभावरूपाज्ञानं मायेतिचेन्न, लक्षणाभावेन तस्यदुर्निरूपत्वात् । तथाहि किंतल्लक्षणं ज्ञाननिवर्त्यत्वं, अनादित्वे सति तत्त्वं वा, अनादिभावत्वविशेषितमेतदेववा, अन्यद्वा । नाद्यः, प्रथमधारावाहिकबुद्धौ भ्रांतिज्ञानेचातिव्याप्तेः । न द्वितीयः, प्रागभावेपि तत्सत्त्वात् । न तृतीयः, अविद्यासंबंधादावतिव्याप्तेः । नान्त्यः, तस्यानिर्वचनात् । नच निखिलकार्योपादानत्वं तल्लक्षणमात्मनोपि मायावच्छिन्नस्य तवमते प्रपंचोपादानत्वेनतत्र तत्प्रसंगात् । नाप्येवंविधाज्ञाने प्रमाणं पश्यामः । नच न जानामीत्यनुभवः तस्य मतद्वयसंमतज्ञानाभावविषयत्वेनोपपत्तेः । नच ब्रह्मसाक्षात्कारः अज्ञाननिवर्त्तकः तत्त्वसाक्षात्कारत्वात् शुक्तितत्त्वसाक्षात्कारवदित्यनुमानं मूलाज्ञाने मानमितिवाच्यम्, विवेकाग्रहस्य मिथ्याज्ञानस्य वा शुक्तित्वापरोक्षज्ञाननिवर्त्यत्वेन दृष्टान्तासंप्रतिपत्तेःप्रागभावनिवृत्त्यार्थांतराच्च । तस्माल्लक्षणप्रमाणयोरसंभवान्नास्त्यतिरिक्तमज्ञानमिति । उच्यते । अनाद्युपादानत्वे सति ज्ञाननिवर्त्यमज्ञानं नचासंभवः प्रागभाववदनादेरप्यज्ञानस्य ज्ञाननिवर्त्यत्वे बाधकाभावात् । नाप्यतिव्याप्तिः आत्मनोऽनाद्युपादानत्वेपि ज्ञानानिवर्त्त्यत्वात्, तन्निवर्त्यस्य चाविद्यासंबंधादेरनुपादानत्वात घटाद्युपादानस्य मृत्पिंडादेरनादित्वाभावात । अथवा अनादिभावत्वे सति ज्ञाननिवर्त्यत्वमज्ञानलक्षणं नचाविद्यासंबंधादावतिव्याप्तिः अज्ञानस्यैव ज्ञाननिवर्त्यतया तत्संबंधादेस्तन्निवृत्त्यैव निवृत्त्युपपत्तेः ॥

म० प्र०–(नतावदिति) मिथ्याज्ञानं भ्रांत्यात्मकं ज्ञानं मिथ्याज्ञानादीनां समुदायोमायानेत्यर्थः । तस्य–ज्ञानप्रागभावस्य । (तदुपाधित्वेति) ईश्वरसाक्षिनिरूपितोपाधित्वेत्यर्थः । अन्यथा–ज्ञानप्रागभावरूपमायायाईश्वरोपाधित्वस्वीकारे, तस्य–अनादिभावरूपाज्ञानस्य, तत्त्वं–ज्ञाननिवर्त्यत्वम् । अनादिभावत्वविशेषितमेतदेववा–अनादिभावत्वनिष्ठविशेषणतानिरूपितविशेष्यतावज्ज्ञाननिवर्त्यत्वमेववा । प्रथमधारावाहिकबुद्धौ–अंत्यज्ञानभिन्नधारावाहिकबुद्धिघटकप्रथमादिज्ञाने । तत्सत्त्वात्–अनादित्वेसतिज्ञाननिवर्त्यत्वस्यसत्त्वात् । तस्य–ज्ञाननिवर्त्यत्वादिभिन्नस्यमायालक्षणस्य, तल्लक्षणं–मायालक्षणम् । तत्र–आत्मनि, तत्प्रसंगात्–अज्ञानलक्षणातिव्याप्तेः । एवंविधाज्ञाने–ईश्वरसाक्ष्युपाधिस्वरूपाज्ञाने । (अनुभवइति) अस्याग्रे प्रमाणमितिशेषः । तस्य–नजानामीत्यनुभवस्य, (मतद्वयेति) संमतोयोज्ञानाभावस्तद्विषयक-

त्वेनेत्यर्थः। विवेकाग्रहस्य—भेदज्ञानप्रागभावरूपस्य भेदाग्रहस्य, दृष्टान्तासंप्रतिपत्तेः—दृष्टान्तेशुक्तितत्त्वसाक्षात्कारेसाध्यानिश्चयात्। (प्रागभावेति) ज्ञानप्रागभावेत्यर्थः। अर्थांतराच्च—अनादिभावरूपाज्ञानातिरिक्तानभीष्टार्थसिद्धेश्च। तस्मात्—पूर्वोक्तहेतुकलापात्। लाघवमाश्रित्याह (अथवेति) ॥

शि०म०—नापि मिथ्याज्ञाने तत्प्रसंगः उत्पन्नभ्रमनिवृत्तेर्ज्ञानं विनापि भावात् सादित्वाच्च। नच प्रमाणाभावः, नजानामीत्यनुभवस्य सत्त्वात् नचायमन्यविषयः मिथ्याज्ञानस्य च ज्ञानत्वाधिकरणत्वात् ज्ञानात्यंताभावस्यात्मन्यसंभवात् संस्कारातिरेकेण ज्ञानध्वंसाभावात् तस्यातीन्द्रियत्वात्। नापि वृत्तिज्ञानप्रागभावस्तद्विषयः, प्रतियोगिज्ञानाज्ञानाभ्यां तज्ज्ञानायोगात्। यद्विषये कदापि ज्ञानं न भविष्यति तत्रापि न जानामीत्यनुभवाच्च। तदेवं न जानामीत्यनुभवस्तथाविधाज्ञाने प्रमाणमनुमानमपि संशयविपर्य्यासान्यतरविषयविषयकं प्रत्यक्षज्ञानं स्वविषयावरणपूर्वकं स्वनिवर्त्यपूर्वकं वा अप्रकाशितार्थप्रकाशकत्वात्, अंधकारे घटादिसंशयनिवर्तकप्रदीपप्रभावत्, धर्माधर्मादिगोचरशाब्दज्ञानस्य सुखादिसाक्षात्कारस्य च पक्षबहिर्भावात् ॥

म०प्र०—तत्प्रसंगः—अज्ञानलक्षणातिव्याप्तिः, अयं—नजानामीत्यनुभवः, अन्यविषयः—अनादिभावरूपाज्ञानातिरिक्तविषयकः। न जानामीत्यनुभवस्य मिथ्याज्ञानविषयकत्वं ज्ञानात्यंताभावविषयकत्वं वा ज्ञानध्वंसविषयकत्वं वा ज्ञानप्रागभावविषयकत्वंवेति विकल्पान् मनसि निधाय नाद्य इत्यभिप्रेत्यच हेतुमाह (मिथ्याज्ञानस्येति) भ्रांत्यात्मकज्ञानस्येत्यर्थः। नद्वितीय इत्यभिप्रेत्यहेतुमाह (ज्ञानात्यंताभावस्येति) (असंभवादिति) कार्य्यसमवायिकारणेकार्य्यात्यंताभावस्यानंगीकारादितिशेषः। नतृतीय इत्यभिप्रेत्यहेतुमाह (संस्कारातिरेकेणेति) ज्ञानसंस्कारातिरिक्तेत्यर्थः। ननु ज्ञानसंस्कारस्यैव न जानामीत्यनुभवविषयत्वमस्त्वित्याशंक्य मैवमित्यभिप्रेत्याह (तस्येति) ज्ञानसंस्कारस्येत्यर्थः। चतुर्थंप्रत्याह (नापीति)। (प्रतियोगिज्ञानाज्ञानाभ्यामिति) यदिप्रतियोगिज्ञानमस्ति तर्हि प्रतियोगिनो ज्ञानस्य विद्यमानत्वेन निखिलज्ञानप्रागभावासंभवेन नजानामीतिनिखिलज्ञानप्रागभावविषयकानुभवानुपपत्तिर्यदि प्रतियोगिज्ञानं नास्ति तर्ह्यप्यभावज्ञानं प्रति प्रतियोगिज्ञानस्य कारणत्वेन प्रतियोगिज्ञानाभावान्नजानामीतिनिखिलज्ञानप्रागभावज्ञानं न संभवतीत्यर्थः। प्रत्यक्षज्ञानं प्रमात्मकापरोक्षज्ञानम्। तथाच भ्रांतिज्ञानेपक्षैकदेशेन बाध आपादयितुं शक्य इति। स्वविषयावरणपूर्वकम्—पक्षदृष्टान्तान्यतरस्य योविषयस्तद्विषयकाभानापादकावरणपूर्वकं, लाघवमाश्रित्याह (स्वनिवर्त्येति) अभानापादकस्वनिवर्त्येत्यर्थः। अप्रकाशितार्थप्रकाशकत्वात्—अज्ञातार्थविषयकप्र-

काशरूपत्वात् (अंधकारेइति) अंधकारपदानादानेहिसौर्यमण्यादिप्रकाशांतरसमवधानकाले दीपप्रभायामुक्तसाध्याभावेनोक्तहेतुत्वभावेन च दृष्टान्तासिद्धिः स्यात्, अतोऽधकारे इत्युक्तमितिभावः । (पक्षबहिर्भावादिति) प्रत्यक्षविशेषणेन धर्माधर्मादिगोचरशाब्दानुमित्यात्मकज्ञानस्य पक्षबहिर्भावात् । सुखादिसाक्षात्कारस्य तु संशयविपर्यासान्यतरविषयविषयकविशेषणेन पक्षबहिर्भावादित्यर्थः । वस्तुतस्त्वावरणपदेनाभानापादकावरणग्रहणे प्रत्यक्षविशेषणेन धर्मादिगोचरशाब्दज्ञानादीनां पक्षबहिर्भावकरणेच फलाभावेन प्रत्यक्षेतिज्ञानविशेषणमनुपादेयमेवेति ॥

शि० म०–नांशतो बाधा[1]सिद्धी । नच वृत्तिज्ञानप्रागभावेनार्थान्तरं तस्य ज्ञानस्य निवृत्तिस्वरूपत्वात् । अभावत्वेन नानात्वेन च गौरवात् अनुमानविषयत्वायोगात् । अत एव समवायसाधकमीश्वरसाधकं चानुमानं लाघवादेकमेव समवायमीश्वरं च साधयतीति परसिद्धान्तः। अत एव विषयगततया आत्मगताहष्टेन भ्रांतिज्ञानेन वा तत्संस्कारेण वा नार्थांतरं, लाघवसहकृतानुमानेन एकस्य भावरूपस्य तस्य सिद्धेः । अतएवांधकारेणनार्थांतरं तस्य घटाद्यावरकत्वेपि विषयचैतन्यावरकत्वायोगाच्च । नचद्वितीयसाध्ये इच्छाप्रागभावेनार्थान्तरता, तत्र ज्ञानस्य प्रकाशत्वेनानिवर्तकत्वात् ॥

म० प्र०–(नांशतोबाधासिद्धीइतिं) प्रत्यक्षज्ञानीमत्युक्ते पक्षैकदेशे सुखादिप्रत्यक्षज्ञाने उक्तद्विविधसाध्याभावेनाप्रकाशितार्थप्रकाशकत्वहेत्वभावेन च बाधस्वरूपासिद्धीस्याताम्, तद्वारणाय संशयविपर्यासान्यतरविषयकेति विशेषणं संशयविपर्यासान्यतरविषयविषयकं ,ज्ञानमित्युक्ते हि द्विविधसाध्यस्य. पक्षैकदेशे धर्मादिगोचरशाब्दादिज्ञाने बाधः स्यात्, अतः प्रत्यक्षेति विशेषणमितिबाधस्वरूपासिद्धी न भवत इत्यर्थः । नच सुखादिसाक्षात्कारधर्माधर्मशाब्दज्ञानादौबाधाद्यभावेपीश्वरज्ञाने बाधादिकमस्त्येवेश्वरस्य संशयाद्यभावेपि सर्वविषयकेश्वरज्ञानस्य जीववृत्तिसंशयविपर्यासान्यतरविषयविषयकत्वस्यापि सत्त्वेन पक्षत्वेन ग्रहादिति वाच्यम्, संशयविपर्यासशब्देन प्रत्यक्षसमानाधिकरणसंशयविपर्यासयोर्विवक्षितत्वात् अत एव तत्त्वमस्यादिवाक्यजन्यब्रह्मविषयकापरोक्षज्ञानवतः पुरुषस्य पुनः श्रुततत्त्वमस्यादिवाक्यजन्यज्ञानेन बाधस्वरूपासिद्धीइति स्वनिवर्त्यपूर्वकमिति द्वितीयसाध्यस्वीकारपक्षे वृत्तिज्ञानप्रागभावभिन्नार्थान्तरमाशंक्य निषेधति (नचेत्यादिना) (तस्येति) ज्ञानस्य

---

[1] नन्वेवमपि धर्माधर्मगोचरशाब्देऽप्रकाशितार्थप्रकाशकत्वहेतुसत्त्वे व्यभिचार इतिचेन्न संशयविपर्य्ययान्तरविषयविषयकत्वे सति आभानापादकावरणविशिष्टतदन्यतरनिवृत्तौ निरपेक्षहेतुत्वमिति हेतोर्विवक्षणात् ।

अभाव

Funding by IKS-MoE

तस्य निवृत्तिस्वरूपत्वादित्यन्वयः । तस्य–वृत्तिज्ञानप्रागभावस्य । तथाच वृत्तिज्ञाननिष्ठवृत्तिज्ञानप्रागभावप्रतियोगिकध्वंसस्वरूपत्वादित्यर्थः । नच वृत्तिज्ञानप्रागभावध्वंसरूपाभावस्य वृत्तिज्ञानरूपभावरूपत्वं कथमिति वाच्यम्, अभावाभावस्यप्रतियोगिस्वरूपत्वाभ्युपगमेनादोषादिति भावः (अभावत्वेनेति) भावभिन्नत्वमभावत्वमित्यभावस्य भावघटिताभावत्वेन नानास्वरूपत्वेनचेत्यर्थः । (अतएवेति) गुरुभूतार्थेऽनुमानविषयत्वायोगादेवेत्यर्थः । समवायसाधकं–गुणीक्रियावानित्यादिविशिष्टबुद्धिर्विशेषणविशेष्यसंबंधविषया विशिष्टबुद्धित्वाद्दंडीपुरुष इतिविशिष्टबुद्धिवदित्याकारकम् । अतएव–वक्ष्यमाणहेतोरेव, विषयगततया–अदृष्टादीनां विषयतासंबंधेन घटादिविषयप्राप्ततया (आत्मगतादृष्टेनेति) अन्तःकरणविशिष्टात्मगतादृष्टाद्यभिन्नार्थान्तरंनेत्यर्थः । तस्य–अज्ञानस्य । अतएव–गुरुभूतार्थेऽनुमानविषयत्वायोगादेव, तस्य–अंधकारस्य (द्वितीयसाध्येइति) द्वितीयं च तत्साध्यं. तत्तथातस्मिन्स्वीकृते सति । यद्वा द्वितीयं साध्यं यस्मिन्पंचावयववाक्ये तत्तथा तस्मिन् । तथाचादौ जानाति तत इच्छतीतिक्रमाज्ज्ञानस्येच्छोत्पादकत्वेनेच्छाप्रागभावस्य ज्ञाननिवर्त्यत्वाद्द्वितीयसाध्याभ्युपगमोत्तरकालीनेच्छाप्रागभावाभिन्नमर्थांतरम् । यद्वा द्वितीयसाध्यकपंचावयववाक्यप्रवृत्त्युत्तरकालीनेच्छाप्रागभावाभिन्नार्थांतरमित्यर्थः । तत्र–इच्छाप्रागभावे, ज्ञानस्यप्रकाशत्वेनानिवर्तकत्वात्–ज्ञानस्येच्छोत्पादकत्वावच्छिन्नेच्छाप्रागभावनिवर्तकत्वेन ज्ञानत्वरूपप्रकाशत्वावच्छिन्नेच्छाप्रागभावनिवर्तकत्वाभावात् ॥

शि० म०–तत्त्वेन तन्निवर्त्यस्यैवेहसाध्यस्य विवक्षितत्वात् संशयविपर्यासान्यतरविषयविषयकत्वे सति तदन्यतरनिवृत्तौ निरपेक्षहेतुत्वं अप्रकाशितार्थप्रकाशकत्वेन विवक्षितं तच्च प्रदीपप्रभायामभिव्यंजकाभावप्रयुक्तसंशयाद्युत्तरप्रत्यक्षजानिकायामस्तीति न साधनवैकल्यं, नच साप्रत्यक्षज्ञानसापेक्षेति तद्वैकल्यं तादवस्थ्यं तस्यास्संशयादिनिवृत्तौ ज्ञानप्रकाशसापेक्षत्वेपि सजातीयबाह्यप्रकाशानपेक्षत्वात् । निरपेक्षपदेन सजातीयप्रकाशनिरपेक्षत्वस्य विवक्षितत्वात् । न चैवं घटादिप्रत्यक्षज्ञानस्य संशयादिनिवृत्तौ प्रामाण्यनिश्चयसापेक्षत्वात् स्वरूपासिद्धो हेतुरिति वाच्यम् सिद्धान्ते स्वाश्रयज्ञानस्यैव प्रमात्वनिश्चयरूपत्वात् । नाप्यनैकांतिको हेतुः, विपर्य्यासादेस्तदन्यतरविषयविषयकत्वेपि तन्निवृत्तौ सजातीयबाधज्ञानसापेक्षत्वात ॥

म० प्र०–ननु ज्ञानस्य प्रकाशत्वेनेच्छाप्रागभावानिवर्त्तकत्वेपि कुतस्तेन नार्थान्तरमित्याशंक्याह (तत्त्वेनेति) प्रकाशत्वेनेत्यर्थः । तन्निवर्त्यस्य–ज्ञाननिवर्त्यत्वस्य, इह–उक्तानुमाने । नन्वप्रकाशितार्थप्रकाशकत्वादित्यत्र प्रकाशकत्वशब्देन ज्ञानत्वरू-

Funding by IKS-MoE

पप्रकाशत्वं विवक्षितं, किंवाभौतिकदीपादिरूपप्रकाशनिष्ठप्रकाशत्वं विवक्षितम् । नाद्यः, दृष्टान्तेहेत्वभावापत्तेः । नद्वितीयः, हेतोःस्वरूपासिद्धत्वापत्तेरित्याशंकामभिप्रेत्याह (संशयेति) संशयविपर्यासान्यतरविषयविषयकत्वसमानाधिकरणकसंशयविपर्यासान्यतरध्वंसानुत्पादान्यतररूपनिवृत्तिनिरूपितनिरपेक्षकारणत्वमित्यर्थः । सुखादिज्ञानेपितदन्यतरध्वंसानुत्पादान्यतररूपनिवृत्तिनिरूपितनिरपेक्षकारणत्वसत्त्वेन सुखादिज्ञाने व्यभिचारवारणाय सत्यंतमिति विपर्ययोत्तरसंशये संशयोत्तरविपर्य्ययेच व्यभिचारवारणाय तदन्यतरनिवृत्तौ निरपेक्षहेतुत्वमिति इच्छादृष्टौ व्यभिचारवारणाय निरपेक्षेति तच्च-संशयविपर्य्यासान्यतरविषयविषयकत्वे सति, तदन्यतरनिवृत्तौ निरपेक्षहेतुत्वं च । साधनवैकल्यं-दृष्टान्तेसाधनाभावः, सा-दृष्टांतरूपदीपप्रभा, तद्वैकल्यं-दृष्टान्तेसाधनाभावः । तादवस्थ्यम्-तदवस्थः, तस्याः-दृष्टान्तरूपदीपप्रभायाः (ज्ञानप्रकाशेति) ज्ञानाभिन्नप्रकाशेत्यर्थः । ननु दृष्टान्तभिन्नदीपप्रभायाः संशयादिनिवृत्तौ सजातीयबाह्यप्रकाशापेक्षाभावेपि कथं तस्यां साधनवैकल्यपरिहारोऽस्तीत्याशंकां मनसि निधाय मैवमित्यभिप्रेत्य हेतुमाह (निरपेक्षपदेनेति) एवं-निरपेक्षशब्दस्य सजातीयप्रकाशनिरपेक्षपरत्वस्वीकारे (सापेक्षत्वादिति) अस्याग्रे तदन्यतरनिवृत्तौ निरपेक्षहेतुत्वाभावेनेत्यस्यशेषःकर्तव्यः (स्वाश्रयज्ञानस्यैवेति) स्वं-प्रमात्वं तदाश्रयज्ञानं वृत्त्यात्मकं ज्ञानं तद्विषयकं विजातीयं तादृशवृत्त्युपहितं साक्षिरूपं ज्ञानं तस्यैव प्रमात्वप्रकारकनिश्चयरूपत्वादित्यर्थः । अतएव स्वाश्रयोवृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानमित्याद्युत्तरग्रंथविरोधोपि नास्ति । तथाच घटादिज्ञानस्य स्वनिष्ठप्रामाण्यनिश्चयायस्वसजातीयप्रकाशापेक्षाभावान्नस्वरूपासिद्धोहेतुरितिभावः । अनैकांतिकः-विपर्य्ययादौव्यभिचारी (बाधज्ञानसापेक्षत्वादिति) नच विपर्य्यासादेः संशयाद्यन्यतरनिवृत्तौ हेतुत्वमेव नास्तीति कथं निरपेक्षहेतुत्वं नास्तीत्युच्यते इतिवाच्यम्, घटध्वंसंप्रतिघटस्वरूपप्रतियोगिनोपि हेतुत्वेन प्रतियोगिविधयास्वनिवृतिं प्रतिस्वस्यहेतुत्वादिति ॥

शि० म०-सुखादिसाक्षात्कारस्य च निरपेक्षस्य संशयादिनिवर्त्तकत्वेपि तदन्यतरविषयविषयकत्वाभावात् । नच धारावाहिकद्वितीयादिबुद्धौ व्यभिचारः, तत्रैकज्ञानत्वाभ्युपगमात् । अत एव न द्वितीयादिप्रभादौ व्यभिचारः, तत्राप्येतन्न्यायेन स्वविरोधिप्रभापर्य्यंतं स्थायित्वाभ्युपगमात् । मंदामंदप्रभयोश्च वैलक्षण्येपि मंदप्रभानंतरभाविप्रौढप्रभायाः स्वविषयकेशरेखादिसूक्ष्मपदार्थावरणभंजकत्वात् । अतिप्रौढप्रभानंतरभाविन्याश्च मंदप्रभायाः स्वविषयावरणपूर्वकत्वाभावेपि तन्निवृत्तिस्वरूपयोग्यत्वात, सूक्ष्मतमवस्तुसंशयादिनिवर्त्तकत्वाभावाच्च न

व्यभिचारः । नचाप्रयोजकत्वं प्रदीपप्रभादौ लाघवेन प्रकाशत्वेनैव स्वविषयावरणनिवर्तकत्वस्य ग्रहात् ॥

म० प्र०—सुखादावपि हेतोर्व्यभिचारो नास्तीत्यभिप्रेत्य हेतुमाह (सुखादीति) अत्र चकारस्याभावादित्यस्याग्रे संबंधः । निरपेक्षस्य—संशयादिनिवर्तने स्वसजातीयप्रकाशापेक्षारहितस्य, (व्यभिचारइति) नच धारावाहिकद्वितीयादिबुद्धौ प्रथमसाध्याभावेपि हेतुघटकसप्तम्यंतार्थस्याभावेन हेतोरप्यभावान्न व्यभिचार इति वाच्यम्, धारावाहिकद्वितीयादिबुद्धेः पूर्वं घटादिषु संशयाद्यभावेपि यदाकदा घटादीनां संशयादिविषयत्वसंभवेन व्यभिचारस्य निवारयितुमशक्यत्वादिति । तत्र—नैयायिकादिपराभिमतद्वितीयादिधारावाहिकबुद्धौ (अभ्युपगमादिति) लाघवेनास्माभिरितिशेषः । अत एव--वक्ष्यमाणहेतोरेव (द्वितीयादिप्रभादाविति) सर्वे भावाः क्षणपरिणामिनः ऋतेचिच्छक्तेरित्यभियुक्तोक्त्या प्रभायाः क्षणिकत्वेन द्वितीयादिप्रभादावित्युक्तिरित्यर्थः । तत्रापि--द्वितीयादिप्रभादावपि, एतन्न्यायेन—लाघवेन हेतुना, (स्वेति) द्वितीयादिप्रभेत्यर्थः । ननु मंदामंदप्रभयोरेकत्वाभावात्तत्र व्यभिचारः स्यादित्याशंक्याह (मंदामंदप्रभयोश्चेति) अस्य न व्यभिचार इत्यनेनान्वयः । तत्र मंदप्रभानंतरप्रौढप्रभायांव्यभिचाराभावेहेतुमाह (वैलक्षण्येपीत्यादिना) अतिप्रौढप्रभानंतरभाविन्यां मंदप्रभायां व्यभिचाराभावेहेतुमाह (अतिप्रौढेति । तन्निवृत्तिस्वरूपयोग्यत्वादिति) मंदप्रभायां निवृत्तिस्वरूपयोग्यपूर्वकत्वात् तथाचातिप्रौढप्रभानंतरभाविन्यां मंदप्रभायां हेतुस्वीकारेसाध्यस्यापि सत्त्वमिति भावः । वस्तुतस्त्वतिप्रौढप्रभानंतरभाविन्यां मंदप्रभायां हेतुरेवनास्तीत्याह (सूक्ष्मतमवस्त्विति) केशरेखादिवस्त्वित्यर्थः (नव्यभिचारइति) नचैवमपि पक्षभिन्नेधर्मादिशाब्दज्ञानादौ व्यभिचारस्तत्रोक्तसाध्याभावेप्युक्तहेतोः सत्त्वादिति वाच्यम्, हेतुबोधकवाक्येतदन्यतरशब्देनाभानापादकावरणप्रयुक्तसंशयविपर्यासयोर्विवक्षितत्वादिति (प्रदीपप्रभादाविति) स्वविषयावरणनिवृत्तिप्रतिदीपप्रभात्वेन सूर्यप्रभात्वेन चंद्रप्रभात्वेन हेतुत्वस्वीकारेगौरवेणावरणनिवृत्तित्वावच्छिन्नावरणनिवृत्तिं प्रतिप्रकाशत्वेनैवहेतुत्वेन यत्र प्रकाशत्वं तत्र स्वविषयावरणपूर्वकत्वं स्वनिवर्त्यपूर्वकत्वं वेति व्याप्तेर्ज्ञानेपि प्रकाशत्वस्य सत्त्वेन स्वविषयावरणपूर्वकत्वादेरवश्यं स्वीकर्तव्यत्वात् । यदिपक्षेस्वविषयावरणपूर्वकत्वादिकं न स्यात्तर्हिपक्षेप्रकाशत्वमेव न स्यादिति बाधकतर्कसत्त्वाच्च न हेतोरप्रयोजकत्वम् । नच तवमते सुखादिसाक्षात्कारे प्रकाशत्वसत्त्वेपि स्वविषयावरणपूर्वकत्वादेरभावान्नेदमनिष्टापादनं संभवतीति वाच्यम्, यत्र स्वविषयावरणपूर्वकत्वाद्यभावस्तत्र प्रकाशत्वाभाव इतिव्याप्तेर्घटादौ गृहीतत्वेन पक्षएवोक्तानिष्टापादनसंभवात् । तवमते सुखादीनामज्ञातसत्ताकत्वेन सुखादावावरणस्याप्यवश्यं स्वीकर्तव्यत्वेन त्वांप्रत्युक्तानिष्टापादनसंभवाच्चेति भावः ॥

Funding by IKS-MoE

रजतत्वप्रकारकज्ञानाभावबोधजनकार्थः

शि० म०–अत एवेश्वरानुमाने घटादौ लाघवेन कार्य्यत्वेनैव कर्तृजन्यत्वग्रहान्नाप्रयोजकत्वमिति परस्यापि सिद्धान्तः, तदेवं लाघवसहकृतानुमानं पक्षधर्मताबलादनाद्येकभावरूपाज्ञानलक्षणावरणेप्रमाणम् । तथा मिथ्यार्थतज्ज्ञानलक्षणाध्यासानुपपत्तिस्तत्र प्रमाणम् । तथाहि अस्ति तावच्छुक्तौरजतज्ञानाद्रजतार्थिप्रवृत्तिः । सामानाधिकरण्यव्यपदेशश्चेति सर्वजनसिद्धम्, तज्ज्ञानं तु तदवबोधेन नेदं रजतमिति बाधकज्ञानोदयान्मिथ्या, तन्मिथ्यात्वं च स्वरूपतो बाधाभावात, मिथ्यार्थविषयत्वेनैव मिथ्यात्वंचार्थस्य, प्रतिपन्नोपाधौ पारमार्थिकत्वावच्छिन्नतदभावानुभवादित्यग्रे स्फुटम् । नचैवमपि मिथ्यार्थतदवभासयोरात्मतत्त्वज्ञानाभावाभ्यामेवोपादाननिमित्तकारणाभ्यामुपपत्तेः । तत्कारणतया नाज्ञानसिद्धिरिति वाच्यम्, दोषघटितभ्रांतिज्ञानपुष्कलकारणे सति तत्त्वज्ञानाभावविलंबात् । तद्विलंबाभावेन तस्य कारणत्वायोगात् ॥

म०प्र०–अतएव–लाघवस्य हेतुनिष्ठाप्रयोजकत्वशंकानिवारकत्वस्वीकारादेव, अस्येति परस्यापि राद्धांतइत्यनेनान्वयः । ईश्वरानुमाने–क्षित्यंकुरादिकंसकर्तृकमित्यादीश्वरसाधकानुमाने अस्य नाप्रयोजकत्वमित्यनेनान्वयः (कार्य्यत्वेनैवेति) अत्रज्ञाप्यत्वं व्यापकत्वं वा तृतीयार्थस्तथाच कार्य्यत्वज्ञाप्यकर्तृजन्यत्वस्य कार्य्यत्वव्यापककर्तृजन्यत्वस्य वा ग्रहणादित्यर्थः (अध्यासेति) कार्य्येत्यर्थः । तत्र–भावरूपाज्ञाने (सामानाधिकरण्यव्यपदेशश्चेति) इदंरजतशब्दयोः समानविभक्तिकत्वे सति भिन्नप्रवृत्तिनिमित्तकत्वेच सत्येकार्थबोधकत्वरूपसामानाधिकरण्यबोधकेदंरजतमितिशब्दप्रयोगश्चेत्यर्थः । तज्ज्ञानं–इदंरजतमितिज्ञानम्, तदवबोधेन–शुक्त्यवबोधेन, तन्मिथ्यात्वंच–इदंरजतमितिज्ञानमिथ्यात्वंच (स्वरूपतइति) मन्मतेचैतन्यस्यैवरजतादिवस्तुज्ञानत्वेन चैतन्यस्य नित्यत्वेनच ज्ञानस्वरूपस्य बाधाभावादित्यर्थः । प्रतिपन्नोपाधौ–अध्यस्तस्याधारत्वेन भासमानशुक्त्यादिसामान्यांशेऽध्यस्तस्याधारत्वेन भासमानशुक्त्यादिसामान्यांशावच्छिन्नचैतन्यरूपेवाधारे । एवमपि–मिथ्यार्थतदवभासयोर्मिथ्यात्वेपि (आत्मतत्त्वज्ञानाभावाभ्यामिति) आत्मा तत्त्वज्ञानाभावश्चेत्युभाभ्यामित्यर्थः । उपादाननिमित्तकारणाभ्याम्–आत्माहि मिथ्यार्थतज्ज्ञानयोरुभयोरुपादानकारणंयथार्थज्ञानाभावश्च तयोर्निमित्तकारणमित्युपादाननिमित्तकारणाभ्याम् । तत्कारणतया–मिथ्यार्थतदभासकारणतयाशुक्त्यादियथार्थज्ञानाभावस्य मिथ्यार्थतदवभासहेतुत्वाभावेहेतुमाह (तस्येति) शुक्त्यादियथार्थज्ञानाभावस्येत्यर्थः । शुक्त्यादियथार्थज्ञानाभावस्य मिथ्यार्थतदवभासनिरूपितकारण-

तायोग्यत्वेहेतुमाह (दोषेत्यादिना । तत्त्वज्ञानाभावविलंबादिति) भ्रांतिज्ञानात्पूर्वंशुक्त्यादिसामान्यांशयथार्थज्ञानकालेशुक्त्यादियथार्थज्ञानाभावाभावप्रयोज्यमिथ्यार्थतदवभासाभावाभावेनेत्यर्थः ॥

शि० म०–आत्मनश्चापरिणामित्वेनानुपादानत्वात् । अन्यथाध्यासस्यापि सत्यत्वापत्तिः, तस्मान्मिथ्यार्थतदवभासानुपपत्तिस्तदुपादानमिथ्याज्ञाने प्रमाणम् । तच्च तत्तज्जडावच्छिन्नचैतन्यावरणतत्तद्गतविक्षेपहेतुत्वात् । तत्तदवच्छिन्नचैतन्यविषयं न शुक्त्यादिविषयं प्रमाणवैकल्यादेव तदग्रहणसिद्धौ तत्रावरणाभावात् । तदेवं प्रत्यक्षानुमानार्थापत्तयस्तत्तच्चैतन्यविषयाज्ञाने प्रमाणम्, शुद्धचैतन्यविषयमूलाज्ञानेतु प्रयुज्यते । ब्रह्मसाक्षात्कारः अनादिभावनिवर्त्तकः भ्रमोपादाननिवर्त्तको वा तत्त्वसाक्षात्कारत्वात् शुक्त्यपरोक्षज्ञानवदिति । नन्वनुमानादिप्रमाणेन मूलाज्ञानावगमेपि न मायासिद्धिः मायाविद्ययोर्लोकेप्रसिद्धभेदत्वात् । नहि मिथ्यारजतोपादानाविद्याश्रये मंत्रौषधादिना मायामयहस्त्यश्वरथादिनिर्मातरीव मायाविशब्दं प्रयुंजते । नचमायाविनिर्मितानिर्वचनीयरथादिदृष्टान्तेन प्रमाणांतरेणैव जगतो मायोपादानत्वं साध्यते इतिवाच्यम्, क्लृप्ताज्ञानोपादानस्य मायोपादानत्वायोगात् । मायाया एव तदुपादानत्वेलोकसिद्धमायावत्तस्या अपि स्वाश्रयाव्यामोहकत्वतत्त्वज्ञानानिवर्त्यत्वापत्तौ मायाप्रयुक्तो बंधः तत्त्वज्ञानात्तन्निवृत्तिरितिसिद्धांतव्याकोपप्रसंगात् । ततश्च प्रमाणाभावान्न मूलमायासिद्धिरिति मैवं लोकेपि मायाविद्ययोर्भेदासिद्धेः ॥

म०प्र०–आत्मनोमिथ्यार्थतदवभासयोरुपादानत्वाभावेहेतुमाह (आत्मनइति) अनुपादानत्वात्–उपादानत्वायोग्यत्वात् । अन्यथा––आत्मनो मिथ्यार्थतदवभासयोरुपादानत्वस्वीकारे, अध्यासस्य–मिथ्यार्थतदवभासलक्षणाध्यस्तस्य, तस्मात्––आत्मतत्त्वज्ञानाभावयोरुपादाननिमित्तकारणत्वासंभवात् । अज्ञानस्य प्रमाणसिद्धत्वेन सत्यत्वशंकांवारयितुमाह (मिथ्येति) तच्च––उक्ताज्ञानंच (विपेक्षेति) कार्य्येत्यर्थः । वैकल्यात्–असंबंधात् (तदग्रहणेति) शुक्त्यादिपदार्थाग्रहणेत्यर्थः । तत्र–शुक्त्यादिपदार्थेषु (आवरणाभावादिति) यदा येन पदार्थेन सह प्रमाणस्य संबंधस्तदा तदवच्छिन्नचैतन्यनिष्ठावरणनिवृत्त्या तेनैव चैतन्येन तस्य पदार्थस्य स्फुरणं भवति नान्यथेति शुक्त्यादिपदार्थेष्वावरणांगीकरणं व्यर्थमितिभावः (तदेवमिति) अतीतग्रंथे उक्तेन प्रकारेणेत्यर्थः । प्रयुज्यते–अनुमानवाक्यप्रयोगः क्रियते (अनादीति) ब्रह्मसाक्षात्कारस्य ब्रह्मक्षणिकं ब्रह्म न जगत्कारणमित्यादिभ्रमनिवर्तकत्वेन सिद्धसाधन-

तावारणायानादीति ब्रह्मसाक्षात्कारस्य स्वप्रागभावनिवर्तकत्वेन सिद्धसाधनतावारणायभावेति । तत्तदवच्छिन्नचैतन्यविषयकाज्ञानमादाय दृष्टांते साध्यसमन्वयः कार्य्य इति (तत्त्वेति) यथार्थेत्यर्थः (अविद्याश्रये इति) प्रमातरीति शेषः । अस्य मायाविंशब्दं प्रयुंजते इत्यनेनान्वयः (निर्मातरीति) देवदत्तादाविति शेषः (प्रमाणांतरेणेति) व्यावहारिकं जगन्मायोपादानकमनिर्वचनीयत्वान्मायाविनिर्मितानिर्वचनीयरथादिवदित्यनुमानादिप्रमाणांतरेणेत्यर्थः । (उपादानस्येति) प्रपंचस्येतिशेषः । तदुपादानत्वे–जगदुपादानत्वे । तस्याअपि–व्यावहारिकजगदुपादानमायाया अपि (ज्ञानानिवर्त्यत्वापत्ताविति) स्वाश्रयव्यामोहकस्यैवज्ञानेन निवृत्तिरितिभावः । ततश्च–उक्तदोषसमुदायादेव ॥

शि०म०-तथाहि न तावल्लक्षणतो लोके मायाविद्ययोर्भेदः, अनाद्यनिर्वचनीयत्वस्य विपर्य्ययोपादानत्वस्य च लक्षणस्य मायाविद्ययोरविशेषात् । ननु मंत्रौषधादिसत्यवस्त्वेव माया नानिर्वचनीयेति चेन्न । तत्रापि शुक्तिरूप्याद्यध्यासोपादानवदनाद्यनुगतस्यानिर्वचनीयाज्ञानस्यैव लाघवेनोपादानत्वकल्पनात् । अन्यथा मंत्राद्युपादानत्वेन मायाविनिर्मितहस्त्यादेरपि सत्यत्वापत्तेः, मंत्राद्यनुविधानस्य च काचाद्यनुविधानवन्निमित्तकारणविषयतयाप्युपपत्तेः, नापि व्यवहारभेदाद्भेदः, आवरणविक्षेपोभयशक्तिविशिष्टायामेकस्यामेवावरणशक्तिप्राधान्यविवक्षया अविद्याविक्षेपशक्तिप्राधान्यविवक्षया मायेतिव्यवहारभेदोपपत्तेः । तदुक्तं विवरणाचार्य्यैः, एकस्मिन्नपि वस्तुनि विक्षेपशक्तिप्राधान्येन माया आच्छादनशक्तिप्राधान्येनाविद्येति व्यवहारभेद इति, केचित्तु माया परमेश्वरनिष्ठा वियदादिप्रपंचहेतुः । अविद्या जीवनिष्ठा स्वप्नरूप्यादिभ्रमहेतुः अत एवाज्ञो जीवः, परमेश्वरस्तु मायावीति व्यपदिश्यते, न वैपरीत्येन-ब्रह्मसाक्षात्कारेण च जीवगताज्ञानं निवर्त्तते ॥

विभेदजनकेऽज्ञाने नाशमात्यंतिकं गते ॥
आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति ॥
इतिवचनात् । न माया ॥
मामेव ये प्रपद्यंते मायामेतां तरंतिं ते ॥

इति मायायाः सेतुवत्तर्तव्यत्वमात्रप्रतिपादनात् । अत एवैकमुक्तावपि अन्येषां प्रपंचोपलंभः, वियदादिप्रपंचोपादानमायाया अनिवृत्तेः । नचैवं मुक्तस्यापि प्रपंचोपलंभापत्तिः, प्रपंचदर्शनहेत्वविद्याया विच्छेदात् ।

Funding by IKS-MoE

नहि चक्षुष्मता रूपं गृह्यते इत्यंधेनापि तदालोक्यते, तस्मादस्ति मायाविद्ययोर्भेद इति तन्न । मायायाः सत्त्यत्वे अद्वैतहानात् मिथ्यात्वे च ज्ञाननिवर्त्यत्वमज्ञानत्वात् । 'मायामेतां तरंति ते' इत्यादौ तरणं विनाश एव, अन्यथा 'भूयश्चांते विश्वमाया निवृत्तिः' इत्यादि श्रुतिविरोधात् । तस्मात् मूलाज्ञानस्यैव मायात्वात् सुष्ठूक्तं मायोपहितं चैतन्यमीश्वरसाक्षि इति ॥

म० प्र०–अनिर्वचनीया–मिथ्या । तत्रापि–मंत्रादिभिर्निर्मितवस्तुन्यपि, अनुगतस्य–मंत्रादिभिर्वस्तुनिर्माणस्थले प्राप्तस्य । अज्ञानस्यैव–द्रष्टॄणामज्ञानस्यैव । नचाधिष्ठानाभाव इतिवाच्यम्, मायाव्यधिकरणभूम्यवच्छिन्नचैतन्यस्यैवाधिष्ठानत्वात् । नच मायाविनोऽज्ञानाभावेन मंत्रादिभिर्निर्मितपदार्थानां तस्य प्रत्यक्षं न स्यादितिवाच्यम् । यथेश्वरो जीवानामज्ञानमाश्रित्याकाशादिकार्यं करोत्याकाशादीनां प्रत्यक्षमपीश्वरस्य भवति तथा सर्वस्योपपत्तेरिति । अन्यथा–हस्त्यादिकं प्रति मंत्रादिरूपमायाउपादानत्वस्वीकारे (मंत्रादीति) सत्त्यमंत्रादीत्यर्थः । अनुविधानस्य--उत्तरकालेसत्त्वस्य काचाद्यनुविधानवत् पीतः शंख इत्यादिभ्रमस्य चक्षुरादिगतकाचादिदोषानुसत्त्ववत् । व्यवहारभेदात्--इयंमायेयमविद्येतिव्यवहारभेदात् । वस्तुनि–अज्ञानरूपे वस्तुनि, अत एव–जीवस्याविद्याश्रयत्वादेव । वैपरीत्येन–ईश्वरोऽज्ञोजीवो मायावीति वैपरीत्येन (नमायेति) निवर्तते इति पूर्वानुषंगः । अत एव वक्ष्यमाणहेतोरेव, अन्यथा–मायानाशानंगीकारे, अन्ते–प्रारब्धकर्मक्षये, विश्वमायानिवृत्तिः–निखिलमायानाशः । तस्मात्–मायानाशसंभवात् ॥

मू०–"इंद्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतौ मायाभिरिति बहुवचनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतयाचोपपत्तेः ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥
तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगीमायाममेयाय तस्मै विद्यात्मनेनमः ॥

शि० म०–नन्वस्तु मूलाज्ञानं माया तथापि न तदैक्यसिद्धिः, (इंद्रोमायाभिरिति) बहुवचनश्रुतिविरोधेन लाघवानुगृहीतस्याप्यनुमानस्य मायैकत्वे प्रमाणत्वायोगादित्याशंक्य, मायागतशक्तिभेदविषयतया तद्गतगुणभेदविषयतया वा, बहुवचनोपपत्तेर्नविरोध इत्याह (इंद्रइति । शक्तिविशेषेति) एकत्वेपि वह्नेर्दाहप्रकाशनादिशक्तिभेदवन्मायैकत्वेपि

प्रपंचवैचित्र्यदर्शनेन तदनुकूलनानाशक्त्यभ्युपगमादिति भावः । ननु मायाभिरिति बहुवचनस्यासत्यपि मुख्यार्थत्यागकारणे गुणशक्तिभेदविषयत्वाभिधानमयुक्तमित्याशंक्य मायैकत्वश्रुतिस्मृतीनामनेकत्वेन तद्विरोधादेका बहुवचनश्रुतिरेवान्यपरा कल्प्यते इत्याह (मायां त्वित्यादिना एकत्वं निश्चीयते इत्यंतेन) अत्र मायाभेदं वदन् वादी प्रष्टव्यः किं मायाभिरिति बहुवचनान्मायाभेदोऽभिप्रेतः मायाविद्याभेदोवा, नाद्य इत्याह (मायामिति) न द्वितीय इत्याह (तरतीति) निवृत्तिरेवात्र तरणं, तरति ब्रह्महत्यामित्यादौ निवृत्तौ तच्छब्दप्रयोगात् । नद्यादेरिव लंघनस्याभावात्तथाच मायामविद्यां तरतीति सामानाधिकरण्येन ज्ञाननिवर्त्यत्वनिर्देशान्नमाया अविद्यातो भिद्यत इतिभावः ॥

म० प्र०—तथापि—मूलाज्ञानस्यमायात्वेपि (तदैक्येति) मूलाज्ञानरूपमायैक्येत्यर्थः (मायागतेति) इतः पूर्वं मायाभिरिति बहुवचनस्येतिशेषः । परममूले (इन्द्र इति) इन्द्रोनिरंकुशैश्वर्यः परमात्मा, पुरुरूपः—बहुरूपः, ईयते—प्रतीयते, चेष्टते वेत्यर्थः । परममूले (मायामिति) शुद्धसत्त्वप्रधानरूपां मायामित्यर्थः (तदनुकूलेति) प्रपंचवैचित्र्यानुकूलेत्यर्थः । अत्र—तरत्यविद्यामित्यादिवाक्ये । तथाच—तरणस्याविद्यानिवृत्तिस्वरूपत्वेसति ॥

सू०—"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानांसरूपाः। अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः" इत्यादिषु श्रुतिषु एकवचनबलेन लाघवानुगृहीतेन मायाया एकत्वं निश्चीयते। ततश्च तदुपहितं चैतन्यमीश्वरसाक्षि, तच्चानादि तदुपाधेर्मायाया अनादित्वात्। मायावच्छिन्नं चैतन्यं परमेश्वरः मायाया विशेषणत्वे ईश्वरत्वमुपाधित्वे साक्षित्वमितीश्वरत्वसाक्षित्वयोर्भेदः, नतु धर्मिणोरीश्वरसाक्षिणोर्भेदः ॥

शि० म०—ननु मायाभिरिति बहुवचनश्रुतिर्मायाभेदविषयैव, नतु तद्गतगुणभेदाभिप्राया, तत्र प्रमाणाभावात । एकवचनस्य ग्रहसंमार्जनवदुपपत्तेरित्यत आह (अजामिति) 'नासदासीन्नोसदासीत्तम आसीत्' 'अविद्यायामन्तरेवर्त्तमानाः' 'नान्यच्छ्रेयोवेदयंत' इत्यादिश्रुतयः

आदिपदग्राह्याः । ननु श्रुतिबहुत्वमात्रान्न मायैकत्वसिद्धिः । एकेनापिबलवताबहूनां बाधदर्शनादित्याशंक्य लाघवानुग्रहादेकत्वश्रुतीनामेवप्राबल्यमित्याह (लाघवेति) प्रकृतमीश्वरसाक्ष्येकत्वमुपसंहरति (ततश्चेति) उपाधिभूतमायायाएकत्वादित्यर्थः । न केवलमेकमीश्वरसाक्षि किंत्वनादिचेत्याह (तच्चेति) ईश्वरसाक्षिणः परमेश्वराद्भेदं दर्शयितुं तत्स्वरूपमाह (मायेति) मायाविशिष्टं चैतन्यमीश्वर इत्यर्थः ॥

म० प्र०–(तद्गतेति) मायागतगुणाद्यभिप्रायिका नेत्यर्थः । तत्र–मायाभिरिति बहुवचनश्रुतेर्मायागतगुणादिभेदाभिप्रायकत्वे । ननु तर्ह्येकवचनस्य कथमुपपत्तिरित्यत आह (एकवचनस्येति । ग्रहसंमार्जनवदिति) यथाग्रहंसंमार्ष्टीत्यत्रसोमपात्रवाचकग्रहशब्दोत्तरद्वितीयाविभक्त्यैकत्वमविवक्षितं तद्वन्मायामित्यादिवाक्येष्वप्येकत्वस्याविवक्षितत्वेनोपपत्तिरित्यर्थः (इत्यत इति) इतिशंकात एकपदरूपश्रुतिमाहेत्यर्थः। परममूले (अजामिति) अजां-जन्मशून्याम्, एकां–स्वसमानजातीयेतरप्रकृतिरहिताम्, लोहितशुक्लकृष्णां–रजःसत्त्वतमोमयीं सरूपाः–त्रिगुणात्मकत्वेन समानरूपाः, बह्वीः–नानाविधाः प्रजाः–जनिमतीर्व्यक्तीः, सृजमानामेकोऽजो ज्ञो जीवो जुषमाणः–सेवमानः, अनुशेते–तत्कार्य्यतादात्म्यापन्नोभवति । भुक्तभोगां–भुक्ताभोगा यया एतादृशीम्, एनामजाम्, अन्यो–विवेकख्यातिमान्, जहाति–तत्कार्य्यतादात्म्यापन्नो न भवतीत्यर्थः परममूले (ततश्चेति) मायाया एकत्वस्य श्रुतिभिर्निश्चितत्वादेवेत्यर्थः । असत्–सूक्ष्मम्, सत्–स्थूलम्, तमः–अज्ञानम्, अविद्यायामन्तरेवर्त्तमानाः–अविद्यानिरूपितसंबंधवंतः । यथालोके पाचकपाठकदेवदत्तस्य भेदोनास्ति किंत्वेकदेवदत्तनिष्ठपाचकत्वपाठकत्वयोर्भेदस्तद्वन्नेश्वरतत्साक्षिणोर्भेदोऽपित्वेकचैतन्यनिष्ठेश्वरत्वतत्साक्षित्वयोर्भेद इत्यभिप्रेत्याह । परममूले (मायायाविशेषणत्वेति) तत्स्वरूपं–परमेश्वरस्वरूपम् ॥

मू०–स च परमेश्वर एकोपि स्वोपाधिभूतमायानिष्ठसत्त्वरजस्तमोगुणभेदेन ब्रह्मविष्णुमहेश्वरादिशब्दवाच्यतां भजते। नन्वीश्वरसाक्षिणोऽनादित्वे "तदैक्षतबहुस्यांप्रजायेयेत्यादिना सृष्टिपूर्वसमये परमेश्वरस्यागंतुकमीक्षणमुच्यमानं कथमुपपद्यते ॥

शि० म०–ननु मायाया एकत्वेन तद्विशिष्टस्य परमेश्वरस्यापि तथात्वाद्भेदेन ब्रह्मविष्णुमहेश्वरव्यपदेशानुपपत्तिरित्याशंक्य किं ब्रह्मविष्णुमहेश्वरत्वानां स्वरूपतोऽनुपपत्तिःपरमार्थतो वा, नांत्य इष्टत्वात । नाद्य

इत्याह (सचेति) ईश्वरचैतन्यमेवोद्भूतसत्त्वगुणमायावच्छिन्नं पालयितृविष्णुरिति व्यपदिश्यते । तदेवाविर्भूतरजोगुणमायाक्रांतस्रष्टृब्रह्मेति गीयते । अतिरोहिततमोगुणमायावच्छिन्नं संहर्तृचैतन्यं महेश्वरशब्दवाच्यतां भजते । “अथ यो ह खलु वावास्य राजसोंशोऽसौ सः यो यं ब्रह्मा अथ यो ह खलु वावास्य तामसोंशोऽसौ सः योयं रुद्रो अथ योह खलु वावास्य सात्त्विकोंशोऽसौ सः यो यं विष्णुरिति” मैत्रेयोपनिषदि तथैवावगतेः । तथाच ब्रह्मादीनां मायावच्छिन्नत्वलक्षणपरमेश्वरत्वेनाभेदेपि तत्तद्गुणविशिष्टमायाया भिन्नत्वाद्ब्रह्मत्वादीनां परस्परं भेदोयुज्यते इति भावः । ईश्वरसाक्षिणोऽनादित्वे बाधकमाशंकते (नन्विति)

म० प्र०—परममूले (स्वोपाधिभूतेति) परमेश्वरशब्दवाच्यार्थविशेषणीभूतेत्यर्थः । तद्विशिष्टस्य—मायाविशिष्टस्य, तथात्वात्—एकत्वात् (भेदेनेति) भेदविशिष्टेत्यर्थः । स्वरूपतः—स्वरूपस्य परमार्थतः, सत्यत्वेन तदेव—ईश्वरचैतन्यमेव (अथेति) अत्राथशब्दः ब्रह्मा क इत्येवमादिप्रकारेण प्रश्नार्थकः, आनंतर्यार्थिको वा “मंगलानंतरारंभप्रश्नकार्त्स्न्यैष्वथोअथ” इत्यमरकोशात्—ह, प्रसिद्धं खल्विति वाक्यालंकारे । “निषेधवाक्यालंकारजिज्ञासानुनयेखलु” इत्यमरकोशात् उदाहरणानि तु निषेधे यथाखलुरुदित्वा देहि । वाक्यालंकारे, यथा—एतत्स्वल्वाहुः जिज्ञासायां यथा—खलुजानासि । अनुनये यथा—देहिखलुवाचकमित्यादीनि वा वेतिनिश्चयार्थे । अस्य—चैतन्यस्य राजसांशः—आविर्भूतरजोगुणमायाविशिष्टस्वरूपम्, एवमग्रेप्यव्ययानामर्थोबोध्यः । अस्य—चैतन्यस्य, तामसांशः—आविर्भूततमोगुणमायाविशिष्टस्वरूपम् । अस्य—चैतन्यस्य, सात्त्विकांशः—आविर्भूतसत्त्वगुणमायाविशिष्टस्वरूपम् । तथैवावगतेः—ब्रह्मादीनामुक्तस्वरूपनिश्चयात् । तथाच—ब्रह्मादीनां परमेश्वरत्वे निश्चिते सति ॥

मू०—उच्यते। यथा विषयेंद्रियसन्निकर्षादिकारणवशेन जीवोपाध्यन्तःकरणस्य वृत्तिभेदा जायन्ते, तथा सृज्यमानप्राणिकर्मवशेन परमेश्वरोपाधिभूतमायाया वृत्तिविशेषाः‘इदमिदानीं स्रष्टव्यमिदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्यम्’इत्याकारा जायंते।तासां च वृत्तीनां सादित्वात्तत्प्रतिबिंबितचैतन्यमपि सादीत्युच्यते।एवं साक्षिद्वैविध्येन प्रत्यक्षज्ञानद्वैविध्यं।प्रत्यक्षत्वं च ज्ञेयगतं ज्ञप्तिगतं च निरूपितं। तत्र ज्ञप्तिगतप्रत्यक्षत्वस्य सामान्यलक्षणंचित्त्वमेव।पर्वतो

वह्निमानित्यादावपि वह्न्याद्याकारवृत्त्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात् । तत्तद्विषयांशे प्रत्यक्षत्वं तु पूर्वोक्तमेव ॥

शि० म०–साक्षिणः स्वरूपेणानादित्वेपि सादिमायावृत्तिविशिष्टतया सादित्वमुपपद्यत इत्याह (उच्यतेऽइति) एवं साक्षिद्वैविध्यनिरूपणाज्जीवेश्वरसाक्षिजन्यभेदेन प्रत्यक्षज्ञानस्य द्वैविध्यं सिद्धमित्याह (एवमिति) नन्वेवमपि शुक्तिरूप्यादिभ्रमे प्रत्यक्षलक्षणस्यातिव्याप्तिरितिचेन्न, तावद्विषयप्रत्यक्षलक्षणस्य तद्विषयेतिव्याप्तिः, तस्य केवलसाक्षिवेद्यत्वाभ्युपममात् । नापि ज्ञप्तिप्रत्यक्षप्रमालक्षणस्य तत्रातिप्रसंगः भ्रमस्यापि स्वांशेप्रत्यक्षप्रमाणतया सामान्यलक्षणस्य लक्ष्यत्वादतो विशेषलक्षणस्यैव सा वाच्या सापि न संभवतीति वृत्तानुवादपुरःसरमाह (प्रत्यक्षत्वंचेति) ॥

म०प्र०–परममूले (जीवोपाध्यंतःकरणस्येति) जीवशब्दवाच्यविशेषणान्तःकरणस्येत्यर्थः । परममूले (उपाधिभूतेति) विशेषणीभूतेत्यर्थः । एवमपि–साक्षिद्वैविध्येनद्विविधसाक्षिजन्यप्रत्यक्षज्ञानस्यद्वैविध्येपि । भ्रमेइति–भ्रमेतद्विषयेचेत्यर्थः । प्रत्यक्षलक्षणस्य–प्रत्यक्षलक्षणत्वावच्छिन्नप्रत्यक्षलक्षणस्य अतिव्याप्तिः-प्रत्यक्षप्रमातद्विषययोर्निरूपणाय प्रत्यक्षप्रमातद्विषययोरवेलक्षणयित्वेन भ्रमतद्विषययोरलक्ष्यत्वादतिव्याप्तिः, विषयप्रत्यक्षलक्षणस्य–प्रमातृचैतन्याभिन्नत्वे सतियोग्यत्वरूपस्य, तद्विषये–भ्रमविषये, तस्य–भ्रमविषयस्य (अभ्युपगमादिति) भ्रमविषयस्य साक्षिरूपप्रमातृवेद्यत्वसत्त्वेन प्रमातृसत्तातिरिक्तसत्ताकत्वाभावसत्त्वाल्लक्ष्यत्वमेवेति भावः। ज्ञप्तिप्रत्यक्षप्रमाणलक्षणस्य–चेतनरूपायाप्रत्यक्षप्रमाविषयानिरूपितप्रत्यक्षज्ञानं तल्लक्षणस्य चित्स्वरूपस्य, तत्र–भ्रमे, भ्रमस्य–साक्षिरूपभ्रमस्य, स्वांशे–चेतनांशे प्रत्यक्षप्रमाणतया–प्रत्यक्षंज्ञानतया विशेषलक्षणस्यैव–तत्तदिंद्रियतत्तत्केवलसाक्ष्यन्यतरयोग्यतत्तत्साक्षिजन्यतत्तदाकारवृत्त्युपहितविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तत्साक्षिजन्यतत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य तत्तद्विषयांशे प्रत्यक्षत्वमिति विशेषलक्षणस्य, सा अतिव्याप्तिः । परममूले (ज्ञेयगतमिति) प्रमातृचैतन्याभिन्नत्वे सति योग्यत्वरूपं ज्ञेयगतं प्रत्यक्षत्वं प्रत्यक्षत्वादिप्रयोजकं ज्ञप्तिगतं–च द्विविधं ज्ञप्तिगतप्रत्यक्षत्वादिप्रयोजकं च निरूपितामित्यर्थः । ज्ञानगतोक्तद्विविधप्रत्यक्षत्वादिप्रयोजकमनुवदाति (तत्रेति) ज्ञेयगतज्ञप्तिगतप्रत्यक्षत्वादिप्रयोजकयोर्मध्ये इत्यर्थः ।

मू०–तस्य च भ्रांतिरूपप्रत्यक्षेनातिव्याप्तिः, भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचनेन तस्यापि लक्ष्यत्वात् । यदा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदापूर्वोक्तलक्षणेऽबाधितत्वं विषयविशेषणं ज्ञेयम् । शुक्तिरूप्यादिभ्रमस्य संसारकालीनवाधविषयप्रातिभासिकरजतादिविषयकत्वेनोक्तलक्षणाभावान्नातिव्याप्तिः । ननु विसंवादिप्रवृत्त्याभ्रांतिज्ञानासिद्धावपि ॥

शि०म०–किं तत्तद्विषयांशे प्रत्यक्षत्वप्रयोजकस्य शुक्तिरूप्यादिभ्रमेऽतिव्याप्तिरभिप्रेता उत तत्तद्विषयांशे प्रत्यक्षप्रमात्वप्रयोजकस्य तत्राद्यं निराकरोति (तस्यचेति) द्वितीयं निरस्यति (यदात्विति) प्रत्यक्षप्रमाणनिरूपणाय तत्प्रमाया एवलक्षणीयत्वादितिभावः । ननु पारमार्थिकत्वस्य पटादावप्यभावेन तद्घटितलक्षणस्य तत्प्रमायामव्याप्तिः । सत्त्वलक्षणाबाधितत्वस्य प्रातिभासिकेपि सत्त्वेनातिव्याप्तितादवस्थ्यमित्याशंक्य संसारकालीनबाधाविषयत्वस्याबाधितपदेन विवक्षितत्वात्तस्य च तत्राभावान्नातिव्याप्तिरित्याह (शुक्तिरूप्यादिभ्रमस्येति) भ्रांतिज्ञानस्यानिर्वचनीयरजतादिविषयत्वमुपश्रुत्य तदसहमानोऽन्यथाख्यातिवादी नैयायिकः प्रत्यवतिष्ठते (नन्विति) ननु भ्रांतिज्ञानमेवासिद्धं सर्वज्ञानानां यथार्थत्वात् । तथाहि विप्रतिपन्नाः सर्वेपि प्रत्ययायथार्थाः प्रत्ययत्वात् घटादिप्रत्ययवत् । नचायथार्थज्ञानानभ्युपगमे विसंवादिप्रवृत्त्यनुपपत्तिः इष्टभेदाग्रहादेव तदुपपत्तेः । ननु न भेदाग्रहमात्रात्प्रवृत्तिः चेतनव्यवहारस्य ज्ञानपूर्वकत्वात् । अन्यथा सुषुप्त्यादावपि तदापत्तेः, नाप्युपस्थिते पुरोवर्त्तिनीष्टानुपस्थितावपि तत्प्रसंगात् ॥

म० प्र०–प्रत्यक्षत्वप्रयोजकस्य–तत्तदिन्द्रियेत्यादेर्ज्ञाननिष्ठप्रत्यक्षत्वतत्प्रकारकव्यवहारप्रयोजकस्य, प्रत्यक्षप्रमात्वप्रयोजकस्य–तत्तदिन्द्रियत्यादेरेव ज्ञाननिष्ठप्रत्यक्षप्रमात्वतत्प्रकारकव्यवहारप्रयोजकस्य, तत्र–द्वयोर्मध्ये विषयनिष्ठं किं पारमार्थिकत्वरूपमबाधितत्वं किं सत्त्वरूपं वा, अबाधितत्वमिति विषयनिष्ठाबाधितत्वे संदिहानः शंकते (नन्विति) पारमार्थिकत्वस्य–अबाधितत्वरूपपारमार्थिकत्वस्य, (तद्घटितेति) अबाधितत्वघटितेत्यर्थः । तत्प्रमायां–पटादिप्रमायाम्, तस्यच–संसारकालीनाबाधितार्थविषयकत्वस्य, तत्र–भ्रमे, प्रत्यवतिष्ठते–पूर्वपक्षं करोति (विप्रतिपन्नाइति) विवादगोचरीभूताइत्यर्थः । अयंघट इत्यादियथार्थज्ञानेषु सिद्धसाध-

नतावारणायविप्रतिपन्ना इत्युक्तम् (विसंवादीति) निष्फलेत्यर्थः । इष्टभेदाग्रहात्–इष्टप्रतियोगिकभेदज्ञानाभावात् । तदुपपत्तेः–निष्फलप्रवृत्त्युपपत्तेः । भेदाग्रहमात्रात्–इष्टप्रतियोगिकभेदज्ञानाभावादेव । अन्यथा–इष्टप्रतियोगिकभेदज्ञानाभावस्यैव प्रवृत्तिहेतुत्वे, तदापत्तेः–प्रवृत्त्यापत्तेः (उपस्थितेइति) ज्ञातपुरोवर्त्तिनीष्टप्रतियोगिकभेदज्ञानाभावः कारणम् । तथाच सुषुप्त्यादौ–पुरोवर्तिनोऽनुपस्थितत्वान्न प्रवृत्तिरित्यर्थः । तत्प्रसंगात्–प्रवृत्तिप्रसंगात् ॥

शि० म०–नचोपस्थितत्वमुभयविशेषणं पुरोवर्त्तीष्टज्ञानयोर्भेदग्रहेपि तत्र तदग्रहसत्त्वात् । तस्मादभेदज्ञानमेव प्रवर्तकमित्यकामेनाप्यभ्युपेयमिति चेन्न । उपस्थिते पुरोवर्तिनि उपस्थितेष्टभेदाग्रहस्य ज्ञानभेदाग्रहसहितस्य प्रवर्त्तकत्वात् । नच भेदग्रहाभावापेक्षया लाघवेन भावस्यैवाभेदग्रहस्य प्रवर्त्तकत्वमिति युक्तम् । भूतलादेः स्वरूपेण भावस्यैव रूपांतरेणाभावत्वाभ्युपगमेनातिरिक्ताभावासिद्धेः । यथाहुः 'भावांतरमभावोहि कयाचित्तुव्यपेक्षयेति' अस्तु वातिरिक्ताभावस्तथापि न लाघवं सत्यस्थलऽएव तद्धेतोरेवेतिन्यायेनावश्यकभेदाग्रहस्यैव प्रवृत्तिहेतुत्वेन क्लृप्तत्वात् ॥

म० प्र०–उभयविशेषणम्–इष्टपुरोवर्त्युभयविशेषणम् । तथाचोपस्थितं पुरोवर्तिन्युपस्थितेष्टप्रतियोगिकभेदज्ञानाभावःकारणम् । इष्टानुपस्थितिकाले तूपस्थितेष्टप्रतियोगिकभेदज्ञानाभावाभावान्नप्रवृत्तिरित्यर्थः(पुरोवर्त्तीष्टज्ञानयोरिति) एतत्पाठस्थाने द्वंद्वेऽल्पाच्कस्य पूर्वप्रयोगार्हत्वेनेष्टपुरोवर्तिज्ञानयोरिति पाठः साधुः । तथाचेष्टज्ञानमिदं रजतमिति ज्ञानं पुरोवर्तिज्ञानमियंशुक्तिरिति ज्ञानं तयो रजतज्ञानं न शुक्तिज्ञानमिति भेदज्ञानेपि तत्र–पुरोवर्त्तिपदार्थे दोषवशेनेयंशुक्तिरिदंरजतंनेतीष्टप्रतियोगिकभेदज्ञानाभावसत्त्वात्प्रवृत्तिःस्यात् । प्रवृत्तिस्तु नैवभवत्यतोऽभेदज्ञानमेवरजततादात्म्यापन्नपुरोवर्त्तिज्ञानमेव प्रवर्त्तकमित्यर्थः । स्वरूपेण–भूतलत्वेन रूपेण, रूपांतरेण–अभावस्याधिकरणस्वरूपत्वेन भूतलादेर्घटादिप्रतियोगिकत्वाभिन्नरूपांतरेण घटाभाववद्भूतलमितिज्ञाने घटाभावविशेषितत्वेन रूपान्तरेण वा घटादिविनिर्मुक्तत्वेन रूपांतरेणवा । अत एव नहि भूतलस्य परिणामविशेषात्कैवल्यलक्षणादन्यो घटाभावोविद्यते इति वृद्धोक्तिरपि संगच्छते । इति भावान्तरम्–घटाद्यपेक्षयाभूतलादिरूपं पदार्थान्तरम्, घटविशिष्टभूतलापेक्षया केवलभूतलादिरूपभावांतरंवा । कयाचित्तुव्यपेक्षया–विशेषाकांक्षयांऽभावस्थलीयाकांक्षयासप्रतियोगिकत्वाकांक्षयेति यावत् । व्यपेक्षयेत्युक्ते हि पुरुष इत्यत्र कस्य पुरुष इत्याकांक्षासत्त्वात्पुरुषस्याभावत्वापत्तिरूपोदोषः स्यात्, पुरुषे व्यभिचाररूपो वा दोषः स्यात्, अतो विशेषार्थकंकयाचिदित्युक्तमिति । तथापि–भूत-

Funding by IKS-MoE

लाद्यधिकरणातिरिक्ताभावस्वीकारेपि, न लाघवम्–लघुरेवलाघवमितिव्युपत्त्याऽभावापेक्षया लघुभूतमभेदज्ञानं प्रवृत्तिकारणं न सत्यस्थले एव–व्यावहारिकरजतादिविषयेपि, तद्धेतोरेवेतिन्यायेन–तद्धेतोरेवहेतुत्वमस्तु किंतेनेति न्यायेन । तद्धेतोर्विषययोस्तज्ज्ञानयोश्च भेदग्रहो विषययोस्तज्ज्ञानयोश्चाभेदज्ञानेप्रवृत्तिकारणे प्रतिबंधकःअतस्तदभावो विषययोस्तज्ज्ञानयोश्चाभेदज्ञाने प्रवृत्तिकारणे कारणमिति प्रतिबंधकाभावत्वेन विषययोस्तज्ज्ञानयोश्चप्रवृत्तिकारणाभेदज्ञानहेतोर्विषययोस्तज्ज्ञानयोश्चभेदज्ञानाभावस्यैव प्रवृत्तिहेतुत्वमस्तु, तेन विषययोरभेदज्ञानरूपविशिष्टज्ञानेन किंफलमिति न्यायवाक्यार्थः, क्लृप्तत्वात्–निश्चितत्वात् ॥

शि० म०–प्रत्युत प्रवृत्त्यर्थमसत्यस्थलेऽपि अतिरिक्तविशिष्टज्ञानं कल्पनीयमित्यभेदग्रहहेतुतायामेव गौरवम् । यद्वा स्वरूपतो विषयतश्चागृहीतभेदग्रहणस्मरणात्मकं ज्ञानद्वयमेव प्रवर्त्तकं नच ग्रहणस्मरणात्मकज्ञानद्वयाभ्युपगतौ इदं साक्षात्करोमि रजतं स्मरामीति स्वार्थविवेचकानुव्यवसायापत्तिः । शुक्तित्वाग्रहवद्दोषेण तस्य प्रतिबंधात्, अत एव न तत्तोल्लेखः दोषेणैव तत्तायाःप्रमुष्टत्वात् । नच पीतःशंखस्तिक्तो गुड इत्यादावनुभूयमानारोपस्थले इष्टानिष्टस्मरणाभावात कथं प्रवृत्तिनिवृत्ती इति वाच्यम् । तत्रापि पीतत्वतिक्तत्वादीनां स्मरणस्यैव कल्पनात ॥

म० प्र०–प्रवृत्तित्वावच्छिन्नप्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वस्वीकारे लाघवं नास्तीत्यभिप्रेत्याह (प्रत्युतेति) प्रत्युताभेदग्रहहेतुतायामेव गौरवमित्यन्वयः । असत्यस्थलेपि–मिथ्याविषयेरजतादावपि (अतिरिक्तेति) इष्टप्रतियोगिकभेदज्ञानाभावातिरिक्तेत्यर्थः । (गौरवमिति) येन वादिना प्रवृत्तिं प्रत्यभेदज्ञानस्य हेतुत्वं स्वीक्रियतेतेनापिविषययोस्तज्ज्ञानयोश्चाभेदज्ञानेविषयतज्ज्ञानभेदज्ञानस्य प्रतिबंधकत्वेन तदभावस्य प्रवृत्तिकारणविषयतज्ज्ञानाभेदज्ञानाकारणत्वं प्रतिबंधकाभावत्वेन स्वीकरणीयमिति प्रवृत्तिंप्रति विशिष्टज्ञानविषयतज्ज्ञानभेदज्ञानाभावरूपकारणद्वयकल्पना असत्यस्थले इष्टस्याभावेन भ्रमात्मकेष्टसाधनताज्ञानमिदं रजतमितिज्ञानं च कल्पनीयमिति गौरवम् । मन्मतेतु सत्यासत्यविषये एकभेदज्ञानाभावस्यैव प्रवृत्तिहेतुत्वेन लाघवमितिभावः । ननु फलमुखगौरवं न दोषावहमित्याशंक्य फलमुखगौरवस्य दोषावहत्वे भावस्वरूपज्ञानद्वयस्यैव प्रवृत्तिं प्रति कारणत्वं स्वीकरणीयमित्यभिप्रेत्याह (यद्वेति) इदं रजतमित्यत्रेदमित्यनुभवात्मकं रजतमिति स्मरणात्मकमिति स्वरूपत इदमितिज्ञानस्य पुरोवर्तिविषयोरजतमिति ज्ञानस्य विषयोरजतमिति विषयतश्च न गृहीतोभेदो यस्य ज्ञानद्वयस्य तदगृहीतभेदं ग्रहणं च स्मरणंच ग्रहणस्मरणे ते आत्मानौ यस्य ज्ञानद्व-

यस्य तद्ग्रहणस्मरणात्मकमगृहीतभेदं च तद्ग्रहणस्मरणात्मकं च तत्तथेत्यर्थः (स्वार्थविवेचिकेति । स्मरणानुभवविषयं भिन्नत्वेनावगाहीत्यर्थः । (शुक्तित्वाग्रहवदिति) यथा शुक्त्या सह चक्षुःसन्निकर्षसत्त्वेपि दूरत्वादिदोषाच्छुक्तित्वग्रहो न भवति तथानुव्यवसायस्यापि प्रमातृगतलोभादिदोषेण प्रतिबंधान्नोक्तानुव्यवसायापत्तिरित्यर्थः अतएव–वक्ष्यमाणहेतोरेव, नं तत्तोल्लेखः–रजतमितिस्मृतौतदिदंरजतमितितत्तोल्लेखो न । तत्तायाः–तत्ताविषयकत्वस्य, प्रमुष्टत्वात्–नष्टत्वात, तिक्तः–कटुः (इत्यादाविति) पीतः शंख इत्यादिभ्रमात्पूर्वं नयनरश्मिद्वारा शंखादौ प्राप्तपीतद्रव्यादावनुभूयमानस्य पीतगुणादेर्यआरोपोभ्रांतिस्तदात्मके पीतः शंख इत्यादिज्ञानेसतीत्यर्थः । पीतः शंखः इत्याद्यभिन्नोयोऽनुभूयमानस्यारोपस्तद्विषकशंखादावित्यर्थोवा । इष्टानिष्टस्मरणाभावात्–पीततिक्तगुणयोः स्मरणाभावात् । तत्रापि–शंखादावपि ॥

शि० म०–तदुक्तं माषराशिस्थमषिविषये माषार्थिप्रवृत्तिर्मषिनीलिमस्मारितमाषभेदाग्रहादनुभूयमानारोपो सिद्ध एवेति । अथवा अगृहीतभेदं ज्ञानद्वयं प्रवर्तकमिदंचानुभूयमानारोपस्थले इष्टपुरोवर्त्तिनोर्ग्रहणाभ्युपगमेप्यस्तीति न प्रवृत्त्याद्यनुपपत्तिः । यद्वा अगृहीतेष्टभेदपुरोवर्त्तिविषयागृहीतेष्टज्ञानभेदज्ञानं प्रवर्त्तकम् अयंच भेदाग्रहः क्वचिद्विद्यमानेपि भेदेदोषवशेन तदग्रहात् । क्वचित्तदभावात्तथाच सत्यस्थले ज्ञानद्वयाभावेपि न प्रवृत्त्यनुपपत्तिः । ननु विवादाध्यासितं पुरोवर्त्तिज्ञानं रजतत्वप्रकारकं तत्प्रकारकप्रवृत्तिजनकत्वात्, उभयसिद्धसमीचीनरजतज्ञानवदित्यनुमानात्पुरोवर्तिनि रजतत्वासिद्धौ तस्य च बाधदर्शनेन मिथ्यात्वावगमात्तज्ज्ञानविषयं यथार्थत्वानुमानं बाधितमिति चेन्न ॥

म० प्र०–मषिविषये–मष्यभिन्नपदार्थे (स्मारितमाषेति) स्मृतिविषयाभिन्नमाषेत्यर्थः । अनुभूयमानारोपः–शंखादौ पीतः शंख इत्यादिभ्रमात्पूर्वमनुभूयमानस्य पीतगुणादेर्भ्रांत्यात्मकः प्रत्ययः । ननु, नयनरश्मिद्वारा शंखादौ प्राप्तपीतद्रव्यादावनुभूयमानपीतगुणादेर्योनुभवात्मक आरोपस्तद्विषययोः पीततिक्तगुणयोः स्मरणकल्पनं नैयायिकादिमतविरुद्धमित्याशंक्याह (अथवेति) अगृहीतभेदं–स्वरूपतो विषयतश्च भेदज्ञानाभाववत् । ज्ञानद्वयम्–पुरोवर्तिज्ञानमिष्टज्ञानंच (अनुभूयमानारोपस्थलेइति) अनुभूयमानपीतत्वादिगुणस्यभ्रांतिज्ञानविषयेऽनुभूयमानपीतत्वादिगुणस्यभ्रांतिकालेवेत्यर्थः । ग्रहणाभ्युपगमे–अनुभवस्वीकारे । नच पीतः शंख इत्यादिपीतगुणादिविषयकानुभवस्वीकारे पीतगुणादिविषयस्य शंखादावभावात्तस्य भ्रमत्वं स्यादिति वाच्यम् । अन्यत्र स्थितस्यैव पीतगुणादेर्दोषादत्रभानात् । नच शंखादौ प्रवृत्तिनिवृत्ती न

स्यातामिति वाच्यम्, इष्टानिष्टभेदाग्रहात्प्रवृत्तिसंभवादिति । ननु ज्ञानद्वयस्य प्रवर्त्तकत्वे तवमतेगौरवं स्याद्व्यावहारिकरजतादिविषये ज्ञानद्वयाभावेन प्रवृत्तिश्च न स्यादित्यरुच्याह (यद्वेति) इष्टस्यरजतादेर्भेदइष्टभेदो न गृहीतइष्टभेदो येन ज्ञानेन तदगृहीतेष्टभेदं पुरोवर्त्तीविषयो यस्य ज्ञानस्य तत्पुरोवर्तिविषयमगृहीतेष्टभेदंच तत्पुरोवर्तिविषयंच तत्तथा इष्टस्य ज्ञानमिष्टज्ञानमिष्टज्ञानस्य भेद इष्टज्ञानभेदो न गृहीत इष्टज्ञानभेदो येन ज्ञानेन तदगृहीतेष्टज्ञानभेदमगृहीतेष्टभेदपुरोवर्तिविषयं च तदगृहीतेष्टज्ञानभेदं च तत्तथाऽगृहीतेष्टभेदपुरोवर्तिविषयागृहीतेष्टज्ञानभेदं चतज्ज्ञानं च तत्तथेति विग्रहः । यद्वा न गृहीतइष्टभेदो यस्मिन्पुरोवर्तिपदार्थे स तथाऽगृहीतेष्टभेदःपुरोवर्त्तीविषयोयस्य ज्ञानस्येति पूर्वदलस्य विग्रहः । अयंचभेदाग्रहः–प्रवर्तकज्ञानशरीरघटकभेदाग्रहश्च । क्वचित्–मिथ्याभूतरजतादौ, तदग्रहात्–भेदज्ञानप्रतिबंधात् । क्वचित्–व्यावहारिकरजतादौ, तदभावात्–इष्टरजतभेदाभावात् । अस्यायंचभेदाग्रहइत्यनेनान्वयः । तथा च–अगृहीतेष्टभेदेत्यादिवाक्योक्तज्ञानस्य प्रवृत्तिकारणत्वे स्वीकृते सति, सत्यस्थले–व्यावहारिकविषये पुरोवर्तिज्ञानम्–इदंरजतमित्यादिज्ञानम्, तत्प्रकारकप्रवृत्तिजनकत्वात्–रजतत्वप्रकारकप्रवृत्तिजनकत्वात्। सिद्धौ–निश्चये, तस्य–पुरोवर्तिज्ञातरजतत्वस्य, तज्ज्ञानविषयम्–रजतज्ञानविषयकम्, अनुमानम्–विप्रतिपन्नाः सर्वे प्रत्यया यथार्थाः प्रत्ययत्वात् घटादिप्रत्ययवदित्यनुमानम् ॥

शि० म०–अनुकूलतर्काभावात् विपक्षेबाधकाभावाच्च । नच प्रवृत्त्यनुपपत्तिर्बाधिका अन्यथैव तस्या उपपादितत्वात्, किंच रजतज्ञानं न शुक्तिविषयम् अन्याकारज्ञानस्यान्यविषयत्वेऽनुभवविरोधात् ननु रजतज्ञानं शुक्तिविषयमेव तद्गोचरव्यवहारजनकत्वात् शुक्तिज्ञानवत् नचानुभवविरोधः इदं रजतत्वेन जानामीति रजतज्ञानविषयत्वस्यैवानुभवादितिचेन्न । आरोप्यानिरूपणेन तदभेदविषयपुरोवर्त्तिज्ञानस्यैवासिद्धेः । तथाहि शुक्तौ विषये इदमात्मनावभासमानं रजतं किमसदुत सत्, नाद्यः अपरोक्षाभासानुपपत्तेः । नह्यसदिन्द्रियसन्निकृष्टं संविदभिन्नं वा, ननु विषयस्य समस्तसामर्थ्यविरहेपि पूर्वविज्ञानसामर्थ्यादुपजातं विज्ञानमेवासतः प्रकाशः तस्यैष स्वभावः यदसत्प्रकाशयतीति अत एवाहुः असत्प्रकाशनशक्तिरेवास्याविद्येति । अत एव चानुभवः असदेवेदं रजतमभादिति । अन्यथा सत्ख्यातिवादिमतेपि विभ्रमे पुरोवर्त्तिसंसर्गस्य शून्यतयाऽनवभासापत्तेः । तस्मादसदेवाध्यासविषय इति चेन्न । शक्याभावेन शक्तेरेवानुपपत्तेः असदेवास्याः शक्यमिति चेत् किमेतत्तुकार्य्यमुतज्ञाप्यं न तावत्कार्य्यम् ॥

म० प्र०–(अनुकूलतर्काभावादिति) पक्षेतत्प्रकारकप्रवृत्तिजनकत्वमस्तु रजतत्वप्रकारकत्वं मास्तु इति व्याप्तिसंशयनिवर्तकतर्काभावात् । नच यदि पक्षेतत्प्रकारकत्वं न स्यात्तर्हि तत्प्रकारकप्रवृत्तिजनकत्वमापि न स्यादित्यनुकूलतर्कोस्तीति वाच्यम्, भेदाग्रहादेव तत्प्रकारकप्रवृत्तिसंभवेन व्यभिचाराभावसहकृताभावसहचारज्ञानाभावेनानुकूलतर्कानुदयादित्यर्थः । विपक्षे–पक्षवृत्तिसाध्याभावे । अन्यथैव–इष्टभेदाग्रहादिनैव । तस्याः–पुरोवर्तिपदार्थविषयकप्रवृत्तेः । अन्याकारज्ञानस्यरजतत्वादिप्रकारकज्ञानस्य, अन्यविषयत्वे–शुक्त्यादिविषयकत्वे, अनुभवविरोधात्–रजतत्वादिप्रकारकंज्ञानंनशुक्त्यादिविषयकमित्यनुभवविरोधात्, तद्गोचरव्यवहारजनकत्वात्–शुक्तिगोचरप्रवृत्त्यादिव्यवहारकारणत्वात्, इदं–पुरोवर्तिवस्तु (रजतेति) शुक्तौरजतज्ञानविषयत्वस्येत्यर्थः (तदभेदेति) आरोप्यरजतादेः पुरोवर्तिपदार्थे योऽभेदः सविषयोयस्मिन् ज्ञाने एतादृशं यत्पुरोवर्तिज्ञानं तस्यैवासिद्धेरित्यर्थः । पूर्वविज्ञानसामर्थ्यात्–पूर्वविज्ञानस्य पुरोवर्तिसामान्यांशविज्ञानस्य व्यावहारिकरजतादिविज्ञानस्यवाशक्तेः । विज्ञानम्–इदंरजतमित्यादिज्ञानम् । प्रकाशः–ज्ञानम्, तस्य–विज्ञानस्य, स्वभावः–असाधारणोधर्मः, अस्य प्रकाशनशक्तिरेवाविद्येत्यन्वयः । प्रकाशनशक्तिः–मिथ्यारजतादिविषयकव्यवहारजननानुकूलाशक्तिः । अस्य विज्ञानस्य । अतएव–विज्ञानस्यासत्प्रकाशनशक्तिकत्वादेव । अन्यथाविज्ञानस्यासत्प्रकाशनशक्तिकत्वानंगीकारे सत्ख्यातिवादिमते–नैयायिकमते, संसर्गस्य–आरोप्यसंसर्गस्य. शून्यतया–असत्त्वेन, अनवभासापत्तेःअविषयत्वापत्तेः । तस्मात्–विज्ञानस्यासत्प्रकाशनसामर्थ्यात्. अध्यासविषयः–ज्ञानविषयः, शक्येति--ज्ञाननिष्ठशक्तिविषयेत्यर्थः ।॰ शक्तेः–ज्ञाननिष्ठशक्तेः, अस्याः–ज्ञाननिष्ठासत्प्रकाशनशक्तेः । एतत्--असद्रजतादिकं, कार्य्यं--ज्ञाननिष्ठशक्तिजन्यं, ज्ञाप्यं--ज्ञाननिष्ठशक्तिजन्यज्ञानविषयः ॥

शि० म०–असतस्तत्त्वानुपपत्तेःद्वितीयेपि किं ज्ञानांतरद्वारा विज्ञानमसत्प्रकाशयाति उत विज्ञानमेव तत्प्रकाशः। नाद्यः, ज्ञानांतरानुपलब्धेरनवस्थापाताच्च । न द्वितीयः, सदसतोः संबंधानिरूपणात्, नह्यसंबद्धं वस्तु विज्ञानानि शतमपि: प्रकाशयंतीति असदधीननिरूपणत्वं सतो विज्ञानस्यासता विषयेण संबंध इति चेत, न, असतो निरूपकत्वायोगात् । नापि स्वभावः संबंधः सन्मात्रनिष्ठस्य कार्य्यकारणभावस्याविनाभावस्य वा स्वभावस्य सदसतोरयोगात्। तस्मान्नाध्यस्तमसत् सत्त्वपक्षेपि तद्रजतं किमांतरमुत बाह्यम् । नाद्यः, तस्य ज्ञानाभिन्नत्वे प्रमाणाभावात् । सुखादिवत्केवलसाक्षिवेद्यत्वलक्षणस्य चांतरत्वस्य विज्ञानवा-

Funding by IKS-MoE

दिभिर्योगाचारैरभ्युपगमात् । ननु रजतादिकं ज्ञानाभिन्नं इंद्रियसंप्रयोगमंतरेणापरोक्षत्वात् संवेदनवत् । नच विशेषणासिद्धिः इन्द्रियेण सह संयोगस्याभावात् ज्ञानस्य च प्रत्यासत्तेरनभ्युपगमादितिचेत्, न, तस्य ज्ञानाभिन्नत्वेरजतं जानामीति भेदानुभवविरोधात्, प्रतिपत्तुः प्रत्ययादनतिरेकेणाहं रजतमितिप्रतिभासापत्तेः । अनुभवः प्रमाणमितिचेत् किमिदं रजतमिति प्रत्ययो रजतस्यांतरत्वे प्रमाणं बाधकप्रत्ययो वा अर्थापत्तिर्वा । न तावदाद्यः, तस्यांतरत्वे अप्रमाणत्वात् । इदं रजतमितीदंत्वरजतत्वसामानाधिकरण्यविषयत्वेन तत्रैव प्रमाणत्वाच्च । अत एव न द्वितीयः, नहि बाधकज्ञानं रजतस्य ज्ञानाकारतामवगाहते किंतु पुरोवर्तिद्रव्ये रजतभेदम् ॥

म० प्र०–तत्त्वानुपपत्तेः–कार्य्यत्वानुपपत्तेः । ज्ञानांतरद्वारा–ज्ञाननिष्ठशक्तिजन्यज्ञानद्वारा । तत्प्रकाशः–असद्विषयकव्यवहारजनकम् । ननु सदसतोः संबंधाभावेपि ज्ञानमसद्विषयकव्यवहारंजनयत्वित्याशंक्याह (नहीति) असंबद्धम्–ज्ञानासंबद्धम्, प्रकाशयंति–व्यवहारं जनयंति । असदधीननिरूपणत्वम्–कस्य ज्ञानमिति प्रश्नेअसतोज्ञानमित्यसदधीननिरूपणकत्वमेवासता सह ज्ञानस्य संबंधोनिरूप्यनिरूपकभावः संबंध इति यावत् । स्वभावः–ज्ञानगतविजातीयकारणतादिरूपासाधारणधर्मः । तस्मात्–ज्ञानासतोः संबंधाभावात् (नाध्यस्तमसदिति) असद्रजतादिकं ज्ञानविषयो नेत्यर्थः । तस्य–रजतस्य विशेषणासिद्धिः–रजतस्य रूपादिमत्त्वेनेन्द्रिययोग्यत्वादिन्द्रियसंप्रयोगमंतरेणेति विशेषणस्य पक्षेऽभावः, संयोगस्याभावात्–रजतस्यान्तरविज्ञानरूपत्वेन संयोगाभावात्, ननु रजतेन सहेन्द्रिमस्यज्ञानलक्षणप्रत्यासत्तिरस्तीत्याशंक्याह (ज्ञानस्येति) ज्ञानाभिन्नप्रत्यासत्तेरित्यर्थः । तस्य–रजतस्य, रजतनिष्ठज्ञानस्वरूपत्वस्वीकारेदूषणांतरमाह (प्रतिपत्तिरिति)प्रमाणं–रजतनिष्ठांतरत्वविषयकावरणनिवर्त्तकः। बाधकप्रत्ययः--नेदंरजतमितिप्रत्ययः, तस्य--इदंरजतमितिप्रत्ययस्य, आंतरत्वे--रजतनिष्ठांतरत्वे--अप्रमाणत्वात्--आवरणनिवर्त्तकत्वाभावात् । तत्रैव--इदंत्वरजतत्वयोरेकाधिकरणवृत्तित्वे एव, प्रमाणत्वात्--आवरणनिवर्त्तकत्वात् । अतएव--नहीत्यादिनावक्ष्यमाणहेतोरेव ।

शि०म०–नतृतीयः, बाधकप्रत्ययस्य रजतभेदतद्धर्मात्यंताभावविषयत्वेन अर्थापत्त्यनवकाशात् । इदंत्वप्रतिषेधेहि बाधितं बाह्यरजतमांतर एव ज्ञाने व्यवतिष्ठत इत्यर्थापत्तिः स्यात्, न इदंत्वेन प्रतिषिद्धस्य रजतस्य देशान्तरसत्त्वेनाप्युपपत्तेः । किंच ज्ञानस्य रजताकारत्वं स्वाभाविकं हेत्वंतराधीनं वा । नाद्यः, सर्वज्ञानानां रजताकारत्वप्रसं

गात् । नद्वितीयः, विज्ञानमात्रवादात् । किंच न तावद्रजतमांतरं बाह्ये शुक्तिशकलादावध्यस्यते । विज्ञानवादिमते बाह्यस्यालीकत्वेन तत्राध्यासायोगात् । नन्वांतरे रजते बहिष्ट्वारोपः । अत एव बाधोपि तन्मात्रविषयः, लाघवात । नतु रजतविषयः, तथासति रजतस्य तद्धर्मस्य चेदंताया बोध इतिगौरवप्रसंगादितिचेत, न, रजतस्यापि बाधितत्वेन तत्र बहिष्ट्वाध्यासायोगात, बाधस्य च नेदंरजतमिति विशिष्टरजतविषयस्यानुभवसिद्धत्वेन तत्कल्पनाभावात् । अत एव नेदं रजतं किंतु शुक्तिरिति बाह्याधिष्ठानावधिकोबाधः । अन्यथा रजतमिदं न किंत्वांतरमिति स्यात् । तस्मादांतरं रजतमध्यासविषय इत्युक्तं बाह्यपक्षेपि तद्रजतं किं पुरोदेशवर्त्तिदेशांतरवर्तिवा, आद्येपि रजतं पुरोवर्तिद्रव्यस्य परिणामः अविद्याया वा । नाद्यः, शुक्त्यवयवोत्पन्नस्य रजतस्य शुक्तिवत्पारमार्थिकत्वेन बाधानुपपत्तेः ॥

म० प्र०—ननु शतवर्षजीवीदेवदत्तो बहिर्नास्तीति निषेधवन्नेदं रजतमितिबाह्यरजतनिषेधोऽनुपपद्यमान आन्तरं रजतं कल्पयतीत्यर्थापत्तीरजतस्यांतरत्वे प्रमाणमित्याशंकां निराकरोति (न तृतीयइति) बाधकप्रत्ययस्य—नेदंरजतमितिबाधकप्रत्ययस्य (रजतभेदेति) पुरोवर्त्तिनिष्ठरजतप्रतियोगिकभेदपुरोवर्तिनिष्ठरजतधर्मरजतत्वाभावरजतनिष्ठपुरोवर्त्तिधर्मेदंत्वात्यंताभावविषयकत्वेनेत्यर्थः । नेदं रजतमिति रजतनिष्ठेदंत्वप्रतिषेधो निषेधविषयबाह्यरजतनिष्ठांतरविज्ञानरूपत्वं विनाऽनुपपद्यमान आंतरविज्ञानरूपरजतं कल्पयतीतिप्रकारांतरेणार्थापत्तिमाशंकते (इदंत्वेति) बाधितं—नेदंरजतमितिबाधविषयतांप्राप्तम्, व्यवतिष्ठते—अभेदेन तिष्ठति उक्तार्थापत्तिं निराकरोति (नेति) उपपत्तेः—बाधकप्रत्ययविषयरजतनिष्ठेदंत्वात्यंताभावोपपत्तेः । स्वाभाविकं—ज्ञानातिरिक्तकारणानधीनम् (हेत्वंतरेति) ज्ञानातिरिक्तकारणेत्यर्थः । (वादादिति) ज्ञानातिरिक्तकारणंनास्तीतिभावः । तत्र—बाह्यशुक्त्यादौ, अध्यासायोगात्—भ्रांत्यसंभवात् । आरोपः—भ्रांतिः, अत एव—वक्ष्यमाणहेतोरेव, तन्मात्रविषयः—आंतरेरजतेबहिष्ट्वाभावमात्रविषयः, रजतविषयः—रजताभावविषयः, तथासति—बाधस्यांतररजतनिष्ठबहिष्ट्वाभावमात्रविषयकत्वानंगीकारेः नेदंरजतमितिबाधकप्रत्ययस्य रजताद्यभावविषयकत्वस्वीकारेवा । रजतस्य—रजततत्संसर्गस्य, तद्धर्मस्य—रजतधर्मरजतत्वस्य तत्संसर्गस्यच, इदंतायाः—इदंता तत्संसर्गस्य, बाधः—नेदंरजतमिति बाधविषयत्वकल्पनं मिथ्यात्वकल्पनंवा, इति—इत्याकारकम्, बाधितत्त्वेन—मिथ्यात्वेन । तत्र—रजते ननु नेदंरजतमिति बाधकस्य रजताद्यभावविषयकत्वेगौरवंस्यादित्याशंक्याह (बाधस्येति) इति—इत्याकारकस्य (विशिष्टेति)

Funding by IKS-MoE

रजतत्वादिविशिष्टरजताभावविषयकस्येत्यर्थः । अनुभवसिद्धत्वेन–नेदंरजतमितिज्ञानस्य रजताद्यभावविषयकत्वमित्याद्यनुव्यवसायरूपसाक्षिरूपानुभवसिद्धत्वेन (तत्कल्पनेति) नेदंरजतमित्यादिबाधकनिष्ठरजताद्यभावविषयकत्वकल्पनेत्यर्थः । अतएव–नेदंरजतमित्यादिबाधकस्य रजतादिविषयकत्वसंभवादेव । बाह्याधिष्ठानावधिकः–बाह्यशुक्त्याद्यधिष्ठानावशेषिकः बाह्यशुक्त्याद्यधिष्ठानातिरिक्तेदंत्वतत्संसर्गरजततत्संसर्गादीनां सर्वेषां बाधो भवतीतिभावः । अन्यथा–नेदंरजतमित्यादिबाधकस्य रजताद्यभावविषयकत्वानंगीकारे ॥

शि० म०–ननु दोषसापेक्षतदवयवोत्पन्नस्य रजतस्यदोषापगमान्नाशेन बाधोपपत्तिरितिचेत्, न, दोषस्य निमित्तकारणमात्रत्वेन तदपगमस्य रजताविनाशकत्वात् । नहि दंडापगमे घटापायो दृष्टः ततश्च रजतं न पुरोवर्त्ति द्रव्यपरिणामः । अविद्यापरिणामपक्षेपि न केवलाविद्यापरिणामः दोषरहितस्यानुबद्धरजतसंस्कारस्यापि पुरुषस्य तत्प्रसंगात् । नापि दोषादिसहकृताविद्यापरिणामः रजतावयवानां क्लृप्तरजतोत्पादकानामभावेन दोषादिसहकारिमात्रेणाविद्यायास्तदुत्पादकत्वायोगात् । किंच रजतं नाविद्यापरिणामः, सर्वज्ञानानां यथार्थत्वेन भ्रमानुपपत्तेः । तत्प्रमाणस्य भ्रमोपादानत्वस्य च अविद्यालक्षणस्य तल्लक्षणस्यासंभवेनाविद्याया एव दुर्निरूपत्वात् । तस्मान्नपुरोदेशवर्त्तिरजतमध्यासविषयः देशांतरवर्त्तित्वपक्षे न तावत्केवलाच्चक्षुषस्तद्विषयज्ञानजन्म तस्यासन्निकर्षात्, इन्द्रियाणां समीचीनज्ञानजननसामर्थ्यनियमाच्च । नापि दोषसहकृतात् दोषस्य प्रकृतकार्य्यजननसामर्थ्यविघातमात्रे हेतुत्वात् । अन्यथा दुष्टादपि कुटजबीजाद्वटांकुरोत्पत्तिप्रसंगात् । ततश्च न देशांतरवर्त्तिरजतारोपः । नन्वख्यातिवादिमते शुक्तिकादिपुरोवर्त्तिद्रव्यदर्शनानंतरं तत्र जायमानरजतज्ञानस्याप्रामाण्यप्रसिद्धिस्तद्विषयबाधप्रसिद्धिश्चाप्रमाणज्ञानाभावात् बाध्यविषयाभावाच्च न स्यादितिचेत्, न, रजतव्यवहारस्यैव तेन बाधात्, ज्ञानस्य च तादृशविसंवादिव्यवहारहेतुत्वेनाप्रामाण्यव्यपदेशोपपत्तेः । तस्माद्यथार्था एव सर्वेपि प्रत्यया इति ॥

म० प्र०–तदपगमस्य–दोषनाशस्य, अपगमे–नाशेऽन्यत्रगतेवा, ततश्च–बाधानुपपत्तिरूपदोषादेव । तत्प्रसंगात्–इदंरजतमिति प्रत्ययप्रसंगात्, क्लृप्तेति–लोकप्रसिद्धेत्यर्थः । तदुत्पादकत्वेति–रजतोत्पादकत्वेत्यर्थः । तत्प्रमाणस्य–अविद्याप्रमाणस्य । असंभवेन–भ्रमाभावादसंभवेन, तस्मात्–उक्तदूषणकलापात् । तद्वि–

षयेति–रजतविषयकेत्यर्थः । तस्य–रजतस्य (सहकृतादिति) : चक्षुषइतिशेषः (प्रकृतकार्य्येति) शुक्तित्वादिप्रकारकशुक्त्यादिविशेष्यकशुक्तिज्ञानादीत्यर्थः । अन्यथा–दोषसहकृतपदार्थस्य विलक्षणकार्य्योत्पादकत्वे, दुष्टादपि–क्लेदनादिरूपदोषवतोऽपि । कुटजबीजात्–"कुटजोवृक्षभेदे स्यात्" इति मेदिनीकोशाद्वृक्षविशेषस्य कुटजः शुक्रो वत्सको गिरिमल्लिकेत्यमरकोशात्कुडा इति ख्यातस्य वा बीजात्, अख्यातिवादिमते–इष्टपुरोवर्तिज्ञानयोस्तद्विषययोश्च भेदज्ञानाभावः प्रवर्त्तक इति वादिमीमांसकमते, तत्र–शुक्तिकादौ (तद्विषयबाधेति) रजतज्ञानविषयरजतप्रतियोगिकाभावज्ञानमित्यर्थः । व्यवहारस्य–प्रवृत्त्यादिरूपस्य, तेन–नेदंरजतमित्यादिज्ञानेन । ज्ञानस्य–इदंरजतमित्यादिज्ञानस्य (तादृशविसंवादीति) बाध्यनिष्फलेत्यर्थः ॥

शि० म०–उच्यते अस्ति तावत्पुरोवर्तिनि इदं रजतमिति सामानाधिकरण्यव्यपदेशो रजतार्थिप्रवृत्तिश्चेति सार्वजनीनं तदेतन्न भेदाग्रहमात्राद्भवितुमर्हति सुषुप्तौ तत्प्रसंगात् । नाप्युपस्थितेष्टभेदाग्रहात् तस्याभावतया गुरुत्वेनाभेदज्ञानस्यैव सत्यस्थलेहेतुत्वेन क्लृप्तत्वात् । नच तद्धेतोरेवास्यहेतुत्वमितिन्यायेन भेदाग्रहएवहेतुः क्लृप्त इत्युक्तमिति वाच्यम्, कारणत्वस्य भावत्वव्याप्यतया अभावमात्रस्यैवाहेतुत्वात् । मण्यादिसमवधाने दाहानुत्पादस्य च वह्निगतशक्त्यभिभवप्रयुक्तत्वेन प्रतिबंधकाभावस्य कारणत्वे प्रमाणाभावात् । नाप्यगृहीतेष्टभेदपुरोवर्तिविषयाऽगृहीतेष्टज्ञानभेदज्ञानं प्रवर्त्तकमुपस्थितेष्टभेदाग्रहवत्) । अगृहीतेष्टभेदपुरोवर्तिविषयत्वविशिष्टागृहीतेष्टज्ञानभेदज्ञानापेक्षया पुरोवर्तिविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानत्वस्य लघुत्वेनाभेदग्रहस्य तेनैवसत्यस्थले प्रवृत्तिकारणताग्रहात् । नचातिरिक्तविशिष्टज्ञानकल्पनं दोषः कारणताग्रहदशायां तत्कल्पनस्यानुपस्थितत्वात् ॥

म० प्र०–सामानाधिकरण्यव्यपदेशः–सामानाधिकरण्यविषयकः शब्दात्मको व्यवहारः । तदेतत्–उक्तद्वयम्, तत्प्रसंगात्–प्रवृत्त्यादिप्रसंगात् (भेदाग्रहादिति) प्रवृत्त्यादिरितिशेषः । तस्य–उपस्थितेष्टभेदाग्रहस्य । सत्यस्थले–व्यावहारिकरजतविषये । हेतुत्वेन–प्रवृत्त्यादिहेतुत्वेन, क्लृप्तत्वात्–निश्चितत्त्वात् । हेतुः–रजतादिविषयकप्रवृत्त्यादिहेतुः, क्लृप्तः–निश्चितः । भावत्वव्याप्यतया–यत्रकारणत्वंतत्रभावत्वमिति भावत्वनिरूपितव्याप्त्याश्रयतयाऽभावे व्यापकभावत्वाभावेन तद्व्याप्यकारणत्वाभावस्य सुग्रहतया । नन्वेवं दाहादिकार्य्यप्रतिबंधकमण्यादिप्रतिबंधकाभावस्यापि कारणत्वं न स्यादित्याशंक्याह (मण्यादीति । उपस्थितेष्टभेदाग्रहवदिति) उपस्थितेष्टभेदाग्रहनिष्ठकारणताभाववदित्यर्थः (इष्टतावच्छेदकप्रकारकेति) रजतत्वादिप्रकारके-

त्यर्थः । अभेदग्रहस्य–इदंरजतमित्यादिज्ञानस्य । तेनैव–इष्टतावच्छेदकरजतत्वादिप्रकारकज्ञानत्वेनैव । सत्यस्थले–व्यावहारिकरजतादिविषये (अतिरिक्तेति) यथानैयायिकमते हेतुनिष्ठव्याप्तिस्मृतिहेतुनिष्ठपक्षधर्मताज्ञानद्वयादनुमितिस्थले विशिष्टपरामर्शकल्पनरूपोदोषस्तथा यस्मिन्विषये भेदाग्रहात्प्रवृत्तिस्तस्मिन् विषयेभेदाग्रहातिरिक्तविशिष्टज्ञानकल्पना दोषः स्यादित्यर्थः । कारणताग्रहदशायाम्–प्रवृत्तित्वावच्छिन्नप्रवृत्तिप्रतीष्टतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वमितिकारणताज्ञानकाले । तत्कल्पनस्य–भेदाग्रहजन्यप्रवृत्तिविषये इदं रजतमित्यादिविशिष्टज्ञानकल्पनरूपगौरवस्य, अनुपस्थितत्वात्–अज्ञातत्वात् ॥

शि० म०–उपस्थितस्यचतर्कितगौरवस्य सकलप्रमाणप्रवृत्त्यप्रतिबंधकत्वेनापरिपंथित्वात् फलमुखस्यचोपजीव्यकारणताप्रतिबंधित्वशंकानवकाशात्, नच विषयानिरूपणात् मिथ्याज्ञानाभावःसत एव रजतस्यदेशान्तरवर्तिनः पुरोवर्तिज्ञाने विषयत्वात् । नापि रजतज्ञानसामग्रीविरहः यथार्थप्रत्यक्षमात्रे सन्निकर्षस्य हेतुत्वेनासन्निकृष्टस्यापि रजतस्य दोषवशाद्भानोपपत्तेः । यत्तु दोषस्य प्रकृतकार्य्यप्रतिबंधमात्रहेतुत्वेन विपरीतकार्य्याहेतुत्वात् तत्सहकृताच्चक्षुषो न मिथ्याज्ञानसंभव इति तन्न दावदग्धेवेत्रबीजादौ कदलीकाण्डारंभकत्वस्य भस्मकदुष्टेचौदर्य्ये तेजसि बह्वन्नपानपचनस्य दर्शनात्। यच्चोक्तं विप्रतिपन्नाः सर्वेपि प्रत्यया यथार्थाः प्रत्ययत्वात् संप्रतिपन्नवदिति। नैतत्सारम् उक्तन्यायेन पुरोवर्तिनिप्रतिपन्नस्य नेदं रजतमिति तत्रैवाभावप्रतियोगित्वाभ्युपगमेनानुमानस्य प्रत्यक्षबाधापहतविषयत्वात् । तदेतत् सिद्धं विवादाध्यासितं रजतज्ञानं पुरोवर्तिविशेष्यकं तद्विशेष्यकरजतार्थिप्रवृत्तिहेतुज्ञानत्वात्, यद्यद्विशेष्यकप्रवृत्तिहेतुज्ञानं तत्तद्विशेष्यकं यथोभयसिद्धसमीचीनज्ञानं तथाचेदं तस्मात्तथेति। नचाप्रयोजकत्वं विशिष्टज्ञानकारणतायां लाघवस्योक्तत्वात्। प्रवृत्त्यनुपपत्तेश्च विपक्षे बाधकत्वात्। तस्माद्विसंवादिप्रवृत्तिजनकं सर्वं ज्ञानमयथार्थमितिसिद्धं तदेतदाह (विसंवादिप्रवृत्त्याभ्रांतिज्ञानासिद्धाविति ॥

म० प्र०–ननु–विशिष्टज्ञाननिष्ठप्रवृत्त्यादिकारणताज्ञानोत्तरं गौरवज्ञानं भविष्यतीत्याशंक्याह (उपस्थितस्येति) विशिष्टज्ञाननिष्ठप्रवृत्त्यादिकारणताज्ञानोत्तरगौरवज्ञानविषयस्येत्यर्थः ॥ तर्कितगौरवस्य–यदिविशिष्टज्ञाननिष्ठप्रवृत्त्यादिकारणता स्यात्तर्हिगौरवं स्यादिति तर्कविषयगौरवस्य (सकलप्रमाणेति) अत्रप्रमाणशब्दो ज्ञानपरस्तथाच भुक्तवंतं प्रति माभुंक्तेति निषेधवत्सकलविशिष्टज्ञाननि-

वृत्त्यादिकारणताग्रहाप्रतिबंधकत्वेनेत्यर्थः । ननु निष्फलगौरवाभ्युपगमोऽयुक्त इत्याशंक्य तस्य निष्फलत्वं नास्तीत्यभिप्रेत्याह (फलमुखस्येति) फलंकार्य्यकारणभावज्ञानं मुखे आदौ यस्य गौरवज्ञानस्य तत्तथा तस्यगौरवज्ञानस्येत्यर्थः (उपजीव्येति) उपजीव्याविशिष्टज्ञाननिष्ठप्रवृत्त्यादिकारणतानिष्ठगौरवज्ञाननिमित्तभूता या कारणताविशिष्टज्ञाननिष्ठप्रवृत्त्यादिकारणता ज्ञानं तत्प्रतिबंधकत्वशंकानवकाशादित्यर्थः (विषयानिरूपणादिति) बाह्यस्यांतरस्यासतश्च विषयस्य निराकरणेन विषयस्यासंभवान्निर्विषयज्ञानस्यासंभवाच्च मिथ्याज्ञानमेव नास्ति । नच शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पतंजलिसूत्राद्धनुर्धरो वंध्यापुत्रो यातीत्यादिवाक्यजन्यज्ञानवन्निर्विषयरजतादिज्ञानस्यापि संभवात्कथं निर्विषयज्ञानासंभव इति वाच्यम् । इन्द्रियार्थसन्निकर्षजन्यज्ञानस्य निर्विषयकत्वासंभवादित्यर्थः (रजतज्ञानेति) देशान्तरीयरजतज्ञानेत्यर्थः । रजतस्य—देशान्तरीयरजतस्य (उपपत्तेरिति) शुक्तिकादाविदंरजतमित्यादिज्ञानस्य यथार्थप्रत्यक्षत्वाभावान्न सन्निकर्षाद्यपेक्षेति भावः । वेत्रबीजादौ लोके वेतेतिख्यातस्य बीजादौ । भस्मकदुष्टे—भस्मकनामकदोषवति, तेजसि—अग्नौ, उक्तन्यायेन—दोषवशेन देशान्तरीयरजतस्य चक्षुषा भानोपपत्तिरूपहेतुना । प्रतिपन्नस्य—ज्ञातस्य रजतस्य, तत्रैव—पुरोवर्तिन्येव ॥

मू०—तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वे न प्रामाण्यं देशान्तरीयरजतस्य क्लृप्तस्यैव तद्विषयत्वसंभवादितिचेन्न ॥

शि० म०—नन्विदं रजतमित्यनुभव एवैतत्कालोत्पन्नरजते प्रमाणमन्यथा प्रत्ययस्य निर्विषयत्वापत्तेः आंतरस्यासतश्च रजतस्य निराकरणात्, व्यवहितविषयस्य च प्रत्यक्षाविषयत्वादित्याशंक्य नहीदं रजतमिति प्रत्ययस्तस्य प्रातिभासिकत्वे प्रमाणं तेन तस्याविषयीकरणादित्याशयेनाह (तस्येति) ननु विषयांतरानुपपत्त्या तस्य प्रातिभासिकरजतं विषयत्वेन कल्प्यते इत्यत आह (देशांतरीयरजतस्येति) तस्य विषयत्वे विनिगमकमाह (क्लृप्तस्यैवेति) तथाच रजतं व्यवहितमपि दोषवशादेव भ्रमे भासत इति भावः । एवं भ्रांतिज्ञानं सर्वमन्यथाख्यातिरित्याशंकितेसिद्धांतीदूषयाति (नेति) किं देशान्तरवर्तिरजतमसान्निकृष्टमपि भ्रमे भासते इत्यभिमतं सान्निकृष्टं वा । नाद्यः, सन्निकर्षाभावे तद्घटितप्रत्यक्षसामग्रीविरहात् विशेष्यसन्निकर्षवद्विशे-

षणसन्निकर्षस्यापि प्रत्यक्षेहेतुत्वात, अन्यथा व्यवहितदण्डेपुंसि दण्डीति विशिष्टप्रत्यक्षापत्तेः ॥

म० प्र०–(एतत्कालेति) भ्रमकालेत्यर्थः । रजतेप्रमाणम्–रजतास्तित्वविषयकावरणनिवर्त्तकम्, अन्यथा–इदं रजतमित्यनुभवविषयरजतानंगीकारे, प्रत्ययस्य–इदंरजतमित्यनुभवस्य । ननु तस्य निर्विषयत्वापत्तिः कुत इत्याशंक्याह (आंतरस्येति) नन्विदं रजतमित्यनुभवस्य देशांतरीयरजतं विषयोस्त्वत्याशंक्याह (व्यवहितेति) तस्य–रजतस्य, प्रातिभासिकत्वेप्रमाणम्–प्रातिभासिकत्वविषयकावरणनिवर्तकम् । तेन–इदंरजतमितिप्रत्ययेन, तस्य–रजतनिष्ठप्रातिभासिकत्वस्य । परममूले (तस्येति) इदं रजतमित्यादिभ्रांतिज्ञानस्येत्यर्थः । परममूले (नप्रामाण्यमिति) प्रमाणाभावइत्यर्थः । तस्य–इदं रजतमितिज्ञानस्य, तस्य–देशांतरीयरजतस्य, विषयत्वे–इदं रजतमित्यनुभवविषयत्वे, विनिगमकम्–प्रसिद्धत्वरूपं ज्ञापकम् । नहि प्रसिद्धपदार्थं परित्यज्याप्रसिद्धपदार्थकल्पनमुचितमितिभावः । भ्रमेभासते–भ्रमनिरूपितविषयताश्रयः । असन्निकृष्टमपि–इन्द्रियासंबद्धमेव (तद्घटितेति) सन्निकर्षघटितेत्यर्थः । ननु विशेष्येणसन्निकर्षस्यसत्त्वात्कथं सन्निकर्षवटितसामग्रीविरह इत्याशंक्याह (विशेष्येति) अन्यथा–विशेषणसन्निकर्षस्य विशिष्टप्रत्यक्षं प्रति हेतुत्वानंगीकारे (प्रत्यक्षापत्तेरिति) नच दण्डविशिष्टत्वेन पूर्वंज्ञातेपुंसिदण्डाभावेप्ययं दण्डीति ज्ञानसंभवेन कथं विशेषणसन्निकर्षस्यहेतुत्वमिति वाच्यम् । तत्रापि तवमते ज्ञानलक्षणप्रत्यासत्त्या चक्षुषो गमनेन विशेषणसन्निकर्षसत्त्वादिति ॥

मू०–तस्यासन्निकृष्टतया प्रत्यक्षविषयत्वायोगात् ॥

शि० म०–नचैतावता जन्ययथार्थप्रत्यक्ष एव विशेषणसन्निकर्षो हेतुरस्त्वति वाच्यम्, लाघवेन जन्यप्रत्यक्षत्वावच्छिन्ने एव तस्य हेतुत्वात्, अन्यथा सुरभिचंदनमित्यादौ विशेषणीभूतसौरभांशे ज्ञानप्रत्यासत्तिकल्पनं वह्निसन्निकर्षाभावेन सन्निकृष्टेपि पर्वते तद्विशिष्टप्रत्यक्षाभाववर्णनं च तवमते विरुद्धचेत द्वितीयेपि किमिन्द्रियस्य रजतेन साकं लौकिकः सन्निकर्षः अलौकिको वा । नाद्यः, इन्द्रियस्य तेन संयोगसंयुक्तसमवायादेरभावादित्याह (तस्येति) अलौकिकं किं सामान्यं प्रत्यासत्तिः । उतज्ञानं तत्रापि नतावत्प्रमेयत्वेन रजतग्रहः तस्य तत्प्रकारकत्वापत्तेः नापि रजतत्वेन इन्द्रियसंयुक्ते पुरोवर्तिनि तस्याभावेनासन्निकृष्टत्वात् सन्निकृष्टसामान्यस्यैव प्रत्यासत्तित्वाभ्युपगमात्, किंच न तावत्सामान्यं प्रत्यासत्तिः प्रमाणाभावात् व्याप्तिग्रहस्यं

सिद्धांते सन्निकृष्टधूमादिव्यक्तिमात्रविषयकत्वेन सर्वधूमाविषयतया तस्य सामान्यप्रत्यासत्तिकल्पकत्वायोगात्, धूमो वह्निव्यभिचारीनवेति संशयस्यच ॥

म० प्र०—एतावता—व्यवहितदंडे पुंसि दंडीति विशिष्टप्रत्यक्षापत्तिरूपदूषणेन लाघवेन—जन्ययथार्थप्रत्यक्षत्वरूपकार्य्यतावच्छेदकापेक्षया जन्यप्रत्यक्षत्वरूपकार्य्यतावच्छेदकेलाघवेन तस्य—विशेषणसन्निकर्षस्य अन्यथा—विशेषणसन्निकर्षस्यप्रत्यक्षत्वावच्छिन्नं प्रति हेतुत्वानंगीकारे (तद्विशिष्टेति) वह्निविशिष्टपर्वतेत्यर्थः । सामान्यं—इन्द्रियसंबद्धसामान्यम्, किंप्रमेयत्वं रूपं सामान्यं प्रत्यासत्तिरुतरजतत्वरूपमिति विकल्पं मनसि निधाय न तावदाद्य इत्याह (तत्रापीति) पक्षद्वयमध्येपीत्यर्थः । प्रमेयत्वेन प्रमेयत्वाभिन्नसामान्यधर्मरूपप्रत्यासत्त्यारजतग्रहः । इदं—रजतमिति ज्ञानं, तस्य—रजतज्ञानस्य, तत्प्रकारकत्वापत्तेःप्रमेयत्वप्रकारकत्वापत्तेः, नापि द्वितीय इत्याह (नापीति) रजतत्वेन—रजतत्वाभिन्नसामान्यप्रत्यासत्त्या । नन्वसन्निकृष्टरजतत्वादिरूपसामान्यमेव प्रत्यासत्तिरस्त्वित्याशंक्याह (सन्निकृष्टेति) इन्द्रियसंबद्धेत्यर्थः । ननु सामान्यलक्षणप्रत्यासत्त्यनंगीकारे महानसादौ धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनांज्ञानाभावेन निखिलधूमेषु निखिलवह्निनिरूपितव्याप्तिज्ञानमेव न स्यादतः सामान्यलक्षणा प्रत्यासत्तिः कल्पनीयेत्याशंक्याह (व्याप्तिग्रहस्येति) सिद्धान्ते—वेदान्तिमते, नन्वेवमपि सामान्यलक्षणप्रत्यासत्त्यनंगीकारे महानसादिवृत्तिप्रत्यक्षधूमे वह्निसंबंधस्य गृहीतत्वाद्देशांतरीयकालांतरीयधूमस्यानुपस्थितत्वाच्चधूमोवह्निव्याप्यो नवेति संशयो न स्यात्सामान्यलक्षणप्रत्यासत्तिस्वीकारेतु सामान्यलक्षणप्रत्यासत्त्या सकलधूमोपस्थितौ कालांतरीयदेशान्तरीयधूमेषु वह्निनिरूपितव्याप्तिसंदेहो धूमोवह्निव्याप्यो न वेत्याकारकः संभवतीत्याशंक्याह (धूमइति) ॥

मू०—नच ज्ञानं तत्र प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे तत एव वह्न्यादेः प्रत्यक्षत्वापत्तावनुमानाद्युच्छेदापत्तेः ॥

शि०म०—तत्तद्धूमत्वेन वह्निसामानाधिकरण्यनिश्चयेपि प्रसिद्धधूम एव संभवेनाप्रसिद्धधूमाविषयत्वात्समानप्रकारकनिश्चयस्यैव संशयविरोधित्वादत एव घटत्वेनेतरभेदनिश्चयेपि पृथिवीत्वेन घटे तत्संशयइति तवापि राद्धांतः तस्मान्न सामान्यं प्रत्यासत्तिरिति संक्षेपः द्वितीयं पक्षं दूषयति (नचेति) अयंभावः न ज्ञानं प्रत्यासत्तिः प्रमाणाभावात्, नच घटमहंजानामीत्यनुव्यवसायो व्यवसायस्य प्रत्यासत्तित्वे प्रमाणं तस्य स्वप्रकाशतया मनोजन्यज्ञानांतरानपेक्षणात्, अत एव न चाक्षुषज्ञाने

तन्नियमः प्रत्यभिज्ञावत्संस्कारादिसहकारिबलादसन्निकृष्टविषयचाक्षुषज्ञानोपपत्तेः नच तत्रापि चाक्षुषत्वात्सन्निकर्षजन्यत्वं कल्प्यते इति युक्तं चक्षुर्जन्यस्यापि कस्यचित्परोक्षत्वे बाधकाभावात् प्रमात्वाप्रमात्वयोरिव परोक्षत्वापरोक्षत्वयोरेकज्ञानधर्मत्वोपपत्तेश्च तस्मान्न ज्ञानं प्रत्यासत्तिरिति दिक् ॥

म० प्र०–तत्तद्धूमत्वेन–महानसीयधूमत्वाद्यवच्छिन्नेत्यर्थः । वह्निसामानाधिकरण्यनिश्चयेपि–वह्निनिरूपितव्याप्तिनिश्चयेपि प्रसिद्धधूमे एव–पर्वतीयधूमे एव महानसीयधूमे एव वा । नतुदेशान्तरीयधूमादावित्येवकारार्थः (अप्रसिद्धधूमेति) देशान्तरीयधूमादीत्यर्थः । ननु तत्तद्धूमेवह्निनिरूपितव्याप्तिनिश्चयसत्त्वेन कथं संशय इत्याशंक्य समानप्रकारकनिश्चयसंशययोर्विरोध इत्यभिप्रेत्याह (समानप्रकारकेति) धूमो वह्निव्यभिचारीनवेतिसंशयस्य धूमो वह्निव्याप्य इति व्याप्तिनिश्चयो विरोधी न तु तत्तद्धूमेषु वह्निनिरूपितव्याप्तिनिश्चय इतिभावः । अतएव–समानप्रकारकनिश्चयस्यैव संशयविरोधित्वादेव । घटत्वेनेतरभेदनिश्चयेपि घटत्वावच्छिन्नो योजलादिप्रतियोगिकभेदस्तन्निश्चयेपि घटत्वप्रकारकजलादिप्रतियोगिकभेदनिश्चयेपीतिवा । पृथिवीत्वेन घटे तत्संशयः पृथिवीतरभेदवती नवेति पृथिवीत्वप्रकारकघटादिपृथिवीविशेष्यकजलादिप्रतियोगिकभेदसंशयः । तस्मात्–व्याप्तिग्रहोक्तसंशययोरुपपन्नत्वात् (प्रमाणमिति) घटमहंजानामीति मानसानुव्यवसायो घटेन सह मनःसन्निकर्षविनाऽनुपपद्यमानः मनसः घटे मनःसंयुक्तात्मसमवेतज्ञानविषयत्वरूपसंबंधंकल्पयतीतिव्यवसायस्य प्रत्यासत्तित्वसाधक इत्यर्थः । अतएव–ज्ञानलक्षणप्रत्यासत्तौ प्रमाणाभावादेव । चाक्षुषज्ञानेपि–सुरभिचंदनमित्यादिचाक्षुषज्ञानार्थमपि–तन्नियमः, चक्षुःसंयुक्तमनःसंयुक्तात्मसमवेतज्ञानविषयत्वरूपज्ञानलक्षणप्रत्यासत्तेरवश्यं स्वीकारः (असन्निकृष्टेति) ज्ञानलक्षणप्रत्यासत्तिरहितेत्यर्थः । तत्रापि–सोयं देवदत्त इत्यादि प्रत्यभिज्ञायामपि ॥

मू०–ननु रजतोत्पादकानां रजतावयवादीनामभावे शुक्तौ कथं तवापि रजतमुत्पद्यते इति चेत् उच्यते ॥

शि० म०–नन्वलौकिकसामग्रीतोऽनुमितिसामग्र्या बलवत्त्वाद्धृदयादेः कथं प्रत्यक्षत्वमितिचेन्न समाने विषये प्रत्यक्षसामग्रीत्वेनैव लाघवेन बलवत्तया अनुमितिसामग्र्या एव दुर्बलत्वात् अन्यथा संशयोत्तरप्रत्यक्षभ्रमानुपपत्तेः ननु रजतावयवस्य तदुपादानस्य प्रसिद्धस्य च तन्निमित्तस्याभावे कथं शुक्तौ रजतं जायेत नच शुक्त्यवयवास्तदुपादानं निरस्तत्वात् उत्पन्नस्य शुक्तित्वापत्तेश्च अत एव न तज्ज्ञानमपि

Funding by IKS-MoE

क्लृप्तकारणस्य विषयेन्द्रियसन्निकर्षादेरभावादित्याक्षिपति (नन्विति) अस्ति शुक्ताविदं रजतमिति ज्ञानं तत्र चासतोऽनवभासनादान्तरस्य च रजतस्य निराकृतत्वात् बाह्यस्य च पुरोवस्थितस्य पारमार्थिकस्य बाधानुपपत्त्या देशांतरीयस्य व्यवधानेन विषयत्वायोगात् अन्तःपरिशेषात्प्रातिभासिकं तत्कालोत्पन्नमेव रजतं विषय इत्यभिप्रेत्याह उच्यतेइति ॥

म० प्र०—ज्ञानलक्षणप्रत्यासत्तिस्वीकारेऽपि नानुमानोच्छेद इत्यभिप्रेत्य शंकते (नन्विति) अलौकिकसामग्रीतः—अलौकिकसन्निकर्षरूपप्रत्यक्षसामग्रीतः (प्रत्यक्षसामग्रीत्वेनेति) प्रत्यक्षसामग्रीत्वावच्छिन्नबलवत्तयेत्यर्थः । लाघवेन—बलवत्तावच्छेदकीभूतलौकिकप्रत्यक्षसामग्रीत्वापेक्षया बलवत्तावच्छेदकप्रत्यक्षसामग्रीत्वे लाघवेन । अन्यथा—अनुमितिसामग्र्याः अलौकिकप्रत्यक्षसामग्रीतोपि दुर्बलत्वानंगीकारे, तदुपादानस्य—रजतोपादानस्य । तन्निमित्तस्य—पुरुषप्रयत्नरूपरजतनिमित्तस्य, तदुपादानम्—रजतोपादानम् । निरस्तत्वात्—शुक्त्यवयवोत्पन्नरजतस्य शुक्तिवत्पारमार्थिकत्वेन बाधानुपपत्तेरिति पूर्ववाक्येन शुक्त्यवयवानां रजतोपादानत्वस्य निरस्तत्वात् । उत्पन्नस्य—शुक्त्यवयवोत्पन्नरजतस्य, अत एव—वक्ष्यमाणहेतोरेव । न तज्ज्ञानमपि—रजतज्ञानात्यंताभावोप्यस्ति, अभावात्—शुक्तौ रजताभावेनाभावात्- तत्र—शुक्ताविदं रजतमिति ज्ञाने, अनवभासनात्—अविषयत्वात्, नन्विदं रजतमिति ज्ञानस्यांतररजतं विषयोस्त्वित्याशंक्याह (आंतरस्येति) नन्वेवमपि व्यावहारिकबाह्यरजतमेवेदं रजतमिति ज्ञानस्य विषयोस्त्वित्याशंक्याह (बाह्यस्यचेति) पारमार्थिकस्य- व्यावहारिकस्य । अतः उक्तहेतुकलापात् ॥

मू०—नहि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किंतु विलक्षणैव । तथाहि काचादिदोषदूषितलोचनस्य पुरोवर्तिद्रव्यसंयोगादिदमाकारा चाकचिक्याकारा काचिदन्तःकरणवृत्तिरुदेति । तस्यांच वृत्ताविदमंशावच्छिन्नं चैतन्यं प्रतिबिंबते तत्र पूर्वोक्तरीत्या वृत्तेर्बहिर्निर्गमनेनेदमंशावच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यं प्रमातृचैतन्यंचाभिन्नं भवति ततश्चप्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठाशुक्तित्वप्रकारिकाऽविद्या चाकचिक्यादिसादृश्यसंदर्शनसमुद्बोधितरजतसंस्कारसध्रीची-

ना काचादिदोषसमवहितारजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते ॥

शि० म०-किं लोकसिद्धरजतसामग्रीविरहात्प्रातिभासिकरजतानुत्पादः सामग्रीमात्रविरहाद्वा । नाद्यः, लौकिकपारमार्थस्यैव रजतस्य रजतावयवाद्यपेक्षत्वेन प्रातिभासिकस्य तदनपेक्षत्वात् अत एव क्लृप्तहेतुमंतरेणापि स्वप्नरथादेरुत्पत्तिरित्याशयेनाह (नहीति) द्वितीयमनुवदति (किंत्विति) दोषसंस्कारादिसहकृताविद्यैव प्रातिभासिकरजतोत्पादिकेत्याह (विलक्षणैवेति) ननु रजततज्ज्ञानयोर्न तावदविद्योपादानं प्रमाणाभावात् तदुपादानत्वे च वियदादिवत्सत्यत्वापत्तिः नचात्मा तदुपादानमपरिणामित्वात् नापिदोषः गुणसादृश्यात्मनस्तस्य द्रव्योपादानत्वायोगात्, अत एव नाविद्यानिमित्तकारणं नापि संस्कारः भ्रमस्य तज्जन्यत्वे स्मृतित्वापत्तेः भावनासंस्कारस्यार्थहेतुत्वाच्च । नच भेदाग्रहः तस्यार्थहेतुत्वे प्रमाणाभावात्तदन्वयव्यतिरेकयोश्च ज्ञानमादायोपपत्तेः । किंच रजतस्य प्रातिभासिकत्वे कथं प्रत्यक्षत्वं न तावच्चाक्षुषत्वं प्रातिभासात्पूर्वं तस्येन्द्रियसंयोगाभावात्, नापि मानसत्वम् इन्द्रियसंप्रयोगं विना मनसोबहिरस्वातंत्र्यात् ततश्च प्रातिभासिकं रजतं तत् ज्ञानं चानुपपन्नमित्यत आह (तथाहीति) अविद्यारजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमते इति संबंधः । वियदादि उपादानाविद्यातो वैलक्षण्यं दर्शयितुं विषयचैतन्यनिष्ठाशुक्तित्वप्रकारिकेति विशेषणद्वयं साहिमूलाविद्याचिन्मात्राश्रिताचिन्मात्रविषयानिर्विकल्पकज्ञाननिवर्त्याच इयंतु शुक्त्यवच्छिन्नचैतन्याश्रिता रजतभेदशुक्तित्वप्रकारिका सविकल्पकज्ञाननिवर्त्याच नचास्याविद्योपादानत्वे मानामावः ॥

म०प्र०-परमार्थस्यैव-व्यावहारिकस्यैव । अतएव-प्रातिभासिकवस्तुनोऽवयवाद्यपेक्षाभावादेव । तदुपादानत्वे-शुक्तिरजतादीनामविद्योपादानकत्वे, गुणसादृश्यात्मनः-प्रमातृगतरागद्वेषरूपगुणात्मकस्य विषयगतचाकचिक्यादिसादृश्यात्मकस्यच, अत एव-शुक्तिरजतस्योपादानकारणाभावादेव (नापि संस्कारइति) संस्कारोपितयोर्निमित्तकारणंनेत्यर्थः (भेदाग्रहइति) शुक्तिरजतोपादानमितिशेषः । तस्य-भेदाग्रहस्य (ज्ञानमादायोपपत्तेरिति) भेदाग्रहसत्त्वेशुक्तिरजतज्ञानसत्त्वंभेदाग्रहाभावे शुक्तिरजतज्ञानाभावइति ज्ञानाश्रितत्वेनोपपत्तेरित्यर्थः । तस्य-शुक्तिरजतस्य । परममूले (पूर्वोक्तरीत्येति) यथा तडागोदकमित्यादिवाक्योक्तरीत्येत्यर्थः । परममूले (चाकचिक्याका-

Funding by IKS-MoE

रेति) विलक्षणशौक्ल्याकारेत्यर्थः । परममूले(रजतसंस्कारसध्रीचीनेति) रजतसंस्कारेण सहांचतीतिरजतसंस्कारसध्रीचीरजतसंस्कारः सम्यक् सहकारी यस्याः सा तथेति वा, रजतसंस्कारसध्रीच्येव सध्रीचीना रजतविषयकसंस्कारसहकृतेति यावत् परममूले (समवहितेति) सहकृतेत्यर्थः।साहि–वियदाद्युपादानभूताहि,इयंतु–शुक्तिरजताद्युपादाना विद्यातु,रजतभेदशुक्तित्वप्रकारिका–रजतस्य भेदोयस्यांशुक्तावेत।दृशी या शुक्तिस्तन्निष्ठं यच्छुक्तित्वं तत्प्रकारिका, रजतप्रतियोगिकभेदः शुक्तित्वंचैतदुभयप्रकारिकेतिवा अस्य–शुक्तिरजतस्य ॥

शि०म०–रूप्याध्यासः साक्षादविद्योपादानः अन्यानुपादानत्वे सति सोपादानत्वादाकाशवत "मायां तु प्रकृतिं विद्यात्" इत्यादिश्रुत्या वियदादेरविद्योपादानत्वावगमान्नसाधनवैकल्यम् । नचान्तःकरणस्य तदुपादानत्वसंभवात्सत्यंतासिद्धिरिति वाच्यम् । अन्तःकरणस्य सादित्वेनोपादानापेक्षायामज्ञानस्य तदुपादानत्वेनावश्यकत्वात् । प्रातिभासिकस्वाप्नगजाद्यध्यासे तस्योपादानतया क्लृप्तत्वाच्च । नच विपक्षे बाधकाभावः मिथ्यार्थावभासानुपपत्तेरेव बाधकत्वादितिभावः । निमित्तकारणमाह (संस्कारेति) नन्वन्वयव्यतिरेकाभ्यां सादृश्यज्ञानमपि कारणं स्यादित्याशंक्य तस्य भ्रमजनकसंस्कारोद्बोधकत्वेनान्यथासिद्धत्वादित्याह (चाकचिक्यादीति) सादृश्यज्ञानस्य सोपाधिकाध्यासे स्वाप्नगजाद्यध्यासे च व्यभिचारान्नहेतुत्वमित्यपि बोध्यम् । नचसंस्कारोपि न हेतुरुक्तदोषादिति वाच्यम् ॥

म० प्र०–रूप्याध्यासः–अध्यस्तं प्रातिभासिकरजतं तज्ज्ञानं च शुक्तिरजतादेरन्तःकरणोपादानकत्ववादिमतेऽन्तःकरणद्वाराऽविद्योपादानकत्वस्य शुक्तिरजतादेः सत्त्वेन सिद्धसाधनतावारणाय साक्षादित्युक्तम् । नच शुक्तिरजतादेरन्तःकरणोपादानकत्ववादिमते पक्षेऽविद्यान्यानुपादानकत्वाभावेन विशिष्टहेतोरभावात्कथं तन्मते सिद्धसाधनवारणाय साक्षादित्युक्तमिति वाच्यम् । तन्मतेन्तःकरणान्यानुपादानकत्वस्य सत्यंतार्थत्वेन विशिष्टहेतोः सत्त्वेनोक्तसिद्धसाधनापादनसंभवात् । नच शुक्तिरजतादेरन्तःकरणोपादानकत्ववादिमतेऽन्यानुपादानकत्वे सतीति सत्यंतस्यान्तःकरणान्यानुपादानकत्वे सतीत्यर्थकत्वेन दृष्टांते साधनवैकल्यमितिवाच्यम्, दृष्टिसृष्टिवाद्युक्तवादिमते वियदादेरप्यन्तःकरणोपादानकत्वसंभवात् । वस्तुतस्तु साध्ये साक्षाद्विशेषणं हेतौ सत्यंतविशेषणं चानुपादेयमेव । शुक्तिरजतादेः परंपरयाऽविद्योपादानकत्वेप्यविद्याया उपादानत्वाक्षतेः । आत्मादौ व्यभिचारवारणाय सोपादानत्वादित्युक्तम् ॥ घटादौ व्यभिचारवारणाय हेतुवाक्ये सत्यंतम् । न साधनवैकल्यं–दृष्टांतेहेत्वत्यंता-

भावोन (तदुपादानत्वेति) शुक्तिरजतोपादानत्वेत्यर्थः । तदुपादानत्वेन–अन्तःकरणनिरूपितोपादानत्वेन, आवश्यकत्वात्–निश्चितत्वात् । अस्याग्रे तद्धेतोरेवास्य हेतुत्वमस्तु किं तेनेति न्यायेनाज्ञानस्यैव शुक्तिरजताद्युपादानत्वादितिशेषः । नचैवं घटादिकं प्रत्यपि पूर्वोक्तन्यायेन साक्षादज्ञानस्यैवोपादानत्वं स्यान्नमृदादेरिति वाच्यम् । घटादिमृदाद्योः प्रसिद्धकार्यकारणभावस्य त्यागायोग्यतयाऽप्रसिद्धकारणकशुक्तिरजतादिपदार्थे एव लाघवेन साक्षादज्ञानोपादानकत्वकल्पनायाः कृतत्वादिति । तस्य–अज्ञानस्य, विपक्षे–रूप्याध्यासे, साध्याभावे--हेत्वभावेच (अन्वयव्यतिरेकाभ्यामिति) रजतेन सदृशमिदमिति सादृश्यज्ञानाभावेपि चाकचिक्यादिसादृश्यज्ञानसत्त्वेशुक्तिरजतादिसत्त्वं चाकचिक्यादिसादृश्यज्ञानाभावे शुक्तिरजताद्यभाव इत्यन्वयव्यतिरेकाभ्यां शुक्तिरजतादेश्चाकचिक्यादिसादृश्यज्ञानानंतरभावित्वात्संस्कारवत्सादृश्यज्ञानमपि कारणमिति भावः । तस्य–सादृश्यज्ञानस्य, संस्कारोद्बोधकत्वेन–संस्कारनिष्ठभ्रमानुकूलसामर्थ्योद्बोधकत्वेन (इत्यपिबोध्यमिति) नच संस्कारस्यापि सोपाधिकाध्यासे व्यभिचाराच्छुक्तिरूप्याद्यध्यासे हेतुत्वं न स्यादिति वाच्यम्, संस्कारस्य निरुपाधिकशुक्तिरजताद्यध्यासे हेतुत्वाभ्युपगमेनाध्याससामान्यं प्रति हेतुत्वाभावेन व्यभिचाराभावादिति । न हेतुः–भ्रमादिहेतुर्न । उक्तदोषात्–भ्रमादेःस्मृतित्वापत्तिरूपदोषात् ॥

शि०म०–समानविषयसंस्कारजन्यत्वस्य संस्कारत्वेन तज्जन्यत्वस्य वा स्मृतित्वप्रयोजकत्वात् । अन्यथा प्रत्यभिज्ञानुमित्योः स्मृतित्वापत्तिरिति भावः। असाधारणकारणमाह (दोषेति) नच दोषसंस्कारयोरर्थाहेतुत्वमन्वयव्यतिरेकाभ्यां विनिगमकाभावेनोभयकारणताग्रहादिति भावः । प्रातिभासिकरजतस्य प्रत्यक्षत्वं प्रदर्शयितुं प्रमातृचैतन्याभिन्नेति विषयचैतन्यविशेषणम् ॥

म० प्र०–(समानविषयेति) समानविषयेत्याकारकशब्दस्य संस्कारजन्यज्ञानविषयान्यूनानधिकविषयकेत्यर्थकत्वे प्रमुष्टतत्ताकस्मृतेरनुभवजन्यसंस्कारजन्यप्रमुष्टतत्ताकस्मृतिविषयाधिकविषयकसंस्कारजन्यत्वेन स्मृतित्वं न स्यादतः समानविषयेत्याकारकशब्दस्य संस्कारजन्यज्ञानविषयविषयकसंस्कारजन्यज्ञानविषयान्यूनविषयकेत्युभयान्यतरार्थकत्वमित्यर्थः । शुक्तिरजतभ्रमादिहेतुसंस्कारस्य शुक्तिरजतभ्रमादिविषयप्रातिभासिकविषयभिन्नव्यावहारिकरजतादिविषयकत्वेन न संस्कारजन्यशुक्तिरजतभ्रमादेः स्मृतित्वमिति भावः। ननु संस्कारजन्यज्ञानविषयविषयकसंस्कारजन्यत्वस्य स्मृतित्वप्रयोजकत्वे प्रत्यभिज्ञायामुक्तस्मृतित्वप्रयोजकस्य सत्त्वेन स्मृतित्वापत्तिरित्याशंक्याह (संस्कारत्वेनेति) यद्वा समानविषयेत्याकारकशब्दस्य संस्कारजन्यज्ञानविषयान्यून-

विषयकेत्यर्थकत्वस्वीकारे प्रत्यभिज्ञायांस्मृतित्वापादनाभावेपि लाघवमाश्रित्याह (संस्कारत्वेनेति) भ्रमं प्रति संस्कारस्याविद्यासहकारिकारणत्वेन कारणत्वं न तु संस्कारत्वेनेति न भ्रमादेः स्मृतित्वमितिभावः । अन्यथा–उक्तस्यस्मृतित्वप्रयोजकत्वानंगीकारे, संस्कारजन्यत्वस्य स्मृतित्वप्रयोजकत्वस्वीकारे इति वा (स्मृतित्वापत्तेरिति) मन्मते प्रत्यभिज्ञां प्रति संस्कारस्य चक्षुरादीन्द्रियसहकारिकारणत्वेनानुमितौ तु व्याप्तिज्ञानव्यापारत्वेन संस्कारस्य कारणत्वं नत्वनुमितिप्रत्यभिज्ञयोः संस्कारस्य संस्कारत्वेन कारणत्वमिति न तयोः स्मृतित्वमिति भावः । दोषसंस्कारयोरर्थाहेतुत्वम्–दोषसंस्कारयोर्ज्ञानं प्रति हेतुत्वेन शुक्तिरजताद्यर्थाहेतुत्वम् । अन्वयव्यतिरेकाभ्याम्–दोषसंस्कारसत्त्वे शुक्तिरजताद्यर्थसत्त्वं तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्याम् । नन्वन्वयव्यतिरेकौ दोषसंस्कारसत्त्वे शुक्तिरजतादिज्ञानसत्त्वं तदभावे शुक्तिरजतादिज्ञानाभाव इति शुक्तिरजतादिज्ञानतदभावाश्रितत्वेनाप्युपपन्नाविति कथमन्वयव्यतिरेकाभ्यां दोषसंस्कारयोः शुक्तिरजताद्यर्थं प्रति हेतुत्वमित्याशंक्याह (विनिगमकाभावेनेति) दोषसंस्कारयोः शुक्तिरजतादिज्ञानं प्रत्येवहेतुत्वं न तु शुक्तिरजताद्यर्थं प्रति हेतुत्वमिति विशेषनिर्णये युक्त्यादि प्रमाणाभावेनेत्यर्थः । उभयकारणताग्रहात्–शुक्तिरजताद्यर्थस्तज्ज्ञानं चेत्युभयनिरूपितदोषसंस्कारानिष्ठकारणताज्ञानात्, (विषयचैतन्येति) इदमवच्छिन्नचैतन्येत्यर्थः ॥

शि० म०–तथाच स्वाकारवृत्त्युपहितस्य रजतस्य प्रमातृचैतन्यनिष्ठाविद्याकार्य्यत्वेन प्रमातृचैतन्याध्यस्तत्वात्प्रत्यक्षत्वं युक्तमिति भावः नन्वन्तःकरणस्य बहिर्निर्गमनाभावात्कथं विषयचैतन्यस्य प्रमातृचैतन्याभिन्नत्वं तथात्वे वा रजतस्य प्रमातृचैतन्याध्यस्तस्य चक्षुरनपेक्षस्य कथं तदन्वयव्यतिरेकानुविधानं कथंवा तस्य शुक्तित्वाज्ञानकर्यत्वं इदमाकारवृत्तिवत्पुरोवर्तिनि शुक्तित्वाकारवृत्तिसंभवादित्याशंक्याह (काचादीत्यादिना) नतावदिन्द्रियवैयर्थ्यं भ्रमजनकधर्मिज्ञाने तज्जनकसंस्कारोद्बोधकसादृश्यज्ञाने चोपयोगात्, नापि पुरोवर्तिनि शुक्तित्वग्रहः दोषेण तस्य प्रतिबंधात् प्रमात्रभेदस्य चान्तःकरणबहिर्निर्गमनेसति स्पष्टत्वादित्यर्थः (तत्रेति) तथेत्यर्थः (वृत्त्यवच्छिन्नचैतन्यमिति) इदमाकारवृत्त्यवच्छिन्नचैतन्यमित्यर्थः । तथाच धर्मिज्ञानस्य विषयचैतन्याभिन्नत्वेन प्रत्यक्षतया तत्रापरोक्षाध्यासो युज्यते इतिभावः ॥

म० प्र०–ननु विषयचैतन्यस्य प्रमातृचैतन्याभिन्नेति विशेषणेन प्रातिभासिकरजतस्य कथं प्रत्यक्षत्वप्रदर्शनं स्याद्विषयचैतन्यस्य प्रमातृचैतन्याभिन्नेति विशेषणदानेपि प्रातिभासिकरजतस्य प्रमातृचैतन्याध्यस्तत्वाबोधनादित्याशंक्याह (तथाचेति)

विषयचैतन्यस्य प्रमातृचैतन्याभिन्नेति विशेषणे सतीत्यर्थः । स्वाकारवृत्त्युपहितस्य–रजताकारवृत्तिविषयस्य (प्रमातृचैतन्यनिष्ठेति) नच शुक्तिरजताद्युपादानाविद्याया इदमवच्छिन्नचैतन्यनिष्ठत्वेन तस्याः प्रमातृचैतन्यनिष्ठत्वोक्तिः कथं संगच्छत इति वाच्यम् । शुक्तिरजतादिप्रतीतिकाले प्रमातृचैतन्यविषयचैतन्ययोरभेदेन प्रमातृचैतन्यनिष्ठेत्युक्तेरुपपन्नत्वादिति । तथात्वेवा–अन्तःकरणस्य बहिर्निर्गमनेवा चक्षुरनपेक्षस्य–स्वज्ञानोत्पत्त्योश्चक्षुरपेक्षारहितस्य, तदन्वयव्यतिरेकानुविधानम्-चक्षुषः सत्वे शुक्तिरजतादिसत्वं तदभावेशुक्तिरजताद्यभाव इति चक्षुरन्वयव्यतिरेकप्रयोज्यान्वयव्यतिरेकवत्त्वम् । तस्य–शुक्तिरजतस्य । इन्द्रियवैयर्थ्यम्–भ्रांत्युत्पत्ताविन्द्रियवैयर्थ्यम् । धर्मिज्ञाने–पुरोवर्त्तिपदार्थज्ञाने (तज्जनकेति) भ्रमजनकेत्यर्थः । तस्य–शुक्तित्वग्रहस्य, प्रतिबंधात्–अनुत्पादात् । धर्मिज्ञानस्य–पुरोवर्तिपदार्थविषयकवृत्त्यवच्छिन्नचैतन्यस्य, तत्र–अपरोक्षशुक्तौअपरोक्षाध्यासः–अपरोक्षरजतज्ञानम् ॥

मू०–परिणामो नामोपादानसमसत्ताककार्य्यापत्तिः विवर्त्तो नामोपादानविषमसत्ताककार्यापत्तिः[1] प्रातिभासिकं रजतं चाविद्यापेक्षया परिणामः चैतन्यापेक्षया विवर्त इति चोच्यते । अविद्यापरिणामरूपं च तद्रजतं अविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्त्तते अस्मन्मते सर्वस्यापि कार्य्यस्य स्वोपादानाविद्याधिष्ठानाश्रितत्वनियमात् ॥

शि० म०–ननु यद्यविद्यापरिणामरूपं रजतं नात्मपरिणामः तर्हि तद्विवर्त्तोपि न स्यात् परिणामविवर्त्तशब्दयोः पर्य्यायत्त्वादित्याशंक्य तयोर्भेदमाह (परिणामोनामेति) ननु मृत्परिणामस्य घटस्य मृदाश्रितत्ववद्रजतस्यापि स्वोपादानाविद्याश्रितत्ववद्रजतस्यापि स्वोपादानाविद्याश्रितत्वापत्तिः । नहि मृदुपादेयो घटोमृदवयवे वर्तते येनात्मन्यविद्याधिष्ठाने रजतं वर्त्ततेत्याशंक्यचैतन्यावरकाज्ञानस्य तमोवत्स्वाश्रयगतविक्षेपहेतुत्वात्तत्परिणामरूपमपि रजतं तदधिष्ठानचैतन्याश्रितमित्याह (अविद्यापरिणामरूपंचेति) ॥

म० प्र०–तर्हि–शुक्तिरजतस्यात्मपरिणामत्वभावे, तद्विवर्त्तोपिनस्यात्–शुक्तिरजतमात्मविवर्त्तोपि न स्यात्, तयोः–विवर्त्तपरिणामशब्दार्थयोः । परममूले–(परिणामोनामेति) । नच शुक्तिरजताद्युपादानाविद्यायाव्यावहारिकसत्ताकत्वेन शुक्ति-

---

[1] उत्पद्यमानकार्यम् ।

Funding by IKS-MoE

रजतादीनां व्यावहारिकसत्तातिरिक्तप्रातिभासिकसत्ताकत्वेन च शुक्तिरजतादीनां स्वोपादानाविद्यासत्ताभिन्नसत्ताकत्वात्स्वोपादानाविद्यासत्तासमसत्ताकत्वाभावेन शुक्तिरजतादिष्वव्याप्तिरिति वाच्यम् । द्विविधसत्ताभिप्रायेण लक्षणप्रणयनेनाव्याप्त्यभावात्, त्रिविधसत्त्वपक्षेपि परिणामलक्षणवाक्यस्योपादानेन समं न ह्युपादानोपादेययोरत्यंतसादृश्यं तंतुपटयोरपि तंतुत्वपटत्वादिना वैजात्यादित्युक्तेर्मिथ्यात्वेन सदृशं सत्तास्वरूपं यस्य कार्य्यस्यैतादृशं यदुत्पद्यमानं कार्य्यंपरिणाम इत्यर्थकत्वेन शुक्तिरजतादिष्वव्याप्त्यभावादिति विवर्तेऽतिव्याप्तिवारणाय समसत्ताकेति । परममूले (विवर्तोनामेति) नच त्रिविधसत्त्वपक्षे शुक्तिरजतादीनां स्वोपादानाविद्यासत्ताविलक्षणप्रातिभासिकसत्ताकत्वेन विवर्त्तलक्षणस्य शुक्तिरजतादिष्वतिव्याप्तिरिति वाच्यम् । विवर्तलक्षणवाक्ये उपादानशब्देन चैतन्यस्यैव ग्रहणयोग्यत्वेन विवर्त्तलक्षणवाक्यस्योपादानेन चैतन्येन विषमं सत्यत्वेन सादृश्याभाववत् सत्तास्वरूपं यस्यैतादृशं यदुत्पद्यमानं कार्य्यं विवर्त्त इत्यर्थकत्वेन विवर्त्तलक्षणस्य शुक्तिरजतादिष्वतिव्याप्त्यापादानासंभवादिति परिणामेऽतिव्याप्तिवारणाय विषमसत्ताकेति (स्वोपादानेति) रजतोपादानेत्यर्थः (मृदुपादेयंइति) उपादीयतेजन्यते इत्युपादेयमिति व्युत्पत्त्योपादेयं कार्य्यं मृदउपादेयेमृदुपादेय इत्यर्थः । मृदवयवे—मृदधिष्ठाने, येन—कार्य्यस्यस्वोपादानाश्रयवृत्तित्वेन (तमोवदिति) यथाप्रसिद्धबाह्यतमसः स्वाश्रयरज्ज्वादिगतसर्पादिकार्य्यहेतुत्वं तद्वदित्यर्थः (स्वाश्रयेति) अज्ञानाश्रयेत्यर्थः (विक्षेपहेतुत्वादिति) विक्षिप्यते जन्यते इति विक्षेप इति व्युत्पत्या कार्य्यहेतुत्वादित्यर्थः (तत्परिणामेति) अज्ञानपरिणामेत्यर्थः (तदधिष्ठानेति) अज्ञानाधिष्ठानेत्यर्थः । यस्मात्कारणादज्ञानं स्वाधिष्ठाने रजतादिकार्य्यमुत्पादयत्यतस्तस्यकार्य्यस्याज्ञानाधिष्ठानचैतन्याश्रितत्वमिति भावः ॥

सू०—ननु चैतन्यनिष्ठरजतस्य कथमिदं रजतमिति पुरोवर्तिना तादात्म्यम्। उच्यते।यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वेनोपलंभः शरीरस्य सुखाद्यधिकरणतावच्छेदकत्वात्तथा चैतन्यमात्रस्य रजतं प्रत्यनधिष्ठानतया इदमवच्छिन्नचैतन्यस्य तदधिष्ठानत्वेनेदमोविच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्यय उपपद्यते तस्य च विषयचैतन्यस्य तदन्तःकरणोपहितचैतन्याभिन्नतया विषयचैतन्याध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यम् ॥

Funding by IKS-MoE

शि० म०—ननु चैतन्यस्य स्वोपादानाविद्याधिष्ठानतया रजतस्य कथंचित्तदाश्रितत्वेऽपि पुरोवर्तिद्रव्यस्य तथात्वाभावात्कथं तदाश्रितत्वं, ततश्चेदं रजतमिति तादात्म्यव्यपदेशानुपपत्तिरिति शंकते (नन्विति । चैतन्यमात्रस्येति) इदमवच्छिन्नचैतन्यस्यैव रजतोपादानाविद्याधिष्ठानतया तस्यैवाविद्याजनितविक्षेपाधिष्ठानत्वौचित्यादिति भावः । नन्वेवमिदमवच्छिन्नचैतन्याध्यस्तस्य रजतस्यान्तःकरणावच्छिन्नचैतन्याध्यस्तत्वाभावेन कथं प्रमातृचैतन्याध्यस्तत्वरूपं प्रत्यक्षत्वमित्याशंक्य तस्यान्तःकरणविशिष्टाश्रितत्वाभावेऽपि तदुपहितचैतन्याध्यस्तत्वात्तस्यैव प्रमातृचैतन्याभिन्नत्वपदेन विवक्षितत्वादित्याशयेनाह (तस्यचेति । साक्षिण्यध्यस्तमिति) ननु किमिदमध्यस्तत्वं न तावद्भ्रमविषयत्वं तत्र भ्रमत्वं यदि दोषजन्यज्ञानत्वं तदा सर्वस्य कार्य्यस्याविद्यादोषजन्यतया ब्रह्मसाक्षात्कारस्यापि तज्जन्यत्वेनातिव्याप्तिः ॥

म० प्र०—(स्वोपादानेति) रजतोपादानेत्यर्थः । कथंचित्—स्वोपादानाविद्याश्रयत्वेन, तथात्वाभावात्—स्वोपादानाविद्याश्रयत्वाभावात् । तदाश्रितत्वम्—शुक्तिरजतस्य पुरोवर्त्तिशुक्त्यादिपदार्थाश्रितत्वम् । ततश्च-शुक्तिरजतादेः पुरोवर्त्तिशुक्त्यादिपदार्थाश्रितत्वाभावादेव । तस्यैव—इदमवच्छिन्नचैतन्यस्यैव । विक्षेपेति—शुक्तिरजतादिकार्य्येत्यर्थः। परममूले (अवच्छेदकत्वादिति) व्यावर्त्तकत्वादित्यर्थः। तस्य—शुक्तिरजतादेः (तदुपहितेति) इदमवच्छिन्नचैतन्याभिन्नान्तःकरणोपहितेत्यर्थः । ननु विषयप्रत्यक्षलक्षणेन्तःकरणोपहितस्य ग्रहणाभावेनोक्तदूषणंतदवस्थमित्याशंक्याह (तस्यैवेति) अन्तःकरणोपहितचैतन्याध्यस्तत्वस्यैवेत्यर्थः । तत्र—भ्रमविषयत्वरूपाध्यस्तत्वघटकभ्रमे, उपाधिनिमित्तकभ्रमकाले उपाधिसन्निधानरूपदोषस्य सत्त्वेन स्फटिकलौहित्यज्ञानादावव्याप्त्यभावेऽपि ब्रह्मसाक्षात्कारेतिव्याप्तिमाह (तदेति) तर्हीत्यर्थः । अविद्यादोषजन्यतया—साक्षात्परंपरयाऽविद्यारूपदोषजन्यतया, तज्जन्यत्वेन—अविद्याजन्यत्वेन । अतिव्याप्तिः—ब्रह्मसाक्षात्कारेऽतिव्याप्तिः ॥

शि० म०—नापि दोषत्वेन तज्जन्यत्वं काचादिसाधारणदोषत्वस्यानिर्वचनात्, नच संस्कारजन्यानुभवत्वं प्रत्यभिज्ञायामतिव्याप्तेः । नचासद्विषयत्वमसत्ख्यात्यनभ्युपगमात् । नापि व्यधिकरणप्रकारकज्ञानत्वम्, घटे रूपं घटे घटत्वमित्यादिज्ञानेऽतिव्याप्तेः। नच रजतस्याध्यस्तत्वे प्रमाणमस्ति प्रत्यक्षेणानुभवात् । नच दृश्यत्वादिना तदनुमानं दृष्टान्ताभावात्तस्माल्लक्षणप्रमाणाभावान्न युक्तं रजतादेरध्यस्तत्वमिति ।

अत्राहुः-स्मृतिरूपत्वे सति पूर्वदृष्टसजातीयत्वमध्यासलक्षणंस्मृतिरूपत्वंच स्मर्यमाणसदृशत्वं, तच्च प्रमाणाजन्यज्ञानविषयत्वं अज्ञातगोचरवृत्त्यनुपहितत्वं वा तेन स्मर्यमाणे घटादौ नातिव्याप्तिः प्रतीतिनियतसत्ताकाध्यासस्यात्र लक्ष्यत्वेन सुखादेरपि तथात्वात् नातिव्याप्तिः। अभिनवोत्पन्नवस्तुन्यतिव्याप्तिवारणाय द्वितीयविशेषणम् अध्यासमात्रलक्षणं तु परत्रपरावभासत्वंपारमार्थिकत्वावच्छिन्नस्वात्यंताभावाधिकरणे प्रतीयमानत्वमिति यावत् ॥

म० प्र०-तज्जन्यत्वम्-दोषजन्यत्वम् । ब्रह्मसाक्षात्कारस्याविद्यात्वेनाविद्याजन्यत्वान्नातिव्याप्तिरिति भावः (अनिर्वचनादिति) नच भ्रमज्ञानजनकत्वं दोषत्वमिति काचादिसाधारणदोषत्वस्य निर्वचनात्कथं काचादिसाधारणदोषत्वस्यानिर्वचनमिति वाच्यमात्माश्रयाददृष्टादावतिव्याप्तेश्चेति (अतिव्याप्तेरिति) अयथार्थस्मृतौ संस्कारजन्यानुभवत्वाभावेन लोहितः स्फटिक इत्यादिज्ञाने संस्कारजन्यत्वाभावेन तयोरव्याप्तेश्चेत्यपिबोध्यमिति (व्यधिकरणप्रकारकज्ञानत्वमिति) व्यधिकरणः-विशेष्यभिन्नाधिकरणकः प्रकारो यस्मिन् ज्ञाने तत्तशैतादृशज्ञाननिष्ठज्ञानत्वमित्यर्थः (अतिव्याप्तेरिति) नच घटनिष्ठाधारतानिरूपिताधेयतासंबंधेन रूपादौ घटस्यसत्त्वेन कथमुक्तज्ञानेऽतिव्याप्तिरितिवाच्यम् । घटनिष्ठाधारतानिरूपिताधेयतासंबंधस्य वृत्तितानियामकत्वात्, प्रत्यक्षेणानुभवात्-शुक्तिरजतादिनिष्ठाध्यस्तत्वे प्रत्यक्षाभिन्नानुभवाभावात्प्रत्यक्षनिरूपितविषयत्वाभावादिति वा । तदनुमानम्-शुक्तिरजतादिनिष्ठमिथ्यात्वानुमानम् । अध्यासलक्षणम्-प्रतीतिसमकालीनाध्यस्तत्वावच्छिन्नाध्यस्तलक्षणम्, तच्च-स्मर्यमाणसदृशत्वं च, वृत्त्यनुपहितत्वम्-वृत्त्यविषयत्वम्, तेन-पूर्वदृष्टसजातीयत्वनिवेशेन (नातिव्याप्तिरिति) स्मर्यमाणघटादीनां पूर्वदृष्टत्वेन पूर्वदृष्टसजातीयत्वाभावादतिव्याप्त्यभाव इत्यर्थः । अत्र-उक्ताध्यस्तलक्षणे । तथात्वान्नातिव्याप्तिः--स्मृतिरूपत्वेसतिपूर्वदृष्टसजातीयत्वज्ञाप्यातिव्याप्तेरभावः, द्वितीयविशेषणम्-सत्यंतविशेषणम् । अध्यासमात्रलक्षणम्-अध्यस्तमात्रलक्षणम् (पारमार्थिकत्वेति) पारमार्थिकत्वावच्छिन्नप्रतियोगिताको यो वस्त्वत्यंताभावस्तस्य यदधिकरणं तत्र प्रतीयमानत्वमित्यर्थः ॥

शि०म०-एतदभिप्रेत्यैव भगवता भाष्यकारेणोक्तं स्मृतिरूपः परत्र पूर्वदृष्टावभास इति, नचात्र प्रमाणाभावः सदिदं रजतमिति स्वाधिकरणे पारमार्थिकत्वेन प्रतिपन्नस्य रजतस्य नेदं रजतमिति प्रत्यक्षेण तदवच्छिन्नाभावप्रतियोगित्वावगमात। सदिति प्रतीयमानं रजतं स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यंताभावप्रतियोगि बाध्यत्वात् । यन्नैवं तन्नैवं यथेदंता इत्यनुमानाच्च। ततश्च रजतमध्यस्तमिति ॥

Funding by IKS-MoE

म० प्र०-(एतदभिप्रेत्यैवेति) स्मृतिरूपपूर्वदृष्टसजातीयार्थकपूर्वदृष्टशब्दाभ्यां प्रातीतिकाध्यासलक्षणं परत्रावभासशब्दाभ्यामध्यासमात्रलक्षणमित्यभिप्रायेणैव (स्मृतिरूपःपरत्रपूर्वदृष्टावभासइतीति) स्मृतिरूपः स्मर्य्यमाणसदृशः सादृश्यं च प्रमाणाजन्यज्ञानविषयत्वं स्मृत्यारोपयोःप्रमाणाजन्यत्वात्पूर्वदृष्टपदं पूर्वदृष्टसजातीयपरमभिनवरजतादेः पूर्वदृष्टत्वाभावात्तथाच प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टसजातीयत्वं प्रातीतिकाध्यासलक्षणं स्मृतिरूपपूर्वदृष्टपदाभ्यामुक्तं परत्रावभासशब्दाभ्यामध्यासमात्रलक्षणमुक्तमित्यर्थः । केचितु अत्राध्यास इत्यनुषंगः । अत्र परत्रावभास इत्येवलक्षणं शिष्टं पदद्वयं तदुपपादनार्थम्, तथाहि अवभास्यते इत्यवभासः रजताद्यर्थस्तस्यायोग्यमधिकरणं परत्रपदार्थः अधिकरणस्यायोग्यत्वमारोप्यात्यंताभाववत्त्वम्,तथाचैकावच्छेदेन स्वसंसृज्यमाने स्वात्यंताभाववत्यवभास्यत्वमित्यर्थः । इदंच साधनाद्यध्याससाधारणलक्षणम् ब्रह्मभिन्नं सर्वं मिथ्या दृश्यत्वादित्यनुमाने. पक्षैकदेशे संयोगादौ सिद्धसाधनवारणायैकावच्छेदेनेति, संयोगादेः संसृज्यमानस्वात्यंताभाववद्वृक्षादाववभास्यत्वेपि स्वस्वात्यंताभावयोर्मूलाग्रावच्छेदकभेदान्न सिद्धसाधनमिति । पूर्वघटाद्यभाववद्भूतलादौ पश्चादानीताघटादयोभांतीति घटादौसिद्धसाधननिरासाय स्वसंसृज्यमान इति पदम्, तेन स्वाभावकाले प्रतियोगिसंसर्गस्य विद्यमानतोच्यते इति न सिद्धसाधनमिति, भूत्वावच्छेदेनावभास्यगंधे सिद्धसाधननिरासाय स्वात्यंताभाववतीति पदम् । नन्वस्य लक्षणस्यासंभवः शुक्तौ रजतस्य सामग्र्यभावेन संसर्गासत्त्वात् । नच स्मर्यमाणसत्यरजतस्यैव परत्रशुक्तावभास्यत्वेनाध्यस्तत्वोक्तिरिति वाच्यम् । अन्यथाख्यातिप्रसंगादित्यत आह (स्मृतिरूपइति) स्मर्य्यते इति स्मृतिः सत्यरजतादिस्तस्य रूपमिवरूपमस्येति स्मृतिरूपः स्मर्यमाणसदृश इत्यर्थः । सादृश्योक्त्या स्मर्यमाणस्यारोप्यस्य भेदान्नान्यथाख्यातिरित्युक्तं भवति । सादृश्यमुपपादयति (पूर्वदृष्टेति) दृष्टं दर्शनं संस्कारद्वारापूर्वदर्शनादवभास्यत इति पूर्वदृष्टावभासस्तेन संस्कारजन्यज्ञानविषयत्वं स्मर्यमाणारोप्ययोः सादृश्यमुक्तं भवति स्मृत्यारोपयोः संस्कारजन्यत्वात् । नच संस्कारजन्यत्वादारोपस्य स्मृतित्वापत्तिरितिवाच्यम्, दोषसंप्रयोगजन्यत्वस्यापि विवक्षितत्वेन संस्कारमात्रजन्यत्वाभावात्, अत्रसंप्रयोगशब्देनाधिष्ठानसामान्यज्ञानमुच्यतेऽहंकाराध्यासे इन्द्रियसंप्रयोगालाभादेवंच दोषसंप्रयोगसंस्कारबलाच्छुक्त्यादौ रजतादिकमुत्पन्नमस्तीति परत्र परावभास्यत्वलक्षणमुपपन्नमिति स्मृतिरूपपूर्वदृष्टपदाभ्यामुपपादितमित्युक्तभाष्यव्याख्यां चक्रिरे इत्यपि बोध्यमिति । अत्र–रजतादेरुक्तमिथ्यात्वे, सत्–व्यावहारिकं, पारमार्थिकत्वेनप्रतिपन्नस्यव्यावहारिकत्वेनज्ञातस्य (तदवच्छिन्नेति) व्यावहारिकत्वावच्छिन्नेत्यर्थः (पारमार्थिकत्वावच्छिन्नेति) पारमार्थिकत्वावच्छिन्नप्रतियोगिताकेत्यर्थः । यन्नैवं–यद्वस्तुपूर्वोक्तात्यंताभावप्रतियोगि । तन्नैवं–तद्वस्तु बाध्यं न ॥

Funding by IKS-MoE

मू०–सुखादिवदनन्यवेद्यमितिचोच्यते । ननु साक्षिण्यध्यस्तत्वेऽहं रजतमिति प्रत्ययः स्यादहं सुखीतिवदितिचेत् ॥

शि० म०–नन्विदमवच्छिन्नस्वाधिष्ठानचैतन्यस्य साक्ष्यभेदे रजतस्य साक्ष्यभिन्नत्वे दुष्टकरणानामिवादुष्टकरणानामपि पुरुषाणां पुरोवर्तिनि शुक्तित्वादिग्रहसमये तदीयान्तःकरणोपहितचैतन्याभिन्नाविषयचैतन्याध्यस्ततया साक्षात्साक्षिसंबंधाच्छुक्तित्वादिवत्तस्य भानापत्तिरित्याशंक्याह (सुखादिवदिति) यदीयदोषक्षुभिताविद्या यदाकारेण परिणमते तस्य परिणामस्य तद्दोषवत्पुरुषग्राह्यत्वनियमान्नातिप्रसंगः । यथा सिद्धांते शुद्धचैतन्याध्यस्तोपि स्वप्नरथादिस्तज्जनकनिद्रादोषवतैव गृह्यते नान्येन । यथावादेवदत्तयज्ञदत्तयोः पुरोवर्तिसंप्रयोगजनितान्तःकरणबहिर्निर्गमनयोरुभयान्तःकरणोपहितसाक्षिचैतन्यैक्येपि नान्यान्तःकरणप्रत्ययविषयत्वेनान्यान्तःकरणगतसुखाद्यन्यस्य विषयः । यथाच्च परमते द्वित्वादेस्संयुक्तसमवायसंबंधस्य सर्वसाधारण्येपि यदपेक्षाबुद्धिजन्यंद्वित्वादि तत्तेनैव गृह्यते, नान्येन, तद्वदितिभावः ॥

म० प्र०–(स्वाधिष्ठानेति) रजताधिष्ठानेत्यर्थः । साक्ष्यभिन्नत्वे–साक्षिसत्तातिरिक्तसत्ताकत्वाभावरूपाभेदवत्त्वे (पुरोवर्त्तिनीति) भ्रमाधिष्ठानपुरोवर्त्तिशुक्त्यादौ (तदीयेति) अदुष्टकरणपुरुषीयेत्यर्थः । तस्य–शुक्तिरजतादेः (यदीयेति) यत्पुरुषीयेत्यर्थः (तज्जनकेति) स्वप्नरथादिजनकेत्यर्थः (नान्यान्तःकरणेति) देवदत्तादीनामन्तःकरणस्य परस्परं भेदाद्देवदत्तान्तःकरणगतसुखादीनां देवदत्तान्तःकरणगतप्रत्ययविषयत्वेन यज्ञदत्तादीनामपरोक्षज्ञानविषयोनेत्यर्थः (परमतेंइति) नैयायिकमते द्वित्वादिंनिष्ठेन्द्रियप्रतियोगिकसंयुक्तसमवायस्य बहुपुरुषेन्द्रियवृत्तित्वेपीत्यर्थः (यदपेक्षाबुद्धिजन्यमिति) यत्पुरुषीयापेक्षाबुद्धिजन्यमित्यर्थः । द्वित्वादिपरार्द्धान्ता अपेक्षाबुद्धिजा मता इत्युक्तेर्द्वित्वादीनामपेक्षाबुद्धिजन्यत्वमेव नत्वेकत्ववदपेक्षाबुद्धेः प्रागपिसत्त्वमिति भावः ॥

मू०–उच्यते नहि सुखादीनामन्तः करणावच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वप्रयुक्तमहं सुखीतिज्ञानं सुखादीनां घटादिवच्छुद्धचैतन्ये एवाध्यासात् ॥

शि० म०–किमहमाकारप्रत्ययविषयत्वे केवलसाक्षिवेद्यत्वं प्रयोजकमुत साक्ष्यध्यस्तत्वमाहोस्वित्तन्निष्ठाविद्याकार्य्यत्वम् । नाद्यः, शरीरे-

Funding by IKS-MoE

न्द्रियादौव्यभिचारादित्याशयेन आह (उच्यते इति) द्वितीयतृतीयौ दूषयति (नहीति) नन्विदं प्रत्ययविषयत्वे प्रमाणव्यापारसापेक्षसाक्षिवेद्यत्वं प्रयोजकम् ॥

म० प्र०-(विषयत्वेइति) विषयत्वनिरूपितेत्यर्थः । प्रयोजकम्–समव्यापकं केवलसाक्षिवेद्यत्वसत्त्वेहमाकारप्रत्ययविषयत्वसत्त्वे तदभावेऽहमाकारप्रत्ययाविषयत्वाभाव इत्यन्वयव्यतिरेकज्ञाप्यकारणतावद्वा, व्यभिचारात्–शरीरेन्द्रियादौकेवलसाक्षिवेद्यत्वरूपकारणाभावेप्यऽहमाकारप्रत्ययविषयत्वाभावाभावेन व्यतिरेकव्यभिचारात् । प्रकृते कारणं केवलसाक्षिवेद्यत्वं तदभाववच्छरीरादि, तत्र चक्षुरादिप्रमाणव्यापारेणैवसाक्षिविषयत्वसत्त्वादतो न केवलसाक्षिवेद्यत्वकार्यमहमाकारप्रत्ययविषयत्वम् । योहि यत्कार्यं न सकारणाभावाधिकरणवृत्तिः यथा धूमादिरिति भावः । नहि यत्र यदध्यासस्तस्य तन्निष्ठाविद्याप्रयुक्तं तन्निष्ठतयैव भानमिति नियमःसंभवति सुखादेर्घटादिवच्छुद्धचैतन्याध्यस्तत्वेप्यन्तःकरणविशिष्टचैतन्येऽहं सुखीति प्रत्ययवदन्तः करणोपहितशुद्धचैतन्येहंसुखीत्यादिसुखादिनिष्ठसाक्षिवृत्तित्वावगाहिप्रत्ययादर्शनादित्याशेयनाह (द्वितीयतृतीयाविति) यद्वा सुखादिषु साक्ष्यध्यस्तत्वस्य जीवसाक्ष्याश्रिताविद्याकार्यत्वस्य च सत्त्वेप्यन्तःकरणविशिष्टविषयकाहं सुखीत्यादिप्रत्यवदन्तःकरणोपहितजीवसाक्षिविषयकाहं सुखीत्यादिप्रत्ययाभावान्न द्वितीयतृतीये अहमाकारप्रत्ययविषयत्वस्य समव्यापके इत्यभिप्रेत्याह (द्वितीयतृतीयाविति) परममूले अन्तःकरणावच्छिन्नेति), अन्तःकरणविशिष्टेत्यर्थः । परममूलें (प्रयुक्तमिति). प्रयोज्यमित्यर्थः । परममूले (ज्ञानंनहीति) येनान्तःकरणविशिष्टचैतन्यगतसुखादिरहं सुखीत्यादिप्रत्ययविषयत्वंस्यादितिशेषः । परममूले (शुद्धचैतन्यंएवाध्यासादिति । तथाच यत्र यदध्यासस्तस्य तन्निष्ठाविद्याप्रयुक्तं तन्निष्ठतयैव भानमिति नियमस्वीकारेऽहं सुखीति जीवसाक्षिगतयैव सुखादीनां भानं स्यात्सुखादीनां जीवसाक्षिण्यध्यासान्नान्तःकरणविशिष्टचैतन्यगततया सुखादीनां भानं स्यात् सुखादीनामन्तःकरणविशिष्टचैतन्येऽध्यासाभावात्तच्चानिष्टमितिभावः । अत्र घटादिप्रत्यक्षकाले घटादेर्जीवसाक्ष्यध्यस्तत्वेप्यहमाकारप्रत्ययविषयत्वाभावात् घटादिकार्यस्येश्वरसाक्ष्यध्यस्तत्वेश्वरसाक्षिनिष्ठाविद्याकार्यत्वयोः सत्त्वेप्यहमाकारप्रत्ययविषयत्वाभावाच्च । न साक्ष्यध्यस्तत्वादिकमहमाकारप्रत्ययविषयत्वप्रयोजकमित्यपि बोध्यमिति वेदांत्येकदेशी अहमाकारप्रत्ययविषयत्वादीनां नानाप्रयोजकाभिप्रायेण शंकते (नन्विति) प्रयोजकम्–व्याप्यं व्यापकंच नचेयमविद्यायं जीव इदं रजतमित्यविद्याजीवशुक्तिरजतादीनामिदमाकारप्रत्ययविषयत्वं नस्यात्तेषां प्रमाणव्यापारसापेक्षसाक्षिवेद्यत्वाभावादितिवाच्यम् । स्वातिरिक्तजीवे तन्निष्ठाविद्यायांचेयमविद्ये-

त्यादीदमाकारप्रत्ययाविषयत्वाभावात् । स्वातिरिक्तजीवादाविदमाकारप्रत्ययविषत्वे तु प्रमाणव्यापारसापेक्ष्यसाक्षिवेद्यत्वस्यापि संभवात् । स्वापरोक्षस्वकीयाविद्यायां त्वहमज्ञ इत्यादि प्रत्ययविषयत्वस्यैव सत्त्वेनोक्तेदमाकारप्रययविषयत्वाभावाच्छुक्तिरजतादीनामिदमाकारप्रत्ययाहितसंस्कारजन्यत्वस्यान्यस्यैवेदमाकारप्रत्ययविषयत्वप्रयोजकत्वादिति ॥

मू०–किंतु यस्य यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवानुगतं नियामकं तथाचेदमाकारानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वात् घटादेरिदमाकारानुभवविषयत्वमहमाकारानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वादन्तःकरणादेरहमनुभवविषयत्वं शरीरेन्द्रियादेरुभयविधानुभवाहितसंस्कारसहकृताविद्याकार्य्यत्वादुभयविधानुभवविषयत्वं तथाचोभयविधानुभवः इदंशरीरमहंदेहः अहं मनुष्यः अहं ब्राह्मणः इदं चक्षुरहंकाणः इदं श्रोत्रमहं बधिर इति ॥

शि० म०–अहं प्रत्ययविषयत्वेच केवलसाक्षिवेद्यत्वम् इदं चान्तःकरणधर्माणामेव शरीरेन्द्रियादीनां त्वन्यदेवतत्प्रयोजकमिति शंकते (किन्त्विति) सर्वत्रानुगते नियामके संभवति नाननुगतं न्याय्यमित्याह (यस्येति) यस्य यदाकारानुभवाहितसंस्कारजन्यत्वं तस्य तदाकारानुभवविषयत्वमित्येवं नियामकं, नतु तत्सहकृताविद्याकार्य्यत्वं गौरवात् । अत एव वक्ष्यति, सत्यस्थलीयेदमाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयतेति । एतच्चाविद्याकार्य्याणामेवाहमादिप्रत्ययविषयत्वप्रयोजकम् जीवाविद्यादीनामजन्यत्वात । यद्वा-यज्ज्ञानस्य यदाकारानुभवाहितसंस्कारजन्यत्वं तस्य तदाकारेण तदवभासकत्वम् । एवं चाविद्यादिज्ञानस्याहमज्ञ इत्याद्यहमाकारानुभवसंस्कारजन्यत्वादहमाकारतेति भावः । अनुगतत्वमेव नियामकस्योदाहरणप्रदर्शनेन दर्शयति (तथाचेति) अविद्याकार्य्यस्य घटादेरिदमाकारानुभवजन्यसंस्कारजन्यत्वादिदमाकारानुभवविषयत्वं तदनुभवस्य इदमाकारानुभवसंस्कारजन्यत्वादिदमाकारत्वमिति वार्थः । एवमुत्तरत्रापि व्याख्येयम् ॥

म०प्र०—नन्वेवं शुक्तिरजतादीनामहं रजतमित्यादिप्रत्ययविषयत्वंस्याच्छुक्तिरजतादिषु केवलसाक्षिवेद्यत्वसत्त्वाच्छरीरादीनां चाहं मनुष्य इत्याद्यहंप्रत्ययविषयत्वं न स्याच्छरीरादिषु केवलसाक्षिवेद्यत्वाभावादित्याशंक्याह (: इदंचेति) केवलसाक्षिवेद्यत्वं चेत्यर्थः (अन्तःकरणधर्माणामेवेति) अन्तःकरणस्य तद्धर्माणामविद्यायाश्चैवाहमाकारप्रत्ययविषयत्वप्रयोजकमित्यर्थः । एवकारव्यावर्त्यमाह (शरीरेति) अहमाकारप्रत्ययविषयत्वे इतिशेषः । अन्यदेव—अहमाकारानुभवाहितसंस्कारजन्यत्वमेव, यज्ज्ञानस्य—यस्य घटादेर्ज्ञानस्य । यदाकारानुभवाहितसंस्कारजन्यत्वम्—इदमाद्याकारानुभवजन्यसंस्कारजन्यत्वं । तस्य—घटादिज्ञानस्य । तदाकारेणतदवभासकत्वं—अयंघटोस्ति अयं घटः प्रकाशते इत्याद्याकारेण घटादिविषयकव्यवहारजनकत्वं । यद्वा, यज्ज्ञानस्य—यादृशज्ञानस्य, तस्य—तादृशज्ञानस्य शेषं पूर्ववदित्यर्थः । नच चक्षुरादिजन्यघटादिज्ञानस्य संस्कारजन्यत्वात्स्मृतित्वापत्तिरिति वाच्यम्, स्मृतित्वप्रयोजकानां स्मृतिप्रागभावजन्यत्वादीनां चक्षुरादिज्ञानेष्वभावादिति । परममूले (तथाचेति) निरुक्तानुगतप्रतीतिनिष्ठेदमाकारत्वादिनियामके सतीत्यर्थः । परममूले (अहमनुभवविषयत्वमिति) अहमस्म्यहंसुख्यहंदुःखीत्याद्यहमाकारानुभवविषयत्वमित्यर्थः । उत्तरत्रापि—अहमाकारानुभवेत्यादिवाक्येपि । अहमाकारानुभवेत्यादिवाक्यमपीति वा ॥

मू०—प्रकृतेच प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमवच्छिन्नचैतन्यनिष्ठाविद्याकार्य्यत्वेऽपीदं रजतमिति सत्यस्थलीयेदमाकारानुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयता नत्वहं रजतमित्यहंकारानुभवविषयतेत्यनुसंधेयम् । नन्वेवमपि मिथ्यारजतस्य साक्षात्साक्षिसंबंधतया भानसंभवे रजतगोचरज्ञानाभासरूपाविद्यावृत्तेरभ्युपगमः किमर्थइतिचेदुच्यते ॥

शि० म०—ननु प्रातिभासिकरजतज्ञानस्य न स्वसमानविषयेदमाकारानुभवसंस्कारजन्यत्वं तस्याननुभूतविषयत्वात् । नच घटाद्यनुभवस्य सजातीयघटादेरिदमाकारानुभवसंस्कारजन्यत्ववत् रजतानुभवस्यापि तज्जातीयसत्यस्थलीयेदमाकाररजतानुभवसंस्कारजन्यत्वाद्युक्तमिदमाकारत्वमिति वाच्यम्, तथासति घटानुभववद्रजतानुभवस्यापि प्रमात्वापत्तेः । नचेष्टापत्तिः तद्विषयरजतस्य सविकल्पकज्ञाननिवर्त्याविद्याकार्य्यत्वानुपपत्तेरित्याशंक्य नहि प्रमाहितसंस्कारजन्यत्वेन प्रामाण्यं स्मृतेरपि तत्प्रसंगात् । किंत्वनधिगताबाधितार्थविषय-

त्वेनेति प्रातिभासिकस्य च प्रत्यक्षेण बाधितत्वात्तज्ज्ञानस्येदमाकारप्रमासंस्कारजन्यतयेदमाकारत्वेपि न प्रामाण्यमित्यभिप्रेत्याह (प्रकृतेचेति) ननु रजतस्येदमाकारानुभवविषयत्वेपि तद्गोचराविद्यावृत्त्यभ्युपगमः किमर्थः नतावत्साक्षिसंबंधाय रजतस्य साक्षात्साक्षिसंबंधतयैवोपपत्तेः । नाप्यावरणभंगाय रजतस्य सर्वदानावृतसाक्षिणैव संबंधात् । अन्यथा घटादिवद्रजतमपि कदाचिदपि न ज्ञायेत, नच व्यवहाराय तस्यानावृतार्थप्रकाशेनैवोपपत्तेरिति सिद्धांत्येकदेशी चोदयति (नन्वेवमपीति) ॥

म० प्र०-(समानविषयेति) प्रातिभासिकरजतज्ञानविषयसमानविषयकेंत्यर्थः । तस्य-प्रातिभासिकरजतज्ञानस्य (रजतेति) प्रातिभासिकरजतेत्यर्थः । तथासति-सत्यरजतीयप्रमाहितसंस्कारजन्वत्वेसति (सविकल्पकेति) ब्रह्मात्मैक्यावगाहिभिन्नेयं शुक्तिरितिसविकल्पकेत्यर्थः (अनुपपत्तेरिति) यत्र प्रमाविषयत्वं तत्र सविकल्पकनिवर्त्त्याविद्याकार्य्यत्वानुपपत्तिरितिव्याप्तेरिति भावः । तत्प्रसंगात्-प्रामाण्यप्रसंगात्, नचेष्टापत्तिःस्मृत्यारोपयोःप्रमाणाजन्यत्वेनाप्रमात्वादिति । प्रातिभासिकस्य-प्रातिभासिकरजतादेः । परममूले (प्रकृतेइति) ननु साक्षिण्यध्यस्तत्वे इत्यादिपूर्वग्रंथे इत्यर्थः (तद्गोचरेति) शुक्तिरजतादिगोचरेत्यर्थः । साक्षिसंबंधाय-साक्षिण्यध्यासाय (आवरणभंगायेति) वृत्त्यभ्युपगम इतिशेषः । अन्यथा-शुक्तिरजतादेः सर्वदानावृत्तसाक्षिणा सह संबंधानंगीकारे (कदाचिदपिनज्ञायेतेति) केवलसाक्षिणाकदाचिदपिनज्ञायेत किंत्विन्द्रियद्वारैवघटादिवच्छुक्तिरजतादिज्ञानं स्यादित्यर्थः । यद्वापि शब्दो भिन्नस्थानकस्तथाच कदाचिन्नज्ञायेतापीति संबंधसत्त्वेन कदाचिदज्ञातसत्ताकमपिं स्यादित्यर्थः । व्यवहाराय-इदं रजतमित्यादिशब्दप्रयोगादिरूपव्यवहाराय । तस्य-उक्तव्यवहारस्य, अनावृतार्थप्रकाशेनैव-अनावृतो यः शुक्तिरजताद्यर्थस्य प्रकाशः साक्षिरूपं ज्ञानं तेनैव । परममूले (एवमपीति) शुक्तिरजतादेरिदंमाकारप्रत्ययविषयत्वेपीत्यर्थः ॥

मू०-स्वगोचरवृत्त्युपहितचैतन्याभिन्नसत्ताकत्वाभावस्य विषयापरोक्षरूपतया रजतस्यापरोक्षत्वसिद्ध्यै तदभ्युपगमात् ॥

शि० म०-(अपरोक्षत्वसिद्ध्य इति) नन्वनावृतस्वावच्छिन्नसंवित्तादात्म्यमेव विषयस्यापरोक्षत्वं, नच घटाकारवृत्तिदशायां परिमाणाकारवृत्तिप्रसंगः तदाघटावच्छिन्नचैतन्यस्यानावृतत्वेपि स्वावच्छिन्नस्यावृतत्वात् । तथाच रजतावच्छिन्नचैतन्यस्यानावृतत्वात्तत्तादात्म्ये-

Funding by IKS-MoE

नैव तस्य प्रत्यक्षत्वोपपत्तेः, न तदर्थमपि तद्गोचरावृत्तिरभ्युपगंतव्येति चेत्, न तावत्स्वोपहितानावृतचैतन्याध्यस्तत्वं प्रत्यक्षत्वं परिमाणविशिष्टचैतन्यस्यावृत्तित्वेपि स्वोपहितघटावच्छिन्नचैतन्यस्यानावृतत्वात् । नापि स्वविशिष्टानावृतचैतन्याध्यस्तत्वं घटादीनामपि शुद्धचैतन्याध्यासेनात्माश्रयापत्त्या च स्वविशिष्टाधिष्ठानत्वायोगात्, तस्मात्साधूक्तं रजतस्यापरोक्षत्वसिद्धये तद्वृत्त्यभ्युपगम इति । इदंचोपलक्षणं संस्कारसिद्धये च वृत्तिरुपेया । अविनाशिनः साक्षिलक्षणस्यानुभवस्य संस्काराभावात् । नचेदमाकारवृत्तिविशिष्टसाक्षिणो विनाशसंभवात्संस्कारोपपत्तिः ॥

म० प्र०—परममूले (चैतन्यभिन्नसत्ताकत्वाभावस्येति) चैतन्याभिन्नसत्ताकत्वस्येत्यर्थः । परममूले (तदभ्युपगमादिति) शुक्तिरजतादिगोचरवृत्तिस्वीकारादित्यर्थः (स्वावच्छिन्नेति) विषयावच्छिन्नेत्यर्थः । परिमाणाकारवृत्तिप्रसंगः—परिमाणादिष्वपरोक्षत्वप्रसंगः । नचेति प्रतिज्ञायांहेतुमाह (तदेति) घटाकारवृत्तिदशायामित्यर्थः। स्वावच्छिन्नस्य—परिमाणाद्यवच्छिन्नचैतन्यस्य । तथाच—विषयस्यानावृतस्वावच्छिन्नचैतन्यतादात्म्यस्यैवापरोक्षत्वे, तत्तादात्म्येनैवतस्यप्रत्यक्षत्वोपपत्तेः—शुक्तिरजतादिनिष्ठस्वावच्छिन्नजीवसाक्षिचैतन्यतादात्म्याभिन्नप्रत्यक्षत्वोपपत्तेः । तदर्थमपि—शुक्तिरजतादिनिष्ठप्रत्यक्षत्वार्थमपि । तद्गोचरा—शुक्तिरजतादिविषयिणी। किंविषयस्यस्वोपहितानावृत्तचैतन्याध्यस्तत्वं प्रत्यक्षत्वं किंवाविषयस्य स्वविशिष्टानावृतचैतन्याध्यस्तत्वं प्रत्यक्षत्वमित्यभिप्रेत्य नाद्य इत्याह (नतावदिति। स्वोपहितेति) विषयोपहितेत्यर्थः। स्वोपहितघटावच्छिन्नचैतन्यस्य—परिमाणाद्युपहितचैतन्याभिन्नघटाद्यवच्छिन्नचैतन्यस्य (अनावृतत्वादिति) घटाकारवृत्तिदशायां परिमाणादेः प्रत्यक्षत्वापत्तेरितिशेषः ।यद्यपिवृत्तिं विना यथावच्छिन्नचैतन्यमावृतं तथोपहितचैतन्यमप्यावृतं तथापि परिमाणस्वरूपोपाधेर्घटाभिन्नोपाधेश्चैकशुद्धचैतन्यस्वरूपदेशस्थत्वेन तच्चैतन्ययोरभेदेन घटाकारवृत्तिदशायांघटावच्छिन्नचैतन्यस्यानावृतत्वात्परिमाणाद्याकारवृत्त्यभावदशायामपि परिमाणाद्युपहितचैतन्यस्यानावृतत्वमिति भावः । नापिद्वितीय इत्याह (नापीति स्वविशिष्टेति) विषयाध्यासाश्रयेत्यर्थः । आत्माश्रयापत्त्या—घटादिविषयाध्यासे घटादिविषयापेक्षात्मकात्माश्रयापत्त्या । स्वविशिष्टेति—घटादिविशिष्टचैतन्यस्यघटाद्यधिष्ठानत्वासंभवादित्यर्थः । इदंच—रजतस्यापरोक्षत्वसिद्धये वृत्त्यभ्युपगमकथनं च । संस्कारोपपत्तिः—प्रातिभासिकपदार्थविषयकसंस्कारोपपत्तिः ॥

मू०—नन्विदं वृत्तेः रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्वे गुरुमतवद्विशिष्टज्ञानानभ्युपगमे कुतोभ्रमज्ञानसिद्धिरितिचेन्न ॥

Funding by IKS-MoE

शि० म०-तथासति दुःखादिविशिष्टसाक्षिणो विनाशादेव तत्रापि संस्कारोपपत्तौ तदाकारवृत्तिवैयर्थ्यात्, अन्याकारवृत्तिविशिष्टसाक्षिविनाशेनाप्यन्यसंस्कारोपगमे घटाद्याकारवृत्तिविशिष्टसाक्षिनाशेन परिमाणसंस्कारोपपत्तेः । ह्यस्तनाहंकारस्यापि विशिष्टसाक्षिनाशेनैव स्मरणोपपत्तावहं वृत्त्याभ्युपगमवैयर्थ्यापत्तेश्चेत्यास्तां विस्तरः । नन्विदं वृत्तिमात्राभ्युपगमे तदवच्छिन्नसाक्षिणः पुरोवर्त्यभिन्नतया रजतभासकस्यैकत्वेपि वृत्तिद्वयवादिमते तत्तद्वृत्तिविशिष्टसाक्षिणस्तत्तद्विषयमात्रग्राहकस्य भिन्नत्वात्कुतो विसंवादिप्रवृत्तिजनकविशिष्टज्ञानसिद्धिः । तदभावेपि प्रवृत्त्यभ्युपगतौ प्राभाकरपरिणतोयंवेदांतीति स एव पुनः परिचोदयति (नन्विति) ॥

म० प्र०-तथासति-अन्याकारवृत्तिविशिष्टसाक्षिणो नाशेनान्यस्मारकसंस्काराभ्युपगमे सति । तत्रापि-दुःखादावपि (तदाकारेति) दुःखाद्याकारेत्यर्थः (परिमाणसंस्कारोपपत्तेरिति) परिमाणादिविषयकवृत्त्यभ्युपगमवैयर्थ्यापत्तेरितिशेषः । ह्यस्तनाहंकारस्य-अतीतदिनवृत्त्यहंकारस्य (विशिष्टेति) पूर्वकालीनाहंकारविशिष्टेत्यर्थः (इदंवृत्तिमात्राभ्युपगमेइति) इदमिवृत्तिरिदंवृत्तिः पुरोवर्त्तिपदार्थे एववृत्तिस्वीकारे नतुरजतादावित्यर्थः । पुरोवर्त्तिपदार्थे एववृत्त्यभ्युपगमे पुरोवर्त्तिपदार्थविषयकवृत्त्युपहितचैतन्यात्मकज्ञानस्यैकतया भ्रमज्ञानसिद्धिर्वृत्तिद्वयाभ्युपगमे तु तादृशवृत्त्युपहितचैतन्यात्मकज्ञानस्यानेकत्वेन न भ्रमज्ञानसिद्धिरितिभावः (तदवच्छिन्नेति) पुरोवर्त्तिपदार्थविषयकवृत्त्यवच्छिन्नेत्यर्थः । पुरोवर्त्यभिन्नतया-पुरोवर्त्तिपदार्थावच्छिन्नचैतन्याभिन्नतया । एकत्वेपि-एकत्वज्ञाप्यविशिष्टज्ञानसिद्धावपि वृत्तिद्वयवादिमते-पुरोवर्त्तिपदार्थरजतादिपदार्थविषयकवृत्तिद्वयवादिवेदांतिमते, तदभावेपि-विसंवादिप्रवृत्तिजनकविशिष्टज्ञानाभावेपि, प्राभाकरपरिणतः-प्राभाकररूपेणपरिणतोऽवतीर्णः प्राभाकारएवेतियावत्, सएव-सिद्धांत्येकदेश्येव । अयंभावः तवमते एकं संधातुं प्रवृत्तस्यापरं हीयते इति न्यायापातः । रजतादेरपरोक्षत्वसिद्धये रजतादिष्वविद्यावृत्त्यभ्युपगमेन प्राभाकरमतवद्विशिष्टैकज्ञानानभ्युपगमप्रसक्त्या रजतज्ञानस्य भ्रमत्वहानात् । यथा प्रभाकरमते इदंरजतमिति ज्ञानद्वयमंगीकृतं तत्रेदमिति पुरोवर्तिपदार्थविषयकमनुभवात्मकं ज्ञानं रजतमित्यादिकं त्वसन्निकृष्टरजतादिविषयकस्मरणात्मकमिति वस्तुद्वयतादात्म्यावगाहिविशिष्टैकभ्रांत्यात्मकज्ञानं किमपिनास्तीति सर्वमपि ज्ञानं यथार्थमेवेति भ्रमज्ञानासिद्धिस्तद्वद्भवन्मतेपि वृत्तिद्वयतद्विषयभेदाभ्युपगमेन वस्तुद्वयतादात्म्यावगाह्येकज्ञानानभ्युपगमाद्भ्रमज्ञानं न सिध्यतीति ॥

Funding by IKS-MoE

सू०-वृत्तिद्वयप्रतिबिंबितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात् ॥

शि० म०-यत्किंचित्साम्येन गुरुसिद्धान्तापादने सर्वसिद्धान्तसंकरापत्तेः, इदंरजतवृत्तिद्वयोपहितस्य तदभिव्यक्तस्य इदंरजततादात्म्याभिव्यंजकस्य साक्षिज्ञानस्यैकत्वाभ्युपगमेन सर्वसाम्याभ्युपगमाभावात् । अत एव सुरभिचंदनमित्यादौ परोक्षापरोक्षवृत्तिभेदेपि तदुभयप्रतिबिम्बितस्य गुणगुणितादात्म्यावगाहिसाक्षिज्ञानस्यैकत्वात्सामानाधिकरण्यव्यपदेश इत्याशयवानाह (वृत्तिद्वयेत्यादिना । सत्येति) अनेन सत्यमिथ्यावस्तुतादात्म्यावगाहित्वलक्षणं सत्यानृतमिथुनीकरणत्वंसिद्धांतिसंमतमध्यासलक्षणमुक्तमित्यवधेयम । नन्वयुक्तं घटादिज्ञानसाधारणमध्यासलक्षणं तत्र स्वाधिकरणभूतलाद्यभेदस्याप्रतीतेः, तद्वदेवघटादेः सत्यत्वाच्च । नच सन् घटः इतिसद्रूपब्रह्मतादात्म्येन मिथ्याभूतघटस्यावभासनात्, अध्यासलक्षणे घटादिज्ञानमपि लक्ष्यमिति वाच्यम्, शुक्तिरूप्यघटसाधारणमिथ्यात्वस्यैवानिरुक्तेस्तत्र प्रमाणाभावाच्चेतिचेत् ॥

म० प्र०-यत्किंचिन्मतसाम्येन प्राभाकरसिद्धांतोत्रापाद्यते सर्वगुरुमतसाम्येन वा नाद्य इत्याह (यत्किंचित्साम्येनेति) यत्किंचिन्मततुल्यत्वेनेत्यर्थः । नद्वितीय इत्याह (सर्वसाम्याभ्युपगमाभावादिति) रजतादिविषयकस्मरणात्मकवृत्त्यभ्युपगमादिसर्वसाम्यानंगीकारादित्यर्थः । कुतः सर्वसाम्याभ्युपगमाभाव इत्यतो हेतुमाह (इदंरजतेत्यादिना । उपहितस्येति) अस्यैवविवरणं तदभिव्यक्तस्येति) वृत्तिद्वयाभिव्यक्तस्येतितदर्थः । नन्विदं रजतमिति ज्ञानस्य वृत्तिद्वयात्मकत्वेनेदं रजतमिति सामानाधिकरण्यव्यपदेशो न स्यादित्याशंक्याह (अतएवेति) इदं रजतमिति वृत्तिद्वयप्रतिबिंबितसाक्षिज्ञानस्यैकत्वाभ्युपगमादेवेत्यर्थः। अस्य सामानाधिकरण्यव्यपदेश इत्यनेनान्वयः । ननु वृत्तिद्वयप्रतिबिंबितसाक्षिण एकत्वाभ्युपगम एवाप्रसिद्ध इत्याह (सुरभिचंदनमित्यादाविति । तदुभयेति) परोक्षापरोक्षवृत्तिद्वयेत्यर्थः । सामानाधिकरण्यव्यपदेशः-इदं रजतमित्याद्येकार्थबोधकसमानविभक्तिकभिन्नप्रवृत्तिनिमित्तकशब्दकथनम् । अनेन-वृत्तिद्वयप्रतिबिंबितेत्यादिवाक्येन, अध्यासलक्षणम्-भ्रमलक्षणम् । नच घटादिज्ञानस्यापि सत्यमिथ्यावस्तुतादात्म्यावगाहित्वस्य सत्त्वात्पूर्वोक्तप्रमात्वानुपपत्तिरिति वाच्यम् । पूर्वं ह्यबाधितपदार्थस्य संकोचं कृत्वा घटादिज्ञानस्य प्रमात्वाभिधानादिदानीं तु त्रिकालाबाध्यमबाधितपदेन गृह्यते इति न पूर्वोत्तरग्रंथयोर्विरोध इति। साधारणम्-वृत्तिमत् । घटादिज्ञानेऽव्याप्तिमभिप्रेत्य

घटादिज्ञानसाधारणलक्षणस्यायुक्तत्वे हेतुमाह (तत्रेति) घटादिज्ञाने इत्यर्थः । अप्रतीतेः–विषयत्वाभावात्, तद्वदेव–भूतलादिवदेव, (अध्यासलक्षणेइति) अध्यासलक्षणनिरूपितेइत्यर्थः । तत्र–शुक्तिरजतादीनां मिथ्यात्वे ॥

शि० म०–न तावदनिर्वचनं स्वाश्रयतयाभिमतयावन्निष्ठात्यंताभावप्रतियोगित्वं मिथ्यात्वमित्यनुमानपरिच्छेदे ग्रंथकृतैव वक्ष्यमाणत्वात् । प्रमाणं च घटादिमिथ्यात्वे तत्रैव वक्ष्यति शुक्तिरजतमिथ्यात्वे तु नेदं रजतमिति बाधप्रत्यक्षं मानम् । नच देशान्तरीयस्यैव पुरोवर्तिन्यसत्त्वात्तदेव तन्निष्ठत्रैकालिकाभावप्रतियोगितया बाधकज्ञानेन विषयीक्रियते इति वाच्यम्, तस्यासन्निकृष्टस्य पुरोवर्तिन्यप्रसक्तत्वात् प्रसक्तस्यैव प्रतिषेध्यत्वात् । अनुमानं च 'अव्याप्यवृत्त्यत्यंताभावाप्रतियोगि शुक्ति रजतं स्वसमानाधिकरणात्यंताभावप्रतियोगि दृश्यत्वात्संयोगवत्' प्रातिभासिकरजतस्यापारमार्थिकत्वान्नाश्रयासिद्धिः । नचानुमाने संयोगवदव्याप्यवृत्त्यत्यंताभावप्रतियोगित्वेनार्थान्तरं संयोगतदत्यंताभाववद्रजततदत्यंताभावयोरवच्छेदकभेदेनाप्रतीतेः । नचाव्याप्यवृत्त्यत्यंताभावप्रतियोगित्वमुपाधिः, शशीयत्वावच्छिन्नाभावप्रतियोगिनि शृंगे साध्याव्यापकत्वात् ॥

म० प्र०–(स्वाश्रयतयेति) रजताद्याश्रयतयेत्यर्थः । तत्रैव–अनुमानपरिच्छेदेएव । बाधप्रत्यक्षम्–त्रैकालिकाभावविषयकनिश्चयात्मकप्रत्यक्षम् । देशान्तरीयस्यैव–देशान्तरवृत्तिरजतादेरेव । पुरोवर्तिनि–शुक्त्यादौ । तदेव–देशान्तरवृत्तिरजतादिवस्त्वेव (तन्निष्ठेति) पुरोवर्तिशुक्त्यादिनिष्ठेत्यर्थः । बाधकज्ञानेन–नेदंरजतमित्यादिबाधकज्ञानेन, तस्य–देशान्तरीयरजतादेः । ननुदेशान्तरीयरजतादेःपुरोवर्तिनि शुक्त्यादावप्रसक्तत्वेपि तस्य नेदं रजतमित्यादिबाधकज्ञानविषयत्वंस्यादित्याशंक्याह (प्रसक्तस्यैवेति । अव्याप्येति) शुक्तौ केनचित्स्थापितेरजतादौ केनचिदवयवावच्छेदेन स्वाधिकरणे स्वात्यंताभावप्रतियोगित्वसत्त्वेन पक्षैकदेशेसिद्धसाधनवारणायाव्याप्यवृत्त्यत्यंताभावाप्रतियोगीति शुक्तिरजतविशेषणम् । प्रातिभासिकरजतमितितदर्थः । ननु सर्वेषां मूर्तपदार्थानामव्याप्यवृत्त्यत्यंताभावप्रतियोगित्वेन शुक्तिरजते उक्तविशेषणाभावेनाश्रयासिद्धो हेतुरित्याशंक्याह (प्रातिभासिकरजतस्येति) प्रतीतिकालमात्रवृत्तिरजतस्येत्यर्थः अपारमार्थिकत्वा[illegible]) व्यावहारिकभिन्नत्वादित्यर्थः । व्यावहारिकघटादिमूर्तपदार्थानां केनचिदवयवावच्छेदेन स्वाधिकरणे स्वात्यंताभावसत्त्वेनाव्याप्यवृत्त्यत्यंताभावप्रतियोगित्वेपि प्रातिभासिकशुक्तिरजतादीनां सर्वत्राधिकरणे व्यावहारिकत्वेन रूपेणात्यंताभावसत्त्वेन व्यावहारिकत्वधर्मेण कुत्राप्यसंबद्धत्वेनाव्याप्यवृत्त्यत्यंताभावप्रतियो-

गिभिन्नत्वादव्याप्यवृत्त्यत्यंताभावाप्रतियोगित्वरूपपक्षतावच्छेदकस्य शुक्तिरजते सत्त्वेन पक्षे पक्षतावच्छेदकाभावरूपाश्रयासिद्धिर्नास्तीति भावः। प्रतियोगित्वेनार्थान्तरम्–प्रतियोगित्वाभिन्नार्थांतरम् ।। शशीयत्वावच्छिन्नाभावप्रतियोगिनि–शशीयत्वविशिष्टशृंगस्य योऽभावस्तत्प्रतियोगिनि शशीयत्वावच्छिन्नप्रतियोगिताकशृंगाभावप्रतियोगिनीतिवा साध्यव्यापकत्वात् । स्वं शृंगं तदधिकरणं महिष्यादिस्तत्र वर्त्तमानो यः शशीयत्वेन शृंगात्यंताभावस्तत्प्रतियोगित्वरूपसाध्यस्य शशीयत्वावच्छिन्नाभावप्रतियोगिनि शृंगे सत्त्वेपि तादृशशृंगे शशीयत्वेन शृंगात्यंताभावस्य केवलान्वयितयाऽव्याप्यवृत्तित्वाभावेनाव्याप्यवृ त्त्यत्यंताभावप्रतियोगित्वोपाधेरभावेन साध्यव्यापकत्वाभावात् ॥

मू०–अत एव साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमादप्रामाण्योक्तिः सांप्रदायिकानाम् । ननु सिद्धांते देशान्तरीयरजतमप्यविद्याकार्य्यमध्यस्तंचेति कथं शुक्तिरूप्यस्य ततो वैलक्षण्यमिति चेत् ॥

शि० म०–नच विपक्षे बाधकाभावः, रजतस्य पारमार्थिकत्वे कालत्रयेप्यत्र रजतं नास्तीति बाधानुपपत्तेर्बाधकत्वात् । ततश्चानुमानं रजतमिथ्यात्वे प्रमाणं तथा रजतज्ञानमिथ्यात्वप्रसिद्ध्यनुपपत्तिरपि । नचान्यथोपपत्तिः सदसत्त्वयोरांतरदेशान्तरीयत्वयोरजतस्य निराकृतत्वेन तज्ज्ञानमिथ्यात्वप्रसिद्धेः प्रकारांतरेणोपपादयितुमशक्यत्वात । तदेवं शुक्तिरूप्यघटादीनां मिथ्यात्वं सिद्धं, ततश्च घटादिज्ञानस्याप्यध्यासत्वात्तत्साधारणं सत्यमिथ्यावस्तुतादात्म्यावगाहिज्ञानत्वमध्यासलक्षणं युक्तमिति वृत्तिद्वयेन प्रत्येकमगृहीतमपि सत्यमिथ्यावस्तुतादात्म्यं वृत्तिद्वयप्रतिबिंबितं साक्षिज्ञानं न गृह्णातीत्यत्र सांप्रदायिकसंमतिमाह (अतएवेति) ननु शुक्तिरजतवत्प्रसिद्धरजतस्य घटादेश्चाविद्याकार्य्यत्वेन मिथ्यात्वस्याध्यस्तत्वस्य चाभ्युपगमे कथं तस्य घटादिवैलक्षण्यं ततश्च लोके शुक्तिरूप्यज्ञानगताप्रामाण्यप्रसिद्धिस्तज्जन्यप्रवृत्तौ विसंवादित्वप्रसिद्धिश्च न स्यादिति शंकते (नन्विति) कथमित्याक्षेपः ॥

म० प्र०–विपक्षे–पक्षवृत्तिसाध्याभावे । अत्र–शुक्तौ, रजतं–व्यावहारिकरजतम् । अन्यथोपपत्तिः–रजतज्ञाननिष्ठमिथ्यात्वप्रसिद्धी रजतनिष्ठान्तरत्वादिकं विनाऽनुपपन्ना सत्यांतरं रजतमसद्रजतंवादेशांतरीयरजतं वा कल्पयति, नतु रजतनिष्ठमिथ्यात्वं कल्प-

यतीति प्रकारांतरेणापि रजतविषयकमिथ्यात्वप्रसिद्धेरुपपत्तिः । ततश्च–घटादीनां मिथ्यात्वादेव । अध्यासत्वात्–भ्रमत्वात् । प्रत्येकं–भिन्नभिन्नवृत्तिद्वयेन । परममूले (अतएवेति) वृत्तिद्वयप्रतिबिंबितचैतन्यस्यैकस्य–सत्त्यमिथ्यावस्तुतादात्म्यावगाहित्वाभिन्नभ्रमत्वस्वीकारादेवेत्यर्थः । प्रसिद्धरजतस्य–व्यावहारिकरजतस्य । मिथ्यात्वस्य–स्वाश्रयतयाभिमतयावन्निष्ठात्यंताभावप्रतियोगित्वरूपमिथ्यात्वस्य । अध्यस्तत्वस्यच–प्रमाणाजन्यज्ञानविषयत्वे सति पूर्वदृष्टसजातीयस्वरूपाध्यस्तत्वस्य च पारमार्थिकत्वावच्छिन्नस्वात्यंताभावाधिकरणे प्रतीयमानत्वरूपाध्यस्तत्वस्यचेति वा । तस्य–शुक्तिरजतस्य । ततश्च–शुक्तिरजतेप्रसिद्धरजतादिभ्योवैलक्षण्याभावादेव (तज्जन्येति) शुक्तिरजतज्ञानजन्येत्यर्थः (विसंवादित्वेति) निष्फलत्वेत्यर्थः । परममूले (ततइति) देशांतरीयरजतादित्यर्थः ॥

मू०–न त्वन्मते सत्यत्वाविशेषेपि केषांचित्क्षणिकत्त्वं केषांचित् स्थायित्वमित्यत्र यदेव नियामकं तदेव स्वभावविशेषादिकं ममापि । यद्वा ॥

शि० अ०–नच शुक्तिरूप्यस्य प्रातिभासिकत्वात् घटादिभ्यो वैलक्षण्यमिति युक्तम्, घटादिशुक्तिरूप्ययोरविद्याकार्य्यत्वे तस्यैव प्रातिभासिकत्वमित्यत्र प्रमाणाभावात् प्रयोजकाभावाच्चेति भावः । परिहरति (नेति) किं शुक्तिरूप्यस्य घटादिवदविद्याकार्यत्वेन व्यावहारिकत्वसाधनात्प्रातिभासिकत्वाभावः प्रयोजकाभावाद्वा । नाद्यः, अविद्याकार्य्यत्वस्य हेतोरप्रयोजकत्वात् शुक्तिरूप्यस्य व्यावहारिकत्वे-संसारदशायां बाधानुपपत्तेश्चान्यथा न्यायमतेपि शब्दज्ञानेच्छादीनां घटादिवत्सत्त्यत्वेन स्थायित्वापत्तेः । यदि च घटादीनां प्रत्यभिज्ञानादिबलात् स्थायित्वं शब्दादेश्च तदभावात् क्षणिकत्वमिति मतं तदाशुक्तिरूप्यस्य संसारदशायां बाधितस्य घटादिवदर्थक्रियाकारित्वाभावान्न व्यावहारिकत्वमिति तुल्यम् । नच घटस्येवशुक्तिरूप्यस्यापि संसारदशायामबाधोऽर्थक्रियाकारित्वं च कुतो न स्यादित्यपि युक्ता वाचोयुक्तिः स्वभावविशेषस्यैव तत्र नियामकत्वात्, तस्य चापर्यनुयोज्यत्वादिति न द्वितीयः । आगंतुकदोषजन्यत्वस्य प्रातिभासिकत्वाप्रयोजकत्वादित्याह (यद्वेति) नन्वागंतुकदोषजन्यत्वं न प्रातिभासिकत्वप्रयोजकं काचादिध्वंसे तत्संयोगादौ तत्साक्षात्कारेचातिव्याप्तेः । नच दोषत्वेन तज्जन्यत्वमिह विवक्षितम् ॥

Funding by IKS-MoE

म०प्र०–तस्यैव–शुक्तिरजतस्यैवं, प्रयोजकाभावाच्च–शुक्तिरजताद्यसाधारणधर्मप्रातिभासिकत्वनियामकाभावाच्च, अप्रयोजकत्वात्–अनुकूलतर्काभावेनाविद्याकार्य्यत्वहेतोः शुक्तिरजतादिनिष्ठव्यावहारिकत्वनिश्चयाजनकत्वात् । ननु व्यावहारिकत्वाभावाविद्याकार्य्यत्वाभावयोर्व्याप्तेर्ब्रह्मणि गृहीतत्वेन यदि शुक्तिरजते व्यावहारिकत्वं न स्यात्तर्हि तस्मिन्नविद्याकार्य्यत्वमपि न स्यादित्यनुकूलतर्कसत्त्वात्कथमुक्तहेतोरप्रयोजकत्वमित्याशंक्याह (शुक्तिरूप्यस्येति) अन्यथा–अविद्याकार्य्यत्वरूपानुगतधर्मेण शुक्तिरजतादौ वेदांत्यनिष्ठव्यावहारिकत्वधर्मापादनेतदभावात्–व्यक्त्यैक्यावगाहिन्याः प्रत्यभिज्ञाया अभावात्, इत्यपि–इत्याकारिकापि, तत्र–शुक्तिरजतादौ संसारदशायामबाधितत्वाभावादौ । ननु शुक्तिरजतादावेवायं स्वभावविशेषो न घटादाविति कुत इत्याशंक्याह (तस्येति) तादृशस्वभावस्येत्यर्थः । अपर्यनुयोज्यत्वात्–उक्तप्रश्नानर्हत्वात् । परममूले (स्वभावविशेषादिकमिति) अत्रादिपदेन कालान्तरोपलंभानुपालंभादिकं गृह्यते, तथाच पक्षद्वयेपि दोषतत्परिहारयोः समत्वान्मां प्रत्युक्तानुयोगोनुपपन्न इतिभावः । तत्साक्षात्कारे–काचादिदोषसाक्षात्कारे, अतिव्याप्ते–आगंतुकदोषजन्यत्वरूपहेतोर्व्यभिचारात् (दोषत्वेनतज्जन्यत्वमिति) दोषत्वावच्छिन्नदोषनिष्ठजनकतानिरूपितजन्यत्वमित्यर्थः । काचादिध्वंसे प्रतियोगित्वेनकाचादिसंबंधेपि प्रतियोगित्वेन तत्साक्षात्कारेच विषयत्वेन दोषस्य हेतुत्वेन दोषत्वेन काचादेः स्वध्वंसादौ हेतुत्वाभावान्नव्यभिचारइतिभावः ॥

मू०–घटाद्यध्यासेऽविद्यैव दोषत्वेन हेतुः शुक्तिरूप्याध्यासे तु काचादयोपि दोषाः तथाचागंतुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम् ॥

शि० म०–तथासति आगंतुकविशेषणवैयर्थ्यप्रसंगात् । नच घटादावतिव्याप्तिवारणाय प्रसिद्धदोषस्य काचादेर्घटादावहेतुत्वान्मूलाविद्यायाश्च दोषत्वेन हेतुत्वेमानाभावादित्यत आह (घटाद्यध्यासइति) अयंभावः–दोषत्वेन तज्जन्यत्वमेव विवक्षितम्, नचागंतुकविशेणवैयर्थ्यम्, घटादावतिव्याप्तिवारकत्वात् । नच घटादेर्दोषजन्यत्वे प्रमाणाभावः घटादिर्दोषजन्यः अध्यस्तत्वाच्छुक्तिरूप्यवदित्यनुमानस्य प्रमाणत्वात् । नचाप्रयोजकत्वमन्वयव्यतिरेकाभ्यां लाघवेन दोषत्वेनैव काचादीनामध्यासहेतुत्वस्य शुक्तिरूप्यादौ प्रसिद्धभ्रमस्थले निश्चितत्वात् । नचैवमन्तःकरणादिकमेव घटादौ दोषत्वेन हेतुः कल्प्यतामित्यर्थान्तरमिति वाच्यम्, प्रकृतित्वेन क्लृप्तमायाया एव लाघवेन दोषत्वमात्र-

कल्पनात् । अन्यथान्तःकरणादेर्घटाद्यध्यासं प्रति हेतुत्वं दोषत्वं च कल्पनीयमिति गौरवप्रसंगात् । केचित्तु सविकल्पकज्ञानबाध्यत्वं ब्रह्मज्ञानेतरबाध्यत्वं वा प्रातिभासिकत्वप्रयोजकमिति तन्न स्वाप्नगजादेर्निर्विकल्पकब्रह्मज्ञानबाध्यत्वेन प्रातिभासिकत्वाभावप्रसंगात् । नन्वागंतुकदोषजन्यत्वमपि न प्रातिभसिकत्वप्रयोजकं सुखादेरपि प्रतिभानसमये सत्त्वाभ्युपगमेन तत्राव्याप्तेः ॥

म० प्र०–तथासति–दोषत्वेन दोषस्य हेतुत्वस्वीकारे सति (मानाभावादिति) मूलाविद्याया अविद्यात्वेन घटादौ हेतुत्वादिति शेषः, तज्जन्यत्वं–दोषजन्यत्वम्, स्थले–स्वरूपे, अर्थांतरम्–घटादावविद्यकत्वातिरिक्तार्थसिद्धिः (प्रकृतित्वेनक्लृप्तेति) उपादानत्वेन श्रुतिप्रसिद्धेत्यर्थः । लाघवेन–अन्तःकरणादिनिष्ठदोषत्वघटाद्युपादानत्वोभयकल्पनापेक्षया मायानिष्ठदोषत्वमात्रकल्पने लाघवेन । अन्यथा–घटादिकार्यं प्रत्यन्तःकरणादेर्दोषत्वेनहेतुत्वस्वीकारे (गौरवप्रसंगादिति) नच मायानिष्ठदोषत्वाकाशाद्युपादानत्वोभयकल्पनरूपगौरवं तुल्यमिति वाच्यम् । मायायाः कार्योपादानत्वस्य "मायांतु प्रकृतिं विद्यात्" इत्यादिश्रुतिषु प्रसिद्धत्वादेकदोषत्वस्यैव कल्पनीयत्वादिति (निर्विकल्पकब्रह्मज्ञानबाध्यत्वेनेति) स्वाप्नगजादेर्मायोपादानकत्वपक्षे इतिशेषः । प्रतिभानसमयसत्त्वाभ्युपगमेन–ज्ञानसमयमात्रसत्त्वरूपप्रातिभासिकत्वाभ्युपगमेन, तत्र–लक्ष्यसुखादौ (अव्याप्तेरिति) सुखादेरविद्यारूपदोषजन्यत्वेनागंतुकदोषाजन्यत्वादव्याप्तेरित्यर्थः ॥

शि० म०–नच तूलाविद्याकार्यस्यैव प्रातिभासिकस्यात्र लक्ष्यत्वात् सुखादेश्च मूलाविद्याकार्यत्वान्न तद्व्यावृत्तिर्दोष इति वाच्यम् । तथासति स्वाप्नगजादेरपि वक्ष्यमाणरीत्या मूलाविद्याकार्यतया तत्रातिव्याप्त्यापत्तेरितिचेत् न, लौकिकपरमार्थविलक्षणस्य प्रातिभासिकत्व एवास्य प्रयोजकत्वात्सुखादेश्च प्रातिभासिकस्य लौकिकपरमार्थत्वान्नाव्याप्तिः स्वप्नोपलब्धगजादेश्च लौकिकपरमार्थविलक्षणत्वान्नातिव्याप्तिः, तस्मादागंतुकदोषजन्यत्वं लौकिकपरमार्थविलक्षणस्य प्रातिभासिकत्वे प्रयोजकं प्रमाणं च विमतं रजतं प्रतिभानसमयमात्रवृत्तिसमयान्तरे तत्सत्त्वे प्रमाणाभावात् सुखादिवदागंतुकदोषजन्यत्वाद्वा स्वाप्नगजादिवत् । नच द्वितीयानुमाने निद्रादोषजन्यत्वमुपाधिः, लौकिकपरमार्थविलक्षणत्वावच्छिन्नसाध्यव्यापकत्वाभ्युपगमात् । न सुखादौ साध्याव्यापकत्वमिति वाच्यम् । लाघवेनानुगतस्यागंतुकदोषजन्यत्वस्यैव प्रयोजकत्वादिति ॥

Funding by IKS-MoE

म० प्र०–तद्व्यावृत्तिः–सुखादिषुलक्षणावृत्तित्वम् । तथासति–तूलाविद्याकार्य्यप्रातिभासिकस्यैव लक्ष्यत्वस्वीकारे । तत्र–अलक्ष्यस्वाप्नगजादौ, अतिव्याप्त्यापत्तेः–आगंतुकनिद्रारूपदोषजन्यत्वस्यापि सत्त्वेनातिव्याप्त्यापत्तेः (लौकिकपरमार्थेति) लौकिकप्रसिद्धव्यावहारिकेत्यर्थः । अस्य–आगंतुकदोषजन्यत्वस्य, ननु सुखादावव्याप्तिरित्याशंक्याह (सुखादेश्चेति) प्रातिभासिकस्य–ज्ञातसत्ताकस्य, तस्मात्–अव्याप्त्यादिदोषाभावात् । विमतं–लौकिकपरमार्थविलक्षणं प्रातिभासिकमितियावत्, नन्वस्मिन्ननुमाने व्यावहारिकावृत्तिप्रातिभासिकत्वं साध्यते, तथाच सुखादीनां व्यावहारिकत्वस्य तव संमतत्वात्कथं सुखादीनां दृष्टान्ततेत्यत आह (आगंतुकदोषजन्यत्वाद्वेति) ननु सुखादौ प्रतिभानसमयमात्रवृत्तित्वरूपसाध्यसत्त्वेपि निद्रादोषजन्यत्वोपाधेरभावेनोपाधेः साध्याव्यापकत्वमित्याशंक्योपाधेः पक्षधर्मावच्छिन्नसाध्याव्यापकत्वमाह (लौकिकेति । लाघवेनेति) अननुगतनिद्रादोषजन्यत्वादीनां प्रातिभासिकत्वप्रयोजकत्वकल्पनापेक्षयाऽनुगतस्यागंतुकदोषजन्यत्वस्य प्रातिभासिकत्वप्रयोजकत्वे लाघवमत आगंतुकदोषजन्यत्वस्यैव प्रातिभासिकत्वप्रयोजकत्वेनाभ्युपगमनीयत्वेन तस्यैवोपाधित्वं वाच्यम् । तथाच निद्रादोषस्याप्यागंतुकदोषत्वेनागंतुकदोषजन्यत्वं निद्रादोषजन्यस्वाप्नगजादावस्तीत्यागंतुकदोषजन्यत्वोपाधेर्दृष्टांते साध्यव्यापकत्वेपि पक्षे तस्य साधनव्यापकत्वाद्धेतूपाध्योरैक्यापादाच्च नोपाधित्वं तस्येति भावः। अथवा लाघवेनानुगतागंतुकदोषजन्यत्वस्यैव लौकिकपरमार्थविलक्षणवृत्तिप्रातिभासिकत्वप्रयोजकत्वस्यावश्यं वाच्यतया स्वाप्नगजादौ निद्रादोषत्वेन जन्यत्वाभावात्साध्याव्यापकत्वमिति भावः । यद्वा उपाधेः साध्यव्यापकत्वे सत्युपाधेः साधनाव्यापकत्वार्थं यत्रोपाधौ विशेषणमुपादीयते सपक्षेतर इति पक्षेतरोपाधिलक्षणस्य निद्रादोषजन्यत्वोपाधौ सत्त्वेन दोषजन्यत्वेनैव पक्षधर्मावच्छिन्नसाध्यनिष्ठव्याप्तौ सिद्धायां निद्राविशेषणस्य जन्यत्वेन क्षित्यादौ सकर्तृकत्वानुमाने शरीरजन्यत्वोपाधौ शरीरविशेषणस्येव निद्रादोषजन्यत्वोपाधेः साधनाऽव्यापकत्वमात्रप्रयोजनस्य ग्रहणेन निद्रादोपजन्यत्वस्य पक्षेतरत्वान्निद्रादोषजन्यत्वं नोपाधिरिति भावः ॥

मू०–अत एव स्वप्नोपलब्धरथादीनामागंतुकनिद्रादोषजन्यत्वात्प्रातिभासिकत्वम्, ननु स्वप्नस्थले पूर्वानुभूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादिति चेन्न ॥

शि० म०–(अतएवेति) अस्यप्रयोजकत्वादेवेत्यर्थः । ननु न स्वाप्नरथादेः प्रातिभासिकत्वं नाप्यागंतुकदोषजन्यत्वं तदातस्यानुत्पत्तेः ।

Funding by IKS-MoE

नचापरोक्षज्ञाने व्यवहितस्याविषयत्वात्सन्निधानाय रथादेरुत्पत्तिरुपेयेति युक्तं बहिरिन्द्रियाणामुपरतत्वेन मनसो बहिरस्वातंत्र्येण चापरोक्षरथादिज्ञानस्यैवासिद्धेः, नच वीथ्यादौ रथादिव्यवहारानुपपत्त्या सृष्टिः कल्प्यते इति वाच्यम्, गौरवप्रसंगात्, व्यवहारस्य च स्मर्यमाणरथाद्यविवेकादुत्पत्तेः । ततश्च न स्वाप्नरथादेः प्रातिभासिकत्वमित्यख्यातिवादी प्राभाकारः प्रत्यवतिष्ठते (नन्विति) स्वप्ने तावद्रथ्यादिगोचरं विशिष्टज्ञानमेव नतु प्रत्येकगोचरं ज्ञानद्वयम्, अन्यथाविशिष्टव्यवहारानुपपत्तेः भेदाग्रहस्य तत्सहितज्ञानद्वयस्य च विशिष्टव्यवहारहेतुत्वनिरासात् तच्च विशिष्टज्ञानं न स्मृतिः पूर्वं तत्र रथादेरननुभूतत्वात् तथाचायं रथः अयं गज इत्यादिज्ञानमपरोक्षज्ञानमेवेत्याशयेन परिहरति (नेति)॥

म०प्र०—तदा—स्वप्नावस्थायाम् । तस्य—स्वाप्नगजादेः (अपरोक्षज्ञानेइति) अपरोक्षज्ञाननिरूपितेत्यर्थः (असिद्धेरिति) तथाच न रथादिसन्निधानाय स्वाप्नरथाद्युत्पत्तिरुपेयेतिभावः । व्यवहारानुपपत्त्या—अयं रथ इत्यादि शब्दप्रयोगादिरूपव्यवहारानुपपत्त्या गौरवमेवोपपादयति (व्यवहारस्येति) अविवेकात्—स्वप्नकालीनव्यवहाराश्रयरथादिनिष्ठभेदज्ञानाभावात् । ततश्च—गौरवप्रसंगादेव । प्रत्यवतिष्ठते—पूर्वपक्षंकरोति, विशिष्टज्ञानमेव—रथ्याद्यधिष्ठानरथाद्यारोप्यविषयकसविकल्पात्मकमेकज्ञानमेव । प्रत्येकगोचरं—रथ्याद्यधिष्ठानगोचरं रथादीष्टगोचरंच । ज्ञानद्वयं—रथ्यादिविषयकेष्टरथादिविषयकस्मरणात्मकं ज्ञानद्वयम् । अन्यथा—रथ्यादिविषयकेष्टरथादिविषयकस्मरणात्मकज्ञानद्वयांगीकारे (विशिष्टव्यवहारेति) अयं रथ इत्यादिविशिष्टव्यवहारेत्यर्थः । ननु स्वप्नकालीनस्मरणजाग्रत्कालीनरथादिविषयकापरोक्षपूर्वानुभवयोर्भेदाग्रहात्तयोर्भेदाग्रहसहितात्स्वप्नकालीनस्मरणजाग्रत्कालीनरथादिविषयकापरोक्षपूर्वानुभवात्मकज्ञानद्वयाद्वा विशिष्टव्यवहारोपपत्तिः स्यादित्याशंक्याह (भेदाग्रहस्येति) तत्सहितज्ञानद्वयस्य—भेदाग्रहसहकृतस्य स्वरूपतो विषयतश्चागृहीतभेदानुभवस्मरणात्मकज्ञानद्वयस्य विषयतः स्वरूपतोऽगृहीतभेदानुभवात्मकज्ञानद्वयस्यवा पूर्वं—विशिष्टज्ञानात्पूर्वकाले । तत्र—तस्मिन्देशे । अननुभूतत्वात्—अयं रथ इत्याद्यनुभवविषयत्वाभावात्, नच जाग्रत्कालीनानुभवादेवायं रथ इत्यादिविशिष्टस्मृत्युपपत्तिरितिवाच्यम् । स्मृतेरिदंत्वावगाहित्वाभावेनेदंत्वावगाहिज्ञानस्य स्मृतित्वानुपपत्तेरिति । तथाच—अयं रथ इत्यादिविशिष्टज्ञानस्य स्मृतित्वाभावे सति ॥

मू०—रथादेः स्मृतिमात्राभ्युपगमे रथं पश्यामि स्वप्ने रथमद्राक्षमित्याद्यनुभवविरोधापत्तेः ॥ “अथ रथान् रथयोगान्पथः सृजते” इति रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्च ॥

शि० म०—रथादिज्ञानस्मृतित्वेबाधकमाह (रथादेरिति) नन्विन्द्रियग्राह्यत्वं तदा स्मर्य्यते इत्यत आह (स्वप्नेइति) रथाद्यवभासानंतरं प्रतिबुद्धस्य स्वप्ने रथमद्राक्षमन्वभूवमिति चानुभवो न स्यात्, त्वन्मते तस्य चक्षुषा तदाननुभूतत्वादिति भावः । ननु व्यवहितस्याविषयत्वात् सृष्टिकल्पने च गौरवात् रथ्यादौ न रथादिविशिष्टानुभव इत्युक्तत्वात्तुल्योऽनुभवविरोध इत्याशंक्य स्वाप्नरथादिसृष्टेः श्रुतिसिद्धत्वान्न गौरवदोष इत्याह (अथरथानिति) जाग्रद्भोगप्रदकर्मोपरमे सति स्वाप्नभोगप्रदकर्माभिव्यक्तयनंतरं रथान् रथयुक्ताश्वान् पथः सृजते इत्यर्थः । एतेन रथादेरपरोक्षविशिष्टानुभवविषयत्वमात्रेण न प्रातिभासिकत्वसिद्धिः व्यवहितस्यापि तस्य स्मर्य्यमाणस्य रथ्यादौ दोषवशेनारोपसंभवात् । अत एव नानुभवविरोधः नवा सृष्टिकल्पनागौरवं ततश्च स्वप्ने अयं रथ इत्यादिविशिष्टज्ञानमन्यथाख्यातिरेवेति निरस्तं, स्मर्यमाणारोपमात्राभ्युपगमे रथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेः ॥

म० प्र०—ननु निद्रादोषबलात्स्मरामीत्यस्य प्रमोषात्पश्यामीत्याद्याकाराप्रतीतिरित्याशंक्याह । परममूले (स्वप्ने इति) निद्रादोषनिवृत्तिकालेपि स्वप्ने रथमद्राक्षमित्येव प्रतीतिर्नतु रथादिकं स्मृतवानित्यत उक्तप्रत्ययव्यवहारस्य विशिष्टप्रत्ययस्य स्मृतिमात्रत्वेन नोपपत्तिरिति भावः । परममूले (अनुभवेति) प्रतीतीत्यर्थः । इतिचानुभवः—इत्याकारिकाचप्रतीतिः, तस्य—पुरोवर्त्तिरथादेः, तदा—स्वप्नकाले, इत्युक्तत्वात्—मयेत्युक्तत्वात् । श्रुतिस्थाथशब्दार्थमाह (जाग्रदिति । एतेनेति) वक्ष्यमाणहेतुना, अस्येतिनिरस्तमित्यनेनान्वयः (अपरोक्षविशिष्टानुभवविषयत्वमात्रेणेति) स्वाप्नरथादिनिष्ठापरोक्षविशिष्टानुभवविषयत्वमनुपपन्नं सत्स्वाप्नरथादेः प्रातिभासिकत्वं कल्पयतीत्यन्यथानुपपत्त्यापि स्वाप्नरथादेर्न प्रातिभासिकत्त्वसिद्धिरित्यर्थः । तस्य—स्वाप्नरथादेः, दोषवशेन—निद्रादोषबलेन, आरोपसंभवात्—अपरोक्षभ्रांतिसंभवात्, अतएव—स्वाप्नरथादेरपरोक्षज्ञानस्वीकारादेव, नानुभवविरोधः—रथं पश्यामीत्यादिप्रतीतिविरोधो नास्ति, ततश्च—उक्तप्रतीतिविरोधादिदोषाभावादेव (आरोपमात्रेति) ज्ञानमात्रेत्यर्थः ॥

मू०—तस्माच्छुक्तिरूप्यवत्स्वप्नोपलब्धरथादयोपि प्रातिभासिकाः यावत्प्रतिभासमवतिष्ठंते ॥

शि० म०—किंच नानुभूयमाने पुरोवर्तिनि गजादेरध्यासः, भूतलादेरिन्द्रियासंयुक्तत्वात् । नापि स्मर्यमाणे तदध्यासः, धर्मिप्रत्यक्षाभावात्तस्यैवापरोक्षाध्यासे हेतुत्वात् । किंच तत्र गजाद्यनुभवोपि न बाहिरिन्द्रियेण गजादेरसन्निकृष्टत्वात् ज्ञानप्रत्यासत्तेश्च निराकृतत्वात् । नच संस्कारो दोषो वा प्रत्यासत्तिः अपसिद्धान्तात् प्रत्यासत्तित्वे च तत एव वह्न्यादेः प्रत्यक्षत्वापत्तौ अनुमानोच्छेदापत्तेः । नापि मनसा बहिरिन्द्रियासंयुक्तस्य तस्मिन्मनसोऽसामर्थ्यात् । नचानुमानात्तत्प्रतीतिः, स्वप्ने रथमद्राक्षमित्यनुभवविरोधात् । लिंगाद्यप्रतिसंधानेपि गजानुभवस्य जायमानत्वाच्च । तस्मान्नस्वाप्नगजादिज्ञानमन्यथाख्यातिरित्यलं विस्तरेण । तदेतदन्यथाख्यातिनिराकरणं मनसि निधायोपसंहरति (तस्मादिति) प्रातिभासिकशब्दार्थमेवाह (यावदिति) प्रतिभासनियतसत्ताका इति यावत ॥

म० प्र०—पुरोवर्त्तिनि—भूतलादौ, स्मर्यमाणे—स्मृतिविषयभूतलादौ, तदध्यासः—रथाद्यध्यासः, धर्मीति—भूतलादिधर्मीत्यर्थः । ननु भूतलादिधर्मिणः प्रत्यक्षत्वाभावेपि रथाद्यध्यासः स्यादित्याशंक्याह (तस्यैवेति) अपरोक्षधर्मिण एव नतु परोक्षधर्मिण इत्यर्थः । ननु ज्ञानप्रत्यासत्तेः सत्त्वेन कथं गजादेरसन्निकृष्टत्वमित्याशंक्याह (ज्ञानप्रत्यासत्तेश्चेति । संस्कारोदोषोवेति) अत्रदोषशब्देनादृष्टरूपदोषो ग्राह्यस्तथाच स्वसंयुक्तमनःसंयुक्तात्मसमवेतसंस्कारविषयत्वसन्निकर्षेण स्वसंयुक्तमनःसंयुक्तात्मसमवेतादृष्टविषयत्वसन्निकर्षेण वा गजादौ चक्षुरिन्द्रियगमनमित्यर्थः । अपसिद्धांतात्—तव मते संस्कारादेः सन्निकर्षत्वस्यानिष्टत्वेनान्यथाख्यातिलोभेन संस्कारादेः सन्निकर्षत्वाभ्युपगमे, तव मतस्य हान्यापत्तेः, प्रत्यासत्तित्वे—संस्कारादेः प्रत्यासत्तित्वे, ततएव—संस्कारादिरूपप्रत्यासत्तैरेव (मनसेति) स्वप्नकाले गजादेरपरोक्षत्वमितिशेषः, बहिरिन्द्रियासंयुक्तस्य—विषयसंबद्धबहिरिन्द्रियैः संबंधरहितस्य मनसः, तस्मिन्—रथादिज्ञानजनने, अनुमानात्—स देशः रथादिमान् अवच्छेदकतासंबंधेन रथादिकार्यगमनादिमत्त्वादेतद्देशवदित्यनुमानात्, तत्प्रतीतिः—स्वप्ने रथादिप्रतीतिः, प्रतिभासनियतसत्ताकाः । प्रतिभाससत्ताव्याप्यसत्ताकाः ॥

मू०—ननु स्वप्नरथाद्यधिष्ठानतयोपलभ्यमानदेशविशेषस्यापि तदा सन्निकृष्टतया अनिर्वचनीयप्रातिभासिकदेशोऽभ्युपगंतव्य-

स्तथाचाध्यासः कुत्रेतिचेन्न, चैतन्यस्य स्वयंप्रकाशस्य रथाद्यधिष्ठानत्वात् ॥

शि० म०--ननु तवमतेपि कुत्र रथाद्यध्यासः, न तावच्चैतन्ये रथाद्यधिष्ठानतया देशविशेषस्योपलभ्यमानत्वेन शुद्ध स्यान्तःकरणावच्छिन्नस्य वा चैतन्यस्याधिष्ठानत्वायोगात । नापि देशविशेषे स हि किं पारमार्थिकः प्रातिभासिको वा । नाद्यः, विंध्यादिदेशविशेषस्य पारमार्थिकस्यासन्निकृष्टतया तदवच्छिन्नचैतन्ये रथाद्यध्यासायोगात । नद्वितीयः, तस्यापि प्रातिभासिकत्वे रथादिपूर्वकालीनत्वाभावेनाधिष्ठानतावच्छेदकत्वानुपपत्तेः । तस्मान्न रथादेरध्यास इति चोदयति (नन्विति) शुद्धचैतन्यस्यैवाधिष्ठानत्वान्न रथाद्यध्यासानुपपत्तिरिति परिहरति (नचैतन्यस्येति) ननु चैतन्यमपि नाज्ञातमधिष्ठानं ज्ञानविषय एव संप्रयुक्तशुक्तिकादावध्यासदर्शनादित्यत आह (स्वयंप्रकाशस्येति) ज्ञायमानत्वमेवाधिष्ठानत्वे प्रयोजकं लाघवात । तच्च स्वप्रकाशपरप्रकाशसाधारणं, नतु वृत्त्यवच्छिन्नज्ञानविषयत्वं संप्रयोगजन्यज्ञानविषयत्वं वा गौरवादिति भावः ॥

म० प्र०–देशविशेषे–चैतन्यव्यतिरिक्तभूतलादिदेशे, सहि–भूतलादिदेशविशेषो हि; पारमार्थिकः–व्यावहारिकः । तस्यापि–भूतलादिदेशविशेषस्यापि, अधिष्ठानतावच्छेदकत्वानुपपत्तेः–रथादिनिरूपितचैतन्यनिष्ठाधिष्ठानतावच्छेदकत्वासंभवात् । तथाच प्रातिभासिकदेशावच्छिन्नचैतन्ये रथाद्यध्यासो न संभवतीति भावः । नच रथाद्युत्पत्तेः पूर्वं भूतलादिदेशविशेषोत्पत्तिस्ततो गजाद्यध्यास इति प्रातिभासिक भूतलादिदेशविशेषस्य गजादिपूर्वकालीनत्वेन प्रातिभासिकभूतलादिदेशविशेषस्य गजादिनिरूपितचैतन्यनिष्ठाधिष्ठानतावच्छेदकत्वं संभवतीति वाच्यम् । प्रातिभासिकपदार्थस्य व्यावहरिकपदार्थविच्छिन्नचैतन्येऽध्यासो न तु प्रतिभासिकपदार्थावच्छिन्नचैतन्येऽध्यास इति त्वयांगीकारादिति । परममूले (तदेति) स्वप्नावस्थायामित्यर्थः । परममूले (तथाचेति) गजाद्यधिष्ठानतयोपलभ्यमानभूतलादिदेशविशेषस्यापि सन्निकृष्टतया प्रातिभासिकत्वावश्यकत्वेन तस्याधिष्ठानापेक्षतयाऽधिष्ठानत्वाभावेसतीत्यर्थः (संप्रयुक्तेति) इन्द्रियसंबद्धेत्यर्थः । ज्ञायमानत्वम्–अनावृतत्वम् । तच्च–अनावृतत्वस्वरूपाधिष्ठानत्वप्रयोजकं तु स्वप्रकाशपरप्रकाशसाधारणम्–स्वप्रकाशपरप्रकाशाधिष्ठानवृत्तिज्ञायमानत्वमेवेत्यत्रैवकारव्यावर्त्यमाह (नत्विति) वृत्त्यवच्छिन्नज्ञानविषयत्वं–वृत्त्यवच्छिन्नज्ञानप्रयोज्यानावृतत्वम् । गौरवात्–ज्ञायमानत्वापेक्षया वृत्त्यवच्छिन्नज्ञानविषयत्वादौ शरीरकृतगौरवात् ।

Funding by IKS-MoE

मू०-प्रतीयमानो हि रथादिरस्तीत्येव प्रतीयते इति सद्रूपेण प्रकाशमानं चैतन्यमेवाधिष्ठानम् । देशविशेषोपिचिदध्यस्तः प्रातिभासिकः रथादाविन्द्रियग्राह्यत्वमपि प्रातिभासिकं तदासर्वेन्द्रियाणामुपरमात् ॥

शि० म०-ननु स्वप्रकाशमपि चैतन्यं नाधिष्ठानं चित्त्वादिना ज्ञायमाने तत्र जडाध्यासायोगादित्यत आह (सद्रूपेणेति) चैतन्यं सत्त्वेन प्रकाशमानमेवाधिष्ठानं, नतु चिदानंदलक्षणपरिपूर्णस्वरूपेण तद्रूपस्य तस्य शास्त्रविषयस्य मूलाविद्यया आवृतत्वादिति भावः । तर्हि सद्रूपेण वा चैतन्यं कथं प्रकाशते इत्याशंक्य सन् घट इतिवत्सन्गजः सन् रथ इति गजादेः सत्त्वेन प्रतीयमानत्वात्तस्य च सत्त्वस्याधिष्ठानरूपत्वादतिरिक्तसत्तायाश्चानभ्युपगमाच्चैतन्यमपि तेन रूपेण प्रतीयते इत्यभिप्रेत्याह (प्रतीयमानोहीति) नन्वेवमत्रायं गज इति देशविशेषाधिष्ठानकतया गजाद्युपलम्भो न स्यादित्युक्तमित्यत आह (देशविशेषोपीति) ननु रथादेश्चैतन्याध्यस्तत्वे तत्रेदंतेन्द्रियग्राह्यत्वयोरनवभासप्रसंगः । नहि शुक्तिरूप्यादाविवइन्द्रियग्राह्येदमवच्छिन्नचैतन्यमधिष्ठानं येन तद्गतेदंतादिरत्रावभासेतइत्यत आह (रथादाविति) अपिरयमनुक्तसमुच्चये इदंत्वमपीत्यर्थः । नन्विन्द्रियग्राह्यत्वस्यापि प्रातिभासिकत्वकल्पने गौरवमित्यत आह (तदेति) ननु देशविशेषस्याप्यध्यस्तत्वे तदधिष्ठानमन्तःकरणावच्छिन्नचैतन्यम् ॥

म० प्र०-तत्र-चैतन्ये (जडाध्यासायोगादिति) नह्यसाधारणशुक्तित्वादिधर्मेण ज्ञायमानशुक्तिकादौ रजताद्यध्यासः संभवतीतिभावः । सत्त्वेन-अस्तित्वेन । प्रकाशमानम्-ज्ञायमानम् (आवृतत्वादिति) नच विदुषा सच्चिदानंदपरिपूर्णलक्षणब्रह्मणः ज्ञातत्वाद्विदुषः प्रपंचाध्यासो न स्यादिति वाच्यम् । विदुषो वस्तुतः प्रपंचाध्यासाभावेपि बाधितानुवृत्त्या तस्य प्रपंचाध्याससत्त्वादिति । तर्हि-सत्त्वेन प्रकाशमानचैतन्यस्याधिष्ठानत्वस्वीकारे । सद्रूपेणवा-सद्रूपेणैव, प्रकाशते-भाति । तेनरूपेण-सद्रूपत्वधर्मेण, एवं-चैतन्यस्याधिष्ठानत्वस्वीकारेसति (इत्युक्तमिति) रथाद्यधिष्ठानतया देशविशेषस्योपलभ्यमानत्वेनेति पूर्ववाक्येइत्युक्तमित्यर्थः । परममूले (देशविशेषइति) अत्रायं रथ इत्यधिष्ठानतया प्रतीयमानदेशविशेषस्यापि प्रातिभासिकत्वान्नाधिष्ठानतेति भावः । येन-इन्द्रियग्राह्येदमवच्छिन्नचैतन्यस्याधिष्ठानत्वेन (तद्गतेति) इन्द्रियग्राह्येदमवच्छिन्नचैतन्याधिष्ठानप्राप्तित्यर्थः अत्र-रथादौ, (गौरवमिति)

तथाचरथादिकल्पनतन्निष्ठेन्द्रियग्राह्यत्वकल्पनयोर्गौरवेण रथादिस्मरणमेव स्वीकरणीयमिति भावः । परममूले (तदेति) स्वप्नावस्थायामित्यर्थः । परममूले (सर्वेन्द्रियाणामिति) व्यावहारिकसर्वेन्द्रियाणामित्यर्थः । तथाच रथाद्यपरोक्षावभासानुपपत्त्या रथादिस्मरणासंभवान्नगौरवं रथादिनिष्ठेन्द्रियग्राह्यत्वकल्पनप्रतिबंधकमिति भावः ॥

मू०—अहं गज इतिप्रतीत्यापादनं तु पूर्ववन्निरसनीयम् ॥

शि० म०—तस्यैव स्वप्ने प्रतिभासात् "सधीःस्वप्नोभूत्वेमं लोकमनु संचरेत्" इति श्रुतेश्चेतिचेन्न तावत्प्रतिभासादन्तःकरणावच्छिन्नाधिष्ठानत्वं सुखादिवच्छुद्धचैतन्याध्यासेपि तद्विशिष्टप्रतिभासोपपत्तेः सधीरित्यादिश्रुतेश्च "दशभिः सह पुत्रैश्च भारं वहति गर्दभी" इत्यत्र पुत्राणां भारानन्वयवत् "अग्ना इपत्नीवाँस्सजूर्देवेन त्वष्टा सोमं पिब स्वाहा" इत्यत्र त्वष्टुस्सहत्वप्रतियोगिनः पातृत्वानन्वयवच्च धिया सह वर्तमानः आत्मा स्वप्नो भूत्वेत्यनन्वयलक्षणाप्राधान्येप्युपपत्तेः । तस्माच्छुद्धमेव चैतन्यं स्वाप्नगजाद्यधिष्ठानमिति । नन्वंतःकरणस्य स्वाप्नाध्यासाधिष्ठानतावच्छेदकत्वाभावेपि तदधिष्ठानस्य वस्तुतोऽन्तःकरणावच्छिन्नतया सुखादिवदहं गज इत्यादि प्रतीत्यापत्तिरित्याशंक्य शुक्तिरूप्यवत्तदनुभवस्येदमाकारानुभवाहितसंस्कारजन्यत्वान्नाहमाकारत्वमित्याह (अहंगजइति)॥

म० प्र०—तस्यैव—अन्तःकरणावच्छिन्नचैतन्यस्यैव, प्रतिभासात्—सद्रूपत्वेन ज्ञानात्, स्वाप्नरथादिपदार्थज्ञानादितिवा (सधीरिति) बुद्धिविशिष्ट आत्मास्वप्नो भूत्वास्वाप्नपदार्थाद्याकारपरिणतबुद्ध्यवभासकत्वेन तदाकारो भूत्वेमं लोकं जाग्रत्पदार्थजातमनुसंचरेदनुसंचरत्यनुभवतीत्यर्थः । तद्विशिष्टप्रतिभासोपपत्तेः—अन्तःकरणविशिष्टचैतन्यस्य रथादिज्ञानोपपत्तेः (सधीरिति) सधीरित्यादिश्रुतेश्चेत्यनन्वयलक्षणाप्राधान्येप्युपपत्तेरित्यन्वयः । अन्तःकरणे रथादिनिरूपितचैतन्यनिष्ठाधिष्ठानत्वानन्वयलक्षणाप्राधान्ये सत्यपि सधीरित्यादिश्रुत्युपपत्तेरित्यर्थः । अनन्वये लौकिकदृष्टान्तमाह (दशभिरिति) भारानन्वयवत् पुत्राणां गर्दभीकर्तृकभारवहनानुपयोगेन संबंधाभाववत् अनन्वये एव वैदिकदृष्टान्तमाह (अग्नाइति) हे अग्ने त्वं सोमं पिबेत्यन्वयः कथंभूतस्त्वंपत्नीवान्पत्नीविशिष्टः पुनः कथंभूतस्त्वं त्वष्ट्रात्वष्टृसंज्ञकेन देवेन सजूः सहवर्तमानः सहवर्त्तमानत्वं चैककर्माधिष्ठातृत्वेन बोध्यम् । सहत्वप्रतियोगिनः—वैशिष्ट्यलक्षणसहत्वनिरूपकस्य पातृत्वेति—सोमपानकर्तृत्वेत्यर्थः ।

तस्मात्—अन्तःकरणेरथादिनिरूपितचैतन्यनिष्ठाधिष्ठानत्वस्यान्वयाभावात् । तदधिष्ठानस्य—स्वाप्नरथाद्यधिष्ठानचैतन्यस्य, वस्तुतः—विचारतः । तदनुभवस्य—गजाद्यनुभवस्य ॥

मू०—स्वाप्नगजादयः साक्षान्मायापरिणामा इति केचित् । अन्तःकरणद्वारा तत्परिणामा इत्यन्ये ॥

शि० म०—ननु स्वाप्नगजादिज्ञानस्य न तत्कालोत्पन्नविषयत्वमुपादानाभावात्। तथाहि न तावच्चैतन्यमुपादानमपरिणामित्वेन दूषितत्वात्। नाप्यविद्या, साहि न मूलाविद्या तदुत्पादकगजाद्यवयवाभावेन तस्यास्साक्षात्तदुत्पादकत्वायोगात्। घटादेरपि मृत्पिण्डादिस्वावयवद्वारैव मूलाविद्याकार्य्यत्वाभ्युपगमात्। नापि तूलाविद्या, सापि न बाह्यदेशावच्छिन्नचैतन्याश्रिता देशविशेषस्यापि प्रातिभासिकत्वात् । नचान्तःकरणावच्छिन्नाश्रितागजादिहेतुः, अन्तःकरणस्य गजाद्युपादानाविद्याधिष्ठानतावच्छेदकत्वे प्रमाणाभावात्, तस्मान्न गजादेः प्रातिभासिकत्वमित्याशंक्य मूलाविद्यैव साक्षात्स्वप्नगजाद्युपादानं, गजादेश्च शुक्तिरूप्यवत्प्रातिभासिकत्वान्न तदवयवापेक्षा लौकिकपरमार्थगजादेरेव तदपेक्षत्वादित्यभिप्रेत्याह (स्वाप्नगजादयइति । अन्तःकरणद्वारेति) नचात्र प्रमाणाभावः स्वप्ने गजाद्युत्पत्त्यनुपपत्तेरेव प्रमाणत्वात् । अन्यथा साक्षादविद्यापरिणामत्वेसुषुप्तावपि केवलाविद्यायाः सत्त्वेन तत्प्रतिभासापत्तेरिति भावः । एतच्चापाततः क्लृप्ताज्ञानोपादानादेव स्वप्नाध्यासोपपत्तेः ॥

म० प्र०—तस्याः—मूलाविद्यायाः । साक्षात्—अवयवैर्विना । तदुत्पादकत्वायोगात्—गजादिजनकत्वासंभवात् । ननु तस्या गजाद्यवयवद्वारा गजाद्युत्पादकत्वं स्यादित्याशंक्याह (तदुत्पादकेति) स्वाप्नगजादिजनकेत्यर्थः (अवयवाभावेनेति) मूलाविद्याया गजाद्यवयवद्वारापि गजाद्युपादानत्वासंभवादिति शेषः । ननु स्वाप्नगजादिकं प्रति मूलाविद्यायाः साक्षादुत्पादकत्वासंभवस्वीकारे व्यावहारिकघटादेरपि मूलाविद्याकार्य्यत्वं न स्यादित्याशंक्याह (घटादेरिति) व्यावहारिकघटादेरित्यर्थः (स्वेति) घटादीत्यर्थः । तस्मात्—स्वाप्नगजाद्युपादानकारणानिरूपणात् । प्रातिभासिकत्वमिति—तथाच स्वप्नकाले व्यावहारिकगजादिविषयकस्मरणमेव नानुभव इति भावः । तदवयवापेक्षा—गजाद्यवयवापेक्षा (लौकिकपरमार्थेति) लोकप्रसिद्धव्यावहारिकेत्यर्थः । तदपेक्षत्वात्—अवयवापेक्षत्वात् अन्तःकरणस्य स्वाप्नगजादिनिमित्तकारणत्वकल्पनापेक्षया स्वाप्नगजादिष्वन्तःकरणद्वारा माया-

परिणामत्वकल्पनं वरमित्यभिप्रायवतामाचार्य्याणांमतमाह । परममूले (अन्तःकरणद्वारेति) अन्तःकरणाभिन्नपरिणामवत्यामायाया गजाद्याः परिणामाइत्यर्थः । अत्र–स्वाप्नगजादीनामन्तःकरणद्वारा मायायाः परिणामत्वे । अनुपपत्तेः–स्वप्नकालीनगजाद्युत्पत्तिरन्तःकरणद्वारा मायानिष्ठकारणत्वं विनानुपपद्यमानासत्यन्तः करणद्वारा स्वाप्नगजाद्युत्पत्तिनिरूपितमायानिष्ठकारणतां कल्पयतीत्यर्थापत्तेः (अन्यथेति) अस्यैव विवरणं साक्षादविद्यापरिणामत्वे इति स्वाप्नगजादेरन्तःकरणद्वारंविनैवाविद्योपादानकत्वे इति तदर्थ इति (तत्प्रतिभासेति) स्वाप्नगजादिज्ञानेत्यर्थः । एतच्च–उक्तदूषणं च ॥

मू०–ननु गजादेः शुद्धचैतन्याध्यस्तत्वे इदानीं तत्साक्षात्काराभावेन जागरणेपि स्वप्नोपलब्धगजादय अनुवर्तेरन् । उच्यते। कार्य्यविनाशो हि द्विविधः कश्चिदुपादानेन सह कश्चित्तु विद्यमाने एवोपादाने आद्यो बाधः द्वितीयस्तु निवृत्तिः । आद्यस्य कारणमधिष्ठानतत्त्वसाक्षात्कारः, तेन विनोपादानभूताया अविद्याया अनिवृत्तेः। द्वितीये विरोधिवृत्त्युत्पत्तिर्दोषनिवृत्तिश्च। तदिह ब्रह्मसाक्षात्काराभावात् ॥

शि० म०–ननु सुषुप्तौ तत्प्रतिभासापत्तिः, अन्तःकरणाभावात्, तस्य च रागद्वेषादिवत्तत्र निमित्तकारणत्वात् । किंचान्तःकरणद्वारत्वेपि न गजाद्युत्पत्तिः श्लक्ष्णगजावयवादेरभावात् यदि च प्रातिभासिकत्वान्नतदवयवापेक्षा तदा मूलाविद्ययैव साक्षात्प्रातिभासिकतदुत्पत्तिसंभवेन किमंतर्गतेनान्तःकरणेनेत्यास्तामतिविस्तरः । ननु स्वाप्नगजादेर्मायापरिणामस्य शुद्धचैतन्याध्यासे इदानीं तदधिष्ठानब्रह्मसाक्षात्काराभावेन घटादिवद्बाधो न स्यात् । ततश्च तस्य जागरणेप्यनिवृत्तत्वात्प्रतिभासापत्तिरिति शंकते (नन्विति) बाधानुपपत्तिमंगीकरोति (उच्यते इति) तर्हि स्वाप्नगजादिर्जागरणेप्यनुवर्त्तेतेत्याशंक्य बाधाभावेपि निवृत्तत्वान्नानुवृत्तिरिति वक्तुं प्रथमं भेदेन निवृत्तिबाधौ निरूपयति (कार्य्यविनाशोहीति । उपादानेनेति) अज्ञानेतिशेषः । तेन मृत्पिंडेन सह घटध्वंसेपि न बाधः, तदुपादानभूताया अविद्याया अनिवृत्तित्वादिति ध्येयम् । न केवलं स्वरूपतो निवृत्तिबाधयोर्भेदः किंतु कारणभेदादपीत्याह (आद्यस्येति) बाधस्येत्यर्थः । ततः किमित्यत आह (तदिहेति) तस्माद्बाधनिवृत्त्योर्भेदादिह जागरणेपि ॥

म० प्र०–तत्प्रतिभासापत्तिः–स्वाप्नगजादिज्ञानापत्तिः । ननु सुषुप्तावन्तःकरणाभावेन स्वाप्नगजादिज्ञानाभावस्वीकारेऽन्तःकरणस्य स्वाप्नगजाद्युपादानत्वं प्राप्तमित्याशंक्याह (तस्येति) अन्तःकरणस्येत्यर्थः (रागद्वेषादिवदिति) यथारागद्वेषादीनां प्रवृत्तौ निमित्तकारणत्वं तद्वदित्यर्थः । तत्र–स्वाप्नगजादौ (अन्तःकरणद्वारत्वेपि) अन्तःकरणनिष्ठस्वाप्नगजादिनिरूपितमायानिष्ठकारणत्वप्रयोजकत्वेपि (गजादीति) स्वाप्नगजादीत्यर्थः । प्रातिभासिकतत्त्वात्–स्वाप्नगजादेर्ज्ञानकालमात्रवृत्तित्वात्, तदवयवापेक्षा–स्वाप्नगजाद्यवयवापेक्षा (तदुत्पत्तीति) स्वाप्नगजाद्युत्पत्तीत्यर्थः । अंतर्गतेन–द्वारभूतेन, इदानीं–जागरणकाले (तदधिष्ठानेति) स्वाप्नगजाद्यधिष्ठानेत्यर्थः । ततश्च–स्वाप्नगजादीनां वाधाभावादेव, तस्य–स्वाप्नगजादेः, तर्हि–वाधाभावांगीकारे, तेन–उपादानाज्ञानेन सह कार्य्यनाशस्य वाधशब्दार्थत्वस्वीकारेण (तदुपादानेति) घटाद्युपादानेत्यर्थः) कारणभेदात्–वाधनिवृत्त्योःकारणभेदात्, तस्मात्–वाधनिवृत्त्योः स्वरूपतः कारणतश्च ॥

मू०–स्वाप्नप्रपंचो माबाधिष्ठ मुसलप्रहारेण घटादेरिव विरोधिप्रत्ययान्तरोदयेन स्वजनकीभूतनिद्रादिदोषनाशेन वा गजादिनिवृत्तौ को विरोधः एवं च शुक्तिरूप्यस्य शुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याकार्य्यत्वपक्षे शुक्तिरिति ज्ञानेन तदज्ञानेन सह रजतस्य बाधः ॥

शि० म०–माबाधिष्ठ–अविद्यया सह न निवर्त्त्यैतेत्यर्थः । तर्ह्यविद्याविनाशाभावाद्गजादिनिवृत्तिरपि न स्यादित्याशंक्य नह्युपादानविनाशादेव सर्वत्र कार्य्यविनाशः किन्तु कारणान्तरेणापि गजादेश्च घटादेर्मुसलप्रहारेणेव विरोधिवृत्त्यन्तरेणापि निवृत्त्युपपत्तेर्न विरोध इत्याह (मुसलप्रहारेणेति) ननु स्वप्न एव गजप्रतिभासानंतरमश्वप्रतिभाससमयेपि तज्जनकनिद्रादृष्टसंस्कारादिसत्त्वेन तदापि गजोनुवर्तेतेत्याशंक्य फलबलात्तत्राश्वादिपरिणाम एव विरोधीति तेनैव तन्निवृत्तिरित्यभिप्रेत्याह (विरोधीति) ननु स्वप्ने अंत्यपदार्थस्य विनाशो न स्यात्तदनंतरं सुषुप्तौ विरोधिपदार्थांतरानुदयादित्याशंक्य तत्र निद्रादिनाशो निवर्तक इत्याशयवानाह (स्वजनकीभूतेति) नचाननुगमः फलबलेनाननुगतस्यैव निवर्त्तकत्वाभ्युपगमात् । नन्विदानीमबाधितस्यापि स्वप्नप्रपंचस्य प्रातिभासिकत्वाभ्युपगमे शुक्तिरूप्यस्य शुक्तितत्त्वज्ञानेपि बाधो न स्यात्तदभावेप्यागंतुकदोषजन्यत्वेन प्राति-

भासिकत्वोपपत्तेरिति चेत् किं शुक्तिरजतस्य तूलाविद्यापरिणामत्वपक्षे बाधानुपपत्तिर्मूलाविद्यापरिणामत्वपक्षे वा। तत्र नाद्य इत्याह (एवंचेति) कार्य्यविनाशस्य द्वैविध्येसतीत्यर्थः (शुक्तिरिति। ज्ञानेनेति) नेदं रजतमिति ज्ञानेनेत्यपि द्रष्टव्यम् ॥

म० प्र०—तर्हि—गजादेःस्वोपादानाविद्यया सह नाशानंगीकारे, तदापि—अश्वप्रतिभाससमयेपि, फलबलात्—स्वाप्नगजादिज्ञानध्वंसस्वरूपकार्य्यान्यथानुपपत्त्या, तत्र—स्वाप्नगजाद्यनुवर्त्तने, तदनंतरम्—स्वाप्नांत्यपदार्थानंतरम्, स्वाप्नांत्यपदार्थज्ञानानंतरं वा, तत्र—स्वाप्नांत्यपदार्थे। अत्रनिरूपितत्वं सप्तम्यर्थः। निद्रादिनाशः—स्वाप्नांत्यपदार्थजनकनिद्रादिनाशः। आदिनाऽदृष्टादिसंग्रहः, अननुगमः—स्वाप्नपदार्थनिवर्त्तकानामेकस्वरूपत्वाभावः। अनुगतस्वाप्नपदार्थनिवर्त्तकतावच्छेदकाभाव इति यावत्, फलबलेन—स्वाप्नपदार्थनिवृत्तिरूपकार्य्यबलेन, अननुगतस्य—नानाविधस्य स्वाप्नपदार्थनिवर्त्तकस्य, इदानीं—जागरणकाले, तदभावेपि—बाधाभावेपि (आगंतुकेति) सादृश्याद्यागंतुकेत्यर्थः। तत्र—द्वयोर्मध्ये ॥

शि० म०-भेदगोचराज्ञानकार्यस्य रजतस्य समानविषयभेदसाक्षात्कारेणैव बाध्यत्वात्। नचैवं शुक्तितत्त्वज्ञानमेव बाधकं नेदं रजतमित्यनुवाद इति पंचपादिकावाक्यविरोध इतिवाच्यम्, भिन्नविषयभेदज्ञानस्य शुक्त्यज्ञानकार्य्यरजताबाधकत्वेन तत्परतया टीकावाक्योपपत्तेः। नच रजतस्य तूलाविद्याकार्य्यत्वे प्रमाणाभावः, अनुमानादेस्तत्प्रमाणस्योक्तत्वात्। ननु तूलाज्ञानांगीकारे नानाज्ञानापत्तौ मायामित्यादिश्रुतिविरोध इति चेत्, न मूलाज्ञानस्यैवावस्थाभेदास्तूलाज्ञानपदवाच्या इत्यभ्युपगमात्। नच मूलाज्ञानस्यैव तूलाज्ञानरूपत्वे तस्य शुक्तितत्त्वज्ञानान्निवृत्त्यापत्तिः तत्तज्ज्ञानात्तत्तद्विषयावरणशक्तेरेव विनाशात्। नचैवं समानविषयसर्वावरणशक्तीनां युगपदेव शुक्त्यादिज्ञाविनाशात्। नचैवं समानविषयत्वेप्येकैकावरणशक्तेरेव कार्य्यनान्निवृत्तिप्रसंग इति युक्तं समानविषयत्वेप्येकैकावरणशक्तिरेव कार्य्यबलात्तत्त्वज्ञानेन प्रविलयकल्पनात्। अन्यथा न्यायमतेप्येकज्ञानेनैव सर्वज्ञानप्रागभावानां निवृत्तिप्रसंगः ॥

म०प्र०-(समानविषयभेदसाक्षात्कारेणैवेति) शुक्त्यादिपुरोवर्त्तिनिष्ठप्रातिभासिकरजतादिप्रतियोगिकभेदगोचराज्ञानविषयसमानोऽभिन्नो विषयो यस्य शुक्त्यादिपुरोवर्त्तिनिष्ठप्रातिभासिकरजतादिप्रतियोगिकभेदसाक्षात्कारस्य स तथा स चासौ भेदसाक्षात्कारस्तेनैवेत्यर्थः। एवं-नेदंरजतमित्यादिज्ञानस्य शुक्तिरजतादिबाधकत्वस्वीकारे

Funding by IKS-MoE

- सति । भिन्नविषयभेदज्ञानस्य–शुक्त्यादिपुरोवर्त्तिनिष्ठव्यावहारिकरजतादिप्रतियोगिकभेदज्ञानस्य तत्परतया–व्यावहारिकरजतादिविषयकं नेदं रजतमित्यादिज्ञानमनुवादकं न बाधकमित्यर्थाभिप्रायकत्वेन (टीकावाक्येति) पंचपादिका वाक्येत्यर्थः । तत्प्रमाणस्य–रजतस्य तूलाविद्याकार्य्यत्वे प्रमाणस्य (उक्तत्वादिति) रजतोत्पत्तिनिरूपणग्रंथे रूप्याध्यासः साक्षादविद्योपादानः अन्यानुपादानत्वे सति सोपादानत्वादाकाशवदित्याद्यनुमानस्योक्तत्वादित्यर्थः । यद्वा शुक्तिरजतादिकं तूलाविद्याकार्य्यं ब्रह्मज्ञानेतरशुक्तिज्ञानादिबाध्यत्वाद्यन्नैवं तन्नैवं. घटादिवदित्यनुमानस्यैवोक्तप्रायत्वादित्यर्थः । अवस्थाभेदाः–आवरणविक्षेपानुकूलशक्तिविशेषाः । तस्य–मूलाज्ञानस्य (शुक्तितत्त्वेति) शुक्तिस्वरूपेत्यर्थः (निवृत्त्यापत्तिरिति) शक्तिशक्तिमतोरभेदान्मूलाज्ञानस्यैव तूलाज्ञानरूपत्वेन तूलाज्ञानस्य शुक्तिस्वरूपज्ञानेन निवृत्त्यामूलाज्ञानस्यापि नाशः स्यात्तथाच पुनर्भ्रमः संसारश्च न स्यादितिभावः । तत्तज्ज्ञानात्–शुक्त्यादितत्तत्पदार्थज्ञानात् (शक्तेरेवेति) नतु मूलाविद्याया नाशः इत्येवकारार्थ इति, एवं–शुक्त्यादिज्ञानेन तत्तद्विषयकावरणशक्तिनाशस्वीकारे सति । समानविषयसर्वावरणशक्तीनाम्–शुक्त्यादिपदार्थज्ञानविषयाभिन्नविषयावरणानुकूलनिखिलतूलाज्ञानानाम् । समानविषयत्वेपि–शुक्त्यादिपदार्थविषयकनानावरणशक्तीनां शुक्त्यादिपदार्थज्ञानविषयसमानविषयकत्वेपि, कार्य्यबलात्-पुनर्भ्रांतिरूपकार्य्यान्यथानुपपत्त्या । अन्यथा–पुनर्भ्रांतिरूपकार्य्यान्यथानुपपत्त्यैकावरणशक्तिनाशानंगीकारे (प्रसंगइति) तथाच घटादिष्वेकज्ञानानंतरं पुनर्ज्ञानं न स्यादितिशेषः ॥

शि० म०–यदि च प्रागभावानां प्रतियोगिजननस्वरूपयोग्यत्वाविशेषेपि फलबलकल्प्यस्वभावविशेषादेक एव प्रतियोगिना निवर्त्तते इति मतं तदा समानविषयतूलाज्ञानानामावरकत्वेप्यात्मनि पुनरज्ञानानुभवाद्भ्रमान्तरोदयाच्च तत्त्वज्ञानादेकस्मादेकैवावरणशक्तिर्निवर्तते इति तुल्यम् । ननु तत्त्वज्ञानादावरणशक्तेरेव विनाशाभ्युपगमे मुक्तावप्यज्ञानं स्यात् । नच ब्रह्मसाक्षात्कारात्प्रागेव सर्वावस्था विनश्यंतीति प्रमाणमस्तीतिचेत्, न किं मुक्तावापाद्यमानमज्ञानमनावरकमुतावरकम् । नाद्यः, अनावरकाज्ञाने प्रमाणाभावात् । द्वितीयेपि न तावद्ब्रह्मावरकं ब्रह्मणः साक्षात्कृतत्वेन तदावरणशंकानवकाशात् । नापि प्रपंचावरकं मूलाज्ञाननिवर्तकेन ब्रह्मसाक्षात्कारेण तन्मूलनिखिलप्रपंचस्य निवर्तितत्वात् अविषया विद्यावस्थायाश्चाभावात् । भावेवा तस्या अपि निखिलनिवर्तकब्रह्मज्ञानेन निवर्तितत्वात् । तस्मान्मूलाज्ञानस्यानाद्यवस्थाभेद एव तूलाज्ञानं तत्परिणामश्च शुक्तिरजतमिति

Funding by IKS-MoE

तेनैव सहाध्यासस्य तत्त्वज्ञानान्निवृत्तिरिति युक्तो बाधः तदुक्तं विवरणाचार्य्यैः–मूलाज्ञानस्यैवावस्थाभेदा रजताद्युपादानानि शुक्तिकादिज्ञानैस्सहाध्यासेन निवर्त्तंते इति । मूलाविद्याकार्य्यत्वपक्षे रजतस्य बाधाभावमनुमोदते ॥

म०प्र०–एकएव–एकप्रागभावएव । आत्मनि–अन्तःकरणेन्तःकरणावच्छिन्नचैतन्ये वा घटाद्यवच्छिन्नात्मनि वा । तत्त्वज्ञानात्–घटादिस्वरूपविषयकयथार्थज्ञानात् । यत्र तत्त्वज्ञानत्वं तत्रावरणशक्तिनाशकत्वमिति व्याप्तेर्घटादिज्ञानेषु दृष्टत्वेन ब्रह्मज्ञानस्य तत्त्वज्ञानत्वात्तत्रापि ब्रह्मविषयकावरणशक्तिनाशकत्वेन मूलाऽज्ञानस्य नाशो न स्यात्तथाच मुक्तावप्यज्ञानं स्यादित्याशयेन शंकते (नन्विति) प्रागेव–मुक्तेः प्रागेव, सर्वावस्थाः–सर्वावरणशक्तयः मुक्तावापाद्यमानमावरकाज्ञानं किं ब्रह्मावरकमुत प्रपंचावरकमविषयं वा नाद्य इत्याह (नतावदिति । तदावरणेति) ब्रह्माच्छादनेत्यर्थः । नापिद्वितीय इत्याह (नापीति । तन्मूलेति) अविद्याकारणकेत्यर्थः । नापि तृतीय इत्यभिप्रेत्य हेतुमाह अविषयाविद्यावस्थायाश्चेति) विषयिताभाववत्या अविद्यायाः स्वरूपस्येत्यर्थः । तस्याः–अविषयाविद्यावस्थायाः, तस्मात्–तूलाज्ञानस्य मूलाज्ञानावस्थाविशेषत्वस्वीकारेदोषाभावात् । अवस्थाभेदएव–स्वरूपविशेष एव । तत्परिणामः–तूलाज्ञानरूपोपादानसमसत्ताककार्य्यम् । तेनैवसह–तूलाज्ञानरूपमूलाज्ञानस्वरूपविशेषेण सहैव । अध्यासस्य–अध्यस्तशुक्तिरजतस्य तत्त्वेति । शुक्तिस्वरूपेत्यर्थः । अवस्थाभेदाः–स्वरूपविशेषतूलाज्ञानानि । सहाध्यासेन–शुक्तिरजताद्यध्यस्तैः सह अनुमोदते–अंगीकरोति ॥

मू०–मूलाविद्याकार्य्यत्वपक्षेतु मूलाविद्याया ब्रह्मसाक्षात्कारमात्रनिवर्त्त्यतया शुक्तित्वज्ञानेनानिवर्त्यतयातत्रशुक्तिज्ञानान्निवृत्तिमात्रंमुद्गरप्रहारेणघटस्येव ॥

शि० म०–(मूलाविद्येति । निवृत्तिमात्रमिति) ननु अस्मिन्पक्षे शुक्तिरजतज्ञानस्य प्रमात्वापत्तिः संसारदशायामबाधितत्वेन उत्कलक्षणसत्त्वात्, नचार्थक्रियाकारित्वमबाधितत्वं शुक्तिरजतं नार्थक्रियाकारीति नोक्तदोष इति वाच्यम्, स्वप्नोपलब्धगजादेः प्रसिद्धगजवदर्थक्रियाकारित्वात अबाधितत्वस्याप्यर्थक्रियाविशेषणत्वे आत्माश्रयाद्यनवस्थापातात् । स्वप्नस्त्रीदर्शनस्य सत्यसमृद्धिहेतुत्वदर्शनाच्च । नच प्रातिभासिकभिन्नविषयत्वमबाधितविषयपदेन विवक्षितमिति युक्तम् सुखादेरपि प्रतिभाससमयमात्रवृत्तित्वेन तज्ज्ञानस्याप्रमात्वापत्तेरिति

चेत्, न आगंतुकदोषाजन्यत्वस्य तदजन्यार्थविषयकत्वस्य वा अबाधितविषयपदेनात्र विवक्षितत्वात् । प्रातिभासिकरजतस्य चागंतुककाचादिदोषजन्यत्वान्न तज्ज्ञानेऽतिव्याप्तिः । तस्माद्युक्तं रजतस्य मूलाविद्याकार्य्यत्वम् ॥

म० प्र०–परममूले (तत्रेति) शुक्तावित्यर्थः । अस्मिन्पक्षे–शुक्तिरजतादेर्मूलाविद्याकार्य्यत्वमते, अबाधितत्वेन–शुक्तिरजतादेः स्वोपादाननाशसहितस्वनाशाप्रतियोगित्वेन, उक्तलक्षणसत्त्वात्–शुक्तिरजतादिज्ञानेऽबाधितार्थविषयकत्वरूपोक्तलक्षणसत्त्वात्, अर्थक्रियाकारित्वं–सफलचेष्टाजनकत्वम्, उक्तदोषः–शुक्तिरजतादिज्ञाने प्रमात्वापत्तिरूपोदोषः (प्रसिद्धेति) व्यावहारिकेत्यर्थः। अबाधितत्वस्य–अर्थक्रियाकारित्वरूपाबाधितत्वस्य, अर्थक्रियाविशेषणत्वे–अबाधितार्थक्रियाकारित्वमबाधितत्वमित्यर्थक्रियाविशेषणत्वे (आत्माश्रयाद्यनवस्थापातादिति) घटाद्यर्थनिष्ठविचारणीयाबाधितत्वादबाधितत्वनिर्वचनवाक्यार्थघटकार्थक्रियाविशेषणाबाधितत्वमभिन्नं भिन्नं वा । नाद्यः आत्माश्रयात् अर्थक्रियायामबाधितत्वस्य घटाद्यर्थनिष्ठविचारणीयाबाधितत्वाभिन्नत्वेऽर्थक्रियायामप्यबाधितार्थक्रियाकारित्वरूपमबाधितत्वं स्वीकरणीयम् । पुनस्तस्यामित्याश्रयादिभिः सहानवस्थाप्राप्तेरित्यर्थः (सत्यसमृद्धिहेतुत्वदर्शनाच्चेति)

यदाकर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ॥
समृद्धिन्तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने ॥

इति श्रुतेः श्रौतकाम्यकर्मव्यावहारिकवृद्धिनिरूपितकारणत्वज्ञानाच्चेत्यर्थः । प्रातिभासिकभिन्नविषयत्वं–ज्ञानकालमात्रवृत्तिभिन्नविषयत्वम्, तज्ज्ञानस्य–सुखादिप्रतीतेः (तदजन्येति) आगंतुकदोषानुत्पन्नेत्यर्थः । अत्र–उक्तप्रमाणलक्षणे, तस्मात्–शुक्तिरजतादेर्मूलाविद्याकार्य्यत्वाभ्युपगमदोषाभावात् ॥

मू०–ननु शुक्तौ रजतस्य प्रतिभाससमये प्रातिभासिकसत्ताभ्युपगमे नेदं रजतमिति त्रैकालिकनिषेधज्ञानं न स्यात् किंत्विदानीमिदं न रजतमितीदानीं घटः श्यामो नेतिवदिति चेन्न । नहि तत्र रजतत्वावच्छिन्नप्रतियोगिताकाभावो निषेधधीविषयः ॥

शि०म०–ननु रजतस्य तत्त्वज्ञानाच्छुक्तौ विनाश इत्युक्तमयुक्तं तस्य तत्रानुत्पत्तेः । दोषसहकृतया तूलाविद्यया मूलाविद्यया वा प्रतिभाससमये तत्र तदुत्पत्त्यभ्युपगमे नेदं रजतं कालत्रयेप्यत्ररजतं नास्तीति त्रैकालिकाभावप्रतीतिविरोधात, नच स्वप्नप्रपंचवत्प्रातिभा–

सिकत्वोपपत्तिः, तस्य तत्राप्यसंप्रतिपत्तेरित्याशयेन शंकते (नन्विति) किं व्यवहितस्यैव निषेधधीविषयत्वसंभवादन्यथाख्यातिःसिषाधयिषिता उत प्रातिभासिकरजते तदनुपपत्तिः । नाद्यः, व्यवहितरजतस्य पुरोवर्तिन्यप्रसक्तत्वात् । द्वितीयेपि किमधिकरणे कदाचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनो रजतस्य सत्त्वात् तस्य तदवच्छिन्नप्रतियोगिकत्रैकालिकाभावप्रतीतिविषयत्वानुपपत्तिः, प्रतीयमानाभावप्रतियोगितावच्छेदकानाश्रयत्वाद्वा । तत्राद्ये इष्टापत्तिरित्याह (नहीति) ॥

म० प्र०-(तत्त्वेति) शुक्तिस्वरूपेत्यर्थः । तस्य-रजतस्य, तत्र-शुक्तौ (तदुत्पत्तीति) रजतोत्पत्तीत्यर्थः । विरोधात्-अनुपपत्तेः । नच कालत्रयेप्यत्र रजतं नास्तीति प्रतीतेस्त्रैकालिकाभावविषयकत्वेपिनेदं रजतमिति प्रतीतिरजतपुरोवर्त्तिभेदविषयकत्वेनात्यंताभावविषयकत्वं कथमिति वाच्यम् । ययोर्भेदस्तयोः कालत्रयेप्यत्यंताभेदोनास्ति तद्धर्मयोरन्योन्यधर्मिण्यत्यंताभावश्चास्तीति व्याप्तेर्घटपटादिषु दृष्टत्वेन रजतपुरोवर्त्तिपदार्थयोरभेदात्यंताभासत्वेन नेदं रजतमिति प्रतीतेः रजतभेदविषयकत्वेपि रजतपुरोवर्त्तिपदार्थभेदात्यंताभावविषयकत्वस्य रजतत्वात्यंताभावविषयकत्वस्य च संभवादिति (प्रातिभासिकत्वेति) रजते इति शेषः, तस्य-प्रातिभासिकत्वस्य, तत्रापि-स्वाप्नप्रपंचेपि, असंप्रतिपत्तेः-अनंगीकारात्, तदनुपपत्तिः-अत्यंताभावविषयकप्रतीतिविषयत्वासंभवः तस्य-रजतस्य (तदवच्छिन्नेति) रजतत्वावच्छिन्नरजतेत्यर्थः । प्रतियोगितावच्छेदकानाश्रयत्वात्-लौकिकपरमार्थत्वलक्षणव्यावहारिकत्वाभिन्नप्रतियोगितावच्छेदकानधिकरणत्वात्, तत्र-द्वयोः पक्षयोर्मध्ये । परममूले (तत्रेति) कालत्रयेप्यत्र रजतं नास्तीति, त्रैकालिकात्यंताभावज्ञाने । अत्र विषयत्वं सप्तम्यर्थः । रजतत्वे तस्यान्वय इति परममूले (निषेधधीविषयइति) अधिकरणे यदाकदाचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसत्त्वस्यात्र कालत्रयेपि रजतेनास्तीत्यादिधीविषयप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्रैकालिकात्यंताभावविरोधित्वादिति भावः ॥

मू०-किंतु लौकिकपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताकः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमात् । ननु प्रातिभासिके रजते पारमार्थिकत्वमवगतं न वा अनवगते प्रतियोगितावच्छेदकावच्छिन्नज्ञाना-

भावादभावप्रत्यक्षानुपपत्तिः, अवगते अपरोक्षावभासस्य तत्कालीनविषयसत्तानियतत्वात्, रजते पारमार्थिकत्वमप्यनिर्वचनीयं रजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्त्वे तदवच्छिन्नाभावस्तत्र कथं वर्तते इति चेत् ॥

शि० म०–द्वितीयमनुवदति (किंत्विति) रजतस्य लौकिकपरमार्थत्वलक्षणप्रतियोगितावच्छेदकानाश्रयत्वेपि सदिदं रजतमिति तद्वत्तया ज्ञायमानत्वान्न निषेधधीविषयत्वानुपपत्तिरित्याह (लौकिकेति) लौकिकपरमार्थत्वावच्छिन्नप्रतियोगिताकप्रातिभासिकरजताभावो निषेधधीविषय इत्यर्थः । ननु लौकिकपरमार्थत्वं न प्रतियोगितावच्छेदकं प्रतियोग्यवृत्तित्वादिति चेत्, न, अभावज्ञानं येन रूपेण नियमेन प्रतियोगिनं विषयीकरोति तस्यैव प्रतियोगितावच्छेदकत्वात तथापि कथमभावज्ञानमिति चेत् किं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिप्रमित्यभावादभावज्ञानानुपपत्तिः उत व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमे अपसिद्धांतः । नाद्यः, लाघवेन तदवच्छिन्नप्रतियोगिज्ञानत्वेनैव प्रतियोगिज्ञानस्याभावधीहेतुत्वान्न द्वितीय इत्याह (व्यधिकरणेति) ॥

म० प्र०–(सदिदमिति) लौकिकपरमार्थवदिदमित्यर्थः । तद्वत्तया–लौकिकपरमार्थवत्तया । परममूले (व्यधिकरणेति) विरुद्धं प्रतियोगिभिन्नव्यावहारिकरजताद्यधिरणं यस्य धर्मस्य स व्यधिकरणः स चासौ धर्मश्च लौकिकपरमार्थत्वं तदवच्छिन्ना प्रतियोगिता यस्याभावस्य तादृशाभावाभ्युपगमादित्यर्थः (प्रतियोग्यवृत्तित्वादिति) प्रतियोग्यवृत्तिधर्मो न प्रतियोगितावच्छेदक इति भावः (येनरूपेणेति) नियमेन यद्धर्मविशिष्टप्रतियोगिनं विषयीकरोतीत्यर्थः । लाघवेन–प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगियथार्थज्ञानत्वेन प्रतियोगिज्ञानस्याभावधीहेतुत्वापेक्षया प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञानत्वेनप्रतियोगिज्ञानस्याभावधीहेतुत्वाभ्युपगमे कारणतावच्छेदके शरीरकृतादिलाघवेन (तदवच्छिन्नेति) लौकिकपरमार्थत्वरूपप्रतियोगितावच्छेदकावच्छिन्नेत्यर्थः (हेतुत्वादिति) तथाच लौकिकपरमार्थत्वप्रतियोगितावच्छेदकावच्छिन्नत्वेन प्रतियोगिनो ज्ञातत्वाच्छुक्त्यादौ प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यभावज्ञानं संभवतीति भावः ॥

म०–न पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससंभवेन रजतनिष्ठपारमार्थिकत्वोत्पत्त्यभ्युपगमात् । यत्रारो-

प्यमसन्निकृष्टं तत्रैव प्रातिभासिकवस्तूत्पत्तेरंगीकारात् । अत एवेन्द्रियसन्निकृष्टतया जपाकुसुमगतलौहित्यस्य स्फटिके भानसंभवान्न स्फटिके अनिर्वचनीयलौहित्योत्पत्तिः ॥

शि० म०–शुक्तिगतेदंताया इव तद्गतलौकिकपरमार्थताया एव रजते प्रतीत्यभ्युपगमेन तदवच्छिन्नप्रतियोगिनस्तत्रासत्त्वान्न तदवच्छिन्नप्रतियोगिकाभावानुपपत्तिरिति परिहरति (न पारमार्थिकत्वस्येति) तर्हि सर्वत्रान्यथाख्यात्यापत्तिरविशेषादित्यत आह (यत्रेति) नन्वारोप्यासन्निकर्षस्थले एवानिर्वचनीयवस्त्वभ्युपगमे स्फटिकेपिसन्निहितजपाकुसुमगतलौहित्यस्यैव भानापत्तौ अनिर्वचनीयलौहित्याभ्युपगमो विरुध्येतेत्याशंक्य कुसुमासन्निकर्षस्थले एव तत्रानिर्वचनीयलौहित्याभ्युपगमादन्यत्र तदनुत्पत्तावपि न विरोध इत्याह (अतएवेति) ॥

म० प्र०–तद्गतलौकिकपरमार्थतायाः–शुक्तिगतव्यावहारिकतायाः (तदवच्छिन्नेति) व्यावहारिकत्वाभिन्नलौकिकपरमार्थत्वावच्छिन्नेत्यर्थः । तत्र–शुक्तौ । परिहरति–अवगतपक्षमवलंब्य मूलकारो निराकारोति । परममूले (पारमार्थिकत्वस्येति) व्यावहारिकत्वस्येत्यर्थः । परममूले (अधिष्ठाननिष्ठस्येति) शुक्तिनिष्ठस्येत्यर्थः । तर्हि–शुक्तिगतव्यावहारिकतायाः शुक्तिरजते भानस्वीकारे । सर्वत्र–सर्वांशे रजतांशे इति यावत् । अविशेषात्–मिथ्यात्वेन रजततन्निष्ठव्यावहारिकत्वयोस्तुल्यत्वात् । असन्निकर्षस्थले–व्यवधानाधिकरणे । तत्र–स्फटिके । अन्यत्र–कुसुमाव्यवधानाधिकरणे स्फटिके । तदनुत्पत्तौ–लौहित्योत्पत्त्यभावे । न विरोधः–लोहितः स्फटिक इति प्रतीत्यनुत्पत्तिर्नास्ति ॥

मू०–नन्वेवं यत्र जपाकुसुमं द्रव्यान्तरव्यवधानादसन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकं लौहित्यं स्वीक्रियतामिति चेन्न इष्टत्वात् ॥

शि० म०–नन्वेवं यत्र स्फटिकमात्रं सन्निकृष्टं तदुपरंजकं तु जपाकुसुमं हस्तादिना पिहितं तत्रानिर्वचनीयलौहित्यापत्तिरिति शंकते (नन्वेवमिति । इष्टत्वादिति) नच कुसुमासन्निकर्षेपि तत्सहचरितप्रभायाः सन्निकृष्टत्वात्तद्गतलौहित्यमेव स्फटिके भासतामिति वा

Funding by IKS-MoE

च्यम्, जपाकुसुमप्रभाया एवासिद्धेः । तदुक्तं पंचपादिकाचार्य्यैः । यथा पद्मरागादिप्रभा निराश्रयाप्युन्मुखोपलभ्यते न तथा जपाकुसुमादेरिति । नन्वेवमन्तःकरणगतकर्तृत्वादेर्नित्यसन्निहितत्वेन तस्यैवात्मनि भानसंभवे कथमनिर्वचनीयकर्तृत्वाभ्युपगम इति चेत् न, किं कर्तृत्वादेरात्मन्यन्यथाख्यातिः सिषाधयिषिता पारमार्थिकता वा । नाद्यः, इष्टत्वात् । नद्वितीयः, अहंकारस्यात्मन्यध्यस्तत्वेनानिर्वचनीयतया तद्धर्मस्य कर्तृत्वादेः सुतरामनिर्वचनीयत्वात् । नहि महेन्द्रजालनिर्मितस्य राज्ञस्तदुपकरणं परमार्थसद् भवति । यद्वा आत्मनः कर्तृत्वादिप्रतिपादकशास्त्रप्रामाण्यायैव वियदादिवद्व्यावहारिकं तदभ्युपेयते । नच कर्तृद्वयव्यवहारापत्तिः धर्मिणोरात्मान्तःकरणयोरैक्याध्यासेन धर्मिभेदानवभासनात् ॥

म० प्र०—यत्र—यादृशं । सन्निकृष्टं—इन्द्रियसंबद्धम्, उपरंजकं स्फटिकेलौहित्यजनकम् । तत्र—तस्मिन्स्फटिके । तत्सहचरितप्रभायाः—कुसुमाव्यभिचारितकुसुमप्रभायाः । सन्निकृष्टत्वात्—इन्द्रियसंबद्धत्वात् (तद्गतेति) कुसुमगतेत्यर्थः (पद्मरागेति) रक्तमणीत्यर्थः (निराश्रयेति) अग्निज्वालावन्मणिप्रभामणिपृथक्त्वेनोपलभ्यते । उन्मुखा—ऊर्द्ध्वमुखाप्युपलभ्यते इत्यर्थः । तद्धर्मस्य—अहंकाराधिकरणकस्य । तदुपकरणं—प्रसिद्धछत्राद्युपकरणम् । परमार्थसत्—व्यावहारिकम् (शास्त्रप्रामाण्यायेति) "कर्त्ता शास्त्रार्थवत्त्वात्" इत्यादिशास्त्रनिष्ठप्रमाजनकत्वायेत्यर्थः । इदं हि सूत्रं द्वितीयाध्यायस्य तृतीये पादेस्थितं आत्मनोऽसंगत्वश्रुतीनां कर्तुरिष्टसाधनबोधकविधिवाक्यैर्विरोधसंदेहे सांख्योक्तबुद्धिमात्रनिष्ठकर्तृत्वव्यावर्त्तनेनात्मन एव कर्तृत्वमत्र सूत्रे साध्यते तच्च कर्तृत्वमौपाधिकमित्युत्तराधिकरणे वक्ष्यते इति । नात्मनोऽसंगत्वश्रुतिभिर्विरोध इत्यभिप्रायेण सिद्धांतयति (कर्त्रिति) आत्मैव कर्त्ता न बुद्धिः कर्त्तुरिष्टोपायबोधकविधिशास्त्रस्यार्थवत्त्वात्, आत्मनः कर्तृत्वे विधिशास्त्रमर्थवद्भवत्यन्यथा बुद्धिः कर्त्री आत्मा फलभोक्तेति कर्तुरिष्टोपायबोधकशास्त्रमनर्थकमेव स्यात्तस्मान्न केवलबुद्धेः कर्तृत्वं किंतु बुद्धिविशिष्टात्मन इति सूत्रार्थः ॥

मू०—एवं प्रत्यक्षभ्रमान्तरेष्वपि प्रत्यक्षसामान्यलक्षणानुगमो
यथार्थप्रत्यक्षलक्षणासद्भावश्च दर्शनीयः ॥

शि० म०—ननु कुसुमसन्निकर्षस्थले स्फटिकलौहित्यप्रतीतिरन्यथाख्यातिरूपत्वे तत्र प्रत्यक्षसामान्यलक्षणस्याव्याप्तिः लौहित्यतदाकारवृत्त्योर्भिन्नदेशस्थत्वेन तदुपहितचैतन्ययोर्भेदात् । तथा शंखपीतत्वभ्रमे अव्याप्तिः पीतत्वादेर्गोलकादिदेशस्थितपीतद्रव्यादिनिष्ठत्वेन तदुप-

हितचैतन्यस्य तदाकारवृत्त्यवच्छिन्नचैतन्यस्य च परस्परं भेदात् । किंचान्यथाख्यात्यभ्युपगमे तद्विषयस्य लौहित्यादेः संसारदशायामबाधितत्वेन प्रमात्वापत्तिरित्यत आह (एवमिति) अयमत्राशयः—न तावत्स्फटिकलौहित्यभ्रमे प्रत्यक्षलक्षणस्याव्याप्तिः अयो दहतीतिवदस्यानुभूयमानारोपत्वेन लोहितत्वेन रूपेण कुसुमतादात्म्यविषयत्वात् । नच लोहितभेदग्रहादारोपानुपपत्तिः, विवेकग्रहस्य सोपाधिकाध्यासे अप्रतिबंधकत्वात । नापि पीतत्वादिभ्रमेलक्षणाव्याप्तिः, शंखं प्रतिस्फालितानां नयनरश्मीनां पीतद्रव्यमाश्रयतामेव दोषवशेन शंखे तद्गुणपीतत्वादिग्राहकत्वेन पीतत्वतदाकारवृत्त्योर्भिन्नदेशस्थत्वाभावात् ॥

म० प्र०—तत्र—लोहितः स्फटिक इति प्रतीतौ । भिन्नदेशस्थत्वेन—लौहित्यं कुसुमे लौहित्याकारवृत्तिस्तु स्फटिके इति भिन्नाधिकरणकत्वेन (तदुपहितेति) लौहित्यतदाकारवृत्त्युपहितेत्यर्थः । पीतत्वादेः—पीतगुणादेः (तदुपहितेति) पीतगुणाद्युपहितेत्यर्थः । अन्यथाख्यात्यभ्युपगमे—लोहितःस्फटिक इत्यादिज्ञानस्यान्यथाख्यातिस्वरूपत्वाभ्युपगमे सति । तद्विषयस्य-लोहितः स्फटिक इत्यादिप्रतीतिविषयस्य नैयायिकमते लोहितः स्फटिक इत्यादिभ्रमस्यारोपात्पूर्वमपरोक्षकुसुमनिष्ठलौहित्यविषयकत्वेनानुभूयमानारोपत्वं शुक्त्यादाविदं रजतमित्यादिभ्रमस्य तु नैयायिकमते स्मृतारोपत्वं वेदांतिमते तु तस्यानिर्वचनीयारोपत्वमिति विभागमभिप्रेत्य नाव्याप्तिरिति प्रतिज्ञायां हेतुमाह (अस्येति) लोहितः स्फटिक इत्यादिभ्रमस्येत्यर्थः । अनुभूयमानारोपत्वेन—अनुभवविषयज्ञानत्वेन (लोहितत्वेनरूपेणेति) लौहित्यस्वरूपविशिष्टकुसुमेत्यर्थः । धर्मिधर्म्यन्तरप्रतिबिंबैक्याध्यासयोरन्यतरस्यैव धर्माध्यासव्यापकत्वेन स्फटिके कुसुमप्रतिबिंबग्रहणेन तद्धर्माध्यासोपपत्त्याऽभिन्नदेशस्थत्वेन लोहितः स्फटिक इति भ्रमे नाव्याप्तिरिति भावः । स्फालितानाम्—संलग्नानाम् । पीतद्रव्यमाश्रयताम्—पीतद्रव्यवताम्, तद्गुणपीतत्वादिग्राहकत्वेन—नयनरश्म्याश्रितद्रव्यगुणपीतरूपादिविषयकज्ञानजनकत्वेन उभयविधोक्तभ्रमेऽन्यत्रस्थितस्यान्यत्र भानरूपत्वेन पीतलौहित्यादिसंबंधस्यापि स्फटिकादौ सत्त्वान्नाव्याप्तिरिति भावः ॥

मू०--उक्तं प्रत्यक्षं प्रकारांतरेणद्विविधं इन्द्रियजन्यं तदजन्यं चेति । तत्रेन्द्रियाजन्यं सुखादिप्रत्यक्षं मनस इन्द्रियत्वनिराकरणात् ॥

Funding by IKS-MoE

शि० म०–यत्तु स्फटिकलौहित्यादिभ्रमे प्रमालक्षणस्यातिव्याप्तिरिति तत्र न तावत्संसर्गांशेतिव्याप्तिः तस्य पुरोवर्तिनि बाधितत्वात्। नापि लौहित्यांशे तस्याबाधितत्वेपि अनधिगतत्वाभावात् । एवं योग्यस्वाकारवृत्त्युपहितविषयावच्छिन्नचैतन्याभिन्नत्वं शुक्तिरूप्यशंखपीतत्वादिप्रत्यक्षभ्रमव्यापकत्वात् प्रमाणचैतन्यस्य तत्तद्विषयांशे प्रत्यक्षत्वप्रयोजकमित्युक्तं, संप्रति तदेव प्रत्यक्षज्ञानं पुनर्विभजते (उक्तंप्रत्यक्षमिति । इन्द्रियेति) नचात्र प्रमाणाभावः, रूपाद्युपलब्धयःकरणसाध्याः कार्य्यत्वात्, घटवदित्यनुमानस्य "तमुत्क्रामंतं सर्वे प्राणा अनूत्क्रामंति" इत्यागमस्य चेन्द्रियसद्भावे प्रमाणत्वात् । तानि गोलकमात्राणीति सौगताः । तच्छक्तयः इति मीमांसकाः । न तावद्गोलकमात्रमिन्द्रियं तद्विरहिणामपि सर्पादीनां वृक्षादीनांच शब्दाद्युपलब्धेः । अत एव न तन्निष्ठाशक्तिः तानि गोलकाद्यतिरिक्तानि शक्तिमद्द्रव्यांतराणि सर्वगतानीति योगाचार्य्याः प्रतिपेदिरे तदप्यपेशलं प्रमाणाभावात्। नन्विन्द्रियाणि सर्वगतानि सर्वत्र दृष्टकार्य्यत्वादाकाशादिवदित्यनुमानमिति चेत् न, हेतोरसिद्धत्वात् । यत्र शरीरं तत्र सर्वत्र दृष्टकार्य्यत्वस्य च शरीरेपि सत्त्वात् । नचेन्द्रियाणि सर्वगतानि परोपाधिगमनत्वादाकाशवदिति वाच्यम्, शरीरोपाधिगमनेषु शरीरावयवेष व्यभिचारात् ॥

म० प्र०–तत्र–पूर्वोक्तिविषये लोहितः स्फटिक इत्यादि भ्रमे । तस्य–लौहित्यादिसंसर्गस्य, पुरोवर्त्तिनि–स्फटिकादौ, बाधितत्वात्–वस्तुतोऽत्यंताभावप्रतियोगित्वात् (अनधिगतत्वाभावादिति) कुसुमनिष्ठज्ञातलौहित्यस्यैव स्फटिके भानादिति भावः (योग्येति) प्रमाणचैतन्यस्य योग्यस्वाकारवृत्त्युपहितविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तद्विषयांशे प्रत्यक्षत्वप्रयोजकमित्यन्वयः (स्वाकारेति) विषयाकारेत्यर्थः । व्यापकत्वात्–उक्तप्रत्यक्षत्वव्यवहारप्रयोजकस्य वृत्तित्त्वात् (विषयांशेइति) विषयांशनिरूपितेत्यर्थः (प्रत्यक्षत्वप्रयोजकमिति) प्रत्यक्षत्वप्रकारकशब्दात्मकव्यवहारप्रयोजकमित्यर्थः । अत्र–गोलकाद्यतिरिक्तेन्द्रियसत्त्वे । तद्विरहिणाम्–कर्णादिगोलकरहितानाम्, प्रमाणाभावात्–इन्द्रियाणां व्यापकत्वे प्रमाणासत्त्वात् (आकाशादिवदिति) यथाऽकाशेसर्वत्र शब्दरूपदृष्टकार्य्यकत्वं सर्वत्रास्थितिरूपदृष्टकार्य्यकत्वं च तद्वदित्यर्थः । ननु यत्र शरीरं तत्र सर्वत्र दृष्टकार्य्यत्वादिति हेतोर्विवक्षितत्वेनेन्द्रियाणां सर्वगतत्वंसेत्स्यतीत्याशंक्याह (यत्रशरीरमिति । शरीरेपिसत्त्वादिति) तादात्म्यसंयोगादिसंबंधेन यत्रशरीरं तत्र भोगादिरूपदृष्टकार्य्यकत्वस्य शरीरे सत्त्वेन तवमते शरीरस्य व्यापकत्वं स्यादिति भावः ॥

Funding by IKS-MoE

शि० म–सर्वगतत्वे युगपत्सर्वविषयोपलब्धिप्रसंगाच्च । तान्यणुपरिमाणानीत्यन्ये। तदयुक्तं विषयावभासस्याणुमात्रदेशतापत्तौ सर्वशरीरव्यापिशैत्योपलंभानुपपत्तेः । युगपच्चक्षुषः सर्वविषयसंबंधाभावेन समूहालंबनाभावप्रसंगाच्च । चक्षुःश्रोत्रयोर्ध्रुवभेर्य्यादिदेशपर्य्यंतगमने सद्य एवांधत्वापत्तेश्च । तानि मध्यमपरिमाणान्यप्यहंकारोपादानानीति सांख्याः। तदपि मानहीनं पुराणवचनं मानमिति चेत् न, भूतविकारत्वप्रत्यक्षश्रुतिविरोधेन तस्य स्वार्थे अप्रमाणत्वात्। ततश्च परिशेषाद्भौतिकत्वसिद्धिः। इन्द्रियाणि प्रत्येकभूतारब्धानीति वैशेषिकादयः। तदप्ययुक्तं प्रमाणाभावात्। चक्षुस्तैजसं रूपादिषुपंचसु मध्ये रूपस्यैवाभिव्यंजकत्वात् प्रदीपप्रभावदित्यनुमानस्य च विपक्षे बाधकाभावेनाप्रयोजकत्वात्। ततश्चेन्द्रियाणां सिद्धं पांचभौतिकत्वमिति ॥

म० प्र०–पुराणवचनम् ॥

त्रिविधोयमहंकारो महत्तत्वाद्धि जायते ॥
इन्द्रियाणां ततः सृष्टिर्गुणद्वारा महामुने ॥

इतिपुराणवचनम् । प्रत्यक्षश्रुतिविरोधेन–श्रोत्रमाकाशे वायौत्वगग्नौचक्षुरप्सु जिह्वा पृथिव्यां घ्राणमिति प्रत्यक्षश्रुतिविरोधेन आकाशे यः सात्त्विकांशस्तस्माच्छ्रोत्रमुत्पद्यते। एवं वायौ त्वगित्यादिवाक्यांतरेष्वर्थोबोध्य इति प्रत्यक्षश्रुत्यर्थः । तस्य–पुराणवचनस्य । स्वार्थे–इन्द्रियाणामहंकारिकत्वरूपार्थे । प्रमाणाभावात्–इन्द्रियाणां प्रत्येकभूतजन्यत्वे प्रमाणासत्त्वात्, तैजसं–तेजोमात्रकायम्, (रूपादिष्विति) रूपस्यैवाभिव्यंजकत्वादित्युक्ते चक्षुषो घटादिरूपत्वरूपाभावाद्यभिव्यंजकत्वेन स्वरूपासिद्धिवारणायमध्यांतोपादानम्, अदृष्टादौ व्यभिचारवारणायैवकारः । विपक्षे–चक्षुर्वृत्तितेजोमात्रकार्य्यत्वरूपसाध्याभावे । बाधकाभावेन–अनुकूलतर्करूपबाधकाभावेन । नच यत्र तेजोमात्रकार्य्यत्वाभावस्तत्र रूपादिपंचसु मध्ये रूपस्यैवाभिव्यंजकत्वाभाव इति व्याप्तेर्मनसि दृष्टत्वेन यदि चक्षुषस्तेजोमात्रकार्यत्वं न स्यात्किंतु पंचभूतकार्यत्वं स्यात्तर्हि रूपादिषु पंचसु मध्ये रूपस्यैवाभिव्यंजकत्वं न स्यात्किंतु सर्वविषयाभिव्यंजकत्वं स्यादित्यनुकूलतर्कसत्त्वेन कथमनुकूलतर्काभाव इति वाच्यम् । घटादौ पंचभूतकार्य्यत्वेपि रूपादिपंचविषयग्राहकत्वाभावेनोक्तव्याप्तेरभावेनोक्ततर्कानुत्थानात्, नचेन्द्रियत्वे सति पंचभूतकार्य्यत्वं यत्र तत्र रूपादिसर्वविषयाभिव्यंजकत्वमिति व्याप्तेर्मनसि सत्त्वेनोक्ततर्कोत्थानसंभव इति वाच्यम् । मन्मते मनस इन्द्रियत्वाभावेन व्याप्तिग्रहाधिकरणदृष्टांताभावेनोक्तव्याप्त्यसिद्ध्योक्ततर्कोत्थानासंभवादिति । अप्रयोजकत्वात्–तेजोमात्रकार्यत्वरूपसाध्यं साधयितुमक्षमत्वात् (पांचभौतिकत्वमिंति) नच तवमतेपि चक्षुरादीनां पांचभौतिकत्वे प्रमा-

णाभाव इतिवाच्यम् । शारीरकतृतीयाध्यायद्वितीयपादस्थद्वाविंशतिसंख्याक "प्रकृतैतावत्त्वं हि प्रतिषेधति ततोब्रवीति च भूयः" इति सूत्रभाष्यव्याख्यायां रत्नप्रभाख्यायाम् "अथामूर्त्तवायुश्चांतरिक्षं चैतदमृतमेतद्यदेतत्र्यंतस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैषरसोय एष एतस्मिन्मंडले पुरुषस्त्यस्यैषरस" इत्यादिश्रुतिष्वमूर्त्तशब्दस्य लक्षणयाऽपंचीकृतपंचसूक्ष्मभूतपरत्वं ततश्चाथामूर्तमित्यादिश्रुतौ हिरण्यगर्भस्यामूर्तरसत्त्वोक्त्या करणानां पांचभौतिकत्वसिद्धिरित्यनेन प्रकारेण कैश्चिदाचार्य्यैः करणानां पांचभौतिकत्वस्य श्रुतिप्रमाणसिद्धतयोक्तत्वेनकरणानां पांचभौतिकत्वस्य श्रुतिप्रमाणसिद्धत्वादिति ॥

मू०–इन्द्रियाणि पंच घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि सर्वाणि चेन्द्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयन्ति तत्र घ्राणरसनत्वगात्मकानीन्द्रियाणि स्वस्थानस्थितान्येव गंधरसस्पर्शोपलम्भान् जनयन्ति चक्षुःश्रोत्रे तु स्वत एव विषयदेशं गत्वा स्वस्वविषयं गृह्णीतः श्रोत्रस्यापि चक्षुरादिवत्परिच्छिन्नतया भेर्यादिदेशगमनसंभवात् ॥

शि० म०–तानि षट् इति नैयायिकादयस्तान्निराचष्टे (पंचेति) इन्द्रियाण्यप्राप्यकारीणीति सुगताः कल्पयंति तान्प्रत्याह (सर्वाणि चेति) अयं भावः–न तावत्स्पर्शरसनघ्राणेन्द्रियाणामसंयुक्तार्थग्राहकत्वं दूरत एव, स्पर्शरसगंधोपलब्धिप्रसंगात् । अतएव न चक्षुःश्रोत्रयोरप्राप्यकारित्वं, रसनादिवत्तयोरपि संयुक्तार्थग्राहकत्वानुमानात् । ननु सर्वेन्द्रियाणां संयुक्तार्थग्राहकत्वाविशेषेपि कस्यचित्स्वस्थाने विषयग्राहकत्वं कस्यचिद्दूरत इति विभागः कथमित्याशंक्य फलबलकल्प्यस्वभावविशेषादित्याह (तत्रेति । चक्षुःश्रोत्रेत्विति) नच चक्षुःश्रोत्रयोर्विषयदेशं प्राप्तयोरेव स्वस्वविषयग्राहकत्वे झटित्यादिध्रुवादिमंडलानुभवो न स्यादिति वाच्यम्, चक्षुरादेरतिस्वच्छद्रव्यत्वेन सावित्रकिरणवच्छीघ्रगतिसंभवात् । ननु चक्षुरिन्द्रियं भवतु परिच्छिन्नत्वाद्दूरदेशं गत्वाविषयग्राहकं सर्वगतं तु गगनं कर्णशष्कुल्युपाधिना श्रोत्रपदवाच्यं कथं भेर्यादिदेशं गत्वा शब्दं ग्राहयेदित्याशंक्याह (श्रोत्रस्यापीति) ॥

म० प्र०-(अप्राप्येति) विषयेण सह यः स्वसंबंधस्तमलब्ध्वा विषयेण सह स्वसंबंधं विनेति यावत्, कारीणि-ज्ञानलक्षणस्वकार्य्यजनकानि, सुगताः-बुद्धमतानुसारिणः असंयुक्तार्थेति-स्वासंबद्धविषयेत्यर्थः (दूरतइति) इंद्रियसंबंधराहितस्पर्शाद्याश्रये विद्यमाना येस्पर्शादयस्तेषां प्रत्यक्षज्ञानापत्तेरित्यर्थः । अतएव-वक्ष्यमाणहेतोरेव, तयोः-चक्षुःश्रोत्रयोः, अनुमानात्-चक्षुःश्रोत्रे स्वसंयुक्तार्थग्राहके इन्द्रियत्वाद्रसनादिवदित्यनुमात्, अविशेषेपि-समानेपि, कस्यचित्-रसनादेः (स्वस्थानेविषयग्राहकत्वमिति) स्वस्थाने-स्वगोलके स्वाश्रयसंयुक्तत्वसंबंधेन स्थितो यो गंधादिविषयस्तद्विषयकापरोक्षज्ञानजनकत्वमित्यर्थः । कस्यचित् -चक्षुरादेः, दूरतः-स्वगोलकव्यवहितदेशे । अस्य विषयग्राहकत्वमिति पूर्ववाक्येनान्वयः, विभागः-भेदः (फलबलकल्प्यस्वभावविशेषादिति) स्वाश्रयसंयुक्तत्वसंबंधेन स्वगोलके प्राप्तो यः स्पर्शादिविषयस्तस्मिन्विषये यज्ज्ञानं तस्य जननमुत्पत्तिस्तद्रूपं त्वगादीनां यत्कार्य्यं चक्षुरादिगोलकदूरदेशस्थितघटादिकार्य्यज्ञानजननरूपं चक्षुः श्रोत्रयोर्यच्च कार्य्यं तस्य द्विविधकार्य्यरूपफलस्य यद्बलमिन्द्रियेषु स्वभावविशेषं विनानुपपत्तिरूपमर्थापत्तिप्रमाणं तेन जन्यार्थापत्तिप्रमारूपायाकल्पना तद्विषयस्वभावविशेषात् तत्तदिन्द्रियवृत्तितत्तद्विषयविषयकज्ञानजननानुकूलासाधारणधर्मरूपस्वभावभेदादयंविभाग इत्यर्थः । परममूले (तत्रेति) इन्द्रियेषु मध्ये इत्यर्थः परममूले (स्वतइति) स्वसामर्थ्यादेवेत्यर्थः (नस्यादिति) ध्रुवादिदेशगमनेपि विलंबसंभवादिति शेषः। परममूले (संभवादिति) स्वस्वविषयं गृह्णीत इत्युक्तेरनुपपत्तिर्नेतिशेषः ॥

मू०-अतएवानुभवो भेरीशब्दो मया श्रुत इति वीचितरंगादिन्यायेन कर्णशष्कुलीप्रदेशेऽनंतशब्दोत्पत्तिकल्पनाया गौरवं भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य भ्रमत्वकल्पनागौरवं च स्यात् तदेवं व्याख्यातं प्रत्यक्षम् ॥

इति श्रीमद्वेदान्तपरिभाषायाः प्रत्यक्षपरिच्छेदः ॥ १ ॥

शि० म०-ननु भेरीदंडसंयोगादाकाशसमवाये भेरीदेशे कश्चिच्छब्दः संजायते, स चासमवायिकारणतया शब्दान्तरमारभते, एवं सोपीति परंपराश्रोत्रपथमवतीर्णस्य शब्दस्य तेनोपलंभः भेरीशब्दो मया श्रुत इति धीरत्र भ्रांतैवेति तार्किकप्रक्रियामाशंक्य निरस्यति (वीचितरंगादिन्यायेनेति) कदंबमुकुलन्यायश्चादिपदार्थः (भ्रमत्वकल्पनेति) नेदंरजतमितिवन्नायं भेरीशब्द इति बाधकप्रत्ययाभावेन तस्य भ्रमत्वक-

Funding by IKS-MoE

ल्पनमयुक्तमिति भावः । परमप्रकृतमुपसंहरति (तदेवमिति) प्रत्यक्षप्रमानिरूपणात्तत्करणत्वेन प्रत्यक्षप्रमाणं निरूपितमित्यर्थः ॥

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते
वेदान्तशिखामणौ प्रत्यक्षपरिच्छेदः ॥ १ ॥

म०प्र०–परममूले (अतएवेति) श्रोत्रस्यभेर्यादिदेशेगमनसंभवादेवेत्यर्थः । परममूले (अनुभवः) उपपद्यते इतिशेषः (आकाशसमवायइति) आकाशे समवायो यस्य सतथा आकाशसमवायीत्यर्थः । भेरीदेशे–भेर्यवच्छिन्नाकाशे, सचभेर्यवच्छिन्नाकाशे जायमानशब्दस्तु, सोपि–शब्दांतरमपि–अस्य शब्दांतरमारभते इति पूर्ववाक्येनान्वयः। श्रोत्रपथं–कर्णशष्कुलीरूपं श्रोत्रेंद्रियस्थानम्, अवतीर्णस्य–प्राप्तस्य, तेन–श्रोत्रेन्द्रियेण, उपलंभः–ज्ञानम्, नन्वेवं भेरीशब्दोमया श्रुत इत्यनुभवस्यप्रामाण्यं न स्यादित्याशंकामिष्टापत्त्या परिहरति (भेरीशब्दइति) प्रक्रियाम्–पूर्वोत्तरभावरूपं क्रमं सिद्धांतं वा। परममूले (वीचितरंगन्यायेनेति) अत्र वीचितरंगशब्दौ "भंगस्तरंग ऊर्मिर्वास्त्रियां वीचिः" इत्यमरकोशात्स्वल्पतरंगवाचकौ । तथाच वीच्यनंतरं तरंगो वीचिर्वीच्यनंतरं पुनर्वीचिरेवं तत्र यथा यो न्यायः पुनः पुनरुत्पत्तिरंतिमवीच्या तद्धारोपशांतिश्चेति द्विविधरूपोधर्मस्तद्वच्छब्दानामपि पूर्वपूर्वशब्देनोत्तरोत्तरशब्दस्योत्पत्तिरंतिमशब्देन शब्दधाराया निवृत्तिश्चेत्याकारको द्विविधो: धर्मस्तद्धटकीभूतपूर्वपूर्वशब्देनोत्तरोत्तरशब्दस्योत्पत्तिरूपो यो धर्मस्तेनेत्यर्थः । परममूले (प्रदेशेइति) प्रदेशसंबंधार्थमित्यर्थः (कदंबमुकुलन्यायइति) 'कुड्मलोमुकुलोस्त्रियाम्" इत्यमरकोशान्मुकुलशब्दो विकासोन्मुखप्रौढकलिकावाचकस्तथाच कदंबसंज्ञकवृक्षसंबंधिविकासोन्मुखदृढकलिकानां यथा चतुर्दिगवच्छेदेन विकासस्तद्वच्चतुर्षु दिक्षु शब्दोत्पत्तिरित्यर्थः। तस्य–भेरीशब्दो मया श्रुत इति प्रत्यक्षस्य (तत्करणत्वेनेति) प्रत्यक्षप्रमाऽसाधारणकारणत्वप्रकारकनिरूपणविषयप्रत्यक्षप्रमाणमित्यर्थः । ननु प्रत्यक्षप्रमाया अनिरूपणात्कथं प्रत्यक्षप्रमाकरणत्वेन प्रत्यक्षप्रमाणनिरूपितमित्याशंक्य मैवमित्यभिप्रेत्याह प्रत्यक्षप्रमानिरूपणादिति) परममूले (तदेवमिति) अतीतग्रंथे प्रत्यक्षप्रमायानिरूपणेत्यर्थः । परममूले (प्रत्यक्षमिति) प्रत्यक्षप्रमाणमित्यर्थः ।

श्रीमतो ब्रह्मविज्ञानपादपादसरोरुहान् ।
नौमि येषां रजः पुंसां निष्कुरुते रजस्तमः ॥ १ ॥

इति श्रीमद्ब्रह्मविज्ञानाख्यविद्याप्रदगुरुप्रसादलब्धोदासीनामरदासशब्दवाच्याविर्भूतायां वेदांतपरिभाषाख्यग्रंथस्य शिखामण्याख्यटीकायाः प्रत्यक्षपरिच्छेदस्यमणिप्रभाख्यायां प्रत्यक्षपरिच्छेदः ॥ १ ॥

Funding by IKS-MoE

अथानुमानपरिच्छेदः २.

मू०—अथानुमानं निरूप्यते अनुमितिकरणमनुमानम् ॥

शि० म०—एवं सर्वप्रमाणज्येष्ठतया प्रथमं प्रत्यक्षप्रमाणं निरूपितम् । इदानीं शिष्यावधानार्थमनुमाननिरूपणं क्रियते इति प्रतिजानीते (अथेति) प्रत्यक्षानंतरमित्यर्थः । सर्वमतसाधारणं लक्षणमाह (अनुमितीति) ननुनानुमितिकरणत्वमपि तल्लक्षणम् ॥

पद्मानननं विस्तृतपद्मनाभं पद्मांकपद्मे धृतपादपद्मम् ॥
पद्मस्रजामण्डितबाहुमध्यं कृष्णं नुमः पद्मविशालनेत्रम् ॥ १ ॥
येषां तु पादरजसा विरजस्तमे मे भानोः प्रभेव सलिले विमले प्रभेयम् ॥
स्वांते विभाति खलु हंत शिखामणेश्च विद्याप्रदान्प्रणयतःप्रणमाम्यहं तान् ॥ २ ॥

प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसंगतिमभिप्रेत्य वृत्तानुवादपूर्वकं परममूलेऽथानुमानं निरूप्यते इति प्रतिज्ञायाःप्रयोजनं सूचयति (एवमित्यादिना ज्येष्ठतयेति) प्रत्यक्षस्य सर्ववादिसंमतत्वेनानुमानादिप्रमाणोपजीव्यत्वेन च ज्येष्ठतयेत्यर्थः । प्रथमम्—अनुमानादिप्रमाणनिरूपणस्यादौ । निरूपितम्—मूलकारकर्तृकनिरूपणविषयीभूतम् । इदानीम्—प्रत्यक्षनिरूपणोत्तरकाले (शिष्यावधानार्थमिति) अन्यत्र चित्तसंचारराहित्यपूर्वकप्रकृतग्रंथशुश्रूषावत्त्वरूपावधानार्थमित्यर्थः । परममूले (अथानुमानंनिरूप्यतेइति) अथशब्द आनंतर्य्यार्थकः आनंतर्य्यंच स्वाव्यवहितोत्तरकालवृत्तित्वम्, प्रकृते स्वं प्रत्यक्षनिरूपणं तथाच प्रत्यक्षलक्षणस्वरूपप्रामाण्यप्रकारकप्रत्यक्षाविशेष्यकज्ञानानुकूलव्यापारध्वंसाधिकरणकालिकोऽस्मदर्थग्रंथकृद्वृत्तिकृतिजन्यो वर्त्तमानकालीनोनुमानलक्षणस्वरूपप्रामाण्यप्रकारकानुमानविशेष्यकज्ञानानुकूलो यो व्यापारस्तद्विषयोऽनुमानमित्यर्थः । प्रत्यक्षानंतरम्—प्रत्यक्षनिरूपणानंतरम् । परममूले (अनुमितिकरणमनुमानमिति) अनुमितित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितव्यापारवत्त्वसमानाधिकरणा याजनकता तद्विशिष्टत्वमनुमितिकरणत्वमित्यर्थः । नच करणत्वं व्यापारवत्त्वे सत्यनन्यथासिद्धनियतपूर्ववृत्तित्वं तथाच घटादिप्रत्यक्षं प्रति घटादिविषयस्य घटादिकार्य्यं प्रत्युपादानकारणकपालादेश्च करणत्वं स्यात्प्रत्यक्षविषयघटादेर्व्यापारवत्त्वे सत्यनन्यथासिद्धनियतपूर्ववृत्तित्वादिति वाच्यम् । इष्टत्वात्, नचं तर्हिं कारणकरणविभागः कथमिति वाच्यम्, कारणकरणरूपधर्म्यभेदेपि कारणत्वकरणत्वरूपधर्मभेदात् एकस्यैव दंडादेर्व्यापारवत्त्वे सत्यनन्यथासिद्धनियतपूर्ववृत्तित्वेन

Funding by IKS-MoE

रूपेणकरणत्वव्यवहारस्यानन्यथासिद्धनियतपूर्ववृत्तित्वमात्रेण कारणत्वव्यवहारस्य च संभवेन कारणकरणविभागानुपपत्त्यसंभवादिति (अनुमितिकरणत्वमपीति) अत्रापि शब्दोदृष्टांतार्थकः व्याप्तिज्ञानादीनामनुमानत्वाभाववदित्यर्थः ॥

शि० म०–तद्घटकानुमितेर्लक्षणाभावेनदुर्निरूपणत्वात् । नच व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं लक्षणं तत्त्वेन तज्जन्यत्वमिह विवक्षितमित्यनुव्यवसायादौ विषयत्वादिना तज्जन्येनातिव्याप्तिः ॥

म० प्र०–(तद्घटकानुमितेरिति) अनुमितिकरणत्वरूपानुमानत्वघटकानुमितेरित्यर्थः । घटकत्वं तद्विषयताव्यापकविषयताकत्वम्, प्रकृते तद्विषयताऽनुमितितत्करणरूपसमुदायेऽनुमितिकरणमनुमानमिति ज्ञानस्य विषयता तस्याव्यापकाविषयताऽनुमितिरितिज्ञानविषयतां यस्या अनुमितेः सा तथा तस्याः भावस्तत्त्वमिति । घटितत्वं च तद्विषयताव्याप्यविषयताकत्वम्, प्रकृते तद्विषयताऽनुमितिरितिज्ञानस्यानुमितिनिष्ठाव्यापकाविषयता तस्या व्याप्याविषयतानुमितितत्करणरूपसमुदायनिष्ठाविषयता यस्यानुमितितत्करणरूपसमुदायस्य स तथा तस्य मावस्तत्त्वमिति । नैयायिकमतमाश्रित्यानुमितिलक्षणमाह (व्याप्तिविशिष्टपक्षधर्मताज्ञानेति) अत्र व्याप्तिविशिष्टपक्षधर्मता व्याप्तिविशिष्टपक्षधर्मता व्याप्तिविशिष्टाचासौ पक्षधर्मता व्याप्तिविशिष्टपक्षधर्मता व्याप्तिविशिष्टश्चासौ पक्षधर्मो व्याप्तिविशिष्टपक्षधर्मस्तस्य भावस्तत्त्वेतिसप्तमीतत्पुरुषादिसमासांगीकारे पर्वतो धूमवान्वह्नेरित्यादौ व्यभिचारि लिंगे व्याप्त्यभावेन व्यभिचारिलिंगजन्यानुमितौ व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वाभावेनाव्याप्तिरतो व्याप्तिविशिष्टपदस्य लक्षणया व्याप्तिविषयकपरत्वमवलंब्य ज्ञानांतपदेन कर्मधारयांगीकर्तव्य इति । पर्वतो वह्निव्याप्यधूमवान्नवेति संशयात्मकव्याप्तिविषयकपक्षधर्मताज्ञानस्यानुमितिकरणताभ्रांतिवारणाय ज्ञानपदेन निश्चयोग्राह्यः निश्चयत्वं च संशयभिन्नज्ञानत्वम्, वह्निव्याप्यधूमवान्पर्वतः पर्वतेवह्निव्याप्य इत्याद्यात्मको यो व्याप्त्यवच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यता पक्षतावच्छेदकावच्छिन्नप्रकारतानिरूपितव्याप्त्यवच्छिन्नविशेष्यता एतदन्यतरविशिष्टनिश्चयस्तज्जन्यत्वमिति निर्गलितोर्थ इति । ननु व्याप्तिविषयकपक्षधर्मतानिश्चयजन्यत्वस्य वह्निव्याप्यधूमवंतं पर्वतं पश्यामीति परामर्शप्रत्यक्षे व्याप्तिविषयकपक्षधर्मतास्मृतौ परामर्शध्वंसे च सत्त्वादतिव्याप्तिरित्याशंक्याह (तत्त्वेनेति) व्याप्तिविषयकपक्षधर्मतानिश्चयत्वावच्छिन्ना या व्याप्तिविषयकपक्षधर्मतानिश्चयनिष्ठजनकतातन्निरूपितजन्यत्वमिहोक्तलक्षणवाक्ये विवक्षितमित्यर्थः (अनुव्यवसायादाविति) अत्रादिपदेन व्याप्तिविषयकपक्षधर्मतास्मृतिव्याप्तिविषयकपक्षधर्मतानिश्चयध्वंसयोर्ग्रहणमिति (विषयत्वादिनेति) अत्र प्रतियोगित्वस्वसमानविषयकानुभवत्वे

आदिशब्दार्थः । तथाच परामर्शानुव्यवसायनिष्ठकार्य्यतानिरूपितव्याप्तिविषयकपक्षधर्मताज्ञाननिष्ठविषयत्वावच्छिन्नकारणतायाः व्याप्तिविषयकपक्षधर्मताज्ञानध्वंसनिष्ठकार्य्यतानिरूपितव्याप्तिविषयकधर्मताज्ञाननिष्ठप्रतियोगित्वावच्छिन्नकारणतायाश्च व्याप्तिविषयकपक्षधर्मताविषयकस्मृतिनिष्ठकार्य्यतानिरूपितस्वसमानविषयकानुभवनिष्ठस्वसमानविषयकानुभवत्वावच्छिन्नकारणतायाश्च सत्त्वेन परामर्शप्रत्यक्षादिकं प्रति व्याप्तिविषयकपक्षधर्मताज्ञानेत्वेन हेतुत्वाभावेन न व्याप्तिविषयकपक्षधर्मताज्ञानप्रत्यक्षादिष्वतिव्याप्तिरिति भावः ॥

शि० म०–तत्त्वं च व्यभिचारज्ञानप्रतिबन्धकज्ञानविषयप्रकारकपक्षधर्मताज्ञानत्वम् । तच्च विशकलितस्थलीयलिंगपरामर्शसाधारणमिति नासम्भव इति वाच्यम् । तथापि न्यायमते धूमो वह्निव्याप्यः अयंचालोकवानिति समूहालंबनादप्यनुमित्यापत्तेः ॥

म० प्र०–नन्वेवं व्याप्तिविषयकपक्षधर्मताज्ञानप्रत्यक्षादावतिव्याप्त्यभावेपि साध्यवदन्यावृत्तित्वं व्याप्तिर्हेतुव्यापकसाध्यसामानाधिकरण्यं व्याप्तिः हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः साध्याभावव्यापकीभूताभावप्रतियोगित्वं व्याप्तिरिति व्याप्तीनां नानात्वेन परस्परं व्याप्तिज्ञानानां व्यभिचारादनुगतस्यानुमितित्वावच्छिन्नानुमितिनिष्ठकार्यतानिरूपितव्याप्तिविषयकपक्षधर्मताज्ञाननिष्ठकारणतावच्छेदकस्यासंभवेन किमपिव्याप्तिविषयकपक्षधर्मताज्ञानं न हेतुः, नच व्याप्तिषु व्याप्तित्वमनुगतमिति वास्यम् । साध्यवदन्यावृत्तित्वं कुत्रचिद्व्याप्तित्वंहेतुव्यापकसाध्याधिकरणवृत्तित्वत्वं कुत्रचिद्व्याप्तित्वमित्यादिरीत्या व्याप्तित्वस्यापि भेदादित्याशंक्याह (तत्त्वंचेति) व्याप्तिविषयकपक्षधर्मताज्ञानत्वं चेत्यर्थः (व्यभिचारज्ञानप्रतिबंधकेति) वह्न्यभाववद्वृत्तिर्धूम इत्यादिव्यभिचारज्ञानस्य प्रतिबंधकं यज्ज्ञानं वह्न्यभाववदवृत्तिर्धूम इत्यादिव्याप्तिज्ञानं तस्य विषयो व्याप्तिधूमादिस्तत्प्रकारकमित्यर्थः । व्याप्तेर्व्याप्तित्वस्य च नानात्वेपि व्यभिचारज्ञानप्रतिबंधकज्ञानविषयत्वस्य सर्वत्र सत्त्वेनानुगतस्य व्यभिचारज्ञानप्रतिबंधकज्ञानविषयप्रकारकपक्षधर्मताज्ञानत्वरूपकारणतावच्छेदकस्य सत्त्वान्नानुगतकारणतावच्छेदकस्याभाव इत्यभिप्रेत्याह (तच्चेति) व्यभिचारज्ञानप्रतिबंधकज्ञानविषयप्रकारकपक्षधर्मताज्ञानत्वं चेत्यर्थः (विशकलितेति) विशकलितत्वं च भिन्नाभिन्नत्वं स्थलशब्दोहि व्याप्तिरूपाधिकरणवाचकस्तथाच विशकलितस्थलीयोऽन्योन्याभावघटितव्याप्तिस्थलीयो यो लिंगपरामर्शोऽत्यंताभावघटितव्याप्तिस्थलीयो यो लिंगपरामर्शो व्यतिरेकव्याप्तिस्थलीयो यो लिंगपरामर्शस्तत्साधारणं तद्वृत्तीति नासंभवोऽनुगतकारणतावच्छेदकस्याभावोनेत्यर्थः । वेदान्तिभिरनुमितिहेतुव्याप्तिविषयकपक्षधर्मताज्ञानानंगीकाराद्व्याप्तिविषयकपक्षधर्मताज्ञानजन्य

Funding by IKS-MoE

त्वमित्यादिकथनं नैयायिकमताभिप्रायेणैवेति भावः, (न्यायमतेइति) वेदांतिभिर्व्याप्तिविषयकपक्षधर्मताज्ञानस्यानुमितिनिष्ठकार्य्यतानिरूपितकरणताया अस्वीकारेण मीमांसकमतवद्व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मताज्ञानस्यानुमितिनिष्ठकार्य्यतानिरूपितकारणतायाः स्वीकारान्न्यायमत इत्युक्तमिति भावः । समूहालंबनात्–प्रत्यक्षस्मरणाद्यात्मकसमूहालम्बनात्(अनुमित्यापत्तेरिति) व्यभिचारज्ञानप्रतिबंधकज्ञानविषयप्रकारकपक्षधर्मताज्ञानत्वस्योक्तसमूहालम्बने सत्त्वादिति शेषः ॥

मू०–अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या ॥

शि० म०–नच पक्षवृत्तिहेतुतावच्छेदेन व्यभिचारज्ञानविरोधिवैशिष्ट्यविषयत्वं विवक्षितमिति युक्तम्, साध्यगोचरपक्षधर्मव्यापकताज्ञानाकारतावादिमते अनुमितौ निरुक्तलक्षणाभावात् । न्यायमते व्यतिरेकिलिंगपरामर्शस्य साध्याभावांश एव साधनाभावनिरूपितव्याप्तिवैशिष्ट्यविषयत्वेन ततोऽनुमित्यभावापत्तेश्च । ततश्चानुमितिकरणत्वं नानुमानस्य लक्षणमित्याशंक्याह (अनुमितिश्चेति । व्याप्तिज्ञानत्वेनेति) व्याप्तिप्रकारकज्ञानत्वेनेत्यर्थः ॥

म० प्र०–(पक्षवृत्तिहेतुतावच्छेदेनेति) अत्रावच्छेदपदमवच्छेदकपरमवच्छिन्नत्वं तृतीयार्थः । विरोधिशब्दः प्रतिबंधकज्ञानविषयपरः वैशिष्ट्यं संबंधः तथाच पक्षवृत्तिहेतुतावच्छेदकावच्छिन्नो यो व्यभिचारज्ञानप्रतिबन्धकज्ञानविषयव्याप्तिसंबंधस्तद्विषयकत्वे सति पक्षधर्मता ज्ञानत्वं व्यभिचारज्ञानप्रतिबंधकज्ञानविषयप्रकारकपक्षधर्मताज्ञानत्वशब्देन विवक्षितमिति निर्गलितोर्थस्तथाच प्रकृतसमूहालंबने पक्षवृत्त्या लोकहेतुतावच्छेदकावच्छिन्नव्यभिचारज्ञानविरोधिज्ञानविषयव्याप्तिसंबंधविषयकत्वाभावान्नोक्तसमूहालंबनादनुमित्यापादनमिति भावः । परकीयानुमितिलक्षणवाक्ये व्यापकताशब्दस्याधिकदेशवृत्तित्वरूपार्थमभिप्रेत्यदोषमाह (साध्यगोचरेति) साध्यविषयकं यत्पक्षधर्मव्यापकताज्ञानं पक्षवृत्तिधूमव्यापकोवह्निरित्याद्याकारकं तादृशज्ञानात्पर्वतोवह्निमानित्याद्यनुमितिर्भवतीति वादिमते इत्यर्थः (निरुक्तलक्षणाभावादिति) पक्षधर्मव्यापको वह्निरित्यादिज्ञानस्य पक्षधर्मताज्ञानत्वेपि पक्षवृत्तिहेतुतावच्छेदेन व्यभिचारज्ञानविरोधिज्ञानविषयव्याप्तिवैशिष्ट्यविषयकत्वाभावेन पक्षधर्मव्यापको वह्निरित्यादिज्ञानजन्यपर्वतो वह्निमानित्याद्यनुमितौ निरुक्तलक्षणाभावादित्यर्थः । ननु पक्षधर्मव्यापकं साध्यमितिशब्दस्य धूमादिपक्षधर्मनिष्ठव्याप्तिनिरूपकसाध्यमित्यर्थकत्वेन धूमादिपक्षधर्मव्यापको वह्निरित्यादिज्ञानस्य पक्षवृत्तिहेतुतावच्छेदेन व्यभिचारज्ञानविरोधिज्ञानविषयव्याप्तिवैशिष्ट्यविषयकत्वेन कथं

साध्यगोचरपक्षधर्मव्यापकताज्ञानस्यानुमितिकरणतावादिमतेऽनुमितौ निरुक्तलक्षणाभावकथनं क्रियते इत्यरुच्या हेत्वन्तरमाह (न्यायमते इति) नवीननैयायिकैः साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तेर्हेतावंगीकृतत्वेन प्राचीननैयायिकमते इत्यर्थः । वेदांतिभिरनुमितिहेतुव्यतिरेकव्याप्त्यनंगीकारेण न्यायमते इत्युक्तमितिभावः (व्यतिरेकिलिंगपरामर्शस्येति) व्यतिरेकिलिंगं गंधादिकं तस्य प्रतियोगितया गंधाभावव्याप्य इतरभेदाभाव इत्याद्यात्मको यो लिंगपरामर्शस्तस्येत्यर्थः । ततः—व्यतिरेकिलिंगपरामर्शात् (ततश्चेति) चकारस्यावधारणार्थकत्वेनोक्ताव्याप्तिदोषादेवेत्यर्थः । ननु व्याप्तिज्ञानस्यानुमितिं प्रति व्याप्तिज्ञानत्वेन करणत्वस्वीकारे व्याप्तिरितिज्ञानादपि पर्वतो वह्निमानित्याद्यनुमितिः स्यादित्यत आह (व्याप्तिप्रकारकेति) धूमो वह्निव्याप्यइत्याद्यात्मकव्याप्तिप्रकारकेत्यर्थः । व्याप्तिरिति ज्ञानस्य व्याप्तित्वप्रकारकत्वेन व्याप्तिप्रकारकत्वाभावान्न व्याप्तिरीति ज्ञानादनुमित्यापादनं संभवतीति भावः ॥

मू०—व्याप्तिज्ञानानुव्यवसायादेस्तत्त्वेन तज्जन्यत्वाभावात् नानुमितित्वम् ॥

शि० म०—व्याप्तिपदं व्यभिचारज्ञानविरोधिपरं, नतु ग्रंथकृदभिमतव्याप्तिपरम् । तेन तज्जनकेऽन्योन्याभावादिगर्भव्याप्तिज्ञानेकारणतावच्छेदकसत्त्वान्न लक्षणासंभवो नवा सर्वत्र प्रमेयमिति ज्ञानादनुमितिः । ननु व्याप्तिपदं ग्रंथकृदभिमतव्याप्तिपरमेव, नचान्योन्याभावादिगर्भव्याप्तिज्ञानादनुमित्यभावापत्तिः अन्योन्याभावगर्भाया अत्यंताभावगर्भायाश्च व्याप्तेरभावघटितत्वेन तज्ज्ञानस्य गुरुविषयत्वेनानुमित्यहेतुत्वादिति चेत न, अशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यलक्षणव्याप्त्यज्ञानेपि शब्दादिना अत्यंताभावादिगर्भव्याप्तिज्ञानादप्यनुमितिदर्शनेन गुरुविषयत्वेपि तज्ज्ञानस्याप्यनुमितिहेतुत्वात् । नचैवं परस्परव्यभिचारात्किमपि व्याप्तिज्ञानं न हेतुः स्यादिति वाच्यम्, व्यभिचारज्ञानविरोधिज्ञानविषयत्वेन सर्वव्याप्त्यनुगमस्योक्तत्वात । अवच्छेदकविवक्षायाः प्रयोजनमाह (अनुव्यवसायादेरिति) ॥

म० प्र०—ननूक्तप्रकारेण व्याप्तीनां भेदादुक्तानुगतकारणतावच्छेदकाभावस्यास्मिन्पक्षेपि तुल्यत्वेनोक्तानुमितिलक्षणासंभवः । किंच व्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्यानुमितिजनकत्वे सर्वं प्रमेयमिति ज्ञानात्पर्वतो वह्निमानित्याद्यनुमितिः स्याद्व्याप्तेरपि सर्वांतःपातित्वेन प्रमेयत्वप्रकारकव्याप्तिज्ञानस्यापि संभवादित्यत आह (व्याप्तिपद-

Funding by IKS-MoE

मिति) तेन–व्याप्तिपदस्य व्यभिचारज्ञानविरोधिपरत्वस्वीकारेण । तज्जनके–पर्वतोवह्निमानित्याद्यनुमितिजनके । असंभवः–अव्याप्तिः, सर्वत्र–सर्वम् नचेतिप्रतिज्ञायां हेतुमाह (तज्ज्ञानस्यानुमित्यहेतुत्वादिति) अन्योन्याभावादिगर्भव्याप्तिज्ञानस्यानुमितिनिष्ठकार्य्यतानिरूपितकारणताभावादित्यर्थः । तज्ज्ञानस्यानुमित्यहेतुत्वे हेतुमाह (गुरुविषयत्वेनेति) संभवति लघुधर्मावच्छिन्ने कारणे गुरुधर्मावच्छिन्ने कारणत्वानंगीकारादिति भावः । तज्ज्ञानस्य गुरुव्याप्तिविषयकत्वे हेतुमाह (अन्योन्याभावगर्भायाइति । शब्दादिनेति) अत्र प्रत्यक्षानुमानावादिशब्दार्थः । एवम् व्याप्तिपदस्य ग्रंथकृदभिमतव्याप्तिपरत्वाभावेनान्योन्याभावगर्भादिव्याप्तीनां व्याप्तिपदेन ग्रहणेसति (परस्परव्यभिचारादिति) यत्रात्यंताभावघटितव्याप्तिज्ञानादनुमितिस्तत्रान्योन्याभावघटितव्याप्तिज्ञानरूपकारणाभावः यत्रान्योन्याभावघटितव्याप्तिज्ञानादनुमितिस्तत्रात्यंताभावघटितव्याप्तिज्ञानरूपकारणाभावो यत्र व्यतिरेकव्याप्तिज्ञानादनुमितिस्तत्रोभयविधव्याप्तिज्ञानरूपकारणाभाव इत्यादिरीत्या व्याप्तिभेदेन व्याप्तिज्ञानानां परस्परव्यभिचारादित्यर्थः । अनुगमस्य–ग्रहणस्य अनुगतधर्मस्येतिवा, अस्मिन्पक्षे विषयत्वेनेति तृतीयाया अभेदोर्थ इति (अवच्छेदकेति) व्याप्तिज्ञानत्वरूपव्याप्तिज्ञाननिष्ठानुमितिकारणतावच्छेदकेत्यर्थः ॥

सू०–अनुमितिकरणञ्च ॥

शि० म०–तज्जन्यस्मृतिशाब्दज्ञानादिरादिशब्दार्थः । अनुव्यवसाये विषयत्वेन स्मृतौ समानविषयानुभवत्वेन वाक्यार्थज्ञाने पदार्थज्ञानत्वेनच हेतुतया उक्तरूपेणाहेतुत्वात् । नचैवमपि संशयविपर्ययोत्तरप्रत्यक्षेतिव्याप्तिः, विरोधिदर्शनत्वेन तत्र हेतुतया उक्तरूपेण व्याप्तिज्ञानस्याजनकत्वान्नातिव्याप्तिरिति भावः । तत्र परामृश्यमानं लिंगं करणमितिजरन्नैयायिकाः, मनःकरणमित्यन्ये तान् प्रत्याह (अनुमितिकरणंचेति) अयं भावः–न तावत् अनुमितौ लिङ्गं करणं अयोग्यलिङ्गकानुमितौ व्यभिचारात्, तत्र त्वदभिमतपरामर्शस्य व्यापारत्वासंभवेन तस्य तत्राकरणत्वात् । अतीतादिलिङ्गकानुमितौ व्यभिचाराच्च । नाप्यनुमितौ मनः करणम् ॥ प्रमाणाभावात् ।

म० प्र०–(तज्जन्येति) व्याप्तिज्ञानजन्यव्याप्तिविषयकस्मृतिशाब्दबोधेत्यर्थः । अत्रव्याप्तिज्ञानध्वंस आदिपदार्थः (अनुव्यवसायेइति) व्याप्तिज्ञानस्य वह्निव्याप्यधूमवंतं पर्वतं जानामीत्याद्यनुव्यवसायनिष्ठाकार्य्यतानिरूपितविषयत्वावच्छिन्नकारणत्वेनेत्यर्थः उक्तरूपेणाहेतुत्वात्–व्याप्तिज्ञानानुव्यवसायादिकं प्रतिव्याप्तिज्ञानत्वेन कारणत्वाभावात् । एवमपि व्याप्तिज्ञानानुव्यवसायादावतिव्याप्त्यभावेपि (संशयेति)

वह्न्यादिविषयकसंशयोत्तरवह्न्यादिविषयकप्रत्यक्षे वह्न्याद्यभावविषयकविपर्य्ययोत्तरवह्न्यादिविषयकप्रत्यक्षेचेत्यर्थः । संशयस्य विपर्ययत्वेपि संशयस्योभयकोटिकत्वाद्विपर्ययात्पृथक्त्वेनोपादानमिति (अतिव्याप्तिरिति) यत्र पर्वतोवह्निमान्नवेत्यादिसंशयो जातस्तदुत्तरं वह्निव्याप्यधूमवानित्यादि प्रत्यक्षात्मकविशेषदर्शनं जातं तदनंतरं च जायमाने पर्वतो वह्निमानित्यादिप्रत्यक्षे वह्निव्याप्यधूमवान्पर्वत इत्यादिविशेषदर्शनात्मकव्याप्तिज्ञानस्य हेतुत्वादतिव्याप्तिरेवं यत्र पर्वतो वह्न्यभाववानित्यादिविपर्य्ययो जातस्तदुत्तरंवह्निव्याप्यधूमवान्पर्वत इत्यादिप्रत्यक्षात्मकविशेषदर्शनं जातं तदनंतरं जायमाने पर्वतो वह्निमानित्यादिप्रत्यक्षे वह्निव्याप्यधूमवान्पर्वत इत्यादिविशेषदर्शनात्मकव्याप्तिज्ञानजन्यत्वादतिव्याप्तिरिति भावः । विरोधिदर्शनत्वेन–विशेषदर्शनात्मकव्याप्तिज्ञानस्य संशयविपर्य्ययविरोधित्वविशिष्टज्ञानत्वेन । तत्र–संशयोत्तरप्रत्यक्षादौ । उक्तरूपेण–व्यभिचारज्ञानविरोधिज्ञानत्वेन, तत्र–अनुमितित्वावच्छिन्नानुमितौ, परामृश्यमानं–विषयतासंबंधेन परामर्शात्मकज्ञानविशिष्टं (मनइति) अस्योर्द्ध्वमनुमितावितिशेषः (अयोग्यलिंगकानुमितौव्यभिचारादिति) अयोग्यं परं प्रति प्रत्यक्षायोग्यं लिंगं करणं यस्या देवदत्तो धर्मवान् सुखित्वादित्याद्यनुमितेः सा तथा तादृशानुमितिनिष्ठकार्य्यतानिरूपितकरणताया अयोग्यलिंगेऽभावादित्यर्थः । व्यभिचारश्च व्यापकाभाववद्वृत्तित्वं यदाकारणाभावस्तदाकार्य्याभाव इति व्याप्तेः । प्रकृते व्यापकोनुमितिरूपकार्य्याभावस्तदभावरूपानुमितिमतिकाले परामृश्यमानायोग्यलिंगरूपकरणाभावसत्त्वेन व्यतिरेकव्यभिचार इतिभावः । अयोग्यलिंगे अनुमितिनिष्ठकार्यतानिरूपितकरणत्वाभावे हेतुमाह (तत्रेति) सुखित्वादिरूपपरामृश्यमानायोग्यलिंगे इत्यर्थः । त्वदभिमतपरामर्शस्य–धर्मव्याप्यसुखित्ववान्देवदत्त इत्यादित्वदभिमतपरामर्शस्य, व्यापारत्वासंभवेन–उक्तपरामर्शस्य लिंगजन्यानुमितिजनकत्वेपि परकीयसुखित्वादिरूपहेतोः परंप्रत्यप्रत्यक्षत्वेनोक्तपरामर्शप्रत्ययोग्यलिंगस्य विषयत्वेन कारणत्वाभावेनायोग्यहेतुजन्यत्वाभावाद्व्यापारत्वासंभवेन, तस्य–परामृश्यमानायोग्यलिंगस्य, तत्र–अनुमितौ, अकरणत्वात्–करणत्वयोग्यतात्यंताभावात् अतीतादिलिंगकानुमितौ, व्यभिचाराच्च–अतीतादिधूमादिलिंगस्येयं यज्ञशाला वह्निमत्यभूदतीतिधूमादित्यादिपंचावयववाक्यजन्यानुमितिनिरूपितव्यतिरेकव्यभिचाराच्च । प्रमाणाभावात्–मनसोऽनुमितिनिष्ठकार्य्यतानिरूपितकरणत्वे प्रमाणाभावात् ॥

मू०–व्याप्तिज्ञानं तत्संस्कारोऽवान्तरव्यापारः ॥

शि० म०–अनुमितौ करणांतरानुपपत्त्या मनः करणं कल्प्यत इति चेत्, न, व्याप्तिज्ञानस्य सत्त्वात् । किंचानुमितेः मनः करणकत्वे मानसत्वापत्तिः करणांतरासहकृतमनोजन्यत्वस्य मानसत्वप्रयोजकत्वात् ।

Funding by IKS-MoE

नचानुमितेर्मनस्त्वेन मनोजन्यतया इन्द्रियत्वेन तज्जन्यत्वाभावान्न मानसत्वमिति युक्तं, करणांतरासहकृतमनोजन्यतया तस्याप्यापातात्, मनस इन्द्रियत्वस्य निराकृतत्वाच्चेति (व्याप्तिज्ञानमिति) ननु व्याप्तिज्ञानमपि नकरणं स्मृत्यनुव्यवसायादावपि हेतुत्वेनासाधारणत्वाभावादिति चेत् न व्याप्तिज्ञानत्वेन रूपेण तस्यान्यत्राहेतुत्वात् । नन्वेवमपि व्याप्तिज्ञानं न करणं व्यापाराभावात् । नच तृतीयलिंगपरामर्शो व्यापारः तत्कारणत्वस्य त्वयानभ्युपगमादित्यत आह (तत्संस्कारइति) व्याप्तिसंस्कारः इत्यर्थः । तृतीयलिङ्गपरामर्शोनुमितौ करणम् ॥

म० प्र०—ननु यथा दिवाभुंजानस्य पीनत्वं रात्रिभोजनातिरिक्तसाधनाभावे सति रात्रिभोजनंविनाऽनुपपद्यमानं रात्रिभोजनं कल्पयति तथानुमितेः सकरणकत्वेन मनोतिरिक्तकरणाभावे सति मनोरूपकरणं विनानुपपद्यमानं मनसः करणत्वं कल्पयतीति मनसोनुमितिं प्रति करणत्वेऽर्थापत्तिप्रमाणमित्यभिप्रेत्य शंकते (अनुमिताविति) सत्त्वात्-अनुमितिनिष्ठकार्य्यतानिरूपितकरणत्वसत्त्वात् । ननु यत्रेन्द्रियत्वेन मनोजन्यत्वं तत्र मानसत्वमिति व्याप्तेः, सुखादिप्रत्यक्षे दृष्टत्वेनानुमितेर्मनस्त्वेन मनोजन्यतयेन्द्रियत्वेन मनोजन्यत्वाभावान्न मानसत्वमित्याशंक्य तां निराकरोति (नचानुमितेरिति) यत्र कारणांतरासहकृतमनोजन्यत्वं तत्र मानसत्वमिति व्याप्तेरिति सुखादिप्रत्यक्षे दृष्टत्वं मनसि निधाय नच युक्तमिति प्रतिज्ञायां हेतुमाह (कारणांतरेति) अस्यादावनुमितेरित्यस्यशेषः कर्त्तव्यः, तस्यापि—अनुमितेर्मनोजन्यप्रत्यक्षविषयत्वरूपमानसत्वस्यापि । पूर्वपक्षिसंमतव्याप्त्यसिद्धिमभिप्रेत्य हेत्वंतरमाह (मनसइति) स्मृत्यनुव्यवसायादावपिहेतुत्वेन-व्याप्तिज्ञानस्य व्याप्तिस्मृतिव्याप्तिज्ञानानुव्यवसायादावपि कारणत्वेन, असाधारणत्वाभावात्—असाधारणकारणत्वाभावात्, तस्य—व्याप्तिज्ञानस्य, अन्यत्र—व्याप्तिस्मृत्यादौ (अहेतुत्वादिति) व्याप्तिज्ञानस्य व्याप्तिज्ञानानुव्यवसाये विषयत्वेन व्याप्तिस्मृतिस्वसमानविषयकानुभवत्वेन वाक्यार्थज्ञाने पदार्थज्ञानत्वेन च हेतुत्वादिति शेषः (व्यापारेति) व्याप्तिज्ञानस्येतिशेषः (तृतीयलिंगपरामर्शइति) महानसाद्यवच्छेदेन धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमं पक्षे यद्धूमज्ञानं तद्द्वितीयं पक्षे एव व्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयमित्युच्यते तादृशतृतीयज्ञानरूपलिंगपरामर्शो व्याप्तिज्ञानस्य व्यापार इत्यर्थः (तत्कारणत्वस्येति) वह्निव्याप्यधूमवान्पर्वत इत्यादि तृतीयलिंगपरामर्शनिष्ठकारणत्वस्य, त्वया—वेदांतिनात्वया (अनभ्युपगमादिति) तृतीयलिंगपरामर्शे तज्जन्यजनकत्वरूपांशाभावेन तृतीयलिंगपरामर्शस्य व्याप्तिज्ञानव्यापारत्वं न संभवतीति भावः । व्याप्तिसंस्कारः—व्याप्तिविषयकसंस्कारः व्याप्तिज्ञानसंस्कार इति वा ॥

Funding by IKS-MoE

मू०–नतु तृतीयलिंगपरामर्शोऽनुमितौ करणं तस्यानुमितिहेतुत्वासिद्ध्या तत्करणत्वस्य दूरनिरस्तत्वात् ॥

शि०म०–तत्संस्कारोऽवांतरव्यापार इति नैयायिकैकदेशिनः कल्पयंति तान्प्रत्याह (नन्विति) अयमाशयः–यत्प्रकारकं व्याप्तिज्ञानं तत्प्रकारकत्वेनैव पक्षधर्मताज्ञानस्यानुमितिहेतुत्वं, अस्यच गुरुत्वेपि व्याप्यत्वप्रकारकत्वापेक्षया सामान्यधर्मत्वेनावच्छेदकतौचित्यात् । किंच पक्षधर्मताज्ञानं उक्तरूपेणैवानुमितिहेतुस्सर्वत्राव्यभिचारात्, नतु त्वदुक्तरूपेण व्यवहितधूमादिस्थले व्यभिचारात् । नच तत्र प्रत्यक्षपरामर्शः संभवति, विशेष्यसन्निकर्षाभावात् । तत्रानुमित्यात्मकपरामर्शादनुमित्यभ्युपगतावनवस्थापातात् । धूमे व्याप्यत्वाज्ञानेपि व्यवहितधूमस्मरणादनुमितिदर्शनाच्च । न मनसा तत्र परामर्शस्तस्यासहायस्य बहिरस्वातंत्र्यात् । नच ज्ञानं प्रत्यासत्तिः, निराकृतत्वात् । तस्मान्नव्याप्यत्वप्रकारकत्वेनपक्षधर्मताज्ञानमनुमितिहेतुरिति । यत्तु पक्षधर्मताज्ञानं करणं तत्संस्कारोऽवांतरव्यापार इत्यन्ये तन्न, उद्बुद्धव्याप्तिसंस्कारस्य पर्वतादौ पक्षे धूमादिदर्शनानंतरं अनुमितेः पक्षधर्मतासंस्कारस्यानुमित्यहेतुत्वात् ॥

म० प्र०–तत्संस्कारः–तृतीयलिंगपरामर्शजन्यसंस्कारः (यत्प्रकारकमिति) यादृशधूमत्वादिरूपगृह्यमाणव्याप्यतावच्छेदकप्रकारकं व्याप्तिज्ञानं तादृशधूमत्वादिप्रकारकत्वेनैवेत्यर्थः (अस्येति) व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वापेक्षयाऽस्यगृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वस्य गुरुत्वेपि–सामान्यधर्मत्वेनास्य व्यवहितधूमादिपक्षधर्मताज्ञानेपि वृत्तित्वेनावच्छेदकतौचित्यादनुमितिनिष्ठकार्यतानिरूपितहेतुनिष्ठपक्षधर्मताज्ञाननिष्ठकारणतावच्छेदकतायोग्यत्वादित्यर्थः । वह्न्यादिव्याप्तिज्ञानशून्यपुरुषस्यापि धूमवान्पर्वत इत्यादिज्ञानादनुमित्यापत्तिवारणाय 'गृह्यमाणेति' व्याप्यताविशेषणमिति, उक्तरूपेणैव–गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनैव, सर्वत्र–सर्वानुमित्यव्यवहितपूर्वक्षणे, अव्यभिचारात्–महानसाद्यवच्छेदेन धूमे जायमानव्याप्तिज्ञानस्यैवकरणत्वेन पर्वताद्यवच्छेदेन धूमे व्याप्तिज्ञानस्यानुमितिंप्रत्यकरणत्वेन पर्वतादिधूमे व्याप्तिज्ञानाभावेपि गृह्यमाणव्याप्यतावच्छेदकप्रकारकप्रत्यक्षस्मरणशाब्दबोधाद्यन्यतमरूपपक्षधर्मताज्ञानस्य सत्त्वेन व्यभिचाराभावात् । त्वदुक्तरूपेण–व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन, व्यवहितधूमादिस्थले–कालांतरीयधूमाद्यधिकरणे, व्यभिचारात्–व्यवहितधूमादिभ्योऽनुमितिसत्त्वेपि व्यवहितधूमादौ सामान्यलक्षणादीनां निराकृतत्वेन व्याप्तिज्ञानाभावेन त्वदुक्तव्याप्तिप्रकारकपक्षधर्मताज्ञानस्य व्यतिरेकव्य-

भिचाराद्व्यभिचारमेव स्पष्टयति (नचेत्यादिना) तत्र—व्यवहितधूमादौ, प्रत्यक्षपरामर्शः—वह्निव्याप्यातीतधूमवानयं देश इत्याद्यात्मकं प्रत्यक्षात्मकव्याप्तिप्रकारकपक्षधर्मताज्ञानम् । विशेष्यसन्निकर्षाभावात्–व्याप्तिनिष्ठविशेषणतानिरूपितविशेष्यतावद्धूमे इन्द्रियसन्निकर्षाभावात, तत्र—व्यवहितधूमादौ, अनुमित्यात्मकपरामर्शात्–सदेशोवह्निव्याप्यातीतधूमवान् दह्नचार्द्रेन्धनसंयोगावच्छेदकत्वादित्याद्यनुमित्यात्मकपरामर्शात्, धूमे—व्यवहितधूमे, व्याप्यत्वाज्ञानेपिं–व्याप्त्यज्ञानेपिं, तत्र—व्यवहितधूमादौ, तस्य—मनसः, ज्ञानंस्वसंयुक्तात्मसमवेतज्ञानविषयत्वरूपज्ञानवटितं, पक्षधर्मताज्ञानं—धूमवान्पर्वत इत्याद्याकारकं पक्षधर्मताज्ञानं, तन्नेति प्रतिज्ञायांहेतुमाह (पक्षधर्मतासंस्कारस्येति) पक्षधर्मताविषयकसंस्कारस्य पक्षधर्मताज्ञानजन्यसंस्कारस्यैवेत्यर्थः । तस्यानुमित्यहेतुत्वे हेतुमाह (उद्बुद्धव्याप्तिसंस्कारस्येति) उद्बुद्धोव्याप्तिसंस्कारो व्याप्तिविषयकसंस्कारो यस्य स तथा तस्येत्यर्थः ॥

मू०-नच संस्कारजन्यत्वेनानुमितेः स्मृतित्वापत्तिः स्मृतिप्रागभावजन्यत्वस्य ॥

शि० म०—ननु स्मृतिप्रागभावजन्यत्वं न स्मृतित्वप्रयोजकं तद्गोचरसाक्षात्कारस्यापि तथात्वापत्तिः । किञ्चैवं स्मृतेरेतत्कालावच्छेदेन ग्राह्यत्वाभावज्ञानाप्रतिबंधकत्वेपि तत्कालविषयग्राह्याभावज्ञानप्रतिबंधकत्वेन तदभावस्य प्रतिबंधकाभावत्वेन प्रागभावादिसाधारणस्य ग्राह्याभावानुभवहेतुतया तस्यापि स्मृतित्वापत्तिः । अपिच स्मृतिप्रागभावजन्यत्वं न प्रयोजकं, तस्य स्मृतित्वज्ञानाधीननिश्चयत्वात ॥

म० प्र०—तद्गोचरसाक्षात्कारस्यापि–स्मृतिप्रागभावगोचरस्यैतदर्थस्मरणं भविष्यतीत्याकारकस्यैतदर्थविषयकस्मरणप्रागभावोस्तीत्याकारकस्य वा साक्षात्कारस्यापि, तथात्वापत्तेः–स्मृतित्वापत्तेः वस्तुतस्तु स्मृतिप्रागभावजन्यत्वं च स्मृतिप्रागभावत्वावच्छिन्नजनकतानिरूपितजन्यत्वं तथाच स्मृतिप्रागभावस्य स्वविषयकसाक्षात्कारे विषयत्वेन कारणतया स्मृतिप्रागभावत्वावच्छिन्नजनकतानिरूपितजन्यत्वाभावान्न स्मृतिप्रागभावसाक्षात्कारे स्मृतित्वापत्तिरूपो दोष इति । एवं–तथा, तस्यापि–घटवद्भूतलमित्यादिस्मृत्यात्मकप्रतिबंधकाभावजन्यघटाभाववद्भूतलमित्यादिग्राह्याभावानुभवस्यापि प्रतिबध्यज्ञाने प्रकारो ग्राह्य इति, ग्राह्यपदार्थं मनसि निधाय घटाभाववद्भूतलमित्याद्यनुभवस्य स्मृतित्वापत्तौ हेतुमाह (तदभावस्येति) प्रागभावादिसाधारणस्य घटवद्भूतलमित्यादिस्मृतिध्वंसप्रागभावात्यंताभावान्यतमरूपस्य तदभावस्य घटवद्भूतलमित्यादिस्मृत्यभावस्य घटाभाववद्भूतलमित्यादिग्राह्याभावानुभवं प्रति कारणतयेत्यर्थः ।

Funding by IKS-MoE

ननु घटवद्भूतलमित्यादिस्मृत्यभावत्वावच्छिन्नस्मृत्यभावस्य घटाभाववद्भूतलमित्याद्यनुभवं प्रति हेतुत्वं कुत इत्याशंक्य तत्र हेतुमाह (प्रतिबंधकाभावत्वेनेति) घटवद्भूतलमित्यादिस्मृत्यभावत्वावच्छिन्नस्मृत्यभावस्य प्रतिबंधकाभावत्वेनेत्यर्थः । ननु घटवद्भूतलमित्यादिस्मृत्यभावत्वावच्छिन्नस्मृत्यभावस्य प्रतिबंधकाभाववत्त्वं कुत इत्याशंक्य तत्र हेतुमाह (स्मृतेरित्यादिना) स्मृतेः–घटवद्भूतलमित्यादिकालांतरीयस्मृतेः एतत्कालावच्छेदेन ग्राह्याभावज्ञानाप्रतिबंधकत्वेपिसमानकालीनयोरेवप्रतिबध्यप्रतिबंधकभावनियमेन वर्तमानकालावच्छेदेन घटाभाववद्भूतलमित्याद्याकारकप्रत्यक्षाद्यात्मकग्राह्याभावज्ञानप्रतिबंधकत्वाभावेपि (तत्कालविषयग्राह्याभावज्ञानप्रबंधकत्वेनेति) अत्र विषयशब्दोधिकरणार्थकस्तथाच तदभाववत्ताबुद्धिं प्रति तद्वत्ताबुद्धिः प्रतिबंधकेंतिनियमाद्घटवद्भूतलमित्यादिस्मृतेः घटवद्भूतलमित्यादिस्मृतिकालाधिकरणकघटाभाववद्भूतलमित्याद्याकारकग्राह्याभावज्ञानप्रतिबंधकत्वेनेत्यर्थः (स्मृतित्वापत्तिरिति) वस्तुतस्तु घटवद्भूतलमित्यादिस्मृतिप्रागभावस्य घटाभाववद्भूतलमित्यादिग्राह्याभावानुभवं प्रति प्रतिबंधकाभावत्वेन हेतुतयोक्तस्मृतिप्रागभावत्वेनाहेतुत्वादुक्तानुभवस्य स्मृतित्वापत्तिरूपो दोषो नास्तीति न प्रयोजकंस्मृतित्वज्ञापकं न (तस्येति) स्मृतिप्रागभावजन्यत्वस्येत्यर्थः (स्मृतिज्ञानेति) स्मृतिप्रागभावज्ञानेत्यर्थः । यद्वाऽभावज्ञाने प्रतियोगिज्ञानं कारणमिति नियमात्स्मृतित्वप्रकारकनिश्चयसत्त्वे स्मृतिप्रागभावनिश्चयसत्त्वं स्मृतिप्रागभावनिश्चयसत्त्वे स्मृतिप्रागभावजन्यत्वनिश्चय इति स्मृतित्वज्ञानाधीननिश्चयत्वादित्यर्थः । स्मृतिप्रागभावजन्यत्वज्ञानस्य स्मृतिप्रागभावज्ञानाधीनत्वेन स्मृतिप्रागभावज्ञानस्य स्मृतित्वप्रकारकज्ञानाधीननिश्चयत्वेन चात्माश्रयादिति भावः ॥

म०–संस्कारमात्रजन्यत्वस्य वा, स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तदप्रयोजकत्वात् ॥

शि० म०–अन्यथा अनुमित्यादिप्रागभावजन्यत्वस्यैवानुमितित्वादिप्रयोजकत्वापत्तौ न तत्र प्रयोजकांतरानुसरणं वैयर्थ्यादित्यरुचेराह (संस्कारमात्रजन्यत्वस्येति) संस्कारत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वस्येत्यर्थः । ननु ध्वंसव्यावृत्तं संस्कारजन्यज्ञानत्वमेव स्मृतित्वप्रयोजकम् ॥

म० प्र०–अन्यथा–उक्तप्रकारेणात्माश्रयसत्त्वेपि स्मृतिप्रागभावजन्यत्वस्यैवस्मृतिप्रयोजकत्वस्वीकारे । परंमूले (संस्कारमात्रजन्यत्वस्येति) नचात्र मात्रपदादानेऽसंभव इति वाच्यम् । तस्य संस्कारेतरेन्द्रियसन्निकर्षाद्यसाधारणकारणाजन्यत्वे सति

संस्कारजन्यत्वं संस्कारमात्रजन्यत्वमित्यर्थकत्वात् । नच तथाप्यत्र मात्रपदस्य प्रयोजनाभावान्मात्रपदं नदेयमिति वाच्यम् । संस्कारध्वंसेपि संस्कारजन्यत्वस्य सत्त्वेन तस्य तत्र स्मृतित्वापत्तिनिवारणार्थकत्वात्, नच संस्कारजन्यत्वं संस्कारत्वावच्छिन्नजनकतानिरूपितजन्यत्वं तथाच संस्कारध्वंसे प्रतियोगितावच्छिन्नजनकतानिरूपितजन्यत्वसत्त्वेपि संस्कारत्वावच्छिन्नजनकतानिरूपितजन्यत्वस्याभावान्न तत्र स्मृतित्वापत्तिरूपो दोष इति वाच्यम् । तथापि तस्य प्रत्यभिज्ञायां स्मृतित्वापत्तिनिवारणार्थकत्वात् । नच तत्तांशे प्रत्याभिज्ञाया इष्टत्वादित्यादिग्रंथेन स्मृतित्वस्यांगीकारात्प्रत्यभिज्ञायाः स्मृतित्वापत्तिनिवारणार्थकत्वेन मात्रपदस्य न साफल्यमिति वाच्यम् । तथापि ब्रह्मभिन्ननिखिलकार्यपदार्थस्य तदनुभवस्य चाध्यस्ततया पूर्वपूर्वभ्रमसंस्कारजन्यत्वेन तत्र स्मृतित्ववारणार्थकत्वेन मात्रपदस्य साकल्यादिति (संस्कारत्वावच्छिन्नेति) संस्कारत्वावच्छिन्ना कारणता प्रतियोगिनी निरूपिका यस्याः कार्य्यतायाः सा तथा साचासौ कार्य्यता सा तथा तदाश्रयत्वस्येत्यर्थः । अत्र ब्रह्मभिन्ननिखिलपदार्थानुभवे स्मृतित्वापत्तिवारणाय संस्कारत्वावच्छिन्नकारणतायां मात्रपदार्थसंस्कारेतरासाधारणकारणसहकृतेति विशेषणप्रवेशोपि बोध्य इति ध्वंसव्यावृत्तमिति विशेषणं स्मृतित्वप्रयोजकाघटकमिति मनसि निधाय संस्कारजन्यज्ञानत्वमेव स्मृतित्वप्रयोजकमिति स्मृतित्वप्रयोजकबोधकवाक्यघटकज्ञानपदफलं सूचयति (ध्वंसव्यावृत्तमिति) संस्कारध्वंसावृत्तीत्यर्थः ॥

शि० म०—अस्यसंस्कारत्वावच्छिन्नकारणतानिरूपितकार्य्यताश्रयत्वापेक्षया लघुत्वात्, ततश्चानुमितेः स्मृतित्वं दुर्वारमिति चेत् न, न्यायमतेपि लिंगकरणतापक्षे तत्संस्कारलिंगकानुमितेरपि तत्प्रसंगात् । सिद्धांते ब्रह्माभिन्ननिखिलपदार्थानुभवस्याध्यस्ततया पूर्वपूर्वभ्रमसंस्कारजन्यत्वेन तत्रातिप्रसंगाच्च । यद्वा संस्कारमात्रजन्यत्वेन स्वसमानविषयसंस्कारजन्यत्वं विवक्षितम् । अनुमितेश्च भिन्नविषयव्याप्तिसंस्कारजन्यत्वान्नस्मृतित्वं, नच लिंगोपहितलैंगिकभानपक्षे तदंशे स्मृतित्वापत्तिः । तत्पक्षस्याप्रामाणिकत्वेनानुपादेयत्वात् । नचैवं प्रत्यभिज्ञायाः सिद्धांते तत्तासंस्कारजन्यतया तदंशे स्मृतित्वापत्तिरिति वाच्यम्, इष्टत्वात् । परोक्षत्वापरोक्षत्ववत्स्मृतित्वानुभवत्वयोरेकत्रावच्छेदकभेदेन वृत्तौविरोधाभावात् ॥

म०प्र०—अस्य—संस्कारजन्यज्ञानत्वस्य । लघुत्वात्—शरीरकृतलाघवात् । ततश्च—संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयोजकत्वादेव (संस्कारलिंगकानुमितेरपीति) देवदत्तः घटपटाद्यर्थविषयकस्मृतिमान् घटपटाद्यर्थविषयकसंस्कारवत्त्वादित्यादिघटपटाद्यर्थविषयकसंस्कारलिंगकानुमितेरपि स्मृतित्वप्रसंगादित्यर्थः (अध्यस्तत-

येति) कार्य्यत्वे सत्यध्यस्ततयेत्यर्थः । तथाच नाविद्यादौ व्यभिचारः (पूर्वपूर्वभ्रमसंस्कारजन्यत्वेनेति) यत्र कार्य्यत्वेसत्यध्यस्तत्वं तत्र पूर्वपूर्वभ्रमसंस्कारजन्यत्वं यथा शुक्तिरजतादावितिव्याप्तेरिति शेषः । ननु त्वदुक्तस्मृतित्वप्रयोजके गौरवमित्याशंक्याह (यद्वेति) संस्कारमात्रजन्यत्वेन—संस्कारमात्रजन्यत्वशब्देन स्वसमानविषयसंस्कारजन्यत्वं स्वविषयाभिन्नविषयकोद्बुद्धसंस्कारजन्यत्वं स्वविषयान्यूनानधिकविषयकोद्बुद्धसंस्कारजन्यत्वमिति यावत् । नच मे मातेत्यादिप्रमुष्टतत्ताकस्मृतौ स्मृतित्वाभावापत्तिस्तत्तांशेपि संस्कारस्य सत्त्वेनोक्तस्मृतेः स्वविषयाधिकविषयसंस्कारजन्यत्वात्त्वदुक्तस्मृतित्वप्रयोजकाभावादिति वाच्यम् । तत्तांशेस्मृतिरूपकार्य्याभावेन तत्तांशविषयकसंस्कारस्यानुद्बुद्धत्वेनोक्तप्रयोजनसत्त्वादिति । भिन्नविषयव्याप्तिसंस्कारजन्यत्वात्—अनुमितेर्व्याप्तिज्ञानविषयधूमवह्नितद्व्याप्त्यविषयकत्वाद्व्याप्त्यनुभवविषयभिन्नविषयकत्वेनानुमितिविषयभिन्नविषयकव्याप्त्यनुभवजन्यव्याप्तिविषयकसंस्कारजन्यत्वात् (लिंगोपहितलैंगिकभानपक्षेइति) लिंगाज्जातं लैंगिकंलैंगिकं च तद्भानं लैंगिकभानं साध्यविषयकानुमितिर्लिंगोपहितं लिंगविषयकं च तल्लैंगिकभानं च तत्तथा तथाच वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्याकारकलिंगविषयकसाध्यानुमितिपक्षे इत्यर्थः । तदंशे—वह्नितद्व्याप्त्याद्यंशे । तत्तासंस्कारजन्यतया—असन्निहितदेशकालादिवैशिष्ट्यरूपतत्ताविषयकसंस्कारजन्यतया । तदंशे—तत्तांशविषयकप्रत्यभिज्ञात्मकज्ञाने, ननु स्मृतित्वानुभवत्वयोः परस्परविरोधेन कथमेकस्यां प्रत्यभिज्ञायां स्मृतित्वानुभवत्वयोः संभव इत्याशंक्यमैवमित्यभिप्रेत्याह (परोक्षत्वापरोक्षत्ववदिति) यथा पर्वतो वह्निमान् सुरभिचंदनमित्यादिज्ञानेषु पर्वताद्यंशे वह्न्याद्यंशे चांतःकरणवृत्तिभेदांगीकारेण तत्तद्वृत्त्यवच्छेदेन परोक्षत्वापरोक्षत्वयोरेकत्र चैतन्ये न विरोधस्तद्वदेकत्रैकस्मिन्सोयं देवदत्त इत्यादिप्रत्यभिज्ञात्मकज्ञानेपि तत्तद्वृत्त्यवच्छेदकभेदेन स्मृतित्वानुभवत्वयोर्विरोधाभावादित्यर्थः ॥

मू०—नच यत्र व्याप्तिस्मरणादनुमितिस्तत्र कथं संस्कारो हेतुरिति वाच्यम् । व्याप्तिस्मृतिस्थलेपि तत्संस्कारस्यैवानुमितिहेतुत्वात् नहि स्मृतेः संस्कारनाशकत्वनियमः स्मृतिधारादर्शनात् । नचानुद्बुद्धसंस्कारादप्यनुमित्यापत्तिः तदुद्बोधस्यापि सहकारित्वात् ॥

शि० म०-(कथमिति) व्याप्तिसंस्कारो नानुमितिहेतुः, तदा व्याप्तिस्मृत्या तन्नाशेसतिस्मृतिजन्यानुमितौ व्यभिचारादिति भावः । संस्कारस्य यत्र पक्षधर्मताज्ञानादुद्बोधः तत्र किं व्यभिचारः उतान्यत्र

नाद्यः, पक्षधर्मताज्ञाने व्याप्तिसंस्कारोद्बोधे च सत्यनुमितेरेवोत्पत्तेः न द्वितीयः, व्याप्त्यनुभवस्थले तत्संस्कारस्यानुमितिहेतुतया क्लृप्तत्वेन स्मृतिस्थलेपि तस्यैव हेतुत्वकल्पनादित्याह (व्याप्तिस्मृतिस्थले इति । नहीति) ननु स्मृत्यनंतरं संस्कारस्य नाशानियमवदवस्थाननियमस्याभावेन यत्र कदाचिद्व्याप्तिस्मृत्या तद्विनाशस्तत्र कथं संस्कारो हेतुरिति चेत् न, अनुमितौ करणांतरस्य दुर्निरूपत्वेन व्याप्तिज्ञानकरणत्वस्यावश्यं वाच्यतया तत्संस्कारस्य व्यापारत्वेनानन्यगत्या अनुमितिहेतुत्वकल्पनात् (सहकारित्वादिति) कारणतावच्छेदकत्वादित्यर्थः । अन्यथा व्याप्तिसंस्कारोद्बोधस्यापि कारणत्वे तद्वारा व्याप्तिसंस्कार एव करणं स्यात् ॥

म० प्र०—तदा—अनुमित्युत्पत्तिपूर्वकाले । तन्नाशे—व्याप्त्यनुभवजन्यव्याप्तिविषयकसंस्कारनाशे (स्मृतीति) व्याप्तिस्मृतीत्यर्थः । व्यभिचारात्—व्यतिरेकव्यभिचारेण संस्कारनिष्ठकारणत्वाभावात् व्यतिरेकव्यभिचारादिति वा । अस्मिन्पक्षेऽनुमितावित्यस्यानुमितिमत्यात्मादावित्यर्थो बोध्य इति । यत्र—यस्मिन्नात्मनि यस्मिन्काले वा । यस्मिन्नन्तःकरणे वा । तत्र—तस्मिन्नात्मनि तस्मिन्काले वा । तस्मिन्नन्तःकरणे वा । व्यभिचारः—अनुमितिनिरूपितकारणत्वासंभवो व्यतिरेकव्यभिचारोवा (अन्यत्रेति) सदृशादृष्टचिंतनादिभ्यो यस्मिन्नात्मनि यस्मिन्काले वा यस्मिन्नन्तःकरणेवा संस्कारस्योद्बोधस्तत्रेत्यर्थः । व्याप्त्यनुभवस्थले—व्याप्तिस्मृत्यनधिकरणपक्षधर्मताज्ञानोद्बुद्धव्याप्त्यनुभवजन्यसंस्काराधिकरणकालादौ, तत्संस्कारस्य—व्याप्त्यनुभवजन्यव्याप्तिविषयकसंस्कारस्य, स्मृतिस्थलेपि—व्याप्तिस्मृत्यधिकरणे कालादावपि, तस्यैव—संस्कारस्यैव । यत्रकदाचित्—यस्मिंश्चकस्मिंश्चित्काले । तत्र—तस्मिन्काले । हेतुः—अनुमितिहेतुः । तत्संस्कारस्य—व्याप्त्यनुभवजन्यव्याप्तिविषयसंस्कारस्य । अनन्यगत्या—अन्यस्य व्यापारत्वाभावेन । अन्यथा—सहकारित्वादित्यस्यकारणतावच्छेदकत्वादित्यर्थानंगीकारे, यद्वाऽन्यथेत्यस्यैव विवरणं व्याप्तीत्यादिकारणत्वे इत्यंतमिति । संस्कारोद्बोधस्यापि—संस्कारनिष्ठानुमित्यादिरूपकार्य्यानुकूलशक्त्युद्बोधस्यापि । तद्द्वारा—संस्कारनिष्ठशक्त्युद्बोधद्वारा ॥

मू०—एवं चायं धूमवानिति पक्षधर्मताज्ञानेन धूमोवह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधेच सति वह्निमानित्यनुमितिर्भवति नतु मध्ये व्याप्तिस्मरणं तज्जन्यं वह्निव्याप्यधूमवानयमित्यादिविशेषणविशिष्टज्ञानंवा हेतुत्वेन कल्पनीयं गौरवान्मानाभावाच्च ॥

Funding by IKS-MoE

शि० म०–न व्याप्तिज्ञानं तत्संस्कारतदुद्बोधपक्षधर्मताज्ञानैरेवानुमितिसंभवे व्याप्तिज्ञानस्यापि करणत्वकल्पने गौरवात्, मानाभावाच्च । तथा सर्वत्रापि स्मृतौ संस्कार एव करणं, न पूर्वानुभव इति बहुव्याकुलीभावः स्यात् । नन्वेवमपि व्याप्तिस्मृतिरेवानुमितिहेतुर्नोद्बुद्धसंस्कारः, नच पक्षधर्मताज्ञानेन तत्संस्कारोद्बोधे सति यत्रानुमितिस्तत्र व्यभिचार इतिवाच्यम्, व्याप्तिस्मरणस्थले तस्यानुमितिहेतुत्वेन क्लृप्ततयाऽन्यत्रापि तत्कल्पनादित्यत आह (एवंचेति) व्याप्त्यनुभवतत्संस्कारयोर्व्यापारव्यापारिभावे सिद्धे सतीत्यर्थः । अयमाशयः किं व्याप्तिस्मृतिरेवावांतरव्यापार इत्यभिमतं करणमिति वा । नाद्यः, संस्कारोद्बोधानंतरमेव यत्रानुमितिस्तत्र व्यभिचारस्योक्तत्वात्, नच तत्रापि व्यापारतया तत्कल्पनं संस्कारस्य सत्त्वेन तृतीयलिंगपरामर्शवद्व्याप्तिस्मृतेरपि व्यापारत्वायोगात् । अत एव न द्वितीयः ॥

म०प्र०–तत्संस्कारेति–व्याप्तिज्ञानजन्यव्याप्तिविषयकसंस्कारेत्यर्थः । तदुद्बोधेति–संस्कारोद्बोधेत्यर्थः (बहुव्याकुलीभाव इति) संस्कारद्वारा स्मृतिं प्रत्यनुभवः करणं तथानुमितिं प्रति संस्कारद्वारा व्याप्त्यनुभवः करणमित्यादिबहुसिद्धांतानामुक्तप्रकारेण हानिः स्यादित्यर्थः । एवमपि–व्याप्त्यनुभवजन्यव्याप्तिविषयकसंस्कारोद्बोधस्य कारणत्वाभावेपि । स्मृतिरेवेत्येवकारव्यावर्त्यमाह (नोद्बुद्धसंस्कार इति । तत्संस्कारेति) व्याप्त्यनुभवजन्यव्याप्तिविषयकसंस्कारेत्यर्थः । यत्र–यस्मिन्नात्मनि यस्मिन्काले वा यस्मिन्नन्तःकरणे वा । तत्र तस्मिन्नात्मनितस्मिन्कालेवा तस्मिन्नन्तःकरणेवा, व्याप्तिस्मृतिस्थले–सदृशादृष्टचिंतनादिना संस्कारोद्बोधेन व्याप्तिस्मृत्यधिकरणे आत्मादौ । तस्य–व्याप्तिस्मरणस्य, अन्यत्रापि–यत्रात्माद्यधिकरणे पक्षधर्मताज्ञाने न व्याप्त्यनुभवजन्यव्याप्तिविषयकसंस्कारोद्बोधे सत्यनुमितिर्भवति तस्मिन्नात्माद्यधिकरणेपि एवं चेत्यादिमूलस्याभिप्रायमाह (अयमाशयइति । करणमिति) व्याप्तिस्मृतिरेव करणमित्यन्वयः । संस्कारोद्बोधानंतरम्–पक्षधर्मताज्ञानेन संस्कारोद्बोधानंतरम्, यत्र–यस्मिन्नात्माद्यधिकरणे, तत्र–तस्मिन्नात्माद्यधिकरणे, तत्रापि–पक्षधर्मताज्ञानेन संस्कारोद्बोधाधिकरणेआत्मादावपि, तत्कल्पनं–व्याप्तिस्मरणकल्पनम्, अतएव–उक्तस्थले व्यभिचारस्योक्तत्वादेव ॥

मू०–तच्च व्याप्तिज्ञानं वह्निविषयकज्ञानांश एव करणं नतु पर्वतविषयज्ञानांश इति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंश एवानुमितित्वं न पर्वतांशेतदंशे प्रत्यक्षत्वस्योपपादितत्वात् ॥

शि० म०-निर्व्यापारत्वाच्च । नच तृतीयलिंगपरामर्शो व्यापारः तत्कारणत्वस्य निराकृतत्वात्, नचानुमितौ करणांतरानुपपत्त्या व्याप्तिस्मृतिः करणं लिंगपरामर्शश्च तद्व्यापार इति कल्प्यते इतिवाच्यम्, व्याप्त्यनुभवस्य संस्कारव्यापारकस्य करणांतरस्य सत्त्वादिति । नन्वेवमपिव्याप्तिज्ञानजन्यत्वं नानुमितिलक्षणं सन्निकृष्टपक्षकानुमितेस्तवमते सन्निकृष्टविषयांशे अनुमितित्वाभावेन तदंशे अतिव्याप्तेरित्यतआह (तच्चेति) नन्वनुमितेः सन्निकृष्टविषयांशे व्याप्तिज्ञानजन्यत्वाभावान्नानुमितित्वं तदभावाच्च, न तज्जन्यत्वमित्यन्योन्याश्रयः स्यादित्याशंक्य पर्वतं पश्यामि वह्निमनुमिनोमीत्यनुभवबलादेव ज्ञानस्यांशभेदेन परोक्षत्वापरोक्षत्वयोः साधितत्वात्, नेत्याह (तदंशइति) ननु का व्याप्तिः यद्विषयज्ञानमनुमितिहेतुः स्यात् न तावदनौपाधिकत्वं, तद्धि यत्किंचित्साध्यव्यापकयत्किंचित्साधनाव्यापकशून्यत्वं तस्य सद्धेतावभावात् ॥

म० प्र०-निर्व्यापारत्वाच्च-व्याप्तिस्मृतेर्व्यापाररहितत्वाच्च, तत्कारणत्वस्य-तृतीयलिंगपरामर्शनिष्ठकारणत्वस्य, करणांतरानुपपत्त्या-व्याप्तिस्मृत्यतिरिक्तकरणासिद्ध्या तद्व्यापारः-व्याप्तिविषयकस्मृतेर्व्यापारः । करणांतरानुपपत्तिरूपहेत्वसिद्धिमभिप्रेत्य नच वाच्यमिति प्रतिज्ञायांहेतुमाह (व्याप्त्यनुभवस्येति) एवमपि-व्याप्तिस्मृतेः करणत्वाभावेपि तदंशे-सन्निकृष्टपर्वतादिविषयांशे तदभावाच्च-अनुमितित्वाभावाच्च, नतज्जन्यत्वम्-व्याप्तिज्ञानजन्यत्वाभावः व्याप्तिज्ञानजन्यत्वव्याप्तिज्ञानजन्यत्वाभावाभ्यामनुमितित्वाभावौ न किंतु सन्निकृष्टपर्वतादिविषयकज्ञाने पर्वतं पश्यामीत्यनुभवबलादनुमितित्वाभावोऽसन्निकृष्टवह्न्यादिविषयकज्ञाने तु वह्निमनुमिनोमीत्याद्यनुभवबलादेवानुमितित्वमिति नान्योन्याश्रय इत्यभिप्रेत्याह (पर्वतमिति) परममूले (तदंशेइति) पर्वतांशविषयकज्ञाने इत्यर्थः । अनौपाधिकत्वम्-हेतुनिष्ठमुपाधिशून्यत्वं, तद्धि-अनौपाधिकत्वंहि तस्य-यत्किंचित्साध्यव्यापकयत्किंचित्साधनाव्यापकोपाधिशून्यत्वस्य (सद्धेतावभावादिति) यथा पर्वतोधूमवान् वह्नेरित्यादौ व्यभिचारिणि वह्न्याद्यसद्धेतौ यत्किंचिद्वह्न्यादिसाधनाव्यापकार्द्रेन्धनसंयोगाद्युपाधेः सत्त्वेन यत्किंचित्साध्यव्यापकयत्किंचित्साधनाव्यापकोपाधिशून्यत्वाभावस्तथा पर्वतो वह्निमान् धूमादित्यादौ सद्धेतुधूमादावपि यत्किंचिद्वह्न्यादिसाध्यव्यापकयत्किंचित्प्रमेयत्वादिसाधनाव्यापकद्रव्यत्वाद्युपाधेः सत्त्वेन यत्किंचित्साध्यव्यापकयत्किंचित्साधनाव्यापकोपाधिशून्यत्वाभावेनासंभवः स्यादिति भावः ॥

मू०-व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपा ॥

शि० म०–नच प्रकृतेति साध्यसाधनयोर्विशेषणं तस्य सिद्ध्यसिद्धिभ्यां निषेद्धुमशक्यत्वात् । नापि कार्य्यकारणभावो व्याप्तिः दण्डघटयोरपि तत्प्रसंगात् । पृथिवीत्वस्य द्रव्यत्वव्याप्त्यभावापत्तेश्च । ततश्च दुर्निरूपाव्याप्तिरित्यत आह (व्याप्तिश्चेति) ॥

म० प्र०–(प्रकृतेतीति) प्रकृतत्वं च तात्पर्यगोचरत्वं तथाच प्रकृतयत्किंचित्साध्यव्यापकप्रकृतयत्किंचित्साधनाव्यापकशून्यत्वं विवक्षितमित्यर्थः । तथाच द्रव्यत्वस्य प्रकृतधूमादिसाधनव्यापकत्वान्नासंभव इति भावः । प्रकृतयत्किंचिद्वह्न्यादिसाध्यव्यापकप्रकृतयत्किंचिद्धूमादिसाधनाव्यापकधर्मस्य प्रसिद्धिरस्ति नवा । नाद्यः सिद्धस्य तस्य निषेधाभावान्न द्वितीयः । असिद्धस्यापि निषेधं वक्तुमशक्यत्वादित्यभिप्रेत्य नचेति प्रतिज्ञायां हेतुमाह (तस्येति) प्रकृतयत्किंचिद्वह्न्यादिरूपसाध्यव्यापकप्रकृतयत्किंचिद्धूमादिसाधनाव्यापकधर्मस्येत्यर्थः (कार्य्यकारणभावइति) प्रकृतिजन्यबोधे प्रकारो भावस्तथा च कारणं वह्निस्तन्निष्ठकारणतानिरूपितकार्य्यताधूमे । कार्य्यं धूमस्तन्निष्ठकार्य्यतानिरूपितकारणता वह्नावस्तीति कारणतानिरूपितकार्य्यता कार्य्यतानिरूपितकारणता व्याप्तिरित्यक्षरार्थः । निष्कृष्टार्थस्तु कारणतानिरूपितकार्य्यत्वमित्यर्थः (तत्प्रसंगादिति) व्याप्तिप्रसंगादित्यर्थः । तथाच दंडनिष्ठकारणतानिरूपितकार्य्यताया घटे सत्त्वात् घटनिष्ठकार्य्यतानिरूपितकारणताया दंडे सत्त्वाच्च दंडघटयोरतिव्याप्तिरिति भावः (पृथिवीत्वस्येति) यत्र पृथिवीत्वं तत्र द्रव्यत्वमिति पृथिवीत्वनिष्ठद्रव्यत्वनिरूपितव्याप्तिर्नस्यात्तयोः कार्य्यकारणभावाभावादित्यर्थः । परममूले (अशेषेति) व्यभिचारिणि वह्न्यादावतिव्याप्तिवारणायाशेषेति । नन्वशेषत्वं च कार्त्स्न्यं तस्य हेतावन्वयः स्वीक्रियते हेतुमति वा साध्ये वा । नाद्यः घटो द्रव्यं पृथिवीत्वादित्याद्येकव्यक्तिकहेतावव्याप्तेः पृथिवीत्वादिजातेरेकत्वेनाशेषत्वरूपकार्त्स्न्याप्रसिद्धेः । न द्वितीयः अयं घटः एतद्रूपवानेतद्रसादित्यादावेकव्यक्तिमात्रवृत्तिहेतावव्याप्तेस्तत्र हेतुमत एकत्वेन नानात्वरूपकार्त्स्न्याभावात् । न तृतीयः पर्वतो वह्निमान् धूमादित्यादौ प्रसिद्धधूमादिहेतावसंभवाद्धूमे अयःपिंडीयवह्निनिरूपितसामानाधिकरण्याभावेन सकलवह्निसामानाधिकरण्याभावात्तथाच नोक्ताव्याप्तिः संभवतीति चेन्न, व्यापकत्वरूपाशेषत्वाभ्युपगमेन पक्षत्रयेपि दोषाभावात् । तथाहि व्यापकत्वरूपाशेषत्वस्य हेतावन्वयाभ्युपगमपक्षे साध्यसामानाधिकरण्यनिष्ठं यद्धेतुतावच्छेदकव्यापकत्वमवच्छेदकतासंबंधेन स्वाश्रयाश्रयत्वसंबंधेन वा तद्वद्यत्साधनं तदाश्रयाश्रितसाध्यसामानाधिकरण्यं व्याप्तिरिति परममूलोक्तलक्षणनिष्कर्षः–तथाच घटो द्रव्यंपृथिवीत्वादित्यादौसाधनं पृथिवीत्वादिकं साधनतावच्छेदकं पृथिवीत्वत्वादिकं तन्निरूपितयद्व्यापकत्वंद्रव्यत्वस्वरूपसाध्याधिकरणवृत्तित्वनिष्ठमवच्छेदकतासंबंधेन स्वाश्रयाश्रयत्वसंबंधेन वा तद्वद्यत्साधनं पृथिवीत्वादिकं तदाश्रयाश्रितसाध्यसामानाधिकर-

Funding by IKS-MoE

ण्यस्यपृथिवीत्वादौ सत्त्वान्नाव्याप्तिरिति । स्वं व्यापकत्वं तदाश्रयः साध्यसामानाधिकरण्यं तदाश्रयत्वं हेताविति तदर्थः, घटो द्रव्यं सत्त्वादित्यत्र द्रव्यत्वरूपसाध्याधिकरणवृत्तित्वनिष्ठं यद्धेतुतावच्छेदकसत्तात्वनिरूपितव्यापकत्वं तस्यावच्छेदकतासंबंधेन स्वाश्रयाश्रयत्वसंबंधेन वा व्यभिचारिसत्तायां सत्त्वेपि द्रव्यत्वरूपसाध्यस्य सत्ताश्रयगुणाद्याश्रितत्वाभावेनातिव्याप्त्यभाव इति । एवं व्यापकत्वाभिन्नाशेषत्वस्य हेतुमत्यन्वयस्वीकारेपि न दोषः । तथाहि साध्याधिकरणत्वनिष्ठं यद्धेतुव्यापकत्वमुक्तान्यतरसंबंधेन तद्वान् य आश्रयस्तदाश्रितसाध्यसामानाधिकरण्यं व्याप्तिरिति परममूलोक्तलक्षणनिष्कर्षः । तथाच महानसादौ धूमवह्निसामानाधिकरण्यमिति प्रतीतेर्यत्र धूमस्तत्रावच्छेदकतासम्बन्धेन स्वाश्रयाश्रयतासंबंधेन वा साध्याधिकरणत्वनिष्ठहेतुव्यापकत्वस्य सत्त्वात्पर्वतोवह्निमान् धूमादित्यादौ धूमादौ लक्षणसमन्वयः, एवमयं घट एतद्रूपवानेतद्रसादित्यादावेतद्रसादिहेतावपि नाव्याप्तिः तद्रूपाधिकरणत्वनिष्ठं यदेतद्रसव्यापकत्वमुक्तोभयान्यतरसंबंधेन तद्वानयं घटस्तदाश्रितसाध्यसामानाधिकरण्यस्यैतद्रसादौ सत्त्वादिति साध्याधिकरणतानिष्ठं यत्साधनाधिकरणताव्यापकत्वयुक्तान्यतरसंबंधेन तद्वान् य आश्रयस्तदाश्रितसाध्यसामानाधिकरण्यं व्याप्तिरिति वा द्वितीयपक्षेपरममूलोक्तलक्षणनिष्कर्षः । अत्रापि पूर्वोक्तप्रकारेणातिव्याप्तिपरिहारो बोध्यः, एवं साध्ये व्यापकत्वरूपाशेषत्वस्यान्वयस्वीकारेपि पर्वतो वह्निमान् धूमादित्यादिवाक्योक्तधूमादौ नासंभवरूपो दोषः साधनतावच्छेदकसंबंधेन साधनाश्रयाश्रितं यत्साधनव्यापकं साध्यं तत्सामानाधिकरण्यं व्याप्तिरिति तृतीयपक्षे परममूलोक्तलक्षणनिष्कर्षादिति । नन्वेवमपि घटोद्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्रविशिष्टसत्ताहेतोर्विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन शुद्धसत्ताभेदाभावेन हेत्वधिकरणगुणादौ द्रव्यत्वरूपसाध्याभावेन साधनव्यापकसाध्याभावाद्विशिष्टसत्तारूपसाधनेऽव्याप्तिरिति चेन्न । विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्ये गुणः सत्तावानिति प्रतीतिवद्गुणोगुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तिरूपदोषाद्विशिष्टसत्तायाः शुद्धसत्तातिरिक्तत्वमंगीकृत्यैतन्निष्कर्षाभिधानात् । विशिष्टसत्तायाः शुद्धसत्तानतिरिक्तत्वेपि विशिष्टसत्तानिरूपिताधिकरणतायाः शुद्धसत्तानिरूपिताधिकरणतातिरिक्तत्वाच्च । तथाच साधनशब्देन साधनतावच्छेदकावच्छिन्नसाधनस्य विवक्षितत्वात्साधनतावच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्वं तदवच्छिन्नसाधनस्य गुणादावभावेन गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नसत्ताव्यापकं यद्द्रव्यत्वं तत्सामानाधिकरणस्य विशिष्टसत्ताहेतौ सत्त्वान्नाव्याप्तिरिति भावः ॥

शि० म०–यावत्साधनाश्रयाश्रितं यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः । नच साध्यतावच्छेदकस्य वह्नि-

त्वादेः साधनाश्रयमहानसाद्यनाश्रितत्वादिदमपि लक्षणं न युक्तमिति वाच्यम्, स्वाश्रयघटितपरंपरासंबन्धेन तस्य तद्वृत्तित्वात् । ननु अस्तु निरुक्ताव्याप्तिः तथापि न तज्ज्ञानसम्भवः ॥

म० प्र०—नन्वेवमपि हेतोः साध्यस्य च व्यक्तीनां नानात्वेन पर्वतीयधूमवह्निव्यक्त्योः सामानाधिकरणस्य सत्त्वेपि महानसीयवह्निव्यक्त्यासह पर्वतीयधूमव्यक्तेः सामानाधिकरण्याभावात्पर्वतो वह्निमान् धूमादित्यादौधूमादिहेतावव्याप्तिस्तदवस्थेत्यरुच्याह (यावदिति) साधनाधिकरणत्वव्यापकं स्वाश्रयाश्रयत्वसंबंधेन साधनाश्रयाश्रितं च यत्साध्यतावच्छेदकं तदवच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः । स्वं वह्नित्वादिकं तदाश्रयो वह्न्यादिस्तदाश्रयत्वं महानसादाविति संबंधवाक्यार्थः । तथाच सत्त्वरूपसाधनाश्रयगुणादौ स्वाश्रयाश्रयत्वसम्बन्धेन द्रव्यत्वाभावात् घटोद्रव्यं सत्त्वादित्यादौ नातिव्याप्तिः । हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणत्वस्य विवक्षितत्वाद्धूमावयवानादाय पर्वतो वह्निमान धूमादित्यादौ धूमादावव्याप्तेरुद्धाटनमपि न कार्य्यमिति । नचैवमपि विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन गुणकर्मान्यत्वविशिष्टसत्तायाः शुद्धसत्तायाश्च भेदाभावेन गुणकर्मणोः साधनाधिकरणत्वेपि स्वाश्रयाश्रत्वसंबंधेन द्रव्यत्वत्वरूपसाध्यतावच्छेदकाभावेन साध्यतावच्छेदकद्रव्यत्वत्वे साधनाधिकरणत्वव्यापकत्वासत्त्वेन घटो द्रव्यंगुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्तादावव्याप्तिरितिवाच्यम् । साधनतावच्छेदकावच्छिन्नसाधनाधिकरणत्वव्यापकत्वस्य विवक्षितत्वात् । तथाच विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन गुणकर्मान्यत्ववविशिष्टसत्तायाः शुद्धसत्तायाश्च भेदाभावेपि गुणकर्मान्यत्वविशिष्टसत्ताधिकरणत्वस्य शुद्धसत्ताधिकरणत्वस्य च भेदेन घटो द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ साधनतावच्छेदकं गुणकर्मान्यत्वमेव नतु शुद्धसत्तात्वं तदवच्छिन्नसाधनाधिकरणत्वस्य द्रव्यमात्रवृत्तित्वेन गुणकर्मवृत्तित्वाभावेन गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नसत्तारूपसाधनाधिकरणत्वव्यापकत्वस्य साध्यतावच्छेदकद्रव्यत्वत्वे सत्त्वेन गुणकर्मान्यत्वविशिष्टसत्तारूपसाधने नाव्याप्तिरिति । एवं दूषणांतरपरिहारोपि कर्तव्य इत्यलमतिविस्तरेणेति । इदमपि—यावत्साधनाश्रयाश्रितमित्यादिवाक्योक्तमपि स्वाश्रयघटितपरंपरासंबंधेन—स्वाश्रयाश्रयत्वसंबंधेन । स्वं—वह्नित्वादिकं, तदाश्रयो—वह्न्यादिस्तदाश्रयत्वं—महानसादाविति संबंधवाक्यार्थः । तस्य—वह्नित्वादेः । तद्वृत्तित्वात्—महानसादिवृत्तिमत्त्वात्, तथापि—निरुक्तव्याप्तिसम्भवेपि । नतज्ज्ञानसम्भवः—निरुक्तव्याप्तिसत्त्वं न सम्भवति ॥

मू०—सा च व्यभिचाराज्ञाने सति सहचारदर्शनेन गृह्यते तच्च सहचारदर्शनं भूयो दर्शनं सकृद्दर्शनं वेतिविशेषो नादरणीयः सहचारदर्शनस्यैव प्रयोजकत्वात् ॥

Funding by IKS-MoE

शि० म०–तद्ग्राहकाभावात् । न तावत्तर्कस्तद्ग्राहकः, तस्य व्याप्तिमूलकत्वेन तत्रापि तर्कापेक्षायामनवस्थानात् । व्याप्तिशून्यत्वे च तस्य प्रशिथिलमूलत्वेन तर्काभासतया व्याप्तिग्राहकत्वायोगात् । नापि सहचारज्ञानं व्याप्तिग्राहकं, तद्धि न सकृद्दर्शनं सत्यपि तस्मिन् व्यभिचारज्ञाने व्याप्त्यग्रहात् । नच भूयस्सहचारज्ञानं तथा सहचारज्ञानबाहुल्येपि पार्थिवत्वादौ लोहलेख्यत्वादिव्याप्त्यग्रहात् । ततश्च ग्राहकाभावात् दुर्ज्ञेयाव्याप्तिरित्याशंक्याह (साचेति) व्यभिचाराज्ञान इत्युपलक्षणं व्याप्यत्वादिविरहज्ञानाभावे सतीत्यपि द्रष्टव्यम् । नचैवं व्यभिचारिणि व्यभिचारज्ञानाभावदशायां सहचारज्ञानात् व्याप्तिग्रहः स्यादिति वाच्यम्, इष्टत्वात् (सहचारदर्शनस्येति) नचास्य सहचारज्ञानत्वेन कारणत्वे प्रमाणाभावः, अगृहीतसहचारस्य व्याप्तिग्रहाभावादन्वयव्यतिरेकाभ्यां तस्य हेतुत्वावधारणात् ॥

म०प्र०–तद्ग्राहकाभावात्–निरुक्तव्याप्तिविषयकज्ञानजनकाभावात् (न तावत्तर्कस्तद्ग्राहक इति) धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्याद्याकारकतर्कोहिव्यभिचारशंकानिवृत्तिद्वारा निरुक्तव्याप्तिग्राहको नेत्यर्थः । तस्य–धूमो यदि वह्निव्यभिचारी स्यात्तर्हिवह्निजन्यो न स्यादित्यादितर्कस्य, व्याप्तिमूलकत्वेन–आपाद्यनिरूपितापादकनिष्ठव्याप्तिग्रहमूलकत्वेन । तत्रापि–आपाद्यनिरूपितापादकनिष्ठव्याप्तिग्रहेपि, तर्कापेक्षायाम्–धूमो यदि वह्निजन्यः स्यात्तर्हि वह्निव्यभिचारी न स्यादित्यादितर्कापेक्षायाम्, व्याप्तिशून्यत्वे–तर्कस्यापाद्यनिरूपितापादकनिष्ठव्याप्तिप्रमामूलकत्वाभावे, प्रशिथिलमूलत्वेन–अदृढीभूतापाद्यापादकव्याप्तभ्रममूलकत्वेन, तद्धि–साध्यसाधनयोः सहचारज्ञानं हि, तस्मिन्–साध्यसाधनयोः सहचारज्ञाने, तथा हेतुनिष्ठव्याप्तिग्राहकम्, (व्याप्यत्वादीति) अत्रादिपदेन व्यापकत्वं ग्राह्यं तथाच व्याप्याश्रयो व्याप्यो धूमादिस्तन्निष्ठव्याप्यत्ववह्न्यादिसाध्यनिष्ठव्यापकत्वाभावज्ञानाभावे सत्यपीत्यर्थः । एवं–व्यभिचाराज्ञानादिकालीनसहचारदर्शनस्य, व्याप्तिग्राहकत्वे सति, व्यभिचारिणि–धूमवान्वह्नेरित्यादौ वह्न्यादौ अस्य–व्यभिचाराज्ञानादिकालीनसहचारज्ञानस्य, कारणत्वे–व्याप्तिज्ञाननिरूपितकारणत्वे, नचेति प्रतिज्ञायां हेतुमाह (अन्वयव्यतिरेकाभ्यामिति) सति व्यभिचाराज्ञानादिकालीनसहचारदर्शने व्याप्तिग्रहः व्यभिचाराज्ञानादिकालीनसहचारदर्शनाभावे सति व्याप्तिग्रहाभाव इत्यन्वयव्यतिरेकाभ्यां तस्य व्यभिचाराज्ञानादिकालीनसहचारज्ञानस्य करणत्वनिश्चयादित्यर्थः । ननु कुत्रव्यतिरेकनिश्चय इत्याशंक्याह (अगृहीतसहचारस्येति) पुंस इति शेषः ॥

मू०—तच्चानुमानमन्वयिरूपमेव नतु केवलान्वयि सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यंताभावप्रतियोगित्वेन अत्यंताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः ॥

शि० म०—नचैतावता तद्विशेषणज्ञानत्वेन हेतुः स्यादिति वाच्यम्, सहचारविशेष्यकप्रत्यक्षे तदभावात्। सिद्धांते विशेषणज्ञानस्य कारणत्वाभावाच्च। अनुमानं त्रिविधं, केवलान्वयिकेवलव्यतिरेकिअन्वयव्यतिरेकि भेदादिति नैयायिकादयः। तान्निराकरोति (तच्चेति) अनुमानविषयीभूतं लिंगमित्यर्थः (सर्वस्येति) सर्वस्य प्रपंचस्य "नेहनानास्ति" इत्यादिना ब्रह्मणि निषेधावगमादिति भावः (असिद्धेरिति) अप्रसिद्धेरित्यर्थः। अत्र ब्रूमः—स्ववृत्तिविरोधिवृत्तिमदत्यंताभावाप्रतियोगित्वं साध्यस्य केवलान्वयित्वं तत्साध्यकत्वं केवलान्वयिलिंगलक्षणम् ॥

म० प्र०—एतावता—व्यभिचाराज्ञानादिकालीनसहचारज्ञानस्य व्याप्तिग्रहहेतुत्वनिश्चयेन, तत्—व्यभिचाराज्ञानादिकालीनसहचारज्ञानम् (विशेषणज्ञानत्वेति) सहचारनियमोव्याप्तिरित्याद्याकारकव्याप्तिविषयकविशिष्टबुद्धिं प्रति विशेषणज्ञानत्वेन हेतुः स्यान्न सहचारज्ञानत्वेन हेतुरित्यर्थः (सहचारविशेष्यकप्रत्यक्षे) धूमेवह्निनिरूपितव्याप्तिग्राहकसामानाधिकरण्यमित्याकारकप्रत्यक्षे वह्निधूमयोर्व्याप्तिग्राहकसामानाधिकरण्यमित्याकारकप्रत्यक्षे वा, तदभावात्—विशेषणज्ञानत्वाभावात्, विशेषणज्ञानत्वेन सहचारज्ञानस्य व्याप्तिज्ञानेकारणत्वाभावाद्वा (कारणत्वाभावाच्चेति) प्रत्यक्षात्मविशिष्टबुद्धिं प्रति विशेषणविशेष्योभयसन्निकर्षस्य हेतुत्वादिति भावः। अनुमानं—अनुमितिकरणव्याप्तिज्ञानादिविषयो लिंगम् (स्ववृत्तिविरोधिवृत्तिमदत्यंताभावप्रतियोगित्वमिति) अत्रवृत्तिशब्देनाधेयता ग्राह्या। तथाच प्रमेयत्वादिवृत्तिविरोधिवृत्तिमत्प्रमेयत्वाद्यत्यंताभावाप्रसिद्ध्यास्वशब्देन घटादयो ग्राह्यास्तेषामाधेयता विरोधिवृत्तिमदत्यंताभावो घटादिशून्यदेशे घटाद्यत्यंताभावस्तत्प्रतियोगित्वं घटादावप्रतियोगित्वं प्रमेयत्वादाविति लक्षणसमन्वयः वृत्तिमदत्यंताभावाप्रतियोगित्वं केवलान्वयित्वमित्युक्ते कपिसंयोगात्यंताभावादीनामपि केवलान्वयित्वस्याभीष्टत्वेन लक्ष्यत्वात्कपिसंयोगाभावादिष्वव्यापिः स्याद्वृत्तिमदत्यंताभावः कपिसंयोगात्यंताभावाद्यभावस्तत्प्रतियोगित्वस्य कपिसंयोगाभावादौ सत्त्वात्तद्वारणाय स्ववृत्तिविरोधीति तथाच स्ववृत्तिविरोधिवृत्तिमदत्यंताभावः कपिसंयोगात्यंताभावाद्यभावो नास्ति कपिसंयोगात्यंताभावाद्य-

भावरूपकपिसंयोगाद्यधिकरणवृक्षादौ मूलाद्यवच्छेदेन कपिसंयोगाद्यत्यंताभावस्य सत्त्वात्, किंतु - स्ववृत्तिविरोधिवृत्तिमदत्यंताभावो घटात्यंताभावस्तत्प्रतियोगित्वं घटादावप्रतियोगित्वं कपिसंयोगात्यंताभावादाविति कपिसंयोगात्यंताभावादौ केवलान्वयित्वमिति गगनात्यंताभावादावव्याप्तिवारणाय वृत्तिमदित्युक्तम् । तथाच गगनात्यंताभावाद्यभावस्य गगनादिरूपत्वेन वृत्तिमत्त्वाभावेन तद्ग्रहणासंभवेन नाव्याप्तिरिति, तत्साधकत्वं—केवलान्वयिसाध्यविषयकानुमितिजनकत्वम् ॥

शि० म०—प्रमेयत्वादेश्च स्वसमानाधिकरणपारमार्थिकत्वावच्छिन्नात्यंताभावप्रतियोगित्वेऽपि स्ववृत्तिविरोधिवृत्तिमदत्यंताभावाप्रतियोगित्वात्केवलान्वयित्वं, नच, श्रुतिविरोधः तस्या अपि पारमार्थिकत्वावच्छिन्नद्वैताभावपरत्वात् । तदुक्तमष्टमवर्णके विवरणाचार्य्यैः आगमेन च द्वैतस्य तत्त्वांशबाधादिति । नच लक्षणे स्ववृत्तिविरोधीतिव्यर्थं तस्याव्याप्यवृत्तिकपिसंयोगात्यंताभावादिसंग्रहार्थत्वात् । नच ब्रह्मणः स्वप्रकाशत्वेन तत्र स्वरूपेणापि प्रमेयत्वस्याभावात् कथं केवलान्वयित्वमिति वाच्यम्, ब्रह्मणोपि वृत्तिलक्षणप्रमाविषयत्वात्, नचैतावता स्वप्रकाशत्वविरोधः, अनुपहितस्यैव तथात्वात् । तथाचाहुराचार्य्यवाचस्पतिमिश्राः—

सर्वोपाधिविहीनं हि स्वयंज्योतिरितिगीयते ॥

ननूपहितमपीति अत एवाहुः न तावदयमेकांतेनाविषय इति, नचैवमपि नाभिधेयत्वं केवलान्वयि ब्रह्मणोनभिधेयत्वादिति वाच्यम्, ब्रह्मणो लक्ष्यतया वाच्यत्वाभावेपि पदजन्यज्ञानविषयत्वात्, वाच्यत्वस्याग्रे ग्रंथकृता वक्ष्यमाणत्वाच्च नचैवं प्रमेयत्वादिवृत्तिविरोधिनो प्रसिद्धत्वात्तत्र लक्षणाव्याप्तिः स्ववृत्तिविरोधिवृत्तिमदत्यंताभावप्रतियोगिनो घटादयः प्रसिद्धास्तदन्यत्वस्य प्रमेयत्वादावपि सत्त्वात् नचायमभिधेयवान् द्रव्यत्वादित्यत्र केवलान्वयिलिंगलक्षणस्याव्याप्तिरिति वाच्यम् ॥

म० प्र०—श्रुतिविरोधः—प्रमेयत्वादीनांस्ववृत्तिविरोधिवृत्तिमदत्यंताभावाप्रतियोगित्वरूपकेवलान्वयित्वे “एकमेवाद्वितीयं नेहनानास्ति किंचन” इत्यादिश्रुतिविरोधः । तस्याअपि—अद्वैतश्रुतेरपि (पारमार्थिकत्वावच्छिन्नेति) पारमार्थिकत्वावच्छिन्नप्रतियोगिताकेत्यर्थः । आगमेन—नेहनानास्ति किंचनेत्यादिश्रुत्या (तत्त्वांशेति) पारमार्थिकत्वांशेत्यर्थः । तस्य—स्ववृत्तिविरोधीतिविशेषणस्य । तत्र—ब्रह्मणि । स्वरूपेणापि—प्रमेयत्वत्वेनापि । एतावता—वृत्तिलक्षणप्रमाविषयत्वस्वीकारेण । स्वप्रकाश-

त्वविरोधः—इतराप्रकाश्यस्यैव स्वप्रकाशत्वेन स्वप्रकाशत्वानुपपत्तेः । तथात्वात्—स्वप्रकाशत्वात् नचानुपहितब्रह्मणो वृत्त्यविषयत्वेन स्वरूपेण प्रमेयत्वाभावात्प्रमेयत्वस्य केवलान्वयित्वानुपपत्तिरूपपूर्वोक्तदोषस्तदवस्थः शुद्धस्यापि वृत्तिविषयत्वस्वीकारे तु बहुसिद्धांतभंगापत्तिरिति वाच्यम् । अनुपहितस्य ब्रह्मणोपि वृत्तिविषयत्वस्वीकारात् नचैतावता स्वप्रकाशत्वविरोधस्तदवस्थ इतिवाच्यम्, वृत्तिविषयत्वेपि वृत्तिप्रकाश्यत्वाभावादिति (नतूपहितमपीतीति) अस्य स्वयंज्योतिरिति गीयते इति पूर्वेणान्वयः । अयम्—सर्वोपाधिविहीनः (एकांतेनेति) सर्वप्रकारेणाविषयो न किंत्वनुपहितब्रह्मणो वृत्तिविषयत्वं फलचैतन्याविषयत्वमित्यर्थः । एवमपि—प्रमेयत्वस्य केवलान्वयित्वेपि (विषयत्वादिति) पदजन्यज्ञानविषयत्वमेवाभिधेयत्वमिति भावः । ननु शब्दशक्तिविषयत्वरूपाभिधेयत्वस्य शास्त्रे प्रसिद्धत्वेन पदजन्यज्ञानविषयत्वरूपमभिधेयत्वं न प्रसिद्धमित्याशंक्याह (वाच्यत्वस्येति) शब्दशक्तिविषयत्वस्येत्यर्थः । एवम्—प्रमेयत्वादीनां सर्वत्रस्वीकारेण प्रमेयत्वादिवृत्तिविरोधिनः प्रमेयत्वादिवृत्तिविरोधिवृत्तिमदत्यंताभावस्य । तत्र—प्रमेयत्वादौ, अव्याप्तिः—असंभवः । अयम्—पर्वतादिः (अभिधेयवानिति) अत्राभिधेयस्य साध्यत्वेनाभिधेया वाच्या येरूपादयस्तद्वानित्यर्थः (अव्याप्तिरिति) स्वमभिधेयं स्ववृत्तिविरोधिवृत्तिमदत्यंताभावश्चालनीन्यायेन रूपादिस्वरूपतत्तदभिधेयाभावस्तत्प्रतियोगित्वस्याभिधेये सत्त्वादितिशेषः ॥

मू०—नाप्यनुमानस्यव्यतिरेकिरूपत्वं साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात् । कथं तर्हि धूमादावन्वयव्याप्तिमंविदुषोपि, व्यतिरेकव्याप्तिज्ञानादनुमितिः ॥

शि० म०-तादृशात्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्येह विवक्षितत्वात् । तस्माद्युक्तं द्रव्यत्वादेः केवलान्वयित्वमिति संक्षेपः (व्यतिरेकिरूपत्वमिति) व्यतिरेकव्याप्तिधीजन्यानुमितिकारणत्वं व्यतिरेकित्वमित्यर्थः (अनुपयोगादिति) अन्यगतव्याप्तिज्ञानस्याप्यन्यलिंगकानुमितिहेतुत्वे कृतकत्वानित्यत्वव्याप्तिज्ञानेन धूमाद्वह्न्यनुमित्यापत्तेरितिभावः । ननु व्यतिरेकव्याप्तिज्ञानमप्यनुमितिकरणं धूमादावन्वयव्याप्त्यज्ञानदशायां व्यतिरेकव्याप्तिज्ञाने पक्षधर्मताज्ञानेच सति सन्निकृष्टपर्वतादौ वह्निज्ञानस्यानुभूयमानत्वात् । नचातिप्रसंगः, स्वगतव्याप्तिज्ञानवत्स्वाभावनिरूपितसाध्याभावनिष्ठ-

व्याप्तिज्ञानस्यापि फलबलेनानुमितिहेतुत्वकल्पनादित्याशयेनाक्षिपाति (कथंतर्हीति) सत्यं व्यतिरेकव्याप्तिज्ञानाद्वह्निज्ञानमिति तथापि न सानुमितिः क्लृप्तकारणाभावात् ॥

म०प्र०–(तादृशात्यंताभावेति) तादृशात्यंताभावः स्ववृत्तिविरोधिवृत्तिमद्रूपादिस्वरूपतत्तदभिधेयात्यंताभावस्तत्तत्प्रतियोगितावच्छेदकं तत्तदभिधेयत्वमनवच्छेदकमभिधेयत्वरूपसाध्यतावच्छेदकं तदवच्छिन्नसाध्यसाधकत्वं द्रव्यत्वे इति लक्षणसमन्वयः यत्किंचिदभिधेयाभावसत्त्वेप्यभिधेयत्वावच्छिन्नाभिधेयाभावो नास्तीति नाव्याप्तिरिति भावः । इह–स्ववृत्तिविरोधीत्याद्युक्तवाक्ये । परममूले (व्यतिरेकिरूपत्वमिति) केवलव्यतिरेकिरूपत्वमित्यर्थः । साधनेन हि साध्यमनुमीयतेऽनुमितौ च साध्यनिरूपितसाधननिष्ठव्याप्तिज्ञानमुपयुज्यते नतु साध्याभावनिष्ठसाधनाभावनिरूपितव्याप्तिज्ञानमित्याह परममूले (साध्याभावेइति) वृत्तित्वं सप्तम्यर्थः । तथाच साध्याभावनिष्ठा या साधनाभावनिरूपिता व्याप्तिस्तज्ज्ञानस्येत्यर्थः । परममूले (साधनेनेति) गंधादिसाधनेन साध्यजन्यायानुमितिरितरभेदरूपसाध्यविषयिका यानुमितिरिति वा, तत्र साध्याभावनिष्ठसाधनाभावनिरूपितव्याप्तिज्ञानस्यानुपयोगात्करणत्वाभावादित्यर्थः (व्यतिरेकव्याप्तिधीति) गंधाभावव्याप्य इतरभेदाभाव 'इत्याकारकव्यतिरेकव्याप्तिधीजन्या पृथिवीतरेभ्यो भिद्यते इत्याकारिका यानुमितिस्तत्कारणत्वमित्यर्थः । अन्यगतव्याप्तिज्ञानस्यापि साध्याभावगतव्याप्तिज्ञानस्यापि अन्यलिंगकानुमितिहेतुत्वे–गंधादिलिंगकानुमितिहेतुत्वे, कृतकत्वान्नित्यत्वव्याप्तिज्ञानेन–कृतकत्वमनित्यत्वव्याप्यमितिकृतकत्वनिष्ठानित्यत्वनिरूपितव्याप्तिज्ञानेन, अतिप्रसंगः–धूमाद्वह्न्यनुमित्यापत्तिरूपातिप्रसंगः (स्वगतव्याप्तिज्ञानवदिति) स्वं हेतुस्तद्गता या व्याप्तिस्तज्ज्ञानस्य यथा धूमादिलिंगकानुमितौ हेतुत्वं तद्वदित्यर्थः (स्वाभावेति) हेत्वभावेत्यर्थः । फलबलेन–अनुमित्यात्मककार्य्यान्यथानुपपत्त्या सा वह्निज्ञानरूपाबुद्धिः, क्लृप्तकारणाभावात्–हेतुगतव्याप्तिज्ञानरूपप्रसिद्धकारणाभावात् ॥

मू०–अर्थापत्तिप्रमाणादिति वक्ष्यामः ॥

शि० म०–किंत्वर्थापत्तिप्रमाणजन्यत्वादर्थापत्तिरित्याह (अर्थापत्तीति) वयं तु ब्रूमः धूमादावन्वयव्याप्तिमविदुषोऽपि ततो वह्निज्ञानमित्यविवादं तच्चानुमितिरेव वह्निमनुमिनोमीत्यनुव्यवसायात् । नच क्लृप्तकारणस्य व्याप्तिज्ञानस्याभावात्, कथमनुमितिरित्युक्तमिति वाच्यम्, व्यतिरेकव्याप्तिज्ञानस्य सत्त्वात् । नन्वस्तु व्यतिरेकव्याप्तिज्ञानं तथापि नानुमितिः तस्यानुमित्यहेतुत्वात् । तथाहि तस्य न व्याप्तिज्ञान–

त्वेन हेतुत्वमतिप्रसंगात् । नापि स्वाभावनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानत्वेन अन्वयव्याप्तिज्ञानस्यानुमित्यहेतुत्वापत्तेः । नापि स्वव्याप्तिज्ञानत्वेन स्वव्यतिरेकव्याप्तिज्ञाने तदभावात् । नचान्यतरत्वं कारणतावच्छेदकं तथा सत्येकप्रमाणपरिशेषापत्तेः । नचतृणारणिमणिन्यायेनानुमितिविशेषे तत्कारणमिति वाच्यम् ॥

म० प्र०—परममूले (अर्थापत्तिप्रमाणादिति) वक्ष्यमाणरीत्यार्थापत्तिप्रमाणस्यावश्यकतया व्यतिरेक्यनुमानस्य तदंतर्भावसंभवेन तस्य पृथक्प्रामाण्याभ्युपगमो नयुक्त इति भावः, ततः-धूमादिहेतुतः (क्लृप्तेति) निश्चितेत्यर्थः । व्याप्तिज्ञानस्य—अन्वयव्याप्तिज्ञानस्य अन्वयव्याप्तिज्ञानस्यैव क्लृप्तप्रमाणत्वमसिद्धमित्यभिप्रेत्य नचवाच्यमिति प्रतिज्ञायाहेतुमाह (व्यतिरेकेति) तस्य—व्यतिरेकव्याप्तिज्ञानस्य, तस्य—व्याप्तिज्ञानस्य, अतिप्रसंगात्—कृतकत्वानित्यत्वव्याप्तिज्ञानेनधूमाद्वह्न्यनुमित्यापत्तिरूपातिप्रसंगात् (स्वाभावेति) हेत्वभावेत्यर्थः । नेति प्रतिज्ञायां हेतुमाह (अन्वयव्याप्तीति) साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तेर्हेतुनिष्ठत्वमभिप्रेत्य शंकते (स्वव्याप्तिज्ञानत्वेनेति) हेतुनिष्ठव्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्य हेतुत्वमित्यर्थः । तथाचान्वयव्याप्तिज्ञानस्यानुमित्यहेतुत्वापत्तिरूपो दोषो नेति भावः । साधनाभावनिरूपितासाध्याभावनिष्ठैवव्यतिरेकव्याप्तिर्नहेतुनिष्ठेत्यभिप्रेत्य नेतिप्रतिज्ञायां हेतुमाह (स्वव्यतिरेकव्याप्तिज्ञानेइति) स्वंहेतुस्तस्ययोव्यतिरेको अभावस्तन्निरूपितासाध्याभावनिष्ठा या व्याप्तिस्तज्ज्ञाने तदभावादनुमितिहेतुत्वाभावापातादित्यर्थः । अन्यतरत्वम्—स्वव्याप्तिज्ञानत्वस्वव्यतिरेकनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानत्वान्यतरत्वम् । कारणतावच्छेदकम्—अनुमितिनिष्ठकार्य्यतानिरूपितव्याप्तिज्ञाननिष्ठकारणतावच्छेदकम् । तथासति—स्वव्याप्तिज्ञानत्वस्य व्यतिरेकनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानत्वान्यतरत्वस्यकारणतावच्छेदकत्वस्वीकारे सति (एकप्रमाणपरिशेषापत्तेरिति) उक्तान्यतरत्वरूपकारणतावच्छेदकस्यैकत्वादेकमन्वयव्यतिरेकिरूपमनुमानप्रमाणं स्यान्नतुकेवलान्वयिकेवलव्यतिरेक्यनुमानं प्रमाणं स्यादिति भावः (तृणारणिमणिन्यायेनेति) तृणजन्यत्वविशिष्टवह्निं प्रति तृणत्वेन कारणत्वमरणिजन्यत्वविशिष्टवह्निं प्रत्यरणित्वेन कारणत्वं मणिजन्यत्वविशिष्टवह्निंप्रति मणित्वेन कारणत्वमितिकार्यतावच्छेदकभेदेन यथातृणादीनां तत्तद्वह्निं प्रति कारणत्वम् ॥

शि० म०—व्यतिरेकिसाध्यज्ञाने अनुमितित्वस्यैवासिद्धेः क्लृप्ततत्करणस्य व्याप्तिज्ञानस्याभावादिति चेत् न, स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वेन व्याप्तिज्ञानस्यानुमितिहेतुत्वात् । अस्य च व्यति-

रेकव्याप्तिज्ञानसाधारणत्वात्, नहि धूमाभावो यावद्वह्न्यभावाधिकरणवृत्तिरिति ज्ञाने धूमो वह्न्यभावेन समानाधिकरण इति ज्ञानं संभवति नचातिप्रसंगः, धूमो वह्निव्याप्य इति ज्ञानस्य कृतकत्वानित्यत्वव्यभिचारज्ञानाविरोधित्वेनानित्यत्वानुमितिहेतुत्वाभावात्। नन्वनुमानस्य व्यतिरेकितयापि प्रामाण्याभ्युपगमे तत्रैवार्थापत्तेरंतर्भावापत्तौ सा पृथक् प्रमाणमिति राद्धांतो भज्येतेति चेत्तर्ह्यनुमानस्य प्रामाण्ये संशयाद्युत्तरप्रत्यक्षस्थले चक्षुरादेः प्रामाण्यं न स्यात्तत्रानुमितिसामग्रीसत्त्वेनानुमितेरेवोत्पत्तेः। तथा शाब्दज्ञानस्थलेपि शब्दो न प्रमाणं स्यात्। एते पदार्थास्तात्पर्यविषयमिथःसंसर्गवंतः ॥

म० प्र०–तद्वत्स्वव्याप्तिज्ञानाव्यवहितोत्तरक्षणजायमानानुमितिं प्रति स्वव्याप्तिज्ञानत्वेन हेतुत्वं स्वव्यतिरेकिनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानाव्यवहितोत्तरक्षणजन्यानुमितिंप्रतिस्वव्यतिरेकनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानत्वेन कारणत्वमित्यनुमितिविशेषे तत्कारणं स्वव्याप्तिज्ञानं स्वाभावनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानं च कारणमित्यर्थः । तथाचोक्तप्रकारेण कार्य्यतावच्छेदकभेदेन कारणतावच्छेदकस्यभेदान्नैकप्रमाणपरिशेषापत्तिरिति भावः । व्यतिरेकिसाध्यज्ञाने–पृथिवीतरेभ्यो भिद्यतेगंधवत्त्वादित्यादौ केवलव्यंतिरेकिहेतुजन्यसाध्यज्ञाने उक्तज्ञानेऽनुमितित्वासिद्धौ हेतुमाह (क्लृप्ततत्करणस्येति) उभयवादिसंमतानुमितिकरणस्य । व्याप्तिज्ञानस्य–अन्वयव्याप्तिज्ञानस्य (अभावादिति). तथाच हेत्वभावनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानाव्यवहितोत्तरक्षणजन्यानुमितित्वरूपकार्य्यतावच्छेदकाभावेन स्वव्यतिरेकनिरूपितसाध्याभावनिष्ठव्याप्तिज्ञानत्वरूपकारणतावच्छेदकभेदाभावान्न व्यतिरेकिणः पृथक्प्रमाणत्वमिति भावः (स्वव्यभिचारधीति) स्वं धूमादिहेतुस्तन्निष्ठा यांव्यभिचारधीर्धूमादिर्वह्न्यादिसाध्याभाववद्वृत्तिरित्याकारिका तस्याविरोधिधीर्वह्न्यादिसाध्याभाववद्वृत्तिधूमादिहेतुः साध्याभावव्यापकीभूताभावप्रतियोगिधूमादिहेतुर्वह्न्यादिसाध्याभावाधिकरणवृत्तिर्धूमादिहेत्वभाव इत्याद्याकारिका तस्याविषयो व्याप्तिस्तज्ज्ञानत्वावच्छिन्नव्याप्तिज्ञाननिष्ठकारणत्वादित्यर्थः । अस्य–स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञानत्वस्य, साधारणत्वात्–वृत्तित्वात्, इतिज्ञाने–इत्याकारके स्वव्यभिचारधीविरोधिधीविषयव्याप्तिज्ञाने सति, इतिज्ञानं–इत्याकारव्यभिचारज्ञानम् । (नचातिप्रसंगइति) धूमोवह्निव्याप्य इतिव्याप्तिज्ञाने सति, कृतकत्वहेतोरनित्यत्वविषयकानुमित्यापादनं न संभवतीत्यर्थः, (अनुमितीति) कृतकत्वहेतुकानुमितीत्यर्थः (प्रामाण्येति) प्रमाकरणत्वइत्यर्थः, तत्रैव–अनुमानप्रमाणेएव, सा–अर्थापत्तिः, प्रत्यक्षस्थले–प्रत्यक्षकालेप्रत्यक्षविषयेवा । तत्र–संशयाद्युत्तरप्रत्यक्षविषये एते

Funding by IKS-MoE

पदार्थाः । दंडेन गामानयेति वाक्यघटकपदानां दंडकरणत्वगोकर्मत्वानयनकृतिरूपाअर्थाः (तात्पर्य्येति) कालिकसंबंधमादायापादितसिद्धसाधनतावारणाय तात्पर्य्यविषयेति मिथः संसर्गविशेषणम् । मिथःसंसर्गवंतः—आधेयत्वस्वरूपनिरूपकत्वजनकत्वादिरूपसंसर्गवंतः ॥

शि० म०—आकांक्षादिमत्पदकदंबस्मारितत्वादित्यनुमानेनैव क्लृप्तप्रमाणभावेन तात्पर्यविषयसंसर्गप्रतीतिसंभवात् । यदिच स्थाणुं साक्षात्करोमि शब्दादमुमर्थं प्रत्येमीत्यनुभवबलात् प्रत्यक्षशब्दयोः पृथक् प्रामाण्यं तर्हि व्यतिरेकव्याप्तिज्ञानादिघटितानुमितिसामग्र्यां सत्यामपि वह्निज्ञानानंतरं धूमेन वह्निं कल्पयामीति यदानुव्यवसायस्तदा धूमस्यार्थापत्तिविधया प्रामाण्यमिति तुल्यम् । यद्वा निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते इति व्यतिरेकिण्यप्यन्वयव्याप्तिज्ञानमेवानुमितिहेतुः नचान्यसहचारज्ञानादन्यत्र व्याप्तिग्रहेऽतिप्रसंगः । स्वाधिकरणनिष्ठव्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन तस्य व्याप्तिज्ञानहेतुत्वाभ्युपगमात् । नचैवं सत्यन्वयिव्यतिरेकिणोर्भेदो न स्यादिति वाच्यम् । व्यतिरेकसहचारमात्रज्ञानजन्यान्वयव्याप्तिधीर्यत्रानुमितिहेतुः स व्यतिरेकी ॥

म० प्र०—पदकदंबस्मारितत्वात्—दंडादिपदसमूहजन्यपदार्थोपस्थितिविषयत्वात्, क्लृप्तप्रमाणभावेन—निश्चितप्रमाणत्वेन (निरुपाधिव्यतिरेकेति) निरुपाधिरुपाधिशून्यो यत्र वह्न्यभावस्तत्र धूमाभाव इति यो वह्न्यभावधूमाभावयोः सहचारस्तेनेत्यर्थः । धूमवान्वह्नेरित्यादौ धूमाभावादिवह्न्यभावाद्योर्यः सहचारः सतु उपाधिव्यभिचारितासंबंधेन वह्निसंयोगाभावाद्युपाधिविशिष्टः साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वमित्यस्यव्यापकव्यापकत्वे सति व्याप्याव्यापकत्वमित्यर्थकत्वात्तथाच यत्र वह्न्यभावस्तत्र वह्निसंयोगाभावो यथा जलह्रदे इति वह्निसंयोगाभावरूपोपाधेर्व्यापकवह्न्यभावव्यापकत्वेन साध्यव्यापकत्वम् । यत्र धूमाभावस्तत्र वह्निसंयोगाभावाभावो यथाऽयोगोलके इत्युक्तोपाधेः साधनाव्यापकत्वं व्यापकाभावाद्व्याप्याभावः व्यापकोपाधेरयोगोलकेऽभावाद्व्याप्यस्य वह्न्यभावस्याभावः । वह्न्यभावाभावो वह्निस्वरूप एवंचायोगोलके वह्न्यभावो नास्ति धूमाभावो वर्त्तते इति व्यभिचारोन्नायकतया व्यतिरेकसहचार उपाधिव्यभिचारितासंबन्धेनोपाधिमानिति भावः (अन्वयव्याप्तिरेवगृह्यतेइति) वह्न्यभाववदवृत्तिर्धूम इत्याकारस्य धूमो वह्निसमानाधिकरण इत्याकारकस्य वा ग्रहस्य विषयोन्वयव्याप्तिरेवेत्यर्थः (व्यतिरेकिण्यपीति) अन्वयव्याप्तिज्ञानमेव व्यतिरेकिण्यपि व्यतिरेकिलिंगसाध्येप्यनुमितिहेतुरितियोजना । अथवा

Funding by IKS-MoE

व्यतिरेकिण्यपि व्यतिरेकिहेतावपीत्यर्थः (स्वाधिकरणेति) स्वव्याप्तिस्तदधिकरणं हेतुस्तन्निष्ठं तद्विषयकं धूमो वह्न्यभाववद्वृत्तिरित्याद्याकारकं यद्व्यभिचारज्ञानं तस्य विरोधिधूमोवह्निसमानाधिकरण इत्याकारकं धूमाभावो यावद्वह्न्यभावाधिकरणवृत्तिरित्याकारकं वा यत्सहचारज्ञानं तन्निष्ठज्ञानत्वेनेत्यर्थः । तस्य—सहचारज्ञानस्य । एवंसति—व्यतिरेकसहचारस्य अन्वयव्याप्तिग्राहकत्वेस्वीकृते सति । व्यतिरेकिलिंगस्याप्यन्वयव्याप्तिज्ञानद्वारानुमितिहेतुत्वे स्वीकृते सतीति वा, यत्र—यस्मिन्हेतौ । एवमग्रेपि यत्रशब्दार्थो बोध्यः ॥

मू०—अत एवानुमानस्य नान्वयव्यतिरेकिरूपत्वम् । व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात् ॥ तच्चानुमानं स्वार्थपरार्थभेदेन द्विविधं तत्र स्वार्थंतूक्तमेव परार्थंतु न्यायसाध्यं न्यायो नाम अवयवसमुदायः ॥

शि० म०—यत्रान्वयसहचारमात्रज्ञानजन्यानुमितिहेतुः सोऽन्वयी यत्रोभयसहचारज्ञानजन्यासोऽन्वयव्यतिरेकीति विभागोपपत्तेः । अस्मिंश्चपक्षे यदान्वयसहचारेणान्वयव्याप्तिस्फुरणं तदा धूमस्यान्वयितया गमकत्वम् । यदा व्यतिरेकसहचारेण तदा केवलव्यतिरेकितया, यदान्वयव्यतिरेकसहचारेण तदान्वयव्यतिरेकितया, यदातु व्यतिरेकसहचारेण व्यतिरेकव्याप्तेरेव ज्ञानं तदाऽर्थापत्तिविधया धूमस्य प्रामाण्यम् । नच व्यतिरेक्यनुमानस्य पृथक् प्रमाणत्वेऽपसिद्धांतः । मूलग्रंथेषु शुक्तिरूप्यमिथ्यात्वादौ तत्र तत्र व्यतिरेक्यनुमानस्यापि प्रमाणत्वेनोपन्यासात् । तस्मात्त्रिविधमेवानुमानमिति युक्तमिति अतः शब्दार्थमाह व्यतिरेकेति (अवयवसमुदायइति) ॥

म० प्र०—जन्येति—अन्वयव्याप्तिधीरितिशेषः । एवमग्रेपि जन्याशब्दोत्तरं शेषो बोध्यः, अस्मिंश्चपक्षे—साध्याभावहेत्वभावसहचारेणाप्यन्वयव्याप्तिरेव गृह्यते इति पक्षे । अन्वयसहचारेण—अन्वयसहचारमात्रेण, गमकत्वम्—साध्यविषयकानुमितिजनकत्वम् । व्यतिरेकसहचारेण—साध्याभावसाधनाभावयोः सहचारेणैव अस्यान्वयव्याप्तिस्फुरणमित्यनेनान्वयः (केवलव्यतिरेकितयेति) गमकत्वमिति शेषः । पृथक्प्रमाणत्वे—अन्वय्यनुमानाद्भिन्नप्रमाणत्वे, मूलग्रंथेषु—शुक्तिरूप्यं मिथ्यादृश्यत्वाद्यन्नैवं तन्नैवं ब्रह्मवदित्यादिष्वाधुनिकाचार्य्यग्रंथमूलभूतेषु प्राचीनाचार्य्यग्रंथेषु । तत्र तत्र—तस्मिंस्तस्मिन् प्रकरणविशेषे, तस्मात्—नन्वस्तुव्यतिरेकव्याप्तिज्ञानमित्यादिग्रंथेनोक्तदोषाणामभावात् । एवम्—अवयवसमुदायस्यन्यायत्वस्वीकारे सति (न्यायजन्येति) वह्नि-

संबंध्यभिन्नः पर्वत इत्यादिः पर्वतो वह्निमानित्यादिप्रतिज्ञावाक्यार्थबोधः । धूमीयज्ञानज्ञाप्यत्वाद्वित्यादिर्धूमादिहेतुवाक्यार्थबोधः । वीप्सायास्तात्पर्यग्राहकतया वह्निपदस्य धूमव्यापकवह्नौ लक्षणया धूमसंबंध्यभिन्नः धूमव्यापकवह्निसंबंध्यभिन्न इत्यादियो यो धूमवान्स सोऽग्निमानित्याद्युदाहरणवाक्यार्थबोध इत्येवं प्रतिज्ञादिवाक्यैः खंडवाक्यार्थबोधः । ततः प्रतिज्ञाद्युदाहरणांता अवयवा इति पक्षे वाक्यैकवाक्यतया धूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्नधूमसंबंध्यभिन्नधूमव्यापकवह्निसंबंध्यभिन्नः पर्वत इत्याकारकं महावाक्यरूपन्यायजन्यं यद्वाक्यार्थज्ञानमुदाहरणादिनिगमनांता अवयवा इतिपक्षेतु धूमसंबंध्यभिन्नो धूमव्यापकवह्निसंबंध्यभिन्न इत्यादिर्यो:यो धूमवान् स सोऽग्निमानित्याद्युदाहरणवाक्यार्थबोधः । धूमसंबंध्यभिन्नःपर्वत इत्यादिस्तथाचायमित्युपनयवाक्यार्थबोधः । पक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्न इत्यादिस्तस्मात्तथेति निगमनवाक्यार्थबोध इत्येवमुदाहरणादिनिगमनांतवाक्यैःखंडवाक्यार्थबोधस्ततो वाक्यैकवाक्यतया धूमसंबंध्यभिन्नधूमव्यापकवह्निसंबंध्यभिन्नधूमसंबंध्यभिन्नपक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्नपर्वत इत्याकारकं महावाक्यरूपन्यायजन्यं च यद्वाक्यार्थज्ञानमवान्तरवाक्यार्थज्ञानस्य महावाक्यार्थबोधहेतुत्वात्तज्जनकत्वे साति वाक्यत्वं प्रतिज्ञादिष्वस्तीति लक्षणसमन्वय इत्यर्थः ॥

मू०–अवयवाश्च त्रय एव प्रतिज्ञाहेतूदाहरणरूपा उदाहरणोपनयनिगमनरूपा वा ॥

शि० म०–नन्वेवं न्यायजन्यवाक्यार्थज्ञानजनकवाक्यमवयवः तत्समुदायश्च न्याय इत्यन्योन्याश्रयः स्यादिति चेत्-न, अनुमितिचरमकारणपक्षधर्मताज्ञानप्रयोजकशाब्दज्ञानजनकवाक्यत्वस्यैवावयवलक्षणत्वादिति भावः । तर्ह्यवयवत्रितयपक्षे प्रतिज्ञोदाहरणनिगमनरूपाः हेतूदाहरणप्रतिज्ञारूपाश्च किमवयवाः किं तत्समुदायोपि न्याय इति नेत्याह (प्रतिज्ञेति) उक्तरूपाणामुक्तक्रमाणामेव कथकसंप्रदायसिद्धत्वात् नान्ये भिन्नक्रमाश्च न तेप्यवयवा इति भावः (उदाहरणेति) अत्रेदं प्रतिभाति न युक्तमवयवत्रयस्योदाहरणादित्वंविप्रतिपत्त्यनंतरं शब्दानित्यत्वे प्रमाणं वदेतितटस्थस्य वादिनो वा आकांक्षायां प्रथमं साध्यनिर्देशस्यैव कर्तुमुचितत्वात अन्यथोपनय एव । प्रथमं किं न स्यात, अनुमित्युपयोगिज्ञानजनकत्वेनाविशेषात् ॥

म० प्र०–इतीति–इत्याकारकतल्लक्षणसत्त्वादित्यर्थः । स्वज्ञाने स्वज्ञानापेक्षावत्वरूपात्माश्रयः स्पष्ट एवेत्यभिप्रेत्याह (अन्योन्याश्रयइति) अवयवलक्षणस्य

न्यायघटितत्वेनावयवसमुदायरूपन्यायज्ञानसत्त्वे न्यायजन्यवाक्यार्थज्ञानजनकवाक्यरूपावयवज्ञानंन्यायलक्षणस्यावयवघटितत्वेन न्यायजन्यवाक्यार्थज्ञानजनकवाक्यरूपावयवज्ञानसत्त्वेऽवयवसमुदायरूपन्यायज्ञानसत्त्वमित्यन्योन्याश्रय इत्यर्थः । (अनुमितिचरमकारणेति) अनुमितेश्चरमकारणं यद्धूमवान्पर्वत इत्याकारकं पक्षधर्मताज्ञानं तस्य प्रतिज्ञाद्युदाहरणांता अवयवास्त्रय इति पक्षे परंपरया साक्षाद्वा जनकानि यानि वह्निसंबंध्यभिन्नः पर्वतः धूमीयज्ञानज्ञाप्यत्वं धूमसंबंध्यभिन्नः धूमव्यापकवह्निसंबंध्यभिन्न इत्याकारकाणि शाब्दज्ञानानि । उदाहरणादिनिगमनांतास्त्रयोऽवयवा इति पक्षेतु धूमसंबंध्यभिन्नः धूमव्यापकवह्निसंबंध्यभिन्नः धूमसंबंध्यभिन्नः पर्वतःपक्षवृत्तिधूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्न इत्याकारकाणि पक्षधर्मताज्ञानजनकानि यानि शाब्दज्ञानानि तज्जनकत्वे सति वाक्यत्वं प्रतिज्ञादिवाक्येष्वस्तीत्यर्थः । उक्तरूपाणाम्—प्रतिज्ञाहेतूदाहरणरूपाणाम् । अनेन प्रतिज्ञोदाहरणनिगमनरूपाणां त्रयाणां व्युदासः, उक्तक्रमाणाम्—उक्तानुपूर्वीकाणाम् । अनेन हेतूदाहरणप्रतिज्ञारूपाणामवयवानां व्युदासः, कथकसंप्रदायसिद्धत्वात्—प्राचीनाचार्य्यपथेन निश्चितत्वात् (नान्यइति) ये प्रतिज्ञोदाहरणनिगमनरूपा अन्ये तेप्यवयवा न येभिन्नक्रमा हेतूदाहरणप्रतिज्ञारूपाश्च तेप्यवयवा नेत्यर्थः । अत्र—अवयवाश्च त्रय इति पक्षे, विप्रतिपत्त्यनंतरम्—संदिग्धोर्थोविचार्य्यते इति न्यायाद्विचारप्रयोजकसंशयोत्थापकपर्वतो वह्निमान् तदभाववान् वेत्याद्याकारकविरुद्धार्थप्रतिपादकशब्दात्मकविप्रतिपत्त्यनंतरम्, अन्यथा—प्रथमं साध्यनिर्देशानंगीकारे किंतु प्रथममुदाहरणनिर्देशस्वीकारे इति यावत् (अनुमित्युपयोगिज्ञानजनकत्वेनाविशेषादिति) अनुमित्युपयोगि ज्ञानं व्याप्तिज्ञानं पक्षधर्मताज्ञानं च तदन्यतरस्जनकत्वस्योदाहरणोपनयान्यतरस्य तुल्यत्वादुपनयस्य च प्रथमसुपन्यासः स्यादिति भावः ॥

मू०—न तु पंचावयवरूपाः अवयवत्रयेणैव व्याप्तिपक्षधर्मतयोरुपदर्शनसंभवेनाधिकावयवद्वयस्य व्यर्थत्वात् ॥

शि० म०—यदि च पक्षधर्मतायाः प्रथममनाकांक्षितत्वेन तदभिधानऽप्राप्तकालत्वापत्तेर्न तत्प्रदर्शकोपनयस्य प्राथम्यं तदाव्याप्तेरपि साध्यनिर्देशात्प्रागनाकांक्षितत्वान्नोदाहरणस्यापि प्राथम्यमिति तुल्यम् । एतेनोदाहरणोपनयात्मकद्व्यवयवमेव युक्तं अनुमित्यौपयिकव्याप्तिपक्षधर्मताज्ञानयोरवयवद्वयेनैव सिद्धेरिति सौगतमतमपास्तं प्रथमं साध्यनिर्देशाभावे व्याप्त्यभिधानस्याप्राप्तकालत्वादिति । अक्षपादीयानां मतं निरस्यति (नतुपंचावयवरूपाइति) अत्र च पक्षतावच्छेदकसाध्यसामानाधिकरण्यपरत्वे सति न्यायावयवत्वमुदाहरणप्रयोजकाकांक्षाजनक-

Funding by IKS-MoE

शाब्दज्ञानजनकवाक्यत्वं व्याप्तिपरन्यायावयवत्वं पक्षधर्मतोपदर्शकत्वे सति हेतुभिन्नन्यायावयवत्वमुपनयवाक्यधीजन्यसाध्याकांक्षानिवर्तकवाक्यत्वं प्रतिज्ञाहेतूदाहरणोपनयनिगमनानां क्रमेण लक्षणं बोध्यम् किमुपनयस्य व्याप्तेः प्रदर्शनं प्रयोजनं उत पक्षधर्मताया आहो व्याप्तिविशिष्टपक्षधर्मताज्ञानं नान्त्यः लिंगपरामर्शकारणत्वस्य निराकृतत्वेन व्याप्तिविशिष्टपक्षधर्मताप्रतिपादनस्य व्यर्थत्वात । आद्यद्वितीयौ दूषयति (अवयवत्रयेणेति) ॥

म० प्र०—अप्राप्तकालत्वापत्तेः—शब्दत्वाच्छब्दो नित्यः इत्यादिवदवयवानां व्युत्क्रमेण कथनरूपाप्राप्तकालत्वापत्तेः (तत्प्रदर्शकेति) हेतुनिष्ठपक्षधर्मताविषयकज्ञानजनकेत्यर्थः । एतेन—वक्ष्यमाणहेतुना (औपयिकेति) उपायभूतेत्यर्थः । अत्र—पंचावयवा इति पक्षे (पक्षतावच्छेदकेति) पक्षतावच्छेदकपर्वतत्वादिकं तेनसह यत्साध्यस्य वह्न्यादेः सामानाधिकरण्यंतद्बोधकत्वेसति पंचावयवसमुदायरूपन्यायावयवत्वमित्यर्थः । हेत्वाद्यवयवेष्वतिव्याप्तिवारणाय सत्यंतम् । पर्वतत्वसमानाधिकरणो वह्निरित्यादिवाक्ये उदासीनप्रतिज्ञावाक्ये चातिव्याप्तिवारणाय प्रथमांतमिति (न्यायावयवत्वमिति) इत ऊर्ध्वं प्रतिज्ञावाक्यत्वमित्यस्यशेषः कार्य्यः (उदाहरणेति) धूमज्ञानजन्यज्ञानविषयवह्निमदभिन्नः पर्वत इत्याद्याकारकशाब्दज्ञाने सति कुतो धूमादेर्गमकत्वमित्याकांक्षायामुदाहरणवाक्यस्य प्रयोगो भवतीत्युदाहरणवाक्यस्य प्रयोजिका परंपरया कारणीभूता या कुतोधूमादेर्गमकत्वमित्याकारिका आकांक्षा तज्जनकं धूमज्ञानजन्यज्ञानविषयवह्निमदभिन्नपर्वत इत्याद्याकारकं यच्छाब्दज्ञानं तज्जनकवाक्यत्वं धूमादीत्यादिहेतुवाक्येस्तीत्यर्थः । वाक्यत्वं—हेतुवाक्यत्वमितिशेषः (व्याप्तिपरन्यायावयवत्वमिति) व्याप्तिविषयकबोधजनकत्वे सति न्यायावयवत्वमुदाहरणवाक्यत्वमित्यर्थः (पक्षधर्मतेति) प्रतिज्ञादिष्वतिव्याप्तिवारणाय सत्यंतम्, हेतुवाक्ये सति पक्षधर्मताज्ञानं भवतीति परंपरया पक्षधर्मतोपदर्शकत्वाद्धेतुवाक्येऽतिव्याप्तिवारणाय हेतुभिन्नेति (अवयवत्वमिति) उपनयवाक्यत्वमितिशेषः (उपनयवाक्यधीति) तथाचायमित्याकारकं यदुपनयवाक्यं तदर्थविषयिका या धूमवान्पर्वत इत्याकारिका धीस्तज्जन्यायाः कथं धूमादिना पक्षे साध्यं सिध्यतीत्याकारिकसाध्याकांक्षाया निवर्त्तकवाक्यत्वं निगमनवाक्यत्वमित्यर्थः (पक्षधर्मताया इति) अस्य प्रदर्शनं प्रयोजनमिति पूर्वेणान्वयः, आहो—अथवा (ज्ञानमिति) अस्य प्रयोजनमिति पूर्वेणान्वयः ॥

शि० म०—यद्यप्युदाहरणहेतुभ्यामेव व्याप्तिपक्षधर्मतयोः दर्शनं तथापि प्रतिज्ञाया अप्याकांक्षाद्वारा व्याप्त्युपदर्शनप्रयोजनतया तद-

Funding by IKS-MoE

भिप्रायेणावयवत्रयेणेत्युक्तम् । नन्वेवमप्यबाधितत्वासत्प्रतिपक्षितत्वयोः प्रतिज्ञयानुपदर्शितत्वात्, तत्प्रदर्शनाय निगमनमिति चेत्, न, तावन्निगमनमनुमितिप्रतिबंधकबाधज्ञानविधूननाय अनुमित्युपयोगिज्ञानस्यैवावयवप्रयोजनत्वात् । अन्यथा तत्प्रतिबंधककामिनीजिज्ञासादिनिरासायावयवांतराभ्युपगमापत्तेः । नापि तदुपयोगिज्ञानाय बाधाभावज्ञानस्यानुमितिकारणत्वं मानाभावात् । बाधज्ञानप्रतिबंधकत्वस्य तदभावकारणत्वेनैवोपपत्तेः । किंच न निगमनमनुमित्युपयोगिज्ञानजनकं साध्याभावप्रमाबाध इति पक्षे तदभावस्य पदवाक्यार्थभिन्नतया निगमनाप्रतिपाद्यत्वात् । साध्याभावो बाध इति पक्षेच तदभावस्य साध्यरूपतया तज्ज्ञानस्य साध्यनिश्चयपर्य्यवसन्नत्वेनानुमित्यहेतुत्वात् । अन्यथाऽनुमितिवैयर्थ्यात् । किंच निगमनस्य साध्यनिर्देशकतया साध्यलक्षणबाधाभावज्ञापकत्वे प्रतिज्ञाया अपि साध्यप्रतिपादकत्वेन निगमनवैयर्थ्यात् ॥

म० प्र०—ननूदाहरणेन व्याप्तिज्ञानं हेतुवाक्येन तु पक्षधर्मताज्ञानमित्यवयवद्वयाभ्यामेव व्याप्तिपक्षधर्मतयोरुपदर्शनसंभवेन प्रतिज्ञया व्याप्तिपक्षधर्मतयोरुपदर्शनासंभवेन च परममूलेऽवयवत्रयेणैवेत्युक्तिरनुपपन्नेत्याशंक्याह (यद्यपीति) प्रतिज्ञाया अप्याकांक्षाद्वारेति) शब्दोऽनित्य इत्यादिप्रतिज्ञाया अपि कुत इति हेतुविषयकांक्षाद्वारा किंवदित्युदाहरणविषयककांक्षाद्वारा च व्याप्त्युपदर्शनप्रयोजनकतयेत्यर्थः । तदभिप्रायेण—व्याप्त्युपदर्शनप्रयोजनकत्वाभिप्रायेण, एवमपि—उपनयस्य व्यर्थत्वेऽपि अबाधितत्वासत्प्रतिपक्षितत्वयोः—हेतुनिष्ठयोरबाधितसाध्यकत्वासत्प्रतिपक्षितत्वयोः । तत्प्रदर्शनाय—हेतुनिष्ठाबाधितसाध्यकत्वासत्प्रतिपक्षितत्वबोधनाय । अनुमित्युपयोगिज्ञानस्य—अवयववाक्यजन्यव्याप्तिपक्षधर्मताज्ञानस्य, अन्यथा—निगमनवाक्यस्यानुमितिप्रतिबंधकबाधज्ञाननिवृत्तिफलकत्वस्वीकारे (तत्प्रतिबंधकेति) अनुमितिप्रतिबंधकेत्यर्थः । तदुपयोगिज्ञानाय—अनुमित्युपयोगिबाधाभावज्ञानाय निगमनम् । ननु बाधाभावज्ञानस्य कारणत्वानंगीकारे बाधज्ञानस्य प्रतिबंधकत्वमेव न स्यादित्याशंक्याह (बाधज्ञानेति) तदभावकारणत्वेनैव—बाधज्ञानाभावस्यानुमितिकारणत्वेनैव बाधज्ञाननिष्ठानुमितिप्रतिबंधकत्वोपपत्तेरित्यर्थः । स्वरूपसन्नेव बाधज्ञानाभावोऽनुमितिकारणं नतु बाधज्ञानाभावज्ञानमनुमितिकारणमिति बाधज्ञानाभावस्यानुमितिकारणत्वेनैव बाधज्ञानस्य कारणीभूताभावप्रतियोगित्वरूपप्रतिबंधकत्वोपपत्तिरिति भावः । इदानीं बाधाभावज्ञानस्यानुमितिकारणत्वमभ्युपेत्य निगमनस्य बाधाभावज्ञानजनकत्वं खंडयति (ननिगमनमिति) अनुमित्युपयोगिज्ञानजनकम्—अनुमित्युपयोगिबाधाभावविषयक-

ज्ञानजनकम् । तदभावस्य—साध्याभावविषयकप्रमाभावस्य । तदभावस्य—साध्याभावाभावस्य । तज्ज्ञानस्य—साध्याभावाभावज्ञानस्य । पर्य्यवसन्नत्वेनस्वरूपत्वेन (अहेतुत्वादिति) सिद्धेरनुमितिप्रबंधकत्वेन साध्याभावाभावज्ञानस्यानुमितेरहेतुत्वमितिभावः । अन्यथा—निगमनस्य साध्याभावाभावरूपसाध्यनिश्चयजनकत्वे, अनुमितिवैयर्थ्यात्—साध्यज्ञानमेव प्रतिज्ञादीनां प्रयोजनं तत्तुनिगमनवाक्येनैवोत्पन्नमिति निगमनेतरानुमितिकारणीभूतप्रतिज्ञादीनां वैयर्थ्यात् । साध्यनिर्देशकतया—साध्यविषयकबोधजनकतया (साध्यलक्षणेति) साध्यस्वरूपेत्यर्थः (वैयर्थ्यादिति) निगमनमनुमित्युपयोगिज्ञानजनकंनेतिशेषः ॥

मू०—एवमनुमाने निरूपिते तस्माद्ब्रह्मभिन्ननिखिलप्रपंचस्य मिथ्यात्वसिद्धिः ॥

शि० म०—सिद्धत्वेन साध्यप्रतिपादकत्वाभावात् । नैतया बाधविधूननमित्येतन्निगमनेपि तुल्यम् । लक्षणया सिद्धवह्निबोधकत्वं च प्रतिज्ञायामपि समानम् । किंच निगमनस्य सिद्धत्वेन रूपेण वह्निबोधकत्वे तस्मादिति हेत्वन्वयानुपपत्तिः । हेत्वन्वयानंतरं साध्ये सिद्धत्वान्वयबोधकत्वे वह्निमत्पदस्यावृत्त्यापत्तिः । नचेष्टापत्तिस्तस्मादित्यंशाभावेन तस्य वाक्यांतरतया अवयवांतरत्वापत्तेः । तस्मान्नाबाधितत्वज्ञानं निगमनप्रयोजनं अत एव नासत्प्रतिपक्षत्वबोधनमपि तत्प्रयोजनं तस्यात्यंतमपदार्थत्वादिति दिक् । एवं सप्रपंचमनुमानप्रामाण्यं निरूपितं संप्रति तन्निरूपणस्य प्रयोजनमाह (एवमिति मिथ्यात्वसिद्धिरिति) शास्त्रीयविषयप्रयोजनसिद्धिहेतुत्वात्प्रपंचमिथ्यात्वसिद्धिरनुमाननिरूपणस्य प्रयोजनमिति भावः ॥

म०प्र०—ननु प्रतिज्ञा हि साध्यत्वेन साध्यविषयकबोधं जनयति न निश्चितत्वेन साध्यविषयकबोधं जनयतीति प्रतिज्ञया बाधविधूननं न सम्भवति निगमनवाक्यं तु निश्चितत्वेन साध्यविषयकबोधं जनयतीति निगमनेन बाधविधूननं सम्भवतीति न प्रतिज्ञावाक्येन निगमनवाक्यवैयर्थ्यमित्याशंक्याह (सिद्धत्वेनेति । अभावादिति) प्रतिज्ञाया इति शेषः । एतया—प्रतिज्ञया, इत्येतत्—बाधानाशकत्वम् । (तुल्यमिति) निगमनवाक्यस्यापि सिद्धत्वेन साध्यप्रतिपादकत्वाभावादिति शेषः । ननु निगमनवाक्यस्य स्वघटकतथापदलक्षणया सिद्धत्वेन वह्निविषयकबोधजनकत्वमस्ति प्रतिज्ञायास्तु सिद्धत्वेन वह्निविषयबोधजनकत्वं नास्तीति न प्रतिज्ञावाक्येन निगमनवाक्यस्य वैयर्थ्यमित्यत आह (लक्षणयेति) सिद्धत्वेन—निश्चितत्वेन (तस्मादितिहेत्वन्वयानुपपत्तिरितितस्मादित्याकारको यो हेतुस्तस्य हेतोः साध्यवह्न्यादावन्वयो न स्याद्वह्न्यादिसाध्यबो-

धकपदस्य निराकांक्षत्वादित्यर्थः । वह्निमत्पदस्य–वह्निमद्बोधकतथेतिपदस्य । तस्य–वह्निमद्बोधकद्वितीयतथेति पदस्य । अतएव–वक्ष्यमाणहेतोरेव, तस्य–हेतुनिष्ठासत्प्रतिपक्षत्वस्य, प्रामाण्यं–प्रमाकरणत्वम् । तन्निरूपणस्य–अनुमानप्रमाणनिरूपणस्य ।ननु प्रपंचमिथ्यात्वसिद्धेरनुमानप्रमाणप्रयोजनत्वं न संभवत्यानन्दावाप्तेर्दुःखनिवृत्तेश्च शास्त्रसिद्धप्रयोजनत्वादित्याशंक्य प्रपंचमिथ्यात्वसिद्धेः प्रयोजनसिद्धिहेतुहेतुत्वेन प्रयोजनत्वमभिप्रेत्याह (शास्त्रीयेति) प्रपंचमिथ्यात्वसिद्धावैक्यज्ञानद्वारानंदावाप्तिर्दुःखनिवृत्तिश्च सम्भवतीति परंपरयाऽनुमानप्रमाणस्य तदेव प्रयोजनमितिभावः ।

सू०–तथाहि ।

शि० म०–ननु प्रपंचो मिथ्या दृश्यत्वाच्छुक्तिरूप्यवदित्यनुमानान्न तन्मिथ्यात्वसिद्धिः । तत्र हि न तावत्प्रपंच इति पक्षनिर्देशः प्रपंचशब्देन ब्रह्मणोप्यभिधानेन तस्यापि पक्षत्वापत्तौ बाधाद्यापत्तेः । नच सर्वे विकारा इति तन्निर्देशः, परमते वियदादेः सिद्धांते चाविद्यासंबंधादेरविकारतया पक्षबहिर्भावापत्तेः । शुक्तिरूप्यादेरपि पक्षत्वेनांशतः सिद्धसाधनाच्च । किंच मिथ्यात्वं न तावत्स्वसंसृज्यमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वं तथात्वस्य संयोगादौ सर्वैः परैरभ्युपगमात । नचाविद्याकार्य्यत्वं अविद्यादावव्याप्तेः । नापि ज्ञाननिवर्त्यत्वं सत्यस्यापि प्रपंचस्य परैरपि ईश्वरज्ञाननिवर्त्यत्वांगीकारात् । अनिर्वचनीयत्वं मिथ्यात्वमिति चेत् न, विकल्पासहत्वात्तथाहि न तावत्सद्विलक्षणत्वमनिर्वचनीयत्वं असतोऽपि शशविषाणादेरमिथ्यात्वात् । नाप्यसद्विलक्षणत्वं ब्रह्मण्यतिव्याप्तेः, अस्य सत्यत्वाविरोधाच्च । नच सदसद्भिन्नत्वं सदसद्रूपप्रतियोग्यप्रसिद्धेः वस्तुनः सदसदन्यतरनियमेन उभयभिन्नत्वासंभवाच्च । अत एव न सत्त्वानधिकरणत्वे सत्यसत्त्वानधिकरणत्वमनिर्वचनीयत्वं निर्धर्मके ब्रह्मण्यतिव्याप्तेः । किंच दृश्यत्वं नाम न तावज्ज्ञानलक्षणफलव्याप्यत्वं अतींद्रियेषु तदभावेन भागासिद्धेः । नापि वृत्तिविषयत्वं स्वप्रकाशस्यापि ब्रह्मणो वृत्तिविषयत्वाभ्युपगमेन व्यभिचारात् । एतेन कार्य्यत्वविभक्तत्वादयो हेतवो निरस्ताः । तस्मान्नानुमानात्प्रपंचमिथ्यात्वसिद्धिरित्याशंक्याह (तथाहीति) ॥

म० प्र०–प्रपंचशब्देन–समुदायवाचकप्रपंचशब्देन (वाधादीति) अत्रादिपदेन स्वरूपासिद्ध्यादेर्ग्रहणमिति । विकाराः–जन्याः, इति–इत्यस्य तन्निर्देशः–प्रपंचशब्देन निर्देशः (यद्वाइति) अनेन शब्देन तन्निर्देशः–पक्षनिर्देश इत्यर्थः । अविकारतया–अजन्यतया (सिद्धसाधनाच्चेति) वस्तुतस्तु पक्षतावच्छेदकावच्छेदेन

साध्यसिद्धेरंगीकारान्न सिद्धसाधनमिति बोध्यमिति (स्वसंसृज्यमानेति) मिथ्यावस्तुसंबद्धेत्यर्थः । तथात्वस्य–स्वसंसृज्यमानाधिकरणनिष्ठात्यंताभावप्रतियोगित्वस्य (संयोगादाविति) अत्रादिपदेन विभागादीनामव्याप्यवृत्तीनां सर्वेषां ग्रहणं तथाच परमते संयोगादिषु पूर्वोक्तमिथ्यात्वं सत्यत्वं चास्तीति सत्यत्वविरोधिमिथ्यात्वं न सिध्यतीति भावः । असतः–सद्विलक्षणस्य । सदसद्भिन्नत्वम्–सदसत्प्रतियोगिकभेदवत्त्वम् । सदसदन्यतरनियमेन–सदसदन्यतरस्वरूपत्वनियमेन । अतएव–वक्ष्यमाणहेतोरेव । निर्धर्मके–पारमार्थिकधर्मशून्ये । ज्ञानलक्षणफलव्याप्यत्वम्–इन्द्रियजन्यवृत्त्यभिव्यक्तचैतन्यविषयत्वम् । अतीन्द्रियेषु–धर्माधर्मादिषु । तदभावेन–इन्द्रियजन्यवृत्त्यभिव्यक्तचैतन्यलक्षणफलविषयत्वाभावेन । एतेन–भागासिद्ध्यादिदोषसत्त्वेन ॥

मू०–ब्रह्मभिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वाद्यदेवं तदेवं यथाशुक्तिरूप्यम् ॥

शि० म०–(ब्रह्मभिन्नमिति) अत्रच ब्रह्मणः पक्षत्ववारणायोक्तं ब्रह्मभिन्नमिति सिद्धसाधनवारणाय सर्वपदं तथाच शुक्तिरूप्यादौ ब्रह्मभिन्नत्वेन साध्यसिद्धावपि सर्वस्यापि ब्रह्मभिन्नत्वेन तदसिद्धेर्न सिद्धसाधनम् । अत एव घटादौ पृथिवीत्वेनेतरभेदनिश्चयेऽपि सर्वपृथिवीत्वेन तदसिद्धेर्न सिद्धसाधनमिति राद्धान्तः । नचैवमंशतः सिद्धसाधनं दुर्वारमिति वाच्यम्, क्वचित्पक्षे शुक्तिरूप्यादौ मिथ्यात्वनिश्चयेऽपि पक्षतावच्छेदकनानात्वाभावात् । पक्षतावच्छेदकनानात्व एव तदभ्युपगमात् । अत एवानित्ये वाङ्मनसे इत्यत्रांशतः सिद्धसाधनमिति परस्यापि राद्धांतः (शुक्तिरूप्यमिति) नच शुक्तिरूप्यस्यापि पक्षत्वेन कथं दृष्टांतता इति सांप्रतं निश्चितसाध्यकत्वेन सपक्षत्वाविरोधात् । तस्यैव लाघवेन दृष्टांतत्वे प्रयोजकतया पक्षभिन्नत्वस्य व्यर्थत्वात् । अत एवाभेदानुमाने पक्ष एव दृष्टान्तः । ननु शुक्तिरूप्यं न दृष्टान्तः प्रमाणाभावेन तत्र मिथ्यात्वस्यानिश्चयात् ॥

म० प्र०–शुक्तिरूप्यादौ ब्रह्मभिन्नत्वेन–पक्षतावच्छेदकब्रह्मभिन्नत्वविशिष्टपक्षैकदेशशुक्तिरूप्यादौ सर्वस्यापि ब्रह्मभिन्नत्वेन पक्षतावच्छेदकब्रह्मभिन्नत्वविशिष्टनिखिलस्यापि, तदसिद्धेः–मिथ्यात्वासिद्धेः । अतएव–पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपिपक्षतावच्छेदकावच्छेदेन साध्यसिद्ध्यभावेन सिद्धसाधनाभावादेव (पृथिवीत्वेनेति) पृथिवीत्वावच्छिन्नेत्यर्थः (सर्वपृथिवीत्वेनेति) निखिलपृथिवीनिष्ठपृथिवीत्वावच्छिन्नेत्यर्थः । तदसिद्धेः–इतरभेदासिद्धेः । नसिद्धसाधनम्–सर्वा पृथिवी इतरभिन्ना गंधाद्घटवदित्यनुमाने सिद्धसाधनं न । एवम्–ब्रह्मभिन्नसर्वत्वावच्छेदेन साध्यसिद्धि-

स्वीकारेपि, तदभ्युपगमात्—अनुमानेंऽशतः सिद्धसाधनत्वाभ्युपगमात्। अतएव—पक्षतावच्छेदकनानात्वस्यैवांशतः सिद्धसाधनत्वप्रयोजकत्वादेव (इत्यत्रेति) अनित्ये वाङ्मनसे इन्द्रियत्वाच्चक्षुरादिवदित्यत्र वाक्त्वमनस्त्वरूपपक्षतावच्छेदकयोर्नानात्वेनांशतः वागंशे सिद्धसाधनमित्यर्थः (सपक्षत्वाविरोधादिति) शुक्तिरूप्यादीनां दृष्टांतत्वानुपपत्त्यभावादित्यर्थः। तस्यैव—निश्चितसाध्यकत्वस्यैव, लाघवेन—पक्षभिन्नत्वे सति निश्चितसाध्यकत्वस्य दृष्टांतत्वप्रयोजकत्वापेक्षया निश्चितसाध्यकत्वस्य दृष्टांतत्वप्रयोजकत्वे लाघवेन (पक्षभिन्नत्वस्य व्यर्थत्वादितिं) पक्षभिन्नत्वे सतिनिश्चितसाध्यकत्वं दृष्टांतत्वप्रयोजकमिति पक्षभिन्नत्वविशेषणादानस्य व्यर्थत्वादित्यर्थः अतएव—निश्चितसाध्यकत्वस्य दृष्टांतत्वप्रयोजकत्वादेव, अभेदानुमाने—त्वंपदलक्ष्यचैतन्यं ब्रह्माभिन्नं सच्चिदानंदलक्षणत्वाद्ब्रह्मवदित्यनुमाने पृथिवीपृथिव्यभिन्नगंधाद्घटवदित्याकारके वाऽनुमाने। तत्र—शुक्तिरूप्ये॥

मू०—न च दृष्टांतासिद्धिः तस्य साधितत्वात्॥

शि० म०—नच तत्रानुमानात्तन्निश्चयः। तद्दृष्टांतेप्यनुमानांतरान्मिथ्यात्वनिश्चय इत्यनवस्थापातात् नचात्र शुक्तिरूप्यादन्यदृष्टांतः संभवति ततश्च व्याप्तिग्रहाभावान्न प्रपंचमिथ्यात्वसिद्धिरित्याशंक्य शुक्तिरूप्यस्य नात्र रजतमिति त्रैकालिकाभावप्रतीतिविषयत्त्वमुपपादयता मया प्रत्यक्षप्रमाणेन मिथ्यात्वस्य प्रत्यक्षपरिच्छेदे साधितत्वात्तदेव दृष्टांत इत्याह (नचेति। साधितत्वादिति) इदं चोपलक्षणं शुक्तिरूप्यमिथ्यात्वस्यार्थापत्तिप्रमाणेनाग्रे साधयिष्यमाणत्वाच्चेत्यपि बोध्यं ननु शुक्तिरूप्ये साध्यनिश्चयेप्यनुकूलतर्काभावेन व्याप्यत्वासिद्धो हेतुः नच हेतोर्निरुपाधिकत्वभंगाख्य एव तर्को व्याप्तिग्राहक इति वाच्यम्। अविद्यातिरिक्तदोषजन्यत्वस्योपाधित्वात्। तद्व्यावर्त्यस्य ब्रह्मणो विपक्षस्य सत्त्वात्, न पक्षेतरत्वमित्याशंक्य ब्रह्माभिन्नत्वस्य सामान्यधर्मस्याविद्यातिरिक्तदोषजन्यत्वापेक्षया लघुशरीरस्य॥

म०प्र०—(तत्रानुमानादिति) शुक्तिरूप्येशुक्तिरूप्यं मिथ्याबाधितत्वाद्रज्जुसर्पादिवदित्याकारकानुमानान्मिथ्यात्वनिश्चय इत्यर्थः (दृष्टांतेपीति) शुक्तिरूप्यनिष्ठमिथ्यात्वसाधकानुमाने योरज्जुसर्पादिदृष्टांतस्तस्मिन्नपीत्यर्थः। अत्र—व्यावहारिकप्रपंचनिष्ठमिथ्यात्वे, शुक्तिरूप्यात्—प्रातिभासिकपदार्थात्। ततश्च—दृष्टांतानिरूपणाच्च (नात्ररजतमितीतिं) शुक्तिशकलवृत्तित्रैकालिकरजतत्वावच्छिन्नप्रतियोगिताकाभाव इत्यर्थः। तदेव—शुक्तिरूप्यमेव, इदंच—शुक्तिरूप्यस्य साधितत्वादिति वाक्यंच, अनुकूलतर्काभावेन—ब्रह्मभिन्नत्वं मिथ्यात्वव्यभिचारि नवेति व्यभिचारशंकानिवर्तकतर्का-

भावेन, व्याप्यत्वासिद्धः—व्याप्यत्वं व्याप्त्याश्रयत्वमसिद्धमनिश्चितं यस्मिन्स व्याप्यत्वासिद्धः (हेतोर्निरुपाधिकत्वभंगाख्यएवेतिं) ब्रह्मभिन्नत्वं यदि मिथ्यात्वव्यभिचारि स्यात्तर्हिब्रह्मभिन्नत्वहेतोर्निरुपाधिकत्वं न स्यादिति । तस्य निरुपाधिकत्वभंगापादनाख्यतर्क एव तस्य व्यभिचारशंकानिवर्तनद्वाराव्याप्तिग्राहक इत्यर्थः । यदि ब्रह्मभिन्नत्वहेतोर्निरुपाधिकत्वं स्यात्तदा तस्य निरुपाधिकत्वभंगापादनाख्यतर्कोऽपि स्यात्किंतुब्रह्मभिन्नत्वहेतोर्निरुपाधिकत्वमेव नास्तीत्याह (अविद्येति) नन्वविद्यातिरिक्तदोषजन्यत्वोपाधेः पक्षमात्रावृत्तित्वात्पक्षेतरत्वतुल्यत्वेन नोपाधित्वमित्याशंक्य तस्य पक्षेतरत्वतुल्यत्वं निराकरोति (तद्व्यावर्त्यस्येति) तदविद्यातिरिक्तदोषजन्यत्वव्यावर्त्यमवृत्तिर्यस्मिन्ब्रह्मणि तत्तथा तस्योपाधिशून्यस्येत्यर्थः । साध्यसमनियतस्योपाधित्वमित्याचार्य्यमताभिप्रायेण ब्रह्मभिन्नत्वस्य हेतोः सोपाधिकत्वं निराकरोति ब्रह्मभिन्नत्वस्येति ॥

मू०—नचाप्रयोजकत्वंशुक्तिरूप्यरज्जुसर्पादीनांमिथ्यात्वेब्रह्मभिन्नत्वस्यैवलाघवेनप्रयोजकत्वान्मिथ्यात्वं च ॥

शि० म०—लाघवाख्यतर्केण मिथ्यात्वं प्रति व्याप्यत्वनिश्चयान्न सोपाधिकत्वं अत एव न व्याप्यत्वासिद्धिरित्याह (नचेति) ननु बाध्यत्वं मिथ्यात्वं तच्च ज्ञानत्वेन ज्ञाननिवर्त्यत्वं तत्तु न विनानुमानेन शुक्तिरूप्ये ज्ञातुं शक्यं बाधप्रत्यक्षेणाविषयीकरणात्, ततश्च दृष्टांतासिद्धिस्तदवस्थैवेत्याशंक्य न्यायसिद्धबाधप्रत्यक्षयोग्यत्वं मिथ्यात्वमिह विवक्षितमित्याह मिथ्यात्वंचेति ॥

म० प्र०—लाघवाख्यतर्केण—अविद्यातिरिक्तदोषजन्यत्वनिष्ठमिथ्यात्वरूपसाध्यव्याप्यत्वापेक्षया ब्रह्मभिन्नत्वे मिथ्यात्वरूपसाध्यव्याप्यत्वांगीकारे लाघवापादनरूपतर्केण। अविद्यातिरिक्तदोषजन्यत्वं यदि मिथ्यात्वव्याप्यं स्यात्तर्हि गौरवं स्यादिति लाघवभंगापादनरूपतर्केण वा । अयं भावः साध्यसमनियतस्योपाधित्वं साध्यसमनियतत्वंच साध्यव्यापकत्वे सति साध्यव्याप्यत्वं यत्र मिथ्यात्वं तत्राविद्यातिरिक्तदोषजन्यत्वमित्यविद्यातिरिक्तदोषजन्यत्वस्य साध्यव्यापकत्वेऽपि मिथ्यात्वरूपसाध्यव्याप्यत्वत्वविद्यातिरिक्तदोषजन्यत्वे स्वीकरणीयं ब्रह्मभिन्नत्वेवेति संशये सामान्यधर्मेऽविद्यातिरिक्तदोषजन्यत्वापेक्षया लघुभूते च ब्रह्मभिन्नत्वे एव मिथ्यात्वव्याप्यत्वं स्वीकरणीयं नाविद्यातिरिक्तदोषजन्यत्वेऽसंभवति सामान्यधर्मे विशेषधर्मे तदन्याय्यमिति न्यायात्संभवति लघौ गुरौ तदन्याय्यमिति न्यायाच्च तथाचाविद्यातिरिक्तदोषजन्यत्वस्य नोपाधित्वमिति वस्तुतस्तु सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनां मते क्षित्यंकुरा-

Funding by IKS-MoE

दिकं सकर्तृकं कार्य्यत्वाद्धटवदित्यनुमाने उपाध्यभावहेतुना साध्याभावसाधने सति शरीरजन्यत्वोपाधेर्व्यर्थविशेषणत्ववदत्राप्युपाध्यभावेन साध्याभावसाधनेऽविद्यातिरिक्तविशेषणस्यव्यर्थत्वान्नाविद्यातिरिक्तदोषजन्यत्वस्योपाधित्वमिति, अतएव–ब्रह्मभिन्नत्वहेतावुपाध्यभावादेव ॥

तत्र–बाध्यत्वं च (ज्ञानत्वेन ज्ञाननिवर्त्यत्वमिति) ज्ञाननिष्ठनाशकतानिरूपितनाश्यताज्ञानप्रागभावे उत्तरज्ञाननिवर्त्यपूर्वज्ञाने चास्तीति परमतेऽतिव्याप्तिरतो ज्ञानत्वेनेत्युक्तं, तथाच ज्ञानप्रागभावे प्रतियोगित्वावच्छिन्ननाशकतानिरूपितनाश्यता एवमुत्तरज्ञानेन निवर्त्यपूर्वज्ञाने स्वोत्तरवृत्तिप्रत्यक्षयोग्यविभुविशेषगुणत्वावच्छिन्ननाशकतानिरूपितनाश्यता न ज्ञानत्वावच्छिन्ननाशकतानिरूपितनाश्यतापूर्वज्ञानज्ञानप्रागभावयोरिति नाति व्याप्तिरिति भावः । बाधप्रत्यक्षेण–नात्ररजतमित्याकारकबाधप्रत्यक्षेण (न्यायसिद्धेति) न्यायो नेहनानास्तिकिंचनेत्यादिश्रुतिरूपोऽधिष्ठाने ज्ञाते यदि सत्स्यात्तर्ह्यधिष्ठानज्ञाने तदभावो न स्यादभावस्त्वधिष्ठानज्ञानेन भवत्यतोऽधिष्ठानेज्ञातंसन्नास्तीत्याद्यात्मकश्च तेनसिद्धो यो बाधो ज्ञातस्यात्यंताभावस्य यत्प्रत्यक्षं नात्रब्रह्मणि प्रपंच इत्याद्याकारकं तद्योग्यत्वं तदत्यंताभावानधिकरणत्वरूपं मिथ्यात्वमिह प्रपंचेऽनुमाने वा विवक्षितमित्यर्थः ॥

मू०–स्वाश्रयत्वेनाभिमतयावन्निष्ठात्यंताभावप्रातियोगित्वं
अभिमतपदमसंभववारणाय यावत्पदमर्थान्तरवारणाय
तदुक्तम् ॥
सर्वेषामपि भावानां स्वाश्रयत्वेन संमते ॥
प्रतियोगित्वमत्यंताभावं प्रति मृषात्मता इति । यद्वा ॥

शि० म०–नचानाश्रिताकाशादिषु लक्षणस्याव्याप्तिः, वियदधिकरणोक्तन्यायेन तस्यापि कार्यतया कारणाश्रितत्वस्यावश्यमभ्युपेतव्यत्वात् (असंभववारणायेति) नच स्वाश्रये स्वरूपेण तदत्यंताभावाभावेपि पारमार्थिकत्वावच्छिन्नतदत्यंताभावसत्त्वान्नबाध इत्यभिमतपदं व्यर्थमिति वाच्यम्, अस्मिन्पक्षे स्वरूपेणैव ब्रह्मणि प्रपंचाभावाभ्युपगमात्, चित्सुखाचार्यसंमतिमाह (तदुक्तमिति) यदि कश्चित्पक्षभिन्नत्वमपि सपक्षत्वप्रयोजकमतो भेदानुमानं चासिद्धमिति ब्रूयात्तदा पक्षान्तरमाह (यद्वेति) ॥

म० प्र०–परममूले (स्वाश्रयत्वेनेति) स्वमाश्रितं नतु कार्य्यमविद्यादावव्याप्तिस्तथाचाश्रिताश्रयत्वेनाभिमतयावति स्थितात्यंताभावप्रतियोगित्वमित्यर्थः । नन्वा-

श्रिताश्रयनिष्ठनिरवच्छिन्नात्यंताभावप्रतियोगित्वं मिथ्यात्वमित्येतावदेवास्त्वित्याशंक्याह परममूले (अभिमतेति) यावति स्वाश्रये स्वात्यंताभावासंभवादभिमतपदमावश्यकं तथाच वस्तुतो रजताद्यनाश्रयेपि शुक्त्यादौ रजताद्याश्रयत्वेनाभिमते वर्तमानरजताद्यत्यंताभावप्रतियोगित्वं शुक्तिरूप्यादेरस्तीति तत्सार्थक्यमिति भावः। ननु तथापि लक्षणे यावत्पदं व्यर्थमित्यत आह। परममूले (यावदिति) तथाच लक्षणे यावत्पदाभावे कपिसंयोगाद्याश्रयत्वेनाभिमतवृक्षे मूलावच्छेदेन वर्तमानात्यंताभावप्रतियोगित्वं शाखावच्छेदेन स्थितकपिसंयोगादेरस्तीति सत्यत्वाविरोधिप्रतियोगितदभावसामानाधिकरण्यरूपार्थांतरसिद्धिवारणाय यावत्पदमावश्यकं तद्दाने तु स्वाश्रयत्वेनाभिमते शाखादौ संयोगादेरत्यंताभावप्रतियोगित्वसाधनान्नार्थान्तरापत्तिदोष इतिभावः (वियदधिकरणोक्तन्यायेनेतिं) "न वियदश्रुतेः" इत्यादिवियदधिकरणे प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य इत्यस्मिन्सिद्धांतसूत्रे उक्तेन विज्ञेयाद्ब्रह्मणः कृत्स्नस्य वस्तुजातस्याव्यतिरेकादात्मैकविज्ञानात्सर्वविज्ञानप्रतिज्ञायाः छांदोग्यादौ कृताया अहानिर्भवति ब्रह्मभिन्नसत्ताकस्य नित्यस्याकाशस्याभ्युपगमेतु सा प्रतिज्ञा बाध्येत तस्मादाकाशस्योत्पत्तिमंगीकृत्य ब्रह्माधीनसत्ताकत्वाद्ब्रह्मणि ज्ञाते सर्वमाकाशादिकं ज्ञातं भवतीति सा प्रतिज्ञासमर्थनीयेत्याकाशस्योत्पत्तिरस्तीति न्यायेनेत्यर्थः। तस्यापि—वियदोपि स्वाश्रये—आश्रिताश्रयेकपालादौ, नबाधः—नासंभवः, अस्मिन्पक्षे—द्विविधसत्त्वपक्षे । उक्तमिथ्यात्वपक्षेवा आश्रिताश्रयत्वेन ज्ञाते यावति स्वरूपेणाश्रितात्यंताभावस्य विवक्षितत्वादभिमतपदमावश्यकमिति भावः। परममूले (अत्यंताभावं प्रतीति) अत्यंताभावस्येत्यर्थः । पक्षान्तरम्—नवीनोक्तमनुमानम् ॥

मू०—अयं पटः एतत्तंतुनिष्ठात्यंताभावप्रतियोगिपटत्वात्पटांतरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणं तदुक्तम्—

अंशिनः स्वांशगात्यंताभावस्य प्रतियोगिनः ॥
अंशित्वादितरांशिवद्दिगेषैव गुणादिष्विति ॥

नच घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षबाधः अधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः। नच नीरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयतेति वाच्यम्। नीरूपस्यापि रूपादेः प्रत्यक्षत्वात्, नच नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यत्वमिति नियमः मन्मते ब्रह्मणो

द्रव्यत्वासिद्धेः गुणाश्रयत्वं समवायिकारणत्वं वा द्रव्यत्वमिति तेऽभिमतं नहि निर्गुणस्य ब्रह्मणो गुणाश्रयता नापि समवायिकारणता समवायासिद्धेः ॥

शि० म०–(पटत्वादिति अवयवित्वादित्यपि द्रष्टव्यम् । मिथ्यात्वे प्रमाणं एतत्पटमिथ्यात्वे प्रमाणमित्यर्थः । गुणकर्मादौ चैतत्पटरूपमेतत्पटनिष्ठात्यंताभावप्रतियोगि रूपत्वाद्रूपान्तरवदित्येवमादिप्रयोगो द्रष्टव्यः । अत्रापि तत्संमतिमाह (तदुक्तमिति) दिग्–मार्गः (निर्गुणस्येति) "साक्षी चेता केवलो निर्गुणश्च" इत्यादि वचनेन ब्रह्मणो निर्गुणत्वावगमादिति भावः (नापीति) अपरिणामित्वादिति भावः ॥

म० प्र०–परममूले (अयंपटइति) नच बाध एव किं न स्यादिति वाच्यम् व्याप्तिमद्धेतोः पक्षधर्मताबलात्पक्षेसाध्यस्यावश्यमेवाभ्युपेयत्वादिति । समवायसंबंधेनैकावच्छेदेन चेत्यपिद्रष्टव्यं तथाच संयोगसंबंधेन दशावच्छेदेन च पूर्ववन्नार्थान्तरता, एवं व्यधिकरणधर्मानवच्छिन्नप्रतियोगिताकत्वमत्यंताभावविशेषणं देयं तेन घटत्वादिव्यधिकरणधर्ममादाय नार्थांतरता तथैतत्कालीनत्वमप्यत्यंताभावविशेषणं देयं तेन पटोत्पत्तिकालीनात्यंताभावमादाय नार्थान्तरता । तथा व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्त्वमत्यंताभावविशेषणं देयं तेन तंतुषु पटसत्त्वेपि पटघटोभयं नास्तीति पटघटोभयत्वावच्छिन्नप्रतियोगिताकपटघटात्यंताभावमादाय नार्थान्तरता तथा चायं पटः समवायसम्बंधावच्छिन्ननिरवच्छिन्नव्यधिकरणधर्मानवच्छिन्नपटकालवृत्तिव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकात्यंताभावप्रतियोगीत्यर्थः । नचैतत्तंतुषु पटसमवायि इति प्रत्यक्षबाध इति वाच्यमुक्तप्रत्यक्षस्य भ्रमप्रमासाधारणतया चंद्रप्रादेशिकत्वप्रत्यक्षवदप्रामाण्यशंकास्कन्दितत्वेनाबाधकत्वादिति । परममूले (दिगेषैवेति) गुणादिषु गुणादिनिष्ठमिथ्यात्वेपि एष एव मार्ग इत्यर्थः । अत्रापि–पटादीनां स्वांशगतात्यंताभावप्रतियोगित्वेपि (अपरिणामित्वादितीति) नचारंभवादांगीकर्तृनैयायिकं प्रति अपरिणामित्वादिति हेतुकथनमयुक्तं तेन परिणामवादस्यास्वीकृतत्वादिति वाच्यम् । आरंभवादस्य निरस्तत्वेन परिणामवादस्यैव स्वीकर्तव्यत्वात्तथाच ब्रह्मणः परिणामित्वासंभवेन समवायिकारणत्वं नास्तीति भावः ॥

सू०–अस्तु वा द्रव्यत्वं ब्रह्मणः तथापि नीरूपस्य कालस्येव चाक्षुषादिज्ञानविषयत्वे न विरोधः ॥

शि० म०–ननु ब्रह्मणोपि समवायिकारणत्वं केवलस्यापरिणामित्वेपि मायाविशिष्टस्य प्रपंचोपादानत्वात्, अन्यथा अभिन्ननिमित्तोपादान-

Funding by IKS-MoE

वादभंगापत्तेः। ततश्च ब्रह्मणो न द्रव्यत्वासिद्धिरिति अपरितोषादाह (अस्तुवेति) यद्वा अभ्युपेत्याह (अस्तुवेति) काल इन्द्रियवेद्य इति मतेन दृष्टान्तमाह (कालस्येति) वस्तुतस्तु अनन्यथासिद्धप्रतीतिबलेन ब्रह्मव्यतिरिक्तद्रव्यचाक्षुषतायामेव महत्त्वेसत्युद्भूतरूपवत्त्वं प्रयोजकं बोध्यम् । ननूक्तानुमानं न प्रपंचमिथ्यात्वसाधकं, घटः सन्नित्यादिप्रत्ययबाधितत्वात नचासावधिष्ठानसत्ताविषयत्वाद्भ्रमः बाधकाभावात् ॥

म० प्र०—अन्यथा—ब्रह्मण उपादानत्वानंगीकारे (अनन्यथासिद्धेति) ब्रह्मनिष्ठविषयतां विनानुपपद्यमानेत्यर्थः । यथाऽध्वरमीमांसकानामस्मिन्काले घटो नास्तीत्यादि प्रतीतिबलात्कालस्येन्द्रियवेद्यत्वं स्वीकृतं तथा ब्रह्मनिष्ठविषयतां विनानुपपद्यमानः सन् घट इत्यादि प्रतीतिबलाद् ब्रह्मणश्चाक्षुषत्वमस्माभिः स्वीक्रियते इति भावः । परममूले (न विरोधइति) सन्घट इत्यादिप्रत्यक्षस्यानुपपत्तिर्नेत्यर्थः । अधिष्ठानसत्ताविषयत्वात्—अधिष्ठाननिष्ठसत्तायाघटादिनिष्ठत्वेनविषयीकरणात् (बाधकाभावादिति) यथेदं रजतमित्यादिज्ञानस्य नेदं रजतमित्यादिबाधकसत्त्वाद्भ्रमत्वं तद्वद्घटः सन्नित्यादिप्रत्ययस्य 'न सन्घटः' इत्यादिबाधकाभावान्न भ्रमत्वं, नच तदभाववति तत्प्रकारकत्वस्य भ्रमत्वप्रयोजकस्य सन्घट इत्यादिज्ञानेषु सत्त्वाद्भ्रमत्वं स्यादिति वाच्यम्, मन्मते प्रपंचस्य सत्यत्वेन सन्घट इत्यादिघटादिनिष्ठसत्यत्वावगाहिज्ञानेषु तदभाववति तत्प्रकारकत्वस्य भ्रमत्वप्रयोजकस्याभावात् । नच बाधकाभावादिति वाक्याद्बाधकज्ञानसत्त्वे पूर्वज्ञानस्य भ्रमत्वं बाधकज्ञानाभावे पूर्वज्ञानस्य भ्रमत्वाभाव इति प्रतीयमानत्वेन पूर्वपूर्वज्ञाने उत्तरोत्तरज्ञानस्य नाशकत्वेन बहूनां पूर्वज्ञानानां ब्रह्मत्वं स्यादुत्तरज्ञानरूपबाधकसत्त्वादिति वाच्यम् । अधिष्ठानज्ञानजन्यत्वे सतिभ्रान्तिज्ञानविषयरजताद्यत्यंताभावविषयकत्वाभिन्नबाधकत्वाभ्युपगमादुत्तरज्ञानानां नियमेन बाधकत्वाभावाच्चेति ॥

मू०—यद्वा त्रिविधं सत्त्वं पारमार्थिकसत्त्वं ब्रह्मणः व्यावहारिकं सत्त्वं आकाशादेः प्रातिभासिकं सत्त्वं शुक्तिरजतादेः तथाच घटः सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्वविषयत्वेन प्रामाण्यं अस्मिन्पक्षे च घटादेर्ब्रह्मणि निषेधो न स्वरूपेण किंतु पारमार्थिकत्वेनैवेति ॥

शि० म०–नचास्थूलादिवाक्येन प्रत्यक्षबाधः । तर्हि तेनैव प्रपंच मिथ्यात्वसिद्धावनुमानवैयर्थ्यात्प्रपंचतत्त्वांशबाधपरतयैव श्रुत्युपपत्तेश्च । नचोक्तानुमानमेव तद्बाधकं प्रत्यक्षस्य सर्वप्रमाणज्येष्ठतया अनुमानेन बाधायोगात् । अन्यथा वह्न्यनौष्ण्यानुमानेन तदौष्ण्यप्रत्यक्षबाधापत्तेः । किंच प्रपंचस्य स्वरूपेणासत्त्वे तज्ज्ञानस्य बाधितार्थविषयत्वेनाप्रामाण्यापत्तौ घटादिज्ञानं प्रमा शुक्तिरूप्यादिज्ञानमप्रमेति विभागाभावोऽसत्ख्यातिवादिमतप्रवेशश्च प्रसज्येत । किंचैवं कर्मकांडमात्रस्याप्रामाण्यापत्तौ तत्सामान्याद्वेदैकदेशस्य वेदांतस्याप्रामाण्यापत्तिः । अपिच घटादेरसत्त्वे तद्भावो न निरूप्येत सद्भ्यामेवाधिकरणप्रतियोगिभ्यामभावनिरूपणात् । अन्यथा शशविषाणस्यापि अभावप्रतियोगित्वापत्तिः । अत एवाहुः 'सद्भ्यामभावो निरूप्यत' इति । ततश्च प्रत्यक्षबाधितं प्रपंचमिथ्यात्वानुमानमित्यरुचेराह (यद्वेति) त्रिविधमिति) पारमार्थिकसत्त्वं व्यावहारिकसत्त्वं प्रातिभासिकसत्त्वं चेति त्रिविधमित्यर्थः । तत्र कालत्रयाबाध्यत्वंपारमार्थिकसत्त्वं संसारदशायामबाध्यत्वं व्यावहारिकसत्त्वं प्रतिभासकालाबाध्यत्वं प्रातिभासिकसत्त्वंएतानि क्रमेणोदाहरति (पारमार्थिकेति) ॥

म० प्र०–(अस्थूलादिवाक्येनेति) अस्थूलमनण्वित्यादिवाक्यात्स्थूलाद्यत्यंताभाववद्ब्रह्मेति ज्ञाने जाते घटसद्भेदावगाहि सन् घट इति प्रमात्मकप्रत्यक्षं न संभवतीत्यर्थः । तर्हि–अस्थूलाद्विवाक्यजन्यज्ञानस्य सन् घट इत्यादिप्रमात्मकप्रत्यक्षबाधकत्वांगीकारे, तेनैव–अस्थूलादिवाक्यजन्यज्ञानेनैव (प्रपंचतत्त्वांशेति) घटादिप्रपंचस्यस्वरूपेणसत्त्वेपि घटादिप्रपंचनिष्ठं पारमार्थिकत्वं नास्तीत्यर्थपरतया स्थूलमनण्वित्यादिश्रुत्युपपत्तेरित्यर्थः । घटादिस्वरूपावगाहि सन् घट इत्यादिप्रत्ययबाधितत्वान्नोक्तानुमानं घटादिप्रपंचस्वरूपाभावसाधकमिति भावः । तद्बाधकं–घटः सन्निति प्रमात्मकप्रत्ययबाधकम् । अन्यथा–अनुमानस्य प्रत्यक्षबाधकत्वे तज्ज्ञानस्य–प्रपंचज्ञानस्य, असत्ख्यातिवादिमतप्रवेशश्च–स्वरूपेणासतोज्ञानं भवतीति वदनशीलस्य शून्यवादिनो मतप्राप्तिश्च (कर्मकांडमात्रस्येति) अत्रमात्रशब्दस्य कृत्स्नवाचकत्वेनसर्वप्रपंचस्य स्वरूपेणासत्त्वेन स्वरूपेणासत्साध्यसाधनादिप्रतिपादकसर्वकर्मकाण्डस्याप्यप्रामाण्यापत्तौ तत्सामान्याद्वेदत्वेन कर्मकाण्डवेदसादृश्याद्वेदांतस्याप्यप्रमाणत्वापत्त्या ब्रह्मासिद्धिप्रसंग इत्यर्थः । सद्भ्यामित्यस्यैव विवरणमधिकरणप्रतियोगिभ्यामिति । ननु ब्रह्मनिष्ठविषयतां विनानुपपद्यमानःसन् घट इत्यादिप्रतीतिबलाद्ब्रह्मणश्चाक्षुषत्वं यदि स्वीक्रियते तर्ह्याकाशनिष्ठविषयतां विनाऽनुपपद्यमा-

नाकाशे बलाकेत्यादिप्रतीतिबलादाकाशस्यापिचाक्षुषता स्यादित्यरुचेराह । परममूले (यद्वेति) तत्र–उक्तत्रिविधसत्त्वमध्ये । परममूले (अस्मिन्पक्षेइति) त्रिविधसत्त्वपक्षेइत्यर्थः ॥

मू०--न विरोधः । अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वावच्छिन्नप्रतियोगिताकत्वमत्यंताभावविशेषणं द्रष्टव्यं तस्मादुपपन्नं मिथ्यात्वानुमानमिति ॥ २ ॥

शि० म०-नन्वेवमप्युक्तमिथ्यात्वस्याप्रसिद्धिः, सर्वस्यापि स्वाश्रये तत्तदत्यंताभावायोगात् । नचाभिमतपदात्तन्निरास इत्युक्तमिति वाच्यम् स्वाश्रयतया ज्ञातस्याप्युक्तरीत्या वस्तुतः स्वाश्रयत्वेन तत्र तदत्यंताभावासंभवतादवस्थ्यात्, किंच मिथ्यात्वलक्षणस्य ज्ञानगर्भत्वे भूतलादेः स्वाश्रयत्वाभिमानाभावदशायां घटादेर्मिथ्यात्वाभावप्रसंगः अभिमानोपलक्षितत्वविवक्षादशायां तत्कालोत्पन्नविनष्टस्य पर्वतगुहांतर्वर्तिनो मिथ्यात्वान्नापत्तिः । अपिच निरुक्तमिथ्यात्वंन सत्यत्वविरोधिपरेणाप्यव्याप्यवृत्तिकपिसंयोगादौ तदभ्युपगमादित्यत आह (अस्मिन्पक्षइति) तथाच पारमार्थिकत्वावच्छिन्नप्रतियोगिताकस्वात्यंताभावसामानाधिकरण्यं मिथ्यात्वमित्यर्थः । एतच्चोपलक्षणं पारमार्थिकभिन्नत्वं पारमार्थिकत्वात्यंताभाववत्त्वं वा मिथ्यात्वं बोध्यं अनुमाननिरूपणप्रयोजनमुपसंहरति (तस्मादिति) ॥

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते
वेदान्तशिखामणौअनुमानपरिच्छेदः ॥ २ ॥

म० प्र०–परममूले (नविरोधइति) अनुमानस्य पारमार्थिकत्वेन प्रपंचात्यंताभाव विषयकत्वेन घटःसन् इत्यादि प्रत्यक्षस्य व्यावहारिकसद्घटादिविषयकत्वेन च तयोर्भिन्नविषयकत्वेनोक्तप्रत्यक्षेणोक्तानुमानबाधोनेत्यर्थः । एवमपि प्रत्यक्षानुमानयोर्भिन्नविषयकत्वेन विरोधाभावेपि स्वाश्रयतया–आश्रिताश्रयतया उक्तरीत्या–आश्रिताश्रयेतत्तदत्यंताभावायोगेनहेतुना । तत्र–आश्रिताश्रये, ज्ञानगर्भत्वे–ज्ञानघटितत्त्वे । अभिमानाभावदशायां–ज्ञानाभावकाले, प्रयोजनम्–प्रपंचमिथ्यानुमानम् ॥

इति श्रीमदुदासीनवरब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदासशब्द-
वाच्याविर्भूतायां धर्मराजाध्वरीन्द्रात्मजरामकृष्णशब्दाभिधेयविरचित
वेदान्ताशिखामणेर्मणिःप्रभायामनुमानपरिच्छेदःसमाप्तः ॥ २ ॥

अथोपमानपरिच्छेदः ३.

सू०–अथोपमानं निरूप्यते तत्र सादृश्यप्रमाकरणमुपमानम् ॥

शि० म०–शिष्यावधानाय प्रतिजानीते (अथेति) अनुमाननिरूपणानंतरमित्यर्थः सूचीकटाहन्यायेन शब्दनिरूपगात्प्रागुपमाननिरूपणमिति ध्येयम् । ननु सूचीकटाहन्यायाद्रे उपमानस्य प्रत्यक्षादपि प्राथम्यं स्यादिति चेत् न, प्रत्यक्षानुमानांतर्भावानन्तर्भावयोरुपमाने विचारणीययोः प्रत्यक्षादिनिरूपणसापेक्षत्वेन तयोरेव प्रथमनिरूपणीयत्वात् (तत्रेति) उपमाने निरूपणीय इत्यर्थः (सादृश्येति) अत्र उपमितिकरणत्वं लक्षणं, तत्करणत्वं चासाधारणत्वमितीह विवक्षितं, नतु व्यापारवत्त्वघटितमिह विवक्षितम् । गवयनिष्ठसादृश्यज्ञानस्योपमितौ जनयितव्यायां व्यापाराभावात् । ननु नोपमितिकरणत्वं लक्षणं तस्या एव दुर्वचत्वात् । तथाहि न तावत्सादृश्यप्रमात्वमुपमितित्वं भ्रमोपमितावव्याप्तेः नचोपमानप्रमाणलक्षणाय प्रमोपमितेरेव लक्ष्यत्वात्, सा न संग्राह्येति वाच्यम् । तथापि सामान्यलक्षणाकरणे विशेषलक्षणप्रणयनायोगात् । नच सादृश्यज्ञानमुपमितिसामान्यलक्षणमिति युक्तं, सादृश्यप्रत्यक्षेऽतिव्याप्तेः । नचासन्निकृष्टविषयत्वविशेषणं तथापि शब्दादिना सादृश्यज्ञानेऽतिव्याप्तेः ॥

यन्नामालापमात्रेण विघ्नव्यूहं विनश्यति ॥
सर्वदेवाभिपूज्यं तं वन्दे श्रीनानकं गुरुम् ॥ १ ॥

धर्मराजाध्वरींद्रोथशब्देन मंगलं कुर्वन्नवसरसंगत्योपमाननिरूपणं प्रतिजानीते । परममूले (अथेति) अवधानाय–अन्यत्रचित्तसंचारराहित्यपूर्वकप्रकृतग्रंथशुश्रूषायै । उपमानेविचारणीययोः–उपमानप्रमाणस्यप्रत्यक्षेऽनुमाने वांतर्भावोस्ति नवेतिविचारांगसंशयविषययोः प्रत्यक्षैकप्रमाणवादिमते उपमानस्य प्रत्यक्षप्रमाणांतर्भावो वैशेषिकमते उपमानप्रमाणस्यानुमानप्रमाणांतर्भावः । सिद्धान्ते प्रत्यक्षादिप्रमाणतः पृथक् प्रमाणमुपमानमिति विचारविषययोरिति वा, तयोः–प्रत्यक्षानुमानयोः । निरूपणीये–उपमानस्यप्रत्यक्षानुमानयोरनंतर्भावात् प्रतिपादनयोग्येसति, अत्र–मूले । लक्षणम्–उक्तमितिशेषः । तत्करणत्वंच–उपमितिकरणत्वंच, असाधारणत्वम्–असाधारणकारणत्वं, इह–मूले (गवयनिष्ठसादृश्यज्ञानस्येति) उपमितावनेनसदृशीमदीयागौरित्याद्युपमितौ जनयितव्यायां–जननीयां सत्यामयंपिंडोगो-

Funding by IKS-MoE

सदृश इत्याकारकस्य गवयनिष्ठसादृश्यज्ञानस्य व्यापाराभावादित्यर्थः । तस्या एव-उपमितेरेव सादृश्यप्रमावत् सादृश्यप्रकारकगवादिविशेष्यकयथार्थज्ञानत्वम् । भ्रमोपमितौ-उष्ट्रपिण्डो गोसदृश इति भ्रमात्मकसादृश्यप्रकारकज्ञानजन्यानेन सदृशी मदीया गौरित्याकारकोपमितौ, तथापि-भ्रमोपमितावव्याप्त्यभावेपि (अयोगादिति) भ्रमात्मकसादृश्यप्रकारकज्ञानजन्यज्ञानस्याप्युपमिनोमीत्यनुव्यवसायबलादुपमितित्वेन भ्रमप्रमासाधारणोपमितिलक्षणप्रणयनं विनोपमितिविशेषलक्षणप्रणयनायोग इतिभावः । सादृश्यज्ञानं-सादृश्यप्रकारकगवादिविशेष्यकज्ञानं सादृश्ये अयं पिण्डो गोसदृश इत्याकारकसादृश्यप्रत्यक्षे शब्दादिनासादृश्यज्ञाने-अनेन चैत्रेण सदृशस्तवपुत्र इत्यादिशब्दजन्यैतच्चैत्रनिरूपितसादृश्यवान् मत्पुत्र इत्याद्याकारके अत्रादिनानुमानंग्राह्यम् ॥

शि० म०-नचोपमानजन्यसादृश्यज्ञानत्वमात्माश्रयाद्यापत्तेः । नच सादृश्यज्ञानजन्यज्ञानत्वं सादृश्यलिंगकानुमितौ तदनुव्यवसायादावतिव्याप्तेः । नच सादृश्यप्रतियोगिस्मरणसहकृतसादृश्यज्ञानजन्यत्वमुपमितित्वं तत्प्रतियोगिस्मरणस्य गोसादृश्यज्ञानोपक्षीणत्वेन फलीभूतसादृश्यज्ञानाहेतुत्वात् । तदुभयगोचरसमूहालंबने अतिव्याप्तेश्च ततश्च न युक्तमुपमानलक्षणमिति उच्यते उपमितिकरणत्वमेवोपमानलक्षणम् । उपमितिश्च सादृश्यज्ञानत्वेन सादृश्यज्ञानजन्या उपमितौ करणांतरानुपपत्त्या तस्य तत्त्वेन करणत्वकल्पनान्नासम्भवः ॥

म० प्र०-आत्माश्रयाद्यापत्तेः-उपमितिकरणजन्यसादृश्यज्ञानत्वरूपोपमितिलक्षणस्योपमितिघटितत्वेन स्वज्ञाने स्वज्ञानापेक्षात्मकात्माश्रयापत्तेः । उपमानजन्यसादृश्यज्ञानमुपमितिरित्युपमितिज्ञानं हि उपमानज्ञानमपेक्षते उपमितिकरणमुपमानमित्युपमानज्ञानं तु स्वघटकोपमितिज्ञानमपेक्षते इत्यन्योन्याश्रयोप्यादिपदगृहीतो वोध्यः । ज्ञानत्वम्-अस्याग्रेउपमितित्वमिति शेषः । सादृश्यलिंगकानुमितौ-मदीया गौर्गवयनिष्ठसादृश्यप्रतियोगिनी गवयप्रतियोगिकसादृश्यात् यो यत्प्रतियोगिकसादृश्यवान् स तन्निष्ठसादृश्यप्रतियोगी यथामैत्रप्रतियोगिकसादृश्यवाँश्चैत्रो मैत्रनिष्ठसादृश्यप्रतियोगी इत्यनुमानजन्यमदीया गौर्गवयनिष्ठसादृश्यप्रतियोगिनीत्यनुमितौ देवदत्तमुखमाह्लादजनकं चंद्रसदृशत्वान्मत्प्रियामुखवदित्यनुमानजन्यदेवदत्तमुखमाह्लादजनकमित्यनुमितौ च, तदनुव्यवसायादौ-सादृश्यमहं जानामीति सादृश्यज्ञानानुव्यवसाये आदिपदगृहीतसादृश्यस्मृतौच (सादृश्यप्रतियोगीति) गवयादिनिष्ठसादृश्यस्य प्रतियोगिगवादिस्मरणसहकृतायां गवयो गोसदृश इत्यादिज्ञानजन्यत्वमुपमितित्वमित्यर्थः । नचेति प्रतिज्ञायां हेतु-

Funding by IKS-MoE

माह (तत्प्रतियोगिस्मरणस्येति) गवयादिनिष्ठसादृश्यप्रतियोगिकगवादिस्मरणस्येत्यर्थः । गोसादृश्यज्ञानोपक्षीणत्वेन–अयं पिंडो गोसदृश इत्यादिगवयादिनिष्ठगवादिनिरूपितसादृश्यज्ञानजनकत्वेन (फलीभूतज्ञानेति) अनेन सदृशी मदीयागौरित्यादिफलीभूतज्ञानेत्यर्थः । ननु यथाव्याप्त्यनुभवस्य परामर्शद्वारानुमितिं प्रतिहेतुत्वेन परामर्शमात्रजननहेतुत्वं यथावाऽनुभवस्य स्मृतिंप्रति संस्कारद्वारा हेतुत्वं न संस्कारमात्रजननहेतुत्वं तद्वद्गवयादिनिष्ठसादृश्यप्रातियोगिगवादिस्मरणस्यापि गवादिनिरूपितगवयादिनिष्ठसादृश्यज्ञानद्वाराऽनेन सदृशीमदीया गौरित्यादिफलीभूतज्ञानेपि हेतुत्वंस्यादित्याशंक्य दूषणांतरमाह (तदुभयेति) आदौगौरित्यादिप्रतियोगिगवादिस्मरणं पश्चाद्गवयादिनिष्ठसादृश्यज्ञानं ततः सादृश्यं तत्प्रतियोगीचेति समूहालंबनमिति सादृश्यं तत्प्रतियोगीचेति समूहालंबनस्य सादृश्यप्रतियोगिस्मरणसहकृतसादृश्यज्ञानजन्यत्वेन सादृश्यं तत्प्रतियोगीत्येतदुभयविषयकसादृश्यं तत्प्रतियोगीचेति समूहालंबनेऽतिव्याप्तेरित्यर्थः । ततश्च–उपमित्यनिरूपणादेव, तस्य–गवादिप्रतियोगिकगवयादिनिष्ठसादृश्यज्ञानस्य, तत्त्वेन–सादृश्यज्ञानत्वेन, नासंभवः–सादृश्यज्ञानत्वेन सादृश्यज्ञानजन्योपमितिरित्युपमितिनिरूपणे सत्युपमितिकरणमुपमानमित्युपमानलक्षणस्यासंभवो न ॥

शि० म०–तदनुव्यवसायादेश्च तत्त्वेन तज्जन्यत्वाभावान्नातिव्याप्तिः । नच गोविसदृश उष्ट्र इति वैधर्म्यज्ञानजन्यानेन विसदृशी मदीया गौरित्युपमितावव्याप्तिः तत्रोपमानप्रामाण्यानभ्युपगमात् । नहि कश्चिदनुव्यवस्यति करभेण गामुपमिनोमीति । केचित्तु सप्रतियोगिकपदार्थज्ञानानंतरं परस्मिन्सप्रतियोगिकपदार्थज्ञानमुपमितिः । एवं च वैधर्म्यपुरस्कारप्रवृत्तोपमिति संग्रहः । तत्त्वेन तज्जन्यत्वस्य विवक्षितत्वाच्च नातिप्रसंग इत्याहुः ॥

म० प्र०–तदनुव्यवसायादेः–सादृश्यज्ञानानुव्यवसायसादृश्यस्मृत्योश्च, तत्त्वेन–सादृश्यज्ञानत्वेन (तज्जन्यत्वाभावादिति) सादृश्यज्ञानस्य स्वविषयकानुव्यवसाये विषयत्वेन हेतुत्वात्सादृश्यस्मृतौ तु सादृश्यज्ञानस्यानुभवत्वेन हेतुत्वादिति शेषः गोविसदृशउष्ट्रइतिवैधर्म्यज्ञानेति) गोनिरूपितवैजात्यवानुष्ट्र इतिवैधर्म्यज्ञानेत्यर्थः । तत्र–अनेन विसदृशीमदीया गौरित्यादि ज्ञाने । उपमानप्रामाण्यानभ्युपगमात्–उपमाननिष्ठप्रमाकरणतानंगीकारात् (करभेणेति) यथाचंद्रेण मुखमुपमिनोमि कमलेन नेत्रमुपमिनोमीति पुरुषोनुव्यवस्यति तथा करभेणोष्ट्रेणगामुपमिनोमीति नानुव्यवस्यतीत्यर्थः । उष्ट्रनिरूपितवैजात्यविषयकोपमित्याश्रयोहमित्यनुव्यवसायवाक्यार्थः । नन्वेवमपि सिद्धान्तेऽनेन विसदृशी मदीया गौरित्यादिज्ञानं कुतः

Funding by IKS-MoE

प्रमाणाद्भवतीति चेन्न । यदि गव्युष्ट्रनिरूपितसादृश्यं स्यात्तर्हि तदुपलभ्येत यतस्तन्नोपलभ्यतेऽतो गवितन्नास्तीति योग्यानुपलब्धिप्रमाणादुष्ट्रनिरूपितवैधर्म्यप्रकारकगोविशेष्यकज्ञानोत्पत्तिसंभवादिति (सप्रतियोगिकेति) सप्रतियोगिकपदार्थस्य सादृश्यस्य वैधर्म्यस्य च यज्ज्ञानं गोसदृशोगवयोगोविसदृशउष्ट्र इत्याद्याकारकं तदनंतरं परस्मिन् गवादौ सप्रतियोगिकपदार्थज्ञानं गवयसदृशीमदीया गौरुष्ट्रविसदृशी मदीया गौरित्यादिज्ञानमुपमितिरित्यर्थः । ननु सप्रतियोगिकपदार्थानां घटात्यंताभावघटप्रागभावघटध्वंसघटभेदादीनां घटात्यंताभावो घटप्रागभावो घटध्वंसो घटभेद इत्यादिज्ञानानन्तरं परस्मिन् भूतलादौ घटात्यंताभाववद्भूतलं घटप्रागभाववत्कपाले घटध्वंसवत्कपाले घटभेदवान्पट इत्यादिविशिष्टवैशिष्ट्यावगाहिसप्रतियोगिकघटात्यंताभावादिपदार्थज्ञानेष्वतिव्याप्तिरित्याशंक्याह (तत्त्वेनेति) सप्रतियोगिकपदार्थज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताशालित्वे सति परस्मिन्सप्रतियोगिकपदार्थज्ञानत्वस्य विवक्षितत्वादित्यर्थः । तथाच घटात्यंताभाववद्भूतलमित्यादि सप्रतियोगिकघटात्यंताभावादिविषयकविशिष्टवैशिष्ट्यावगाहिज्ञानेषु घटात्यंताभाव इत्यादिज्ञानानां विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वेन सप्रतियोगिकपदार्थज्ञानत्वेन हेतुत्वाभावान्न पूर्वोक्तज्ञानेष्वतिव्याप्तिरिति भावः ॥

मू०--तथाहि प्रांगणेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिरयं पिण्डो गोसदृश इति तदनंतरं च भवति निश्चयोऽनेन सदृशी मदीया गौरिति ॥

शि० म०--ननु गवयनिष्ठगोसादृश्यज्ञानं न प्रत्यक्षेण तदागोगवययोरसन्निकर्षात् तदुभयसन्निकर्षे च तत एव सादृश्यप्रतीत्यापत्तौ मानांतरत्वानुपपत्तेरित्याशंक्य गवयेन्द्रियसन्निकर्षे सति जायमाना गोसादृश्यप्रतीतिः व्यवहितदृष्टे गोपिडांशे परोक्षा गवयांशेत्वपरोक्षेत्याह (तथाहीति । गोसदृशइति) गोभिन्नत्वे सति तद्गतभूयः सामान्यवानित्यर्थः । अथवा तदसाधारणधर्मशून्यत्वे सति तद्गतधर्मवत्त्वं सादृश्यम्, नच हस्तिमशकयोः सादृश्यापत्तिः, प्राणित्वादिनेष्टत्वात् । अत एव पुष्टिमात्रसाधर्म्येण महिषएवायं पुरुष इति लोकव्यवहारः । अन्येतु सादृश्यं पदार्थान्तरं क्लृप्तपदार्थेष्वनंतर्भावात तथाहि न तावत्सादृश्यंद्रव्यं गुणवृत्तित्वात् अत एव न गुणः कर्म वा,

नच गुणे सादृश्यं नास्त्येव तत्र तद्व्यवहारस्याश्रयसादृश्यादेवोपपत्तेः । तथाच हेतुरसिद्ध इति वाच्यम्, रूपद्वयं सदृशमिति प्रतीतेर्बाधकं विना प्रमात्वात् ॥

म० प्र०-गवयनिष्ठगोसादृश्यज्ञानम्-गवयनिष्ठगोनिरूपितसादृश्यविषयकायं पिंडो गोसदृश इत्याकारकज्ञानम्, तदा-सादृश्यज्ञानाव्यवहितपूर्वकाले (गोगवययोरिति) यद्यप्येकेन गवयेन सन्निकर्षसद्भावे गोगवययोरसन्निकर्षादित्युक्तिरनुपपन्ना तथापि पृथिव्यां गन्धसत्त्वेपि पृथिवीजलयोर्गंधाभाव इत्युक्तिवद्गवयेन सन्निकर्षसत्त्वेप्युभाभ्यां सन्निकर्षाभावेन गोगवययोरसन्निकर्षादित्युक्तिरुपपद्यते इति भावः, ततएव-सन्निकर्षादेव सादृश्यप्रतीत्यापत्तौ-अनेन सदृशी मदीया गौरित्याकारकसादृश्यज्ञानसिद्धौ । मानांतरत्वानुपपत्तेः-उपमाननिष्ठप्रत्यक्षाद्यतिरिक्तप्रमाणत्वासिद्धेः, व्यवहितदृष्टे-व्यवहितेव्यवधानवतिदेशे दृष्टो व्यवहितदृष्टस्तस्मिन्व्यवहितश्चासौ दृष्टो व्यवहितदृष्टस्तस्मिन्निति वा । परममूले, प्रांगणेषु-चौक इतिख्यातेषु (गोभिन्नत्वेसतीति) सादृश्यप्रतियोगिभिन्नत्वे सतीति स्वाश्रयसमवेतत्वसंबंधेन सादृश्यप्रतियोगिगतशृंगत्वपुच्छत्वादिबहुजातिरूपं यतः सामान्यं सामानाधिकरण्यसंबंधेन तद्वानित्यर्थः । ननु गोगवययोरुक्तबहुजातिरूपसादृश्यसत्त्वेपि जात्यादौ जात्यभावादुक्तबहुजातिरूपं सादृश्यं न स्यादित्याशंक्याह (अथवेति) तदसाधारणधर्मशून्यत्वेसतीति) सादृश्यप्रतियोगिगवादिगतगोत्वाद्यसाधारणधर्मानधिकरणत्वे सत्युपाधिरूपशृंगपुच्छाद्यवयवसमवेतत्वप्राणित्वादिधर्मवत्त्वमित्यर्थः । अतएव-हस्तिमशकयोः प्राणित्वादिना सादृश्यस्येष्टत्वादेव, अतएव-सादृश्यस्यगुणवृत्तित्वादेव तत्र-गुणे-तद्व्यवहारस्य-सादृश्यव्यवहारस्य । हेतुः-सादृश्यस्यगुणवृत्तित्वादितिहेतुः असिद्धः-स्वरूपासिद्धः, बाधकं विना-बाधकाभावात् ॥

मू०-तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्यज्ञानं फलम् ॥

शि० म०-नच परंपरासंबंधेन प्रमात्वोपपत्तिः, साक्षात्संबंधे बाधकाभावात, आश्रयवैसादृश्येपि तद्गतगुणयोः सादृश्यानुभवाच्च । नापि सामान्यं सामान्यवृत्तित्वात, निषेधरूपत्वेनाप्रतीतेश्च, नाभावांतर्भावस्तस्मात्सादृश्यंपदार्थांतरमिति तन्न सादृश्यस्य सामान्ये अन्तर्भावात् । तदसाधारणधर्मशून्यत्वे सति तद्गतधर्मवत्त्वस्य सादृश्यस्योपाधिरूपत्वेन प्रमेयत्वादिवत्सामान्यवृत्तित्वेऽपि विरोधाभावात, नच सादृश्यं सप्रतियोगिकं सामान्यं तु निष्प्रतियोगिकमिति कथमस्य सामान्यरूपत्वं इतरनिरूप्यं हि सप्रतियोगिकं तद्गतधर्मवत्त्व-

लक्षणं तथा किंच सादृश्यं न पदार्थान्तरं, तथासति सुसदृशमीषत्सदृशमित्युत्कर्षापकर्षाभावप्रसंगात् । सिद्धांते तु सामान्याल्पभूयस्त्वाभ्यां तत्र तदुपपत्तेः । तदुक्तं तर्कपादे शास्त्रदीपिकायां ये तु सामान्ययोगातिरिक्तमन्यदेव तत्त्वं सादृश्यं मन्यंते तेषां प्रकर्षापकर्षभेदः । किंनिबंधन इति चिंतनीयमिति अनंतरमित्यनेनान्वयो दर्शितः । चकारेणैवकारार्थेन व्यतिरेकः । नन्वस्तु अन्वयव्यतिरेकावधारणं ततः किमित्यत आह (तत्रेति) ननु गवयनिष्ठगोसादृश्यज्ञानस्य नान्वयव्यतिरेकाभ्यां गोनिष्ठगवयसादृश्यज्ञानं प्रतिकरणत्वावगमः तयोः कारणतामात्रनिश्चायकत्वात् ॥

म०प्र०—परंपरासंबंधेन—सादृश्याश्रयद्रव्याश्रितत्वरूपपरंपरासंबंधविषयकत्वेन, साक्षात्संबंधे—रूपद्वयंसदृशमितिप्रतीतेः स्वरूपसंबंधरूपसाक्षात्संबंधविषयकत्वे, सामान्यं—जातिः सामान्यवृत्तित्वात् नित्यत्वेन गोत्वसदृशं घटत्वमितिसादृशस्य घटत्वादिजातिवृत्तित्वात् सामान्येन्तर्भावात्—उपाधिरूपसामान्येन्तर्भावात्, तद्गतधर्मवत्त्वस्य—सादृश्यप्रतियोगिगतावयवसमवेतत्वानित्यत्वप्राणित्वादिधर्मवत्त्वस्य यद्यपिजातिरूपसामान्ये इतरनिरूप्यत्वरूपंसप्रतियोगिकत्वं न संभवति तथाप्युपाधिरूपनित्यत्वप्राणित्वाह्लादजनकत्वशृंगपुच्छाद्यवयवसमवेतत्वादिरूपसामान्ये इतरनिरूप्यत्वरूपसप्रतियोगिकत्वं भवत्येवेत्यभिप्रेत्याह (इतरनिरूप्यमिति) तद्गतधर्मवत्त्वलक्षणं—सादृश्यप्रतियोगिगतोपाधिरूपनित्यत्वादिधर्मवत्त्वलक्षणं सामान्यं, तथा—इतरनिरूप्यम् तथासति—सादृश्यस्य पदार्थान्तरत्वे सति (सामान्येति) उपाधिरूपधर्मेत्यर्थः । तत्र—सखंडोपाधिरूपसादृश्ये, तदुपपत्तेः—उत्कर्षापकर्षविषयकप्रतीत्युपपत्तेः । सामान्ययोगातिरिक्तम्—सखंडोपाधिरूपसामान्यसंबंधातिरिक्तम्, अन्यदेव—द्रव्यादिभिन्नमेव, तत्त्वं—स्वरूपम्, प्रकर्षापकर्षभेदः—सादृश्यनिष्ठाधिक्यन्यूनतारूपविशेषः । अनंतरमित्यनेन—परममूलस्थानंतरमितिशब्देन, अन्वयः—अयंपिंडोगोसदृश इत्यादिज्ञानसत्त्वेऽनेनसदृशीमदीया गौरित्यादि ज्ञानसत्त्वमित्यन्वयः । व्यतिरेकः—अयं पिंडोगोसदृश इत्यादिज्ञानाभावेऽनेनसदृशी मदीया गौरित्यादिज्ञानाभाव इति व्यतिरेकः अस्य दर्शित इति पूर्वेणान्वयो बोध्यः । अवधारणम्—निश्चयात्मकज्ञानम् । परममूले तत्रेति—निश्चयद्वयमध्यइत्यर्थः, तयोः—अन्वयव्यतिरेकयोः ॥

मू०—नचेदं प्रत्यक्षेण संभवति गोपिंडस्य तदेन्द्रियासन्निकर्षात्, नाप्यनुमानेन गवयनिष्ठसादृश्यस्यातल्लिंगत्वात् ॥

शि० म०—नच करणान्तरानुपपत्त्या तस्य तत्करणत्वं क्लृप्तप्रमाणभावस्य प्रत्यक्षादेः सत्त्वादिति चेत् न, किं प्रत्यक्षं तत्करणमनुमानं वा,

आद्येपि किं तत्करणं चक्षुरादि अन्तःकरणं वा आद्यं दूषयति (नचेति । इन्द्रियासन्निकर्षादिति) इन्द्रियेण साकं गोपिंडविशेषस्य संयोगादेरभावात, ज्ञानप्रत्यासत्तेश्च निराकृतत्वादित्यर्थः । अतएव नाद्वितीयः, इन्द्रियासन्निकृष्टबाह्यविषयकप्रत्यक्षज्ञाने मनसोऽसामर्थ्यात् । साधारणकारणत्वाच्च । ननु प्रत्यक्षेण गवयेगोसादृश्येगृह्यमाणेगव्यपि गवयसादृश्यं समानसंवित्संवेद्यतया गृहीतमेवेति चेत् न, विशेषणविशेष्यभेदेन समानसंवित्संवेद्यत्वासिद्धेः । अनुमानपक्षेपि किं गोनिष्ठगवयसादृश्यं प्रति गवयनिष्ठगोसादृश्यं लिंगं गवयनिष्ठगोसादृश्यप्रतियोगित्वं वा । नाद्यः, गवयनिष्ठसादृश्यस्य भेदगर्भतया गोवृत्तित्वाभावेन तन्निष्ठसादृश्याननुमापकत्वादित्याह (नाप्यनुमानेति) ॥

म० प्र०–तस्य–गवयादिनिष्ठसादृश्यज्ञानस्य, तत्करणत्वम्–अनेन सदृशी मदीया गौरित्यादिज्ञानकरणत्वम्, क्लृप्तप्रमाणभावस्य–निश्चितप्रमाणत्वस्य, तत्करणम्–अनेन सदृशी मदीयागौरित्यादिज्ञानकरणम् । ननु प्रत्यक्षेणायं पिंडोगोसदृश इत्यादि ज्ञानानंतरं गवादिज्ञानलक्षणप्रत्यासत्त्याऽनेन सदृशी मदीया गौरित्यादिज्ञानं स्यादित्याशंक्याह (ज्ञानप्रत्यासत्तेश्चेति) अतएव–वक्ष्यमाणहेतुभ्यामेव, प्रत्यक्षेण–चक्षुःस्वरूपप्रत्यक्षप्रमाणेनगव्यपि गवयसादृश्यंगृहीतमेवेत्यन्वयः । गवि गवयसादृश्यस्य गृहीतत्वे हेतुमाह (समानसंवित्संवेद्यतयेति) घटनिष्ठाधेयतानिरूपितभूतलनिष्ठाधिकरणतायां भूतलनिष्ठाधिकरणतानिरूपितघटनिष्ठाधेयतायां च घटवद्भूतलमित्येकज्ञानविषयतावद्गोगवयसादृश्ययोरपि प्रत्यक्षप्रमाणजन्यायं पिण्डो गोसदृश इत्येकज्ञानविषयतेत्यर्थः । समानसंवित्संवेद्यत्वासिद्धेः–एकज्ञानविषयत्वानिश्चयात् यत्रैकज्ञानविषयत्वं न तत्रविशेषणविशेष्यभेदो घटवद्भूतलमित्येकज्ञानविषयघटनिष्ठाधेयतानिरूपितभूतलनिष्ठाधिकरणतावद्गोगवयसादृश्ययोस्तु व्यापकविशेषणविशेष्यभेदभावाभावादेकज्ञानविषयत्वरूपव्याप्यस्याभाव इति भावः । असिद्धौ हेतुमाह (विशेषणविशेष्यभेदेनेति) गोनिरूपितगवयनिष्ठसादृश्ये गौर्विशेषणं गवयनिरूपितगोनिष्ठसादृश्ये गवयो विशेषणमिति विशेषणविशेष्ययोर्भेदेनेत्यर्थः । गोनिष्ठगवयसादृश्यंप्रति–मदीया गौरनेन सदृशीति गोनिष्ठगवयनिरूपितसादृश्यरूपसाध्यस्य, लिंगं–ज्ञापकम्, भेदगर्भतया–गोनिरूपितगवयनिष्ठसादृश्यगोभेदघटितत्वेन । तन्निष्ठसादृश्याननुमापकत्वात्–मदीया गौरनेन सदृशीत्याकारकगोनिष्ठसादृश्यविषयकानुमित्यजनकत्वात् ॥

मू०–नापि मदीया गौरेतद्गवयसदृशी एतन्निष्ठसादृश्यप्रतियोगित्वात् । यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः यथा मैत्र-

Funding by IKS-MoE

निष्ठसादृश्यप्रतियोगी चैत्रः मैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यम् । एवंविधानुमानानवतारेप्यनेन सदृशी मदीया गौरिति प्रतीतेरनुभवसिद्धत्वात् ॥

शि० म०–द्वितीयमाशंक्य निराकरोति (नापीति । तत्संभवइति) गवि गवयसादृश्यानुभव इत्यर्थः । परिहरति (एवंविधेति) इदमत्राकूतं किमत्र सामान्यव्याप्तिर्मूलं विशेषव्याप्तिर्वा । नाद्यः यत्तद्भ्यामननुगतत्वेन सामान्यव्याप्तेरनुमानानंगत्वात । नद्वितीयः यो गवयनिष्ठसादृश्यप्रतियोगी सगवयसदृश इति विशेषव्याप्तेः प्रागज्ञानात् । किंच नानुमानात्तत्संभवः । गवयनिरूपितगोसादृश्यरूपसाध्याप्रसिद्धेः । किंच न हेतुः पक्षधर्मतया ज्ञातुं शक्यः गवयनिष्ठसादृश्यप्रतियोगित्वस्यासन्निकृष्टे गवि प्रत्यक्षेणाज्ञानात् । नच विशिष्टघटकपदार्थभेदेन गविगवयसादृश्याश्रयत्वाज्ञानेपि गवये गोसादृश्ये गृह्यमाणे समानसंवित्तिवेद्यतया तत्प्रतियोगित्वं भातमेवेति वाच्यम् । तथापि गोरसन्निकर्षे मदीया गौरेतद्गवयनिष्ठसादृश्यप्रतियोगिनीति गोविशेष्यकपक्षधर्मताज्ञानस्यासिद्धेः । नच ज्ञानोपनीते तस्मिन्मानसः परामर्श इति युक्तम्, ज्ञानप्रत्यासत्तेर्निराकृतत्वात अपिच न गवि गवयसादृश्यमनुमितिविषयः कथंचित्साध्यहेतुप्रसिद्धावपि गवि गवयसादृश्यानुभवसमये नियमेन व्याप्तिज्ञानाभावात् तस्मादनुमितिसामग्रीविरहात् न गवि गवयसादृश्यानुमितिरिति ॥

म० प्र०–अत्र-मदीयागौरनेन सदृशीत्याकारकगोनिष्ठैतद्गवयनिरूपितसादृश्यानुमितौ) यत्तद्भ्यामननुगतत्वेन–यदा यच्छब्देन दृष्टांतस्य ग्रहणं तदा पक्षस्य ग्रहणं नास्ति यदा यच्छब्देन पक्षस्य ग्रहणं तदा दृष्टांतस्य ग्रहणं नास्तीति पक्षदृष्टांतयोरेकयच्छब्देनैकदाग्रहणाभावेन पक्षदृष्टांतीयसादृश्यरूपसाध्यभेदेन साध्यस्यैकरूपत्वाभावेन, यः–गोपदार्थः । सः–गोपदार्थः । प्राक्–अनुमानात्प्राक्, तत्संभवः–मदीया गौरेतद्गवयसदृशीत्यनुमितेः संभवः (साध्याप्रसिद्धेरिति) नच साध्यप्रसिद्ध्यभावेप्येतद्रूपवानेतद्रसादित्याद्यनुमानवदत्रसाध्यप्रसिद्ध्यभावेप्युक्तानुमानसंभव इति वाच्यम् । व्यतिरेक्यनुमानानभ्युपगमेन दृष्टांतस्यासंमतत्वादिति । हेतुः–गवयनिष्ठसादृश्यप्रतियोगित्वरूपो हेतुः, पक्षधर्मतया–पक्षवृत्तित्वेन, प्रत्यक्षेण–चक्षुरिन्द्रियेण, विशिष्टघटकपदार्थभेदेन–विशिष्टसादृश्यघटकपदार्थभेदेन, समानसंवित्तिवेद्यतया-एकज्ञानविषयतया । तत्प्रतियोगित्वम्–गोरेतद्गवयनिष्ठसादृश्यप्रतियोगि-

Funding by IKS-MoE

त्वम्, ज्ञानोपनीते–ज्ञानविषयेगोपदार्थे । कथंचित्–तुष्यतु दुर्जनन्यायेन ज्ञानप्रत्यासत्तिस्वीकारेण, तस्मात्–पूर्वोक्तयुक्तिकलापात् (अनुमितिसामग्रीति) व्याप्तिज्ञानादिरूपानुमितिसामग्रीत्यर्थः ॥

मू०–उपमिनोमीत्यनुव्यवसायाच्च ।

शि० म०–नन्वनुमानानवतारे तत्र गवयसादृश्यानुभवोऽसिद्ध एव लाघवेन क्लृप्तप्रमाणभावस्य व्याप्तिज्ञानस्यैवतत्र करणवत्वकल्पनादित्यत आह (उपमिनोमीति) नैयायिकास्तु कीदृशो गवय इति प्रश्नानंतरं यथा गौस्तथा गवय इत्याप्तद्वारा लब्धोपदेशकस्य वनं गतस्य तद्वाक्यार्थस्मरतो नागरिकस्य सत्ययं गोसदृश इति प्रत्यक्षेभवति प्रतीतिरसौ गवयशब्दवाच्य इति सैवोपमितिःतत्करणं च नातिदेशवाक्यं तस्य प्राक्पिंडप्रत्यक्षादपि भावात् नापि प्रत्यक्षं सत्यपि तस्मिन् वाक्याश्रवणे वाच्यताप्रतीत्यनुपपत्तेः नापि मिलिताभ्यां वाक्यप्रत्यक्षाभ्यां तादृशज्ञानमिति वाच्यम् । तयोर्भिन्नकालतया मेलनासिद्धेः प्रत्यक्षसमये तद्वाक्यानुस्मृतिसंभवेपि शाब्दत्वापरोक्षत्वयोः सांकर्य्यापत्त्या ताभ्यां विजातीयप्रमाणाभ्यां तादृशप्रमानुपपत्तेः ॥

म० प्र०–अनुमानानवतारे–उक्तानुमानानुत्पत्तौ । तत्र–गवि, लाघवेन–अनुमानातिरिक्तोपमानप्रमाणानंगीकाररूपलाघवेन । तत्र–गोनिष्ठगवयसादृश्यज्ञाने गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्यार्थशाब्दबोधः करणमुक्तातिदेशवाक्यार्थस्मरणं व्यापारः गोसादृश्यविशिष्टपिंडप्रत्यक्षमुक्तकरणसहकारि अयं गवयपदवाच्य इत्युपमितिः फलमिति संप्रदायमतं निराकुर्वतां गवये गोसादृश्यप्रत्यक्षमुपमितिकरणं गोसदृशो गवयपवाच्य इत्यतिदेशवाक्यार्थस्मरणं व्यापार उक्तोपमितिः फलमिति वदतां नवीननैयायिकानां मतं दूषयितुमनुवदति (नैयायिकास्त्वति) इतिप्रश्नानंतरम्–सामान्यतोगवयपदवाच्यं किंचिदस्तीतिजानतो विशेषव्यक्तौ गवयपदशक्तिमजानतः पुरुषस्योक्तप्रश्नानंतरम् । तथा–गोनिरूपितसादृश्यवान् । गवयः–गवयपदवाच्यः । आप्तद्वारा–यथार्थवक्तृरूपनिमित्तकारणेन । तद्वाक्यार्थम्–गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्यार्थम् । सतीति–अयं गोसदृश इति प्रत्यक्षेसतीत्यन्वयः । तत्करणंच–उक्तोपमितिकरणं च नातिदेशवाक्यं गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्यं न, तस्य–अतिदेशवाक्यस्य । भावात्–सत्त्वात् । प्रत्यक्षं–गवयचाक्षुषप्रत्यक्षम्, तस्मिन्–गवयचाक्षुषज्ञाने । वाच्यताप्रतीत्यनुपपत्तेः–शक्तिज्ञानानुत्पत्तेः । तादृशज्ञानं–असौगवयपदवाच्य इति ज्ञानम् ।

तयोः–गवयचाक्षुषप्रत्यक्षगोसदृशोगवयपदवाच्य इति वाक्ययोः (तद्वाक्येतिं) गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्येत्यर्थः । तादृशप्रमानुपपत्तेः–उपमितित्वधर्मविशिष्टासौगवयपदवाच्य इति प्रमानुत्पत्तेः ॥

शि० म०–नच वाक्यार्थानुसंधानसहकृतप्रत्यक्षं तत्करणमिति युक्तम्, प्रत्यक्षानंतरं व्यासंगादिना वाच्यत्वप्रतीत्यभावेपि उत्तरकाले सादृश्यविशिष्टपिंडस्मरणे सति समयपरिच्छेददर्शनात् नाप्यनुमानं तत्करणं तदनवतारेप्युक्तप्रतीतेरनुभवसिद्धत्वात्तस्मात्सादृश्यज्ञानमेवोपमितिकरणं तदुक्तमुदयनाचार्य्यैः ॥

संबंधस्य परिच्छेदंसंज्ञायास्संज्ञिना सह ।
प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुरिति ॥

ततश्च पृथक् प्रमाणं तदित्याहुः । तच्चिंत्यम् क्लृप्तप्रमाणेनैव तत्संभवात् तथाहिं किं गवयपदवाच्यता ज्ञानं फलं गवयपदं गवयत्वप्रवृत्तिनिमित्तकमिंति ज्ञानं वा । आद्ये नतावद्गवयपदवाच्यताज्ञानं गोसदृशो गवयपदवाच्य इति वाक्यात्सादृश्योपलक्षिते तत्पदवाच्यत्वस्य ज्ञातत्वात् ॥

म० प्र०–वाक्यार्थसंधानसहकृतम्–गोसदृशोगवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणसहकृतम् । प्रत्यक्षम्–गवयचाक्षुषज्ञानम्, तत्करणम्–असौ गवयपदवाच्य इतिज्ञानकरणम्, प्रत्यक्षानंतरम्–गवयचाक्षुषज्ञानानंतरम् । व्यासंगादिना स्त्र्याद्यन्यपदार्थचित्तसंचारादिना । वाच्यत्वप्रतीत्यभावेपि–गवयपदशक्तिज्ञानाभावेपि । उत्तरकाले–व्यासंगादिप्रतिबंधकनिवृत्त्युत्तरकाले । सादृश्यविशिष्टपिंडस्मरणेसति–गवये गोनिरूपितसादृश्यचाक्षुषज्ञानजन्यगोनिरूपितसादृश्यविशिष्टगवयपिंडस्मरणे सति, समयपरिच्छेददर्शनात्–उक्तस्मरणरूपव्यापारद्वारोक्तकारणादेवशक्तिनिश्चयदर्शनात्, अनुमानम्-अयं पिंडो गवयपदवाच्यो गोसदृशत्वाद्गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यावगतपिंडवदित्यनुमानं, तत्करणम्–असौगवयपदवाच्य इति ज्ञानकरणम् । तदनवतारेपि–उक्तानुमानानुत्पत्तावपि, उक्तप्रतीतेः–असौगवयपदवाच्य इति प्रतीतेः । तस्मात्–अयंपिंडोगवयपदवाच्य इति प्रतीतेः प्रत्यक्षादिनाऽसंभवात्, सादृश्यज्ञानमेव–गोसदृशगवयचाक्षुषसादृश्यज्ञानमेव (संबंधस्येति) संज्ञायावाचकशब्दस्य संज्ञिनावाच्यार्थेन संबंधस्य शक्तिरूपस्य परिच्छेदं निश्चयमुपमानप्रमाणफलं विद्वांसो विदुरित्यर्थः । ततश्च अयंपिंडोगवयपदवाच्यइति ज्ञानस्य शब्दादिनाऽसंभवादुपमानप्रमाणस्योदयनाचार्य्याणां संमतत्वाच्च । क्लृप्तप्रमाणेन–शब्दानुमानेन, सत्संभवात्–असौगवयशब्दवाच्य इति शक्तिज्ञानसम्भवात् । आद्ये–असौगवयपदवाच्य इति शक्तिज्ञानमुपमानफलमिंति प्रथमपक्षस्वीकारे सति

Funding by IKS-MoE

(गवयपदवाच्यताज्ञानमिति) वाच्यताच शक्यता शक्यतातुशक्तिरेवं तथाच गवयपदशक्तिज्ञानमित्यर्थः (गोसदृशइति) गोसदृशोगवयपदवाच्य इति वाक्यजन्यगोनिरूपितसादृश्यज्ञानविषये इत्यर्थः । तत्पदवाच्यत्वस्य, ज्ञातत्वात्–गोसदृशोगवयपदवाच्य इति वाक्यादेवगवयपदशक्तेर्ज्ञातत्वादित्यर्थः ॥

· शि० प्र०–नाप्ययं गवयपदवाच्य इति ज्ञानं फलमयं पिंडो गवयपदवाच्यः गो सदृशत्वादतिदेशवाक्यावगतपिंडवदित्यनुमानेन तत्र वाच्यत्वग्रहसंभवात्, अत एव गवयत्वविशिष्टोगवयपदवाच्य इति ज्ञानमुपमानफलम् । गवयत्वस्य पूर्वमनुपस्थितत्वान्नास्य शब्दादिना अन्यथासिद्धिरित्यपास्तम्, गवयत्वविशिष्टोगवयपदवाच्यः गोसदृशत्वादतिदेशवाक्यावगतपिंडवदित्यनुमानेनैव तत्संभवात् नद्वितीयः । गवयपदं सप्रवृत्तिनिमित्तं पदत्वात् घटपदवदित्यनुमानेन गवयपदं गवयत्वतदन्यान्यतरप्रवृत्तिनिमित्तकं पदत्वादिति सामान्यतोदृष्टेन लाघवसहकृतेन वा गवयपदं गवयत्त्वप्रवृत्तिनिमित्तकं इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तत्वादिति व्यतिरेकिणा वा गवयत्वप्रवृत्तिनिमित्तकत्वपरिच्छेदसम्भवात् । नचैतादृशानुमानानवतारदशायामुपमानप्रवृत्तिरिति वाच्यमुपमानानुमानयोरन्यतरकल्पनाप्रसक्तावनुमानस्यैव क्लृप्तप्रमाणभावतया कल्पनौचित्यात् ॥

म०प्र०–ननु गोसदृशो गवयपदवाच्य इति वाक्यादनिर्धारितपिंडविशेषे परोक्षं गवयपदशक्तिज्ञानं नतूक्तवाक्यादपरोक्षं गवयपदशक्तिज्ञानमपरोक्षगवयपदशक्तिज्ञानमेवोपमानफलमित्याशंकांनिषेधयति (नापीति) तत्र–गवये, वाच्यत्वग्रहसंभवात्–गवयपदशक्तिज्ञानसम्भवात् । अतएव–वक्ष्यमाणहेतोरेव । अस्यापास्तमित्यनेनान्वयः (अस्येति) गवयत्वविशिष्टोगवयपदवाच्य इति ज्ञानस्य शब्दादिनाअन्यथाऽन्यप्रमाणेनोत्पत्तिर्नेत्यर्थः । उक्तज्ञानस्य शब्दाद्यन्यप्रमाणेनानुत्पत्तौ हेतुमाह (गवयत्वस्यपूर्वमिति) गोनिरूपितसादृश्यप्रकारकपिंडविशेषविशेष्यकज्ञानरूपोपमानप्रमाणात्पूर्वं गवयत्वस्य पिंडविशेषेऽपरोक्षभानासंभवेनासौ गवयपदवाच्य इत्युपमित्यर्थमुपमानप्रमाणमंगीकर्तव्यमिति भावः (गोसदृशत्वादिति) ननु गोनिरूपितपशुत्वादिना सादृश्यस्य महिष्यादौ सत्त्वेन महिष्यादौ गवयपदवाच्यत्वाभावेन च महिष्यादौ हेतोर्व्यभिचार इति चेन्न, महिष्याद्यवृत्तित्वे सतीति विशेषणस्य निवेशनीयत्वात्तथाच गोसदृशी महिषीत्यादिव्यवहाराभावेन पशुत्वादिनाऽत्रसादृश्यं न विवक्षितमिति भावः । तत्सम्भवात्–गवयत्वविशिष्टोगवयपदवाच्य इति ज्ञानसम्भवात् । सामान्यतोदृष्टेन–कार्य्यकारणभिन्नलिंगकेनान्वयव्यतिरेकिलिंगेन वा, लाघवसहकृतेन–तत्तदुपमानेन तत्तत्पदवाच्यत्वज्ञानापेक्षयैकानुमानेन तत्तत्पदवाच्यत्वज्ञाने लाघवमिति लाघवज्ञान-

सहकृतेन इतराप्रवृत्तिनिमित्तकत्वेसति–गवयत्वेतरप्रवृत्तिनिमित्ताभावकत्वेसति, अनवतारदशायाम्–अनुत्पत्तिकाले (उपमानानुमानयोरिति) उपमानानुमानयोर्मध्ये, एकमेव प्रमाणमंगीकर्तव्यमित्येकप्रमाणकल्पनाप्रसक्तावित्यर्थः ॥

मू०–तस्मादुपमानम्मानान्तरम् ॥

शि० म०–नन्वस्मिन्मते गवयेन गामुपमिनोमीत्यनुव्यवसायबलादेव विजातीयज्ञानसिद्धिः । ततश्च तत्करणं मानान्तरं कल्प्यते इति चेत् न, उक्तानुव्यवसायस्यास्मदभिमतसादृश्यबुद्धिविषयत्वात् । नहि गवयेन गामुपमिनोमीत्यनुव्यवसायो वाच्यत्वज्ञानविषयः । अतएव कमलेन लोचनमुपमिनोमीति लोकव्यवहारः । अन्यथा समयपरिच्छेदस्य तत्राभावेन तथाव्यवहाराभावप्रसंगः । तस्मान्न संज्ञासंज्ञिसंबंधबुद्धिरुपमानफलं, ततश्चोपमिनोमीत्यनुव्यवसायबलात् सादृश्यबुद्धिरेवोपमितिः । तत्करणं च तन्निरूपितसादृश्यज्ञानमित्युपमानं मानांतरमिति तदेतत्सर्वमभिप्रेत्योपसंहराति (तस्मादिति) ॥

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते-
वेदांतशिखामणावुपमानपरिच्छेदः ॥ ३ ॥

म०प्र०–अस्मिन्मते–न्यायमते।विजातीयज्ञानसिद्धिःउपमितित्वधर्मविशिष्टज्ञानासिद्धिः ततश्च–विजातीयज्ञानरूपकार्यस्य सिद्धत्वादेव । अस्मदभिमतसादृश्यबुद्धिविषयत्वात–अनेनसदृशी मदीया गौरित्याद्यस्मदभिमतबुद्धिविषयकत्वात् (वाच्यत्वज्ञानविषयइति) न चैवमपि गवागवयमुपमिनोमीत्यनुव्यवसायाच्छक्तिज्ञानरूपविजातीयज्ञानसिद्धिः स्यादिति वाच्यम् । तादृशानुव्यवसायानंगीकारादंगीकारेप्यतएवेत्यादि वक्ष्यमाणप्रकारेण तस्य शक्तिज्ञानाविषयकत्वात् । अतएव–उक्तानुव्यवसायस्यशक्तिज्ञानाविषयकत्वादेव, अन्यथा–गवयेन गामुपमिनोमीत्यनुव्यवसायस्यानेन सदृशीमदीया गौरित्याद्यस्मदभिमतबुद्धि विषयकत्वानंगीकारे (समयपरिच्छेदस्येति) उपमानप्रमाणजन्यगवादिपदशक्तिज्ञानस्य तत्र गवि लोचनादौ चाभावेनासत्त्वेनेत्यर्थः । तथाव्यवहाराभावप्रसंगः–गवयेन गामुपमिनोमि कमलेन लोचनमुपमिनोमीत्यादिव्यवहाराभावप्रसंगः । तस्मात्–तथाव्यवहाराप्रसक्तिरूपदूषणादेव । ततश्च–गामुपमिनोमीत्याद्यनुव्यवसायस्यानेन सदृशी मदीया गौरित्याद्यस्मदभिमतबुद्धिविषयकत्वादेव । तत्करणम्–सादृश्यबुद्ध्यात्मकोपमितिकरणम् । तन्निरूपितेति–गोनिरूपितेत्यर्थः ॥

इति श्रीमदुदासीनवरश्रीमद्ब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदासश-
ब्दवाच्याविर्भूतायां धर्मराजाध्वरीन्द्रात्मजरामकृष्णशब्दाभिधेयविराचि-
तवेदांतशिखामणेः मणिप्रभायामुपमानपरिच्छेदः ॥ ३ ॥

अथागमपरिच्छेदः ४.

मू०--अथागमो निरूप्यते ॥

शि०म०–उपमानानन्तरं शब्दस्य बहुवादिसंमतत्वादर्थापत्तेः प्राक्शब्दो निरूप्यते इत्याह (अथेति) केचित्तु स्वसमानविषयवाक्यार्थयथार्थज्ञानजन्यत्वमिति कारणद्वारकं प्रमाणशब्दलक्षणमाचक्षते नैतत्सारं, शुकबालादिवाक्ये अव्याप्तेः । नचेश्वरज्ञानं तद्वाक्यार्थविषयं तत्रास्त्येवेति वाच्यम्, ईश्वरानंगीकर्तृमते तथाप्यव्याप्तेः । किंच नेदं प्रमाणशब्दस्य लक्षणं शुकादिप्रयोगस्थले क्लृप्तपदावलीज्ञानादेवान्यत्र शब्दरचनोपपत्तौ गौरवेण च क्लृप्तवाक्यार्थज्ञानस्याहेतुत्वात्, किंच इदमसंभवि सिद्धांते वियदादिवन्नित्यशब्दस्य प्रतिप्रयोगं भिन्नाभिन्नानुपुर्वीघटितपदवाक्यभेदेपि स्वरूपेण तज्जन्यत्वाभावात् ॥

म० प्र०–यत्प्रसादादियं भाति प्रभा हृदि शिखामणेः ॥
नत्वा तु तान्गुरुन्भक्तया व्याकरोमि शिखामणिम् ॥ १ ॥

उपमानानंतरमागममेव निरूणीयत्वेन समर्थयति (उपमानानंतरमिति) केचित्—चिंतामणिकाराःशुक्तिरजतादिविषयकेदं रजतमित्यादिशब्देऽतिव्याप्तिवारणाय यथार्थेति, यथार्थविशेषणज्ञानजन्यविशिष्टबुद्धावतिव्याप्तिवारणाय वाक्यार्थेति, घटमानयेति वाक्ये पटमानयेति वाक्यार्थज्ञानजन्यत्वाभावाच्चालनीन्यायेनासंभववारणाय स्वसमानविषयेति, वाक्याविषयाभिन्नविषयकेति तदर्थः । स्वसमानविषयवाक्यार्थविवयकयथार्थानुभवजन्यवाक्यार्थविषयकस्मृतावतिव्याप्तिवारणाय स्वसमानविषयवाक्यार्थयथार्थज्ञानत्वेन जन्यत्वं विवक्षणीयमिति स्मृतौ नातिव्याप्तिरिति, कारणद्वारकम्–स्वसमानविषयकवाक्यार्थयथार्थज्ञानघटकम् । एतत्–उक्तलक्षणम्, सारं–सम्यक्, तद्वाक्यार्थविषयम्–शुकादिवाक्यार्थविषयम्, तत्र–तदाशुकादिवाक्योच्चारणपूर्वकाले इति यावत् । तथापि–ईश्वरांगीकर्तृमतेऽतिव्याप्त्यभावेपि, शुकादिप्रयोगस्थले–शुकादिसंबंधिप्रयुज्यमानवाक्यस्वरूपे शुकादिसंबंधिवाक्योच्चारणपूर्वकाले इति वा, क्लृप्तपदावलीज्ञानादेव–वाक्यकारणत्वेन निश्चितपदसमुदायज्ञानादेव, अन्यत्र–विज्ञपुरुषेपिशब्दरचनोपपत्तौ–शब्दोत्पत्तिसंभवे शब्दोच्चारणसंभवे इतिवा (वक्रिति) विज्ञवाक्यवक्तृपुरुषेत्यर्थः । अहेतुत्वात्–प्रमाणशब्दनिरूपितकारणत्वाभावात् । इदं–उक्तप्रमाणशब्दलक्षणं, प्रतिप्रयोगं प्रतिवाक्यम्, तज्जन्यत्वाभावात्–वाक्यार्थज्ञानजन्यत्वाभावात् ॥

Funding by IKS-MoE

मू०--यस्य वाक्यस्य तात्पर्य्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम् ॥

शि० म०–नचानुपूर्वीविशिष्टतया जन्यत्वं घटज्ञानानंतरज्ञानविषयत्वरूपायास्तदुच्चारणानंतरोच्चारणविषयत्वलक्षणाया वाऽऽनुपूर्व्या उपाधित्वेनानादितया वाक्यार्थज्ञानाजन्यत्वात् । ततश्च कारणद्वारकं प्रमाणशब्दलक्षणं न युक्तमित्यभिसंधाय प्रकारांतरेण लक्षणमाह (यस्येति) मानान्तराबाधिततात्पर्य्यविषयीभूतपदार्थसंसर्गबोधकत्वं यस्य वाक्यस्य तद्वाक्यं प्रमाणशब्द इत्यर्थः । शब्दसमानार्थके प्रमाणांतरे प्रमाणशब्दलक्षणं मा प्रसांक्षीदिति वाक्यस्येत्युक्तं पदार्थसंसर्गबोधकवाक्यत्वस्याग्निना सिंचेदित्ययोग्यवाक्येपि गतत्वादबाधितेतिसंसर्गविशेषणं ब्रह्मपरवाक्यातिरिक्तसकलवाक्येषु स्वार्थसंसर्गस्य नेहनानास्तीत्यादिना बाधितत्वादव्याप्तिरित्यत उक्तं मानांतरेति । सजातीयमानान्तरेणेत्यर्थः । तथाच पारमार्थिकतत्त्वावेदकैर्वेदांतैर्घटानयनादिसंसर्गस्य यागस्वर्गादिसाध्यसाधनभावस्य च बाधेपि सजातीयैर्व्यावहारिकतत्त्वावेदकैः प्रमाणांतरैर्बाधाभावान्नाव्याप्तिः ॥

म०प्र०–आनुपूर्वीविशिष्टतया–वाक्यार्थज्ञानजन्यानुपूर्वीयुक्तत्वेन । जन्यत्वम्–शब्दप्रमाणस्य वाक्यार्थज्ञानजन्यत्वम् (घटज्ञानानंतरेति) अम्पदांतघटपदोत्तरमानयपदमिति घटपदज्ञानानंतरज्ञानविषयत्वरूपाया इत्यर्थः (तदुच्चारणेति) द्वितीयांतघटपदोच्चारणानंतरानयपदोच्चारणविषयत्वलक्षणाया इत्यर्थः -(उपाधित्वेनेति) जातिरूपसामान्यस्यानादित्ववदुपाधिरूपसामान्यस्याप्यनादित्वमिति भावः । ततश्च–स्वसमानविषयवाक्यार्थयथार्थज्ञानजन्यत्वाभावादेव । बोधकत्वमित्यस्यबोधकत्वे सतीत्यर्थः । यस्यवाक्यस्येत्यस्य तु वाक्यत्वमित्यर्थः । इत्यभिप्रेत्यस्वनिष्कृष्टलक्षणस्य कृत्यमाह (शब्दसमानार्थके इतिं) शब्दविषयाभिन्नविषयके इत्यर्थः । प्रमाणांतरे–प्रत्यक्षादौ । मा प्रसांक्षीत्–अतिप्रसक्तोमाभवेत् । सजातीयमानांतरेण–व्यावहारिकतत्त्वावेदकत्वेन साजात्यवन्मानांतरेण । तथाच–सजातीयमानांतरार्थकमानांतरशब्दादानेसति, सजातीयैः–व्यावहारिकतत्त्वावेदकत्वेन सजातीयैः ॥

शि० म०–अर्थवादवाक्ये 'स प्रजापतिरात्मनो वपामुदखिदत्' इत्यादौ श्रूयमाणपदार्थसंसर्गस्य व्यवहारदशायामपि बाधात्तात्पर्य्यविषयेत्युक्तम् । यद्वा योग्यशब्दत्वमिह प्रमाणलक्षणं, योग्यत्वंच तात्पर्य्यविषयसंसर्गाऽबाधः प्रमास्वरूपयोग्यशब्दमात्रस्य लक्षणत्वादनासन्नादौ नाति-

Funding by IKS-MoE

प्रसंगः । अथवा तात्पर्य्यविषयाबाधितसंसर्गगोचरशाब्दज्ञानजनकत्वं लक्षणम् । शाब्दज्ञानं च पदज्ञानत्वेन पदज्ञानजन्यं तात्पर्य्यज्ञानत्वेन तात्पर्यज्ञानजन्यंवा तात्पर्य्यज्ञानकारणत्वं चाकरे स्फुटम् । वैशेषिकास्तु शब्दो न पृथक् प्रमाणमनुमानेनैव तदर्थसिद्धेः । तथाहि लौकिकानि गांमानयेत्यादीनि वैदिकानि च "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादीनि तात्पर्य्यविषयपदार्थसंसर्गप्रमापूर्वकाणि आकांक्षायोग्यतासत्तिमत्पदकदंवत्वात्पटमानयेत्यादिवाक्यवत एते पदार्थास्तात्पर्य्यविषयमिथःसंसर्गवंतः योग्यपदस्मारितत्वात्संप्रतिपन्नवत् । नच शब्द एव संसर्गप्रतीतिं जनयतु अविशेषादिति वाच्यम्, अनुमानस्य क्लृप्तप्रमाणभावतया तस्यैव करणत्वौचित्यात् । तस्मादनुमानविधया प्रमाणं, न स्वातंत्र्येणेति ॥

म०प्र०–सः–यजमानः, प्रजापतिः–भाविप्रजापतित्ववान्, आत्मनः–स्वस्य, वपां त्वचम्, उदखिदत्–शरीराद्विभक्तवान् तथाच यजमानकर्तृकवपाकर्मकनिस्सारणमित्यर्थः । पशुयागे हि तूवरोऽश्मश्रुपुरुषेऽपोढश्रृंगानडुह्यपीतिहेमचंद्रकोशादजातश्रृंगतुवरपशुवपानिष्कासनस्य वेदविहितस्य यजमानवपानिष्कासने आरोपद्वारा तूवरपशुवपायामेतादृशी तूवरवपा भवति यस्याः निःसारणेन यजमानवपायानिःसारणं भवतीतिप्राशस्त्यं सप्रजापतिरित्यादिवाक्येन बोध्यते इतिभावः (बाधादिति) अव्याप्तिरितिशेषः (तात्पर्यविषयेत्युक्तमिति) सप्रजापतिरित्यादिवाक्येऽव्याप्तिवारणाय तात्पर्य्यविषयेत्युक्तमित्यर्थः । तात्पर्य्यविषयेत्युक्ते हि यजमानवपाया निःसारणे सप्रजापतिरित्यादिवाक्यस्य तात्पर्य्यं नास्ति किन्तु तूवरपशुवपाप्राशस्त्ये इति नाव्याप्तिरिति भावः । प्रमाणलक्षणं–प्रमाणशब्दलक्षणम्, नन्वासत्त्याकांक्षाशून्यशब्दस्यापि प्रत्यक्षयोग्यशब्दत्वादनासन्नशब्दादावतिव्याप्तिरित्याशंक्याह (योग्यत्वंचेति.) शब्दनिष्ठयोग्यत्वं चेत्यर्थः । तात्पर्यविषयसंसर्गाबाधः स्वबोधकतासंबंधेन तात्पर्य्यविषयसंसर्गवत्त्वं तात्पर्य्यविषयसंसर्गविषयकबोधजनकत्वं वा । ननु शब्दनिष्ठैतादृशयोग्यताकिमित्याश्रीयते इत्याशंक्याह (प्रमास्वरूपयोग्यशब्दमात्रस्येति) प्रमास्वरूपनिष्ठजन्यतानिरूपितजनकतावच्छेदका सत्यादिमच्छब्दत्वस्यैव, लक्षणत्वात्–प्रमाणशब्दलक्षणत्वाद् अनासन्नादावासत्तिशून्यवाक्यादावित्यर्थः (पदज्ञानत्वेनेति) तेन पदज्ञानस्य विषयविधया स्वप्रत्यक्षजनकत्वेपि नातिव्याप्तिरिति भावः ।आकरे–भाष्ये। वैशेषिकाः–कणादमतानुसारिणः । तदर्थसिद्धेः–शब्दप्रमाणस्य पदार्थसंसर्गज्ञानरूपप्रयोजनसिद्धेः, संप्रतिपन्नवत्–घटमानयेतिवाक्यवत्–अविशेषात्–प्रमाणत्वेन तुल्यत्वात् । अनुमानविधयाउक्तानुमानकल्पनाद्वारा, स्वातंत्र्येण–शब्दत्वेन ॥

Funding by IKS-MoE

मू०–वाक्यजन्ये च ज्ञाने आकांक्षायोग्यताऽऽसत्तयस्तात्पर्य्यज्ञानं चेति चत्वारि कारणानि ॥

शि० म०–तन्निराकरोति (आकांक्षेति) वाक्यजन्यज्ञाने आकांक्षायोग्यतासत्तयः कारणानीति अतोवाक्यंपृथक्प्रमाणमित्यर्थः । तथाच यादृशज्ञाने योग्यतादेःसहकारित्वं तादृशं क्लृप्तविज्ञानविजातीयं सिद्धमिति तदवच्छिन्नज्ञानजनकमानस्य मानांतरत्वमास्थेयम् । अन्यथा शब्दप्रामाण्यप्रद्वेषिमते योग्यतादेः सर्वसिद्धं सहकारित्वं भज्येतेति भावः । नन्वस्त्येवाकांक्षादिघटितलिंगजन्यसंसर्गानुमितौ आकांक्षादेरुपयोगः । लिंगांतरजन्यानुमितौ तु जिज्ञासालक्षणाकांक्षायास्सिषाधयिषाविरहसहकृतसिद्ध्यभावरूपपक्षतासंपादनद्वारा अन्वयबोधाभावलक्षणायाश्च पक्षतात्वेन वाक्यार्थपर्य्यवसन्नयोग्यताज्ञानस्याबाधितत्वज्ञानत्वेन पदार्थस्मृतिरूपाया आसत्तेर्विशेषणज्ञानत्वेन पक्षज्ञानत्वेन वा उपयोगः । ततश्च न विजातीयज्ञानसिद्धिरित्यपरितोषादाह (तात्पर्य्यज्ञानमिति) नहितात्पर्य्यज्ञानस्यापि कथंचिदनुमितावुपयोगः । अनुमितित्वावच्छेदेनाहेतुत्वात् ॥

म० प्र०–तत्–वैशेषिकोक्तम्, यादृशज्ञाने–शाब्दत्वविशिष्टे, सहकारित्वं–सहकारिकारणत्वम् (तदवच्छिन्नेति) शाब्दत्वावच्छिन्नेत्यर्थः । अन्यथा–शाब्दत्वावच्छिन्नज्ञानजनकमानस्यमानांतरत्वानंगीकारे । लिंगांतरजन्यानुमितौ–आकांक्षाद्यघटितधूमादिजन्यपर्वतो वह्निमानित्याद्यनुमितौ परममूलोक्ताकांक्षामभ्युपगम्याह (जिज्ञासेति) नच परममूलोक्ताजिज्ञासाविषयत्वयोग्यत्वमाकांक्षा नतु जिज्ञासाकांक्षा परममूलोक्तेति वाच्यम् । जिज्ञासाया मूलोक्ताकांक्षाघटकत्वाज्जिज्ञासायामप्युपचारेणाकांक्षाव्यवहाराजिज्ञासासिषाधयिषेत्युभयोः पदयोरेकार्थकत्वेन सिषाधयिषाविरहसहकृतसिद्ध्यभावरूपपक्षतासंपादनद्वारोपयोग इतिभावः (द्वारेति) सर्वेषां तृतीयांतानामुपयोग इत्यनेनान्वयः । पदस्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकांक्षेति जरन्नैयायिकोक्ताकांक्षामभ्युपगम्योपयोगमाह (अन्वयबोधाभावलक्षणायाश्चेति) सिद्ध्यभावान्वयबोधाभावशब्दयोरेकार्थकत्वेनान्वयबोधाभावरूपाकांक्षायाः पक्षतात्वेनोपयोगं इतिभावः (वाक्यार्थपर्य्यवसन्नयोग्यताज्ञानस्येति) बाधनिश्चयाभावो योग्यतेति नवीनमते योग्यताया वाक्यार्थपर्य्यवसन्नत्वाभावेनैकपदार्थेऽपरपदार्थवत्त्वं योग्यतेति प्राचीनमते वाक्यार्थरूपयोग्यताज्ञानस्येत्यर्थः (अबाधितत्वज्ञानत्वेनेति) पक्षधर्मत्वं सपक्षसत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेतिं पंचरूपोपपन्नान्वय-

व्यतिरेकिहेतोः स्वसाध्यं साधयितुं क्षमत्वेन हेतोरबाधितत्वज्ञानस्याव्यपेक्षितत्वेनाबाधितत्वज्ञानत्वेन योग्यताज्ञानस्योपयोग इतिभावः । अनुमितित्वावच्छेदेनाहेतुत्वात्–तात्पर्यविशेषितसाध्यकायां यस्यां कस्यांचिदनुमितौ तात्पर्य्यज्ञानस्य हेतुत्वेऽप्यनुमितित्वावच्छिन्नानुमितौ तात्पर्य्यज्ञानस्य कारणताया अभावात् ॥

मू०–तत्र पदार्थानांपरस्परजिज्ञासाविषयत्वयोग्यत्वमाकांक्षा क्रियाश्रवणे कारकस्य तस्य श्रवणेक्रियायाः करणश्रवणे इतिकर्त्तव्यतायाश्च जिज्ञासाविषयत्वात् ॥

शि०म०–नच तात्पर्य्यविशेषितसाध्यानुमितित्वावच्छेदेन विशेषणज्ञानत्वेन हेतुत्वमिति युक्तम् । तथापि तदविशेषितसाध्यानुमितेस्तात्पर्य्यज्ञानाजन्यत्वेन तस्य शब्दसहकारिताभंगप्रसंगात् । किंच असत्यपि व्याप्तिज्ञाने सत्स्वाकांक्षादिषु चतुर्षु कारणेषु संसर्गज्ञानस्यानुभवसिद्धत्वान्नशब्दस्यानुमानेऽन्तर्भावः । अपिच यदि शब्दप्रामाण्ये अवश्यं प्रद्वेषः तर्ह्यनुमानमपि पृथक्प्रमाणं न स्यात् तत्रापि क्लृप्तप्रमाणभावस्य मन आदेः प्रत्यक्षस्य प्रमाणत्वौचित्यात् । यदि च तत्र साक्षात्करोमीत्यनुव्यवसायाभावादनुमिनोमीत्यनुव्यवसायाच्च पृथक् प्रमाणमनुमानमिति मतं तदा शब्दादमुमर्थं प्रत्येमीत्यनुव्यवसायात्सोपि पृथगिति तुल्यम् । तस्मात्सर्वेपि लौकिका वैदिकाःशब्दाःस्वातन्त्र्येण प्रमाणमिति संक्षेपः । आकांक्षादिकं शाब्दज्ञानेऽसाधारणकारणमित्युक्तं तत्र प्रथमनिर्दिष्टत्वेन प्रथमं शिष्यजिज्ञासिताकांक्षां निरूपयति (तत्रेति) ननु कदाचिज्जिज्ञासाविषयत्वे हि तद्बलेन योग्यत्वं कल्पेत तदेव कुत इत्याशंक्य क्रियावाक्येतावत्तदुपपादयति (क्रियाश्रवणेइति) इतिकर्तव्यताया इति अंगस्येत्यर्थः ॥

म० प्र०–तात्पर्य्यविशेषितसाध्यानुमितित्वावच्छेदेन–लौकिकानि गामानयेत्यादीनि वैदिकानि च ज्योतिष्टोमेन स्वर्गकामोयजेतेत्यादीनि पदानि तात्पर्य्यविषयपदार्थसंसर्गप्रमापूर्वकाणीत्यादितात्पर्य्यनिष्ठविशेषणतानिरूपितविशेष्यतावत्साध्यकानुमितित्वावच्छेदेन, तस्य–तात्पर्य्यज्ञानस्य । शब्दसहकारिताभंगप्रसंगात्–शब्दजन्यत्वे सति शब्दजन्यज्ञानजनकत्वरूपशब्दसहकारितानाशप्रसंगात् । तत्रापि–व्याप्तिज्ञानजन्यवह्न्यादिविषयकज्ञानेपि । प्रत्यक्षस्य–प्रत्यक्षप्रमाणस्य । तत्र–वह्न्यादौ व्याप्तिज्ञानजन्यवह्न्यादिविषयकज्ञानेवा । तत्र–आकांक्षादिचतुर्षु मध्ये । परममूले (पदार्थानामिति) इदं हि वाक्यार्थानामित्यस्याप्युपलक्षणं तथाचांगप्रधानवाक्यार्थेषु नाव्याप्तिरिति, तद्बलेन–योग्यतां विना पदार्थेषु जिज्ञासाविषयत्वानुपपत्त्या, तदेव–

Funding by IKS-MoE

जिज्ञासाविषयत्वमेव । परममूले (क्रियाश्रवणइति) आनयेति क्रियायाः वाचकशब्दश्रवणेघटादिकर्मकारकस्य जिज्ञासाविषयत्वं घटमिति कर्मकारकबोधकशब्दश्रवणे आनयनादिक्रियायाजिज्ञासाविषयत्वं "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इतिस्वर्गकरणबोधकशब्दश्रवणे प्रयाजाद्यंगस्य जिज्ञासाविषयत्वमित्यर्थः । परममूले (जिज्ञासांविषयत्वादिति) जिज्ञासाविषयत्वरूपफलोपलंभाज्जिज्ञासांविषयत्वयोग्यत्वं भवतीति भावः ॥

मू०--अजिज्ञासोरपिवाक्यार्थबोधाद्योग्यत्वमुपात्तम् । तदवच्छेदकंच क्रियात्वकारकत्वादिकामितिनातिव्याप्तिः । गौरश्वःपुरुषो हस्तीत्यादौ अभेदान्वयेचसमानविभक्तिकपदप्रतिपाद्यत्वं तदवच्छेदकमितितत्त्वमस्यादिवाक्येषुनाव्याप्तिः ॥

शि० म०—ननु जिज्ञासाविषयत्वमेवाकांक्षास्तु लाघवादावश्यकत्वाच्चेत्यत आह (अजिज्ञासोरिति) ननु जिज्ञासाविषयत्वयोग्यत्वमवच्छेदकापरिचयेदुर्ग्रहमित्यत आह (तदवच्छेदकमिति) नन्वस्त्वाकांक्षालोकवेदयोः क्रियापदेषु घटमानयेत्यादिषु 'समिधो यजति' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिषुचांगप्रधानवाक्येषु तत्रक्रियाकर्मकरणेतिकर्त्तव्यतात्वानां जिज्ञासाविषयत्वयोग्यत्वावच्छेदकानां सत्त्वात् । तथापि तद्रहितेषु नीलो घटो नीलमुत्पलं तत्त्वमसि अहं ब्रह्मास्मि अयमात्मा इत्यादिषु सिद्धार्थवाक्येषु कथमाकांक्षेत्यत आह (अभेदान्वयेचेति) अभेदान्वयप्रतियोगिनी तत्त्वंपदार्थादावित्यर्थः । नचैवमननुगमः ॥

म०प्र०—परममूले (अजिज्ञासोरपीति) तथाच वाक्यार्थज्ञाने जिज्ञासारहितपुरुषस्य वाक्यजन्यज्ञानेपदार्थानां परस्परजिज्ञासाविषयत्वाभावेपि तद्योग्यतासत्त्वान्नाव्याप्तिरितिभावः । अवच्छेदकापरिचये—जिज्ञासाविषयत्वयोग्यतावच्छेदकाज्ञाने सति (दुर्ग्रहमिति) पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यतावच्छेदकस्य ज्ञाने तु पदार्थानां परस्परजिज्ञासाविषयत्वयोग्यत्वस्यापिक्वचिद्घटमानयेत्यादिवाक्ये पदार्थाः परस्परजिज्ञासाविषयत्वयोग्यत्ववंतः क्रियात्वाद्यन्यतमत्वात्पटमानयेतिवाक्यघटकपदार्थवदित्यनुमानात्क्वचिदाप्तवाक्याज्ज्ञानं भवत्यतो जिज्ञासाविषयतायोग्यतावच्छेदकमवश्यं वाच्यमिति भावः । क्रियापदेषु—घटमानयेत्यादिषु । घटमानयेत्यादिवाक्यघटकक्रियापदार्थेषु । वाक्येषु—वाक्यार्थेषु । तत्र—पदार्थेषु वाक्यार्थेषुच । तद्रहितेषु—क्रियात्वादिरहितेषु सिद्धार्थवाक्येषु—सिद्धार्थवाक्यघटकपदार्थेषु । परममूले (तदवच्छेदकमिति)

Funding by IKS-MoE

पदार्थानांपरस्परजिज्ञासाविषयत्वयोग्यतावच्छेदकमित्यर्थः । परममूले वाक्येषु–वाक्यघटकपदार्थेषु । परममूले (नाव्याप्तिरिति) नच गोपुरुषहस्त्यादिपदार्थेषुसमानविभक्तिकपदप्रतिपाद्यत्वरूपजिज्ञासाविषयत्वयोग्यतावच्छेदकसत्त्वेन गौरश्वः. पुरुषोहस्तीत्यादिवाक्यादपि गोऽश्वाद्यभेदविषयकशाब्दबोधः स्यादिति वाच्यम् । गवाद्यभेदस्य बाधितत्वेन गवाद्यभेदे योग्यताया अभावादिति । एवम्–नानाविधानां क्रियात्वकारकत्वादीनां जिज्ञासाविषयत्वयोग्यतावच्छेदकत्वे सति (अननुगमइति) जिज्ञासाविषयत्वयोग्यतावच्छेदकस्यैकविधत्वाभावइत्यर्थः । तथाच क्रियात्वादिरूपजिज्ञासाविषयत्वयोग्यतावच्छेदकानामनेकविधत्वेन जिज्ञासाविषयत्वयोग्यतारूपाकांक्षाज्ञानं प्रति क्रियात्वकारकत्वसमानविभक्तिकपदप्रतिपाद्यत्वज्ञानानामेकधर्मत्वेन कारणत्वं न स्यात्। नच जिज्ञासाविषयत्वयोग्यत्वरूपाकांक्षाज्ञाने क्रियात्वादीनां क्रियात्वाद्यन्यतमत्वेन हेतुत्वमिति वाच्यम् । अन्यतमत्वस्य निराकृतत्वादिति भावः ॥

मू०–एतादृशाकांक्षाभिप्रायेणैव बलाबलाधिकरणे सा वैश्वदेव्याऽऽमिक्षा वाजिभ्यो वाजिनमित्यत्र वैश्वदेवयागस्यामिक्षान्वितत्वेन न वाजिनाकांक्षेत्यादिव्यवहारः ॥

शि० म०–अवच्छेदकाननुगमेपि वह्निजन्यत्वादिवत्तदवच्छेद्ययोग्यत्वलक्षणाकांक्षाया अनुगतत्वात् । नन्वन्वयबोधाभाव एवाकांक्षा तस्याः प्रागभावरूपतया शाब्दज्ञानकारणत्वेन क्लृप्तत्वादित्यत आह (एतादृशेति । बलाबलाधिकरणइति) तृतीये स्थितं श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां-समवाये पारदौर्बल्यमर्थविप्रकर्षात् । अत्र श्रुत्यादीनामेकविषयत्वसमवायेन विरोधे सति बलाबलं विचार्य्यते तत्र श्रुतिवाक्यविरोधोदाहरणं ‘ तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्योवाजिनम् ’ इति ॥

म० प्र०–अवच्छेदकाननुगमेपि–जिज्ञासाविषयत्वयोग्यतावच्छेदकानामनेकविधत्वेपि (वह्निजन्यत्वादिवादिति) तृणजन्यत्वविशिष्टवह्निं प्रति तृणत्वेन कारणत्वमरणिनिर्मथनजन्यत्वविशिष्टवह्निं प्रत्यरणिनिर्मथनत्वेन कारणत्वं मणितरणिकिरणसंयोगजन्यत्वविशिष्टवह्निं प्रति मणितरणिकिरणसंयोगत्वेन कारणत्वमिति तृणत्वारणिनिर्मथनत्वमणितरणिकिरणसंयोगत्वादीनां वह्निकारणतावच्छेदकानां नानात्वेपि वह्निनिष्ठजन्यताया एकरूपत्ववदित्यर्थः । तस्याः–अन्वयबोधाभावरूपाकांक्षायाः, तृतीये–पूर्वमीमांसातृतीयाध्यायतृतीयपादे (समवायेइति) श्रुत्यादीनां मध्येद्वयोः समानविषयत्वेन विरोधे सति परस्यदौर्बल्यं कुत इत्याशंक्याह (अर्थविप्रकर्षादिति) परस्य स्वार्थबोधने पूर्वव्यवधानेन प्रवृत्तेरित्यर्थः । अयं भावः । एक-

त्रविनियुक्तस्य निराकांक्षत्वादन्यत्रविनियोगोऽनुपपन्न एव परंतु विनियोजकप्रमाणयोः समबलत्वेऽन्यत्रविनियोगत्यागायोगादगत्याऽऽकांक्षोत्पादनेन विनियुक्तस्य विनियोगः स्वीक्रियते यथा खादिरो यूपो भवतीति वाक्येन क्रतौ विनियुक्तस्य खादिरत्वस्य खादिरं वीर्य्यकामस्येति वाक्येन फले निनियोगः, यत्र तु प्रमाणयोरतुल्यबलत्वं तत्राकांक्षोत्पादनेन विनियुक्तविनियोगो न स्वीक्रियते । यथा कदाचंनस्तरीरसि नेन्द्रसश्चसि दासुषे इत्यस्यार्क्चऐंद्र्यागार्हपत्यमुपतिष्ठते इत्यत्र द्वितीयाश्रुत्या स्वान्यप्रमाणनिरपेक्षया गार्हपत्योपस्थानशेषत्वबोधकया इन्द्रप्रकाशनसामर्थ्यरूपलिंगप्राप्तमिंद्रशेषत्वं बाध्यते इति, अत्र—श्रुतिलिंगेत्यादिसूत्रे एकविषयत्वसमवायेन—एकविषयत्वाभिन्नसंबंधेन, तत्र—प्रमाणानां विरोधोदाहरणेषु मध्ये, पयसि—दुग्धे, आनयति—आनयेत्प्रक्षिपेत् तप्तदुग्धं दधिसंसृष्टं कुर्य्यादिति यावत्, सेति—तप्ते पयसि दधिप्रक्षेपेण घनीभूतो भाग आमिक्षेत्युच्यते परिशिष्टजलांशो वाजिनशब्दवाच्यः सा आमिक्षाविश्वदेवदेवताका वाजिनं तु वाजिसंज्ञकदेवेभ्यो देयमित्यर्थः ॥

शि० म०—तत्र संदेहः किं वाजिनस्य विश्वदेवशेषत्वमुत वाजिनामकदेवतांतरशेषत्वमिति किं तावत्प्राप्तं विश्वदेवशेषत्वमिति कुतः वाजिभ्यो वाजिनमितिवाक्याद्वाजिनस्य विश्वदेवांगत्वावगमात् । नच वाजिभ्य इति देवतांतरश्रवणात्कथमस्य विश्वदेवसंबंध इति वाच्यम्, वाजमन्नमामिक्षा तदेषामस्तीति व्युत्पत्त्या वाजिशब्दस्य तत्संबंधिविश्वदेवप्रतिपादकत्वात्। नचामिक्षाया एव श्रुत्यादेवतासंबंधो न वाजिनस्य तस्य दुर्बलप्रमाणवाक्यगम्यत्वादिति वाच्यम्, वैश्वदेवीपदस्यामिक्षापदसापेक्षत्वेन तस्यापि वाक्यगम्यत्वात् अस्तुवा आमिक्षासंबधस्य श्रौतत्वं तथापि न वाजिनबाधः श्रुतिवाक्ययोः शब्दत्वाविशेषेण तुल्यबलत्वात् । तस्मान्नामिक्षया वाजिनबाधः किंतु तया सह विकल्पः समुच्चयो वेति । एवं प्राप्ते राद्धांतः—विश्वेषां देवानामामिक्षयैव संबंधः युक्तस्तस्याः वैश्वदेवीतितद्धितश्रुत्यवगम्यत्वात् । नचामिक्षापदसापेक्षत्वाद्वाक्यगम्यत्वं तद्धितस्यास्या इति सर्वनामार्थे स्मरणेन तस्यामिक्षावाचकत्वात् । नचैवमामिक्षापदवैयर्थ्यं सन्निहितार्थावलंबिनोस्येति सर्वनाम्नः कोर्थ इत्याकांक्षायां विशेषसमर्पकत्वात्। अत एवायं घट इत्यत्रायमिति पदस्य विशेषसमर्पकघटपदापेक्षायामपि न श्रुतित्वहानिः । नच वाजिनपदं विशेषसमर्पकं येनामिक्षावाजिनयोस्तुल्योदेवतासंबंधः । किंच न वाजिपदाद्विश्वदेवोप-

Funding by IKS-MoE

स्थितिः तस्याश्चेरूढत्वात् । अपिच न वाजिनस्य विश्वदेवैः संबंधः । तत्र ह्यामिक्षायां निरपेक्षसाधनत्वान्न समुच्चयः, नापि विकल्पः ॥

म० प्र०—तत्र—सावैश्वदेव्यामिक्षेत्यादिवाक्ये । वाजिनस्य—परिशिष्टजलस्य, वाजिभ्योवाजिनमितिवाक्यात्—सावैश्वदेव्यामिक्षावाजिभ्यो वाजिनमित्यनयोः समभिव्याहाररूपवाक्यात् (वाजमिति) वाजमित्यस्य विवरणमन्नमन्नमित्यस्य विवरणमामिक्षेति (तत्संबंधीति) आमिक्षासंबंधीत्यर्थः । श्रुत्या—तद्धितश्रुत्या । देवतासंबंधः—विश्वदेवसंबंधः । तस्य—वाजिनसंबंधस्य, तस्यापि—आमिक्षासंबंधस्यापि नवाजिनबाधइति) वाजिनद्रव्यस्यविश्वदेवैः संबंधस्यामिक्षयाबाधोऽभावोनेत्यर्थः । तया—आमिक्षया । विकल्पः—वाजिनस्य विकल्पः । तस्याः—आमिक्षायाः । वैश्वदेवीतितद्धितश्रुत्यवगम्यत्वात्—वैश्वदेवीशब्दघटकाणूरूपतद्धितश्रुत्यवगमात् (सापेक्षवादिति) तद्धितश्रुतेरिति शेषः (वाक्यगम्यत्वमिति) वैश्वदेवयागे विश्वदेवामिक्षासंबंधस्य वाक्यगम्यत्वं न केवलं श्रुतिगम्यत्वं श्रुतेरामिक्षापदसापेक्षत्वेन निरपेक्षत्वाभावादिति भावः । स्मरणेन सास्यदेवतेति पाणिनिस्मृत्याज्ञातत्वेन । तस्य—तद्धितस्य (आमिक्षावाचकत्वादिति) तद्धितश्रुतेरामिक्षापदसापेक्षत्वं नेति भावः । अतएव—श्रुतेः स्वप्रामाण्यायेतरापेक्षाभावादेव, न श्रुतित्वहानिः—स्वप्रामाण्यायेतरापेक्षाभाववत्त्वश्रुतित्वाभावो नास्ति यत्र स्वप्रामाण्यायेतरसापेक्षत्वं तत्र श्रुतित्वहानिरिति भावः । एकस्मिन्यागे उभयोर्द्रव्ययोः संबंधः समुच्चयेन विकल्पेनवा वाच्य उभयमप्यत्र नास्तीत्याह (तत्रेति) वैश्वदेवयागे इत्यर्थः (नसमुच्चयइति) वैश्वदेवयागे वाजिनस्य समुच्चयो नास्ति विकल्पश्च नास्तीत्यर्थः ॥

मू०—ननु तत्रापि वाजिनस्य जिज्ञासाऽविषयत्वेपि तद्योग्यत्वमस्त्येव प्रदेयद्रव्यत्वस्य यागनिरूपितजिज्ञासाविषयतायोग्यतावच्छेकत्वादिति चेत् ॥

शि०म०—तस्याष्टदोषदुष्टत्वात्। ततश्च विश्वेषां देवानां श्रुत्यवगतामिक्षावरुद्धत्वेन नैराकांक्षत्वान्न वाक्येन वाजिनसंबंधः । तदुक्तंभट्टपादैः

श्रुत्यामिक्षैव शेषो हि नैषां वाक्येन वाजिनम् ॥
तद्दुर्बलप्रमाणत्वात्तया श्रुत्या निराकृतम् ॥

इति प्रदेयद्रव्यत्वं यागनिरूपितजिज्ञासाविषयत्वयोग्यतावच्छेदकं तच्चामिक्षावद्वाजिनेप्यविशिष्टमिति कथं नैराकांक्ष्यमिति चोदयति (नन्विति) नहि प्रदेयद्रव्यत्वं तदवच्छेदकं जनितान्वयबोधादपि वाक्यात्पुनरन्वयबोधापत्तेः, किंतु स्वसमभिव्याहृतपदस्मारितपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वम् ॥

Funding by IKS-MoE

म०प्र०—तस्य—विकल्पस्य (अष्टदोषदुष्टत्वादिति) यदा आमिक्षाया विश्वदेवैःसह संबंधस्तदा वाजिशास्त्रे स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यप्रयोजकनिर्दोषत्वादौ सत्यपि प्रामाण्यपरित्याग एकोदोषः स्वार्थाननुष्ठापकत्वलक्षणप्रामाण्याभावप्रयोजकदोषेचासत्यपि प्रामाण्याभावाभ्युपगम इति द्वितीयो दोषः । पुनश्च यदा वाजिनस्य विश्वदेवैः सह संबंधस्तदामिक्षाशास्त्रे वाजिशास्त्रोक्तदोषद्वयं वाजिशास्त्रेतु परित्यक्तप्रामाण्याभ्युपगमः स्वीकृताप्रामाण्यपरित्यागश्चेति द्वौ दोषौ एवं प्रयोगद्वयेन वाजिशास्त्रे चत्वारो दोषा आमिक्षाशास्त्रे दोषद्वयम् ।पुनश्च यदा विश्वदेवैरामिक्षासंबंधस्तदामिक्षाशास्त्रेपरित्यक्तप्रामाण्याभ्युपगमः स्वीकृताप्रामाण्यपरित्यागश्चेति दोषद्वयमेवं प्रयोगत्रयेण शास्त्रेषु विकल्पस्याष्टदोषापादकत्वादित्यर्थः । श्रुत्यवगताभिक्षावरुद्धत्वेन—तद्धितश्रुत्यवगतामिक्षासंबन्धेन । श्रुत्येति—तद्धितश्रुत्यवगतामिक्षैवैषां विश्वेषां देवानां शेषो भोगसाधनं वाक्यप्रमाणेन वाजिनमेषांनशेषः । ननु वाजिनद्रव्यस्य विश्वदेवैः सह संबंधः कुतो न भवतीत्याशंक्य हेतुगर्भितवाजिनविशेषणमाह (तयाश्रुत्यानिराकृतमिति) तद्धितश्रुत्या विश्वदेवैः सह वाजिनद्रव्यसंबंधस्य निराकृतत्वादित्यर्थः । तस्यनिराकृतत्वे हेतुमाह (तद्दुर्बलप्रमाणत्वादिति) श्रुत्यपेक्षया तस्य वाक्यस्य दुर्बलप्रमाणत्वादित्यर्थः । परममूले (तत्रापीति) वैश्वदेवयागेपि वाजिनद्रव्यस्य जिज्ञासाविषयत्वाभावेपि वाजिनद्रव्यस्य) जिज्ञासाविषयत्वयोग्यत्वमस्त्येवेत्यर्थः । परममूले (अवच्छेदकत्वादिति) तथाच वैश्वदेवयागस्य साकांक्षत्वाद्वैश्वदेवयागे वाजिनान्वयापत्तिरिति भावः (स्वसमभिव्याहृतपदेति) आमिक्षादिपदेन सह समभिव्याहृतं सहोच्चरितं यद्वाजिनादिपदं तेनोपस्थितवाजिनादिपदार्थान्वयबोधाभावविशिष्टप्रदेयद्रव्यत्वमित्यर्थः ।

मू०—न, स्वसमानजातीयपदार्थान्वयबोधाविरहसहकृतप्रदेयद्रव्यत्वस्यैव तदवच्छेदकत्वेन वाजिनद्रव्यस्य स्वसमानजातीयान्वयबोधसहकृतत्वेन तादृशावच्छेदकत्वाभावात्, आमिक्षायां तु नैवं वाजिनान्वयस्य तदानुपस्थानात् ॥

शि० म०—तत्त्वामिक्षायामेवेति परिहरति (नस्वसमानजातीयेति) नन्वस्तु वैश्वदेवयागे प्रथममेव वाजिनान्वयबोध इत्यामिक्षैव निराकांक्षास्यादित्याशंक्य श्रौतामिक्षासंबंधात् तत्सापेक्षानंतरप्रवृत्तवाक्यप्रमाणकवाजिनान्वयस्य प्रथममनुपस्थितत्वान्नाभिक्षाया नैराकांक्ष्यमित्याह (आमिक्षायामिति) ॥

म०प्र०—(तत्त्वामिक्षायामेवेति) येन क्रमेण पाठस्तेनैव क्रमेण पदार्थोपस्थितिस्तेनैव क्रमेणान्वयबोध इति नियमसत्त्वेनामिक्षान्वयबोधकालेवैश्वदेवयागे वाजिनान्वय-

Funding by IKS-MoE

बोधाभावस्य सत्त्वेन स्वसमभिव्याहृतपदस्मारितवाजिनपदार्थान्वयबोधाभावविशिष्टद्रव्यत्वमामिक्षायामेव नतुवाजिने उक्तनियमाद्वैश्वदेवयागे वाजिनान्वयबोधकाले आमिक्षान्वयबोधस्य सत्त्वेन वाजिनद्रव्ये स्वसमभिव्याहृतामिक्षापदस्मारितामिक्षापदार्थान्वयबोधाविरहविशिष्टप्रदेयद्रव्यत्वाभावादिति भावः। परममूले (वाजिनद्रव्यस्येति) वाजिनद्रव्यस्य, स्वं—वाजिनं तस्य समानजातीयः प्रदेयद्रव्यत्वेनसदृशामिक्षापदार्थस्तस्य यो वैश्वदेवयागेऽन्वयबोधस्तद्विशिष्टत्वेन तादृशस्य वाजिनद्रव्यनिष्ठप्रदेयद्रव्यत्वस्य जिज्ञासाविषयत्वयोग्यतावच्छेदकत्वाभावादित्यर्थः ननु वाजिनद्रव्यनिष्ठप्रदेयद्रव्यत्वे जिज्ञासाविषयत्वयोग्यतावच्छेदकत्वाभावः। स्वसमानजातीयान्वयबोधसहकृतत्वज्ञाप्यः कुत इत्याशंक्याह । परममूले (स्वसमानजातीयपदार्थान्वयबोधविरहसहकृतेति) स्वमामिक्षा तस्याः समानजातीयःप्रदेयद्रव्यत्वेनसदृशः पदार्थों वाजिनपदार्थस्तदन्वयबोधाभावविशिष्टप्रदेयद्रव्यत्वस्यैवतदवच्छेदकत्वेनजिज्ञासाविषयत्वयोग्यतावच्छेदकत्वेनेत्यर्थः (निराकांक्षास्यादिति) वैश्वदेवयागे वाजिनस्यान्वितत्वेनामिक्षायामेव तादृशावच्छेदकाभावः किं न स्यादिति भावः। श्रौतामिक्षासंबंधादित्यस्य प्रथममनुपस्थितत्वादित्यनेनान्वयः। (तत्सापेक्षेति) श्रुतिसापेक्षं श्रौतामिक्षसंबंधोत्तरप्रवृत्तं च यद्वाक्यं तत्प्रमाणकवाजिनान्वयस्येत्यर्थः (ननैराकांक्ष्यमिति) तथाचामिक्षायां न तादृशावच्छेदकाभावइति भावः परममूले (नैवमिति) स्वसमानजातीयान्वयबोधविशिष्टप्रदेयद्रव्यत्वंनेत्यर्थः। परममूले, तदा—प्रथमश्रुतामिक्षान्वयबोधकाले। परममूले, अनुपस्थानात्—उपस्थित्यभावात् ॥

सू०—उदाहरणांतरेष्वपि दुर्बलप्रयोजक आकांक्षाविरह एव द्रष्टव्यः ॥

शि० म०—ननु यस्य वाक्ये स्वतः प्रामाण्यबुद्ध्या प्रथमं वाजिनान्वयबोधः तदा आमिक्षायां नैराकांक्ष्यं दुर्वारमिति चेत् न, प्रमाणमूलान्वयबोधाभावसहकृतप्रदेयद्रव्यत्वस्यैवात्र जिज्ञासाविषयत्वयोग्यतावच्छेदकत्वेन विवक्षितत्वात् । एवं श्रौतामिक्षान्विते वैश्वदेवयागे वाजिनस्य निराकांक्षत्वात्। तदंगत्वबोधकस्य वाजिनवाक्यस्य दुर्बलत्वमित्युक्तं संप्रत्यन्यत्रापि तदभावप्रयुक्तमेव दौर्बल्यमित्याह (उदाहरणांतरेष्विति) ऐन्द्र्या गार्हपत्यमुपतिष्ठत इत्यादि उदाहरणांतरेष्वित्यर्थः। तत्र ह्यैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र श्रुत्या मंत्रस्य कदाचनस्तरीरासिनेन्द्रसश्चासि दाशुषे इत्यस्यगार्हपत्यांगत्वावगमे निराकांक्षत्वात् । इन्द्रशेषत्वे लिंगस्य न प्रामाण्यम् ॥

Funding by IKS-MoE

म०प्र०–यस्य–यादृशपुरुषस्य, वाक्ये–वाजिभ्यो वाजिनमिति वाक्ये, स्वतः–श्रुतिलिंगकल्पनां विनैव, प्रथमम्–आमिक्षान्वयबोधात्पूर्वकाले आमिक्षायांनैराकांक्ष्यम्–वैश्वदेवयागे वाजिनद्रव्यान्वयेन वैश्वदेवयागनिरूपितामिक्षाविषयकाकांक्षाभावः (प्रमाणमूलेति) प्रमाणमूलकस्वसमानजातीयपदार्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैवेत्यर्थः । श्रुतिकल्पनांविनैव वाक्येन वाजिनान्वयबोधः प्रमाणमूलको न भवति श्रुतिप्रमाणनिरपेक्षवाक्यस्याप्रमाणत्वादिति भावः । अत्र–मूले आमिक्षायां वा। श्रौतामिक्षान्विते–श्रौतामिक्षाऽन्विता यस्मिन्स तथा श्रौतामिक्षयान्वितः श्रौतामिक्षान्वित इति वा तस्मिन्, तदंगत्वबोधकस्य–वाजिननिष्ठवैश्वदेवयागांगत्वबोधकस्य । अन्यत्र–लिंगादिषु । तदभावप्रयुक्तमेव–आकांक्षाभावप्रयुक्तमेव । तत्र–उदाहरणांतरेषु मध्ये श्रुतिलिंगविरोधोदाहरणे । ऐंद्र्येति–कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषे इत्यैंद्री ऋक्करणकगार्हपत्यनामकाग्निकर्मकस्तवनं कुर्यादित्यर्थः । श्रुत्या–गार्हपत्यशब्दोत्तरश्रूयमाणद्वितीयाश्रुत्या (कदाचनेति) हे इंद्र कदाचन कस्मिन्कालेपि, नस्तरीरसि–हिंसको नासि किंतु, दाशुषे–आहुतिंदत्तवते यजमानाय सश्चसि-प्रीयसे प्रसन्नोभवसीत्यर्थः (लिंगस्यनप्रामाण्यमिति) ऐन्द्र्यागार्हपत्यमुपतिष्ठते इत्यत्रहिकदाचनस्तरीरसिनेंद्रसश्चसि दाशुषे इत्यनया ऋचा इंद्र उपस्थेय उत गार्हपत्य इति संशये भो इंद्र कदाचिदपि घातको न भवसि किंत्वाहुतिं दत्तवते यजमानाय प्रीयसे इतींद्रप्रकाशनसामर्थ्यलिंगादिंद्रउपस्थेय इति पूर्वपक्षस्य प्राप्तौ सिद्धांतः गार्हपत्यमित्यत्र प्रत्यक्षद्वितीयाश्रुत्या गार्हपत्योपस्थाने विनियुक्तमंत्रस्य पुनर्विनियोगाकांक्षानुदयाद्विनियोजकं लिंगं न प्राप्नोति येनेंद्रोपस्थाने मंत्रो विनियुज्येतेति भावः ॥

शि० म०–तथा 'यज्ञायज्ञीये साम्नि ऐरं कृत्वोद्गेयम्' इति श्रुत्या इरापदप्राप्तौ गिरापदस्य निराकांक्षत्वात्तत्प्रापकवाक्यस्य दौर्बल्यं प्रतिष्ठाकामदर्शपूर्णमासप्रयोगे एकविंशतिसंख्यासामधेन्यनुवचनानामेकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति श्रुत्या अंगत्वावगतौ पंचदशसंख्यासामधेन्यनुवचनानामाकांक्षाभावात्तदंगत्वबोधकस्य प्रकरणस्य श्रुत्या बाधः। गोदोहनान्विते पशुकामप्रयोगे चमसप्रापकस्य क्रमस्य यजमानस्य याज्येत्यत्र श्रुत्या ऋतुयागेषु याज्याया यजमानकर्तृकत्वावगतौ हौत्रसमाख्याया दुर्बलत्वम् ॥

म०प्र०–श्रुतिवाक्ययोर्विरोधे वाक्यदौर्बल्योदाहरणमाह (यज्ञायज्ञीयेइत्यादिना, यज्ञायज्ञीयसंज्ञकसाम्नि ऐरमिराया इरापदस्येदमैरमिरापदारूढसामकृत्वोद्गेयमित्यर्थः । इतिश्रुत्या–ऐरमित्यत्र तद्धितश्रुत्या, गिरापदस्य–समभिव्याहाररूपवाक्यप्राप्तगिरापदस्य, तत्प्रापकवाक्यस्य–गिरापदप्रापकवाक्यस्य श्रुतिप्रकरणविरोधे प्रकरणदौर्ब-

ल्योदाहरणमाह :(प्रतिष्ठाकामेति) प्रतिष्ठाकामसंबन्धिदर्शपूर्णमासानुष्ठाने इत्यर्थः (एकविंशतिसंख्यासामधेन्यनुवचनानामितिं) समिधामाधाने करणभूता ऋचः सामधेन्यः एकविंशतिसंख्याकसामधेनी ऋङ्मंत्राणामित्यर्थः (एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येति) अनुवचनाश्रितैकविंशतिसंख्यया प्रतिष्ठांभावयेदित्यर्थः। इतिश्रुत्या–इत्यत्रैकविंशतिशब्दोत्तरद्वितीयाश्रुत्या, अंगत्वावगतौ–प्रतिष्ठाकामसंबंधिदर्शपूर्णमासांगत्वावगतौ, पंचदशसंख्यासामधेन्यनुवचनानाम्–पंचदशसामधेन्यो भवंतीत्यत्र श्रूयमाणपंचदशसंख्याकसामधेन्यनुवचनानाम्, तदंगत्वबोधकस्यप्रकरणस्य–पंचदशसामधेनीनामंगत्वबोधकोभयाकांक्षारूपप्रकरणस्य । श्रुतिस्थानविरोधेस्थानदौर्बल्योदाहरणमाह (गोदोहनान्वितेइति) गोदोहनमात्रविशिष्टपशुकामपुरुषसंबंधिकर्मणीत्यर्थः क्रमस्य–सन्निधिरूपस्थानप्रमाणस्य श्रुत्याबाध इत्यन्वयः । चमसेनापः प्रणयति गोदोहेन पशुकामस्येत्यत्र गोदोहशब्दोत्तरश्रूयमाणतृतीयाश्रुत्या गोदोहसंज्ञकपात्रस्य पशुफलककर्मांगत्वावगतौ चमससंज्ञकपात्रस्याकांक्षाभावाच्चमसनिष्ठांगत्वबोधकस्थानस्य तृतीयाश्रुत्या बाध इतिभावः। यस्मिन् गुणः कारकतामापद्यते स आश्रय इत्युक्ताश्रयत्ववदप्कर्मकगोदोहमात्रकरणकप्रणयेन पशून्भावयेदिति गोदोहेन पशुकामस्येति वाक्यार्थः श्रुतिसमाख्याविरोधे समाख्यादौर्बल्योदाहरणमाह (यजमानस्ययाज्येति) यजेतिप्रेषानंतरं पठ्यमाना ऋग् याज्यायजमानकर्तृकपाठवतीयाज्येतितदर्थः। श्रुत्या–षष्ठीश्रुत्या, ऋतुयागेषु–वसंताद्यृतुदेवताकयागेषु यजमानकर्तृकत्वावगतौ यजमानकर्तृकपाठवत्त्वावगतौ, हौत्रसमाख्यायाः–हौत्रं कांडमित्यत्रकांडबोधकहौत्रशब्दरूपसमाख्याया याज्याया होतृकर्तृकपाठवत्त्वाकांक्षाभावाद्धोतृकर्तृकपाठवत्त्वबोधकहौत्रसमाख्याया दुर्बलत्वमिति भावः ॥

शि० म०–तथा स्योनं ते सदनं कृणोमीत्यस्य तस्मिन् सीदेत्यस्य पुरोडाशसदनकरणप्रतिष्ठापनयोः लिंगेन प्रत्येकमेव विनियुक्तत्वान्न सकलमंत्रस्य वाक्याद्विकल्पेन समुच्चयेन वा सदनकरणप्रातिष्ठापनयोः प्रयोगः। सूक्तवाक्यनिगदस्य इदं हविरजुषेतामविवृधेतामित्यादेरग्नीषोमादिपदवत्तदेकवाक्यतापन्नस्य व्यवस्थया पर्वद्वये प्रयोगः । नतु प्रकरणात्ततो विच्छित्यान्यत्रापि प्रयोगः ॥

म०प्र०–लिंगवाक्ययोर्विरोधे वाक्यदौर्बल्योदाहरणमाह (तथास्योनमिति) विकल्पेन–सदनकरणं कदाचित्पूर्वांशेन कदाचिदुत्तरांशेनैवं पुरोडाशप्रतिष्ठापनमपि कदाचित्पूर्वांशेन कदाचिदुत्तरांशेनेति विकल्पेन, समुच्चयेन उभयांशेन पुरोडाशसदनकरणप्रतिष्ठापनयोः करणमिति समुच्चयेन । प्रयोगः–संबंधः । अत्रेदं बोध्यं स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन् सीदामृते प्रतितिष्ठ व्रीहीणां मेध

सुमनस्यमान इत्यंशद्वयम् । भो पुरोडाश, ते–तव, स्योनं–समीचीनं, सदनं–स्थानं, कृणोमि-करोमि, तच्चस्थानं घृतस्य धारया सुशेवं–सुष्टुसेवितुं योग्यं कल्पयामि भो व्रीहीणां मेध–व्रीहिसारभूत सुमनस्यमानः–समाहितमनस्कस्त्वं तस्मिन्समीचीनस्थाने, सीद–उपविश प्रतितिष्ठ स्थिरो भवेति तदर्थः । अयं सर्वोंपि मंत्रः पुरोडाशस्थानकरणं पुरोडाशस्थापने च किंविनियुज्यते किंवार्द्धद्वयं क्रमेणोभयत्र व्यवस्थितमिति तत्र संशये तस्मिन्निति तच्छब्देन प्रकृतवाचिना पूर्वोत्तरांशयोरेकवाक्यत्वाद्वाक्यार्थद्वयाभावात्सर्वोंपि मंत्रः पुरोडाशस्थानकरणस्यांगं तत्र सर्वेणानेन मंत्रेण पुरोडाशस्थानं कुर्य्यादिति विनियोजिका श्रुतिः कल्पनीया तथासर्वेणानेन मंत्रेण पुरोडाशस्थापनं कुर्य्यादिति विनियोजिका श्रुतिः कल्पनीया मंत्रस्य पुरोडाशसदनांगत्ववत्पुरोडाशस्थापनांगत्वस्यापि तद्वाक्यबोधितत्वादिति पूर्वपक्षप्राप्तौ राद्धान्तः पूर्वोत्तरार्द्धयोः परस्परान्वयेन संपन्नैकवाक्यस्य पुरोडाशसदनस्थापनकरणे शक्तिमकल्पयित्वा सर्वमंत्रस्य पुरोडाशसदनस्थापनकरणे विनियोक्तुमनर्हत्वाल्लिंगकल्पनव्यवधानेन श्रुतिंप्रति वाक्यस्य विप्रकृष्टत्वेन प्रत्यक्षलिंगेन वाक्यबाधादर्द्धद्वयं क्रमेणोभयत्र व्यवस्थितमिति अत्राप्याकांक्षाविरह एव वाक्यदौर्बल्यप्रयोजक इति वाक्यप्रकरणयोर्विरोधे प्रकरणदौर्बल्योदाहरणमाह (सूक्तवाक्यनिगदस्येति) मंत्रोद्विविधः करणमंत्रोऽनुवादकमंत्रश्च तत्र यं मंत्रमुच्चार्य्यकर्मक्रियते स करणमंत्रः कर्मसमाप्त्यनंतरं येन मंत्रेण स्तुतिमात्रं क्रियते सोऽनुवादकमंत्रस्तथाच द्विविधमंत्रस्वरूपऋक्समुदायरूपसूक्तवाक्यसंबंध्यनुवादकमंत्रस्येत्यर्थः (अग्नीषोमादिपदवदिति) यथा पूर्णमासीकालिकाग्नेयाग्नीषोमीयोपांशु इति यागत्रयात्मकपूर्णमासे एवाग्नीषोमपदस्य प्रयोगो नामावस्याकालीनाग्नेयदधियागपयोयागेति यागत्रयात्मकदर्शेंऽग्नीषोमपदस्य. प्रयोगस्तत्र सोमदेवतायाअभावात् यथाचेंद्राग्निपदस्योक्तयागत्रयात्मकदर्श एव प्रयोगो नोक्तयागत्रयात्मकपूर्णमासयागे इंद्राग्निपदस्य प्रयोगस्तत्रेन्द्रदेवताया अभावात्तद्वत्, तदेकवाक्यतापन्नस्य–अग्नीषोमादिपदैकवाक्यतापन्नस्येदंहविरजुषेतामविवृधेतामित्यादिसूक्तवाक्यनिगदस्यापि, पर्वद्वये–युक्तयागत्रयात्मकदर्शे उक्तयागत्रयात्मकपूर्णमासेच, व्यवस्थया–यथायोग्यंप्रयोगो नतूभयाकांक्षालक्षणप्रकरणादग्नीषोमपदादिदंहविरजुषेतामित्यादिकं पृथक्कृत्या, अन्यत्रापि–दर्शेंपीदं हविरित्यादेः पाठो नतु इंद्राग्निपदात्पृथक्कृत्येदं हविरित्यादेरुक्तपूर्णमासे प्रयोग इत्यर्थः । अयमाशयः । अग्नीषोमाविदं हविरजुषेतामवीवृधेतामहोज्यायोऽक्रातामिंद्राग्नी इदं हविरजुषेतामवीवृधेतामहोज्यायोक्रातामिति सूक्तवाक्यं श्रूयते तत्र देवतावाचकाग्नीषोमादिपदैकवाक्यतापन्नेदं हविरजुषेतामित्यादिपदानि तत्तद्देवतावाचकपदाद्विच्छिद्यदर्शादिषु प्रकरणविशेषात्प्रयोक्तव्यानि उततत्तद्देवतापदेनैकवाक्यतया तत्तद्देवतापदवदेवव्यवस्थितानीति संशयेऽग्नीषोममंत्रगतमपीदं हविरित्यादिकमुक्तयागत्रयात्मकदर्शेंऽग्नीषोमपदपरित्यागेन पठनीयम्, तथेंद्राग्निमंत्रग-

तमपीदं हविरित्यादिकमिंद्राग्निपदपरित्यागेनोक्तयागत्रयात्मकपूर्णमासे पठनीयम् । तथा सतीदं हविरित्यादिमंत्रभागानां दर्शपूर्णमासशेषत्वबोधकदर्शपूर्णमासप्रकरणपाठोनुगृहीतो भवतीति पूर्वपक्षे राद्धान्तः । अग्नीषोमपदघटितमंत्रभागस्येदं हविरित्यादिरूपस्यैंद्राग्निपदान्वयाश्रवणात्प्रकरणेन प्रथमं शेषशेषिवाचकपदानां सहोच्चारणरूपं वाक्यं कल्प्यते वाक्येन त्वग्नीषोमपदघटितमंत्रभागस्येदं हविरित्यादेरिन्द्राग्निप्रकाशनसामर्थ्यरूपं लिंगं कल्प्यते लिंगेन चानेनेनेदं हविरित्यादिनाऽग्नीषोममंत्रभागेनैंद्राग्निविषयकस्तुतिं कुर्य्यादिति श्रुतिः कल्पनीया एवमिंद्राग्निपदघटितमंत्रशेषस्याप्यग्नीषोमपदान्वयाश्रवणात्प्रकरणेन प्रथमं शेषशेषिवाचकपदानां सहोच्चारणरूपवाक्यं कल्पनीयमुक्तवाक्येन चैंद्राग्निमंत्रभागस्येदंहविरित्यादेरग्नीषोमदेवताप्रकाशनसामर्थ्यरूपंलिंगं कल्पनीयं लिंगेन त्विद्राग्निमंत्रभागेनेदं हविरित्यादिनाऽग्नीषोमविषयकस्तुतिं भावयेदिति श्रुतिः कल्पनीयेति प्रकरणेन विनियोगे प्रकरणं श्रुत्यादित्रिभिर्व्यवधीयते वाक्येनविनियोगेत्वग्नीषोमपदसमभिव्याहाररूपवाक्यस्य श्रूयमाणत्वादुक्तवाक्यंश्रुतिलिंगाभ्यामेवव्यवधीयते इति प्रकरणस्य वाक्येन बाधितत्वात्तत्तद्देवतावाचकपदशेषो दर्शादिषु यथायोग्यं व्यवस्थित इति अत्रापि मंत्रभागं विच्छिद्य दर्शादिष्वप्रयोगे आकांक्षाविरह एव कारणमिति ॥

शि० म०—विदेवनादीनामाभिषेचनीयसन्निधावाम्नातानामपि प्रकरणाद्राजसूयांगत्वावगमेन निराकांक्षत्वान्न सन्निधानादभिषेचनीयांगत्वं पौरोडाशिकसमाख्याते दर्शपूर्णमासकांडे समाम्नातस्य शुंधध्वमिति मंत्रस्य सन्निधानात्सानाय्यपात्रांगत्वेनान्वितस्य निराकांक्षत्वान्न पुरोडाशपात्रांगत्वमिति समाख्यायास्ततो दौर्बल्यम् ॥

म० प्र०—स्थानप्रकरणविरोधे स्थानदौर्बल्योदाहरणमाह (विदेवनादीनामिति) अत्र विदेवनशब्दो लोके जूआ इति ख्यातस्य वाचकः अत्रादिपदेन जयशुनाशेपाख्यानयोर्ग्रहणं राजसूययागे हि पविष्टिसोमयागादयो बहवो यागा उक्तास्तत्राभिषेचनीयसंज्ञकसोमयागस्तथाचाभिषेचनीयसंज्ञकसोमयागसन्निधौ पठितानामपि विदेवनादीनां प्रकरणप्रमाणाद्राजसूयांगत्वनिश्चयेनेत्यर्थः । अयमाशयः अक्षैर्दीव्यति राजन्यं जिनाति शौनाशेपमाख्यापयतीति बह्वृचब्राह्मणे श्रूयते राजन्यं—राजानं जिनाति—जयेत् शुनाशेपविषय आख्यानं शौनाशेपमिति तदर्थः । तत्र—किं विदेवनादयः सर्वराजसूयांगमुत राजसूयांतर्गताभिषेचनीयसंज्ञकसोमयागांगमिति संशये सन्निधिपाठरूपस्थानप्रमाणाद्विदेवनादयोऽभिषेचनीयसंज्ञकसोमयागांगमेवेति पूर्वपक्षे राद्धांतः राजसूययागस्य कथंभावाकांक्षायां विहितविदेवनादयः प्रकरणप्रमाणेन राजसूययागशेष एव राजसूययागश्च बहुयागात्मक इति तत्रत्य-

सर्वयागशेषा एव नत्वभिषेचनीयसंज्ञकसोमयागमात्रस्य शेषाः अभिषेचनीयसंज्ञकसोमयागस्य ज्योतिष्टोमविकृतित्वेनातिदिष्टप्राकृतांगैरेव कथंभावाकांक्षानिवृत्तेरभिषेचनीयस्य विदेवनादिषु कथंभावाकांक्षाभावादिति स्थानसमाख्याविरोधे समाख्यादौर्बल्योदाहरणमाह (पौरोडाशिकसमाख्यातेइति) पुरोडाशं कपालोपरिपक्वान्नविशेषमधिकृत्य प्रवृत्तं कांडं मंत्रवृंदं पौरोडाशिकं पौरोडाशिकशब्दरूपंसमाख्यावाच्येदर्शपूर्णमासकांडे दर्शपूर्णमाससंबंधिमंत्रवृंदे इत्यर्थः । सन्निधानात्–स्थानप्रमाणात् । सान्नाय्यपात्रांगत्वेन–दधिदुग्धपात्रशेषत्वेनायं भावः । पौरोडाशिकसमाख्याते दर्शपूर्णमासकांडे शुंधध्वं दैव्याय कर्मणे इत्यादि मंत्रः पठ्यते तत्र स मंत्रः किं पुरोडाशपात्रांगमुतसांनाय्यशब्दवाच्यदधिदुग्धपात्रांगमिति संशये पौरोडाशिकमितिं समाख्याते कांडेस्यमंत्रस्य पठितत्वात् पुरोडाशपात्रांगमेवायं मंत्रइति पूर्वपक्षे राद्धांतः प्रवर्त्तते पौरोडाशिकसमाख्यायां प्रकृतिः पुरोडाशमभिधत्ते तद्धितप्रत्ययश्च कांडंनचैतावता कृत्स्नपुरोडाशपात्राणां सन्निधिरत्र प्रत्यक्षः किंत्वर्थात् प्रकल्प्यस्तेन सन्निधिना पुरोडाशपात्रसन्निध्यन्यथानुपपत्त्या परस्पराकांक्षारूपकृत्स्नपुरोडाशपात्रप्रकरणं प्रकरणेनवाक्यं वाक्येनलिंगंलिंगेन श्रुतिं कल्पयित्वा पुरोडाशपात्रेषु मंत्रस्य विनियोग इति समाख्यया विनियोगे स्थानादिपंचभिर्विप्रकर्षः सान्नाय्यपात्राणां शोधनमंत्रेण सन्निधिस्तु प्रत्यक्षः इध्मा बर्हिः संपादनस्य मुष्टिनिर्वापस्य चांतराले सान्नाय्यपात्राण्युक्तानि मंत्रश्चायमिध्माबर्हिर्निर्वापविषययोर्मंत्रानुवाकयोर्मध्यमेनुवाके पठ्यते तेन प्रत्यक्षसन्निधिना प्रकरणादीनां साक्षातपरंपरयाच चतुर्णां कल्पनात्सन्निधिः प्रकरणादिचतुर्भिः सन्निकृष्यते तस्मात्स्थानप्रमाणेन समाख्यांबाधित्वा सानाय्यपात्रशेषेएव मंत्र इति अत्रस्थानं सन्निधिः क्रम इत्यनर्थांतरम् इध्माशब्दो हि काष्ठवाचकः बर्हिः शब्दः कुशावाचक इति ॥

शि० म०–तथाच सर्वत्रोक्तायाः आकांक्षायाः अभावः दुर्बलत्वप्रयोजकः नत्वजनितान्वयबोधत्वलक्षणाकांक्षाविरहः तस्याः सर्वत्राभावादिति भावः । अत्रेदमालोचनीयं जिज्ञासाविषयत्वयोग्यत्वं नाकांक्षा घटः कर्मत्वं आनयनं कृतिः अग्निः करणत्वं ओदनं कर्मता पाकः कृतिरिष्टसाधनमित्यत्र क्रियात्वादेस्तदवच्छेदकस्य सत्त्वेन साकांक्षत्वापत्तेः नचेष्टापत्तिः ततोप्यन्वयबोधप्रसंगात् स्वरूपायोग्यत्वान्नान्वयबोध इति चेन्न, साकांक्षत्वेनेव शब्दस्य स्वरूपयोग्यताया अप्यापातात्, किंचान्वयबोधोत्तरकालमपि पदार्थेषुयोग्यता लक्षणाकाक्षासत्वात्पुनरन्वयबोधापत्तिः नचान्वयबोधाभावसहकृतजिज्ञासाविषयत्वयोग्यत्वमाकांक्षेति विवक्षितमतो नोक्तदोष इति वाच्यम्, अन्वयबोधानंतरमनेन शब्देन पुन-

जानीयामितीच्छाया अन्वयबोधदर्शनात्, किंचैवमाकांक्षैव हेतुर्नस्यात् अन्वयबोधाभावस्य प्रतिबंधकाभावतया पृथक्कारणत्वेन कारणतावच्छेदकत्वायोगात् ॥

. म० प्र०–(अजनितान्वयबोधत्वलक्षणेति) अजनितोऽन्वयबोधो येन शब्देन शब्दार्थेन वा स तथा तस्य भावस्तत्त्वं प्रकृतान्वयबोधाजनकत्वस्वरूपेत्यर्थः । तस्याः–प्रकृतान्वयबोधाजनकत्वलक्षणाकांक्षायाः (सर्वत्राभावादिति) प्रकृतान्वयबोधो वैश्वदेवयागेन वाजिनान्वयबोधस्तदजनकत्वं वैश्वदेवयागेवाजिनान्वयबोधात्पूर्वं वाजिनद्रव्येऽस्ति एवं प्रकृतान्वयबोध इन्द्रोपस्थानेनैन्द्र्या ऋचोऽन्वयबोधस्तदजनकत्वमिन्द्रोपस्थाने ऐन्द्र्या ऋचोऽन्वयबोधात्पूर्वमैन्द्री मंत्रेऽस्तीति वाजिनादौ सर्वत्र सत्त्वादित्यर्थः । ततोपि–घटः कर्मत्वमित्यादि शब्दादपि । स्वरूपायोग्यत्वात्–शाब्दबोधनिष्ठकार्यतानिरूपितशब्दनिष्ठकारणतावच्छेदकद्वितीयांतादिविलक्षणशब्दत्वाभावात् (पुनरन्वयबोधापत्तिरिति) शंकाकर्तृनैयायिकमते त्वन्वयबोधोत्तरकालेयोग्यतादीनांसत्त्वेप्यन्वयबोधानुभावकत्वरूपाकांक्षाभावान्नपुनरन्वयबोधइतिभावः । अन्वयबोधाभावसहकृतेति–सामानाधिकरण्यसंबंधेनान्वयबोधाभावविशिष्टजिज्ञासाविषयत्वयोग्यत्वमित्यर्थः । नोक्तदोषः–विशेषणाभावेन विशिष्टाभावसत्त्वात्पुनरन्वयबोधापत्तिरूपदोषो न (अन्वयबोधदर्शनादिति) तवमते पूर्वोक्ताकांक्षाभावेन पुनरन्वयबोधो न स्यादिति भावः । एवं–अन्वयबोधाभावसहकृतेति विशेषणादानेसति । पूर्वोक्ताकांक्षायाः शाब्दबुद्धिं प्रति हेतुत्वं तदा स्याद्यद्यन्वयबोधाभावस्य कारणतावच्छेदकत्वं स्यादन्वयबोधाभावस्य तु कारणतावच्छेदकत्वमेव नास्ति, यत्र स्वतंत्रकारणत्वं तत्र कारणतावच्छेदकत्वाभाव इति व्याप्तेरन्वयबोधः प्रतिबंधकस्तदाभावः करणमित्यन्वयबोधाभावस्य प्रतिबंधकाभावत्वेन स्वातंत्र्येणैव कारणत्वादित्यभिप्रेत्य न स्यादिति प्रतिज्ञायां हेतुमाह (अन्वयबोधाभावस्येति) ॥

शि० म०–अन्यथासिद्ध्यभावसहकृतसिषाधयिषाविषयत्वयोग्यत्वमेवानुमितिहेतुः स्यात्तथाच सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षतेति सिद्धान्तो भज्येत ततश्च न युक्तं जिज्ञासाविषयत्वयोग्यत्वमाकांक्षेति अत्र ब्रूमः जिज्ञासाविरसहकृतान्वयबोधाभाव आकांक्षा अजिज्ञासितान्वयबोधके वाक्ये विशेष्याभावात्, जनितान्वयबोधे च विशेषणाभावात्, विशिष्टाभावसत्त्वेन नान्वयबोधानुपपत्तिः नचैवं घटः कर्मत्वमित्यादावपि तत्सत्त्वेनान्वयबोधापत्तिः क्रियाकर्मान्वयबोधविशेषे तादृशपदस्य स्वरूपायोग्यत्वात् । नच साकांक्षत्वेन तदप्यापाद्यमित्युक्तमिति वाच्यम् । अन्वयबोधविशेषे पदविशेषत्वेनैव हेतुत्वात्,

Funding by IKS-MoE

ननु अजिज्ञासितेपि वाजिनादौ विशेष्याभावसत्त्वेन साकांक्षत्वापत्तौ बलाबलाधिकरणोक्तं नैराकांक्ष्यं विरुद्ध्येतेतिचेन्न, नहि नैराकांक्ष्यपदेन शाब्दज्ञानोपयोग्याकांक्षाभावस्तत्राभिप्रेतः किंतु श्रुतिकल्पनानुकूलजिज्ञासालक्षणाकांक्षाभावः ॥

म० प्र०—अन्यथा—प्रतिबंधकाभावस्य कारणतावच्छेदकत्वस्वीकारे । ननु प्रतिबंधकाभावस्य स्वतंत्रकारणत्वानभ्युपगमरूपलाघवेन सिद्ध्यभावसहकृतसिषाधयिषाविषयत्वयोग्यत्वस्यानुमितिहेतुत्वमस्तु को दोष इत्याशंक्याह (तथाचेति) सिद्ध्यभावसहकृतसिषाधयिषाविषयत्वयोग्यत्वस्यानुमितिहेतुत्वस्वीकारे सतीत्यर्थः । ततश्च—उक्तदोषवृंदादेव (जिज्ञासाविरहेति) पदार्थानांयोन्वयस्तद्विषयिकावाक्यार्थयोर्योन्वयस्तद्विषयिका वा या जिज्ञासा तदभावविशिष्टो यः पदार्थवाक्यार्थान्यतरान्वयबोधः स शाब्दबुद्धिप्रतिबंधकस्तदभाव आकांक्षेत्यर्थः । अजिज्ञासितान्वयबोधके—मुमुक्षोरनिष्ठान्वयबोधजनके गणिकावाक्यादौ (विशेष्याभावादिति) स्वजनकतासंबंधेनान्वयबोधरूपविशेष्याभावाद्विशिष्टाभावसत्त्वेनेत्यर्थः । विशेषणाभावात्—जिज्ञासाविरहरूपविशेषणाभावात् । तत्सत्त्वेन—विशेषणाभावेन वा विशेष्याभावेन वा विशेषणविशेष्योभयाभावेन वा विशिष्टाभावसत्त्वात्पूर्वोक्ताकांक्षासत्त्वेन क्रियाकर्मान्वयबोधविशेषे—घटमानयेत्यादिवाक्यजन्ये निरूपकतासंबंधेन घटकर्मतावदानयनमित्यादिबोधविशेषे । तादृशपदस्य—घटःकर्मत्वमित्यादिशब्दस्यतदपि—स्वरूपयोग्यत्वमपि, अन्वयबोधविशेषे—निरूपकतासंबंधेन कर्मतावदानयनमित्यन्वयबोधविशेषे । पदविशेषत्वेन—द्वितीयांतपदाव्यवहितोत्तरानयपदत्वेन (अजिज्ञासितेपीति) वैश्वदेवयागे आमिक्षाया अन्वितत्वेन वैश्वदेवयागस्याजिज्ञासिते वाजिनादौ जिज्ञासाविरहरूपविशेषणसत्त्वेपि वैश्वदेवयागेन वाजिनान्वयबोधरूपविशेष्याभावेन विशेष्याभावप्रयुक्तविशिष्टाभावसत्त्वे वाजिनादौ साकांक्षत्वापत्त्या नैराकांक्षमनुपपन्नं भवेदित्यर्थः । तत्र—वाजिनादौ (श्रुतिकल्पनानुकूलेति) वाजिनस्य विश्वदेवशेषत्वबोधिका का श्रुतिरैन्द्री ऋच इंद्रशेषत्वबोधिका का श्रुतिरित्येवं श्रुतिकल्पनाजनकजिज्ञासालक्षणाकांक्षाभावो वाजिनादिनिष्ठो नैराकांक्ष्यशब्देनाभिहित इत्यर्थः ॥

शि० म०—अन्यथाऽशब्दरूपे लिंगे प्रकरणादौ नैराकांक्ष्यवचनमसमंजसं प्रसज्येत, नच वाक्यस्य श्रुतिवत्प्रामाण्यान्न श्रुतिकल्पनापेक्षा येन तदुपयोग्याकांक्षाभावपरोनैराकांक्ष्यशब्दः स्यादिति वाच्यम् । चोदनालक्षणोऽर्थो धर्म इति धर्मस्य श्रुतिप्रमाणत्वव्यवस्थापनेन सर्वत्र श्रुतेरेव विनियोजकत्वात् । तदुक्तं बलाबलाधिकरणे भट्टपादैः ॥

Funding by IKS-MoE

विनियोक्त्री श्रुतिस्तावत्सर्वेष्वेतेषु सुस्फुटा ॥
धीस्तस्याः सन्निकर्षेण विप्रकर्षेणचस्थितेति ॥

नतु नैराकांक्षस्यानुमित्यर्थापत्त्योरदोषतया श्रुतिकल्पनाप्रतिबंधकत्वाभावाच्छाब्दज्ञानानुकूलाकांक्षाभावपर एव नैराकांक्ष्यशब्दस्तत्रेति चेत्सत्यम् ॥

म० प्र०–अन्यथा–नैराकांक्ष्यशब्देन शाब्दज्ञानोपयोग्याकांक्षाभावस्वीकारे (असमंजसंप्रसज्येतेति) प्रसक्तं हि प्रतिषिध्यते इति न्यायात्कस्मिँश्चिल्लिंगे प्रकरणादौ च शाब्दज्ञानोपयोग्याकांक्षाप्रसक्त्यभावेन कस्मिंश्चिल्लिंगे प्रकरणादौ च नैराकांक्ष्यवचनमनुपपन्नं स्यादिति भावः (वाक्यस्येति) यथाश्रुतेरज्ञातज्ञापकत्वरूपप्रामाण्यमितरनिरपेक्षंतद्वद्वाक्यस्यापि शब्दत्वाविशेषादितरनिरपेक्षाज्ञातज्ञापकत्वरूपप्रामाण्यान्न श्रुतिकल्पनापेक्षा, येन श्रुतिकल्पनापेक्षावत्त्वरूपहेतुना तदुपयोग्याकांक्षाभावपरः श्रुतिकल्पनाजनकाकांक्षाभावपरोनैराकांक्ष्यशब्दःस्यादित्यर्थः । चोदनालक्षणः–चोदनाविधिः लक्षणं प्रमाणं यस्मिन् धर्मे स तथा विधिप्रमाणक इति यावत् अर्थः–सुखाधिकदुःखाजनकः, श्रुतिप्रमाणत्वव्यवस्थापनेन–विधिप्रमाणकत्वनिरूपणेन । सर्वत्र–निखिलशेषेषु श्रुत्यादिषड्विधसर्वप्रमाणेषु मध्येइति वा (विनियोक्त्रीति) यतस्तस्याः श्रुतेर्धीर्ज्ञानं सन्निकर्षेण–साक्षाद्विप्रकर्षेण–व्यवहितत्वेन लिंगादिकल्पनानंतरंश्रुतिकल्पनया स्थितमतः सर्वेष्वेतेषु श्रुत्यादिनिखिलप्रमाणेषु मध्ये श्रुतिरेव विनियोक्त्रीत्यर्थः । शब्दज्ञानानुकूलाकांक्षाभावपरनैराकांक्ष्यशब्दांगीकारेऽशब्दरूपलिंगप्रकरणादौ नैराकांक्ष्यवचनं व्यर्थं स्याल्लिंगप्रकरणादावुक्तनैराकांक्ष्यस्यसर्वदासत्त्वादेतादृशनैराकांक्ष्यस्य सर्वदा सत्त्वेन कदापि लिंगादिनाश्रुतिकल्पनाच न स्यात्तथाच लिंगप्रकरणादौविनियोजकत्वमपि न स्यादित्यन्यथेत्यादिग्रंथनिर्दिष्टपूर्वोक्तदोषमुद्धर्तुकामः शंकते (नन्विति) अनुमित्यर्थापत्त्योः–स्योनंते सदनं कृणोमीत्यादिमंत्रः अनेन मंत्रेण पुरोडाशसदनं कुर्यादिति श्रुतिविहितपुरोडाशसदनकरणशेषत्ववान् मंत्रत्वे सतिशेषत्वप्रकाशनेसमर्थत्वाद्यन्नैवं तन्नैवं घटादिवत् । यदि स्योनंते सदनं कृणोमीत्यादि मंत्रनिष्ठपुरोडाशसदनकरणशेषत्वबोधिकाश्रुतिर्नस्यात्तदैतन्मंत्रनिष्ठपुरोडाशसदनकरणशेषत्वप्रकाशनसामर्थ्यं व्यर्थं स्यादित्येतन्मंत्रनिष्ठपुरोडाशसदनकरणशेषत्वप्रकाशनसामर्थ्यमेतन्मंत्रनिष्ठपुरोडाशसदनकरणविनियोगं बोधयंतीं श्रुतिमंतरेण व्यर्थं सदुक्तमंत्रस्य पुरोडाशसदनकरणे विनियोजिकां श्रुतिं कल्पयतीत्यनुमित्यर्थापत्तिरूपयोः श्रुतिकल्पनयोः (तत्रेति) लिंगप्रकरणादावित्यर्थः । लिंगादिषु शाब्दज्ञानानुकूलाकांक्षाभावरूपनैराकांक्ष्यस्य सर्वदासत्त्वेपि तादृशनैराकांक्ष्यस्य शाब्दज्ञानप्र-

तिबंधकत्वेन श्रुतिकल्पनारूपानुमित्यर्थापत्त्यप्रतिबंधकत्वेन पुरुषेच्छयाश्रुतिकल्पनासंभवेन कल्पितश्रुतिसहकृतलिंगप्रकरणादीनांविनियोजकत्वसंभवेनान्यथेत्यादिपूर्वग्रंथोक्तदोषो नास्तीति शंकाकर्तुराशयः ॥

शि॰ म॰–नैराकांक्ष्यं न दोष इति तथापि न कल्पिताश्रुतिर्विनियोजिका नैराकांक्ष्योत्तरकालंकल्पितस्य वचनस्य पौरुषत्वेनाप्रमाणत्वात् तदुक्तंमंत्राधिकरणे “निराकांक्ष्योत्तरकालं कल्पितमपि पौरुषेयत्वादप्रमाणं स्यात्” इति इयंचाकांक्षा स्वरूपसती हेतुः । नन्वियं पक्षतापर्यवसन्नेति कथं शाब्दज्ञानासाधारणकारणमिति चेत् न, तावद्विशेषणसंकरः । तत्र ह्यनुमितिगोचरेच्छासिषाधयिषाजिज्ञासातुशाब्दज्ञानेच्छा अनेन शब्देनामुमर्थं जानीयामित्येवंरूपा नाप्यन्वयबोधाभावः साधारणमनुमितौ हि सिद्धिमात्रस्य प्रतिबंधकत्वात् सिद्ध्यभावमात्रं हेतुः शाब्दज्ञाने तु तज्जन्यशाब्दज्ञानाभावः प्रमाणांतरेण वाक्यांतरेण वाऽवगतेपि वाक्यार्थज्ञानोत्पत्त्या फलबलेन तज्जन्यशाब्दज्ञानस्यैव प्रतिबंधकत्वात् ॥

म॰ प्र॰–नदोषः–अनुमित्यर्थापत्त्योर्दोषो न, वचनस्य–श्रुतिवचनस्य (अप्रमाणत्वादिति) यद्यपि लिंगप्रकरणादिषु शाब्दज्ञानोपयोग्याकांक्षाभावरूपनैराकांक्ष्यं न श्रुतिकल्पनाप्रतिबंधकमिति, सत्यं तथापि पुरुषेच्छया कल्पिता श्रुतिर्विनियोजिका न भवति लिंगप्रकरणादिषु शाब्दज्ञानानुकूलाकांक्षाभावरूपनैराकांक्ष्योत्तरकालं पुरुषेच्छया कल्पितश्रुतेः पौरुषेयत्वादप्रमाणत्वेन कल्पिताश्रुतिसहकृतनिराकांक्षलिंगादीनां विनियोजकत्वाभावेनान्यथेत्यादिपूर्वग्रंथोक्तदोषः पूर्वपक्षिणस्तदवस्थः मम तु लिंगप्रकरणादिषु श्रुतिकल्पनानुकूलजिज्ञासालक्षणाकांक्षायाः सत्त्वेन साकांक्षलिंगादिमूलककल्पनाविषयश्रुतेः प्रमाणत्वेन प्रमाणश्रुतिद्वारा लिंगप्रकरणादीनां विनियोजकत्वसंभवेन लिंगप्रकरणादीनां श्रुतिकल्पनाद्वारा विनियोजकत्वाभावरूपे दोषो नास्तीति सिद्धांतिन आशयः, कल्पितमपि–कल्पितश्रुतिवचनमपि, इयं–जिज्ञासाविरहसहकृतान्वयबोधाभावरूपाकांक्षा, पक्षतापर्य्यवसन्ना–सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतारूपा, इति–जिज्ञासाविरहसहकृतान्वयबोधाभावरूपाकांक्षायाःउक्तपक्षतारूपत्वात्, तत्र–सिषाधयिषाविरहविशिष्टसिद्ध्यभावरूपपक्षतायाम् सिद्धिमात्रस्य साध्यनिश्चयत्वावच्छिन्ननिखिलसाध्यनिश्चयस्य, सिद्ध्यभावमात्रम्–साध्यनिश्चयाभावत्वावच्छिन्नसाध्यनिश्चयाभावः, तज्जन्यशाब्दज्ञानाभावः–प्रकृतशब्दजन्यशाब्दज्ञानाभावः अस्यहेतुरित्यनेनान्वयः (प्रमाणांतरेणेति) प्रत्यक्षादिप्रमाणेन कलशवद्भूतलमित्यादिवाक्येन वा घटभूतलादिपदार्थज्ञानेपि पुनः केनचिद्घटवद्भूतलमित्यादिवाक्योच्चारणे कृते उच्चारित-

वाक्यार्थज्ञानोत्पत्त्या फलबलेन शाब्दज्ञानरूपकार्यानुपपत्त्या प्रकृतशब्दजन्यतद्विशेष्यकतत्प्रकारकशाब्दबोधं प्रति प्रकृतशब्दजन्यतद्विशेष्यकतत्प्रकारकशाब्दज्ञानस्यैव प्रतिबंधकत्वादित्यर्थः ॥

मू०--योग्यता च तात्पर्य्यविषयसंसर्गाबाधः वह्निना सिंचेदित्यादौ तादृशसंसर्गबाधान्नातिव्याप्तिः । स प्रजापतिरात्मनो वपामुदखिददित्यादावपि तात्पर्य्यविषयीभूतपशु (वपायाग) प्राशस्त्याबाधात् योग्यता। तत्त्वमस्यादिवाक्येष्वपि वाच्याभेदबाधेपि लक्ष्यस्वरूपाभेदे बाधाभावाद्योग्यता ॥

शि० म०--नचैवमन्वयबोधाभावस्य प्रागभावरूपतया नासाधारण्यं तत्तत्प्रागभावत्वेन साधारण्येपि विशेषणांतरविशिष्टतया तस्यासाधारणत्वात् तस्माज्जिज्ञासाविरहसहकृतान्वयबोधाभाव एवाकांक्षा सैवच शाब्दज्ञानकारणमित्यास्तामतिविस्तरः । योग्यतां निरूपयति (योग्यताचेति) तात्पर्यविषयसंसर्गो योग्यतेत्यर्थः, तात्पर्य्यविषयपदस्य प्रयोजनमाह (सप्रजापतिरित्यादिना) संप्रदायमतेनाह (वाच्याभेदबाधेपीति) इयं योग्यता न स्वरूपसती हेतुः शाब्दभ्रमोच्छेदात् किंतु ज्ञायमाना तज्ज्ञानं च संशयनिश्चयसाधारणं कारणं ततश्च तत्संशयविपर्य्यययोर्न शाब्दज्ञानानुपपत्तिः । प्राभाकरास्तु न पदजन्यपदार्थोपस्थितिः शाब्दज्ञानांगं किंतूपस्थितिमात्रं लाघवात् ॥

म० प्र०--(नचैवमिति) जिज्ञासाविरहविशिष्टान्वयबोधाभावरूपाकांक्षास्वीकारे नासाधारण्यम्--आकांक्षायाः शाब्दबोधमात्रकारणत्वं न स्यात्प्रागभावस्य कार्य्यत्वावच्छिन्ननिखिलकार्य्यं प्रति कारणत्वेनान्वयबोधाभावस्य प्रागभावरूपत्वादित्यर्थः । तत्तत्प्रागभावत्वेन–तस्य तस्य प्रत्यक्षादिरूपान्वयबोधस्य यः प्रागभावस्तस्य प्रागभावत्वेन, विशेषणांतरविशिष्टतया–जिज्ञासाविरहरूपविशेषणांतरविशिष्टत्वेन, तस्य–अन्वयबोधाभावस्य । असाधारणत्वात्–शाब्दबोधमात्रकारणत्वात् (संप्रदायमतेनेति) परममूलकर्तृधर्मराजाध्वरींद्रमते शक्त्युपस्थितविशेष्ययोरेवाभेदान्वयेन वाच्यार्थाभेदबाधेपीत्युक्त्यनुपपत्त्यालक्षणाभ्युपगंतृप्राचीनमते वाच्यार्थाभेदबाधेपीत्याद्युक्तिसम्भवेन सम्प्रदायमतेनेत्युक्तमिति भावः (शाब्दभ्रमोच्छेदादिति) स्वरूपसत्त्याः योग्यतायाः शाब्दबोधहेतुत्वे वह्निना सिंचतीत्यादिवाक्याद्भ्रमात्मकशाब्दबोधो न स्याद्योग्यतायास्तत्राभावादित्यर्थः । साधारणम्–अन्यतरत् । तत्संशयविपर्यययोः–योग्यतासंशययोग्यतानिश्चयभ्रमान्यतरयोः

सतोः, पदजन्यपदार्थोपस्थितिः–एकसंबंधिज्ञानमपरसंबंधिस्मारकमितिन्यायेन शक्तिलक्षणान्यतरसंबंधेन पदजन्यपदार्थस्मृतिः । उपस्थितिमात्रम्–केनचिच्चक्षुरादिनिमित्तेन पदार्थज्ञानमात्रम् ॥

मू०--आसत्तिश्चाऽव्यवधानेन पदजन्यपदार्थोपस्थितिः ॥

शि० म०–नचासत्तेः पदविशेषजन्योपस्थितित्वेनाहेतुत्वे घटः कर्मत्वमित्यादावन्वयबोधप्रसंगः तस्य स्वरूपायोग्यत्वात् नचैवमोदनं पचतीत्यत्र मानान्तरोपस्थितकलापस्याप्यन्वयबोधापत्तिः तात्पर्य्यज्ञानेनैव तन्नियमोपपत्तेः अन्यथा दैववशस्मृतकलापपदोपस्थितस्य तवमतेप्यन्वयबोधापत्तिर्दुर्वारा किंच पदजन्यासा न शाब्दधीहेतुः, द्वारमित्यादौ व्यभिचारात्, ततश्च न पदजन्या पदार्थोपस्थितिरासत्तिरिति तदेतन्निराचष्टे (आसत्तिश्चेति) अयंभावः पदज्ञानजन्यान्वयप्रतियोग्युपस्थितिरेवासत्तिः सैवचान्वयबोधांगं अन्यथा संस्कारोपस्थितं तीरमादाय घोषादिपदैरेवान्वयबोधसंभवे लक्षणोच्छेदापत्तिः किंच यदि वृत्त्यानुपस्थितस्यान्वयबोधस्तदा समवायसंबंधेन घटादिपदैरेवाकाशोपस्थितिसंभवादाकाशादिपदानां तत्र शक्तिः ॥

म० प्र०–तस्य–घटः कर्मत्वमित्यादिपदस्य (एवमिति) पदार्थोपस्थितेः पदविशेषकारणजन्योपस्थितित्वेन शाब्दबोधाहेतुत्वे, मानांतरोपस्थितकलापस्य–प्रत्यक्षादिप्रमाणांतरज्ञातस्य “कलापः संहतौ बर्हे कांच्यां भूषणतूणयोः” इति मेदिनीकोशोक्तसंहत्यादिपदार्थकलापस्योदनं पचतीति वाक्यादन्वयबोधापत्तिरित्यर्थः । तन्नियमोपपत्तेः–तस्य कलापान्वयबोधस्य नियमो नियमनं निवारणं तस्योपपत्तेः, अन्यथा–तात्पर्यज्ञानेन कलापान्वयबोधनिवारणानंगीकारे, उपस्थितस्य–स्मृतकलापस्य, सा–पदार्थोपस्थितिः, द्वारमित्यादौव्यभिचारात्–पिधानपदजन्यपिधानोपस्थित्यभावेपि पिधानरूपार्थाध्याहारेण द्वारमितिशब्दाच्छाब्दबोधसंभवेन व्यतिरेकव्यभिचारात्, तदेतत्–प्राभाकरोक्तम् । परममूले (अव्यवधानेनेति) अव्यवधानविशिष्टा या पदजन्यपदार्थोपस्थितिः सा आसत्तिरव्यवधानविशिष्टंयत्पदं तज्जन्यपदार्थोपस्थितिरासत्तिरिति तु न गिरिर्भुक्तं वह्निमान् देवदत्तेनेत्यादौ गिरिभुक्तपदयोरव्यवधानसत्त्वेनातिव्याप्तेः, किंच मौनिकृतरेखासु पदाभावेन पदाव्यवधानासंभवादासत्त्यभावप्रसंगादव्यवधानवैशिष्ट्यस्य पदार्थोपस्थितावेवान्वय इत्यर्थः (पदज्ञानेति) पदज्ञानजन्याव्यवधानेनान्वयनिरूपकपदार्थोपस्थितिरित्यर्थः । सैव–उक्तासत्तिरेव, अन्वयबोधांगम्–वाक्यार्थबोधकारणम्, अन्यथा–शक्तिलक्षणान्यतररूपवृत्तिधीसहकृतपदज्ञानजन्यान्वयनिरूपकपदार्थोपस्थितिरूपा-

Funding by IKS-MoE

सत्तेर्वाक्यार्थज्ञानकारणत्वानंगीकारेपदार्थज्ञानमात्रस्य वाक्यार्थज्ञानकारणत्वांगीकारे वा, समवायसंबंधेन–घटादिपदानामाकाशे समवायसंबंधसत्त्वेन आकाशादीत्यादिपदेन गगनादिपदानां ग्रहः तत्र–आकाशे ॥

मू०–मानांतरेणोपस्थापितपदार्थस्यान्वयबोधाभावात्पदजन्येति । अत एवाश्रुतपदार्थस्थलेतत्तत्पदाध्याहारः द्वारमित्यादौ 'पिधेहि' इति अत एव 'इषेत्वा' इत्यादौ 'छिनद्मि' इति पदाध्याहारः ॥

शि० म०–न कल्प्येत नच वृत्तिधीरपि शाब्दधीहेतुः, लाघवेन पदजन्यपदार्थोपस्थितित्वेन हेतुत्वे अतिरिक्तकारणाकल्पनादिति यदुक्तं द्वारमित्यादौ व्यभिचार इति तत्राह (अतएवेति) नचार्थविशिष्टपदकल्पनाद्वारमावश्यकार्थकल्पनमिति वाच्यम् । उक्तन्यायेन पदजन्यपदार्थोपस्थितित्वेन हेतुत्वसिद्धौ तत्कल्पनागौरवस्य प्रामाणिकत्वेनादोषत्वात् । अन्यथा पिधानांशे शाब्दत्वं न स्यात्, अनुमितित्वे परामर्शजन्यत्ववच्छाब्दत्वे पदज्ञानजन्यत्वस्य प्रयोजकत्वात् (इषेत्वेत्यादाविति) भेदलक्षणे स्थितं समेषु वाक्यभेदः स्यात ॥

म० प्र०–(नकल्प्येतेति) इदमुपलक्षणं वृत्त्यानुपस्थितस्याप्यन्वयबोधांगीकारे घटादिपदाद्घटादिपदानामाकाशे समवायसंबंधसत्त्वेनाकाशस्मृतौ घटमानयेत्यादिवाक्यादाकाशान्वयबोधापत्तिरिति दूषणमपि द्रष्टव्यम् । उक्तदोषद्वयं पूर्वपक्षी निराकरोति (वृत्तिधीरपीति) शक्तिलक्षणान्यतरज्ञानमपीत्यर्थः । तथाच घटादिपदानामाकाशे शक्तिलक्षणान्यतरज्ञानाभावेन घटमानयेत्यादिवाक्यान्नाकाशेशाब्दबोधापत्तिरिति भावः (लाघवेनेति) वृत्तिधियः स्वातंत्र्येण कारणत्वे गौरवं मम नयेतु वृत्तिधियः सहकारिकारणत्वान्न गौरवमिति भावः । अतिरिक्तकारणाकल्पनात्–आकांक्षाद्यतिरिक्तपदशक्तिज्ञानरूपशाब्दस्वतंत्रकारणाकल्पनात्, कल्पनात्–अनुमित्यर्थापत्तिरूपज्ञानात् । उक्तन्यायेन–लक्षणोच्छेदापत्त्याऽऽकाशादिपदानामाकाशेशक्तिकल्पनाभावरूपदूषणाभिधानेन च, तत्कल्पनागौरवस्य–यदि पिधेहीति पदं न स्यात्तदा द्वारकर्मकपिधानविषयकशाब्दबुद्धिर्नोत्पद्येतातः पिधानबोधकक्रियापदमावश्यकमित्यर्थापत्तिरूपार्थविशिष्टपदकल्पनारूपगौरवज्ञानस्यअदोषत्वात्–कार्य्यकारणभावबुद्ध्यप्रतिबंधकत्वात्, अन्यथा–पिधेहिपदानध्याहारे । पदजन्येत्यस्यमानांतरोपस्थापितपदार्थान्वयबोधनिवर्त्तनरूपप्रयोजनमाह परममूले (मानान्तरेणेति) शब्दप्रमाणातिरिक्तप्रत्यक्षादिप्रमाणेनेत्यर्थः । परममूले (अन्वयबोधाभावादिति) अन्वयबोधाभावमभिप्रे-

Funding by IKS-MoE

त्येत्यर्थः । परममूले, अतएव–मानांतरेणोपस्थापितपदार्थस्यान्वयबोधाभावादेव परममूले, अश्रुतपदार्थस्थले–विवक्षिताश्रुतपदार्थलौकिकवाक्ये । परममूले (तत्तत्पदाध्याहारइति) अस्याग्रेसंगच्छतंइतिशेषः मानांतरेणोपस्थापितपदार्थस्यान्वयबोधाभावादेवविवक्षिताश्रुतपदार्थवैदिकवाक्येप्यन्वययोग्यपदार्थोपस्थापकपदाध्याहारः संगच्छते इत्याह परममूले (अतएवेति) भेदलक्षणे–मंत्रभेदप्रतिपादक॰ धर्ममीमांसाद्वितीयाध्यायेप्रथमपादे । स्थितं–सव्यवहितवक्ष्यमाणसूत्रंविद्यमानम्, समेषु–स्वातंत्र्येण प्रकृतार्थबोधकत्वेनतुल्यमंत्रेषु परस्परनिरपेक्षमंत्रेष्विति व वाक्यभेदः मंत्रभेदः ॥

शि०म०–यान्यसमवेतार्थानि वाचनिकविनियोगवन्ति यथा इषेत्वोर्जेत्वेत्यादीनि तेषु संदेहः किं प्राग् दृष्टार्थमंत्रावधेरेकमंत्रत्वमुत यावदेवमिथस्संबंधमिषेत्वेति तावदेकं यजुः अन्यत्तु यजुरंतरमिति किं प्राप्तमेकं यजुरिति कुतएकार्थत्वात् । नच निराकांक्षत्वान्नैकमंत्रत्वंसाकांक्षत्वे सत्येकप्रयोजनत्वस्यैवैकमंत्रत्वेतंत्रत्वादिति वाच्यम् । एकप्रयोजनानां प्रत्येकं तत्साधनशक्त्यभावेन विभज्यमानसाकांक्षत्वात् ॥

म० प्र०–यानि–यादृशवाक्यानि । असमवेतार्थानि–ब्राह्मणभागेन विनियोगात्पूर्वं असमवेतः काचित्क्रियायामनन्वितोर्थोयेषां तान्यसमवेतार्थानि क्रियानन्वितार्थानीति यावत् । वाचनिकविनियोगवंति–वचनादिषेत्वेति शाखामाच्छिनत्तीत्यादि ब्राह्मणवाक्यादागतो वाचनिको वाचनिकश्चासौविनियोगः शाखाच्छेदनादिभिः सह संबंधस्तद्वंति तेषु तादृशमंत्रेषु एषुमंत्रेषु कर्मसमवेतार्थप्रकाशकनिर्वपामीत्यादिक्रियापदमस्ति तेषुपरिमाणसंशयाभावेपि यत्रेषेत्वोर्जेत्वेत्यादिषु क्रियापदाभावेन लौकिकविनियोगनिश्चयाभावाद्वाचनिकविनियोगोऽवगम्यते तेषु परिमाणसंशयइत्यभिप्रेत्यसंशयस्वरूपमाह (किंप्रागित्यादिना) संहितायामिषेत्वोर्जेत्वेत्यादिमंत्राणामग्रे इष्टार्थैकमंत्रोस्ति स एवावधिस्तन्मंत्ररूपावधेः प्रागित्यर्थः । यावदेव–यत्परिमाणकम् । मिथस्संबंधम्–मिथः परस्परं संबंधो यस्य यजुषस्तन्मिथःसंबंधं परस्परसंबंधवदिति यावत्, इषेत्वेति–इषेत्वेत्याकारकम् । तावत्–तत्परिमाणकम्, एकंयजुः–एकमंत्रः । अन्यत्तु–ऊर्जेत्वेत्याकारकंतु, यजुरंतरम्–मंत्रांतरम् । एकंयजुः–इष्टार्थमंत्रावधेः प्रागिषेत्वोर्जेत्वेत्यादिपदसमुदाय एकमंत्रः । एकार्थत्वात्–एकादृष्टरूपप्रयोजनकल्पने लाघवेनादृष्टरूपैकप्रयोजनकत्वात् ऊरुप्रथस्वेत्यादिमंत्रवदिषेत्वेत्यादिषु क्रियापदाभावेनेषेत्वेत्यादिमंत्रार्थप्रतीत्यभावादिषेत्वेत्यादीनामनुष्ठेयार्थस्मारकताऽसंभवेन नानेकमंत्रत्वमिति भावः । हे पुरोडाश ऊरु यथा स्यात्तथा, प्रथस्व–वृद्धिंप्राप्नुहीति ऊरुप्रथस्वमंत्रार्थः । निराकांक्षत्वात्–इषेत्वेत्यादीनां भिन्नप्रयोजनकत्वेन परस्पराकांक्षाशून्यत्वात् नन्विषेत्वेत्यादीनां निराकांक्षत्वेप्येकमंत्रत्वमस्तु को दोषः इत्याशंक्याह (साकांक्षत्वेसतीति)

Funding by IKS-MoE

तंत्रत्वात्-प्रयोजकत्वात् इषेत्वेत्यादीनामदृष्टप्रयोजनकत्वेन परस्परसाकांक्षत्वेन निराकांक्षत्वमसिद्धमित्यभिप्रेत्य नचवाच्यमिति प्रतिज्ञायां हेतुमाह (एकप्रयोजनानामिति) एकप्रयोजनकानांमंत्राणां मध्ये । प्रत्येकम्-एकैकमंत्रस्य । तत्साधनशक्त्यभावेन-एकादृष्टरूपार्थसंपादनसामर्थ्याभावेन विभज्यमानानां सतां वाक्यानां साकांक्षत्वादित्यर्थः । वाक्यानां विभागे सति साकांक्षत्वनिर्णयो भवतीति भावः ॥

शि० म०-नन्वसिद्धमेकप्रयोजनत्वं विनियोगभेदेन प्रयोजनभेदावगमात । अन्यथा एकमंत्रत्वे प्रतीकभेदेन विनियोगभेद इषेत्वेति शाखामाच्छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टीत्येवमादिः कथं स्यादिति चेत किमर्थाभिधानलक्षणप्रयोजनस्य भेदः उतादृष्टलक्षणस्य नाद्यः । वायवः स्थ इत्यादिवदिषेत्वेत्यादावश्रुतक्रियापदे तदयोगात् । नच क्रियापदाध्याहारादर्थाभिधानभेद इति वाच्यम् । तत्र तदध्याहारकल्पनेगौरवान्मानाभावाच्च न द्वितीयः, कल्पनीयादृष्टस्य लाघवादेकस्यैव कल्प्यत्वात् । नच प्रतीकभेदेन विनियोगभेदानुपपत्तिः । मंत्रावृत्त्यापि तदुपपत्तेः । ततश्च मंत्रैक्यमित्येवमुत्सूत्रे पूर्वपक्षे प्राप्ते ब्रूमः । इषेत्वेत्येकं यजुः । ऊर्जेत्वेत्यपरमिति युक्तं शब्दभेदेन भिन्नवाक्यरूपावगमेन निराकांक्षत्वात् । यत्त्वेकप्रयोजनत्वाद्विभज्यमानसाकांक्षत्वमिति तन्न ॥

म० प्र०-एकप्रयोजनत्वम्-इषेत्वेत्यादिवाक्यानामदृष्टरूपैकप्रयोजनकत्वम् । विनियोगभेदेन-शाखाच्छेदनादिभिः सहसंबंधभेदेन, अन्यथा-इषेत्वेत्यादीनामेकादृष्टरूपप्रयोजनकत्वस्वीकारे, प्रतीकभेदेन-इषेत्वेत्यादिरूपमंत्रबोधकेतिशब्दघटितशब्दविशेषेण । इत्येवमादिः-इत्येवमादिब्राह्मणवाक्यबोधितः (अर्थाभिधानेति) कर्मसमवेतार्थविषयकबोधजननेत्यर्थः (वायवइति) भोवायवो यूयंस्थितिं कुरुथेत्यर्थः । तदयोगात्-कर्मसमवेतार्थाभिधानलक्षणदृष्टप्रयोजनकत्वायोगात्, तत्र-इषेत्वेत्यादिमंत्रेषु (तदध्याहारेति) क्रियापदानुमित्यर्थापत्त्यन्यतरात्मकाध्याहारेत्यर्थः मंत्रावृत्त्या-इषेत्वेत्याद्येकमंत्रस्य पुनः पाठेन । तदुपपत्तेः-शाखाच्छेदनादौ संवंधविशेषोपपत्तेः । उत्सूत्रे-सूत्राद्बहिरुत्सूत्रं तस्मिन्सूत्रानुक्ते इति यावत् (इषेइति) हे शाखे इषेऽन्नाय त्वा त्वां छिनद्मीत्यर्थः । एकंयजुः-एकमंत्रः । शब्दभेदेन-इषेत्वेतिशाखामाच्छिनत्तीत्यादिविनियोजकब्राह्मणवाक्यभेदेन। भिन्नवाक्यरूपागमेन-इषेत्वेतिभिन्नं वाक्यमूर्जेत्वेतिभिन्नं वाक्यमिति भेदविशिष्टवाक्यानां स्वरूपनिश्चयेन (निराकांक्षत्वादिति) इषेत्वेत्यादीनां परस्पराकांक्षाभावादित्यर्थः । पूर्वपक्षिणैकप्रयोजनानामित्यादिवाक्येनेषेत्वेत्यादिवाक्यानां साकांक्षत्वमेकादृष्टप्रयोजनकत्वं चोक्तं तन्निराकरोति (यत्त्विति) ॥

Funding by IKS-MoE

मू०–अतएव विकृतिषु सूर्य्यायजुष्टं निर्वपामीति पदप्रयोगः ॥

शि० म०–प्रथममेव रूपभेदेन विनियोगप्रयोजनभेदासिद्धौ तदुत्तरकालीनस्य प्रयोजनकल्पनागौरवस्य तद्भेदापरिपन्थित्वात् । नच मंत्रभेदस्यादृष्टभेदेप्युपपत्तेः । कथमेतावताच्छिनद्मि अनुमाज्मीति क्रियापदाध्याहारसिद्धिरिति वाच्यम् । करणत्वेन चोदितेषु मंत्रेषु कल्पनीयस्यप्रयोजनस्य क्रियानिर्वर्त्तनोपायस्यैव कल्प्यत्वेनार्थप्रकाशनस्यैव तत्कार्यत्वकल्पनात् । तस्य च क्रियापदाध्याहारं विनानुपपत्तेः, यथाहुः । यावता विना चोदितकरणसामर्थ्यं नास्ति तावदनाम्नातमपि कल्पनीयं छिनद्मीत्यादीति (विकृतिष्विति) ॥

म० प्र०–प्रथममेव–इषेत्वेत्यादीनां शाखाच्छेदनादिविनियोगभेदशाखाच्छेदनाद्यर्थाभिधानलक्षणप्रयोजनभेदकल्पनागौरवज्ञानात्प्रथममेव । रूपभेदेन–इषेत्वोति शाखामाच्छिनत्तीत्यादिविनियोजकब्राह्मणवाक्यस्वरूपभेदेन, विनियोगप्रयोजनभेदसिद्धौ–इषेत्वेत्यादीनां शाखाच्छेदनादिविनियोगभेदशाखाच्छेदनाद्यर्थाभिधानलक्षणप्रयोजनभेदसिद्धौ विनियोगाभिन्नप्रयोजनभेदसिद्धाविति वा, तदुत्तरकालीनस्य–रूपभेदेनेषत्वेत्यादीनां शाखाच्छेदनविनियोगभेदशाखाच्छेदनाद्यर्थाभिधानलक्षणप्रयोजनभेदसिद्ध्युत्तरकालीनस्य, प्रयोजनकल्पनागौरवस्यइषेत्वेत्यादीनां विनियोगप्रयोजनभेदकल्पनागौरवज्ञानस्य । तद्भेदापरिपंथित्वात्–विनियोगभेदप्रयोजनभेदसिद्ध्यप्रतिबंधकत्वात् । एतावता मंत्रभेदान्यथानुपपत्तिरूपहेतुना करणत्वेन, चोदितेषु–मंत्रो द्विविधः करणमंत्रोऽनुवादकमंत्रस्तयोर्मंत्रयोर्मध्ये करणमंत्रेषु ब्राह्मणवाक्येनछेदनादिक्रियाकरणत्वेन विहितेष्विषेत्वेत्यादिषु, कल्पनीयस्य–अनुमित्यर्थापत्त्यन्यतरात्मककल्पनायोग्यस्य । क्रियानिर्वर्त्तनोपायस्य–छेदनादिक्रियाजननानुकूलस्य, कल्प्यत्वेन–भट्टपादैर्बोधितत्त्वेन, अर्थप्रकाशनस्यैव–गंत्रार्थज्ञानस्यैव । तत्कार्य्यत्वकल्पनात्–मंत्रकार्य्यत्वप्रकारकानुमित्यर्थापत्त्यन्यतरात्मकज्ञानात् । तस्यच–मंत्रार्थज्ञानलक्षणमंत्रप्रयोजनस्य तु यावत्–यादृशशब्देन । चोदितकरणसामर्थ्य–ब्राह्मणवाक्यविहितकरणमंत्रनिष्ठार्थप्रकाशनानुकूलसामर्थ्यम् । तावत्–तादृशशब्दस्वरूपम् । परममूले (अतएवेति) शब्दाध्याहारस्य प्रामाणित्वादेव, विकृतिषु–सौर्य्ययागादिषु सूर्य्याय जुष्टं निर्वपामीतिपदप्रयोगः–अग्नये त्वा जुष्टं निर्वपामि व्रीहिणां मेध सुमनस्यमान इति मंत्रयोरग्निपदव्रीहिपदस्थानेसूर्य्यपदनीवारपदप्रक्षेपसंभवेन सूर्य्यायजुष्टं निर्वपामिनीवाराणां मेधसुमनस्यमान इत्यनयोर्मंत्रयोः स्वरूपं सम्भवतीत्यर्थः ॥

शि० म०–अग्नये त्वा जुष्टं निर्वपामीति व्रीहीणां मेधस्सुसनस्यमान इति मंत्रावुदाहृत्य किमिमौ सौर्य्ययागादिषु ऊहितव्यावुत नेति संशयेऽ

Funding by IKS-MoE

ग्निव्रीहिपदयुक्तमंत्रयोर्द्रव्यदेवताप्रकाशकतया प्रकृतौ दृष्टार्थकयोरप्यैन्द्र्यागार्हपत्यप्रकाशकत्ववत् नीवारसूर्य्यादिप्रकाशकत्वस्य गुणवृत्त्यैवोपपत्तेः। न तत्प्रकाशनार्थमूह इति प्रापय्याग्निव्रीहिपदयोर्देवतादिवाचिपदाविवक्षया प्रयुक्तयोरैंद्रीवन्मंत्रस्वरूपाविवक्षया प्रकृतावप्रयुक्तया तत्स्थाने सूर्य्यनीवारपदप्रक्षेपो विकृताविति नवमे राद्धांतितं तथाचार्थाध्याहारपक्षे मानांतरोपस्थितसूर्य्यादिकमादाय मंत्रस्यान्वयबोधकत्वसंभवान्न सूर्य्यादिपदोहाप्राप्तिरित्येतदाधिकरणविरोधः स्यादितिभावः नन्वासत्तिः पदजन्यत्वविशेषितापि न शाब्दज्ञानेहेतुः । अनासन्नेतद्भ्रमेण शाद्धभ्रमाभावप्रसंगादिति चेत् न, तात्पर्य्यभ्रमेण वा योग्यताभ्रमेण तदुपपत्तेः ॥

म० प्र०-(अग्नयेइति) हे पुरोडाश अग्नये—अग्निदेवतायै त्वा—त्वांजुष्टं प्रीतिपूर्वकं यथास्यात्तथा, निर्वपामि—संपादयामि प्रक्षिपामीति वा व्रीहीणां मेधो भो व्रीहीणां सारसुमनस्यमानः—सुष्ठुप्रसन्नस्त्वंभवेत्यर्थः । उदाहृत्य—पठित्वा । ऊहितव्यौश्रुताग्न्यादिपदत्यागपूर्वकाश्रुतसर्यादिपदांतरकल्पनरूपोहनव्यापारयोग्यौ, दृष्टार्थकयोः—द्रव्यदेवताज्ञानलक्षणदृष्टप्रयोजनकयोः (ऐंद्र्याइति) यथेंद्रपदस्येंद्रलक्षणार्थप्रकाशकत्वेपि गौण्यावृत्त्येंद्रसदृशगार्हपत्यसंज्ञकाग्निदेवताप्रकाशकत्वेनैंद्र्याः कदाचनस्तरीरसि नेंद्रसश्चासि दाशुषे इत्यृचो गार्हपत्यप्रकाशकत्वं तद्वदग्निपदव्रीहिपदयोरग्निव्रीहिलक्षणार्थप्रकाशकत्वेपि गौण्यावृत्त्या सूर्य्यनीवारबोधकत्वसंभवेनाग्न्यादिपदघटितोक्तमंत्रयोरपि सूर्य्यनीवारबोधकत्वोपपत्तेरित्यर्थः । तत्प्रकाशनार्थम्—सूर्य्यादिज्ञानार्थम् । ऊहः—श्रुताग्न्यादिपदत्यागपूर्वकाश्रुताग्न्यादिपदस्थानीयसूर्य्यादिपदकल्पनम् । प्रापय्य—पूर्वपक्षं कृत्वा, ऐंद्रीवत्—ऐन्द्र्यामृचींद्रशब्दस्य श्रुतेंद्रपदातिरिक्तपदप्रक्षेपेणैंद्रीविलक्षणस्वरूपं न स्यादित्यैंद्रीस्वरूपाविवक्षया प्रयुक्तत्ववत् । तत्स्थाने—अग्न्यादिपदस्थाने (विकृताविति) विकृतिपठनीयाग्नयेत्वेत्यादिमंत्रयोरित्यर्थः । नवमे जैमिनिकृतधर्ममीमांसानवमाध्याये (मंत्रस्येति) किमिमावित्यादिपूर्ववाक्ये उभयोर्मंत्रयोः प्रकृतत्वेन मंत्रयोरित्यर्थः । अन्वयबोधकत्वसंभवात्—सूर्य्यनीवाराद्यन्वयबोधकत्वसंभवात् । आसत्तिः—स्वरूपसत्यासत्तिः पदजन्यत्वविशेषितापि—पदजन्यत्वनिष्ठविशेषणतानिरूपितविशेष्यतावत्यपि अनासन्ने—आसत्तिशून्ययोर्गिरिर्भुक्तं वह्निमान् देवदत्तेनेत्यत्र गिरिवह्निमत्पदार्थयोर्भुक्तदेवदत्तपदार्थयोश्च । तद्भ्रमेण—आसत्तिभ्रमेण । शाब्दभ्रमाभावप्रसंगात्—पदार्थोपस्थितिरूपासत्तेः स्वरूपसत्त्याः शाब्दबोधहेतुत्वांगीकारेणासत्तिज्ञानस्य शाब्दबोधहेतुत्वानंगीकारादासत्तिभ्रमाच्छाब्दभ्रम इति प्राचीनगाथासिद्धशाब्दभ्रमाभावप्राप्तेः भ्रमात्मकशाब्दबोधं प्रति तात्पर्यभ्रमस्य योग्यताभ्रमस्य वा कारणतयोक्तप्राचीनगा-

थाया निर्युक्तिकत्वेनाश्रद्धेयत्वमित्यभिप्रेत्याह (नेति) तात्पर्य्यभ्रमेण गिरिर्भुक्तामिति पदयोः परस्परान्वययोग्यगिरिभुक्तपदार्थविषयकप्रतीतिजननयोग्यत्वमिति तात्पर्य्यभ्रमेणयोग्यताभ्रमेणगिरिभुक्तपदार्थौपरस्परान्वययोग्याविति योग्यताभ्रमेण, तदुपपत्तेः—भ्रमात्मकशाब्दबोधोपपत्तेः अनासन्नेर्थे शाब्दबोध एव न भवति क्वचिद्भ्रमात्मकशाब्दबोधस्तु तात्पर्य्यादिभ्रमेणैव भवतीति भावः।

मू०—पदार्थश्च द्विविधः शक्यो लक्ष्यश्चेति तत्र शक्तिर्नाम पदानामर्थेषु मुख्यावृत्तिः

शि० म०—नचैवमासत्तेः स्वरूपसत्त्या हेतुत्वेविशेषणज्ञानत्वेन कारणत्वापत्तौ शाब्दज्ञानासाधारणकारणत्वं न स्यादिति वाच्यम्, पदज्ञानजन्यपदार्थोपस्थितित्वेनैव हेतुत्वाभ्युपगमात् । अत एव विशेष्यधीरपि शाब्दधीहेतुरिति दिक् । केचित्तु गौणीवृत्तिविषयस्यापि पृथक्पदार्थतया तेन सह पदार्थस्य त्रैविध्यमिति तच्च गौण्या वृत्तेर्लक्षितलक्षणांतर्भावस्य वक्ष्यमाणतया तद्विषयस्य पदार्थस्य लक्ष्य एवांतर्भावादयुक्तमित्याशयेनाह (पदार्थश्चेति) पदानिष्ठवृत्तिविषय इत्यर्थः । ननु गौणस्य लक्ष्यांतर्भावे लक्ष्यस्यापि तदंतर्भावावश्यंभावात्तेन रूपेण विभागः किं न स्यादविशेषादित्याशंक्य शक्यो गौणश्चेति विभागकरणे केवललक्षणाया गौण्यंतर्भावाभावेन लक्ष्यासंग्रहापत्तिरित्यभिप्रेत्याह (शक्यइति) शक्तिविषयत्वं शक्यत्वं तन्निरूपणाधीननिरूपणमित्यतस्तां निरूपयति (शक्तिर्नामेति) लक्षणां व्यावर्तयति (मुख्येति) पदतत्संबंधिमात्रनिरूप्येत्यर्थः ॥

म० प्र०—पदज्ञानजन्यपदार्थोपस्थितित्वेनैवेति—यथाघटत्वावच्छिन्नघटनिष्ठकार्य्यतानिरूपितकपालनिष्ठकारणताकपालत्वावच्छिन्नैवनतुद्रव्यत्वाद्यवच्छिन्ना तथा शाब्दबुद्धित्वावच्छिन्नशाब्दबुद्धिनिष्ठकार्य्यतानिरूपितपदज्ञानजन्यपदार्थोपस्थातिनिष्ठकारणतापदज्ञानजन्यपदार्थोपस्थितित्वावच्छिन्नैव नतु विशेषणज्ञानत्वावच्छिन्नान्यथाविशेष्यबोधकपदज्ञानजन्यविशेष्यधियः शब्दबुद्ध्यहेतुत्वापत्तिरिति भावः। अतएव—पदज्ञानजन्यपदार्थोपस्थितित्वेनोपस्थितेः शाब्दबोधहेतुत्वादेव विशेष्यधीरपि—कर्मत्वादीनां ज्ञानमपि, पृथक्, पदार्थतया—शक्यलक्ष्यपदार्थाभ्यां भिन्नपदार्थत्वेन, तच्च—कैश्चिदुक्तम्, तद्विषयस्य—गौणीवृत्तिविषयस्य। गौणस्य—गौण्या वृत्त्या ज्ञातो गौणः तस्य गौणीवृत्तिविषयस्य (तदंतर्भावेति) गौणांतर्भावेत्यर्थः । तेनरूपेण—शक्यो गौणश्चेति गौणत्वेन रूपेण। अविशेषात्—गौणलक्ष्ययोः परस्परांतर्भावस्य तुल्यत्वात् गौरवाभावस्य तुल्यत्वादिति वा, लक्ष्यासंग्रहापत्तेः—केवललक्षणालक्ष्यस्य गौणपदेनाग्रहणापत्तेः

Funding by IKS-MoE

(तन्निरूपणेति) शक्तिनिरूपणेत्यर्थः । ताम्–शक्तिम् । परममूले (तत्रेति) शक्यलक्ष्ययोर्मध्ये शक्ये इत्यर्थः । वृत्तौ मुख्यत्वमेवाह (पदतत्संबंधिमात्रनिरूप्येति) एतत्पदस्यैतदर्थेशक्तिरिति पदपदार्थसंबंध्यर्थाभ्यामेव स्वरूपसंबंधविशेषलक्षणनिरूप्यत्वसंबंधवतीत्यर्थः । तथाच वृत्तित्वे सति पदपदार्थमात्रनिरूप्यत्वं शक्तित्वमिति भावः ॥

सू०–यथा घटपदस्य पृथुबुध्नोदराद्याकृतिविशिष्टे वस्तुविशेषे वृत्तिः सा च शक्तिः पदार्थान्तरम्, सिद्धान्ते कारणेषु कार्य्यानुकूलशक्तिमात्रस्य पदार्थान्तरत्वात् ॥

शि० म०–लक्षणातु पदसंबंधिपदार्थांतरेणान्वयानुपपत्त्या च निरूप्येति नातिव्याप्तिः । प्राभाकरास्तु कार्य्यान्वित एवार्थे पदसामर्थ्यं नत्वितरान्विते केवले वा, तत्र पदानामज्ञातसंगतित्वादिति तदेतन्निराकरोति (अर्थेषुइति) विषयत्वं सप्तम्यर्थः । तथाचपदनिष्ठशक्तिः केवलार्थविषयिणीत्यर्थः । कार्य्यान्विते च शक्तिरग्रे निराकरिष्यते इति भावः । शक्तिस्संकेतस्सच सर्वेश्वरेच्छा अनेनपदेनेममर्थंजानीयादित्येवं रूपा नतु पदार्थान्तरं मानाभावादिति नैयायिकाः प्राहुः तान् प्रत्याह (साचशक्तिरिति) कैमुतिकन्यायमाह (सिद्धांतइति) नच कारणतावच्छेदकातिरिक्तशक्तौ मानाभावः दाहादिलक्षणकार्य्यानुपपत्तेरेवप्रमाणत्वात् । नच वह्निस्वरूपात्प्रतिबंधकाभावसहकृतात्तदुत्पत्तिः प्रतिबंधकाभावस्याभावतया अहेतुत्वात् ॥

म०प्र०–(पदसंबंधीति) गंगादिपदसंबंधिप्रवाहादिघोषादिपदार्थान्तरेत्येतदुभयनिरूपितान्वयानुपपत्तिनिरूप्या चकारेण गंगादिपदगंगादिपदलक्षणारूपसंबंधवत्तीरादिपदार्थनिरूप्येत्यर्थः । तथाच गंगादिपदगंगादिपदवाच्यार्थसंबंधितीरादिगंगादिपदवाच्यघोषादिपदार्थांतरान्वयानुपपत्तीति त्रितयनिरूप्यालक्षणेति भावः । कार्य्यान्विते–आनयनादिलक्षणकार्य्यसंबद्धे । इतरान्विते–क्रियेतरघटत्वादिसंबद्धे । केवले–इतरानन्वितशुद्धव्यक्तौ । तत्र–केवलेतरान्वितयोः (केवलार्थेति) कार्य्यानन्वितार्थेत्यर्थः । परममूले (पृथुबुध्नोदराद्याकृतिविशिष्टेइति) "बुध्नोगिरिशमूलयोः" इति हेमचंद्राभिधानादत्रबुध्नशब्दोऽधोभागवाचकः बुध्नंचोदरंच बुध्नोदरे पृथुनी चते बुध्नोदरे पृथुबुध्नोदरे पृथुबुध्नोदरे आदिर्येषामवयवानां तेपृथुबुध्नोदरादयः पृथुबुध्नोदरादिभिः सहिता आकृतिर्घटत्वादिजातिः पृथुबुध्नोदराद्याकृतिस्तया विशिष्टे इत्यर्थः । कार्येतरान्विते स्वमते शक्तिरिति भावः । परममूले (साचेति) कार्यानन्वितार्थविषयिणी पदनिष्ठात्वित्यर्थः । कैमुतिकन्यायम्–येषां मते शक्तिमात्रस्य पदार्थांतरता तेषां मते

Funding by IKS-MoE

पदनिष्ठा शक्तिः पदार्थान्तरमितिं किमुद्धक्तव्यमित्यादिवाक्यघटककिमुच्छब्दादागतः कैमुतिकः कैमुतिकश्चासौ न्यायः पदनिष्ठशक्तेः पदार्थान्तरत्वं कैमुतिकन्यायस्तं (मानाभावइतिं) दाहोत्पत्तौ वह्निः समर्थ इत्युक्तौ दाहनिष्ठकार्य्यतानिरूपितवह्निनिष्ठकारणतावच्छेदकवह्नित्वलक्षणसामर्थ्यमेव वह्नौ भाति नतु तदतिरिक्तशक्तिरिति भावः। तदुत्पत्तिः–दाहोत्पत्तिः, अहेतुत्वात्–दाहकारणताऽभावात् ॥

शि० म०–अनुमानमपि 'वह्निराद्रिष्टातींद्रियस्थितिस्थापकेतरभावाश्रयः गुणित्वात् घटवत्' ॥

न तस्यकार्य्यं करणं च विद्यते न तत्समश्चाभ्याधिकश्च दृश्यते ।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥

शक्तयः सर्वभावानामचिंत्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्याभवशक्तयः ॥

सर्वज्ञतातृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः ।
इत्यादिश्रुतिस्मृतिवचनान्यपि शक्तौ मानं तदुक्तं चित्सुखाचार्य्यैः ॥

परास्यशक्तिर्विविधासर्गाद्याभावशक्तयः ।
इतिश्रुतिस्मृतिप्रमिताशक्तिः केन निवार्य्यते ॥

म०प्र०–(वह्निरिति) यथाश्रुतं गुरुत्वमादाय घटे साध्यसमन्वयो बोध्यः । वह्निद्व्यणुकेंधनसंयोगमदृष्टवदात्मसंयोगं वाऽऽदाय सिद्धसाधनार्थांतरवारणायाद्रिष्टेति वह्निनिष्ठोष्णस्पर्शमादाय सिद्धसाधनार्थांतरवारणायातीन्द्रियेति स्थितिस्थापकेनार्थांतरसिद्धसाधनवारणाय स्थितिस्थापकेतरेतिं स्वाश्रयसंयोगसंबंधेन वह्निवृत्त्यदृष्टरूपप्रतिबंधकाभावेनार्थांतरसिद्धसाधनवारणाय भावेति स्वमदृष्टरूपप्रतिबंधकाभावस्तदाश्रय आत्मा तस्य संयोगो वह्नाविति संबंधबोधकवाक्यार्थः । वह्निद्व्यणुकैकत्वेन भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपेणवा सिद्धसाधनार्थांतरवारणाय भावपदेन दाहानुकूलभावग्रहणस्यावश्यकत्वेन दाहानुकूलेति भावविशेषणेनैवस्थितिस्थापकेन सिद्धसाधनार्थांतरवारणसंभवात्साध्येस्थितिस्थापकप्रतियोगिकभेदो न निवेशनीयः, नचैवं जलादावुक्तसाध्याभावेन गुणित्वस्य सत्त्वेन च गुणित्वहेतौ साध्याभाववद्वृत्तित्वरूपो व्यभिचारइति वाच्यम् । गुणित्वशब्दस्य दाहजनकत्वसमानाधिकरणकगुणित्वार्थकतया व्यभिचाराभावादिति (घटवदिति) गुरुत्वे दाहानुकूलत्वाभावेन गुरुत्वमादाय घटादौ साध्यसमन्वयाभावाल्लक्षणयाऽदृष्टवदात्मवदित्यर्थः । तथाचादृष्टमादायात्मनि साध्यसमन्वय इति (नतस्येतिं ') तस्य–ईश्वरस्य, कार्यम्–स्थूलशरीरं, करणंच–इन्द्रियंच, नविद्यते–नभवति, अस्य–ईश्वरस्य, शक्तिः–मायाख्याशक्तिः परा स्वकार्य्यापेक्षयोत्कृष्टा, विविधैव–विचित्रकार्य्यकारित्वान्नानाविधैव सात्वैतिह्यमात्रसिद्धा न प्रमाणमात्र-

Funding by IKS-MoE

सिद्धेत्याह (श्रूयतेइति) ज्ञानलक्षणबलेन या सृष्टिक्रिया सापीश्वरस्य स्वाभाविकी अनादिरूपा तस्या मायात्मकत्वाद्यद्वा ज्ञानस्य चैतन्यस्य बलं मायावृत्तिप्रतिबिंबितत्वं तस्य क्रियानाम बिंबत्वेन ब्रह्मणो जनकता ज्ञातृतापि स्वाभाविकी । यद्वा ज्ञानलक्षणबलं सर्जनादिक्रियाच ब्रह्मणो· यया मायया सास्वाभाविकीति मायाविशेषणमित्यर्थः । अचिन्त्यज्ञानगोचरा–वीर्य्यादिपदार्थस्य शरीरादिकार्य्यजनने कथं शक्तिरित्यचिंत्याश्च ता ज्ञानगोचरा अनुमित्यादिज्ञानविषया अचिंत्यज्ञानगोचराः । ताः–अचिन्त्यज्ञानगोचराः सर्गाद्याः–सृष्ट्याद्यनुकूलाः भावशक्तयः–भावरूपाः शक्तयः । अलुप्तशक्तिरित्यस्याग्रे ‘अचिंत्यशक्तिश्च विभोर्विधिज्ञाषडाहुरंगानि महेश्वरस्य’ इतिपाठो बोध्यः । विधिज्ञाः–वेदार्थज्ञाः (परास्यशक्तिरिति) अनेन “परास्य शक्तिर्विविधैव श्रूयते” इत्यादि श्रुतिसूचनम् सर्गाद्यभावशक्तय इत्यनेन तु शक्तयः सर्वभावानामित्यादिस्मृतिसूचनमिति ध्येयम् ॥

मू०–साच तत्तत्पदजन्यपदार्थज्ञानरूपकार्य्यानुमेया तादृशशक्तिविषयत्वं शक्यत्वम् ॥

शि० म०–ननु प्रमाणाभावान्नास्त्यर्थविषयिणी पदानां शक्तिः येन सापदार्थांतरमिति विचार्य्यते इत्यत आह (साचेति) यद्वा नन्वस्तुनिरुक्ताशक्तिस्तथापि शक्यत्वं दुर्वचनं न तावच्छक्तिविषयत्वमन्वयस्यापि शक्यत्वापत्तेर्नापि ज्ञायमानशक्तिविषयत्वं तथातज्ज्ञापकं न तावत्प्रत्यक्षं गत्वादिवदनुपलम्भात्, नचानुमानं तद्व्याप्यलिंगाभावादित्यत आह (साचेति । तादृशेति) ज्ञायमानेत्यर्थः । ननु व्यक्तिरेवनामाख्यातपदवाच्या आलंभप्रोक्षणविशसनादिचोदनायाः गामभ्याजेत्यादिलौकिकचोदनाया हननादिप्रतिषेधस्य च तत्रैव सम्भवात्, कथं तर्हि जातिलाभ इतिचेत् आक्षेपात् ॥

म०प्र०–ननु पूर्वोक्तानुमानेन पूर्वोक्तश्रुतिस्मृतिभ्यां चार्थनिष्ठशक्तिरेव सिद्धानत्वर्थविषयिणी पदनिष्ठाशक्तिरपीत्यभिप्रेत्य शंकते (ननुप्रमाणाभावादिति) अर्थविषयिण्यां पदानां शक्तौ मानाभावादित्यर्थः । येन–प्रमाणसिद्धपदनिष्ठशक्तिसद्भावेनहेतुना, सा–अर्थविषयिणीपदानांशक्तिः, तथा–शक्यत्वम्, तज्ज्ञापकम्–पदनिष्ठशक्तिविषयकज्ञानजनकम् । प्रत्यक्षं–प्रत्यक्षप्रमाणम्, गत्वादिवत्–श्रोत्रजन्यगत्वादिविषयकप्रत्यक्षात्मकोपलंभवत्, अनुपलंभात्–पदनिष्ठशक्तिविषयकप्रत्यक्षात्मकज्ञानाभावात्, तद्व्याप्येति–शक्तिव्याप्येत्यर्थः । परममूले (अनुमेयेति) पदार्थज्ञानं पदनिष्ठस्वानुकूलशक्तिपूर्वकं पदजन्यपदार्थज्ञानरूपकार्य्यत्वाद्व्यतिरेकेघटवदिति व्यतिरेकिलिंगजन्यानुमितिविषयेत्यर्थः । व्यक्तिरेव–धर्म्येव अत्र नामपदमुपलक्षणम् नामोत्तरविधीयमानप्रत्ययस्यापि

एवमाख्यातपदं धातुधातूत्तरविधीयमानप्रत्ययमात्रस्योपलक्षणमितिध्येयम् (आलंभेति) आलंभो हिंसनं स्पर्शनं वा प्रोक्षणं मंत्रोच्चारणपूर्वकजलसेकक्रियाविशसनं हिंसनमेतद्विषयिकाग्निषोमीयं पशुमालभेत व्रीहीन्प्रोक्षतीत्यादिनोदनाया इत्यर्थः । अभ्याज–आनय, हननादिप्रतिषेधस्य–ब्राह्मणं न हन्यात् न हिंस्यात्सर्वाभूतानीत्यादिहननादिप्रतिषेधस्य, तत्रैव–व्यक्तावेव, तर्हि–जातौ शक्त्यनंगीकारे, जातिलाभः–जातिविषयकज्ञानं (आक्षेपादिति) जातिभानं विनाव्यक्तिविषयकसविल्पकभानमनुपपद्यमानं जातिभानं कल्पयतीत्यर्थापत्तिप्रमाणादित्यर्थः ॥

मू०–तच्च जातेरेव न व्यक्तेः व्यक्तीनामानंत्येन गुरुत्वात् । कथं तर्हि गवादिपदाद्व्यक्तिभानमितिचेत् जातेर्व्यक्तिसमानसंवित्संवेद्यतयेति ब्रूमः ॥

शि० म०–नच जातिरेववाच्या तत्संबंधाच्च व्यक्तिलाभ इति वैपरीत्यमपि जातेर्व्यक्तिव्यभिचारेण तदनाक्षेपकत्वात्, तस्मात् व्यक्तिरेव नामाख्यातपदवाच्या नेत्याह (तच्चेति) अयंभावः किं शुद्धव्यक्तेर्वाच्यत्वं जातिविशिष्टव्यक्तेर्वा नाद्यः, शब्दान्निर्विकल्पकधीप्रसंगात्, नद्वितीयः, नागृहीतविशेषणान्यायेन प्रथमगृहीतजातेरेव नामादिपद्वाच्यत्वौचित्यात्, किंच तवमतेपि संगतिग्रहः सर्वव्यक्तिविषयः उत एकव्यक्तिविषयः नाद्यः, अतीतानागतव्यक्तीनामशक्यज्ञानत्वात्, नद्वितीयः । इयं व्यक्तिस्तद्विषया इयं नेत्यत्रनियामकाभावात् । भावे वा संगतिग्रहस्यान्यविषयत्वेनापूर्वव्यक्तिलाभाभावप्रसंगादिति । ननु व्यक्तेर्नामादिपदाशक्यत्वे कथं तदुच्चारणानंतरं तत्प्रत्ययः कथं वा पशुमानय पशुमालभेतेत्यादिचोदना, नचानेकव्यक्तिवाचकत्वे गौरवं आलम्भादिचोदनानुपपत्त्या व्यक्तिवाचकत्वसिद्धौ तद्गौरवस्यादोषत्वादित्याशयेनाक्षिपति (कथंतर्हीति) जातिभानसामग्र्या व्यक्तिभासकत्वस्य प्रत्यक्षस्थले दर्शनेन जातिशक्तिज्ञानादुपपन्नो व्यक्तिलाभ इत्याह (जातेरिति) ॥

म० प्र०–तत्संबंधात्–जात्या साकं व्यक्तेस्तादात्म्यसंबंधान्मतांतरे समवायसंबंधात् । व्यक्तिव्यभिचारेण–घटध्वंसोत्तरकाले घटप्रागभावकालेच जातेर्वृत्तिमत्त्वेन । मीमांसकमतमाश्रित्यसमाधानमाह (नेत्याहेति । धीप्रसंगादिति) जातेः शब्दादनुपस्थितत्वादितिशेषः । नागृहीतविशेषणान्यायेन–नागृहीतविशेषणाविशिष्टबुद्धिरितिन्यायेन । तवमते–व्यक्तिशक्तिवादिनस्तवमते । संगतिग्रहः–शक्तिज्ञानम् । ननु

Funding by IKS-MoE

नियामकाभावादितिकथनमनुपपन्नं यत्र व्यवहारादिना शक्तिग्रहः सा व्यक्तिर्विषयोनान्येति नियामकसत्त्वादित्याशंक्याह (भावेवेति) अपूर्वव्यक्तिलाभाभावप्रसंगात्–घटादिपदात्कदाचिदपि पूर्वाज्ञातघटादिविषयकबोधाभावप्रसंगात् (तदुच्चारणेति) नामाद्युच्चारणेत्यर्थः । तत्प्रत्ययः–व्यक्तिज्ञानम् । तद्गौरवस्य–अनेकव्यक्तिविषयकशक्तिकल्पनागौरवस्य, जातिभानसामग्र्याः–संयुक्ततादात्म्यरूपायाः प्रत्यक्षात्मकजातिज्ञानसामग्र्याः । व्यक्तिभासकत्वस्य–व्यक्तिविषयकज्ञानजनकत्वस्य, प्रत्यक्षस्थले–घटत्वादिजातिप्रत्यक्षकाले (व्यक्तिलाभइति) व्यक्तिज्ञानामित्यर्थः । यथाजातिशक्तिज्ञानाज्जातेर्ज्ञानमेवं जातिशक्तिज्ञानादेवव्यक्तेरपि ज्ञानं संभवति जातिभानसामग्र्या व्यक्तिभासकत्वनियमादिति भावः । परममूले (जातेर्व्यक्तिसमानसंवित्संवेद्यतयेति) जातिसंबंधिनी या व्यक्तिस्तस्याः समाना एका संवित् शब्दजातिभानजनकजातिशक्तिज्ञानरूपासंवित्तया जन्यं यज्ज्ञानं जातिविषयकशब्दबोधरूपं ज्ञानं तद्विषतयतया व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधं प्रति जातिविषयकशक्तिज्ञानत्वेन हेतुत्वादित्यर्थः ॥

मू०–यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरूपसती नतु ज्ञाता जातौ तु सा ज्ञाता हेतुः । नच व्यक्त्यंशे शक्तिज्ञानमपि कारणं गौरवात् ॥

शि० मं०–जातिव्यक्त्योरैक्यात्तयोरेकसंवित्तिवेद्यत्वं जातिभानसामग्र्या व्यक्तिभानसामग्री नैयत्याद्वा जातिभानसामग्र्यः व्यक्तिभासकत्वनियममाद्वा नाद्यः । असिद्धेः न द्वितीयः । स्मृतिस्थले व्यभिचारात् । प्रकृते व्यक्तिशक्तिज्ञानाभावेन तत्साहित्याभावाच्च न तृतीयः । अन्यभानसामग्र्या अन्यभासकत्वेऽतिप्रसंगात । प्रत्यक्षस्थले च संयोगसंयुक्ततादात्म्यादेर्व्यक्तिजातिभासकत्वस्य सत्त्वात् ततश्च जातिभानसामग्र्या न व्यक्तिलाभ इत्यरुचेराह (यद्वेति) ननु गवादिपदानां शक्तिर्यदि व्यक्तावपि साज्ञायते एव अन्यथात्वप्रमाणिकत्वापत्तिरित्याशंक्य शक्तिसत्त्वेपि तज्ज्ञानं न व्यक्तिशक्तिज्ञानत्वेन जातिविशिष्टविषयशक्तिज्ञानत्वेन वा हेतुः । किंतु जातिविषयशक्तिज्ञानत्वेन लाघवादित्याह (जाताविति) ॥

म०प्र०–ऐक्यात्–अभेदात्, नैयत्याद्वा–यदा जातिभासकसामग्री तदा व्यक्तिभानसामग्री यदा व्यक्तिभानसामग्री तदाजातिभानसामग्रीति तयोः सामग्र्योः समव्यापकत्वाद्वा स्मृतिस्थले । व्यभिचारात्–यदा जातेरेव स्मृतिर्न व्यक्तेस्तदाव्यक्तिविषय-

कसंस्काररूपव्यक्तिभानसामग्र्यभावो यदा व्यक्तेरेव स्मरणं न जातेस्तदा जातिविषयकसंस्काररूपजातिभानसामग्र्यभाव इति जातिव्यक्तिभानसामग्र्योः प्रत्येकजातिव्यक्तिस्मृतिकाले परस्परव्यभिचारात्, प्रकृते–गवादिशब्दे, तत्साहित्याभावाच्च–जातिव्यक्तिभानसामग्र्योः जातिव्यक्तिशक्तिज्ञानरूपयोरेककालवृत्तित्वरूपसाहित्याभावाच्च जातिव्यक्तिभानसामग्र्योः साहित्यं तदा स्याद्यदि जातिशक्तिज्ञानवद्व्यक्तिशक्तिज्ञानमपि स्यात्तस्य त्वयानंगीकृतत्वेन तयोः साहित्यं नास्तीति भावः, अतिप्रसंगात्–घटभासकसामग्र्याः पटभासकत्वप्रसंगात् । जातिव्यत्तयोः प्रत्यक्षकालेजातिव्यक्तिभासकजातिशक्तिज्ञानरूपसामग्रीभिन्नसामग्र्याः संयुक्ततादात्म्यादेः सत्त्वेन शाब्दजातिभानजनकजातिशक्तिज्ञानरूपैकसामग्र्या न व्यक्तिभासकत्वमित्याह (प्रत्यक्षस्थलेइतिं) व्यक्तिजात्योः प्रत्यक्षकाले इत्यर्थः । अत्र चकारस्य सत्त्वादित्यतऊर्ध्वं संबंधो बोध्यः (इत्यरुचेरिति) इदं उपलक्षणं जातावेव गवादिशब्दशक्तिस्वीकारे गवादिपदात्कदापिव्यक्तिज्ञानं न स्यात्तत्कारणशक्तिज्ञानाभावादित्यरुचेरपीति । परमभूले (स्वरूपसतीति) गवादिपदनिष्ठागवादिव्यक्तिविषयकसामर्थ्यरूपाशक्तिस्वरूपेण विद्यमानैवशाब्दधीहेतुरित्यर्थः । अन्यथा–व्यंक्तिशक्तिज्ञानानंगीकारे । शक्तिसत्त्वेपि व्यक्तिशक्तिज्ञानसत्त्वेपि तज्ज्ञानंव्यक्तिशक्तिज्ञानं, हेतुः–शाब्दधीकारणम् (लाघवादिति) प्रथमकल्पे व्यक्तीनामनंतत्वात्तज्ज्ञानस्यानंतत्वेन गौरवं द्वितीयेतु शरीरकृतगौरवं स्पष्टमेवेति भावः । परममूले, गौरवात्–उभयशक्तिज्ञानस्य कारणत्वकल्पने गौरवात् ॥

सू०–जातिशक्तिमत्त्वज्ञाने सति व्यक्तिशक्तिज्ञानं विना व्यक्तिधीविलंबाभावाच्च । अतएव न्यायमतेपि अन्वये शक्तिः स्वरूपसतीति सिद्धांतः ज्ञायमानशक्तिविषयत्वमेव वाच्यत्वमिति जातिरेव वाच्या अथवा व्यक्तेर्लक्षणयावगमः ॥

शि० म०–(जातिशक्तिमत्त्वज्ञानइति) तथाचान्वयव्यतिरेकाभ्यां जातिशक्तिज्ञानं व्यक्तिज्ञानेपि कारणमिति नातिप्रसंग इतिभावः । ननु सा शक्तिरेकावा नानावा नान्त्यः । जातिव्यक्तितत्संबंधेषु प्रत्येकशक्तिकल्पनायां गौरवात् । नाद्यः । ज्ञायमानशक्तिविषयत्वेन व्यक्तेरपि शक्यत्वप्रसंग इत्यत आह (ज्ञायमानेति) पदशक्तिज्ञाननिष्ठपदार्थोपस्थितिहेतुतावच्छेदकावच्छिन्नविषयतावच्छेदकत्वं शक्यत्वमित्यर्थः । ननु गवादिपदानांव्यक्तिशक्तौ मानाभावः, नचपदोच्चारणानंतरं जातिप्रतीतिवत्तत्प्रतीतिरनुभवसिद्धत्वात्सैवमानमिति युक्तं लक्षणयापि तदुपपत्तेः अन्यथा तीरादावपि स्वरूपसच्छक्त्यभ्युपगमा-

Funding by IKS-MoE

पत्तिः । अत एव नान्वयेपि पदस्य स्वरूपसती शक्तिः । तस्य वाक्यगम्यत्वेन पदस्य तत्र सामर्थ्याभावात् । नच वाक्ये शक्तिरिष्टा तस्मिन्पक्षेशक्तिविषयत्वं शक्यत्वमिति लक्षणमपि लघिवत्यपरितोषादाह (अथवेति) ननु शक्तिलक्षणाभ्यां जातिव्यक्त्युपस्थितौ युगपद्वृत्तिद्वयविरोधः ।

म० प्र०–नन्वावश्यकत्वाद्गौरवं न दोष इत्याशंक्याह । परममूले (जातीति) जातिशक्तिज्ञानरूपाया जातिभासकसामग्र्याजातिभिन्नव्यक्तिभासकत्वस्वीकारेऽतिप्रसंग इति नाशंकनीयमित्याह (तथाचेति) व्यक्तिशक्तिज्ञानाभावेन व्यक्तिधीविलंबाभावे सतीत्यर्थः । अन्वयव्यतिरेकाभ्याम्–जातिशक्तिज्ञाने सति व्यक्तिज्ञानं जातिशक्तिज्ञानाभावे व्यक्तिज्ञानाभाव इत्यन्वयव्यतिरेकाभ्याम् (नातिप्रसंगइति) अन्यत्रान्वयव्यतिरेकाभ्यां कार्य्यकारणभावस्यानिश्चितत्वादिति शेषः । तत्तद्व्यक्तिविषयकस्वरूपसच्छक्तिसहकृतजातिशक्तिज्ञानमेव व्यक्तिशाब्दज्ञाने कारणमिति भावः, ज्ञायमानशक्तिविषयत्वमित्यस्यार्थमाह (पदशक्तिज्ञाननिष्ठेति) पदनिष्ठायाशक्तिस्तस्या यज्ज्ञानं घटोघटपदवाच्य इत्याद्याकारकं तन्निष्ठा या पदार्थोपस्थितिहेतुता तस्या अवच्छेदकं पदशक्तिज्ञानत्वं तदवच्छिन्नं पदशक्तिज्ञानं तस्यघटनिष्ठविषयताया अवच्छेदकत्वं घटत्वे इति लक्षणसमन्वयः । नच पदशक्तिज्ञाननिष्ठपदार्थोपस्थितिहेतुतावच्छेदकावच्छिन्नविषयतायाः पदेपि सत्त्वात्तदवच्छेदकपदत्वस्यापि शक्यत्वं स्यादिति वाच्यम् । विषयतापदेन मुख्यविशेष्यताख्यविषयताया विवक्षितत्वान्मुख्यविशेष्यताख्यविषयता घटादावेवनघटपदादाविति न पटत्वस्य शक्यत्वमिति, तत्प्रतीतेः–घटादिव्यक्तिज्ञानस्य, सैव–घटादिव्यक्तिप्रतीतिरेव, तदुपपत्तेः–घटादिव्यक्तिप्रतीत्युपपत्तेः, अन्यथा–घटादिव्यक्तौ स्वरूपसच्छक्त्यभ्युपगमे, लक्षणया–घटादिव्यक्तिप्रतीत्यनंगीकारे इतिवा, अतएव–वक्ष्यमाणहेतोरेव, तस्य–अन्वयस्य, तत्र–अन्वये नन्वन्वये वाक्यस्यशक्तिरस्त्वित्याशंक्याह (नचेति) अनन्यलभ्यस्यैव शब्दार्थत्वादिति शेषः, तस्मिन्पक्षे–व्यक्तौस्वरूपसच्छक्त्यनंगीकारपक्षे, वृत्तिद्वयविरोधइति–इदंत्वापाततो गंगायां घोषमत्स्यौ स्त इति वाक्ये गंगापदे वृत्तिद्वयांगीकारादिति । परममूले (लक्षणयावगमइति) तथाच घटत्वादिजातेः शक्त्योपस्थितिर्घटादिव्यक्तेस्तुलक्षणयोपस्थितिरितिभावः ॥

मू०–यथा नीलो घट इत्यत्र नीलशब्दस्य नीलगुणविशिष्टे लक्षणा, तथाजातिवाचकस्य तद्विशिष्टे लक्षणा; तदुक्तं अनन्यलभ्यः पदार्थ इति एवं शक्यार्थोनिरूपितः, अथ

लक्ष्यपदार्थो निरूप्यतेतत्र लक्षणाविषयो लक्ष्यःलक्षणाद्विविधा केवललक्षणा लक्षितलक्षणाचेति तत्र शक्यसाक्षात्संबंधः केवललक्षणा यथा गंगायां घोष इत्यत्र प्रवाहसाक्षात्संबंधिनि तीरे गंगापदस्य केवललक्षणा । यत्र शक्यपरंपरासंबंधेनार्थांतरप्रतीतिस्तत्रलक्षितलक्षणा यथा द्विरेफपदस्य रेफद्वयशक्तस्य भ्रमरपदघटितपरंपरासंबंधेनमधुकरेवृत्तिः ॥

शि० म०–नच लक्षणयोभयोरुपस्थितिः । अन्यलक्षणाया अन्यानुपस्थापकत्वात् जातेश्च शक्यत्वेन लक्षणायास्तद्विषयत्वायोगादित्याशंक्य स्वातंत्र्येण जातेश्च शक्यत्वेपि व्यक्तिविशेषणत्वेन व्यक्तिलक्षणाविषयत्वमविरुद्धमितिदृष्टांतमाह (यथेति) लक्ष्यस्य शक्याधीननिरूपणत्वात् । तन्निरूपणानंतरं लक्ष्यार्थो निरूप्यते इति प्रतिजानीते (अथेति।लक्षणेति) शक्यसबंधो लक्षणातद्विषयो लक्ष्य इत्यर्थः (यत्रेति) शक्यपरंपरासंबंधो लक्षितलक्षणा यतस्तत्पदं स्वशक्यपरंपरा संबंधिनमेवार्थं प्रत्यापयतीति नासंभवः । तादृशपदमुदाहरति (यथेति) ॥

म० प्र०–लक्षणया–घटादिव्यक्तौ लक्षणया, उभयोः–घटादिव्यक्तिघटत्वादिजात्योः । अन्यलक्षणायाः–घटादिव्यक्तिलक्षणायाः । अन्यानुपस्थापकत्वात्–घटत्वादिजातिविषयकज्ञानाजनकत्वात् (शक्यत्वेनेति) यस्य यत्पदशक्यत्वं तस्य तत्पदलक्षणाविषयत्वायोग्यत्वमिति भावः । स्वातंत्र्येण–व्यक्त्यविशेषणत्वेन । परममूले (तदुक्तमिति) मीमांसकैरिति शेषः । परममूले, अनन्यलभ्यः–लक्षणादिलभ्यभिन्नः, पदार्थः–पदशक्तिगम्यः, लक्ष्यस्य–लक्ष्यनिरूपणस्य, शक्याधीननिरूपणत्वात्–लक्षणाविषयो लक्ष्यो लक्षणाच शक्यसंबंध इति शक्यनिरूपणे हि लक्षणाज्ञानं तज्ज्ञाने हि लक्ष्यज्ञानमिति शक्याधीननिरूपणकत्वात् । परममूले (अथेति) शक्यनिरूपणानंतरमित्यर्थः । परममूले (तत्रेति) निरूपणीये लक्ष्ये सतीत्यर्थः । शक्यसंबंधः–गंगादिपदशक्यभागीरथखातावच्छिन्नजलप्रवाहादिप्रतियोगिकतीराद्यनुयोगिकः संबंधः । नच शक्यसंबंधरूपलक्षणायास्तीरादिवृत्तित्वेन कथं गंगादिपदवृत्तित्वमिति वाच्यं, स्वप्रतियोगिवाचकतादिसंबंधेन शक्यसंबंधरूपलक्षणाया पदवृत्तित्वादिति । परममूले (तत्रेति) केवललक्षणालक्षितलक्षणयोर्मध्ये इत्यर्थः । लक्षितलक्षणोदाहरणासंभ-

वस्तु नाशंकनीय इत्याह (यतइति) तत्पदं द्विरेफादिपदंस्वशक्येन रेफद्वयादिना परंपरासंबंधिनं स्वशक्यघटितभ्रमरपदप्रतिपाद्यत्वादिरूपपरंपरासंबंधवंतमेवार्थं बोधयतीत्यर्थः । परममूले, भ्रमरपदघटितपरंपरासंबंधेन—स्वशक्यघटितभ्रमरपदंप्रतिपाद्यत्वादिसंबंधेन ॥

मू०—गौण्यपि लक्षितलक्षणैव यथा सिंहो माणवक इत्यत्र सिंहशब्दवाच्यसंबंधिक्रौर्य्यादिसंबंधेन माणवकस्य प्रतीतेः प्रकारांतरेण लक्षणा त्रिविधा जहल्लक्षणाऽजहल्लक्षणा जहदजहल्लक्षणाचेति शक्यमनंतर्भाव्य यत्रार्थांतरस्य प्रतीतिस्तत्र जहल्लक्षणा यथा विषंभुंक्ष्वेत्यत्र हि स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्षिता ॥

शि० म०—नन्विदं गौणी वृत्तावतिव्यापकं तस्या अपि सिंहशब्दवाच्यसिंहत्वसमानाधिकरणक्रौर्य्यादिसंबंधेन देवदत्तप्रत्यायकत्वादित्याशंक्य लक्ष्यत्वान्न दोष इत्याह (गौण्यपीति) शक्यसंबंधिमात्रविषयावृत्तिर्जहल्लक्षणा साच यद्यपि गंगायां घोषः प्रतिवसतीत्यत्र प्रसिद्धलक्षणास्थंले गंगापदेपि तथापि गंगातीरत्वस्य पूर्वमुपस्थितस्यकदाचिल्लक्ष्यतावच्छेदकत्वात्साअजहत्स्वार्थापीतियत्र लक्षणाजहत्स्वार्थैवं तदुदाहरति (यथाविषंभुंक्ष्वेति) यद्यपि विषभक्षणं कर्त्तव्यत्वान्वययोग्यं परंतु कृतं सत्सद्यो व्यापादयतीति नान्वयानुपपत्तिः । तथापिपितुःशत्रुगृहान्न भोजननिवृत्तौ तात्पर्य्यात्तदनुपपत्त्या वाक्यस्य तत्र लक्षणेति ध्येयम् ॥

म० प्र०—क्रौर्य्यादिसंबंधेन—क्रौर्य्यादिसजातीयक्रौर्य्यादिसंबंधेन, इत्यत्र—इत्याकारकवाक्यघटकगंगापदे । स्थले—अधिकरणे, पूर्वमुपस्थितस्य—शाब्दबोधात्पूर्वं ज्ञातस्य अजहत्स्वार्थैति गंगापदाच्छक्यार्थसंबंधी यदि तीरत्वेन रूपेण गृहीतस्तदा गंगापदात्तीरत्वेन तीरबोधो यदितु गंगातीरत्वेन रूपेण गंगापदशक्यार्थसंबंधी गृहीतस्तदातेनैव रूपेण गंगातीरस्मरणं शाब्दबोधश्च । नच गंगायां घोष इत्यादौ गंगापदाद्गंगातीरत्वेन बोधे गंगापदे जहत्स्वार्थत्वहानिरिति वाच्यम् । तीरत्वेन तीरे गंगापदलक्षणायामेव जहत्स्वार्थत्वसंमतत्वाद्गंगापदाद्गंगातीरत्वेन तीरभानेत्वजहत्स्वार्थैवलक्षणा एवं यष्टीःप्रवेशय मंचाःक्रोशंतीत्यादावपि यष्ट्यादिपदादिना यष्टिधरपुरुषमंचस्थपुरुपत्वादिना पुरुषबोधेऽजहत्स्वार्थैवलक्षणेति भावः । कर्तव्यत्वान्वययोग्यम्—कृतिसाध्यत्वेन सह यो विषभक्षणस्यान्वयस्तद्योग्यम् परंतु—किंतर्हि

कृतंसत्–विषभक्षणं कृतिविषयःसत् । सद्यः–शीघ्रम् । व्यापादयति-मारयति-तदनुपपत्त्या–पितुःशत्रुगृहान्नभोजननिवृत्तौ तात्पर्यानुपपत्त्या, वाक्यस्य–विषंभुंक्ष्वेतिवाक्यस्य । तत्र–शत्रुगृहान्नभोजननिवृत्तौ नच वाक्यस्य शक्याभावेन कथं वाक्ये शक्यसंबंधरूपालक्षणेति वाच्यम् । शक्यसंबंधोलक्षणेत्यस्य ज्ञाप्यसंबंधोलक्षणेत्यर्थकत्वेन वाक्यज्ञाप्येन विषभक्षणानुकूलकृतिमत्त्वादिस्वरूपेण संबंधस्यैकाधिकरणवृत्तित्वरूपस्य शत्रुगृहान्नभोजननिवृत्तौ सत्त्वात् । नचैवमपि ज्ञाप्यार्थस्य भक्षणस्य शत्रुगृहान्नभोजननिवृत्तौ प्रविष्टत्वादजहत्स्वार्थैव लक्षणास्यादिति वाच्यम् । शत्रुगृहान्नभोजननिवृत्तावित्यस्य शत्रुगृहव्यवहारनिवृत्तावित्यर्थकत्वेन जहत्स्वार्थायाः सम्भवादिति ॥

मू०–यत्र शक्यार्थमंतर्भाव्यैवार्थांतरप्रतीतिस्तत्राजहल्लक्षणा यथा शुक्लो घट इत्यत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणमंतर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्त्तते यत्र हि विशिष्टवाचकशब्दः स्वार्थैकदेशं विहायैकदेशे वर्तते तत्र जहदजहल्लक्षणा यथा सोयंदेवदत्त इत्यत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वं यथा वा तत्त्वमसि इत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगादैक्यसिद्ध्यर्थं स्वरूपे लक्षणेति सांप्रदायिकाः वयंतु ब्रूमः । सोयं देवदत्तस्तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेपि न लक्षणा शक्त्युपस्थितविशिष्टयोरभेदान्वयानुपपत्तौ विशेष्ययोः शक्त्युपस्थितयोरेवान्वयबोधाविरोधात् । यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेश घटत्वस्यायोग्यत्वेपि योग्यघटव्यक्त्यासहानित्यत्वान्वयः॥

शि० म०–(शक्यार्थमिति) शक्यार्थविशिष्टविषयत्वं लक्षणं तेन काकेभ्यो दधिरक्षतामित्यत्र नातिव्याप्तिः काकादेः शक्यार्थस्य विशेष्यत्वेन जहदजहल्लक्षणायास्तद्विशिष्टविषयत्वाभावात् (यत्रहीति) शक्यैकदेशमात्रविषयवृत्तित्वं जहदजहल्लक्षणालक्षणमिहविवक्षितं नतु विशिष्टवाचकत्वघटितं तस्य व्यर्थत्वात् । नच काकेभ्यो दधिरक्ष्यतामि-

त्यत्राव्याप्तिः शुनकादेरेकदेशत्वाभावादिति वाच्यम् । सांप्रदायिकमते तस्यानुदाहरणत्वात्, ग्रंथकृन्मतेतु शक्याशक्यविशेष्यकवृत्तित्वस्य तल्लक्षणत्वात् । नन्वाकृतिः शब्दार्थ इत्युपगमाद्देवदत्तादेः शक्यैकदेशत्वाभावादसंभव इति चेन्नाकृतिविशिष्टव्यक्तिवाचकत्ववादिमतेनैतल्लक्षणप्रणयनात्, सिद्धांते च जहदजहल्लक्षणाया एवासिद्धेः लक्षणात्रैविध्यस्य च मतांतराभिप्रायत्वात् ॥

म० प्र०—शक्यार्थविशिष्टविषयत्वम्—शक्यार्थनिरूपितवैशिष्टयवद्विषयकत्वं तेन शक्यार्थविशिष्टविषयकत्वस्याजहल्लक्षणात्वेन, इत्यत्र—एतद्वाक्यघटककाकपदनिष्ठजहदजहल्लक्षणायाम् । अतिव्याप्त्यभावे हेतुमाह (काकादेरिति) विशेष्यत्वेन—दध्युपघातकत्वविशेषणविशेष्यत्वेन, तद्विशिष्टविषयत्वाभावात्—शक्यार्थविशिष्टविषयकत्वाभावात् यतः काकादेर्दध्युपघातकत्वविशेषणविशेषत्वमतः काकपदनिष्ठजहदजहल्लक्षणायां शक्यार्थविशिष्टविषयकत्वंनास्तीति भावः । अत्र काकपदे जहदजहल्लक्षणाकथनं तत्रातिव्याप्तिवारणं च स्वमतेनैव नतु सांप्रदायिकमतेन तन्मते काकेभ्यो दधिरक्ष्यतामित्यत्र काकपदस्याजहल्लक्षणावत्त्वेन जहदजहल्लक्षणावत्त्वादिकथनासंभवादिति बोध्यमिति, इह—मूले तस्य लक्षणे विशिष्टवाचकशब्दनिवेशस्य, तस्य—काकपदस्य, आकृतिः—देवदत्तत्वादिजातिलक्षणो धर्मः, असंभवः—शक्यैकदेशमात्रविषयकवृत्तित्वमितिलक्षणासंभवः (एतल्लक्षणेति) शक्यैकदेशेत्यादिलक्षणेत्यर्थः । सिद्धान्ते—मूलकारमते (असिद्धेरिति) तत्त्वमस्यादिवाक्यघटकतत्त्वमादिपदेष्विति शेषः । लक्षणात्रैविध्यस्य—तत्त्वमस्यादिवाक्यघटकत्वमादिपदेषु तृतीयलक्षणाकथनस्य (मतांतरेति) सांप्रदायिकमतेत्यर्थः ॥

मू०--यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिः तत्रैव स्वातंत्र्येणोपस्थितये लक्षणाभ्युपगमः यथा नित्यो घट इत्यत्र घटपदात् घटत्वस्यशक्त्या स्वातंत्र्येणानुपस्थित्यातादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा एवमेव तत्त्वमस्यादिवाक्येपि न लक्षणा शक्त्यास्वातंत्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावादन्यथा गेहे घटः घटे रूपं घटमानयेत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधयोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वं लक्षणयैव स्यात् । तस्मात्तत्त्वमसीति वाक्ये आचार्य्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या ॥

Funding by IKS-MoE

शि० म०—ननु विशेषणपरेपि नित्यो घट इत्यादौ लक्षणा न स्याद्विशेषादित्यत आह (यत्रपदार्थैकदेशस्येति । स्वातंत्र्येणेति) विशेषणत्वेन शक्त्युपस्थितस्य घटत्वादेरन्यान्विततयानिराकांक्षत्वेन स्वतंत्रोपस्थितेराकांक्षोत्थापकतया तस्या एवान्वयबोधांगत्वादिति भावः । ननु विशिष्टवाचकपदस्य विशेष्यपरत्वेपि लक्षणैव, तदेकदेशत्वसाम्याल्लाघवेन शक्यैकदेशपरत्वस्य तत्र प्रयोजकत्वात् अत एव न्यायः पदार्थः पदार्थेनान्वेति, नतु तदेकदेशेनेति तथाचानित्यो घटः सोयं देवदत्तस्तत्त्वमसीत्यादावपि लक्षणेत्यतआह (अन्यथेति घटादिपदानामिति) नचात्राप्यनुमतिः अपसिद्धांताद्विशेष्यस्यैकदेशत्वेपि शक्त्यैवस्वातंत्र्येणोपस्थिततया अन्वयबोधोपपत्तौ पुनस्तदुपस्थितये एवलक्षणाकल्पनस्याप्रामाणिकत्वाच्चेति भावः ॥

म० प्र०—विशेषणपरे—विशेषणे घटत्वादिविशेषणे परं तात्पर्य्यं यस्य पदस्य वाक्यस्य वा तत्तथा तस्मिन्, अविशेषात्—एकदेशपरत्वस्य तुल्यत्वात्, अन्यान्विततया—व्यक्त्यन्विततया, आकांक्षोत्थापकतया—मम कुत्रान्वयो भवतीत्याकांक्षोत्पादकतया तस्य एव—स्वातंत्र्येणोपस्थितेरेव । परममूले (यत्रेति) यस्मिन्विशेषणपरे वाक्ये इत्यर्थः । परममूले (तत्रैवेति) तादृशविशेषणपरवाक्यघटकपदे एवेत्यर्थः । परममूले (लक्षणाभ्युपगमइति) स्वातंत्र्येणोपस्थितपदार्थस्यान्वययोग्यत्वाद्यस्मिन्वाक्ये पदार्थैकदेशस्य शक्त्यैवस्वातंत्र्येणोपस्थितिर्न तादृशवाक्यघटकपदे शक्यैकदेशमात्रविषयवृत्तित्वरूपजहदजहल्लक्षणा यादृशवाक्ये पदार्थैकदेशस्य शक्त्याविशेषणतयोपस्थितिस्तादृशवाक्यघटकपदे पदार्थः पदार्थेनान्वेति नतु पदार्थैकदेशेनेति न्यायात्स्वातंत्र्येणोपस्थितपदार्थस्यान्वययोग्यत्वात्पदार्थैकदेशस्य स्वातंत्र्येणोपस्थितये शक्यैकदेशमात्रविषयवृत्तित्वरूपजहदजहल्लक्षणाभ्युपगम इति भावः । तदेकदेशत्वसाम्यात्—विशेष्यविशेषणपरपदयोः शक्यैकदेशपरत्वस्य तुल्यत्वात् लाघवेन—पदस्य विशेषणपरत्वे सति शक्यैकदेशपरत्वापेक्षया शक्यैकदेशपरत्वेलाघवेन, तत्र—जहदजहल्लक्षणायाम् अतएव—विशेष्यविशेषणपरोभयविधशब्दे जहदजहल्लक्षणा स्वीकारादेव (न्यायइति) विशेष्यपरपदे जहदजहल्लक्षणास्वीकारे हि लक्ष्यव्यक्त्यंशस्य पदार्थत्वेनानित्यादिपदार्थेन सहघटपदत्वविशिष्टैकदेशघटादेरन्वयोपि संभवति । अन्यथा घटपदवाच्यघटत्वविशिष्टैकदेशघटादेः पदार्थैकदेशत्वेनानित्यादिपदार्थेन सह घटपदवाच्यघटत्वविशिष्टैकदेशघटादेरन्वयो न स्यादिति भावः । परममूले (एवमेवेति) विशेषणस्य स्वातंत्र्येणोपस्थितये विशेषणपरपदे एवलक्षणाभ्युपगमेन विशेष्यपरपदेलक्षणानभ्युपगमप्रकारेणैवेत्यर्थः । परममूले (वाक्येपीति) वाक्यघटकतत्त्वंपदयो-

Funding by IKS-MoE

रपीत्यर्थः । परममूले (अन्यथेति) विशेष्यपरपदेपि लक्षणास्वीकारे इत्यर्थः । परम मूले (इतिवाक्येइति) एतादृशवाक्यघटकतत्त्वंपदयोरित्यर्थः । अत्रापि लक्षणयाघटादिपदानां विशेष्यमात्रपरत्वमित्यस्मिन्नर्थेपि, अनुमतिः—संमतिः ॥

मू०—जहदजहल्लक्षणोदाहरणं तु काकेभ्यो दधिरक्षतामित्यादिकमेव तत्र शक्यकाकपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेणाकाके काके च काकशब्दस्य प्रवृत्तेः । लक्षणा बीजं तु तात्पर्य्यानुपपत्तिरेव नत्वन्वयानुपपत्तिः । काकेभ्यो दधिरक्षतामित्यत्रान्वयानुपपत्त्यभावात् । गंगायां घोष इत्यादौ तात्पर्य्यानुपपत्तेरपि संभवात् । लक्षणा च न पदमात्रवृत्तिः किंतु वाक्यवृत्तिरपि ॥

शि० म०—तर्हि जहदजहल्लक्षणाया निर्विषयत्वापत्तिरित्याशंक्यविशिष्टवाचकत्ववादिमतेन स्वयं तद्विषयमाह (जहदजहल्लक्षणोदाहरणं त्विति) छत्रिणो यांतीत्यादिकमादिपदग्राह्यं (शक्येति) शक्यतावच्छेदकेत्यर्थः । ननु काकेभ्यो दधिरक्ष्यतामित्यादौ लक्षणाया न शक्यसंबंधिमात्रविषयत्वं जहल्लक्षणात्वप्रसंगात् । नच शक्याशक्यविषयत्वं तदनुगतलक्ष्यतावच्छेदकस्याप्रतीतेरित्याशंक्य दध्युपघातकत्वमेव स्वार्थसंबंधिशक्याशक्यवृत्तिलक्ष्यतावच्छेदकमित्याह (अशक्येति) एवंलक्षणानिरूपिता संप्रति तद्बीजं निरूपयति (लक्षणाबीजंत्विति) एवकारव्यावर्त्यमाह (नत्विति) किमन्वयानुपपत्तिस्तद्बीजं तात्पर्य्यविषयान्वयानुपपत्तिर्वा नाद्य इत्याह (काकेभ्यइति) न द्वितीयः लाघवावश्यकत्वाभ्यां तात्पर्य्यानुपपत्तेरेव लक्षणाबीजत्वौचित्यात । ननु तात्पर्य्यविषयान्वयानुपपत्तिर्गुर्व्यपि गंगायां घोष इत्यादौ क्लप्तत्वाल्लक्षणाबीजं नतु तात्पर्य्यानुपपत्तिरित्यत आह (गंगायामिति) लक्षणापदमात्रवृत्तिवृत्तित्वाच्छक्तिवदिति नैयायिकास्तान्प्रत्याह (लक्षणाचेति) उक्तानुमानं च शक्तित्वेन सोपाधिकमिति भावः ॥

म० प्र०—तर्हि—तत्त्वंपदादौजहदजहल्लक्षणानंगीकारे, जहदजहल्लक्षणाया—शक्याशक्यविशेष्यकवृत्तित्वरूपजहदजहल्लक्षणायाः, निर्विषयत्वापत्ति—विषयोदाहरणयोरभावापत्तिः (छत्रिणो यांतीत्यादिकमिति) अत्रछत्रिपदस्यैकसार्थवाहिषु लक्षणैकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधाच्छत्रिशब्दे लक्षणाभिधानं तु वाक्य-

Funding by IKS-MoE

लक्षणावादिमताभिप्रायेण नैयायिकमतेतु छत्रपदस्यैकसार्थवाहित्वे लक्षणाप्रत्ययार्थश्च संबंधी तथाचैकसार्थवंतो गच्छंतीत्यन्वयबोधः एकसार्थवाहित्वं चैकसार्थ एव नत्वेकसार्थगंतृत्वमेकसार्थवाहित्वस्यैकसार्थगंतृत्वरूपत्वेहि छत्रशब्दलक्ष्यार्थस्य नैराकांक्ष्येण यांतीत्यनेनानन्वयापत्तेरिति (तदनुगतेति) शक्याशक्यवृत्तीत्यर्थः (स्वार्थेति) काकादिपदार्थेत्यर्थः । परममूले (अकाकेइति) दध्युपघातके शुनकादावित्यर्थः (तात्पर्य्यविषयेति) वक्त्रिच्छारूपतातपर्य्यविषयतीरादीत्यर्थः । शक्तित्वेनसोपाधिको-शक्तित्वाभिन्नोपाधिविशिष्टं नचपदमात्रवृत्तित्वस्य पदत्वे सत्त्वेन पदत्वे शक्तित्वाभावेन च शक्तित्वस्य साध्याव्यापकत्वमिति वाच्यं, साधनावच्छिन्नसाध्यव्यापकत्वस्य विवक्षितत्वात् ॥

मू०—यथा गंभीरायांनद्यां घोष इत्यत्र गम्भीरायां नद्यामिति पदद्वयसमुदायस्य तीरे लक्षणा; ननु वाक्यस्याशक्ततया कथं शक्त्यसंबंधरूपा लक्षणा 'उच्यते' शक्त्या यत्पदसम्बन्धेन ज्ञाप्यतें तत्संबंधो लक्षणा। शक्तिज्ञाप्यश्च यथा पदार्थः तथा वाक्यार्थोपीति ॥

शि० म०—ननु शक्तेः पदमात्रवृत्तित्वे शक्तित्वं न प्रयोजकं लाघवेन सामान्यधर्मस्य वृत्तित्वस्यैव तत्प्रयोजकत्वादित्याशंक्य चित्रगुमानय गंभीरायां नद्यां घोष इत्यादौ गवादिपदे लक्षणा न चित्रादि पदे इत्यत्र नियामकाभावेन पदसमुदाये एव तत्र लक्षणायास्त्वया स्वीकर्त्तव्यतया गुर्वपि शक्तित्वं तत्र प्रयोजकमित्याह (· यथागंभीरायामिति) शक्यसंबंधो लक्षणावाक्ये च शक्त्यनाश्रयतत्कल्पनं बाधितमिति चोदयति (नन्विति) शक्यसंबंध एव लक्षणा स्वशक्तिज्ञाप्यं चेह शक्यपदेन विवक्षितं शक्तिज्ञाप्यश्च पदार्थज्ञानद्वारा वाक्यार्थोपीति वाक्ये लक्षणायुक्तेत्याह (उच्यतेइति) ननु शक्यसंबधत्वापेक्षया स्वशक्तिज्ञाप्यसंबंधत्वं गुर्विति चेन्न, वाक्यलक्षणायाः प्रमाणान्तरसिद्धत्वेन तत्साधारणगुरुलक्षणप्रणयनस्य न्याय्यत्वात् । नच ज्ञाप्यसंबंधत्वमेव लक्षणालक्षणमस्तु तस्य वाक्यलक्षणासाधारणत्वात्ततश्च लक्षणे स्वशक्तिपदं व्यर्थमिति वाच्यम् ॥

म०प्र०—उपाधेः साध्यव्यापकत्वे सति साध्यव्याप्यत्वरूपसाध्यसमनियतत्वनियमाच्छक्तित्वस्योक्तसाध्यसमनियतत्वाभावेन नोपाधित्वमित्यभिप्रेत्याशंकते (ननुशक्तेरिति) लाघवेन—लक्षणाभिन्नत्वे सति वृत्तित्वस्य शक्तित्वस्वरूपत्वाल्लक्षणाभिन्नत्वे सति

Funding by IKS-MoE

वृत्तित्वरूपशक्तित्वस्य पदमात्रवृत्तित्वप्रयोजकत्वापेक्षया सामान्यधर्मवृत्तित्वस्य पदमात्रवृत्तित्वप्रयोजकत्वे लाघवेन। अस्याग्रे संभवति सामान्यधर्मे विशेषधर्मे तदन्याय्यमिति न्यायात्। संभवति लघौ गुरौ तदन्याय्यमिति न्यायाच्चेति शेषः, तत्प्रयोजकत्वात्–पदमात्रवृत्तित्वप्रयोजकत्वात्, तत्र–चित्रगुमानयेत्यादिवाक्ये, गुर्वपि–वृत्तित्वापेक्षया गुरुभूतमपि, तत्र–पदमात्रवृत्तित्वे, तत्कल्पनम् शक्यसंबंधरूपलक्षणाकल्पनम्, बाधितम्–अनुपपन्नम्, स्वशक्तिज्ञाप्यं–पदशक्तिज्ञानजन्यज्ञानविषयः, इह–लक्षणालक्षणवाक्ये, पदार्थज्ञानद्वारा–पदार्थोपस्थितिद्वारा। परममूले (शक्त्यायत्पदसबंधेनेति) पदसंबंधेन शक्त्यापदनिष्ठार्थसंबंधरूपया शक्त्या. यज्ज्ञाप्यते–स्वज्ञानजन्यज्ञानविषयीक्रियते तत्संबंधो लक्षणेत्यर्थः। शक्यसंबंधत्वापेक्षया–शक्यसंबंधत्वरूपलक्षणालक्षणापेक्षया, स्वशक्तिज्ञाप्यसंबंधत्वं–पदशक्तिज्ञानजन्यज्ञानविषयसंबंधत्वरूपलक्षणालक्षणम् (प्रमाणांतरेति) लक्षणावाक्यवृत्तिः शक्तिभिन्नसत्त्वेसति वृत्तित्वाद्व्यंजनावद्गंभीरायां नद्यामित्यादिपदसमुदायाल्लक्षणावान् शब्दत्वाद्गंगायां घोष इत्यत्र गंगापदवदित्यादिनियामकाभावसहकृतानुमानप्रमाणातिरिक्तेन शब्दभावनायामर्थवादवाक्यज्ञाप्यप्राशस्त्यमिति कर्त्तव्यतात्वेनान्वेतीत्यादिप्राचीनवाक्यरूपेण प्रमाणांतरेण सिद्धत्वेन निश्चितत्वेनेत्यर्थः (तत्साधारणेति) वाक्यलक्षणावृत्तीत्यर्थः। ज्ञाप्यसंबंधत्वम्–पदार्थोपस्थीतिरूपज्ञानजन्यशाब्दज्ञानविषयसंबंधत्वम्, तस्य–ज्ञाप्यसंबंधत्वरूपलक्षणालक्षणस्य, साधारणत्वात्–वृत्तित्वात् ॥

मू०–न काचिदनुपपत्तिः एवमर्थवादवाक्यानां प्रशंसारूपाणां प्राशस्त्ये लक्षणा 'सोरोदीत्' इत्यादि निंदार्थवाक्यानां निंदितत्वे लक्षणा अर्थवादगतपदानांप्राशस्त्ये लक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यंस्यात् ॥

शि० म०–तथासति गाव्यादेरपभ्रंशस्यलक्षणापत्तौ साधुत्वापत्तेः, वृत्तिमत्त्वस्यैव शब्दसाधुत्वप्रयोजकत्वात, नच वाक्यस्य स्वनिष्ठशक्त्यभावेन कथं स्वशक्तिज्ञाप्यसंबंधरूपा लक्षणा स्यादिति वाच्यम्। शक्त्याश्रयपदस्यैव समुदायरूपेण वाक्यत्वाभ्युपगमात, यद्वाज्ञाप्यसंबंध एव नचापभ्रंशस्य साधुत्वापत्तौ यज्ञेप्रयोगापत्तिः व्याकरणव्युत्पाद्यत्वस्य साधुत्वव्यवहारप्रयोजकत्वात्, व्याकरणं च प्रकृतिप्रत्ययानुव्याख्यायिकास्मृतिरिति नात्माश्रयः ततश्चोपपन्ना वाक्ये लक्षणेति तदेतत् सर्वमभिप्रेत्याह (नका-

Funding by IKS-MoE

चिदनुपपत्तिरिति) ननुचित्रगुमानय गंभीरायां नद्यां घोष इत्यादावपि गवादिपद एव लक्षणा नच नियामकाभावः । विशेष्यपदत्वस्य नियामकत्वात् अतएवाभेदान्वयस्थले नीलो घट इत्यादौ विशेषणविभक्तिस्साधुत्वार्था, नच पदांतरवैयर्थ्यं चित्रगोस्वामिनि गंभीरनदीतीरादौ तात्पर्य्यद्योतकत्वात् अत एव प्रजयतीत्यादावुपसर्गस्य प्रकृष्टे जयेतात्पर्य्यद्योतकत्वं नतु शक्तिर्नलक्षणा वा ततश्च वाक्ये न लक्षणेत्यत आह (एवमिति । अर्थवादवाक्यानामिति) नहि विश्वरूपो वै त्वाष्ट्रइत्यादावनेकपदसंदर्भात्मके अर्थवादवाक्ये विशेष्यपदं लाक्षणिकं विशेषणपदं तु द्योतकमिति नियमोस्ति ॥

म०प्र०—तथासति—ज्ञाप्यसंबंधत्वस्य लक्षणालक्षणत्वे सति लक्षणालक्षणे शक्त्यनिवेशेसतीति यावत् (गाव्यादेरिति) गावीशब्दो हि गोबोधक आदिपदगृहीतगोपुतिलाशब्दोपि गोबोधक इति, लक्षणापत्तौ—ज्ञाप्यं गौस्तत्संबंधस्य पुरुषे सत्त्वेन गावीशब्दस्य पुरुषे लक्षणाप्राप्तौ (साधुत्वापत्तेरिति) यस्य नयेऽपभ्रंशशब्दानां शक्तिलक्षणे न स्तः शक्तिभ्रमादपभ्रंशशब्देभ्यो गवाद्यर्थबोधस्तन्नयेनेदं समाधानमिति भावः (वाक्यत्वाभ्युपगमादिति) शक्तिमत्पदसमुदायस्यवाक्यत्वात्पदानांशक्तिरेव वाक्यशक्तिरिति भावः, समुदायरूपेण—समुदायघटकत्वेनरूपेण आनुख्यायिका—बोधिका नात्माश्रयइति साधुत्वबोधकं व्याकरणमिति व्याकरणलक्षणकरणेन साधुत्वज्ञाने साधुत्वज्ञानापेक्षारूपात्माश्रयो नास्तीत्यर्थः । ततश्च—ज्ञाप्यसंबंधस्य लक्षणालक्षणत्वादेव (नियामकत्वादिति) प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमादितिशेषः । अतएव—विशेष्यपदत्वस्य लक्षणानियामकत्वादेव । परममूले (प्रशंसारूपाणामिति) बलवदनिष्टाननुबंधित्वरूपप्रकृष्टत्वबोधजनकरूपाणामित्यर्थः । द्योतकम्—तात्पर्य्यद्योतकम् ॥

मू०—एवंच विध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिपदेनैकवाक्यत्वं भवतीत्यर्थवादवाक्यानांपदैकवाक्यता । क्व तर्हि वाक्यैकवाक्यता यत्र प्रत्येकं भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकांक्षावशेन महावाक्यार्थबोधकत्वं तत्र वाक्यैकवाक्यता ॥

शि० म०—विशेष्यपदानामपि नानात्वात्तथाचार्थवादस्थले वाक्यलक्षणायाः क्लृप्तत्वेन लोकेपि गंभीरायां नद्यामित्यादौ वाक्य एव लक्षणे-

तिभावः। अर्थवादे पदैकवाक्यता प्रसिद्धिरपि तत्र वाक्यलक्षणायां मानमित्याह (एवंचेति) अन्यथा तव मते अर्थवादांतर्गतस्य कस्यचिदेव पदस्य प्रशस्तत्वानिंदितत्वरूपार्थप्रत्यापकतया तस्यैव पदैकवाक्यत्वापत्तावर्थवादपदसमुदाये तत्प्रसिद्धिर्न स्यादितिभावः। प्रसंगाद्वाक्यैकवाक्यतां निरूपयितुमाकांक्षामुद्भावयति (क्वतर्हीति) यद्वा तत्प्रसिद्धिर्न वाक्यलक्षणायांप्रमाणं पदमात्रवृत्तिलक्षणावादिमते एवार्थवादांतर्गतस्य पदस्य सतः पदान्तरद्योतिततात्पर्य्यविषयप्राशस्त्यार्थप्रतिपादकतया पदैकवाक्यत्वसंभवात्। अन्यथा वाक्यस्यापि सतः पदैकवाक्यत्वे कुत्रापि वाक्यैकवाक्यता न स्यादित्याक्षिपति (क्वतर्हीति) नहि वाक्ययोः सतोरेकवाक्यत्वं वाक्यैकवाक्यत्वं किंतु वाक्यार्थबोधकयोः तथाचार्थवादस्य वाक्यत्वेपि प्राशस्त्यरूपार्थबोधकतया वाक्यार्थानुभावकत्वाभावान्न वाक्यैकवाक्यतेत्याह। (यत्रेति) विशेष्येविशेषणमिति न्यायेन॥

म०प्र०—पदैकवाक्यताप्रसिद्धिः—पदस्यवाक्येन सहैकवाक्यतैकार्थबोधकत्वं पदैकवाक्यता तस्याः प्रसिद्धिः। परममूले (पदस्थानीयतयेति) पदार्थविषयकबोधजनकत्वरूपपदकार्य्यकारित्वेन पदरूपतयेत्यर्थः। परममूले (विधिपदेनेति) विधिवाक्येनेत्यर्थः। तत्प्रसिद्धिः—पदैकवाक्यता प्रसिद्धिः (वादिमतेएवेति) अस्यपदैकवाक्यत्वसंभवादित्यनेनान्वयो बोध्य इति। सतः—विद्यमानस्य, अन्यथा—उक्तप्रकारेणार्थवादांतर्गतपदलक्षणानंगीकारे, एकवाक्यत्वम्—एकवाक्यार्थबोधकत्वम् (वाक्यार्थबोधकयोरिति) वाक्यार्थबोधकयोर्वाक्ययोः सतोरेकवाक्यत्वं वाक्यैकवाक्यत्वमित्यन्वयः, प्राशस्त्यरूपार्थबोधकतया—प्राशस्त्यरूपप्राशस्त्यपदार्थबोधकतया अर्थवादवाक्यानां प्राशस्त्यपदार्थबोधकत्वमेव नतु वाक्यार्थबोधकत्वमिति भावः। अनुभावकत्वाभावात्—अनुभवजनकत्वाभावात्। ननु वाक्यैकवाक्यतायां घटमानयेत्यादिलौकिकवाक्ययोरुदाहरणत्वसंभवेनालंवाक्यैकवाक्यतायां वैदिकवाक्ययोरुदाहरणत्वमित्यत आह (विशेष्येविशेषणमिति) घटमानयेत्यत्राख्यातार्थविशेष्यकृतौविशेषणं धात्वर्थस्तत्रविशेषणं कर्मत्वं तत्र विशेषणं घट इत्यनेन प्रकारेण युगपदेव वाक्यार्थज्ञानोत्पत्तिरित्यर्थः॥

मू०—यथा 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, इत्यादिवाक्यानां समिधो यजति, इत्यादिवाक्यानां च परस्परापेक्षितांगांगिभावबोधकतयैकवाक्यता॥

Funding by IKS-MoE

शि० म०–पदार्थसमूहालंबनादेव वैशिष्ट्यावगाहिमहावाक्यार्थज्ञानोपपत्तौ मध्येनावांतरवाक्यार्थबोध इति वाक्यैकवाक्यतायां लोके कश्चिद्विप्रतिपद्येतापीत्यतो निःसंदिग्धवैदिकवाक्यमुदाहरति (यथेति । परस्परेति) प्रकृतीनां दर्शपूर्णमासादीनां स्वप्रकरणस्थांगैर्निवृत्तोपकाराकांक्षाणामनारभ्याधीतांगैर्विकृतीनां चातिदिष्टांगैः। परिपूर्णांशानां शरमयादिभिः सह नष्टाश्वदग्धरथवदुत्थिताकांक्षाविरहेपि रक्तः पटोभवतीतिवदुत्थापितपरस्पराकांक्षासत्त्वादित्यभिप्रायः ॥

म०प्र०–कश्चित्–प्राचीनः (विप्रतिपद्येतापीति) घटमानयेत्यादौ प्रथमं घटीया कर्मतेतिबोधस्तत आनयनानुकूलाकृतिरितिप्रत्येकवाक्यार्थज्ञानानंतरं महाक्यार्थज्ञानं न भवति किंतु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायेन क्रियाकर्मभावादिरूपेणान्वयविषयकशाब्दबोधो भवतीति प्राचीनाः नवीनास्तु यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते तेन तेनान्वितःस्वार्थः पदैरेवावगम्यते तथाच विशिष्टस्य वैशिष्ट्यमिति न्यायात्प्रथमं प्रत्येकवाक्यार्थबोधानंतरमेव महावाक्यार्थबोधइति प्राहुरिति भावः। ननु परममूले परस्परापेक्षितांगांगिभावबोधकतयैव वाक्यानामेकवाक्यतांगीकाराद्दर्शपूर्णमासादिप्रकृतियागानामनारभ्याधीतपर्णमयीत्वाद्यंगेष्वाकांक्षाभावेन दर्शपूर्णमासादिप्रकृतिबोधकवाक्यानामनारभ्याधीतांगबोधकवाक्यानां चैकवाक्यता न स्यात्तथा विकृतीनां शरमयादिष्वाकांक्षाभावेन विकृतिबोधकवाक्यानां शरमयाद्यंगबोधकवाक्यानां चैकवाक्यता न स्यादिति चेन्नेत्यभिप्रेत्य हेतुमाह (प्रकृतीनामिति) प्रकृतीनामनारभ्याधीतांगैः सहोत्थिताकांक्षाविरहेपि विकृतीनां च शरमयादिभिः सहोत्थिताकांक्षाविरहेपीत्यन्वयः । प्रकृतीनां–समुपदिष्टसकलांगकानां, स्वप्रकरणस्थांगैः–प्रयाजानुयाजादिरूपदर्शपूर्णमासप्रकरणस्थांगैः । अनारभ्याधीतांगैः–दर्शपूर्णमासावनारभ्ययस्य पर्णमयीजुहुर्भवतीत्यादिवाक्ये पठितैर्जिह्वाद्यंगैः, विकृतीनाम्–अनुपदिष्टसकलांगकानां, अतिदिष्टांगैः–प्रकृतिवद्विकृतिः कर्त्तव्येत्यतिदिष्टप्रयाजाद्यंगैः । परिपूर्णांशानाम्–परिप्राप्तांशानाम् । शरमयादिभिः–शरमयाद्यंगैः व्यतिरेकिदृष्टांतमाह (नष्टाश्वदग्धरथवदिति) नष्टाश्वदग्धरथपुरुषयोरुत्थिताकांक्षावदित्यर्थः । उत्थिताकांक्षाविरहेपि–पदार्थांतरप्रयोज्यान्वयागनुभावकत्वरूपायाः पदार्थांतरव्यतिरेकप्रयुक्ताजनितान्वयबोधकत्वरूपाया वोत्थिताकांक्षाया अभावेपि (रक्तः पटोभवतीतिवदिति) पटोभवतीत्युक्ते पटस्य स्वान्वयार्थं रक्तादिपदार्थविषयकोत्थिताकांक्षाभावेपि कथंभूतः पट इत्याकांक्षोत्थापनेन रक्तपदार्थस्य पटपदार्थेनान्वयवदित्यर्थः ॥

Funding by IKS-MoE

मू०—तदुक्तं भट्टपादैः ॥

स्वार्थबोधे समाप्तानामंगांगित्वाद्यपेक्षया ॥
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते ॥
इति एवं द्विविधोपि पदार्थो निरूपितः तदुपस्थितिश्चासत्तिः ॥

शि० म०-ननु वेदेपि नावांतरवाक्यार्थबोधानंतरं महावाक्यार्थज्ञानं तथासतिवाक्ययोर्जनितान्वयबोधत्वेन निराकांक्षतया महावाक्यार्थबोधो न स्यादिति चेत् न, अवांतरवाक्यार्थबोधानंतरं तदनुकूलाकांक्षाभावेन वाक्याभ्यां पुनरवांतरवाक्यार्थज्ञानाभावेप्यजनिततात्पर्य्यविषयमहावाक्यार्थबोधाभ्यां ताभ्यामेव संहताभ्यां महावाक्यार्थबोधसंभवात् । अत्र सदाचार्य्यसंमतिमाह (तदुक्तमिति) नच वेदेपि विशेष्येविशेषणमिति न्यायेन प्रथमत एव विशिष्टवैशिष्ट्यावगाहिमहावाक्यार्थबोधोस्तुलाघवादिति वाच्यम् । तथासति कर्मस्वरूपज्ञानानंतरं फलान्वयबोधः, ततः शेषशेषिभावान्वयबोध इति राद्धांतभंगापत्तेः । उत्पन्नस्युत्पन्नशिष्टगुणविभागानुपपत्तेश्चेति (तदुपस्थितिरिति) शक्तिलक्षणान्यतरसंबंधेन पदजन्यपदार्थस्मृतिरासत्तिरित्यर्थः । नन्वस्तुपदार्थोपस्थितिरासत्तिः । तथापि न तज्ज्ञानं शाब्दज्ञाने हेतुर्मानाभावात् ॥

म० प्र०—तथासति—प्रत्येकंवाक्यार्थबोधानंतरं महावाक्यार्थबोधांगीकारेसति (तदनुकूलेति) अवांतरवाक्यार्थबोधानुकूलेत्यर्थः । वाक्याभ्याम्—अवांतरवाक्याभ्याम्, अजनिततात्पर्य्यविषयमहावाक्यार्थबोधाभ्यां—अजनितोनुत्पादितस्तात्पर्य्यविषयमहावाक्यार्थबोधो याभ्यां वाक्याभ्यां ते तथा ताभ्याम् (ताभ्यामेवेति) अवान्तरवाक्याभ्यामेव सहिताभ्याम्—एकज्ञानविषयत्वरूपमेलनवद्भ्याम् । परममूले (स्वार्थबोधेसमाप्तानामिति) प्रथमं स्वार्थबोधे जनकतां प्राप्तानां, वाक्यानां—अवान्तरवाक्यानामंगांगिभावाद्यपेक्षयापुनः संहत्य—मिलित्वा, एकवाक्यत्वं—वाक्यैकवाक्यत्वंसंपद्यते इत्यर्थः । प्रथमतः—अवांतरवाक्यार्थबोधात्प्राग्, लाघवात्—खंडवाक्यार्थबोधानंतरमहावाक्यार्थबोधांगीकारापेक्षया प्रथममेवमहावाक्यार्थबोधांगीकारे लाघवात्, तथासति—प्रथममेवमहावाक्यार्थबोधांगीकारे सति, कर्मस्वरूपज्ञानानंतरम्—आग्नेयोऽष्टाकपालोभवतीत्याद्युत्पत्तिविधिनाकर्मस्वरूपज्ञानानंतरम्, फलान्वयबोधः—दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्याद्यधिकारविध्यवगतफलस्य कर्मणा सह संबंधज्ञानं, ततः शेषशेषिभावा-

न्वयबोधः–पश्चात्प्रकरणसहकृतविनियोगविधिनाशेषशेषिभावान्यबोधः (उत्पत्तीति) कर्मस्वरूपमात्रबोधकोविधिरुत्पत्तिर्विधिरिति लक्षणलक्ष्येकर्मोत्पतिवाक्ये विहितोगुण-उत्पत्तिविशिष्टोगुणो यथाष्टाकपालादिः, उत्पन्ने कर्मणि विनियोगविधिना विहितो गुण उत्पन्नविशिष्टोगुणस्तयोर्विभागासिद्धेरित्यर्थः ॥

मू०–सा च शाब्दबोधे हेतुः तथैवान्वयव्यतिरेकदर्शनात् । एवं महावाक्यार्थबोधेऽवांतरवाक्यार्थबोधो हेतुः तथैवान्वयाद्यवधारणात्, क्रमप्राप्तं तात्पर्य्यंनिरूप्यते ॥

शि० म०–नापि स्वरूपसती पदार्थानां शाब्दज्ञाने विशेषणत्वेन भासमानतया तदुपस्थितेर्विशेषणज्ञानत्वेन हेतुत्वापत्तौ शाब्दज्ञानासाधारणकारणताभ्युपगमभंगापत्तेरित्यत आह (साचेति) आसत्तिरेव हेतुर्नतु तज्ज्ञानं तथाच पदजन्यपदार्थोपस्थितित्वेन हेतुत्वादसाधारणमिति भावः । नच तेन रूपेण हेतुत्वे मानाभाव इत्याह (तथैवेति) नच विशेषणज्ञानत्वेन हेतुत्वं विशेष्यधियोऽहेतुत्वापातात् नचेष्टापत्तिः यावदन्वयप्रतियोग्युपस्थितावेवान्वयबोधः तदभावेनेत्यन्वयव्यतिरेकाविरोधादित्यर्थः । एवं शाब्दज्ञानकारणानि निरूप्यतद्विशेषकारणमाह (एवमिति) नचोक्तन्यायेन वैदिकमहावाक्यार्थज्ञान एवावान्तरवाक्यार्थज्ञानं हेतुः नतु लोकेपि तत्र समूहालंबनात्तदुपपत्तौ विरोधाभावादिति वाच्यम्, वैदिकस्थले लाघवेन महावाक्यार्थज्ञानत्वस्यैवावांतरवाक्यार्थज्ञानजन्यतावच्छेदकतया क्लृप्तत्वेन ॥

म० प्र०–शाब्दज्ञानेविशेषणत्वेनभासमानतया–शाब्दज्ञाननिरूपितविशेषणत्वविशिष्टविषयतावत्वेन, तथाच–आसत्तेः स्वरूपेण हेतुत्वे सति, तेनरूपेण–पदजन्यपदार्थोपस्थितित्वेन रूपेण, हेतुत्वे–आसत्तेःकारणत्वे । परममूले (तथैवान्वयव्यतिरेकदर्शनादिति) पदजन्यपदार्थोपस्थितिसत्त्वे शाब्दबोधसत्त्वं पदजन्यपदार्थोपस्थित्यभावे शाब्दबोधाभाव इति पदजन्यपदार्थोपस्थित्यन्वयव्यतिरेकप्रयोज्यशाब्दबोधान्वयव्यतिरेकदर्शनादित्यर्थः । यावदन्वयप्रतियोग्युपस्थितौ–निखिलान्वयनिरूपकपदार्थानां स्मृतौ । परममूले (एवमिति) यथा शाब्दबोधे आकांक्षादिकं कारणमेवं तथेत्यर्थः । परममूले (तथैवेति) आकांक्षाद्यन्वयव्यतिरेकवदित्यर्थः । परममूले (अन्वयाद्यवधारणादिति) अवांतरवाक्यार्थबोधसत्त्वे महावाक्यार्थबोधसत्त्वमवांतरवाक्यार्थबोधाभावे महावाक्यार्थबोधाभाव इत्यवांतरवाक्यार्थबोधान्वयव्यतिरेकप्रयोज्यमहावाक्यार्थबोधान्वयव्यतिरेकनिश्चयादित्यर्थः । उक्तन्यायेन–तथासति कर्मस्वरूपज्ञानानंतरमित्या-

Funding by IKS-MoE

दिवाक्योक्तयुक्त्या, लोके–लौकिकमहावाक्यार्थज्ञाने, तत्र–लौकिकमहावाक्ये । तदुपपत्तौ–महावाक्यार्थबोधापत्तौ, वैदिकस्थले–वैदिकमहावाक्यस्वरूपे, लाघवेन–वैदिकमहावाक्यार्थबुद्धित्वेऽवांतरवाक्यार्थज्ञानकार्य्यतावच्छेदकत्वापेक्षया सामान्यमहावाक्यार्थबुद्धित्वेऽवांतरवाक्यार्थज्ञानकार्य्यतावच्छेदकत्वे लाघवेन ॥

मू०–तत्रतत्प्रतीतीच्छयोच्चारितत्वंनतात्पर्यम्, अर्थज्ञानशून्येन पुरुषेणोच्चारिताद्वेदादर्थभानप्रसंगात् अयमध्यापकोऽव्युत्पन्नइतिविशेषदर्शनेनतात्पर्य्यभ्रमस्याप्यभावात् नचेश्वरतात्पर्य्यज्ञानात्तत्रशाब्दबोधइतिवाच्यम् ॥

शि० म०–लोके समूहालंबनमात्रान्महावाक्यार्थज्ञानस्यैवासिद्धेः । अन्यथा कदाचिदाकांक्षादिवशाद्यत्रावांतरवाक्यार्थज्ञानं तत्र तन्नस्यात् । यदि च पदार्थसमूहालंबनादपि महावाक्यार्थज्ञानं तदा तदजन्यमहावाक्यार्थज्ञानत्वं तज्जन्यतावच्छेदकमिति न व्यभिचार इति बोध्यम् । मौनिश्लोकादावव्याप्तिरिति दोषे सत्येव दोषान्तरमाह (अर्थज्ञानशून्येनेति) तत्र किंतात्पर्य्यज्ञानं प्रमारूपं भ्रमरूपं वा तत्राद्यं निराकृत्य द्वितीयं निरस्यति (अयमिति विशेषदर्शनेनेति) विरोधिदर्शनेनेत्यर्थः । नचेति ॥

म०प्र०–लोके–लौकिकमहावाक्ये (असिद्धेरिति) लाघवादवांतरवाक्यार्थज्ञाननिष्ठजनकतानिरूपितजन्यतावच्छेदकत्वं महावाक्यार्थज्ञानत्वस्यैव नतु वैदिकमहावाक्यार्थज्ञानत्वस्येति लौकिकमहावाक्ये समूहालंबनमात्रान्महावाक्यार्थज्ञानमेव न भवतीति भावः । अन्यथा–अवांतरवाक्यार्थज्ञानस्य महावाक्यार्थज्ञानं प्रति हेतुत्वानंगीकारे किन्तु समूहालंबनस्यैव महावाक्यार्थज्ञानं प्रति हेतुत्वस्वीकारे इति यावत्, यत्र–यस्मिन्काले. तत्र–तस्मिन्काले । तन्नस्यात्–महावाक्यार्थज्ञानं न स्यात्, तदा–तर्हि । तदजन्यमहावाक्यार्थज्ञानत्वम्–समूहालंबनाजन्यमहावाक्यार्थज्ञानत्वम्, तज्जन्यतावच्छेदकम्–अवांतरवाक्यार्थज्ञाननिष्ठजनकतानिरूपितजन्यतावच्छेदकम् । इति न व्यभिचार इति तथाच समूहालंबनाजन्यमहावाक्यार्थबुद्धित्वावच्छिन्नं प्रत्यवान्तरवाक्यार्थज्ञानत्वेन हेतुत्वं समूहालंबनजन्यमहावाक्यार्थबुद्धित्वावच्छिन्नं प्रति समूहालंबनत्वेन हेतुत्वमिति, समूहालंबनावांतरवाक्यार्थबुद्धिनिष्ठकारणतानिरूपितकार्य्यतावच्छेदकभेदेन न कारणयोर्व्यभिचार इति भावः । परममूले (तत्रेति) तात्पर्य्यनिरूपणीये सतीत्यर्थः । नन्वर्थज्ञानशून्यपुरुषोच्चारितवेदवाक्यादेस्तत्प्रतीतीच्छयोच्चरितत्वरूपतत्तात्पर्य्यभावेप्यनेनैतदर्थप्रतीतीच्छयैतद्वाक्यमुच्चरितमिति श्रोतुस्तदीयतात्पर्य्यज्ञानादर्थज्ञानशून्यपुरुषोच्चरित–

वेदवाक्याद्यर्थज्ञानं भविष्यतीत्याशंक्याह (तत्रकिमिति) श्रोतृपुरुषे इत्यर्थः । तत्र–पक्षद्वयोर्मध्ये इत्यर्थः । निराकृत्य–अर्थज्ञानशून्येनेत्यादिवाक्येन निरस्य, विरोधिदर्शनेन–भ्रमविरोध्यध्यापकनिष्ठाव्युत्पत्तिज्ञानेन ननु मास्त्वर्थज्ञानशून्यपुरुषतात्पर्य्यज्ञानादर्थज्ञानशून्यपुरुषोच्चरितवेदवाक्यादर्थबोधस्तथापीश्वरीयतात्पर्य्यज्ञानात्तत्पुरुषोच्चरितवेदवाक्याद्यर्थज्ञानं भविष्यतीश्वरस्य साक्षात्कंठताल्वादिप्रेरकत्वाभावेपि कंठताल्वादिप्रेरकतामात्रेण वेदवाक्याद्युच्चारयितृत्वसंभवादित्याशंक्यपरिहरति । परममूले (नचेति) परममूले (तत्रेति) अर्थज्ञानशून्यपुरुषेणोच्चारितवेदादिवाक्यश्रोतरिपुरुषे इत्यर्थः ॥

मू०–ईश्वरानंगीकर्तुरपि तद्वाक्यार्थप्रतिपत्तिदर्शनात् । उच्यते तत्प्रतीतिजननयोग्यत्वं तात्पर्य्यं गेहे घट इति वाक्यं गेहे घटसंसर्गप्रतीतिजननयोग्यं नतु पटसंसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं नतु पटसंसर्गपरमिति व्यपदिश्यते । ननु सैन्धवमानयेत्यादि वाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तम् ॥

शि० म०–यद्यपि साक्षात्कंठताल्वादिप्रेरकत्वाभावान्नोच्चारयितृत्वमीश्वरस्य तथापि तत्प्रेरकतामात्रमुच्चारयितृत्वं तच्च कंठताल्वादिव्यापारानुकूलकृतिमत्त्वादीश्वरेपीति भावः । अव्युत्पन्नोदीरितपदवाक्यश्राविणस्सांख्यमीमांसकादेरपौरुषेयत्वनिश्चयवतस्तात्पर्य्यात् शाब्दज्ञानदर्शनेन व्यभिचारान्न तात्पर्य्यज्ञानं हेतुरित्याह (ईश्वरेति) (तदिति) स्वार्थसंसर्गानुभवजननस्वरूपयोग्यत्वं तात्पर्य्यमित्यर्थः । ननु फलोपधानं तस्मिन् सति तात्पर्य्यज्ञानं सतिच तस्मिन्वाक्यार्थज्ञानफलमित्यन्योन्याश्रयात् । न केवलमिदं तात्पर्य्यं शाब्दज्ञानोपयोगि किंतु व्यवहारोपयोगिचेत्याह (गेहेइति) पटसंसर्गपरमिति व्यपदिश्यत इत्यन्वयः । अन्यथाइति शब्दोपात्तहेतुविशेषापत्तेः । (नन्विति) श्वेतोधावतीत्यादिवाक्यमादिपदग्राह्यम् ॥

म० प्र०–तत्प्रेरकतामात्रकम्–कंठताल्वादिप्रेरकतैव नतु साक्षात्कंठताल्वादिप्रेरकतेति मात्रपदार्थः । तच्च–कंठताल्वादिप्रेरकत्वं तु, अपौरुषेयत्वनिश्चयवतः–मीमांसकादेरीश्वरानंगीकारेण वेदस्येश्वररूपपुरुषप्रणीतत्वाभावनिश्चयवतः, तात्पर्य्यात्–तात्पर्य्यज्ञानात्, व्यभिचारात्–ईश्वरीयतात्पर्य्यज्ञानस्य व्यतिरेकव्यभिचारात्,

Funding by IKS-MoE

तात्पर्यज्ञानम्–ईश्वरतात्पर्यज्ञानम् । परममूले (तद्वाक्येति) अर्थज्ञानशून्यपुरुषवाक्येत्यर्थः (स्वार्थेति) पदार्थसंसर्गानुभवस्य वाक्यार्थसंसर्गानुभवस्य वोत्पत्तिनिरूपितकारणतावच्छेदकधर्माक्रांतत्वमित्यर्थः । ननु कार्य्यवैशिष्ट्यं योग्यत्वशब्दार्थं विहाय किमिति योग्यत्वशब्देन स्वरूपयोग्यत्वस्य ग्रहणं क्रियते इत्याशंक्याह (नत्विति) फलोपधानम्–कार्य्यवैशिष्ट्यम्, तस्मिन्सति–वाक्यार्थबोधरूपकार्य्यज्ञानेसति, संतिच–तस्मिन्–तात्पर्य्यज्ञानेसतितु, अन्यथा–पूर्वोक्तान्वयानंगीकारे किंतु पटसंसर्गपरं व्यपदिश्यते इत्यन्वयांगीकारे इति यावत्, इतिशब्दोपात्तहेतुविशेषापत्तेः–पूर्वेति शब्दनिष्ठहेतुपरत्ववदुत्तरेति शब्दोपात्तहेतुविशेषज्ञानापत्तेः–। श्वेतशब्दः श्वेतगुणवाचकः श्वा शुनक इत एतस्मात्स्थानादितीत्यर्थबोधकोपि श्वेतशब्दः इत्यभिप्रेत्य परममूलस्थादिपदार्थमाह (श्वेतोधावतीति) ॥

मू०–तदाप्यश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाल्लवणपरत्वदशायामप्यश्वादिसंसर्गज्ञानापत्तिरिति चेन्न, तदितरप्रतीतीच्छयानुच्चरितत्वस्यापि तात्पर्य्यं प्रति विशेषणत्वात् । तथाच यद्वाक्यंयत्प्रतीतिजननयोग्यत्वे सति यदन्यप्रतीतीच्छयानुच्चरितं तद्वाक्यंतत्संसर्गपरमित्युच्यते शुकादिवाक्येऽव्युत्पन्नोच्चारितवेदवाक्यादौ च तत्प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन लक्षणसत्त्वान्नाव्याप्तिः । नचोभयप्रतीतीच्छयोच्चरितेऽव्याप्तिः तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वस्य विवक्षितत्वात् ॥

शि० म०–(लवणपरत्वेति) लवणमात्रप्रतीतीच्छयोच्चारितत्वज्ञानदशायामश्वादिसंसर्गप्रतीतिजनकत्वलक्षणतात्पर्य्यप्रतीतिसंभवेन तद्वाक्यादश्वादिसंसर्गानुभवापत्तिः तत्परत्वव्यवहारापत्तिश्चेत्यर्थः । तत्प्रतीतिजनकत्वे सति तदन्यप्रतीतीच्छयानुचरितत्वं तात्पर्य्यं विवक्षितमित्याह (तदितरेति) ननु प्रथमेन तत्पदेनाश्वस्यद्वितीयेन लवणस्य परामर्शे लवणपरे वाक्ये दोषतादवस्थ्यमित्याशंक्य सर्वनाम्नो बुद्धिस्थवाचकत्वनियमेन द्वितीयतत्पदेन प्रथमतत्पदोक्तस्यैव परामर्शे अन्यथा यस्य कस्यचित्परामर्शे पटान्यघटप्रतीतीच्छयोच्चारितस्य घटमानयेत्यस्य तत्परत्वानापत्तिरित्याह (तथाचेति) भोजनप्रकरणे प्रयुक्तस्य सैंधवमानयेत्यस्य

Funding by IKS-MoE

वाक्यस्याश्वान्यलवणप्रतीतीच्छयोच्चारितत्वान्न तत्संसर्गज्ञानं नापि तदा
तत्परत्वव्यवहार इति भावः । अव्युत्पन्नवाक्ये पूर्वोक्तामव्याप्तिमुद्धरति
(शुकादीति । तदन्यमात्रेति) ॥

म० प्र०–(प्रतीतिजनकत्वलक्षणेति) प्रतीतिजननयोग्यत्वलक्षणेत्यर्थः । तद्वा-
क्यात्–सैंधवमानयेति वाक्यात्, तत्परत्वव्यवहारापत्तिश्च सैंधवमानयेति वाक्यमश्वा-
दिसंसर्गपरमित्यश्वादिसंसर्गपरत्वव्यवहारापत्तिश्च (तत्प्रतीतिजनकत्वेसतीति) लवण-
संसर्गबोधजननयोग्यत्वसमानाधिकरणकलवणान्यप्रतीतीच्छयोच्चारितत्वाभाव इत्यर्थः ।
दोषतादवस्थ्यम्–ननु सैंधवमानयेत्यादिवाक्याशंकितदोषः स्थित एव, तत्परत्वाना-
पत्तिः–घटसंसर्गपरत्वाभावापत्तिः तत्संसर्गज्ञानम्–अश्वादिसंसर्गज्ञानम्, तदा–भोजन-
काले तत्परत्वव्यवहारः–सैंधवमानयेतिवाक्यमश्वादिसंसर्गपरामित्यश्वादिसंसर्गपरत्वव्य-
वहारः । नन्वश्वलवणोभयप्रतीतीच्छयोच्चारितसैंधवमानयेतिवाक्ये लवणान्याश्वप्रतीती-
च्छयानुच्चरितत्वाभावात्सैंधवमानयेतिवाक्येश्वलवणोभयपरत्वदशायामव्याप्तिरित्याशं-
क्य परिहराति । परममूले (नचेति) परममूले (तदन्यमात्रेति) तदन्यदेव तदन्यमात्रं
तदन्यस्यैव प्रतीतीच्छयानुचरितत्वस्येत्यर्थः । यद्युभाभ्यांतच्छब्दाभ्यां लवणस्यैव
ग्रहणं तदाश्वलवणोभयपरसैंधवमानयेतिवाक्येऽव्याप्तिशंकोपपन्ना तन्निराकरणंचोप-
पन्नं भवति । यदि तूभाभ्यां तच्छब्दाभ्यां प्रकृताश्वलवणयोर्ग्रहणं तदा सैंधवमानयेति
वाक्ये अश्वलवणोभयपरत्वदशायामव्याप्तिशंकादिकमनुपपन्नमिति भावः ॥

मू०–उक्तप्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः ।
अस्माकं तु मते सर्वत्र कारणतायाः शक्तेरेवावच्छेदक-
त्वात् ॥

शि०म०–अत्रानुच्चरितत्वमप्रतिसंहितत्वं तेनैकपरतया प्रतिसंहिते
मौनिलिखितनानार्थश्लोके नातिप्रसंगः। ननु तत्प्रतीतिजननस्वरूपयो-
ग्यतावच्छेदकं तत्प्रतीतीच्छयोच्चारितत्वमेवान्यस्य तादृशस्याभावात्तथाच
परमेश्वरप्रद्वेषिमते वेदवाक्यादावव्याप्तिरित्यत आह (उक्तेति) तर्हि
शक्तिकल्पने गौरवमित्यत आह (अस्माकंत्विति) ॥

म० प्र०–ननु तदितरप्रतीतीच्छयानुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वं तात्पर्य-
मितितात्पर्यलक्षणस्य लवणरूपार्थपरत्वेन प्रतिसंहिते नानार्थकपदघटितसैंधवमानये-
त्यादिवाक्ये अश्वान्यलवणरूपार्थप्रतीतीच्छयानुचरितत्वमादायातिव्याप्तिस्तत्राश्वा-
न्यलवणरूपार्थप्रतीतीच्छयानुचरितत्वस्य सत्त्वादित्याशंक्याह (अत्रेति) उक्तता-
त्पर्यलक्षणे इत्यर्थः । अप्रतिसांहितम्–एतादृशरेखोपन्यासः कर्तव्यो येन रेखोप-

न्यासेन लवणरूपार्थप्रतीतिः स्यादित्यादिप्रतिसंधानविषयत्वाभावः । तेन–अनुच्चरितत्वशब्देनाप्रतिसंहितत्वरूपार्थस्याभिप्रेतत्वेन, एकपरतयाप्रतिसंहिते–लवणरूपैकार्थपरत्वेन प्रतिसंधानविषये (नातिप्रसंगइति) सर्वनाम्नो बुद्धिस्थवाचकत्वनियमेन द्वितीयतत्पदेनाश्वग्रहणे प्रथमतत्पदेनाप्यश्वस्यैव परामर्शसंभवात्सैंधवमानयेतिवाक्यस्य लवणपरत्वदशायामश्वान्यलवणप्रतीतीच्छयोक्तप्रतिसंधानविषयत्वाभावाभावेनाश्वान्यलवणप्रतीतिच्छयानुच्चरितत्वशब्देनाप्रतिसंहितत्वस्य विवक्षितत्वादश्वान्यलक्षणरूपप्रतीतीच्छयानुच्चरितत्वमादायातिप्रसंगो नास्तीति भावः । तादृशस्य–तत्प्रतीतिजननस्वरूपयोग्यतावच्छेदकस्य । नच तदन्यप्रतीतीच्छयानुच्चरितत्वरूपावच्छेदकस्य सत्त्वेनान्यस्य तादृशस्याभावादिति कथनमयुक्तमिति वाच्यम् । तदन्यप्रतीतीच्छयानुच्चरितत्वापेक्षयातत्प्रतीतीच्छयोच्चरितत्वे लाघवेन तत्प्रतीतीच्छयोच्चरितत्वस्यैवावच्छेदकत्वौचित्यात्तदन्यप्रतीतीच्छयानुच्चरितत्वाप्रतिसंधानेपि तत्प्रतीतीच्छयोच्चरितज्ञानेसति वाक्यादन्वयबोधदर्शनाच्चेति । तथाच–तत्प्रतीतीच्छयोच्चरितत्वादन्यस्य तत्प्रतीतिजननस्वरूपयोग्यतावच्छेदकस्याभावेसति (अव्याप्तिरिति) अन्यतात्पर्य्यलक्षणं वाच्यमितिभावः । परममूले (उक्तप्रतीतिमात्रेति) शाब्दप्रतीतिमात्रेत्यर्थः । परममूले, योग्यतायाः–शब्दनिष्ठयोग्यतायाः । तर्हिंप्रतीतीच्छयोच्चरितत्वरूपावच्छेदकसत्त्वे सति, शक्तिकल्पने–तत्प्रतीतीच्छयोच्चरितत्वादन्यशब्दनिष्ठशाब्दबोधजनकतावच्छेदकशक्तिकल्पने । परममूले शक्तेरेवावच्छेदकत्वादिति तथाच यथा वह्न्यादिनिष्ठदाहादिजनकतावच्छेदिकाशक्तिरेव तथा शब्दनिष्ठशब्दजनकतावच्छेदिकाशक्तिरेवेति नाप्रसिद्धार्थकल्पनरूपगौरवदोषइतिभावः ॥

मू०–इति नकोपि दोषः ॥

शि०म०–तथाच वाक्यनिष्ठवाक्यार्थज्ञानकारणता किंचिदवच्छेद्या कारणतात्वाद्वह्निनिष्ठकारणतावदित्यनुमानं शक्तौ मानमितिभावः । ननु न्यायमते शक्तेरनंगीकारादसंभवः। नच तन्मते तत्प्रतीतीच्छयोच्चरितत्वादिकमवच्छेदकमिति युक्तमननुगमादिति नेत्याह (इति नकोपिदोषइति) तथाप्यवच्छेदकत्वमनुगतमिति नोक्तदोषावकाश अन्यथा पदशक्तावगतेरिति भावः ननु तात्पर्य्यज्ञानस्य हेतुत्वे अपसिद्धांतः । विवरणादौ तस्य निराकृतत्वादित्याशंक्य निरुक्ततात्पर्य्यज्ञानहेतुत्वस्यान्वयव्यतिरेकप्रमाणसिद्धत्वेन ॥

म० प्र०–(किंचिदवच्छेद्येति) नच वाक्यनिष्ठवाक्यार्थज्ञानाकरणतावाक्यत्वेनावच्छेद्यास्तु किं:शक्तिकल्पनयेति वाच्यम् । अवच्छेदकस्यान्यूनानतिरिक्तवृत्तित्वस्य रूपत्वेन वाक्यत्वस्यानर्थकवाक्येपि सत्त्वेनातिरिक्तवृत्तित्वादवच्छेदकत्वासंभ-

वादिति । असंभवः—तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वे सति तत्प्रतीतिजननयोग्य-
तावच्छेदकदशक्तेर्न्यायमतेऽनंगीकारेणोक्ततात्पर्यलक्षणासंभवः । तन्मते—नैयायिक-
मते (उच्चरितत्वादिकमिति) अत्रादिपदेन तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वं
ग्राह्यम् । नच शुकादिवाक्यव्युत्पन्नोच्चरितवेदवाक्यादौ चाव्याप्तेर्नतत्प्रतीतीच्छयोच्च-
रितत्वादिकं शाब्दनिष्ठशब्दजनकतावच्छेदकामिति वाच्यम् । नैयायिकमते ईश्वरेच्छा-
मादायैवाव्याप्तिपरिहारोपपत्तेरिति । अननुगमात्—कस्यचिन्नये तदन्यमात्रप्रतीती-
च्छयानुच्चरितत्वेसति तत्प्रतीतिजननयोग्यतावच्छेदिका शक्तिः । कस्याचिन्नये
तूक्तयोग्यताया अवच्छेदकं तत्प्रतीतीच्छयोच्चारितत्वं तदन्यमात्रप्रतीतीच्छ-
यानुच्चरितत्वं चेत्यवच्छेदकानां नानात्वेनानुगतावच्छेदकाभावप्रसंगात् । तथाचा-
नुगतशब्दनिष्ठशाब्दजनकतावच्छेदकाभावेऽनुगतकार्य्यकारणभावबुद्धिरपि न स्या-
दिति भावः । तथापि—तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वे सति तत्प्रतीतिजननयो-
ग्यताया अवच्छेदकानां नानात्वेपि, नोक्तदोषावकाशः—शब्दनिष्ठशाब्दजनकतावच्छे-
दकाननुगमदोषस्य तत्प्रयुक्तानुगतकार्य्यकारणभावः बुद्ध्यभावरूपदोषस्य चाव-
सरो न, अन्यथा—नानावच्छेदकानिष्ठानुगतावच्छेदकत्वानंगीकारे, पदशक्तौ—पद-
शक्तिनिष्ठशाब्दज्ञानकारणतायाम् । अगतेः—अनिश्चयात् पदनिष्ठशाब्दज्ञानजनकता-
वच्छेदकशक्तिनिष्ठानुगतावच्छेदकत्वाभावे तत्पदजन्यबोधविषयत्वनिष्ठप्रकारतानि-
रूपितघटनिष्ठेश्वरेच्छीयविशेष्यतारूपायाः पदशक्तेस्तत्तत्पुरुषीयेच्छारूपाया वा पदशक्तेः
पदनिष्ठशाब्दज्ञानजनकतावच्छेदकत्वविशिष्टाया नानात्वेनानुगतकार्य्यकारणभावनिर्व-
चनं न स्यान्नानाविधशक्तेरवच्छेदकत्वेनुगतत्वे तु पदार्थज्ञानत्वावाच्छिन्नं प्रति पदशक्ति-
ज्ञानत्वेन हेतुत्वमित्यनुगतकार्य्यकारणभावस्य निर्वचनमपि संभवतीति भावः । हेतुत्वे—
शाब्दज्ञानहेतुत्वे । तस्य—तात्पर्य्यज्ञाननिष्ठशाब्दबोधहेतुत्वस्य, तात्पर्य्यज्ञानहेतुत्वस्य—
तात्पर्य्यज्ञाननिष्ठशाब्दबोधहेतुत्वस्य ॥

मू०—एवं तात्पर्य्यस्य तत्प्रतीतिजनकत्वरूपस्यशाब्दज्ञानजनकत्वे सिद्धे चतुर्थवर्णके तात्पर्य्यस्य शब्दज्ञानहेतुत्वनिराकरणवाक्यं तत्प्रतीतीच्छयोच्चारितत्वरूपतात्पर्य्यनिराकरणपरम् अन्यथा तात्पर्य्यनिश्चयफलकवेदांतविचारवैयर्थ्यप्रसंगात् ॥

शि० म०—तद्वाक्यस्यान्यादृशतात्पर्य्यनिरासपरतयाप्युपपत्तेर्न विरोध इत्याह (एवमिति) तात्पर्य्यज्ञानमात्रहेतुत्वनिरासपरत्वे बाधकमाह (अन्यथेति) ननु न तावदिदं तात्पर्य्यं व्यवहारोपयोगितदितरप्रतीतीच्छयाऽनुच्चरितत्वस्यैव तत्पदप्रवृत्तिनिमित्तत्वेन शेषवैयर्थ्यात् । नच

गेहे घट इति वाक्ये पटसंसर्गार्थपरतावारणाय तत्प्रतीतिजनकत्वमुपात्तमिति वाच्यम् । घटसंसर्गपरस्य तस्य पटसंसर्गान्यप्रतीत्युद्देश्यकत्वेन तत एव तद्वारणात्, नहि कश्चित्पटसंसर्गेच्छया गेहे घट इति प्रयुंक्ते शब्दप्रयोगे अवाचकपदप्रयोगस्यान्याय्यत्वात् प्रयोगेवा पटसंसर्गपरत्वस्येष्टत्वात् गंगादिपदवल्लक्षणया तस्य तत्प्रतीतिस्वरूपयोग्यत्वाच्च, अतएव नैतत्तात्पर्य्यं शाब्दज्ञानोपयोगिविशेष्यमात्रविषयतया तस्य हेतुत्वसंभवे विशिष्टविषयतया तत्त्वे गौरवात् । नच वैपरीत्यमर्ह सैंधवमानयेति वाक्यस्याश्वसंसर्गप्रतीतिजनकज्ञाने लवणपरत्वज्ञानदशायामश्वानुभवासंभवात् ॥

म० प्र०–तद्वाक्यस्य–तात्पर्यज्ञाननिष्ठशाब्दज्ञानहेतुतानिराकरणपरविवरणवाक्यस्य अन्यादृशतात्पर्य्यनिरासपरतया–नैयायिकोक्ततत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यनिराकरणपरतया । परममूले (चतुर्थवर्णकेइति) चतुर्थसूत्रस्य या भाष्यकृद्व्याख्या तदुपरि या पंचपादिका तदुपरियद्विवरणं तत्रेत्यर्थः । इदंतात्पर्य्यम्–तत्प्रतीतिजनकत्वे सति तदितरप्रतीतीच्छयानुच्चरितत्वरूपं तात्पर्य्यम् (तत्पदेति) तात्पर्य्यपदेत्यर्थः । शेषवैयर्थ्यात्–सत्यंतशब्दवैयर्थ्यात्, तस्य–गेहे घट इतिवाक्यस्य (पटसंसर्गान्येति) पटसंसर्गान्यघटसंसर्गेत्यर्थः । तत एव तदितरप्रतीतिच्छयानुच्चरितत्वरूपतात्पर्यज्ञानादेव । तद्वारणात्–पटसंसर्गपरतावारणात् गेहेघटइति वाक्यस्य पटसंसर्गपरतायाआपादनकाले तच्छब्देन पटसंसर्गस्य ग्राह्यत्वेन पटसंसर्गेतरघटसंसर्गप्रतीतीच्छयोच्चरितत्वमेव नानुच्चरितत्वमिति गेहेघट इतिवाक्यस्य न पटसंसर्गपरतेति भावः । प्रयोगेवा–गेहेघटइति वाक्यस्य पटसंसर्गेच्छयां प्रयोगे तु तस्य–गेहेघटइतिवाक्यघटकघटपदस्य (तत्प्रतीतीति) पटसंसर्गप्रतीतीत्यर्थः । अतएव–तत्प्रतीतिजनकत्वे सति तदितरप्रतीतीच्छयानुच्चरितत्वरूपतात्पर्य्यस्य गेहे घट इति वाक्यं घटसंसर्गपरमित्यादिव्यवहारोपयोगित्वाभावादेव एतत्तात्पर्य्यम्–पूर्वोक्तविशिष्टतात्पर्य्यज्ञानम्, विशेष्यमात्रविषयतया–तदितरप्रतीतीच्छयानुच्चरितत्वरूपविशेष्यमात्रविषयकत्वेन, तस्य–पूर्वोक्तविशिष्टतात्पर्य्यज्ञानस्य, तत्त्वेशाब्दज्ञानकारणत्वे, वैपरीत्यम्–तत्प्रतीतिजनकत्वतात्पर्य्यपदप्रवृत्तिनिमित्तं तदितरप्रतीतीच्छयानुच्चरितत्वं व्यर्थमिति वैपरीत्यम् (असंभवादिति) तत्प्रतीतिजनकत्वरूपतात्पर्य्यस्वीकारेतु सैंधवमानयेतिवाक्यस्य लवणपरत्वज्ञानकालेऽश्वानुभवः स्यादिति भावः ॥

शि० म०–नच तत्प्रतीतिजननस्वरूपयोग्यत्वमेव तात्पर्य्यं तदवच्छेदकं च तदन्यप्रतीतीच्छयानुच्चारितत्वम् । तथाच तज्ज्ञानमेवहेतुरिति वाच्यम् । लाघवेन तत्प्रतीतीच्छयोच्चारितत्वस्यैवावच्छेदकत्वौचित्यात् ।

Funding by IKS-MoE

किंच तदन्यप्रतीतीच्छयानुच्चरितत्वाप्रतिसंधानेपि तत्प्रतीतीच्छयोच्चरितत्वज्ञाने सति वाक्यादन्वयबोधदर्शनान्नतज्ज्ञानमन्वयधीहेतुः । नच तेन तादृशानुच्चरितत्वमनुमाय ततोऽन्वयमनुभवंतीति वाच्यम् । तद्व्याप्तिमविदुषोपि तेनान्वयबोधस्यानुभवसिद्धत्वात् । नच तदपि तस्य त्वयैव दूषितत्वात् एतदप्रतिसंधानेपि तदन्यप्रतीतीच्छयानुच्चरितत्वज्ञानादन्वयबोधाच्च तस्मान्नोक्ततात्पर्य्यकारणमिति अत्रब्रूमः । तत्प्रतीतीच्छयोच्चरितत्वं तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वं च तात्पर्य्यम् । न च परस्परव्यभिचारान्नोभयमपि हेतुः स्यादिति वाच्यम् । तदन्यमात्रप्रतीत्युद्देश्यकत्वज्ञानविरोधिज्ञानविषयज्ञानत्वेनानुगतेन हेतुत्वाभ्युपगमात् ॥

म० प्र०—तज्ज्ञानमेव—तदन्यप्रतीतीच्छयानुच्चरितत्वरूपोक्ततात्पर्य्यावच्छेदकज्ञानजन्यतत्प्रतीतिजननरूपयोग्यत्वरूपतात्पर्य्यज्ञानमेव, हेतुः—शाब्दज्ञानकारणम् । लाघवेन—तदन्यप्रतीतीच्छयानुच्चरितत्वनिष्ठोक्ततात्पर्यावच्छेदकत्वाभ्युपगमापेक्षयातत्प्रतीतीच्छयोच्चरितत्वनिष्ठोक्ततात्पर्यावच्छेदकत्वाभ्युपगमे शरीरकृतादिलाघवेन, तज्ज्ञानं—तदन्यप्रतीतीच्छयानुच्चारितत्वरूपावच्छेदकज्ञानजन्योक्ततात्पर्य्यज्ञानं, तेन—तत्प्रतीतीच्छयोच्चरितत्वरूपहेतुना, तादृशानुच्चरितत्वम्—तदन्यप्रतीतीच्छयानुच्चारितत्वम् । अनुमाय—घटमानयेदंवाक्यं तदन्यप्रतीतीच्छयानुच्चारितं तत्प्रतीतीच्छयोच्चरितत्वाद्यन्नैवं तन्नैवं पटमानयेति वाक्यवदित्यनुमाय । ततः—तदन्यप्रतीतीच्छयाऽनुच्चरितत्वज्ञानजन्योक्ततात्पर्य्यज्ञानात् । तद्व्याप्तिम्— तत्प्रतीतीच्छयोच्चरितत्वतदन्यप्रतीतीच्छयानुच्चरितत्वयोर्व्याप्तिम्, तेन—तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानेन । तदपि—तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यमपि, तस्य—तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यस्य (एतदिति) तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यज्ञानेपीत्यर्थः (परस्परव्यभिचारादिति) व्यभिचारश्च व्यापकाभाववद्वृत्तित्वं यत्र कारणाभावस्तत्र कार्य्याभाव इति शाब्दज्ञानरूपकार्य्याभावो व्यापकः सतु नास्ति तदन्यमात्रप्रतीतीच्छयानुच्चरितत्वज्ञाने सति तत्प्रतीतीच्छयोच्चरितत्वरूपकारणाभावेपि शाब्दज्ञानरूपकार्य्यसत्त्वादेवं तत्प्रतीतीच्छयोच्चारितत्वज्ञाने सति तदन्यमात्रप्रतीतीच्छयानुच्चारितत्वरूपकारणाभावेपि शाब्दज्ञानरूपकार्य्यसत्त्वादिति परस्परव्यतिरेकव्यभिचारात् । नच व्यभिचारस्य कारणाभावनिष्ठत्वेनकथं तादृशोच्चरितत्वानुच्चरितत्वनिष्ठोव्यभिचार इति वाच्यम् । व्यभिचारस्य स्वाश्रयप्रतियोगित्वसंबंधेन तादृशोच्चरितत्वानुच्चरितत्वरूपतात्पर्य्यवृत्तित्वादित्यर्थः (तदन्यमात्रप्रतीत्युद्देश्यकत्वेति) तदन्यमात्रप्रतीत्युदेश्यकत्वज्ञानं घटमानयेति वाक्यं घटान्यमात्रप्रतीत्यु-

Funding by IKS-MoE

देश्यकमिति ज्ञानं तस्य विरोधिज्ञानं घटमानयेति वाक्यंघटप्रतीतीच्छयोच्चारितमिति घटान्यमात्रप्रतीतीच्छयानुच्चारितमिति च तद्विषयौतादृशोच्चरितत्वानुच्चारितत्वे तज्ज्ञानत्वेनेत्यर्थः ॥

शि० म०–नहि तत्प्रतीत्युद्देश्यकत्वज्ञाने तदन्यमात्रप्रतीत्युद्देश्यकत्वज्ञानमुदेति नचोक्ततात्पर्य्यज्ञानं न कारणं मानाभावादिति वाच्यम्। सैंधवमानयेति वाक्यस्य लवणपरत्वज्ञानदशायां सत्यामप्याकांक्षादिघटितसामग्र्यामश्वपरत्वज्ञानविरहेणाश्वसंसर्गज्ञानाभावात् । अयमेति पुत्रो राज्ञः, पुरुषोऽपसार्य्यतामित्यत्रान्वयपरत्वसंदेहे तद्व्यतिरेकनिश्चये च शाब्दज्ञानप्रतिबंधाच्च । केचित्तु तात्पर्य्यनिश्चयस्य शाब्दज्ञानप्रतिबन्धकतत्संशयतद्व्यतिरेकनिश्चयनिवृत्त्युपक्षीणत्वान्न हेतुत्वमिति तन्न, सिद्धांते प्रतिबंधकाभावस्य हेतुत्वानभ्युपगमात । किंच यत्संशयेत्यादिव्याप्तिबलात्तात्पर्य्यनिश्चयोहेतुः । नतुतद्व्यतिरेकज्ञानाभावः । तस्याभावत्वेन गुरुत्वात् । अन्यथा व्याप्तिनिश्चयस्याप्यनुमित्यहेतुत्वापत्तिरिति ॥

म० प्र०–ज्ञानयोर्विरोधित्वमेव स्फुटयति (नहीति) तत्प्रतीत्युद्देश्यकत्वज्ञाने–घटमानयेति वाक्यं घटसंसर्गप्रतीत्युद्देश्यकमिति ज्ञाने, तदन्यमात्रप्रतीत्युद्देश्यकत्वज्ञानम्–घटमानयेति वाक्यं घटसंसर्गान्यपटादिसंसर्गप्रतीत्युद्देश्यकमिति ज्ञानम्, अन्वयपरत्वसंदेहे–राज्ञ इति षष्ठ्यंतपदार्थस्य पुरुषपदार्थेनान्वयः पुत्रपदार्थेनवान्वय इत्यन्वयपरत्वसंदेहे, तद्व्यतिरेकनिश्चये–षष्ठ्यन्तराजपदार्थस्य पुरुषपदार्थेननान्वय इत्यन्वयाभावनिश्चये, शाब्दज्ञानप्रतिबंधाच्च–राजसंबंधीपुरुष इति शाब्दबुद्ध्यनुदयाच्च, तथाच–यत्संशयव्यतिरेकौ यत्र प्रतिबंधकौ तन्निश्चयस्तत्रहेतुरिति व्याप्तिबलात्तात्पर्य्यनिश्चयो हेतुरिति भावः (अनभ्युपगमादिति) तात्पर्य्यसंशयतात्पर्य्याभावनिश्चयौशाब्दज्ञानप्रतिबंधकौतदभावः शाब्दज्ञानकारणमितितात्पर्य्यसंशयव्यतिरेकनिश्चयरूपशाब्दज्ञानप्रतिबंधकाभावस्य यद्यस्माकं नयेशाब्दज्ञानकारणत्वं स्यात्तदा तात्पर्य्यनिश्चयस्य तात्पर्य्यसंशयव्यतिरेकनिश्चयरूपप्रतिबंधकाभावसंपादकत्वेन शाब्दबुद्धिस्वतंत्रकारणत्वं न स्यात्प्रतिबंधकाभावस्य तु कारणत्वमेव नास्तीति तात्पर्य्यनिश्चयः, शाब्दज्ञानस्य स्वतंत्रमेव कारणमिति भावः ॥ यत्संशयेत्यादिव्याप्तिबलात्–यत्संशयव्यतिरेकौ यत्र प्रतिबंधकौ तन्निश्चयस्तत्रहेतुरिति व्याप्तिसामर्थ्यात् तद्व्यतिरेकज्ञानाभावः–तात्पर्य्याभावज्ञानाभावः । तस्य–तात्पर्य्याभावज्ञानाभावस्य, गुरुत्वात्---तात्पर्य्यनिश्चयत्वेशाब्दबुद्धिकारणतावच्छेदकत्वापेक्षयातात्पर्य्याभावज्ञानाभा–

वत्वे शाब्दज्ञानकारणतावच्छेदकत्वे गौरवात्, अन्यथा तात्पर्य्याभावज्ञानाभावस्यैव
शाब्दबुद्धिकारणत्वाभ्युपगमे (अहेतुत्वापत्तिरिति) व्याप्यभावज्ञानाभावस्यैवानु-
मितिहेतुत्वसम्भवादितिशेषः ॥

मू०—केचित्तु शाब्दज्ञानत्वावच्छेदेन न तात्पर्य्यज्ञानं हेतुरित्ये-
वंपरं चतुर्थवर्णकवाक्यं तात्पर्य्यसंशयविपर्ययोत्तरशाब्दज्ञान-
विशेषे च तात्पर्य्यज्ञानं हेतुरेव इदंवाक्यमेतत्परमुतान्यपर-
मिति तात्पर्य्यसंशये तद्विपर्यये च तदुत्तरवाक्यार्थनिश्चयस्य
तात्पर्यनिश्चयं विनानुपपत्तेरित्याहुः ॥

शि० म०—अभेदरत्नकारमतमाह (केचित्त्विति) अत्रेदमनभिमति-
बीजं तात्पर्य्यज्ञानजन्यतावच्छेदकं शाब्दज्ञानत्वं लाघवात् । नतु तात्प-
र्य्यसंशयविपर्य्ययोत्तरशाब्दज्ञानत्वं गौरवात्, नचासत्यपितात्पर्य्यनि-
श्चये तत्संशयादिविरहे शाब्दधीदर्शनेन व्यभिचारान्नहेतुत्वमिति वाच्यम्।
उक्तलाघवेनतद्धेतुत्वक्लृप्तौ तदभावेशाब्दज्ञानस्यैवासिद्धेः । अन्यथा
व्याप्तिनिश्चयोपि तत्संशयविपर्ययोत्तरानुमितौ हेतुः स्यादिति
महद्वैषम्यमापद्येतेति नन्वेमपि निरुक्तंतात्पर्य्यज्ञानं न हेतुः तस्य वाक्या-
र्थगर्भत्वेन प्रथमं दुर्ग्रहत्वात् ॥

म० प्र०—परममूले (शाब्दज्ञानत्वावच्छेदेनेति) शाब्दज्ञानत्वमवच्छेदः कार्य्य-
तावच्छेदकं, यस्मिञ्छाब्दज्ञाने तत्तथा तेन निरूपितत्वं तृतीयार्थस्तथाच शाब्दज्ञान-
त्वावच्छिन्नजन्यतानिरूपितहेतुतावत्तात्पर्य्यज्ञानमित्यर्थः । परममूले, तात्पर्यसंशय-
विपर्ययोत्तरशाब्दज्ञानविशेषे—तात्पर्यसंशयविपर्ययविरोधिज्ञानरूपतात्पर्यज्ञानोत्तरशाब्द-
ज्ञानविशेषे, परममूले केचिदित्यनेन सूचितमस्वारस्यं स्फुटयति (अत्रेति) परममू-
लोक्तकेषांचिन्मते इत्यर्थः । अनभिमतिबीजम्—अनंगीकारबीजम्, तात्पर्य्यज्ञानजन्य-
तावच्छेदकम्—तात्पर्य्यज्ञाननिष्ठजनकतानिरूपितजन्यतावच्छेदकम् (विपर्य्ययेति)
तात्पर्य्याभावनिश्चयेत्यर्थः । गौरवात्—शाब्दज्ञानत्वेतात्पर्य्यनिश्चयकार्य्यतावच्छेदक-
त्वापेक्षया तात्पर्य्यसंशयतात्पर्य्याभावनिश्चयविरोधिज्ञानरूपतात्पर्यज्ञानोत्तरशाब्दज्ञान-
त्वेतात्पर्य्यज्ञानकार्य्यतावच्छेदकत्वे गौरवात् । उक्तलाघवेन—तात्पर्य्यज्ञानजन्यताव-
च्छेदकमित्यादिवाक्योक्तकार्य्यतावच्छेदकलाघवेन, तद्धेतुत्वक्लृप्तौ—तात्पर्य्यज्ञानानि-
ष्ठशाब्दबुद्धिहेतुत्वनिश्चये, तदभावे—तात्पर्यनिश्चयाभावे अन्यथातात्पर्य्यसंशयतात्प-
र्य्याभावनिश्चयविरोधिज्ञानरूपतात्पर्यज्ञानोत्तरशाब्दज्ञानत्वावच्छिन्नंप्रत्येवतात्पर्यनिश्चय-
स्यहेतुत्वांगीकारे तत्संशयविपर्ययोत्तरानुमितौव्याप्तिसंशयव्याप्यभावनिश्चयाविरोधि-

ज्ञानरूपव्याप्तिज्ञानोत्तरानुमितौ (हेतुःस्यादिति) नसर्वानुमितावितिशेषः । वैषम्यं-सिद्धान्तानुपपन्नत्वम् एवमपि-तात्पर्यनिश्चयस्योक्तव्यभिचाराभावेपि । उक्तरीत्यासामान्यशाब्दबुद्धित्वेकार्य्यतावच्छेदकत्वेलाघवेपीति वा । तस्य-उक्ततात्पर्य्यस्य । वाक्यार्थगर्भत्वेन-वाक्यार्थः पदार्थसंसर्गः परस्परसंसृज्यमानपदार्थावा गर्भे कुक्षौ शरीरे वा यस्यतात्पर्यस्य तत्तथा तस्य भावस्तत्त्वंतेन तत्प्रतीतीच्छयोच्चारितत्वं सतीत्यादिवाक्योक्ततात्पर्य्यलक्षणे तच्छब्दार्थसंसर्गग्रहणाद्वाक्यार्थघटितत्वेनेति यावत्, प्रथमम्-शाब्दबुद्धेः पूर्वम् ॥

सू०-तच्च तात्पर्य्यं वेदे मीमांसापरिशोधितन्यायादेवावधार्य्यते लोके तु प्रकरणादिना ॥

शि० म०-नच प्रमाणांतरेण तद्ग्रहः । वैदिकवाक्यार्थस्यापूर्वादेर्मानांतरायोग्यत्वात् प्रमाणान्तरेण प्रथमं तद्ग्रहेच शब्दवैयर्थ्यादित्यत आह (तच्चेति) वाक्यार्थगर्भमपि तात्पर्य्यं वेदेलाघवानुगृहीतेनानुमानेन तदुपजीविना वा प्रमाणांतरेणनिश्चीयते यथा कपिंजलानालभेतेत्यत्र लाघवात्त्रित्वसंख्यापरत्वं नतु त्रित्वादिपरार्द्धपर्य्यंतसंख्यापरत्वं गौरवात् ॥

म०प्र०-प्रमाणांतरेण-सैंधवमानयेतिवाक्यं लवणपरं सूपे लवणं नास्तीतिवाक्यानंतरमुच्चार्य्यमाणत्वाद्यन्नैवं तन्नैवं गर्दभमानयेति वाक्यवदित्याद्यनुमानादिप्रमाणेन तद्ग्रहः-शब्दार्थग्रहः । अपूर्वादेः-धर्माधर्मादेः अत्रादिपदेन स्वर्गादिसाधनताविशिष्टयागादिर्गृह्यते इति । परममूले (मीमांसेति) तर्कात्मकमानसव्यापारविशेषाभिन्नमीमांसया परिशोधितो निर्दुष्टः सहकृतो वा यो न्यायोऽनुमानं तस्मादित्यर्थः । प्रथमम्-शाब्दबुद्धेः पूर्वम् । तद्ग्रहे-शब्दार्थग्रहे (शब्दवैयर्थ्यादिति) शब्दप्रमाणप्रवृत्तेः पूर्वमेवशब्दार्शस्य गृहीतत्वेन शब्दप्रमाणस्य व्यर्थत्वादित्यर्थः । वेदे-वैदिकवाक्ये लाघवानुगृहीतेन यत्र प्रमाणवाक्यत्वं तत्र पदार्थसंसर्गपरत्वमिति सामान्यव्याप्तेः स्वर्गकामोयजेदित्यादौ वैदिकवाक्यस्य बलवदनिष्ठाननुबंधित्वादिविध्यर्थसंसर्गपरत्वापेक्षया ऽपूर्वाभिन्नविध्यर्थसंसर्गपरत्वे लाघवमिति लाघवज्ञानसहकृतेन, अनुमानेन-स्वर्गकामोयजेतेत्यादिवैदिकवाक्यं विध्यर्थापूर्वसंसर्गपरं वैदिकप्रमाणवाक्यत्वाद्यन्नैवंतन्नैवं वंध्यासुतो युध्यतीत्यादिवाक्यवद्वैदिकवाक्यं पदार्थसंसर्गपरं प्रमाणवाक्यत्वात्पटमानयेत्यादिवाक्यवदित्याद्यनुमानेन, तदुपजीविना-अनुमानोपजीविना वैदिकवाक्यनिष्ठापूर्वसंसर्गपरत्वविषयकानुमित्युत्तरभाविनेति यावत्, प्रमाणान्तरेण-वैदिकवाक्यमपूर्वसंसर्गतात्पर्य्यकमित्याद्याप्तवाक्येन, निश्चीयते-पुरुषेण वैदिकवाक्यमपूर्वसंसर्गपरमिति निश्चयविषयः क्रियते स्वय

मपिलाघवानुगृहीतानुमानेन तात्पर्य्यनिश्चयोदाहरणमाह (यथेति) अत्रकपिंजलशब्दस्तित्तिरिः स्यात्कपिंजल इति त्रिकांडशेषात्तित्तिरेतिख्यातस्य वाचकस्तथाच लाघवात्कपिंजलानितिद्वितीयांतकपिंजलशब्दस्य त्रित्वादिपरार्द्धपर्य्यंतसंख्यावत्कपिंजलसंसर्गपरत्वापेक्षयात्रित्वसंख्यावत्कपिंजलसंसर्गपरत्वे लाघवमिति लाघवज्ञानसहकृतात्कपिंजलानालभेतेतिवाक्यं पदार्थसंसर्गपरंप्रमाणवाक्यत्वादित्याद्यनुमानादित्यर्थः ॥

मू०—तत्र लौकिकवाक्यानां मानांतरावगतार्थतयानुवादकत्वम् ॥

शि० म०—लोकेतु तात्पर्य्यं प्रकरणादिलिंगकानुमानेन प्रत्यक्षादिनावावधार्य्यते इत्यर्थः । नचैवं वाक्यार्थस्याप्यवगमेनाजनितान्वयबोधत्वलक्षणाकांक्षाविरहाच्छाब्दज्ञानं न स्यादिति वाच्यम् । तथापि तच्छब्दजन्यवाक्यार्थज्ञानाभावात्तस्यैवाकांक्षत्वादिति भावः । ननु शाब्दज्ञानत्वावच्छेदेन तात्पर्य्यज्ञानस्य हेतुत्वे लौकिकवाक्यवद्वेदस्यानुवादकतापत्तिः तात्पर्य्यग्रहेतद्घटकवाक्यार्थस्य भानात्तथाच लौकिकवाक्यमनुवादकं नवैदिकमिति राद्धांतो भज्येतेत्याशंक्य किमवश्यापेक्षणीयनिरपेक्षप्रमाणजनितसमानविषयावगतिविशिष्टार्थबोधकत्वमनुवादकत्वं वेदस्यापद्यते स्वानुपजीविप्रमाणजन्यसमानप्रकारविशेष्यकप्रमितिविषयत्वयोग्यार्थबोधकत्वं वा नाद्यः, प्रभाकरसंमतस्यास्यास्माभिर्लोकेप्यनंगीकारादित्यभिप्रेत्य द्वितीयं दूषयति (तत्रेति) तयोर्मध्ये इत्यर्थः ।

म०प्र०—लोकेतु—लौकिकवाक्येतु, प्रकरणादिलिंगकानुमानेन—सैंधवमानयेति वाक्यं लवणसंसर्गपरं लवणान्यबोधकान्यत्वे सति भोजनकाले उच्चरितत्वाल्लवणमानयेति वाक्यवदितिप्रकरणादिघटितलिंगकानुमानेन, प्रत्यक्षादिना—घटमानयेति वाक्यं घटप्रतीतीच्छयोच्चरितमित्यलौकिकमानसप्रत्यक्षादिना घटान्यमात्रप्रतीतीच्छयानुच्चरितमित्यलौकिकमानसप्रत्यक्षादिना वा आदिपदेनाप्तवाक्यं ग्राह्यमिति (अजनितान्वयबोधत्वेति) पदार्थांतरव्यतिरेकप्रयुक्तानुत्पादितान्वयबोधकत्वेत्यर्थः । तथापि—संसर्गबोधस्य मानांतरजन्यत्वेपि (तच्छब्देति) घटमानयेत्यादिशब्देत्यर्थः । तस्यैव—तच्छब्दजन्यवाक्यार्थज्ञानाभावस्यैव (शाब्दज्ञानत्वावच्छेदेनेति) शाब्दज्ञानत्वावच्छिन्नजन्यतानिरूपिततात्पर्य्यनिश्चयनिष्ठजनकतास्वीकारे इत्यर्थः । तात्पर्य्यग्रहे—तात्पर्य्यग्रहकाले (तद्घटकेति) तात्पर्य्यघटकेत्यर्थः (अवश्यापेक्षणीयेति) सर्ववादिसंमतत्वेनानुमानादिहेतुत्वेन चावश्यापेक्षणीयनिरपेक्षप्रमाण प्रत्यक्षप्रमाणं तज्जनिततुल्यविषयकावगतिरग्निनिष्ठहिमनाशकत्वबुद्धिस्तद्विशिष्टार्थबोधकत्वमग्निनिष्ठहिमनाशकत्वबु-

द्विविशिष्टाग्निनिष्ठहिमनाशकत्वरूपार्थविषयकबोधजनकत्वमग्निर्हिमस्य भेषजमिति वाक्ये इत्यनुवादकत्वमित्यर्थः (स्वानुपजीवीति) शब्दप्रमाणानधीनप्रत्यक्षादिप्रमाणजन्यतुल्यप्रकारविशेष्यकप्रमितिविषयतायोग्याग्निनिष्ठहिमनाशकत्वरूपार्थविषयकबोधजनकत्वमग्निर्हिमस्यभेषजमिति वाक्ये इत्यनुवादकत्वमित्यर्थः (अनंगीकारादिति) लौकिकानुवादकवाक्यानामप्यवगतिविशिष्टार्थविषयकबोधजनकत्वासंभवादिति शेषः ॥

मू०—वेदेतु वाक्यार्थस्यापूर्वतया नानुवादकत्वम् ॥

शि०म०—(अपूर्वतयेति) स्वानुपजीविप्रमाणजन्यसमानप्रकारविशेष्यकप्रमितिविषयत्वायोग्यतयेत्यर्थः । तथाच तात्पर्य्यग्राहकेण वैदिकानीमानि पदानि स्वर्गकामनियोज्यकयागविषयकनियोगपराणीत्यवगमेपि स्वर्गकामनियोज्यकं यागविषयकं कार्य्यमित्यनवगमान्न वेदस्यानुवादकत्वमिति भावः । नन्वस्त्वाकांक्षादिसहकारिवशाच्छब्दस्य पृथक् प्रामाण्यं तथापि न वेदांतानां ब्रह्मणि प्रामाण्यं तेषां सिद्धार्थबोधकत्वात् कार्यान्विते एव संगतिग्रहेण तत्पराणामेव सर्वत्रप्रामाण्यावधारणात् । तथाहि प्रयोजकवृद्धोदीरितगामानयेतिवाक्यश्रवणसमनंतरभाविप्रयोज्यवृद्धसमवेतगवानयनचेष्टामुपलभमानो बालस्तया तत्कारणं गवानयनगोचरप्रवृत्तिमनुमाय तदनुमिते च कार्य्यसंसृष्टपदार्थज्ञाने वाक्यस्य सामर्थ्यमन्वयव्यतिरेकाभ्यां प्रतिपद्यते पुनश्च गां पश्य गां बधान अश्वमानयेत्यादिप्रयोगांतरेषु आवापोद्वापाभ्यां गवि गोपदसामर्थ्यं गृह्णन् कार्यान्विते एव गृह्णाति अन्यथाप्रथमावगतकार्य्यान्वितव्युत्पत्तिबाधापत्तेः । नचसिद्धार्थेपि प्रथमं व्युत्पत्तिग्रहः ॥

म०प्र०—तात्पर्यग्राहकेण—पूर्वोक्तलाघवसहकृतानुमानादिना तात्पर्यग्राहकेण (नियोज्यकेति) यः कार्य्यं स्वकीयत्वेन बुध्यते स नियोज्य इति लक्षणलक्षितनियोज्यवानित्यर्थः । नियोगपराणि—कार्य्यप्रतिपादकानि, कार्य्यं—कृतिसाध्यमपूर्वम् । तत्पराणामेव—कार्य्यपराणां वाक्यानामेव, सर्वत्र—वेदेलोकेच, बालः- अव्युत्पन्नपुरुषः, तया—चेष्टया, तत्कारणम्—क्रियाकारणम्, प्रवृत्तिम्—प्रवृत्त्याख्ययत्नम् अनुमाय—अयं प्रयोज्यवृद्धः गवानयनगोचरप्रवृत्तिमान् गवानयनगोचरचेष्टावत्त्वान्मद्वदित्यनुमाय । इयं क्रिया प्रयत्नजन्या विलक्षणक्रियात्वात्स्वीयक्रियावदित्यनुमाय वा, तदनुमिते—अयं प्रयोज्यवृद्धःकार्य्यसंसृष्टपदार्थगोचरज्ञानवान् प्रवृत्तिमत्त्वान्मद्वदिति प्रवृत्त्यनुमिते अन्वयव्यतिरेकाभ्याम्—गामानयेति वाक्यसत्त्वे आनयनसंसृष्टगोपदार्थगोचरज्ञानसत्त्वं तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्याम्, आवापोद्वापाभ्याम्—कस्यचित्पदस्योपादानमावापः कस्यचित्पदस्य त्याग उद्वापस्ताभ्याम्, गवि—कार्य्यान्वितगोपदार्थे, कार्य्यान्वितेएव

गृह्णाति–कालांतरेपि कार्य्यान्विते एवगोपदार्थेसामर्थ्यं गृह्णाति क्रियापदं विना कालांतरेपि वाक्यार्थज्ञानासंभवादितिशेषः । अन्यथा–कालांतरेकार्य्यान्वितगोपदार्थादौ शक्तिग्रहानंगीकारे (प्रथमावगतेति) प्रयोजकवृद्धोदीरितगामानयेति वाक्यश्रवणकालावगतेत्यर्थः । व्युत्पत्तिग्रहः–शक्तिग्रहः ॥

मू०–तत्र लोके वेदे च कार्य्यपराणामिवासिद्धार्थानामप्यपूर्वतया प्रामाण्यं पुत्रस्ते जातःकन्या ते गर्भिणीइत्यादिषु सिद्धार्थेष्वपि पदानां सामर्थ्यावधारणात् ॥

शि० म०–हानोपादानक्रियाऽनन्विताबुभुत्सिततया वक्तृविवक्षाभानेन शब्दस्यैव तत्राप्रयोगात् । प्रयोगेवा अनभिहितक्रियापदत्वात्तस्मान्न बालोव्युत्पद्यते लिंगचेष्टादेरभावात् । तस्मात्कार्य्यान्वितार्थेषु पदानां शक्तिस्ततश्चसिद्धार्थानां न प्रामाण्यमिति तदेतन्निराकरोति (तत्रेति) इदमत्राकूतं कार्य्यान्विते प्रथमं वाक्यसामर्थ्यग्रहेपि नतदनुरोधात्तत्रैव पदवाच्यत्वं गौरवात् । अन्यथा प्रमाणांतरग्राह्यत्वस्याव्यभिचारात् तद्विशिष्टस्य वाच्यत्वप्रसंगः, किंच कार्य्यान्वितत्वमितरान्वितत्वं वा नवाच्यतावच्छेदकं कार्य्यस्य तद्वाचकलिङादिलभ्यत्वात्, अन्वयस्य च वाक्यादेव लाभात्, अनन्यलभ्यः शब्दार्थ इति न्यायात्, अन्यथान्वयविशेषोपि वाच्यः स्यादिति वाक्यस्यानुवादकत्वापत्तिः । किंच कार्य्यस्य कार्यांतराभावान्न कार्य्यान्वयोवच्छेदकः । यत्तु केवलार्थं पदशक्तिग्रहे वाक्यस्य प्रथमगृहीताशक्तिः कार्य्यान्विते बाध्येतेति तदयुक्तमिष्टत्वात् पुत्रस्ते जात इत्यादौ भूतार्थेपि प्रथमं व्युत्पत्तिग्रहाच्च ॥

म० प्र०–तत्र–सिद्धार्थे ननु ब्रह्मणि हानोपादानक्रियाभावेपि श्रोतुर्बुभुत्सिततया वक्तृविवक्षासत्त्वेन सिद्धार्थेपि प्रयोगोभवत्येवेत्याशंक्याह (प्रयोगेवेति) तस्मात्–सिद्धार्थबोधकवाक्यात् लिंगचेष्टादेः–शक्तिग्रहहेतुभूतचेष्टादेः । परममूले (तत्रेति) वैदिकवाक्यानामनुवादकत्वाभावे सतीत्यर्थः (वाक्यसामर्थ्येति) वाक्यघटकपदशक्तीत्यर्थः । तदनुरोधात्–कार्य्यान्विते प्रथमंपदशक्तिग्रहानुरोधात्, तत्रैव–कार्य्यान्विते एव । पदवाच्यत्वम्–पदशक्तिः, गौरवात्–पदार्थत्वस्य शक्तिविषयतावच्छेदकत्वापेक्षया कार्य्यान्वितपदार्थत्वस्यशक्तिविषयतावच्छेदकत्वे गौरवात् । अन्यथा–कार्य्यान्वयस्याव्यभिचारेणप्रथमगृहीतकार्य्यान्विते एव पदवाच्यत्वांगीकारे गौरवानंगीकारे इति वा, तद्विशिष्टस्य–प्रमाणांतरग्राह्यत्वविशिष्टस्य (वाच्यत्वप्रसंग इति)

Funding by IKS-MoE

प्रत्यक्षादिना सामान्यतो गृहीत एव शक्तिग्रहसंभवेनात्यंताज्ञाते शक्तिग्रहासंभवात्, प्रमाणांतरग्राह्यत्वस्याव्यभिचारेण तद्विशिष्टस्य वाच्यत्वं स्यादेवेति भावः । कार्य्यान्वितत्वं–कार्य्यान्वयः वाच्यतावच्छेदकं–शक्तिविषयतावच्छेदकम् अन्यथा–अनन्यलभ्यः शब्दार्थ इति न्यायानंगीकारे, अन्वयविशेषः–वाक्यार्थत्वेनाभिमतानयनादिप्रतियोगिकान्वयः, वाच्यः–पदवाच्यलिङर्थैकार्य्यैलिङ्पदस्य शक्तिग्रहो न स्याल्लिङर्थकार्य्यै कार्य्यांतरान्वयाभावादिति कार्य्यान्वयो न वाच्यतावच्छेदकइत्याह(कार्य्यस्येति) लिङर्थापूर्वस्येत्यर्थः । भूतार्थेपि । सिद्धार्थेपि ॥

मू०–अत एव वेदांतवाक्यानां ब्रह्मणि प्रामाण्यं यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते तत्र वेदान्तानां नित्यसर्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः ॥

।शि० म०–नच तत्र व्युत्पत्तिग्रहाभावः हर्षादेस्तल्लिंगत्वात् । नच मुखप्रसवादिनापि तदुत्पत्तिः । पुत्रपादांकितपटप्रदर्शनवत्मुखप्रसवसूतकस्याभावात् । ततश्च परिशेषात्पुत्रजन्मसिद्धौ तत्र पदवाच्यत्वग्रहः । ततश्च ॥

दृष्टचैत्रसुतोत्पत्तेश्चरणांकितवाससा ॥
वार्त्ताहारेण यातस्य परिशेषविनिश्चितिः इति ॥

(अतएवेति) यत एव सिद्धार्थवाक्यानां प्रामाण्यमित्यर्थः । ननु तथापि वेदांतानां ब्रह्मणि न प्रामाण्यं तेषां प्रतिपत्तिविधिपरत्वेन तत्परत्वाभावात्। सत्यं ज्ञानमित्येवमादीनां च विध्यपेक्षितविषयसमर्पकत्वात्, तथाच "वाचंधेनुमुपासीत" इतिवन्नविषयब्रह्मपरा वेदान्ता इति तत्राह (यथाचेति) ननु वेदांतिमते वेदमात्रस्य पुरुषाधीनोत्पत्तिकतया पुंदोषवत्त्वसंभवाल्लौकिकवाक्यवद्वेदांतानां न प्रामाण्यमित्याशंक्य स्वयं प्रकारांतरेण वेदांतानां प्रामाण्यं साधयितुं प्रथमं पराभिमतं तत्प्रकारमनूद्य दूषयति (तत्रेत्यादिना) वेदांतग्रहणं वेदमात्रोपलक्षणम् (नित्येति) स्वतन्त्रेतिशेषः । सर्वज्ञेश्वरप्रणीतत्वस्य वेदान्तिभिरप्यभ्युपगमादित्यवधेयम् । वेदस्य पुरुषाधीनोत्पत्तिकत्वेन पुंदोषादप्रामाण्यं स्यादित्यत उक्तं सर्वज्ञेति । यदि मन्वादयोपि सर्वज्ञास्तदा तत्प्रणीतत्वेन नानात्वाद्गौरवेण न तत्प्रणीतत्वमितिभावः । भ्रमप्रमादविप्रलिप्साकरणापाटवादिदोषाभाव एव प्रामाण्येहेतुः ॥

म० प्र०–तत्र–सिद्धार्थे । हर्षादेः–चैत्रनिष्ठहर्षमुखप्रसादादेः । तल्लिंगत्वात्–चैत्रोहर्षवान् मुखप्रसादवत्वान्मद्वत चैत्रहर्ष इष्टलाभज्ञानजन्यः हर्षत्वान्मद्धर्षवत् चैत्री-

यमिष्टज्ञानमेतद्वाक्यजन्यमेतद्वाक्यान्वयव्यतिरेकप्रयोज्यान्वयव्यतिरेकवत्त्वाद्यत्र यदन्वयव्यतिरेकप्रयोज्यान्वयव्यतिरेकवत्त्वं तत्र तज्जन्यत्वमिति सामान्यत्वामिति सामान्यव्याप्त्याघटवदित्यव्युत्पन्नपुरुषस्य शक्तिग्राहकलिंगत्वात्, तदुत्पत्तिः—चैत्रनिष्ठहर्षादिलिंगोत्पात्तिः । तत्र—पुत्रे । पदवाच्यत्वग्रहः—अगृहीतपुत्रपदशक्तिकपुरुषनिष्ठपुत्रपदवाच्यत्वज्ञानं वार्ताहारेण—दूतेन । प्रतिपत्तिविधिपरत्वेन—उपासनाविधिपरत्वेन । तत्परत्वाभावात्—ब्रह्मपरत्वाभावात् (विषयेति) उपासनाविषयेत्यर्थः । तत्प्रकारं—वेदनिष्ठप्रमाण्यनिश्चयकारणम् । परममूले (तत्रेति) वादिषुमध्येइत्यर्थः । नपरमेश्वरापेक्षा—वेदोत्पत्त्यर्थंवेदप्रामाण्यार्थं वा नपरमेश्वरस्वीकारः ॥

मू०—वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमिति मीमांसकाः अस्माकं तु मते वेदो न नित्यः उत्पत्तिमत्त्वात् उत्पत्तिमत्त्वं च "अस्य महतो भूतस्यनिःश्वसितमेतदृग्वेदो यजुर्वेदः सामवदोऽथर्ववेद" इत्यादिश्रुतेः नापि वेदानां त्रिक्षणावस्थायित्वम् ॥

शि० म०—तत्र हेतुमाह (नित्यत्वेनेति) किं वर्णनित्यत्वं वेदस्य निर्दोषत्वे हेतुरुतानुपूर्वीविशिष्टवेदनित्यत्वं वा नाद्यः । लौकिकवाक्यस्यापि निर्दोषतापत्तेः न द्वितीयः । वर्णानामनित्यत्वेन तत्समूहात्मकपदस्य तत्समुदायस्य च वाक्यस्यानित्यतया तत्संदोहात्मकवेदस्य सुतरामनित्यत्वादित्यभिप्रेत्य वेदानित्यत्वे हेत्वंतरमाह (अस्माकंत्विति) "ऋचःसामानि जज्ञिरे" इत्यादिश्रुतिरादिपदग्राह्या नन्वियंश्रुतिर्न वेदोत्पत्तिपरा वेदस्य त्रिक्षणमात्रावस्थायित्वेन तदुत्पत्तेर्लोकासिद्धत्वात् । नापि सर्वेश्वराधीनोत्पत्तिपरा पुरुषत्वेन सर्वेश्वरस्यापि वेदोत्पादकत्वानुमानात् । तस्मात्स्वतंत्रपुरुषाधीनोत्पत्तिपरैव श्रुतिः । महत्पदस्य स्वतंत्रवाचित्वादित्याशयवतो नैयायिकस्याशंकां निराकरोति (नापीति) ॥

म० प्र०—तत्र—भ्रमादिदोषवत्पुरुषजन्यत्वसंबंधेन वेदनिष्ठभ्रमाद्यभावे । परममूले
(वेदानां नित्यत्वेनेति) वेदानां जन्यत्वाभ्युपगमे ईश्वरस्यापि भक्तपक्षपातादिसंभवा-
द्दोषवदीश्वरप्रणीतत्वावश्यंभावाद्बौद्धप्रणीतागमवद्वेदेपि दोषप्रसंगाद्वेदानामजन्यत्वेन
निरस्तसमस्तपुंदूषणतया प्रामाण्यमिति भावः । वर्णनित्यत्वम्—वर्णनिष्ठजन्यत्वाभावः।
अनित्यत्वेन—अजन्यत्वाभावेन, तत्समूहात्मकपदस्य—वर्णसमुदायात्मकपदस्य, तत्स-
मुदायस्य—पदसमुदायस्य (तत्संदोहात्मकेति) वाक्यसमुदायात्मकेत्यर्थः । वेदा-

Funding by IKS-MoE

नित्यत्वे—वेदनिष्ठाजन्यत्वाभावे, हेत्वंतरं—प्रागभावप्रतियोगित्वरूपहेत्वपेक्षयाऽन्यद्धेतुम् । वस्तुतस्तुहेत्वंतरमित्यस्यस्थानेहेतुमितिपाठः सम्यगिति परममूले अस्माकंत्विति तु-शब्दउक्तपक्षाभ्यांवेदानामनित्यत्वेपि प्रलयकालपर्यंतावस्थायित्वे सतिदोषविनिर्मुक्तत्वरूपवैलक्षण्यद्योतनार्थः । परममूले (अस्येति) अस्य—परमात्मनो महतोव्यापकस्य, भूतस्य निःश्वसितम्—निःश्वसितमिवनिःश्वसितमित्यर्थः (ऋचइति) अत्रबहुवचनंऋगादिघटकवाक्याध्यायादिषुबहुत्वाभिप्रायेण । जज्ञिरे—उत्पन्नाबभूवुः (त्रिक्षणमात्रावस्थायित्वेनेति) इदं कथनं तु प्राचीनस्य कस्यचिदाचार्य्यस्याभिप्रायेण नवीनमते शब्दस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वकथनेन द्विक्षणमात्रावस्थायित्वादिति, अनुमानात्—ईश्वरोवेदादिरूपशब्दोत्पादकः पुरुषत्वाद्यत्रपुरुषत्वं तत्र शब्दोत्पादकत्वमिति सामान्यव्याप्त्याऽस्मदादिवदित्यनुमानात् (वाचित्वादितिं) यत्र पूज्यत्वरूपमहत्त्वं तत्र स्वतंत्रत्वमिति व्याप्तेरिति शेषः ॥

मू०—य एव वेदो देवदत्तेनाधीतः स एव मयापीत्यादिप्रत्यभिज्ञा विरोधात्। अत एव गकारादिवर्णानामपि न क्षणिकत्वं सोयं गकार इतिप्रत्यभिज्ञाविरोधात्। तथाच वर्णपदवाक्यसमुदायस्य वेदस्य वियदादिवत्सृष्टिकालीनोत्पत्तिकत्वं प्रलयकालीनध्वंसप्रतियोगित्वं च, नतु मध्ये वर्णानामुत्पत्तिविनाशौ अनंतगकारकल्पनायां गौरवात्, अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यंजकाभावान्नविरुध्यते अंधकारस्थघटानुपलंभवत् उत्पन्नो गकार इत्यादिप्रत्यक्षंतु सोयं गकार इत्यादिप्रत्यभिज्ञाविरोधादप्रमाणं वर्णाभिव्यंजकध्वनिगतोत्पत्तिनिरूपितपरंपरासंबंधविषयत्वेन प्रमाणंवा ॥

शि० म०—अनेकवर्णसमुदायगर्भस्य वेदस्य स्वरूपतः क्षणिकत्वं वर्णक्षणिकत्वाद्वा तत्राद्यं दूषयति (यएवेति) द्वितीयं निरस्यति (अतएवेति) अतःशब्दार्थमाह (सोयमिति) ननु वेदस्य क्षणिकत्वाभावे नित्यत्वापत्तौ उत्पत्तिश्रुतिर्निर्विषया स्यादित्यत आह (तथाचेति) परमते उत्पत्तौ निराकृतायामित्यर्थः । शब्दस्य नाशकत्वाभिमतशब्दांतरादीनामंतराऽसंभवेपि बहुकालस्थायित्वाभ्युपगमे कदापिनाशो न स्यादित्यत आह

(प्रलयेति) तथाच प्रलयकाल एव नाशक इति भावः। ननु वेदस्य वर्णानांच न वियदादिवदुत्पत्तिमत्त्वं इदानीं गकार उत्पन्न इदानीं विनष्ट इति प्रतीतिविरोधात्। नच प्रत्यभिज्ञया उत्पादविनाशप्रतीतिबाधः बहुप्रतीतिबाधकल्पने गौरवेणत्यजेदेकं कुलस्यार्थे इति न्यायेन प्रत्यभिज्ञाबाधस्यैवोचितत्वात् ततश्च वेदस्य वर्णादीनां च मध्येप्युत्पादविनाशावित्याशंक्याह (नत्विति) सजातीयानंतवेदकल्पनायां च गौरवं बोध्यं तथाचोत्पादविनाशप्रतीतीनामुक्तगौरवपराहतं प्रामाण्यं तद्बहुत्वंचांधबहुत्ववन्न प्रयोजकमिति भावः। शब्दस्य स्थायित्वेबाधकमाशंक्य निराकरोति (अनुच्चारणेति) ननु न्यायमते उत्पादादिप्रतीतयः प्रत्यभिज्ञयापि सोयं गकार इति तद्गत्वावच्छिन्नभेदविषयतया गत्वजातिघटितपरंपरासंबधविषयत्वेन प्रमाणं तवमते तासामप्रामाण्यं स्यादित्यत आह (वर्णाभिव्यंजकेति) श्यामोनष्टोरक्तउत्पन्नइतिवदितिभावः॥

म० प्र०—उत्पत्तौनिराकृतायाम्—त्रिक्षणमात्रावस्थायित्वरूपहेतुनिराकरणेन नैयायिकोक्तलोकसिद्धोत्पत्तौ निराकृतायां (शब्दान्तरेति) युगपदुत्पन्नककारादिशब्दातिरिक्तवर्णात्मकशब्देत्यर्थः। अंतरा—मध्ये संसारे इतियावत् (असंभवेपीति) अस्यादौ सोयंककारः इत्यादिप्रत्यभिज्ञाबलादित्यस्य शेषो बोध्यः। स्थायित्वेप्रलयपर्यंतावस्थायित्वे, बाधकम्—सर्वदावर्णानांज्ञानापत्तिरूपबाधकम् (न्यायमतेइति) उत्पन्नोगकार इत्याद्युत्पादादिप्रतीतयस्तद्गत्वावच्छिन्नगकारादिभेदविषयतया प्रमाणं सोयंगकार इत्यादिप्रत्यभिज्ञापिगकारादिसमवेतगत्वादिसमवायित्वरूपगत्वादिजातिघटितपरंपरासंबंधविषयकत्वेन प्रमाणमित्यर्थः॥

मू०—तस्मान्नवेदानां क्षणिकत्वम्। ननु क्षणिकत्वाभावेपि वियदादिप्रपंचवदुत्पत्तिमत्त्वेनपरमेश्वरकर्तृकतया पौरुषेयत्वसिद्धावपौरुषेयत्वं वेदानामिति तवापि सिद्धांतो भज्येतेति चेन्न। नहि तावत्पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वम्, गुरुमतेपि अध्यापकपरंपरया पौरुषेयत्वापत्तेः, नापि पुरुषाधीनोत्पत्तिकत्वं नैयायिकाभिमतपौरुषेयत्वानुमाने अस्मदादिना सिद्धसाधनापत्तेः किंतु सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वम्॥

Funding by IKS-MoE

शि० म०-उपसंहरति (तस्मादिति) ननु वेदो न क्षणिको नापि वियदादिवदुत्पादविनाशशीलः किंतु नित्य एव उत्पत्तिश्रुतिश्चाभिव्यक्तिपरा अन्यथापरमेश्वरकर्तृकत्वे तस्य पौरुषेयत्वापत्तौ अपसिद्धांत इति जैमिनीयः शंकते (नन्विति) अस्य महत इत्यादिश्रुतिर्वेदोत्पत्तिपरैव तत्परत्वे बाधकाभावात्, यत्तु वेदस्य पौरुषेयत्वं बाधकमिति तद्द्वेधा विकल्प्य दूषयति (नहीत्यादिना) मौनिश्लोको न पौरुषेयःस्यादिति दोषे सत्येव दोषांतरमाह (गुरुमते इति । सजातीयेति) आनुपूर्व्या साजात्यं नच मौनिश्लोकेऽव्याप्तिः तस्यापि कदाचित्केनचिदुच्चरितत्वात् अन्यथा तस्यालीकत्वापत्तेः उच्चारणपदस्य प्रतिसंधानपरत्वाद्वा ॥

म०प्र०-परममूले (ध्वनिगतेति) उत्पत्त्याश्रयध्वन्यभिव्यंग्यत्वरूपोत्पत्तिघाटितपरंपरासंबंधविषयकत्वेनेत्यर्थः । अन्यथा-उत्पत्तिश्रुतेर्वेदाभिव्यक्तिपरत्वानंगीकारे, अपसिद्धान्तः-वेदनिष्ठांगीकृतापौरुषेयत्वत्यागापत्तिः, जैमिनीयः-व्यासशिष्यःपूर्वकांडवाक्यविचारकर्त्राचार्य्यमतस्वीकर्तृपुरुषः, बाधकं-वेदोत्पत्तौ बाधकम्, द्वेधाविकल्प्य-किं पुरुषेणोच्चार्य्यमाणत्वरूपंपौरुषेयत्वमपसिद्धांतापत्तिद्वारा वेदोत्पत्तौबाधकमुत पुरुषाधीनोत्पत्तिकत्वमितिं मनसिं द्वेधा विकल्प्य, मौनिश्लोकः-मौनिस्मृतश्लोकः मौनिकृतश्लोको वा, परममूले पौरुषेयत्वानुमाने-वेदः पौरुषेयो वाक्यत्वाद्भारतादिवदित्यनुमाने । परममूले (सिद्धसाधनापत्तेरिति) अस्मदाद्यभ्युपेतपुरुषाधीनोत्पत्तिकत्वरूपपौरुषेयत्वस्य तेन साधनादिति शेषः । ननु शब्देषु पदत्वादिना साजात्यस्य सत्त्वात्सजातीयोच्चारणानपेक्षोच्चारणविषयत्वरूपपौरुषेयत्वासंभव इत्याशंक्याह (आनुपूर्व्येति) तस्यापि-मौनिकृतश्लोकस्यापि, अन्यथा-मौनिकृतश्लोकस्य कदाचित्केनचिदुच्चरितत्वानंगीकारे । परममूले (सजातीयोच्चारणानपेक्षेति) आनुपूर्व्या साजात्यवत् उच्चारणं सजातीयोच्चारणं सजातीयोच्चारणस्यानपेक्षा यस्योच्चारणस्य तत्तथा तादृशोच्चारणविषयत्वमित्यर्थः ॥

मू०-तथाच सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान्, नतु तद्विजातीयं वेदमिति न सजातीयोच्चारणानपेक्षोच्चारणविषयत्वं पौरुषेयत्वम् ॥

शि० म०-ननु मा भूत् क्षणिको वेदः तथापि स्वतंत्रपुरुषप्रतीतः सर्वेश्वरप्रणीतत्वात् वेदभिन्नतत्प्रणीतवाक्यवत् । अन्यथा परमेश्वरस्य माणवकवदुच्चारणसापेक्षत्वेन तस्यास्मदादितुल्यत्वापत्तौ सर्वज्ञत्वसर्वशक्ति-

ताभ्युपगमभंगप्रसंगः ततश्च पौरुषेयो वेद इत्यत आह (तथाचेति) सर्गाद्यकाले सर्वेश्वरः पूर्वसर्गसिद्धेयमानुपूर्वी वेदस्येति ज्ञात्वा तत्समानानुपूर्वीकं वेदं रचयामीति संकल्प्य तादृशं वेदम् आचख्यौ नतु तद्विजातीयानुपूर्वीकं ज्ञात्वा, सर्गाद्यसमये वेदस्य पूर्वसर्गसिद्धवेदजातीयत्वात्तादृशवेदाध्ययनस्यैवाभ्युदयानिःश्रेयसहेतुत्वात् अन्यथा तस्य वाग्वज्रतयाऽनर्थहेतुत्वापत्तेः ॥

म०प्र०—वाक्यवत्—गीतादिवाक्यवत्, अन्यथा—वेदस्य स्वतंत्रपुरुषप्रणीतत्वानंगीकारे, ततश्च—वेदस्यस्वतंत्रपुरुषप्रणीतत्वादेव । परममूले(तथाचेति) उक्तविधपौरुषेयत्वांगीकारे सतीत्यर्थः । अस्तिच पौरुषेयेषु भारतादिष्वेतल्लक्षणमित्याह। परममूले (भारतादीनामिति) तादृशवेदं—पूर्वकल्पीयवेदानुपूर्वीविशिष्टं वेदम् । तद्विजातीयानुपूर्वीकं वेदं ज्ञात्वा नत्वाचख्यावित्यत्र हेतुमाह (सर्गाद्यसमयेइति) जातीयत्वात्। आनुपूर्व्या सजायतीयत्वात् सर्गाद्यसमये वेदस्यानुपूर्व्या सजातीयत्वं कुतोवगतमित्याशंक्याह (तादृशवेदेति) पूर्वकल्पीयवेदानुपूर्व्यासदृशवेदेत्यर्थः । अन्यथा-पूर्वसर्गसिद्धवेदानुपूर्व्या सजातीयवेदोत्पत्त्यनंगीकारे, तस्य—सर्गाद्यकालीनवेदस्य (वाग्वज्रतयेति)

मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ॥
स व्राग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधात् ॥

इत्युक्तत्वादिति शेषः । अस्यार्थः स्वरतः—उदात्तादिस्वरेण, हीनोरहितो मंत्रः—तथावर्णतः—अकारादिना हीनो मंत्रो मिथ्याप्रयुक्तः-मिथ्या एव प्रयुक्तःस्यात्फलविधुर एव तस्य प्रयोग इति यावत् स्वरादिना हीनमंत्रस्य मिथ्याप्रयोग इति कथं ज्ञायते इत्यत आह (नतमर्थमाहेति) यतस्तमर्थंस्वाभिप्रेतार्थं स मंत्रो नाह—नवक्ति अतो ज्ञायते तस्य मिथ्याप्रयोग इत्यर्थः । प्रत्युत स्वरादिवैपरीत्ये स्वरादिहीनमन्त्रस्यानर्थकारित्वमित्याह (सवागिति) स मंत्रो वाग्वज्रो वाग्रूपो वज्रो भूत्वा यजमानं हिनास्ति, यथा विश्वरूपस्य पिता त्वष्टा इन्द्रवधकामनया वृत्रासुरोत्पादनार्थेन्द्रशत्रुर्वर्धस्वेति मंत्रेणाहुतिं दत्तवान्, तत्रेन्द्रस्य शत्रुरिन्द्रशत्रुरित्युत्तरपदप्रधानतत्पुरुषस्वरस्य समासस्यांत उदात्तः स्यादित्यर्थक "समासस्य" इति सूत्रबोधितांतोदात्तस्योच्चारणीयत्वे इन्द्रः शत्रुः शातयिता नाशयिता यस्येति बहुव्रीहिस्वरस्याद्युदात्तस्योदात्तस्वरितयोगिपूर्वपदं प्रकृत्या स्यादित्यर्थकः "बहुव्रीहौ प्रकृत्या पूर्वपदम्" इतिसूत्रबोधितस्योच्चारणात् यजमानस्य त्वष्टुर्घातकत्वं मंत्रस्येति सिद्धमिति ॥

Funding by IKS-MoE

मू०-भारतादीनांतुसजातीयोच्चारणमनपेक्ष्यैवोच्चारणमिति तेषां पौरुषेयत्वम्, एवं पौरुषेयापौरुषेयभेदेनागमो द्विविधो निरूपितः ॥

इति वेदान्तपरिभाषायामागमपरिच्छेदः ॥

शि० म०-तथाचेश्वरः सर्वशक्तिरपि पूर्वसर्गसिद्धानुपूर्वीसमानानुपूर्वीकं वेदं रचयन्न स्वतंत्र इति न वेदस्य पौरुषेयत्वमिति भावः। ननु नेदं पौरुषेयत्वव्यवहारप्रयोजकं भारतरामायणादावव्याप्तेः यस्यापि शब्दजातीयोच्चारणसापेक्षत्वात् नचानुपूर्व्यासाजात्यं तत्र नेति वाच्यम् तथापि पठ्यमानभारतादावव्याप्तेरित्याशंक्य साजात्यमानुपूर्व्यैव विवक्षितं सिद्धांते पठ्यमानाऽऽद्यभारतयोर्भेदाभावान्नाव्याप्तिरित्यभिप्रेत्याह (भारतादीनांत्विति ॥

इतिश्रीधर्मराजाध्वरींद्रात्मजश्रीरामकृष्णाध्वरिविरचिते
वेदान्तशिखामणावागमपरिच्छेदः ॥ ४ ॥

म० प्र०-इदं-सजातीयोच्चारणानपेक्षोच्चारणविषयरूपपौरुषेयत्वम् तस्यापि भारतादेरपि (शब्देति) शब्दत्वेन सजातीया ये कोशव्याकरणस्थाःशब्दास्तेषां यदुच्चारणं तत्सापेक्षोच्चारणं व्यासादीनामुच्चारणं तद्विषयत्वादित्यर्थः। तत्र-भारतादिषु (अव्याप्तेरिति) आद्यभारतसजातीयभारतः पठ्यमानभारतस्तस्य यद्गुरोरुच्चारणं तत्सापेक्षोच्चारणं शिष्योच्चारणं तद्विषयत्वाद्भारतादीनामव्याप्तेरित्यर्थः। परंमूले (आगमइति) शब्दप्रमाणमित्यर्थः ॥

इति श्रीमदुदासीनवरश्रीमद्ब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदासशब्दवाच्याविर्भूतायांधर्मराजाध्वरीन्द्रात्मजरामकृष्णशब्दाभिधेयविरचितवेदान्तशिखामणेःप्रभायां शब्दप्रमाणपरिच्छेदःसमाप्तः ॥

अथ अर्थापत्तिपरिच्छेदः ५.

मू०–इदानीमर्थापत्तिर्निरूप्यते तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः ॥

शि० म०–संगतिं दर्शयन् शिष्यावधानाय प्रतिजानीते (इदानीमिति तत्रेति) अर्थापत्तौ निरूपणीयायामित्यर्थः (उपपाद्येति उपपाद्यज्ञानत्वेन तज्जन्यज्ञानमर्थापत्तिरित्यर्थः तेन तदनुव्यवसायादौ नातिव्याप्तिः । नच व्यतिरेक्यनुमितावतिव्याप्तिः तस्याः प्रागेवनिरस्तत्वात । तदंगीकारे वा व्यतिरेकसहचारज्ञानजन्यान्वयव्याप्तिज्ञानस्यैव तत्र हेतुतया ॥

निराश्रया ये पतिता अधोगतौ य एव सोपानपथोऽस्ति तादृशाम् ॥
गुरुर्यथावारिधिविश्वविश्रुतो विमुक्तयेऽसौ हृदयान्मयाऽऽदृतः ॥ १ ॥

म० प्र०–संगतिमिति–मूलेऽवसरसंगतिमित्यर्थः । नच मूलेऽवसरवाचकशब्दाभावात्कथमवसरसंगतिप्रदर्शनमिति वाच्यम् । मूले इदानीमित्यस्यार्थापत्तिनिरूपणप्रतिबंधकीभूतशब्दप्रमाणशिष्यजिज्ञासानिवृत्त्युत्तरकालरूपावसरवाचकत्वादिति, शिष्यावधानाय–अन्यत्रचित्तसंचारराहित्यपूर्वकप्रकृतग्रंथशुश्रूषावत्त्वरूपशिष्यावधानाय । परमर्मूले (इदानीमिति) शब्दप्रमाणनिरूपणात्प्रागर्थापत्तिनिरूपणे प्रतिबंधकीभूताया शब्दप्रमाणनिरूपणजिज्ञासातान्निवृत्त्युत्तरकाले इत्यर्थः । परममूले (उपपादककल्पनामिति) रात्रिभोजनादिरूपोपपादकज्ञानमित्यर्थः । परममूले (अर्थापत्तिरिति) प्रमारूपार्थापत्तिरित्यर्थः (उपपाद्यज्ञानत्वेनेति) उपपाद्यज्ञानत्वावच्छिन्नोपपाद्यज्ञाननिष्ठोपपादकज्ञानीयजन्यतानिरूपितजनकतानिरूपितजन्यतावदुपपादकज्ञानमित्यर्थः । तेन–अर्थापत्तिलक्षणे उपपाद्यज्ञाननिष्ठोपपादकज्ञानीयजन्यतानिरूपितजनकताया उपपाद्यज्ञानत्वात्वाच्छिन्नत्वस्य विवक्षितत्वेन (तदनुव्यवसायादाविति) पीनत्वादिरूपोपपाद्यमहंजानामीत्याकारकोपपाद्यज्ञानानुव्यवसाये आदिपदगृहीतोपपाद्यज्ञानध्वंसोपपाद्यस्मृत्याश्चार्थापत्तिप्रमालक्षणस्यातिव्याप्तिर्नास्तीत्यर्थः । व्यतिरेक्यनुनितौ–साध्यभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिमद्दिवाभुंजानत्वसमानाधिकरणकपीनत्वादिरूपव्यातिरेकिलिंगजन्यायां देवदत्तो रात्रिभोजीत्याद्यनुमितौ, अतिव्याप्तिः–देवदत्तो रात्रिभोजीत्याद्यनुमितेः साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यातिरेकव्याप्तिमदुपपाद्यादिवाभुंजानत्वसमा-

नाधिकरणकपीनत्वादिज्ञानत्वेन पीनत्वादिज्ञानजन्यत्वेनार्थापत्तिप्रमालक्षणस्यातिव्याप्तिः, तस्या-दिवाभुंजानत्वसमानाधिकरणकपीनत्वादिव्यतिरेकिलिंगजन्याया देवदत्तोरात्रिभोजीत्याद्यनुमितेः, प्रागेव-अतीतानुमाननिरूपणग्रंथे एव तदंगीकारे वा उक्तव्यतिरेकव्याप्तिमदुक्तलिंगजन्योक्तानुमितिस्वीकारे वा, व्यतिरेकसहचारज्ञानेति-साध्याभावसमानाधिकरणः साधनाभाव इत्याकारकव्यतिरेकसहचारज्ञानजन्यं यद्धेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यादिरूपान्वयव्याप्तिविषयकज्ञानं तस्यैवेत्यर्थः । तत्र-व्यतिरेकव्याप्तिमल्लिंगजन्यानुमितौ ॥

मू०-तत्रोपपाद्यज्ञानं करणम् ॥

शि० म०-तदभावव्यापकाभावप्रतियोगित्वविषयकोपपाद्यज्ञानस्याहेतुत्वान्नातिव्याप्तिः अस्तुवा व्यतिरेकसहचारज्ञानजन्यव्यतिरेकव्याप्तिज्ञानादनुमितिः तथापि तस्य व्यभिचारज्ञानविरोधिज्ञानतया हेतुत्वेन तदभावव्यापकाभावप्रतियोगित्वज्ञानत्वेनाहेतुत्वान्नातिप्रसंग इति दिक् तत उपपाद्यज्ञानत्वेन तज्जन्यज्ञानत्वं फलभूतार्थापत्तिलक्षणं तत्करणत्वं चार्थापत्तिप्रमाणलक्षणं तत्करणं च नांतःकरणं नचान्यत् किंत्वनुमितौ व्याप्तिज्ञानमिव तत्संस्कारव्यापारकं अनेन विना इदमनुपपन्नमित्युपपाद्यज्ञानमेवेत्याह (तत्रेति)॥

म० प्र०-(तदभावव्यापकाभावेति) उपपादकरात्रिभोजनादिरूपसाध्यस्य योऽभावस्तस्य व्यापको योऽभावो दिवाभुंजानत्वसमानाधिकरणकपीनत्वाद्यभावस्तस्य दिवाभुंजानत्वसमानाधिकरणकपीनत्वादिनिष्ठं यत्प्रतियोगित्वं तद्विषयकमुपपादकरात्रिभोजनादिरूपसाध्याभावव्यापकाभावप्रतियोगिदिवाभुंजानत्वसमानाधिकरणकपीनत्वादिकमित्याकारकं यदुपपाद्यज्ञानं तस्याहेतुत्वाद्व्यतिरेकव्याप्तिमल्लिंगजन्यायां देवदत्तो रात्रिभोजीत्याद्यनुमितौ कारणत्वाभावान्नातिव्याप्तिः व्यतिरेकव्याप्तिमल्लिंगजन्यानुमितावतिव्याप्त्यभाव इत्यर्थः (व्यतिरेकसहचारज्ञानेति) साध्याभावसमाधिकरणः साधनाभाव इत्याकारकव्यतिरेकसहचारज्ञानजन्यं यत्साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपव्यातिरेकव्याप्तिविषयकं ज्ञानं तस्मादित्यर्थः । तथापि-व्यतिरेकसहचारज्ञानजन्यव्यतिरेकव्याप्तिज्ञानस्यानुमितिहेतुत्वेपि । तस्य-साध्याभावसाधनाभावसहचारज्ञानजन्यव्यतिरेकव्याप्तिज्ञानस्य । हेतुत्वेन-व्यतिरेकव्याप्तिमल्लिंगजन्यानुमितौ कारणत्वेन (तदभावेति) रात्रिभोजनादिरूपोपपादकरूपसाध्यभावव्यापकदिवाभुंजानत्वासमानाधिकरणकपीनत्वादिरूपसाधनाभावप्रतियोगित्वप्रकारज्ञानत्वेनाहेतुत्वाद्व्यतिरेकव्याप्तिमल्लिङ्गजन्यानुमितौ कारणत्वाभावात् । नातिप्रसंगः-व्यतिरेकव्याप्तिमल्लिंगजन्यानुमितावर्थाप-

Funding by IKS-MoE

त्तिप्रमाणलक्षणस्यातिव्याप्तिर्नास्तीत्यर्थः । व्यभिचारज्ञानविरोधिज्ञानत्वावच्छिन्नव्यभिचारज्ञानविरोधिज्ञाननिष्ठजनकतानिरूपितजन्यत्वमेवानुमितित्वमिति भावः । ततः व्यतिरेकव्याप्तिमल्लिंगजन्यानुमितावर्थापत्तिप्रमालक्षणस्यातिव्याप्त्यभावात् । तत्करणत्वम्—उपपादकज्ञानरूपार्थापत्तिप्रमाकरणत्वम् । तत्करणंच—अर्थापत्तिप्रमाकरणंतु, अन्यत्—इंद्रियादिकम्, व्याप्तिज्ञानमिव—व्याप्तिज्ञानसंस्कारव्यापारकव्याप्तिज्ञानमिव, तत्संस्कारव्यापारकम्—उपपाद्यज्ञानसंस्कारव्यापारकम् । अनेन—विनारात्रिभोजनादिरूपोपपादकेन विना, इदमनुपपन्नं—रात्रिभोजनादिरूपोपपादकाभावव्यापकाभावप्रतियोगिदिवाभुंजानत्वसमानाधिकरणकपीनत्वादिकमसंभावितम् । परममूले (तत्रेति) उपपाद्यज्ञानोपपादकज्ञानयोर्मध्ये इत्यर्थः ॥

मू०—उपपादकज्ञानंफलं येन विना यदनुपपन्नं तत्त्रोपपाद्यं यस्याभावे यस्यानुपपत्तिस्तत्त्रोपपादकंयथा रात्रिभोजनेन विना दिवाभुंजानस्य पीनत्वमनुपपन्नमिति तादृशपीनत्वमुपपत्तिरीतिरात्रिभोजनमुपपादकम् ॥ स्यानु

शि० म०—ननूपपादकज्ञानं न फलं तस्य प्रागेव सिद्धत्वादित्याशंक्यसामान्यतः सिद्धावपि देवदत्तो रात्रौभुंक्ते इत्युपपाद्याधिकरणव्यक्तिविशेषवृत्तितया तदसिद्धेस्तदेव फलमित्याह (उपपादकेति) ननु व्याप्यत्वमुपपाद्यत्वं व्यापकत्वम् उपपादकत्वं नहि पीनत्वस्य रात्रिभोजनव्याप्यत्वं प्रागवगतमित्याशंक्य तदभावव्यापकाभावप्रतियोगित्वमुपपाद्यत्वं तदभावव्याप्याभावप्रतियोगित्वमुपपादकत्वमित्याह (येनेति) ॥

म०प्र०—ननु दिवाभुंजानत्वसमानाधिकरणकपीनत्वादिरूपोपपाद्यज्ञानरूपमर्थापत्तिप्रमाणं न संभवत्यर्थापत्तिप्रमाणफलस्य दुर्वचत्वात् । नच रात्रिभोजनादिरूपोपपादकज्ञानं फलमिति वाच्यम्, तस्य रात्रिभोजनादिरूपोपपादकाभावव्यापकदिवाभुंजानत्वसमानाधिकरणकपीनत्वाद्यभावप्रतियोगिदिवाभुंजानत्वसमानाधिकरणकपीनत्वादिकमित्याकारकार्थापत्तिप्रमाणरूपोपपाद्यज्ञानात्प्रागेवरात्रिभोजनादिरूपोपपादकज्ञानस्योपपादकाभावज्ञानहेतुत्वेन रात्रिभोजनादिरूपोपपादकज्ञानस्यावश्यकत्वेन सिद्धत्वादित्यभिप्रेत्य शंकते (नन्विति) तस्य—रात्रिभोजनादिरूपोपपादकज्ञानस्य प्रागेव दिवाभुंजानत्वसमानाधिकरणकपीनत्वं रात्रिभोजनं विनाऽनुपपन्नमिति ज्ञानरूपार्थापत्तिप्रमाणात्प्रागेव सामान्यतः—रात्रिभोजनमित्याकारकरात्रिभोजनरूपसामान्यधर्मप्रकारकत्वेन (उपपाद्याधिकरणेति) दिवाभुंजानत्वसमानाधिकरणकपीनत्वाधिकरणेत्यर्थः । तदसिद्धेः—

रात्रिभोजनादिरूपोपपादकज्ञानासिद्धेः (तदेव) दिवाऽभुंजानत्वसमानाधिकरणकपीनत्वाश्रयदेवदत्तो रात्रौ भुंक्ते इति ज्ञानमेव, फलम्–अथापत्तिप्रमाणकार्य्यम् (व्याप्यत्वमिति) साध्यवदन्यावृत्तित्वादिरूपव्याप्त्याश्रयत्वं व्याप्यत्वं, व्यापकत्वं च–हेतुसमानाधिकरणात्यंताभावाप्रतियोगित्वं तथाच दिवाभुंजानत्वसमानाधिकरणकपीनत्वनिष्ठरात्रिभोजनव्याप्यत्वज्ञानं देवदत्तोरात्रिभोजीति ज्ञानात्पूर्वं नास्ति उक्तव्याप्यत्वज्ञानस्वीकारे तु अन्वयिलिंगकानुमितिरेव स्यादिति भावः (तदभावेति) रात्रिभोजनादिरूपोपपादकाभावस्य व्यापकाभावो दिवाभुंजानत्वसमानाधिकरणकपीनत्वाद्यभावस्तत्प्रतियोगित्वमित्यर्थः (तदभावेति) दिवाभुंजानत्वसमानाधिकरणकपीनत्वादिरूपोपपाद्याभावस्य व्याप्याभावोरात्रिभोजनाद्यभावस्तत्प्रतियोगित्वमित्यर्थः । इदं हि लक्षणद्वयंमूलोक्तोपपाद्योपपादकलक्षणद्वयस्यैव निष्कर्षविशेष इति भावः । परममूले (तत्रेति) तेनेत्यर्थः ॥

मू०–रात्रिभोजनकल्पनारूपायां प्रमितावर्थस्यापत्तिकल्पनेति षष्ठीसमासेनार्थापत्तिशब्दो वर्त्तते कल्पनाकरणपीनत्वादिज्ञाने अर्थस्यापत्तिः कल्पना यस्मादिति बहुव्रीहिसमासेन वर्तते इति फलकरणयोरुभयोस्तत्पदप्रयोगः सा चार्थापत्तिर्द्विविधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ॥

शि० म०–नन्वर्थकल्पनाकरणत्वं चेदर्थापत्तिलक्षणं तर्हितदेवार्थापत्तिपदप्रवृत्तिनिमित्तं वाच्यं व्यावृत्तिव्यवहारान्यतरस्य लक्षणप्रयोजनत्वात् । तथाच रात्रिभोजनादिकल्पनायास्तद्व्यवहारो न स्यादित्याशंक्य फलकरणयोर्ज्ञानपदप्रयोगवन्नाविरोध इत्याह (रात्रिभोजनेति) ॥

म० प्र०–अर्थकल्पनाकरणत्वम्–रात्रिभोजनादिरूपोपपादकार्थज्ञानकरणत्वम् तर्हि–अर्थकल्पनाकरणत्वस्यार्थापत्तिप्रमाणलक्षणत्वेसति । तदेव–अर्थकल्पनाकरणत्वमेव (वाच्यमिति) नच संज्ञाजातिगुणादीनामन्यतमस्यैव शब्दप्रवृत्तिनिमित्तत्वेनार्थकल्पनाकरणत्वमर्थापत्तिपदप्रवृत्तिनिमित्तं वाच्यमिति कथमापद्यते इति वाच्यं संज्ञाद्यन्यतमशब्दप्रवृत्तिनिमित्तेषु जातेर्धर्ममात्रपरत्वात् तथाचार्थकल्पनाकरणत्वरूपधर्मस्यापि शब्दप्रवृत्तिनिमित्तत्वमुपपद्यते इति भावः । तद्व्यवहारः–अर्थापत्तिशब्देन व्यवहारः । परममूले (साचेति) उक्तलक्षणलक्षिता परममूले अर्थापत्तिः–प्रमात्मकार्थापत्तिः परममूले, दृष्टार्थापत्तिः–चक्षुरादिनापरोक्षीभूतार्थानुपपत्त्यापत्तिरुपपादकार्थज्ञानं दृष्टार्थापत्तिः परममूले श्रुतार्थापत्तिः–श्रुतार्थापत्त्याऽऽपत्तिरुपपादकार्थज्ञानं श्रुतार्थापत्तिः यद्वा. दृष्टार्थेन–इदं रजतमिति पुरोवर्त्तिप्रतिप

न्नरजतनिष्ठंनेदं रजतमिति निषिध्यमानत्वरूपार्थेनाऽऽपत्तिरुपपादकमिथ्यात्वरूपार्थस्य ज्ञानं दृष्टार्थापत्तिः एवं, श्रुतार्थेन–बंधनिष्ठज्ञाननिवर्त्यत्वार्थेनापत्तिरुपपादकमिथ्यात्वज्ञानं श्रुतार्थापत्तिः तथाच शुक्तिरजतादिनिष्ठनिषिद्ध्यमानत्वादिरूपार्थाभावव्यापकमिथ्यात्वाद्यभावप्रतियोग्यर्थविषयकज्ञानत्वं दृष्टार्थापत्तित्वं एवं श्रुतबंधनिष्ठज्ञाननिवर्त्यत्वाद्यभावव्यापकामिथ्यात्वाद्यभावप्रतियोग्यर्थविषयकज्ञानत्वं श्रुतार्थापत्तित्वमिति तयोर्लक्षणं बोध्यमिति दृष्टार्थापत्तौ शुक्तिरजतादिनिषिद्ध्यमानत्वादिकं मिथ्यात्वादिना विनानुपपन्नमिति ज्ञानं करणं श्रुतार्थापत्तौ तु बंधनिष्ठज्ञाननिवर्त्यत्वादिरूपश्रुतार्थो मिथ्यात्वादिना विनानुपपन्न इति ज्ञानं करणमिति भावः ॥

मू०–तत्र दृष्टार्थापत्तिर्यथेदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रजतमिति तत्रैव निषिद्ध्यमानत्वं सत्यत्वेऽनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्यत्वात्यंताभाववत्त्वं मिथ्यात्वं कल्पयतीति श्रुतार्थापत्तिर्यथा श्रूयमाणवाक्यस्यस्वार्थानुपपत्तिमुखेनार्थान्तरकल्पनं यथा तरति शोकमात्मविदत्यत्रश्रुतस्य शोकशब्दवाच्यबंधजातस्य ज्ञाननिवर्त्यत्वस्यानुपपत्त्याबंधस्य मिथ्यात्वं कल्प्यते इति । यथावा शतवर्षजीवी देवदत्तोगेहे नेति वाक्यश्रवणानंतरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयतीति श्रुतार्थापत्तिश्च द्विविधा अभिधानानुपपत्तिरभिहितानुपपत्तिश्च तत्र यत्र वाक्यैकदेशश्रवणेऽन्वयाभिधानानुपपत्त्याऽन्वयाभिधानोपयोगिपदांतरं कल्प्यते तत्राभिधानानुपपत्तिः। यथा द्वारमित्यत्र पिधेहीत्यध्याहारः यथावाविश्वजिता यजेतेत्यत्र स्वर्गकामपदाध्याहारः ॥

शि० म०–यद्यप्यन्यथाप्यस्त्येव दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च तथाप्यर्थापत्तिनिरूपणस्यप्रपंचस्यमिथ्यात्वादिसिद्धप्रयोजनमिति सूचयन्नुदाहरति (दृष्टार्थापत्तिरिति) स्वमतेन श्रुतार्थापत्तिमुदाहृत्य जैमिनीयस्यापि संमतां तामुदाहरति (यथावेति यत्रवाक्यैकदेशेति) यार्थापत्तिरन्वयाभिधानोपयोगिकल्पनानुकूलासाभिधानानुपपत्तिरित्यर्थः।

Funding by IKS-MoE

अन्यथा यथाश्रुतेऽर्थाध्याहाराव्याप्त्यापत्तेरिति बोध्यम् । पदाध्याहारमतेनाह (यथेति) कृत्वा चिंतामाश्रित्याह (यथावाविश्वजितेति ॥

म० प्र०—ननु दिवाभुंजानपुरुषनिष्ठपीनत्वादिज्ञानेन रात्रिभोजनादिज्ञानरूपप्रसिद्धार्थापत्त्युदाहरणं परित्यज्य शुक्तिरजतादिनिष्ठनिषिद्ध्यमानत्वादिज्ञानेन मिथ्यात्वादिज्ञानरूपाप्रसिद्धार्थापत्त्युदाहरणकथनमयुक्तमित्याशंक्याह (यद्यपीति । अन्यथाप्यस्त्येवेति) दिवाभुंजानदेवदत्तस्य रात्रिभोजनं विनाऽनुपपद्यमानपीनत्वज्ञानेन तदुपपादकरात्रिभोजनज्ञानं भवतीत्यनेन प्रकारेणापि दृष्टार्थापत्तिरस्त्येवं तथा शतवर्षजीवीदेवदत्तो गेहे नास्तीति वाक्यश्रवणानंतरं जीवीदेवदत्तगृहासत्त्वज्ञानेन बहिःसत्त्वज्ञानं भवतीत्यनेन प्रकारेणापि श्रुतार्थापत्तिरस्त्येवेत्यर्थः । परममूले (तत्रेति) द्विविधार्थापत्त्योर्मध्ये इत्यर्थः । परममूले, तत्रैव—पुरोवर्तिशुक्त्यादावेव, परममूले सद्भिन्नत्वं—व्यावहारिकरजतभिन्नत्वं, परममूले श्रुतस्य—ज्ञाननिवर्त्यत्वस्येत्यन्वयः इयं हि बंधमिथ्यात्वप्रमारूपाश्रुतार्थापत्तिरभिहिताऽनुपपत्तिरूपा बोध्या मिथ्यात्वादिसिद्धिरित्यत्र ज्ञाननिवर्त्यत्वादिरादिपदार्थः । जैमिनीयस्य—जैमिनिमतानुयायिनः ताम्—श्रुतार्थापत्तिम् । परममूले गृहासत्त्वं गृहावृत्तित्वज्ञानम्, इयमपि बहिः सत्त्वप्रमारूपा श्रुतार्थापत्तिरभिहितानुपपत्तिरूपा बोध्या, परममूले । श्रुतार्थापत्तिः—प्रमारूपाश्रुतार्थापत्तिः । परममूले (अभिधानानुपपत्तिरिति) अभिधानानुपपत्तिज्ञानकारणकोपपादकपिधेहि पदादिज्ञानरूपार्थापत्तिरभिधानानुपपत्तिः अभिहितार्थानुपपत्तिः—ज्ञानकरणकोपपादकमध्यवर्त्यपूर्वज्ञानरूपार्थापत्तिरभिहितानुपपत्तिरित्यर्थः (यार्थापत्तिरिति) कल्पनानुकूलेत्यत्र टावंतानुकूलपदमधिकमभिधानानुपपत्तिरूपार्थापत्तिप्रमालक्षणावसरेऽभिधानुपपत्तिरूपार्थापत्तिप्रमाणलक्षणाभिधानस्यायुक्तत्वात् तथाच द्वारनिष्ठकर्मतायाः पिधानादिक्रियया सहान्वय इति यदभिधानं तस्योपयोगि पिधेहिपदादिज्ञानार्थापत्तिरभिधानानुपपत्तिरित्यर्थः । अन्यथा—यत्र वाक्यैकदेशेत्यादिमूलोक्ताभिधानानुपत्तिप्रमालक्षणवाक्यस्य याऽर्थापत्तिरित्यादिवाक्योक्तार्थानंगीकारे, यद्वाऽन्यथेत्यस्यैव विवरणं यथाश्रुतेइति, परममूले (यत्रवाक्येति) यादृशवाक्येत्यर्थः । परममूले (तत्रेति) तस्मिन्वाक्ये इत्यर्थः (पदाध्याहारमतेनाहेति) आकांक्षितपदादिवाक्येपदादेरेवाध्याहार इति ज्ञानप्रयोज्यकथनानुकूलवर्तमानकृत्याश्रय इत्यर्थः (कृत्वाचिंतामिति) यद्यपि मीमांसकमते पदाध्याहारो नास्ति किंत्वर्थाध्याहारस्तथापि पदाध्याहारोपि संभवतीति मत्वा या चिंता तामाश्रित्येत्यर्थः ॥

Funding by IKS-MoE

मू०—ननु द्वारमित्यादावन्वयाभिधानात्पूर्वमिदमन्वयाभिधानं पिधानोपस्थापकपदंविना अनुपपन्नमिति कथंज्ञानमिति चेन्न अभिधानपदेन करणव्युत्पत्त्या तात्पर्यस्य विवक्षितत्वात्; तथाच द्वारकर्मकपिधानक्रियासंसर्गपरत्वं पिधानोपस्थापकपदंविना अनुपपन्नमिति ज्ञानं तत्रापि संभाव्यते अभिहितानुपपत्तिस्तु यत्र वाक्यावगतोर्थोऽनुपपन्नत्वे नज्ञातःसन्नर्थांतरं कल्पयति तत्र द्रष्टव्या यथा स्वर्गकामो ज्योतिष्टोमेन यजेतेत्यत्र स्वर्गसाधनत्वस्य क्षणिकज्योतिष्टोमयागगततयावगतस्यानुपपत्त्या मध्यवर्त्यपूर्वं कल्प्यते ॥

शि० म०—सः स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वादित्यत्रसूत्रेचतुर्थाध्याये स्वर्गपदाध्याहारस्य साधितत्वादिति भावः । अन्वयाभिधानानुपपत्त्येत्यत्र भावव्युत्पत्तिमभिप्रेत्य शंकते (नन्विति) कल्प्यापूर्वमतेनाभिहितानुपपत्तिमुदाहरति (यथास्वर्गकामइति) ॥

म० प्र०—सः स्वर्गइति—इदं हि सूत्रं पूर्वमीमांसाचतुर्थाध्यायतृतीयपादस्थितम चतुर्थाध्याये "सः स्वर्गःस्यात्सर्वान्प्रत्यविशिष्टत्वात्"इत्यत्र सूत्रे इत्यन्वयः"विश्वजिता यजेत" इति वाक्यविहितविश्वजिन्नामकयागोफलः सफलो वेति संशये नोदनायां फलाश्रुतेः "कर्ममात्रंविधीयेत नह्यशब्दं प्रतीयते" इति सूत्रेण विश्वाजिन्नामककर्माफलमितिपूर्वपक्षमभिधाय "अपिवाम्नानसामर्थ्याच्चोदनार्थेनगम्येताऽर्थानामर्थवत्त्वेन वचनानिप्रतीयंतेर्थतोप्यसमर्थानामानंतर्य्येप्यसंबंधः तस्माच्छ्रुत्येकदेशः स"इतिसूत्रेण विश्वजिन्नामककर्मणः सफलत्वरूपं सिद्धान्तमभिधायायं विश्वजिद्यागः सर्वफलैः संबध्यते एकेन फलेन वेति संशये "तत्सर्वार्थमनादेशात्" इतिसूत्रेण विश्वजिद्यागस्य सर्वफलैः संबंधाभिधानरूपपूर्वपक्षं कृत्वा "एकंवाचोदनैकत्वात्" इतिसूत्रेण विश्वजिद्यागस्यैकफलत्वं सिद्धान्तयामास । तच्चैकं फलंकिमित्याऽऽकांक्षायामाह (सस्वर्गइति) चोदनायां विश्वजितायजेतेति विधायके वाक्ये फलाश्रवणात्कर्मैवविधीयते हि यतोऽशब्दंशब्दागम्यं फलमानुमानिकंफलं न प्रतीयते नांगीक्रियते इति प्रथमसूत्रार्थः । अपिवाम्नानसामर्थ्यात्—वेदवाक्यसामर्थ्यादेव, चोदनार्थेन—पुरुषप्रवृत्तिरूपाख्यातवाच्यभावनया, गम्येत—फलंकल्पनीयं यतोऽर्थानां, लिङ्शब्दवाच्यशब्दभावनानामर्थवत्त्वेन—पुरुषप्रवृत्तिरू-

Funding by IKS-MoE

पार्थवत्त्वेन, वचनानि–इतरवचनानि, प्रतीयंते–ज्ञायंते अतस्तथात्रापि भवितव्यमर्थतोऽन्तःकरणादसमर्थानां फलवाचकपदाभावात्तद्बोधासमर्थानां वाक्यानामानंतर्य्येण स्वसमीपवर्त्तिवाक्यघटकफलवाचकपदेन सह संबंधः कार्य्यः । तस्माच्छ्रुत्येकदेशः स वेदघटकपदस्यैव योजनान्न लौकिकवाक्यत्वशंकेति भाव इति द्वितीयसूत्रार्थः । तत्–विश्वजिन्नामकं कर्म सर्वार्थं सर्वफलकम्, अनादेशात्–फलविशेषाश्रवणादिति तृतीयसूत्रार्थः । एकंवा–विश्वजित एवमेकफलं, चोदनैकत्वात्–एकविधित्वादेकोविधिरेकंफलमपेक्षत इति भाव इति चतुर्थसूत्रार्थः । सः एकोपि स्वर्गः, स्वर्ग एव सर्वान्–प्रत्यविशिष्टत्वात्–वैलक्षण्यात् सर्वाभिलषणीयत्वादितिपंचमसूत्रार्थः । साधितत्वादिति–भाष्यकारादिभिरितिशेषः । परममूले (ननुद्वारमित्यादाविति) द्वारकर्मकं पिधानमित्यन्वयाभिधानात्प्राक् पिधानोपस्थापकपदं विना द्वारकर्मकं पिधानमित्यन्वयाभिधानमनुपपन्नमिति ज्ञानं कथमित्यर्थः । परममूले (संसर्गपरत्वमिति) संसर्गविषयकतात्पर्य्यमित्यर्थः । परममूले (तत्रापीति) अन्वयाभिधानात्पूर्वकालेपीत्यर्थः ॥

मू०–नचेयमर्थापत्तिरनुमानांतर्भवितुमर्हति अन्वयव्याप्त्यज्ञानेनान्वयिन्यन्तर्भावात् व्यतिरेकिणश्चानुमानत्वं प्रागेवनिरस्तम् अतएवार्थापत्तिस्थलेऽनुमिनोमीतिनानुव्यवसायः किंत्वनेनेदं कल्पयामीति नन्वर्थापत्तिस्थले इदमनेन विनाऽनुपपन्नमिति ज्ञानं करणमित्युक्तं तत्र किमिदं. तेन विनाऽनुपपन्नत्वं तदभावव्यापकीभूताभावप्रतियोगित्वमिति ब्रूमः ॥

शि० म०–नैयायिकमतं निराकरोति (नचेति) किमर्थापत्तेरन्वयिन्यंतर्भावः । उत व्यतिरेकिणि तत्राद्यं निराकृत्य द्वितीयं निरस्यति (व्यतिरेकिणश्चेति) नन्वर्थापत्तिस्थले लाघवेन क्लृप्तप्रमाणभावस्यानुमानस्यैव करणत्वं नत्वर्थापत्तेर्गौरवादित्यत आह (अतएवेति) ननु यद्यनुमिनोमीत्यनुव्यवसायाभावात्तत्र नानुमानंकरणं तर्हि तद्विलक्षणानुव्यवसायाभावान्नार्थापत्तिरपि प्रमाणं स्यादिति चोदयति(किंत्विति) ननु किं तेन विनाऽनुपपन्नं न तावत्तदभावप्रयुक्ताभावप्रतियोगित्वं तद्धि तदभावजन्याभावप्रतियोगित्वं तदभावव्याप्याभावप्रतियोगित्वं वा नोभयमपीति शंकते (नन्विति) व्यापकत्वं प्रयुक्तत्वमिह विवक्षितमित्याह (तदभावेति) ॥

Funding by IKS-MoE

म० प्र०—तत्र—अर्थापत्तिप्रमाणस्यान्वय्यनुमानांतर्भावव्यतिरेक्यनुमानांतर्भावपक्षयोर्मध्ये, आद्यम्—अर्थापत्तिप्रमाणस्यान्वय्यनुमानांतर्भावपक्षम्, अर्थापत्तिस्थले—रात्रिभोजनकल्पनारूपप्रमात्मकार्थापत्तिस्वरूपे (नत्वर्थापत्तेरिति) उपपाद्यज्ञानात्मकार्थापत्तिप्रमाणस्य नैवकरणत्वमित्यर्थः (गौरवादिति) क्लृप्तप्रत्यक्षादिप्रमाणभिन्नार्थापत्तिप्रमाणकल्पनारूपगौरवादित्यर्थः । परममूले (अतएवेति) अर्थापत्तिप्रमाणस्यान्वय्यनुमानव्यतिरेक्यनुमानयोरंतर्भावासंभवादित्यर्थः । परममूले (अर्थापत्तिस्थलेइति) प्रमारूपार्थापत्तिस्वरूपेइत्यर्थः । तत्र—अर्थापत्तिप्रमायां (तद्विलक्षणेति) अनुमिनोमीत्यनुव्यवसायविलक्षणेत्यर्थः । अर्थापत्तिः—उपपाद्यज्ञानरूपप्रमाणाभिन्नार्थापत्तिः, किंतेनविनानुपपन्नत्वम्—रात्रिभोजनेन विनादिवाभुंजानपुरुषवृत्तिपीनत्वनिष्ठानुपपन्नत्वं किं (तदभावप्रयुक्तेति) रात्रिभोजनाभावप्रयुक्तो योऽभावो दिवाभुंजानपुरुषनिष्ठपीनत्वाभावस्तत्प्रतियोगित्वमित्यर्थः । तद्धि—तदभावप्रयुक्ताभावप्रतियोगित्वं हि (तदभावजन्येति) रात्रिभोजनाभावजन्यो योऽभावो दिवाभुंजानत्वसमानाधिकरणकपीनत्वाभावस्तत्प्रतियोगित्वमित्यर्थः (तदभावव्याप्येति) यत्र दिवाभुंजानत्वसमानाधिकरणकपीनत्वाभावस्तत्ररात्रिभोजनाभाव इति रात्रिभोजनाभावव्याप्योयोऽभावः पीनत्वाभावस्तत्प्रतियोगित्वंवेत्यर्थः (नोभयमिति) तदभावजन्याभावप्रतियोगित्वतदभावव्याप्याभावप्रतियोगित्वेत्येतदुभयविधान्यतररूपमपितदभावप्रयुक्ताभावप्रतियोगित्वं न संभवतीत्यर्थः । दिवाभुंजानत्वसमानाधिकरणकपीनत्वस्य ध्वंसादिरूपाभावं प्रतिरात्रिभोजनप्रागभावरूपरात्रिभोजनाभावस्याकारणत्वात्तदभावजन्याभावप्रतियोगित्वाभिन्नतदभावप्रयुक्ताभावप्रतियोगित्वरूपप्रथमपक्षासंभवः । रोगिणि दिवाभुंजानत्वसमानाधिकरणकपीनत्वाभावसत्त्वेपि रात्रिभोजनसत्त्वेन दिवाभुंजानत्वसमानाधिकरणकपीनत्वाभावनिष्ठरात्रिभोजनाभावनिरूपितव्याप्त्यभावेन तदभावव्याप्याभावप्रतियोगित्वाभिन्नतदभावप्रयुक्ताभावप्रतियोगित्वरूपद्वितीयपक्षासंभवइतिभावः । व्यापकत्वरूपं प्रयुक्तत्वं विवक्षितं नतु तदभावजन्यत्वादिरूपमित्याह (व्यापकत्वमिति) इह—तेन विनानुपपन्नत्वशरीरे तदभावव्यापकेतियत्ररात्रिभोजनाभावस्तत्र दिवाभुंजानत्वे सति पीनत्वाभाव इति रात्रिभोजनाभावव्यापको यो दिवाभुंजानत्वसमानाधिकरणकपीनत्वाऽभावस्तत्प्रतियोगित्वमित्यर्थः ॥

मू०—एवमर्थापत्तेर्मानांतरत्वसिद्धौ व्यतिरेके नानुमानांतरं पृथिवीतरेभ्यो भिद्यते इत्यादौ गंधवत्त्वमितरभेदं विनानुपपन्नमित्यादिज्ञानस्य कारणत्वात् अतएवानुव्यवसायः पृथिव्यामितरभेदं कल्पयामीति ॥

इति श्रीवेदान्तपरिभाषायामर्थापत्तिपरिच्छेदः ॥ ५ ॥

शि० म०–यद्वा तेन विनाऽनुपपन्नत्वं हि तद्भावव्यापकाभावप्रतियोगित्वम् अन्यानिरुक्तेः, तथाच व्यतिरेकव्याप्तिज्ञानं तवाप्यावश्यकं व्यभिचारज्ञानाविरोधिज्ञानत्वेनानुमितिहेतुतया च क्लृप्तमित्यनुमितिमेव. जनयेन्न विलक्षणप्रमितिमर्थापत्तिमित्याशयेनाक्षिपति (नन्विति) नह्यत्र व्यतिरेकव्याप्तिज्ञानंनेति ब्रूमः किंत्वनेनेदं कल्पयामीति विलक्षणानुव्यवसायबलादर्थापत्तिविधया तत्प्रमाणमित्यभिप्रेत्य समाधत्ते (तद्भावेति । मानांतरत्वेति) तथाच व्यतिरेकिनमानांतरमर्थापत्तिश्च पृथक् प्रमाणं तथोक्तमनुमानपरिच्छेदे, ननु पृथिव्यादावितरभेदसिद्धेरनन्याधीनत्वाद्व्यतिरेकि मानांतरमित्याशंक्यार्थापत्तेरेव पीनत्वादिस्थले क्लृप्तप्रमाणभावतया सर्वत्र नैयायिकाभिमतव्यतिरेकस्थले सैव प्रमाणमित्याह (पृथिवीति) ननु तत्रानुव्यवसायबलादस्त्वनुपपत्तिज्ञानं करणमत्र तु न तथेत्यत आह (अतएवेति) यत एवानुपपत्तिज्ञानं तत्त्वेन करणमित्यर्थः ॥

इति श्रीधर्मराजाध्वरींद्रात्मजश्रीरामकृष्णाध्वरिकृते वेदांत-
शिखामणावर्थापत्तिपरिच्छेदः ॥ ५ ॥

म० प्र०–अन्यानिरुक्तेरिति–अन्याकारस्यतेनविनानुपपन्नत्वस्यनिर्वचनासंभवादित्यर्थः । अत्रेति–उत्तरमीमांसायांवेदांतशास्त्रेइतियावत् अर्थापत्तिविधया अर्थापत्तिप्रमाणत्वेन तत्–व्यतिरेकव्याप्तिज्ञानम्, अनन्याधीनत्वात्–व्यतिरेकव्याप्तिज्ञानान्यानुपपत्तिज्ञानानधीनत्वात् अंन्याधीनत्वादितिपाठेतु अनुपपत्तिज्ञानान्यव्यतिरेकव्याप्तिज्ञानाधीनत्वादित्यर्थः। अर्थापत्तेरिति–पीनत्वाद्यधिकरणवृत्तिउपपाद्यज्ञानरूपार्थापत्तेरेवेत्यर्थः।तत्र–पीनत्वाद्यधिकरणवृत्तिरात्रिभोजनादिज्ञाने अनुव्यवसायबलात् दिवाभुंजाननिष्ठपीनत्वज्ञानेनरात्रिभोजनं कल्पयामीत्यनुव्यवसायबलात् (अस्त्वनुपपत्तिज्ञानमिति) दिवाभुंजाननिष्ठपीनत्वं रात्रिभोजनेन विनानुपपन्नमिति ज्ञानं करणमस्त्वित्यर्थः । अत्रतु–पृथिवीनिष्ठेतरभेदनिश्चयेतु, नतथा–पृथिव्यामितरभेदं कल्पयामीत्यनुव्यवसायाभावेनानुव्यवसायबलादनुपपत्तिज्ञानं करणं न भवति । परममूले–अतएवेति । उक्तानुपपत्तिज्ञानस्यानुपपन्नत्वज्ञानत्वेन करणत्वादेवेत्यर्थः । तत्त्वेन–अनुपपत्तिज्ञानत्वेन ॥

इति श्रीमदुदासीनवरश्रीमद्ब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदासशब्द-
वाच्याविर्भूतायांधर्मराजाध्वरींद्रात्मजरामकृष्णाभिधेयविरचितवेदांत-
शिखामणेः प्रभायामर्थापत्तिपरिच्छेदः समाप्तः ॥ ५ ॥

Funding by IKS-MoE

अथानुपलब्धिपरिच्छेदः ६

मू०–इदानीं षष्ठं प्रमाणं निरूप्यते। ज्ञानकरणाजन्याभावानुभवसाधारणकारणमनुपलब्धिरूपं प्रमाणम्, अनुमानादिजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यान्तेति पदम्, अदृष्टादौ साधारणकारणेतिव्याप्तिवारणायासाधारणेति पदम्, अभावस्मृत्यसाधारणहेतुसंस्कारेतिव्याप्तिवारणायानुभवेतिविशेषणम् नचाभावानुमितिस्थलेप्यनुपलब्ध्यैवाभावो गृह्यतां विशेषाभावादिति वाच्यम्। धर्माद्यनुपलब्धिसत्त्वेपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् । ननु केयं योग्यानुपलब्धिः किं योग्यस्य प्रतियोगिनोऽनुपलब्धिरुत योग्येऽधिकरणेप्रतियोग्यनुपलब्धिः ॥

शि० म०–ज्ञानाकरणकाभावानुभवकरणत्वमनुपलब्धिप्रमाणलक्षणं तत्करणत्वं च व्यापाराभावादसाधारणकारणत्वं विवक्षितमित्याह (ज्ञानकरणेति) भावानुभवकरणे चक्षुरादावतिव्याप्तिवारणायाभावपदं, ननु ज्ञानकरणाजन्येति व्यर्थमभावानुमितिस्थलेप्यनुपलब्ध्यैवाभावग्रहसंभवाल्लाघवेन केवलानुपलब्धेरेव प्रमाणत्वेन योग्यत्वविशेषणवैयर्थ्यादित्याशंक्य निराकरोति (नचेति) ॥

येषां कृपालेशत एषबोधो लब्धो मया शास्त्रविशेषवेद्यः ।
त्रेधातिभक्त्या प्रणमाम्यहं तान् श्रीब्रह्मविज्ञानगुरून्न शरण्यान् ॥ १ ॥

म० प्र०–अभावानुमितिस्थले–अतींद्रियधर्माद्यभावानुमितिविशेष्यताख्यविषयतावति अतीन्द्रियधर्माद्यभावानुमितिकाले इति वा अभावग्रहसंभवात्–प्रत्यक्षयोग्यप्रतियोगिकाभावग्रहसंभवात्, लाघवेन–योग्यानुपलब्धिनिष्ठप्रमाणत्वाभ्युपगमापेक्षया केवलानुपलब्धेः प्रमाणत्वस्वीकारे लाघवेन परममूले, अभावानुमितिस्थलेपीति–प्रत्यक्षायोग्यधर्मादिप्रतियोगिकाभावानुमितिविशेष्यताख्यविषयतावतिपरममूले । अनुपलब्ध्येव–धर्मादिविषयकज्ञानविरोध्यज्ञानेनैव परममूले विशेषाभावात्–अभावत्वेनतुल्यत्वात् तथाच जन्यांतविशेषणवैयर्थ्यमिति भावः, परममूले तदभावानिश्चयेन–धर्मा-

Funding by IKS-MoE

प्रत्यक्षायोग्यत्वेन प्रत्यक्षप्रमाणजन्यधर्माद्यभावविषयकनिश्चयविरोध्यज्ञानेन परममूले (योग्यानुपलब्धेरेवेति) प्रत्यक्षयोग्यघटादिविषयकोपलंभविरोध्यज्ञानस्यैवेत्यर्थः । यदिन्द्रियजन्ययत्संसर्गकयत्प्रकारकानाहार्यघटाद्युपलब्धिविरोध्यज्ञानजन्ययोग्यघटादिप्रतियोगिकाभावप्रत्यक्षं प्रति तदिन्द्रियजन्यतत्संसर्गकतत्प्रकारकानाहार्यघटाद्युपलब्धिविरोध्यज्ञानं करणमिति भावः । संयोगेन घटवतिभूतले संयोगसंसर्गघटत्वप्रकारकानाहार्य्यचाक्षुषघटापलब्धिसत्त्वेपि त्वगिन्द्रियजन्यघटत्वप्रकारकानाहार्य्यघटोपलब्धिविरोध्यज्ञानसत्त्वेन घटाभावस्यानुपलब्ध्या प्रत्यक्षत्वापत्तिवारणाय यदिन्द्रियजन्येति, संयोगेन घटवतिभूतले तादात्म्येन घटाभावसत्त्वेन संयोगेन घटाभावस्य प्रत्यक्षत्वापत्तिवारणाययत्संसर्गकेति, संयोगेन घटवति भूतले द्रव्यप्रकारकोपलंभविरोध्यज्ञानेन घटाभावप्रत्यक्षत्वापत्तिवारणाय यत्प्रकारकेति, आहार्य्यघटाभावप्रत्यक्षानुदयापत्तिवारणायानाहार्य्येति ॥

सू०–नाद्यः स्तंभे पिशाचादिभेदस्याप्रत्यक्षत्वापत्तेः । नांत्यः आत्मनि धर्माद्यभावस्य प्रत्यक्षत्वापत्तेरिति चेन्न, योग्याचासावनुपलब्धिश्चेति कर्मधारयाश्रयणात् अनुपलब्धेर्योग्यताच तर्कितप्रतियोगिसत्त्वप्रसंजितप्रतियोगिकत्वं यस्याभावो गृह्यते तस्य यः प्रतियोगि तस्य सत्त्वेनाधिकरणे तर्कितेन प्रसंजितमापादनयोग्यं यत्प्रतियोग्युपलब्धिस्वरूपं यस्यानुपलम्भस्य तत्त्वं तदनुपलब्धियोग्यत्वम् ॥

शि० म०–ननु अनुपलब्धेर्योग्यत्वं न प्रत्यक्षयोग्यत्वं तवमते तस्याः प्रत्यक्षत्वायोग्यत्वात् । नच योग्यानुपलब्धियोग्यत्वमात्माश्रयादित्यत आह (अनुपब्धेरिति) नन्वन्यप्रतियोग्युपलब्धिप्रसंजनादन्याभावप्रत्ययापत्तिः । यत्रच न तत्प्रसंजनं तत्र नाभावग्रहः स्यादित्याशंक्य यत्प्रतियोगि सत्त्वप्रसंजनप्रयुक्तप्रसंजनयोग्यप्रतियोगिकत्वं यस्यानुपलंभस्य सोऽनुपलंभस्तदभावं प्रति योग्य इति तेन स एव गृह्यते नान्यस्याभाव इत्याह (यस्येति) ॥

म० प्र०–परममूले पिशाचादिभेदस्य––पिशाचादिप्रतियोगिकान्योन्याभावस्य परममूले (अप्रत्यक्षत्वापत्तेरिति) योगजधर्मलक्षणप्रत्यासत्त्या धर्मादिप्रत्यक्षत्ववदनुष्ठानविशेषजन्यादृष्टविशेषेणं पिशाचादिप्रत्यक्षत्वेपि लौकिकसन्निकर्षजन्य-

Funding by IKS-MoE

पिशाचादिप्रत्यक्षाभावेन पिशाचादिभेदस्य योग्यप्रतियोगिकत्वाभावात्प्रत्यक्षत्वं न स्यादिति भावः। प्रत्यक्षयोग्यत्वं कदाचिल्लौकिकप्रत्यक्षविषयतावत्त्वम् अभावस्यायोग्यत्वेन न प्रत्यक्षत्वमित्यभिप्रेत्य हेतुमाह (तवमतेइति) यद्वा प्रमारूपाभावज्ञानविषयस्य प्रत्यक्षत्वेप्यनुपलब्धित्वस्य योग्यायोग्यानुपलब्धिसाधारणत्वेनकरणस्वरूपानुपलब्धेर्न प्रत्यक्षत्वमित्यभिप्रेत्य हेतुमाह (तवमतेइति) तस्याः–अनुपलब्धेः। योग्यानुपलब्धियोग्यत्वम्–प्रत्यक्षयोग्यघटादिविषयस्य याऽनुपलब्धिंस्तस्यायोग्यत्वंकारणतावच्छेदकशक्तिरूपधर्माक्रांतत्वमनुपलब्धेर्योग्यत्वं तथाचानुपलब्धिपदेन धर्माद्यनुपलब्धेर्नग्रहणमिति भावः। आत्माश्रयात्–योग्यत्वज्ञाने योग्यत्वज्ञानापेक्षारूपात्माश्रयात् (अन्यप्रतियोग्युपलब्धिप्रसंजनादिति) यत्तत्पदाभावेन पटादिरूपाभावप्रतियोगिन उपलब्धिप्रसंजनप्रहणनियमाभावात्। घटरूपाभावप्रतियोगिनस्तर्कितंयत्सत्त्वं तेन तर्कितसत्त्वेन घटोपलब्धेर्यत्प्रसंजनं तस्मादन्याभावप्रत्ययापत्तिः पटाद्यभावप्रत्ययापत्तिः स्यादित्यर्थः। यत्रच–यदातु यस्मिन्नधिकरणेत्विति वा, नतत्प्रसंजनम्–घटाद्युपलब्धिरूपानुपलब्धिप्रतियोग्यापादनं न भवति–तत्र–तस्मिन्काले तदधिकरणे वा, नाभावग्रहः–घटाद्यभावज्ञानं न स्यात् घटाद्युपलब्धेः प्रसंजनाभावेनानुपलब्धिनिष्ठयोग्यताया अभावादिति भावः (यत्प्रतियोगीति) यादृशघटादिरूपप्रतियोगीत्यर्थः (प्रयुक्तेति) अधीनेत्यर्थः (प्रसंजनयोग्येति) कदाचित्प्रसंजनविषयतावदुक्तप्रसंजनविषयताश्रयतावच्छेदकीभूतशक्तिरूपधर्मवद्वा, प्रतियोगी–निरूपकं घटकं वा यस्यानुपलंभस्योपलंभविरोध्यज्ञानस्येत्यर्थः। तदभावंप्रति–तत्प्रतियोगिकाभावप्रत्यक्षं प्रति। योग्यः–कारणतावच्छेदकीभूतशक्तिरूपधर्मवान् परममूले आपादनयोग्यम्–कदाचिदापादनविषयतावदुक्तापादनाविषयताधिकरणतावच्छेदकीभूतशक्तिरूपयोग्यतावद्वा यदुपलब्धिरूपं प्रतियोगीयस्येति परममूलेऽन्वयः, प्रतियोगी–निरूपकं घटकं वा, अनुपलंभस्य–उपलंभविरोध्यज्ञानस्य ॥

सू०–तथाहि स्फीतालोकवति भूतले यदि घटः स्यात्तदा घटोपलंभः स्यादित्यापादनसंभवात् तादृशभूतले घटाभावोऽनुपलब्धिगम्यः अंधकारेतु तादृशापादनाभावान्नानुपलब्धिगम्यता अत एव स्तंभे तादात्म्येन पिशाचसत्त्वे स्तंभवत्तत्प्रत्यक्षतापत्त्या तदभावोनुपलब्धिगम्यः आत्मनि धर्माधर्मसत्त्वेपि तस्यातींद्रियतया

निरुक्तोपलंभापादनासंभवान्न धर्माद्यभावस्यानुपलब्धिगम्यत्वम्।ननूक्तरीत्याधिकरणेन्द्रियसन्निकर्षस्थले अभावस्यानुपलब्धिगम्यत्वं त्वदनुमतं तत्र क्लृप्तेन्द्रियमेवाभावाऽऽकारवृत्तावपि करणमिन्द्रियान्वयव्यतिरेकानुविधानादितिचेन्न ॥

शि० म०—नन्वंधकारवति भूतले घटोपलब्धिप्रसंजनाभावेपि तद्योग्यत्वानपायात्, तत्रापि तदभाव अनुपलब्धः स्यादित्याशंक्याह (तथाहीति) तथाच प्रतियोगितद्व्याप्येतरयावत्प्रतियोग्युपलम्भकसमवहितत्वमेवानुपलब्धेः योग्यत्वं विवक्षितमिति नातिप्रसंगः। यद्वा योग्ये अधिकरणे प्रतियोग्यनुपलब्धिः योग्यानुपलब्धिः तद्योग्यत्वं च प्रतियोगिसत्त्वप्रसंजनप्रयोज्यप्रतियोग्युपलब्धिप्रसंजनविषयत्वयोग्यत्वं योग्यतावच्छेदकं चाधिकरणस्य तादृशप्रतियोग्युपलंभकसमवधानं तेनांधकारे घटाभाव आत्मनि धर्माद्यभावश्च नानुपलब्ध इति भावः। पूर्वोक्तदोषं निरस्यति (अतएवेति) इंद्रियसन्निकर्षानंतरं भूतलादावभावज्ञानमिति निर्विवादं तत्र क्लृप्तप्रमाणभावमिन्द्रियमेव करणं नतु कल्प्यानुपलब्धिगौरवादिति षष्ठप्रमाणप्रद्वेषीनैयायिकः प्रत्यवतिष्ठते (नन्विति)॥

म० प्र०—तद्योग्यतानपायात—घटोपलब्धिप्रसंजनयोग्यतानिवृत्त्यभावात्, तत्रापि—अंधकारवति भूतलेपि, तदभावः—घटाभावः, अनुपलब्धः—अनुपलब्धिप्रमाणजन्यज्ञानविषयः परममूले तदा—तर्हि, परममूले, तादृशभूतले—स्फीतालोकवतिभूतले । परममूले (तादृशापादनेति) यद्यत्रघटः स्यात्तर्हिघटोपलंभः स्यादित्यापादनेत्यर्थः (प्रतियोगीति) प्रतियोगितद्व्याप्यसंबंधाभ्यामितरन्निखिलं यत्प्रतियोग्युपलंभकं प्रकाशादिकं तत्समवहितत्वंवैशिष्ट्यमित्यर्थः। नातिप्रसंगः—अंधकारवति भूतले उक्तघटाभावनिष्ठानुपलब्धिप्रमाणगम्यत्वप्रसक्तिर्नास्ति. तद्योग्यत्वंचअधिकरणनिष्ठयोग्यत्वं च (प्रयोज्येति) अधीतेत्यर्थः । विषयत्वयोग्यत्वम्—कदाचिद्विषयतावत्त्वम्, तादृशप्रतियोगी—यस्याभावो गृह्यते तादृशो यः प्रतियोगी, परममूले अतएव—योग्यानुपलब्धेरभावग्रहहेतुत्वादेव परममूले। प्रत्यक्षत्वापत्त्या—प्रत्यक्षत्वापादनसंभवेन, तत्र—इन्द्रियसंनिकर्षानंतरं भूतलादावभावज्ञाने ॥

मू०—तत्प्रतियोग्यनुपलब्धेरपि अभावग्रहहेतुत्वेन क्लृप्तत्वेन करणत्वमात्रस्य कल्पनात् इन्द्रियस्य चाभावेन सह सन्नि-

कर्षाभावेनाभावग्रहाहेतुत्वात् इन्द्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः । ननु भूतले घटो नेत्याद्यभावानुभवस्थले भूतलांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिनिर्गमनस्यावश्यकत्वेन भूतलावच्छिन्नचैतन्यवत् तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावस्य प्रत्यक्षतैव सिद्धान्तेपीति चेत्सत्यम् ॥

शि० म०–विपरीतं गौरवमित्याह (तत्प्रतियोग्यनुपलब्धेरिति) सन्निकर्षाभावेनेति नचेंद्रियस्याभावेन समंसंयुक्तविशेषणतासंबंधः तस्यानभ्युपगमात् प्रमाणाभावाच्चेति भावः । नन्विन्द्रियस्यान्वयव्यतिरेकाभ्यामभावग्रहहेतुत्वक्लृप्तौ तदनुरोधात् सन्निकर्षोपि कल्प्यते इत्याशंक्याह (इंद्रियेति) प्रमाणचैतन्याभेदो हि ज्ञानस्य विषयांशे तव मते प्रत्यक्षत्वं तथा च चक्षुःसन्निकर्षद्वारान्तःकरणस्य निर्गतत्वेन वृत्तिविषयोपाध्योरेकदेशस्थतया वृत्त्यवच्छिन्नचैतन्यस्य विषयावच्छिन्नचैतन्याभिन्नत्वेन भूतले घटाभाव इतिज्ञानस्य भूतलांशे प्रत्यक्षत्ववदभावांशे प्रत्यक्षत्वं स्यात्ततश्च कथमनुपलब्धेर्विजातीयप्रमाकरणत्वमिति चोदयति (नन्विति) यद्यप्यभावप्रवृत्त्यवच्छिन्नचैतन्यस्य विषयचैतन्याभेदेप्यभावस्य प्रत्यक्षयोग्यत्वाभावाच्छब्दजन्यस्वनिष्ठधर्मादिज्ञानवन्न प्रत्यक्षत्वं प्रत्यक्षलक्षणे योग्यत्वस्यापि विषयविशेषणत्वेनोक्तत्वात्तथाप्यभ्युपेत्याह (सत्यमिति)

म० प्र०–विपरीतंगौरवमिति–वेदांतिमते ह्यनुपलब्धेरभावग्रहहेतुत्वस्य क्लृप्तत्वात्तत्र करणत्वस्यैव कल्पनान्नैयायिकमतेत्वनुपलब्धिनिष्ठेन्द्रियसहकारित्वकल्पनाघटाद्यभावज्ञाननिरूपितेन्द्रियनिष्ठाप्रसिद्धकरणत्वकल्पना चेति प्रत्युतगौरवमित्यर्थः । परममूले, तत्प्रतियोग्यनुपलब्धेः–अभावप्रतियोग्यज्ञानस्य अपिशब्दो दृष्टांतार्थः तथाच तवमते इन्द्रियस्याभावग्रहहेतुत्वं यथा क्लृप्तं तद्वदित्यर्थः । परममूले करणत्वमात्रस्येत्यस्मात्पूर्वं मयेतिशेषः, तस्य–विशेषणतासंबंधस्य, क्लृप्तौ–निश्चयेसति, तदनुरोधात्–इन्द्रियनिष्ठाभावग्रहहेतुत्वनिश्चयानुरोधात्, सन्निकर्षोपि–इन्द्रियस्याभावेन सहसंबंधोपि, परममूले अधिकरणज्ञानादीत्यत्रादिपदेन प्रतियोगिज्ञानसंग्रहः परममूले अन्यथासिद्धेः–इन्द्रियस्याभावग्रहहेतुत्वाभावेपीन्द्रियान्वयव्यतिरेकयोरुपपन्नत्वात् । परममूले तत्र–

भूतले । परममूले (तन्निष्ठेति) भूतलनिष्ठेत्यर्थः । विषयचैतन्याभेदेपि—अभावरूपविषयचैतन्याभेदेपि, न प्रत्यक्षत्वम्—अभावज्ञानस्य प्रत्यक्षत्वाभावः, प्रत्यक्षलक्षणे—ज्ञानगतप्रत्यक्षत्वलक्षणे, परममूले सत्यम्—अभावप्रतीतेः प्रत्यक्षत्वमितिसत्यम्, यद्यभावस्य प्रत्यक्षत्वयोग्यत्वाभावान्नाभावप्रतीतेःप्रत्यक्षत्वं तथाप्यभावनिष्ठप्रत्यक्षत्वेन तद्योग्यत्वं तंत्रं किंतूक्तयोग्यानुपलब्धिगम्यत्वं तथाच नाभावप्रतीतेः प्रत्यक्षत्वेऽभ्युपेत्यवादश्चाश्रयणीय इति परममूलकर्तुरभिप्रायः ॥

मू०—अभावप्रतीतेः प्रत्यक्षत्वेपि तत्करणस्यानुपलब्धेर्मानान्तरत्वात् । नहि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेपि तत्करणस्य वाक्यस्यप्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमात् । ननुफलवैजात्यंविनाकथं प्रमाणभेद इति चेन्न वृत्तिवैजात्यमात्रेण प्रमाणवैजात्योपपत्तेः तथाच घटाभावाकारवृत्तिर्नेन्द्रियजन्याइन्द्रियस्य विषयविशेषणासन्निकर्षात् किंतु घटानुपलब्धिरूपमानांतरजन्येति भवत्यनुपलब्धेर्मानांतरत्वं नन्वनुपलब्धिरूपमानांतरपक्षेऽभावप्रतीतेः प्रत्यक्षत्वे घटवति घटाभावभ्रमस्यापि प्रत्यक्षत्वापत्तौ तत्राप्यनिर्वचनीयघटाभावोभ्युपगम्येत नचेष्टापत्तिः तस्य मायोपादानकत्वेऽभावत्वानुपपत्तिः मायोपादानकत्वाभावे मायायाः सकलकार्य्योपादानत्वानुपपत्तिरिति चेत् ॥

शि० म०—अनुपलब्धिर्नप्रत्यक्षज्ञानकरणं प्रत्यक्षप्रमाणभिन्नत्वादित्याशंकेयमभिप्रेता अभावज्ञानं प्रत्यक्षप्रमाणजन्यं प्रत्यक्षज्ञानत्वादिति वा नाद्यः । तत्त्वमसीत्यादिवाक्ये व्यभिचारादित्यभिप्रेत्य द्वितीयं दूषयति (अभावप्रतीतेरिति । नहीति) प्रत्यक्षज्ञानं प्रत्यक्षप्रमाणजन्यमिति न नियमः । तत्त्वमस्यादिवाक्यजन्यज्ञाने व्यभिचारादिति भावः । नन्वौपनिषदे ब्रह्मणि प्रमाणांतराप्रवृत्तेर्निमीलितनयनस्य च दशमत्वज्ञानात् भवतु तत्र प्रत्यक्षस्यापि ज्ञानस्य परोक्षप्रमाणजन्यत्वं प्रकृतेऽभावप्रतीतेरिन्द्रियजन्यत्वं किं न स्यादि-

त्याशंक्य पूर्वोक्तबाधकं स्मारयति (तथाचेति । अनिर्वचनीयेति) यद्यप्यभावस्येन्द्रियवेद्यत्ववादिमते सुतरामभावज्ञानस्य प्रत्यक्षत्वादिदंदूषणं समानमेव तथापि न्यायमते सर्वत्रारोपस्थले अन्यथाख्यात्यभ्युपगमान्नदोष इति भावः ॥

म० प्र०—इत्याशंकेयमित्यत्रेतीयमाशंकेत्यन्वयः । व्यभिचारात्—प्रत्यक्षप्रमाणभिन्नत्वरूपहेतोर्व्यभिचिरात्, नन्वभावप्रतीतेः प्रत्यक्षत्वेतत्करणस्य कथं मानान्तरत्वमित्याशंक्याह । परममूले (नहीति) व्यभिचारात्—प्रत्यक्षज्ञानत्वरूपहेतोर्व्यभिचारात् । ननु प्रमाणभेदस्यप्रमारूपफलभेदायत्तत्वात्कथं प्रमारूपफलभेदं विनाप्रमाणभेदसिद्धिरित्यभिप्रेत्य शंकते । परममूले (नन्विति) परममूले (वृत्तिवैजात्यमात्रेणेति) प्रत्यक्षत्वेन प्रमारूपफलस्य साजात्येपि भूतलाकारवृत्तेरिन्द्रियजन्यत्वादभावाकारवृत्तेरिन्द्रियाजन्यत्वाच्चेति वृत्तिवैजात्यमात्रेण प्रत्यक्षप्रमाणादनुपलब्धिरूपप्रमाणस्य वैजात्योपपत्तेरित्यर्थः । निमीलितनयनस्य—चेत्यत्र चकारस्य दशमत्वज्ञानाच्चेत्यन्वयः । तच्च—ब्रह्मणि दशमपुरुषेच (परोक्षप्रमाणेति) परोक्षप्रमाजनकशब्दप्रमाणेत्यर्थः । परममूले (तथाचेति) वृत्त्यात्मकफलवैजात्येसिद्धे सतीत्यर्थः । इदं दूषणं अनिर्वचनीयाभावरूपविषयापादनरूपं दूषणम्, आरोपस्थले भ्रांत्यात्मकारोपविशेष्यताख्यंविषयतायोग्ये, नदोषः—अनिर्वचनीयाभावरूपविषयापादनरूपं दूषणं न ॥

मू०—न, घटवति घटाभावभ्रमो न तत्कालोत्पन्नघटाभावविषयकः किंतु भूतलरूपादौ विद्यमानो लौकिको घटाभावो भूतलेआरोप्यते इत्यन्यथाख्यातिरेवआरोप्यसन्निकर्षस्थले सर्वत्रान्यथाख्यातेरेव व्यवस्थापनात् अस्तु वा प्रतियोगिमति तदभावभ्रमस्थले तदभावस्यानिर्वचनीयत्वं तथापि तदुपादानं मायैव नह्युपादानोपादेययोरत्यंतसाजात्यं तंतुपटयोरपि तंतुत्वपटत्वादिना वैजात्यात् यत्किंचित्साजात्यस्य मायाया अनिर्वचनीयस्य घटाभावस्य मिथ्यात्वधर्मस्य विद्यमानत्वात् । अन्यथा व्यवहारिकं घटाभावं प्रति कथं मायोपादानामिति कुतो न शंकेथाः । नच विजातीययोरप्युपादानोपादेयभावे ब्रह्मैवजगदुपादानं स्यादिति वाच्यम् ॥

Funding by IKS-MoE

शि० म०–अत एवान्यथाख्यातिमवलम्ब्य परिहरति (नघटवतीति) आरोप्यसन्निकर्षस्थल इति) आरोप्याद्यवभासस्थल इत्यर्थः । प्रत्यक्षस्थलेअन्यथाख्यात्यभ्युपगमे यद्यपसिद्धांत इति ब्रूयात्तदा पक्षांतरमाह (अस्तुवेति) अनिर्वचनीयत्वमिति) इदंचाभावज्ञानस्य प्रत्यक्षज्ञानत्वमभ्युपेत्योक्तं वस्तुतस्तु अनुपलब्धाभावस्य प्रत्यक्षयोग्यत्वाभावान्नभावज्ञानस्य प्रत्यक्षत्वमित्युक्तं तथाचानुमित्युक्तं तथाचानुमित्यादिस्थल इवात्रापि प्रतियोगिमति तदभावज्ञानस्यान्यथाख्यातित्वान्नानिर्वचनीयत्वमिति बोध्यम् । किमभावस्य सर्वाकारेण मायासाजात्यमापाद्यं साजात्यमात्रं वा तत्राद्यं निराकृत्य द्वितीयं निरस्यति (यत्किंचिदिति) विजातीयापि माया यद्युपादानं स्यात् तर्हि ब्रह्मणा किमपराद्धमित्याशंक्य निराकरोति (नचेति) ॥

म० प्र०–अतएव–अन्यथाख्यातिवादिमते उक्तदोषाभावादेव, परममूले रूपादावित्यत्रादिपदेन रसादिपरिग्रहः, परममूले, आरोप्यसन्निकर्षस्थले–आरोप्यस्य भ्रांतिज्ञानविषयस्य सन्निकर्षः सान्निध्यं यत्राधारे सतथा तादृशाधारे आरोप्यादीत्यत्रादिपदेनाधारग्रहः तथाचारोप्याधारयोर्योऽपरोक्षावभासस्तस्य विशेष्यताख्यविषयतावतीत्यर्थः । परममूले (व्यवस्थापनादिति) तथाच नापसिद्धांत इतिभावः (प्रत्यक्षस्थलेइति) निरुपाधिकप्रत्यक्षविषये इत्यर्थः तथाच लोहितः स्फटिक इत्यादिसोपाधिकभ्रांत्यात्मकप्रत्यक्षविषयेऽन्यथाख्यात्यभ्युपगमेऽपि निरुपाधिकभ्रमविषयेऽन्यथाख्यात्यभ्युपगमे तु सिद्धांतहानिः स्यादिति भावः । परममूले (तदभावेति) घटाभावेत्यर्थः । परममूले, तदभावस्य–घटाभावस्य, इदंच–भ्रमविषयघटाद्यभावस्यानिर्वचनीयत्वकथनं च यद्यभावज्ञानस्य प्रत्यक्षत्वं न स्यात्तर्हि भ्रांतिज्ञानविषयघटाद्यभावस्य भ्रांतिकालोत्पन्नानिर्वचनीयत्वकथनमेव व्यर्थंस्यादित्यभिप्रायेणाभ्युपेत्येत्युक्तमिति भावः (अनुमित्यादिस्थलइवेति) अनुमित्यादिविशेष्यताख्यविषयतावति पर्वतादौ भ्रमात्मकलिंगपरामर्शाद्वह्निविषयकानुमितेरन्यथाख्यातित्वं यथा तद्वदित्यर्थः । अत्रापि–भूतलादावपि, तदभावज्ञानस्य–घटाद्यभावज्ञानस्य,नानिर्वचनीयत्वं–भ्रांतिविषयघटाद्यभावस्य भ्रांतिकालोत्पन्नानिर्वचनीयत्वं न, परममूले अन्यथेति–यत्किंचिन्मायासादृश्यमादाय भ्रांतिविषयघटाद्यभावस्य मायोपादानकत्वानंगीकारे । परममूले (इतिकुतोनशंकेथाइति) यत्र ग्रंथे तस्य मायोपादानकत्वे अभावत्वानुपपत्तिरियमाशंका कृता तत्र ग्रंथे व्यावहारिकघटाभावं प्रति कथं मायोपादानमिति त्वंकुतो न शंकांकरोषीत्यर्थः ॥

Funding by IKS-MoE

मू०—प्रपंचविभ्रमाधिष्ठानत्वरूपस्य तस्येष्टत्वात्परिणामित्वरूपस्योपादानत्वस्य निरवयवे ब्रह्मण्यनुपपत्तेः तथाच प्रपंचस्य परिणाम्युपादानं माया न ब्रह्मेति सिद्धांत इत्यलमतिप्रसंगेन स चाभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यंताभावोन्योन्याभावश्चेति तत्रमृत्पिंडादौ कारणेकार्य्यस्य घटादेरुत्पत्तेः पूर्वं योभावः स प्रागभावः स च भविष्यतीति प्रतीतिविषयः ॥

शि० म०—ननु ब्रह्मणो विभ्रमाधिष्ठानत्वे मायैव सकलकार्य्योपादानमिति सिद्धांतो विरुद्ध्येतेत्याशंक्य तस्य परिणाम्युपादानपरत्वान्न विरोध इत्याह (तथाचेति) प्रागभावंलक्षयति (तत्रमृत्पिंडादाविति) अत्र समवायिकारणमात्रवृत्तित्वे सति प्रतियोगिजनकाभाववत्त्वं प्रागभावत्वमितिन भ्रमितव्यं तथासति सत्यंतवैयर्थ्यापत्तेः । नचैतावन्मात्रमेव लक्षणं मृत्पिंडादावित्यादिवाक्यं नियताधिकरणपरमिति वाच्यम् । प्रागभावस्य कालेपि वृत्त्यभ्युपगमात् जनकत्वस्य प्रागभावगर्भत्वेन आत्माश्रयाच्च तस्मान्न प्रतियोगिजनकाभावत्वं प्रागभावत्वं किंतु कार्य्यसमवायिकालान्यावृत्तित्वे सति कार्य्योत्पत्तिपूर्वकालीनाभावत्वं 'ध्वंसेऽतिव्याप्तिवारणाय कार्य्योत्पत्तिपूर्वकालीनेति अत्यंताभावादौ तद्वारणाय सत्यंतम् असंभवनिरासाय कालेति अयं चाभावः कार्य्योत्पत्तेः पूर्वं तत्कारणत्वेनावश्यमभ्युपेयः, अन्यथोत्पत्त्यनंतरं पुनः घटोत्पत्तिप्रसंगात् । नचोत्पन्नो घटः प्रतिबंधकस्तस्य तत्कारणत्वे एव विश्रमादिति । तत्र मानांतरमाह (सचेति) नचात्यंताभावेन भविष्यतीति प्रतीतिरन्यथासिद्धिः विचित्रप्रतीतेर्विचित्रविषयत्वावश्यंभावादिति भावः ॥

म० प्र०—विभ्रमाधिष्ठानत्वे—विभ्रमाधिष्ठानत्वरूपोपादानत्वस्वीकारे सति, तस्य उक्तसिद्धांतस्य (नविरोधइति) उक्तसिद्धांतहानिर्नास्तीत्यर्थः । परममूले (तथाचेति । निरवयवब्रह्मणः परिणामासंभवे सतीत्यर्थः । परममूले (तत्रेति) अभावेषु मध्ये इत्यर्थः । अत्र—मृत्पिंडादावित्यादिमूले, तथासति—मूलकारकस्य समवायिकारणेत्याद्युक्तार्थस्य विवक्षितत्वे सति,एतावन्मात्रमेव—सत्यंतरहितमेव, प्रागभावगर्भत्वे—जनकत्वमनन्यथासिद्धत्वे सति नियतपूर्ववृत्तित्वम्। पूर्ववृत्तित्वं च कार्य्यप्रागभावाधिकरणक्ष-

Funding by IKS-MoE

णवृत्तित्वमिति प्रागभावघटितत्वेन, कार्य्यसमवायिकालान्यावृत्तित्वेसति—कार्य्योपादानकारणं कालश्चेत्येताभ्यामन्यावृत्तित्वे सति, तस्य—घटादिनिष्ठप्रतिबंधकत्वस्य, तत्कारणत्वे—प्रागभावनिष्ठकारणत्वे, विश्रमात्—साधकत्वात् प्रतिबंधकत्वं च कारणीभूताभावप्रतियोगित्वं प्रकृते हि कारणीभूताभावो घटप्रागभावस्तत्प्रतियोगित्वं घटे इति । प्रतिबंधकत्वस्य प्रागभावनिष्ठघटनिरूपितकारणत्वसाधकत्वमेवेति भावः । प्रागभावेऽर्थापत्तिरूपं प्रमाणमुक्त्वा प्रागभावे प्रमाणांतरमप्यस्तीत्यभिप्रेत्याह (तत्रेति) प्रागभावे इत्यर्थः । भविष्यतीतिप्रतीतेरत्यंताभावेनान्यथासिद्धिरित्यन्वयः तथाचात्यन्ताभावाभिन्नोयोन्यथाप्रागभावातिरिक्तो विषयस्तेनोपपत्तिरित्यर्थः । भविष्यतीति—भविष्यत्कालीनसत्ताश्रय इत्यर्थः । विचित्रप्रतीतेः—घटोभविष्यति घटो विनष्टः घटोत्रनास्ति घटो न पट इत्यादिना नानाविधप्रतीतेः ॥

मू०—तत्रैव घटस्य मुद्गरपातानंतरं योऽभावः स ध्वंसाभावः ध्वंसस्यापि स्वाधिकरणकपालनाशे नाश एव । नच घटोन्मज्जनापत्तिः घटध्वंसध्वंसस्यापि घटप्रतियोगिकध्वंसत्वात् ॥

शि० म०-ध्वंसं निरूपयति (तत्रैवेति) मृत्पिंडादावित्यर्थः । तथाच कार्य्यसमवायिकालान्यावृत्तिप्रतियोग्यजनको योऽभावस्स प्रध्वंसः सच घटो विनष्टः इत्यादिप्रतीतिविषय इतिभावः । प्रध्वंसाभावोऽनंत इतिन्यायमतं निरस्यति (ध्वंसस्यापीति) ननु नाशकशून्यत्वाद् ध्वंसोऽविनाशीत्यत आह (स्वाधिकरणेति । वटोन्मज्जनेति) प्रागभावध्वंसानाधारकालस्य प्रतियोगिकालत्वनियमादिति भावः कालस्य ध्वंसानाधारत्वमसिद्धमित्याह (घटध्वंसध्वंसस्येति) तथाहि घटोत्पत्तेः पूर्वं घटो भविष्यति तद्ध्वंसो भविष्यतीति प्रतीतेर्लाघवादेकस्यैव प्रागभावस्य घटध्वंसप्रतियोगित्वं तद्वत् घटध्वंसध्वंसकाले घटो विनष्ट इति प्रतीतेर्लाघवाच्च तस्यैव घटप्रतियोगित्वमिति भावः ॥

म०प्र०—(कार्य्यसमवायिकालान्यावृत्तीति) कार्य्योपादानकारणकालेत्येताभ्यामन्यावृत्तीत्यर्थः । अनंतः—नाशरहितः (प्रागभावध्वंसेति) प्रतियोगिप्रागभावाप्रतियोगिध्वंसेत्यर्थः । घटोभविष्यति—भविष्यत्कालीनसत्ताश्रयो घट एतत्कालीनप्रागभावप्रतियोगिघट इति यावत्, तद्ध्वंसोभविष्यति—भविष्यत्कालीनसत्त्वाश्रयो घटध्वंसः एतत्कालीनघटध्वंसप्रागभावप्रतियोगीघटध्वंस इति यावत् (घटध्वंसप्रतियोगित्वमिति) घटतद्ध्वंसेत्येतदुभयप्रातियोगिकत्वामित्यर्थः । न्यायनये हि घटादिध्वंसप्रागभावो घटा—

दिसत्त्वदशायां घटादिरूपः घटादिप्रागभावदशायांतु घटादिप्रागभावरूपश्च घटादिदशायां घटादिप्रागभावदशायां च घटादिध्वंसो भविष्यतीति प्रतीतेर्लाघवाच्च यथाघटादिप्रागभावघटादिध्वंसप्रागभावयोरेकरूपता तद्वत् घटादिध्वंसकाले घटादिध्वंसध्वंसकाले च घटादिर्विनष्ट इति प्रतीतेर्लाघवाच्च । घटादिध्वंसघटादिध्वंसध्वंसयोश्चैकरूपत्वं तथाच घटादिध्वंसकालस्य घटादिकालत्वाभाववत् घटादिध्वंसप्रतियोगिकध्वंसकालस्यापि घटादिकालत्वाभावात् । घटादिध्वंसध्वंसकालस्य घटादिध्वंसानाधारत्वं नास्तीति भावः तस्यैव—घटध्वंसाभिन्नघटध्वंसध्वंसस्यैव, नच घटध्वंसघटध्वंसयोरभेदे घटध्वंसाधिकरणकपालध्वंसोत्तरकालाभिन्नघटध्वंसध्वंसकाले घटध्वंसध्वंसस्यापि नाशापत्तिरिति वाच्यम्। घटध्वंसकाले घटध्वंसध्वंसस्याविद्यमानत्वात् घटप्रतियोगिकत्वेन घटध्वंसघटध्वंसध्वंसयोरभेदेपि घटध्वंसस्य केवलघटप्रतियोगिकत्वेन घटध्वंसध्वंसस्यतु घटजन्यध्वंसप्रतियोगिकत्वेन च घटध्वंसघटध्वंसध्वंसयोर्भेदस्यापि संभवाच्च ॥

मू०—अन्यथा प्रागभावध्वंसात्मकघटस्य नाशे प्रागभावोन्मज्जनापत्तिः नचैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाशइति वाच्यं तादृशमधिकरणं यदि चैतन्यव्यतिरिक्तं तदा तस्य नित्यत्वमसिद्धं ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञाननिवर्त्यतया वक्ष्यमाणत्वात् ॥

शि० म०—ननु ध्वंसस्य प्रतियोगिजन्यत्वनियमादजनको घटो न प्रतियोगीत्यत आह (अन्यथेति) तथाच प्रागभावस्य घटनाशं प्रत्यजनकत्वेपि घटध्वंसकाले प्रागभावो नष्ट इत्यनुभवाल्लाघवाच्च । घटध्वंसस्य प्रागभावप्रतियोगित्वमिति तदा प्रकृतेपि तुल्यमिति भावः । नित्याधिकरणवृत्तिध्वंसस्य विनाशकाभावादनंतत्वसिद्धौ तत्सामान्यादितरोपि ध्वंसस्तथेत्याशंक्य निराकरोति (नचैवमिति) ॥

म०प्र०—अजनकः—घटध्वंसध्वंसाजनकः, नप्रतियोगी—घटध्वंसध्वंसप्रतियोगीन न भवति । परममूले (अन्यथेति) ध्वंसजनकस्यैव ध्वंसप्रतियोगित्वमिति नियमस्वीकारे इत्यर्थः । परममूले (प्रागभावध्वंसात्मकेति) नैयायिकमते घटादिप्रागभावध्वंसात्मको यो घटादिस्तस्य नाशे सति घटादिप्रागभावोन्मज्जनविरोधिनो घटादिप्रागभावनाशात्मकघटादेरभावात्, घटादिप्रागभावप्रादुर्भावापत्तिः स्यादित्यर्थः (तथाचेति) घटादिप्रागभावध्वंसात्मकघटादेर्नाशे सति घटादिप्रागभावोन्मज्जनापत्तौ सत्यामित्यर्थः (इतीति) अस्याग्रे घटादिप्रागभावोन्मज्जनापत्तिदोषवारणायेति यदा ब्रूयादिति शेषः प्रकृतेपि—घटध्वंसध्वंसकाले घटोन्मज्जनापत्त्यापादनेपि, तुल्यम्—समाधानं तुल्यम् ।

Funding by IKS-MoE

अयंभावः नैयायिकमते हि घटादिप्रागभावध्वंसो घटादिकाले घटादिरूपः घटादिध्वंसकाले तु घटादिध्वंसरूपश्च यथाघटादिप्रागभावस्य घटादिजनकत्वेन घटादिध्वंसाजनकत्वेपि घटादिकाले घटादिप्रागभावो नष्ट इति प्रतीतिवत्, घटादिध्वंसकालेपि घटादिप्रागभावो नष्ट इति प्रतीतेर्लाघवाच्च घटादिप्रागभावध्वंसाभिन्नघटादिध्वंसस्यैव घटादिप्रागभावप्रतियोगिकत्वं यथा च घटादिध्वंसो घटादिंविरोधी तथा घटादिप्रागभावस्यापि विरोधीति नघटादिप्रागभावोन्मज्जनापत्तिरेवं मन्मतेपि घटादेर्घटादिध्वंसजनकत्वेन घटादिध्वंसध्वंसाजनकत्वेपि घटादिध्वंसकाले घटादिर्विनष्ट इति प्रतीतिवत् घटादिध्वंसध्वंसकालेपि घटादिर्विनष्ट इति प्रतीतिबलाल्लाघवाच्च घटादिध्वंसाभिन्नघटादिध्वंसध्वंसस्यैव घटादिप्रतियोगिकत्वं तथाच घटादिविरोधिनो घटादिध्वंसध्वंसस्य सत्त्वेन न घटाद्युन्मज्जनापत्तिरिति, अनंतत्वसिद्धौ–नित्यत्वसिद्धौ, तत्सामान्यात्–अनित्याधिकरणकध्वंसस्यापिध्वंसत्वेन नित्याधिकरणकध्वंसतुल्यत्वात्, इतरोपि–अनित्याधिकरणकोपि, तथा–नित्यः, अनित्याधिकरणको ध्वंसो नित्यः ध्वंसत्वान्नित्याधिकरणकध्वंसवदिति भावः । परममूले (एवमपीति) अनित्याधिकरणकध्वंसनाशेन घटाद्युन्मज्जनापत्तिरूपदोषनिराकरणेनानित्याधिकरणकध्वंसस्यानित्यत्वेपीत्यर्थः।परममूले (यत्रेति) यदित्यर्थः ॥

मू०–यदि च ध्वंसाधिकरणं चैतन्यं तदासिद्धिः आरोपितप्रतियोगिकप्रध्वंसस्याधिष्ठाने प्रतीयमानस्याधिकरणमात्रत्वात् तदुक्तम् ॥

अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः ॥

इति । एवं शुक्तिरूप्यविनाशोपीदमवच्छिन्नचैतन्यमेव यत्राधिकरणे यस्यकालत्रयेप्यभावः सोत्यंताभावः यथा वायौरूपात्यंताभावःसोपि वियदादिवद्ध्वंसप्रतियोग्येव इदमिदंनेति प्रतीतिविषयोन्योन्याभावः अयमेव विभागो भेदः पृथक्त्वंचेति व्यवह्रीयते भेदातिरिक्तविभागादौ प्रमाणाभावात् । अयंचान्योन्याभावोधिकरणस्य सादित्वे सादिर्यथा घटे पटभेदः अधिकरणस्यानादित्वेऽनादिरेव यथा जीवे ब्रह्मभेदः ब्रह्मणि जीवभेदः द्विविधोपि भेदो ध्वंसप्रतियोग्येव अविद्या निवृत्तौ तत्परतंत्राणां निवृत्त्य-

Funding by IKS-MoE

वश्यंभावात्, पुनरपि भेदो द्विविधः सोपाधिको निरुपाधिकश्चेति तत्रोपाधिसत्ताव्याप्यसत्ताकत्वं सोपाधिकत्वं तच्छून्यत्वं निरुपाधिकत्वं तत्राद्यो यथा एकस्यैवाकाशस्य घटाद्युपाधिभेदेन भेदः ॥

शि० म०-तत्किमाकाशादिनित्याधिकरणत्वेन विवक्षितमुत ब्रह्म तत्राद्यं निराकृत्य द्वितीयं दूषयति (यदिचेति) असिद्धिः-ध्वंसाधिकरणत्वासिद्धिः । ब्रह्मारोपितनाशरूपमारोपाधिष्ठानत्वादिदमवच्छिन्नचैतन्यवदित्यत्रदृष्टांतासिद्धिमाशंक्याह (एवमिति) अतिरिक्तकल्पने गौरवादप्रामाणिकत्वाद् भेदप्रतीतेश्च । राहोः शिर इतिवदुपपत्तेर्नातिरिच्यते ध्वंस इति भावः । अत्यंताभावं लक्षयति (यत्रेति) त्रैकालिकाभावं निस्संदिग्धमुदाहरति (यथेति) न्यायमतं निराकरोति (अयमेवेति) भेदं विभजते (अयंचेति) अनादिभेदस्य ब्रह्मवन्निवर्त्यत्वं न स्यादित्याशंक्याविद्यावन्न विरोध इत्याह (द्विविधोपीति) ॥

म० प्र०-तत्-तर्हिध्वंसत्वेन नित्याधिकरणकध्वंसतुल्यत्वेनाधिकरणकध्वंसस्य नित्यत्वापादने सतीति यावत्, नित्याधिकरणत्वेनाकाशादिकिंविवक्षितमित्यन्वयः (ध्वंसाधिकरणत्वेतिं) चैतन्यस्य ध्वंसाधिकरणत्वेत्यर्थः । आरोपितप्रतियोगिकध्वंसस्याधिकरणमात्रत्वे सुरेश्वराचार्य्यसंमतिमाह । परममूले (तदुक्तमिति) आरोपितप्रतियोगिकध्वंसस्याधिकरणमात्रत्वं सुरेश्वराचार्य्यैरुक्तमित्यर्थः । व्यावहारिकारोपितप्रतियोगिध्वंसोऽधिष्ठानमात्रो नाशत्वाच्छुक्तिरूप्यनाशवदित्यनुमानमभिप्रेत्याह (ब्रह्मेति) अतिरिक्तकल्पने-अधिष्ठानातिरिक्तारोपितप्रतियोगिकध्वंसकल्पने, भेदप्रतीतेः-शुक्त्यादौ रजताद्यभाव इत्यादिभेदप्रतीतेः, निःसंदिग्धम्-निःसंदिग्धाधिकरणम्, परममूले सोपि-अत्यंताभावोपि, परममूले (ध्वंसप्रतियोग्येवेति) अधिकरणनाशएवात्यंताभावध्वंसप्रयोजकः नचारोपितप्रपंचात्यंताभावाधिकरणब्रह्मणो नित्यत्वेन प्रपंचात्यंताभावस्य नित्यत्वापत्तिरिति वाच्यं प्रपंचात्यंताभावस्य ब्रह्मभिन्नत्वेननिरूपयितुमशक्यत्वादिति भावः । नविरोधः-अनादिभेदस्य निवर्त्यत्वानुपपत्तिर्नास्ति परममूले । उपाधिसत्तेति-यदाकाशादिभेदस्तदा घटाद्युपाधिसत्तेत्युपाधिसत्ताया व्याप्या सत्ता यस्य स तथा तस्य भावस्तत्त्वमित्यर्थः । परममूले, तच्छून्यत्वमिति-उपाधिसत्ताव्याप्यसत्ताकत्वात्यंताभाववत्वमित्यर्थः ॥

Funding by IKS-MoE

मू०–यथाचैकस्य सूर्य्यस्य जलभाजनभेदेन भेदः यथाचैकस्य ब्रह्मणोन्तःकरणभेदाद्भेदः। निरुपाधिकभेदो यथा घटे पटभेदः नच ब्रह्मण्यपि प्रपंचभेदाभ्युपगमेऽद्वैतविरोधः तात्त्विकभेदानभ्युपगमेन वियदादिवदद्वैताव्याघातात् प्रपंचस्याद्वैते ब्रह्मणि कल्पितत्वांगीकारात् तदुक्तम् सुरेश्वराचार्य्यैः

अक्षमाभवतः केयं साधकत्वप्रकल्पने ॥
किं न पश्यासि संसारंतत्रैवाज्ञानकल्पितमिति ॥

अत एव विवरणे अविद्यानुमाने प्रागभावव्यतिरिक्तत्वं विशेषणं तत्त्वप्रदीपिकायां चाविद्यालक्षणेभावत्वविशेषणं संगच्छते ॥

शि० म०-कल्पितद्वैताङ्गीकारमात्रान्नाद्वैतविरोधइत्यत्राभियुक्तसंमतिमाह (तदुक्तमिति) ननु नृसिंहाश्रमश्रीचरणैः प्रागभावस्य निराकृतत्वात्तदंगीकरणं सिद्धांतविरुद्धमित्याशंक्य तदंगीकार एव सिद्धांतानुरोधी विवरणादौ तदभ्युपगमादित्याह (अतएवेति) नच परमते नैतदिति वाच्यम्, स्वमते बाधकाभावात्, उक्तप्रमाणसिद्धत्वाच्चेति भावः ॥

म० प्र०–ननु ब्रह्मणोजडत्वाभावाय ब्रह्मणि जडप्रपंचप्रतियोगिकभेदोऽभ्युपेयः ब्रह्मणिजडप्रपंचभेदाभ्युपगमेत्वद्वैतहानिः स्यादित्यभिप्रायेणाशंक्याह । परममूले (नचेति) नाद्वैतविरोधः–अद्वैतानुपपत्तिर्नास्ति, चरणैः–पूज्यैः, परममूले साधकत्वप्रकल्पने–ब्रह्मणि मुमुक्षुत्वकल्पने जगद्धेतुत्वकल्पने वा श्रवणादिसाधकत्वकल्पने वा, तदंगीकरणं–प्रागभावस्वीकरणम्, तदंगीकार एव–प्रागभावस्वीकारएव, तदभ्युपगमात्–प्रागभावस्वीकारात् । परममूले (अतएवेति) प्रागभावस्यांगीकारादेवेत्यर्थः । एतत्–प्रागभावांगीकरणम् (उक्तप्रमाणेति) घटोभविष्यतीत्यादिप्रतीत्याद्युक्तप्रमाणेत्यर्थः । परममूले अविद्यानुमाने–विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वकमप्रकाशितार्थप्रकाशकत्वादंधकारे प्रथमोत्पन्नदीपप्रभावदित्याकारकाविद्यासाधकानुमाने वस्तुपूर्वकमित्युक्ते प्रमाणज्ञानस्यात्मवस्तुपूर्वकतयाऽर्थान्तरं स्यात्तन्निवृत्त्यर्थं वस्त्वंतरेति आत्मवस्त्वातिरिक्तवस्त्विति तदर्थः । चक्षुरादिव्यावृत्त्यर्थं स्वदेशगतेति अदृष्टादिव्यावृत्त्यर्थं स्वनिवर्त्येति

उत्तरज्ञाननिवर्त्यपूर्वज्ञानव्यावृत्त्यर्थं स्वविषयावरणेति ज्ञानप्रागभावव्यावृत्त्यर्थंस्वप्रागभावव्यतिरिक्तेति, परममूले तत्त्वप्रदीपिकायाम्–चित्सुखाचार्य्यकृततत्त्वप्रदीपिकायाम् । परममूलेअविद्यालक्षणे–अनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वमविद्यात्वमित्याकारकाविद्यालक्षणे ॥

मू०–एवं चतुर्विधानामभावानां योग्यानुपलब्ध्या प्रतीतिस्तत्रानुपलब्धिर्मानांतरम् ॥

शि० म०–(तत्रानुपलब्धिर्मानांतरमिति) अत्रेदमालोचनीयं किमनुपलब्धेरभावप्रमायां करणांतरानुपपत्त्यामानांतरत्वमास्थीयते अनुभवबलाद्वा नाद्यः, क्लृप्तप्रमाणभावस्येंद्रियस्यैव तत्करणत्वस्य संभवात् नचेंद्रियाभावयोः संबंधानिरूपणं संयुक्तविशेषणतासंबंधस्यैव सत्त्वात । नचात्र प्रमाणाभावः भूतले घटाभाव इत्याधाराधेयभावसंबंधप्रतीतेः घटाभावज्ञानं संबंधविषयकं विशिष्टज्ञानत्वाद्दंडीपुरुष इति ज्ञानवदित्यनुमानाच्च, अन्यथाऽभावस्य निरधिकरणत्वापत्तौ ध्वंसस्य स्वाधिकरणकपालनाशेनेत्यादिवर्णनमधिकरणस्य सादित्वे इत्यादिना भेदद्वैविध्यनिरूपणं च विरुध्येत । स च संबंधः स्वरूपसंबंधोऽन्योवेत्यन्यदेतत्, नच द्वितीयः निर्घटं भूतलं पश्यामीति विपरीतानुव्यवसायात् अन्यथापर्वतं पश्यामि वह्निमनुमिनोमीतिवद्भूतलाभावयोर्विलक्षणानुव्यवसायापत्तिः । किंच प्रत्यक्षप्रमायां प्रत्यक्षप्रमाणं करणमित्युत्सर्गः । स च बलवत्ताबाधकेनापोद्यते प्रकृते चाभावज्ञानं प्रत्यक्षप्रमैवेत्युभयसिद्धं तत्र च प्रत्यक्षप्रमाणमिंद्रियमेव करणं बाधकाभावात । इंद्रियाभावयोः संबंधस्य च साधितत्वात, ततश्च कथमनुपलब्धिर्मानान्तरम् ॥

म० प्र०–परममूले (तत्रेति) योग्यानुपलब्ध्याऽभावानां प्रतीतौ सत्यामित्यर्थः । अत्र–तत्रानुपलब्धिर्मानांतरमिति मूले अनुपलब्धेर्मानांतरत्वमित्यन्वयः । अनुभवबलात्–घटाद्यभावमनुपलंभयामीत्याद्यनुभवबलात् । तत्करणत्वस्य–अभावज्ञानकरणत्वस्य संयुक्तेति चक्षुरादिसंबद्धेत्यर्थः । अत्र–संयुक्तविशेषणतासंबंधे भूतलादिषु घटाद्यभावस्य यः संबंधस्तत्प्रयोज्य एवेन्द्रियाभावयोः संबंध इत्यभिप्रेत्य प्रथमं भूतलादिषु घटाद्यभावसंबंधंसाधयति (भूतलेइति) अन्यथा–अभावस्यभूतलादौ संबंधानंगीकारे, निर्घटं–घटाभावविशिष्टं, विपरीतानुव्यवसायात्–अनुपलब्ध्या घटाभावविशिष्टं भूतलं जानामीत्याकारकानुव्यवसायादिलक्षणानुव्यवसायात्, विलक्षणानु

Funding by IKS-MoE

व्यवसायापत्तिः–अनुपलब्ध्या घटाभावं जानामि भूतलं पश्यामीत्याकारकविलक्षणानुव्यवसायापत्तिः । उत्सर्गः–सामान्यनियमः स च–सामान्यनियमस्तु, बाधकेन–आत्मश्रवणादिविधानवैयर्थ्यापत्तिरूपबाधकेन दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेऽपि तत्करणवाक्यस्य प्रत्यक्षप्रमाणभिन्नप्रमाणत्वाभ्युपगमरूपबाधकेन च, अपोद्यते–बाध्यते, प्रकृतेच–अभावज्ञानस्येन्द्रियजन्यत्वेतु किंचिद्बाधकं नास्तीति शेषः बाधकाभावमेव साधयति (अभावज्ञानमित्यादिना) तत्रच–प्रत्यक्षाभावज्ञानेतु नन्विन्द्रियाभावयोः संबंधाभावएवेन्द्रियनिष्ठाभावज्ञानकरणत्वे बाधकं इत्याशंक्याह (इंद्रियाभावयोरिति) ततश्चबाधकाभावेनाभावज्ञानस्येन्द्रियजन्यत्वसंभवादेव ॥

मू०–एवमुक्तानां प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायतेच

शि० म०–तस्मादत्र समाधानं चिन्त्यम् । प्रसंगादाह (एवमिति । प्रमाणानामिति) प्रमारूपाणामित्यर्थः । ननु यद्यज्ज्ञानगतं प्रामाण्यं न तत्सर्वं स्वत उत्पद्यते ज्ञायते वा तदभाववति तत्प्रकारकत्वाभावस्य विशेष्यावृत्त्यप्रकारकत्वादेश्च प्रामाण्यस्य तदयोगादित्यतआह ॥

म० प्र०–तस्मात्–अनुपलब्धेर्मानांतरत्वासंभवादेव । अत्र–अभावज्ञानस्यानुपलब्धिप्रमाणजन्यत्वाभावे (चिंत्यमिति) अभावज्ञानस्यानुपलब्धिप्रमाणजन्यत्वाभावाभावेइदं समाधानं न तावदिन्द्रियमभावज्ञानकरणं तयोःसंबंधानिरूपणात् नचेन्द्रियाभावयोः संयुक्तविशेषणतैवसन्निकर्ष इति वाच्यम्, तत्र प्रमाणाभावात् उक्तप्रतीतिरुक्तानुमानस्य च भूतलघटाभावयोराधाराधेयभावसाधकतयेन्द्रियाभावसंबंधासाधकत्वात् नचोक्तमूलविरोधः इन्द्रियाभावयोः संबंधाभावकथनस्य भूतलादिघटाद्यभावयोराधाराधेयभावसंबंधकथनपरेण मूलग्रंथेन विरोधाभावात्, नाप्यनुव्यवसायविरोधः दृशिधातोः साजात्यज्ञानार्थकत्वेन फलीभूतज्ञानस्य प्रत्यक्षत्वेन चोक्तानुव्यवसायविरोधासंभवात्, यच्चकिंचेत्यादिनोक्तं तदपि न सम्यक् सन्निकर्षाभावरूपस्य प्रबलबाधकस्य सत्त्वात्, किंच किमभावस्येन्द्रियेण सह विशेषणतामात्रं सन्निकर्ष इन्द्रियसन्निकृष्टाधिकरणविशेषणतावाऽभावेन्द्रिययोःसन्निकर्षः । किंवा यत्राधिकरणे प्रतियोगिसत्त्वमनुपलब्धिविरोधि स्यात्तद्विशेषणतेन्द्रियाभावयोः सन्निकर्षः, नाद्यः भित्त्यादिव्यवहितभूतलादिवृत्तिघटाद्यभावेपिविशेषणतामात्रस्य विद्यमानत्वेन घटाद्यभावस्य प्रत्यक्षतापत्तेः । नद्वितीयः, परमतेकर्णवलयावच्छिन्ननभस एव श्रोत्रत्वेन कर्णवलयावच्छिन्ननभस एव स्वग्राह्यशब्दाभावाधिकरणत्वेन च स्वेन स्वस्यासन्निकर्षादधिकरणेन्द्रियसान्निकर्षाभावेन शब्दाभावस्याप्रत्यक्षत्वप्रसंगात्, तृती-

Funding by IKS-MoE

येपि प्रतियोगिसत्त्वस्यानुपलब्धिविरोधित्वमुपलभ्यमानत्वं प्रतियोगिसत्त्वे उपलभ्यमानत्वस्य यदा कदाचिद्भावः किमपेक्ष्यते उत नियमेन नाद्यः व्यवहितेप्यभावाधिकरणे कदाचित्प्रतियोगिसत्त्वे उपलंभसंभवात् अभावाधिकरणे व्यवधानसमयेपि घटाद्यभावस्य प्रत्यक्षतापत्तेः । नद्वितीयः श्रोत्रदेशे भूतलादौ वा शब्दस्य घटादेर्वा सत्त्वेपि शब्दाद्युपलंभसामग्र्यभावेन शब्दाद्यनुपलंभसंभवेन नियमेन शब्दस्य घटादेर्वोपलंभायोगेन श्रोत्रे भूतलादौ वा शब्दस्य घटादेर्वा भावस्याप्रत्यक्षतापत्तेस्तस्माद्योग्यानुपलब्धिरेवाभावग्राहिका नेन्द्रियमिति यद्यदिति–ज्ञानगते यद्यत्प्रामाण्यमित्यन्वयः, नस्वतउत्पद्यते–आत्ममनःसंयोगादिरूपज्ञानसामान्यसामग्रीत उत्पत्त्याश्रयो न भवति, नज्ञायते वा–दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीतो जन्यग्रहविषयो वा न भवति (तदभाववतीति) रजतत्वाद्यभाववद्विशेष्यकत्वसमानाधिकरणकरजतत्वादिप्रकारकत्वाभावरूपप्रामाण्यस्य शुक्त्याद्यवृत्तिप्रकारकभिन्नत्वादेश्च प्रामाण्यस्य ॥

मू०–तथाहि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वतितत्प्रकारकज्ञानत्वं प्रामाण्यम् ॥

शि० म०–(तथाहीति) भ्रमेऽतिप्रसंगवारणाय तद्वतीति तद्वद्विशेष्यकत्वे सतीत्यर्थः । इच्छावृत्तिप्रामाण्यं न स्वतो ग्राह्यमित्यत उक्तं ज्ञानत्वमिति । नन्विदं प्रामाण्यं स्मृतिसाधारणमिति तत्र प्रामाण्यव्यवहारप्रसंग इत्याशंक्य प्रवृत्त्यनुकूलस्यैव प्रामाण्यस्यात्र विचार्य्यत्वात् । स्मृतिसाधारणस्य च तादृशत्वेन लक्ष्यत्वान्न दोषइत्याह (संवादीतिं) ननु प्रामाण्यनिश्चयस्य कथं प्रवृत्तिहेतुत्वं प्रमाणाभावादितिं चेत् न, निष्कंपप्रवृत्तिः प्रामाण्यनिश्चयसाध्या तद्व्यतिरेकज्ञानत्वावच्छिन्नं प्रति बाध्यत्वात्सामान्यव्याप्तौ व्याप्तिनिश्चयसाध्यानुमितिवदित्यनुमानस्य तत्र प्रमाणत्वात् । नचाप्रामाण्यशंकानिवृत्तिरेव प्रवृत्तिहेतुः, तत्र चान्यथासिद्धिः प्रामाण्यनिश्चयस्येति वाच्यम् । लाघवेन भावस्य प्रामाण्यनिश्चयस्यैव हेतुत्वौचित्यात । नच स्वतः सिद्ध एव यत्राप्रामाण्यशंकाविरहस्तत्र व्यभिचार इति वाच्यम् । दोषाभावसहितज्ञानग्राहकसामग्र्यां प्रामाण्यनिश्चयावश्यंभावात् । अन्यथा दोषे सत्यप्रामाण्यस्यैव ग्रहापत्तौ तन्निवृत्त्यनुपपत्तेरिति ॥

म० प्र०–तदयोगात्–तदभाववति तत्प्रकारकत्वाभावादिरूपप्रामाण्यस्यात्ममनस्संयोगादिरूपज्ञानसामान्यसामग्रीप्रयोज्यत्वाभावेन प्रामाण्योत्पत्तावात्ममनःसंयो-

Funding by IKS-MoE

गादिरूपज्ञानसामान्यसामग्रीजन्यत्वरूपस्वतस्त्वायोगादित्यर्थः । अतिप्रसंगवारणाय–प्रामाण्यापत्तिवारणाय । प्रामाण्यम्–तद्वतितत्प्रकारकत्वम् नस्वतोग्राह्यम्–ज्ञानवृत्तिस्वतोग्राह्यप्रामाण्यभिन्नम् तथाचेच्छायामतिव्याप्तिरितिभावः, इत्यतः–इच्छायामतिव्याप्तिरूपदोषात, साधारणं–वृत्तिइति–उक्तप्रामाण्यस्य स्मृतिवृत्तित्वात् । तत्र–स्मृतौ प्रवृत्त्यनुकूलस्यैव–प्रामाण्यज्ञानद्वारासंवादिप्रवृत्तिजनकस्यैव, अत्र–मूले, स्मृतिसाधारणस्यच–स्मृतिवृत्तिप्रामाण्यस्यतु, तादृशत्वेन–संवादिप्रवृत्तिजनकत्वेन, नदोषः–स्मृतौ प्रामाण्यव्यवहारस्येष्टत्वेन प्रामाण्यव्यवहारप्रसक्तिरूपदोषो नास्ति यद्व्यतिरेकज्ञानत्वावच्छिन्नंप्रति प्रामाण्याभावज्ञानत्वावच्छिन्नज्ञानेन, सामान्यव्याप्तौ–यत्र यद्भावज्ञानत्वावच्छिन्नेन बाध्यत्वं तत्र तन्निश्चयसाध्यत्वमित्याकारकसामान्यव्याप्तौ (व्याप्तिनिश्चयसाध्यानुमितिवदिति) अनुमितौ हि हेतुवृत्तिव्याप्यभावज्ञानत्वेन बाध्यत्वस्य व्याप्तिनिश्चयसाध्यत्वस्य च सत्त्ववदित्यर्थः । तत्र–प्रामाण्यनिश्चयस्य संवादिप्रवृत्तिजनकत्वे, तत्र च–संवादिप्रवृतिजननेतु, अन्यथासिद्धिः–अकारणत्वम् लाघवेन–अप्रामाण्यशंकाभावनिष्ठसंवादिप्रवृत्तिजनकत्वापेक्षया लघुत्वेन, स्वतः–ज्ञानेप्रामाण्यनिश्चयं विनैव, यत्र–यस्मिन्ज्ञाने तत्र–तस्मिन्ज्ञाने, व्यभिचार इति–यस्मिन्ज्ञाने पूर्वंप्रामाण्यशंका ततः प्रामाण्यनिश्चयस्तस्मिन्ज्ञाने प्रामाण्यनिश्चयनिष्कंपप्रवृत्तिजनकत्वयोरन्वयस्य सत्त्वेपि यस्मिन्ज्ञाने प्रामाण्यशंकैव नास्ति तस्मिन्ज्ञाने प्रामाण्यानिश्चयासत्त्वेन संवादिप्रवृत्तिजनकत्वस्य सत्त्वेन च व्यतिरेकव्यभिचार इत्यर्थः । अन्यथेत्यस्य विवरणंदोषे सतीति, तन्निवृत्त्यनुपपत्तेः–अप्रामाण्यग्रहनिवृत्त्यनुपपत्तेः तथाच प्रामाण्यनिश्चयस्य सत्त्वेन व्यतिरेकव्यभिचार इतिभावः ॥

सू०–तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं नत्वधिकगुणमप्यपेक्षते प्रमामात्रेनुगतगुणाभावात्,नापि प्रत्यक्षप्रमायां भूयोवयवेन्द्रियसन्निकर्षः ॥

शि० म०–ननु प्रामाण्यस्य न स्वोत्पाद्यत्वमुत्पत्तौस्वतस्त्वमात्माश्रयात् । नच ज्ञानसामग्रीमात्रजन्यत्वं तदा प्रामाण्यस्योपाधित्वेनाजन्यत्वादित्यत आह (तच्चेति) प्रामाण्यं परत उत्पद्यते परतस्त्वं चोत्पत्तौ तस्य ज्ञानजनकसामग्र्यतिरिक्तकारणप्रयोज्यत्वमिति नैयायिकादयः तान्प्रत्याह (नत्विति) प्रमाणाभावादिति भावः । अनुगतगुणासंभवादपि न तदपेक्षेत्याह (प्रमामात्रइति) भूयोऽवयवेन्द्रियसन्निकर्षसल्लिंगपरामर्शयोग्यतादीनां व्यभिचारेण प्रमात्वावच्छेदेन हेतुत्वायोगादिति भावः । नन्वत्र प्रत्यक्षप्रमात्वादिकमेवतज्जन्यतावच्छेदकमिति न व्यभिचार इत्याशंक्याह (नापीति) ॥

Funding by IKS-MoE

म० प्र०–स्वोत्पाद्यत्वं–प्रामाण्येन जन्यत्वं, आत्माश्रयात्–स्वोत्पत्तौ स्वापेक्षारूपात्माश्रयात्, तदा–प्रामाण्यस्य ज्ञानसामग्रीमात्रजन्यत्वं प्रामाण्योत्पत्तौ स्वतस्त्वमिति स्वीकारे, प्रामाण्यस्य–तद्वतितत्प्रकारकज्ञानत्वरूपप्रामाण्यस्य, उपाधित्वेन–नानापदार्थघटितस्वरूपत्वेन, अजन्यत्वात्–नानापदार्थानां मध्ये केषांचिदजन्यत्वेन केषांचित्स्वकारणजन्यत्वेन च, ज्ञानसामग्रीमात्रजन्यत्वाभावात्, परतः–ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीतः, उत्पत्तौ–प्रामाण्योत्पत्तौ, तस्य–प्रामाण्यस्य ज्ञानजनकेति–ज्ञानत्वावच्छिन्नज्ञानजनकसामग्री आत्ममनःसंयोगरूपा सामग्री तदतिरिक्तं कारणं सन्निकर्षादिरूपं कारणं तत्प्रयोज्यत्वं तदधीनत्वमित्यर्थः। परममूले (ज्ञानसामान्यसामग्रीप्रयोज्यमिति) ज्ञानत्वावच्छिन्नज्ञानसामग्री आत्ममनःसंयोगरूपा सामग्रीतत्प्रयोज्यं तदधीनमित्यर्थः । परममूले गुणं–सन्निकर्षादिरूपं गुणं (अनुगतेति) अव्यभिचारीत्यर्थः नतदपेक्षा–प्रामाण्यस्य सन्निकर्षादिगुणापेक्षा नास्ति (भूयइति) भूयांसो येऽवयवास्तैरिन्द्रियसन्निकर्ष इत्यर्थः (प्रमात्वावच्छेदेनेति) प्रमात्वावच्छिन्नप्रमानिरूपितकारणत्वासंभवादित्यर्थः । अत्र प्रमासुप्रत्यक्षप्रमात्वादिकमित्यत्रादिपदेनानुमितित्वशब्दत्वानां ग्रहः (तज्जन्यतावच्छेदकमिति) प्रत्यक्षप्रमात्वावच्छिन्नप्रमां प्रति भूयोवयवेन्द्रियसन्निकर्षत्वेन हेतुत्वमनुमितित्वावच्छिन्नानुमितिप्रमां प्रति सल्लिंगपरामर्शत्वेन हेतुत्वमुपमितित्वावच्छिन्नोपमितिप्रमां प्रति गवयनिष्ठगोसादृश्यज्ञानत्वेन हेतुत्वमित्यादिप्रकारेण सन्निकर्षादिनिष्ठजनकतानिरूपितजन्यतावच्छेदकमित्यर्थः । न व्यभिचारः–सन्निकर्षादीनां व्यभिचारो नास्ति ॥

मू०–रूपादिप्रत्यक्षे आत्मप्रत्यक्षेच तदभावात् सत्यपि तस्मिन्पीतः शंख इति प्रत्यक्षस्य भ्रमत्वात् । अत एव सल्लिंगपरामर्शादिकमप्यनुमित्यादिप्रमायां न गुणः असल्लिंगपरामर्शादिस्थलेऽपि विषयाबाधेनानुमित्यादेः प्रमात्वात्, नचैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्या अविशेषादिति वाच्यम्, दोषाभावस्यापि हेतुत्वांगीकारात् ॥

शि० म०–तथापि प्रमामात्रे अनुगतगुणासंभव इति दोषेसत्येव, दोषांतरमाह (रूपादीति) नन्वयं सन्निकर्षो बहिर्द्रव्यप्रत्यक्षप्रमायामेव गुण इति न रूपादिप्रत्यक्षप्रमायामात्मप्रत्यक्षे च व्यभिचारो दोष इत्यपरितोषादाह (सत्यपीति) तथाचान्वयव्यभिचार इति भावः (असल्लिंगेति) सत्यपि सल्लिंगपरामर्शे गंधप्रागभावावच्छेदेन गंधानुमितेरप्रमात्वाच्चेत्यपि बोध्यम् (दोषाभावस्येति) तर्हि स एवानित्यप्रमामात्रे गुणत्वेन हेतुरनुग-

तत्वादिति चेत् न, अपसिद्धांतात । दोषस्य प्रमाबाधकतया तदभावस्यान्यत्र क्लृप्तप्रतिबंधकाभावत्वेन हेतुत्वोपपत्तौ गुणत्वेन हेतुत्वे मानाभावाच्चेति भावः ॥

म०प्र०-तथापि-प्रत्यक्षप्रमात्वादीनां सन्निकर्षादिनिष्ठजनकतानिरूपितजन्यतावच्छेदकत्वेपि, दोषांतरं-व्यतिरेकव्यभिचाररूपदोषांतरम् । परममूले, तदभावात्-भूयोऽवयवेन्द्रियसन्निकर्षस्य कारणत्वाभावात्, गुणः-असाधारणकारणम्. व्यभिचारः-व्यतिरेकव्यभिचारः । परममूले (अतएवेति) वक्ष्यमाणव्यतिरेकव्यभिचाररूपहेतोरेवेत्यर्थः । परममूले सल्लिंगपरामर्शादिकमित्यत्रादिपदेन योग्यतायाः परिग्रहः । परममूले (नगुणइति) अनुमित्यादिप्रमाऽसाधारणकारणंनेत्यर्थः । अतएवेत्युक्तवक्ष्यमाणव्यतिरेकव्यभिचारमेव दर्शयति । परममूले (असल्लिंगेति) परममूले स्थलेपि-कालेपि । परममूले (प्रमात्वादिति) तथाच व्यतिरेकव्यभिचारइति भावः । अन्वयव्यभिचारमप्याह (सत्यपिसल्लिंगपरामर्शेइति) गंधव्याप्यपृथिवीत्ववान्पाषाण इत्याकारकसल्लिंगपरामर्शेसत्यपीत्यर्थः । गंधप्रागभावावच्छेदेन-पाषाणाद्युत्पत्त्युत्तरद्वितीयक्षणवृत्तिगंधप्रागभावावच्छिन्नपाषाणादावित्यर्थः गंधानुमितेः पाषाणो गंधवान् पृथिवीत्वात्पुष्पवदित्याद्यनुमानजन्यपाषाणो गंधवानित्याद्यनुमितेः । परममूले (एवमिति) प्रामाण्यस्य ज्ञानसामान्यसामग्रीप्रयोज्यत्वस्वीकारे सतीत्यर्थः । तर्हि-प्रामाण्यं प्रतिदोषाभावस्यापि हेतुत्वस्वीकारे सति, सएव-दोषाभाव एव, गुणत्वेन-असाधारणकत्वेन, अनुगतत्वात्-दोषाभावस्य व्यभिचाराभावात् । अपसिद्धान्तात्-दोषाभावस्यानित्यप्रमामात्रेऽसाधारणकारणत्वेन हेतुत्वाभ्युपगमे सिद्धांतहान्यापत्तेः, गुणत्वेन-असाधारणकरणत्वेन ।

मू०-नचैवं परतस्त्वं आगंतुकभावकारणापेक्षायामेव परतस्त्वात् ज्ञायते च प्रामाण्यं स्वतः स्वतो ग्राह्यत्वं च दोषाभावे सति यावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वम् ॥

शि० म०-प्रामाण्यस्य दोषाभावप्रयोज्यत्वेज्ञानसामग्र्यतिरिक्तप्रयोज्यत्वेनाप्रामाण्यवदुत्पत्तौ परतस्त्व स्यादित्याशंक्य निराकरोति (नचैवमिति) ज्ञानसामान्यप्रयोजकात्प्रमोत्पत्तावदृष्टादिसापेक्षत्वात्परतस्त्वं स्यादित्यत उक्तमागंतुकेति ज्ञानत्वाप्रयोजकेत्यर्थः । दोषाभावमागंतुकमादाय तद्वारणाय भावेति तथाचागंतुकभावकारणसहकृतज्ञानत्वप्रयोजकप्रयोज्यत्वमुत्पत्तौ परतस्त्वं स्वतस्त्वं तु तादृशकारणानपेक्षज्ञानसामान्यप्रयोजकप्रयोज्यत्वमिति भावः (प्रामाण्यमिति) तद्वति तत्प्रका-

Funding by IKS-MoE

रकज्ञानत्वमित्यर्थः (दोषाभावेसतीति) अत्र तत्प्रकारीभूतप्रकारकत्वेन तद्विशेष्यीभूतविशेष्यकत्वेन च स्वाश्रयग्राहकत्वं स्वाश्रयग्राहकपदेन विवक्षितं तेन ज्ञानपदादिना तदग्रहान्नदोषः परतस्त्ववादिनापि तादृशेनानुमानादिना तद्ग्रहस्वीकारादित्यत उक्तं यावदिति स्वाश्रयग्राहकविशेषणं तादृशसामग्रीग्राह्यत्वं तज्जन्यग्रहविषयत्वं तथाच यत्रदोषवशाद्प्रामाण्यनिश्चयः तत्संशयो वा तत्र तादृश्यापि सामग्र्या प्रामाण्याग्रहाद्बाध इत्यत उक्तं दोषाभाव इति ॥

म०प्र०–(ज्ञानत्वाप्रयोजकेति) ज्ञानत्वस्य स्मृत्यनुभवसाधारणत्वेनेन्द्रियसन्निकर्षादिकं ज्ञानत्वाप्रयोजकं ज्ञानत्वप्रयोजकं त्वदृष्टात्ममनस्संयोगादिकमेवेत्यर्थः । (तादृशकारणेति) आगंतुकभावकारणेत्यर्थः । अत्र–यावत्स्वाश्रयग्राहकेति मूले (तत्प्रकारीभूतप्रकारकत्वेनेति) ज्ञानप्रकारीभूतप्रकारकत्वविशिष्टेत्यर्थः । तद्विशेष्यीभूतविशेष्यकत्वेन–ज्ञानविशेष्यीभूतविशेष्यकत्वविशिष्टेत्यर्थः । तेन–स्वाश्रयग्राहकपदेन ज्ञानप्रकारीभूतप्रकारकत्वविशिष्टज्ञानविशेष्यीभूतविशेष्यकत्वविशिष्टस्वाश्रयग्राहकत्वस्य विवक्षितत्वेन । तदग्रहात्–प्रामाण्याग्रहात् । नदोषः–स्वतस्त्वहानिरूपदोषोनास्ति । तादृशेन–ज्ञानप्रकारीभूतप्रकारकज्ञानविशेष्यीभूतविशेष्यकस्वाश्रयाग्राहकेण, अनुमानादिना–घटज्ञानं प्रमा सफलप्रवृत्तिजनकत्वात्पटज्ञानवत् व्यतिरेकेऽप्रमावदित्याद्यनुमानादिना (तद्ग्रहेति) प्रामाण्यग्रहेत्यर्थः (स्वीकारादिति) अस्याग्रे सिद्धसाधनं स्यादिति शेषः (विशेषणमिति) यांवान् निखिलश्चासौ स्वाश्रयग्राहक इति समासः तथाच यावत्कोटावनुव्यवसायसाक्षिरूपज्ञानैरपि प्रविष्टत्वेन तद्विषयत्वसाधनान्न सिद्धसाधनमिति भावः (तादृशसाभग्रीति) दोषाभावकालीनयावत्स्वाश्रयग्राहकसामग्रीत्यर्थः । तज्जन्यग्रहविषयत्वं–दोषाभावकालीनयावत्स्वाश्रयग्राहकसामग्रीजन्यग्रहविषयत्वम् इदं हिकथनं मुरारिमिश्रभट्टमतानुसारेण प्राभाकरमते व्यवसायस्यैव स्वाश्रयग्राहकत्वेन सिद्धांतिमते साक्षिण एव स्वाश्रयग्राहकत्वेन तज्जन्यग्रहाभावात् तन्नये स्वाश्रयविषयकग्रहरूपसामग्रीविषयत्वरूपार्थस्याप्युक्तव्याख्यानस्योपलक्षणत्वेन न स्वतस्त्वहानिरिति, तथाच–तथैव, यत्र–यस्मिञ्ज्ञाने, तत्संशयः–प्रामाण्यसंशयः तत्र–तस्मिञ्ज्ञाने. तादृश्यापि–स्वाश्रयग्राहकयापि ॥

मू०–स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिज्ञानं तेनापि वृत्तिज्ञाने गृह्यमाणे तद्गतप्रामाण्यमपि गृह्यते नचैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषा-

मात्रघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात्, यद्वा यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वम् ॥

शि० म०–तथाच दोषासहकृततादृशयावत्स्वाश्रयग्राहकसामग्रीग्राह्यत्वं प्रामाण्यज्ञप्तौ स्वतस्त्वं तदुक्तं प्रथमवर्णके नृसिंहाश्रमश्रीचरणैः दोषासहकृतज्ञानसामग्रीमात्रग्राह्यत्वं ज्ञप्तौ प्रामाण्यस्य स्वतस्त्वमिति । प्रामाण्यस्य स्वतोग्राह्यत्वमुपपादयति (स्वाश्रयइति) संशयस्थलीयापि सामग्री दोषासहकृतेति मन्वानो नैयायिकश्चोदयति (नचैवमिति) यद्वा सामग्र्यां दोषासहकृतत्वविशेषणमजानन् शंकते (नचैवमिति) परिहरति (तत्रेति) ॥

म० प्र०–तथाच सिद्धसाधनादिदोषाभावे सति (दोषासहकृतेति) दोषासमानकालीनेत्यर्थः (तादृशेति) ज्ञानप्रकारीभूतप्रकारकत्वविशिष्टज्ञानविशेष्यभूतविशेष्यकत्वविशिष्टेत्यर्थः । प्रथमवर्णके–प्रथमव्याख्याने । चरणैः–पूज्यैः–प्रामाणस्य ज्ञप्तावित्यन्वयः । परममूले (तेनापीति साक्षिरूपज्ञानेनापीत्यर्थः । संशयस्थलीयापि–संशकालीनापि । परममूले (एवमिति) प्रामाण्यज्ञप्तावुक्तस्वतस्त्वस्वीकारे सतीत्यर्थः । परममूले (तत्रेति) प्रामाण्ये इत्यर्थः । परममूले (तत्रेति) ज्ञाने इत्यर्थः । सत्यंतशब्दार्थानादानप्रयुक्तलाघवमभिप्रेत्याह परममूले (यद्वेति) ॥

मू०–स्वतस्त्वं संशयस्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेपि दोषवशेनाग्रहान्न संशयानुपपत्तिः अप्रामाण्यं तु नज्ञानसामान्यसामग्रीप्रयोज्यं प्रमायामप्यप्रामाण्यापत्तेः किंतु दोषप्रयोज्यं नाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यमप्रामाण्यघटकतदभाववत्त्वादेर्वृत्तिज्ञानानुपनीतत्वेन साक्षिणा ग्रहीतुमशक्यत्वात् किंतु विसंवादिप्रवृत्त्यादिलिंगकानुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते च ॥ इत्यनुपलब्धिपरिच्छेदः ॥ ६ ॥

शि० म०–(स्वतस्त्वमिति) प्रामाण्यस्येति शेषः । यद्यपि नेदं स्वतस्त्वप्रयोजकं संशयस्थल इवानुव्यवसायस्थलेपि प्रामाण्यानुमितिहेतुव्याप्तिज्ञानलिंगपरामर्शाभाववशेन प्रामाण्याग्रहेपि तद्योग्यताया न्यायमतेपि सत्त्वात् । तथापि पूर्वोक्त एव तात्पर्यमुत्पत्तिज्ञप्त्योरप्रामा-

ण्यस्य परतस्त्वमुपपादयति (अप्रामाण्यमिति) अप्रामाण्यं स्वतो ग्राह्यं परतोऽग्राह्यत्वादिति शंकते (किंत्विति) इदं रजतज्ञानमप्रमाणं विसंवादिप्रवृत्तिजनकत्वादित्यनुमानग्राह्यत्वाद्धेत्वसिद्धिरित्याह (विसंवादीति) ॥

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते वेदान्तचूडामणौ,
अनुपलब्धिपरिच्छेदः समाप्तः ॥ ६ ॥

म०प्र०–इदं–यद्वेत्यादिनोक्तम्, स्वतस्त्वप्रयोजकं–स्वतस्त्वव्यवहारप्रयोजकम् (संशयस्थलइवेति) यथा संशयकाले व्याप्तिज्ञानलिंगपरामर्शाद्यभाववशेन प्रामाण्याग्रहेपि प्रामाण्यस्य स्वाश्रयग्राहकग्राह्यत्वयोग्यतास्तितद्वदित्यर्थः । अनुव्यवसायस्थलेपि–अनुव्यवसायकालेपि । तद्योग्यतायाः–प्रामाण्यग्रहयोग्यतायाः, सत्त्वादिति–प्रामाण्येस्वतस्त्वव्यवहाराभावाच्चेतिशेषः । पूर्वोक्ते एव प्रथमोक्ते निखिलत्वे एव निखिलस्वाश्रयग्राहकग्राह्यत्वयोग्यत्वे एवेति यावत् । तथाच नैयायिकमते निखिलान्तःपातिसाक्षिरूपज्ञानविषयत्वयोग्यताया अभावात्प्रामाण्ये स्वतस्त्वव्यवहारः सिद्धसाधनं च नास्तीति भावः । परममूले अनुमित्यादीत्यादिपदेन शाब्दबोधग्रहः ॥

इति श्रीमदुदासीनवरश्रीमद्ब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदास-
शब्दवाच्याविर्भूतायां धर्मराजाध्वरीन्द्रात्मजरामकृष्णविरचितवे-
दान्तशिखामणेः प्रभायामनुपलब्धिपरिच्छेदः ॥ ६ ॥

Funding by IKS-MoE

अथ विषयपरिच्छेदः ७.

मू०—एवं निरूपितानां प्रमाणानां प्रामाण्यं द्विविधं व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वं चेति । तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्वप्रमाणानामाद्यं प्रामाण्यं तद्विषयाणां व्यवहारदशायां बाधाभावात् । द्वितीयं तु जीवब्रह्मैक्यपराणां सदेव सोम्येदमग्र आसीदित्यादीनां तत्त्वमसीत्यंतानां तद्विषयस्य जीवपरैक्यस्य कालत्रयाबाध्यत्वात्, तच्चैक्यं तत्त्वंपदार्थज्ञानाधीनज्ञानमिति प्रथमं तत्पदार्थो लक्षणप्रमाणाभ्यां निरूप्यते ॥

शि० म०–(प्रमाणानामिति) प्रमाकरणानां तत्करणत्वलक्षणं प्रामाण्यं द्विविधमित्यर्थः । वेदांतानां पारमार्थिकवस्तुगोचरप्रमाकरणत्वे हेतुमाह तद्विषयस्येति तर्ह्यादौ विषयनिरूपणमेव क्रियतामित्याशंक्य तन्निरूपणस्य तत्त्वं पदार्थनिरूपणाधीनत्वात्तत्पूर्वं तत्पदार्थादिनिरूपणमेवोचितमित्याह (तत्त्वंपदार्थेति) नच त्वंपदार्थनिरूपणमेव प्राग्भाविस्यादविशेषादिति वाच्यम् । तत्त्वंपदार्थेत्यत्र प्रथमं तत्पदार्थस्योपात्तत्वात् ॥

धर्मार्थकामादिपदार्थवृन्दं संदातृ यस्यास्ति पदारविन्दम् ॥
यतीन्द्रयोगीन्द्रभपूर्णचन्द्रं श्रीचन्द्रसंज्ञं सततं स्तुवे तम् ॥ १ ॥

म० प्र०—प्रमाकरणानां—प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यानुपलब्धिरूपाणां, तत्करणत्वलक्षणं—प्रमात्मकज्ञानजनकत्वरूपं परममूले (तत्त्वावेदकत्वमिति) स्वरूपविषयकबोधजनकत्वम् । परममूले (तत्रेति) द्विविधप्रामाण्ययोर्मध्ये इत्यर्थः । परममूले तद्विषयाणाम्—ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तप्रमाणविषयाणां परममूले द्वितीयंतु—पारमार्थिकस्वरूपावेदकत्वरूपप्रामाण्यंतु, ननु प्रत्यक्षादीनां पारमार्थिकवस्तुगोचरप्रमाणकरणत्वाभिधानमपहाय वेदांतानां पारमार्थिकवस्तुगोचरप्रमाकरणत्वाभिधानं कुतः क्रियते इत्याशंक्य वेदांतानां पारमार्थिकवस्तुगोचरप्रमाणकरणत्वाभिधाने हेत्वभिधानप्रतिज्ञामाह (वेदांतानामिति) योयस्य प्रमाणस्य विषयो भवति तस्मिन्नेव विषये तस्य प्रमाणस्य प्रमाजनकत्वं नत्वन्यत्रेति व्याप्ते-

Funding by IKS-MoE

वेदांतानां कालत्रयाबाध्यस्य ब्रह्मजीवैक्यरूपविषयस्य विद्यमानत्वेन ब्रह्मजीवैक्यरूपविषये संसर्गानवगाहिप्रमाजनकत्वं संभवत्येव प्रत्यक्षादिप्रमाणानां तु ब्रह्मजीवैक्यरूपविषयाभावान्न पारमार्थिकवस्तुगोचरप्रमाकरणत्वमिति भावः, तर्हि–जीवपरैक्यस्य वेदांतप्रमाणविषयत्वे सति, आदौ–तत्त्वंपदार्थनिरूपणात्प्राक्, तन्निरूपणस्य–जीवपरैक्यरूपविषयनिरूपणस्य, तत्पूर्वं–जीवपरैक्यरूपविषयनिरूपणात्पूर्वम्.प्राग्भावि–तत्पदार्थनिरूपणात्पूर्वभावि, अविशेषात्–यथा तत्पदार्थो निरूपणीय एवं त्वंपदार्थोपि निरूपणीय इति निरूपणीयत्वेन तत्त्वंपदार्थयोस्तुल्यत्वात् (तत्त्वंपदार्थेति) तत्त्वंपदार्थज्ञानेत्यत्रतत्पदार्थस्य प्रथमं–शिष्यजिज्ञासितत्वादित्यन्वयः, तत्पदार्थस्यप्रथमशिष्यजिज्ञासितत्वे हेतुमाह (प्रथमंतत्पदार्थस्योपात्तत्वादिति) तत्त्वमसिवाक्ये आदौ तत्पदार्थस्योपस्थितत्वादित्यर्थः। प्रथमोपस्थितत्यागे बाधादिनिमित्ताभावात्प्रथमोपस्थिततत्पदार्थ एव प्रथमं निरूपणीय इति भावः ॥

मू०–तत्र लक्षणं द्विविधं स्वरूपलक्षणं तटस्थलक्षणं चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम्, यथा सत्यादिकं ब्रह्मस्वरूपलक्षणं सत्यं ज्ञानमनंतं ब्रह्म आनंदो ब्रह्मेति व्यजानादित्यादिश्रुतेः ॥

शि० म०–त्वंपदार्थस्य कथंचिल्लोकावगतत्वेन तदपेक्षयाऽस्यात्यंतदुर्ज्ञेयतया च प्रथमं शिष्यजिज्ञासितत्वादिति भावः (लक्षणमिति) असाधारणधर्म इत्यर्थः। वस्तुप्रतिपत्तौ स्वरूपलक्षणस्य प्रधानत्वात्तटस्थलक्षणोपजीव्यत्वाच्च प्रथमं तल्लक्षयति (तत्रेति) इतरानिरूप्यं यल्लक्षणं तत्स्वरूपलक्षणमित्यर्थः। यद्यपि प्रकृष्टप्रकाशश्चंद्र इति लोकेपि स्वरूपलक्षणं प्रसिद्धं तथापि वैदिकस्य ब्रह्मलक्षणस्यैव प्रकृतत्वात्तदुदाहरति (यथेति) ज्ञानानंदावादिपदग्राह्यौ तथाच सत्यंज्ञानमानंदश्च प्रत्येकं ब्रह्मस्वरूपलक्षणं नतु सर्वज्ञत्वादिकं तस्य प्रपंचोपाधिकत्वेन इतरनिरूप्यत्वादिति भावः। नन्विदं ब्रह्मस्वरूपमिति कथमवगम्यते इत्यत आह (सत्यमिति) ॥

म० प्र०–तत्पदार्थस्यैव प्रथमं जिज्ञासितत्वमित्यत्रैव हेत्वंतरमाह (त्वंपदार्थस्येत्यादिनादुर्ज्ञेयतयाचेत्यंतेन) कथंचित्–सुखादिविशिष्टत्वरूपत्वेन, तदपेक्षया–लोकावगतत्वं पदार्थज्ञानापेक्षया, अस्य–तत्पदार्थस्य, अत्यंतदुर्ज्ञेयतया च–बहुक्लेशेनज्ञेयतयाच, वस्तुप्रतिपत्तौ–वस्तुस्वरूपज्ञानजनने, प्रधानत्वात्–प्रथमं वस्तुस्वरूपे जिज्ञासा [illegible]स्त्वऽसाधारणधर्मे जिज्ञासेत्येवं क्रमसत्त्वेन वस्तुस्वरूपलक्षणस्य प्रधानत्वात्

वस्तुस्वरूपस्यापरोक्षज्ञाने वस्तुस्वरूपस्यविषयविधयाकारणत्वेन वस्तुस्वरूपस्य प्राधान्यं तटस्थलक्षणं त्वितरभेदानुमापकमित्येवं वा वस्तुस्वरूपलक्षणस्य प्रधानत्वात् (तटस्थलक्षणोपजीव्यत्वाच्चेति) उपजीव्यत्वं च परंपरया साक्षाद्वा जनकत्वमुपजीवकत्वं च परंपरयासाक्षाद्वाकार्य्यत्वम् तथाच तटस्थलक्षणनिष्ठकार्य्यतारूपोपजीवकतानिरूपितस्वरूपलक्षणनिष्ठकारणतारूपोपजीव्यत्वाच्च वस्तुस्वरूपतटस्थलक्षणयोर्हेश्यविधेयभावेन तटस्थलक्षणनिष्ठोपजीवकतानिरूपितस्वरूपलक्षणनिष्ठोपजीव्यत्वाच्च वा वस्तुस्वरूपतटस्थलक्षणयोः सामान्यविशेषभावेन शेषशेषिभावेन वा तटस्थलक्षणनिष्ठोपजीवकतानिरूपितस्वरूपलक्षणनिष्ठोपजीव्यत्वाच्चवेत्यर्थः । सूचीकटाहन्यायेनादौस्वरूपलक्षणनिरूपणमित्यपिकेचिद्वदंतीत्यपि बोध्यम् । तत्–वस्तुस्वरूपं, लक्षयति–लक्षणेन निरूपयति, इतरानिरूप्यं–वस्तुस्वरूपेतराघटितं, प्रकृष्टप्रकाशः–सर्वदीपादिप्रकाशाधिकप्रकाशाभिन्नश्चंद्रः, तत्–वैदिकंस्वरूपलक्षणम्, तस्य–सर्वज्ञत्वादेः । प्रपंचोपाधिकत्वेन–सर्वंजानातीति सर्वज्ञ इति व्युत्पत्त्या ब्रह्मस्वरूपेतरसर्वप्रपंचघटितत्वेन, इतरानिरूप्यत्वात्–वस्तुस्वरूपेतरसर्वप्रपंचप्रयोज्यत्वात्, इदं–सत्यादिकम् ॥

मू०–ननु स्वरूपस्य स्ववृत्तित्वाभावेन कथं लक्षणत्वमिति चेन्न स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पनया लक्ष्यलक्षणत्वसंभवात् ॥

शि० म०–“ नन्वस्य जन्मस्थितिभंगं यतस्सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्मेति वाक्यशेष ” इति वदता भगवता भाष्यकारेण सर्वज्ञत्वादेरेव ब्रह्मणः स्वरूपंलक्षणत्वेनोक्तत्वात्तद्विरोध इति चेन्न, तस्य सर्वावभासनयोग्यविज्ञानाभिप्रायत्वात् तदुक्तं विवरणाचार्य्यैः । अनेन सर्वज्ञशब्देन सर्वावभासनक्षमं विज्ञप्तिमात्रं विवक्ष्यत इति । केचितु सच्चिदानंदात्मकत्वमेव ब्रह्मणः स्वरूपलक्षणं नतु सत्यत्वादिप्रत्येकं लक्षणं तथाहि न तावत्सत्यत्वं लक्षणं तस्य घटादिसाधारणत्वात्, नच सत्यत्वे सतिज्ञानत्वं तस्य ज्ञानेपि परेणांगीकारात् । नापि ज्ञानानंदत्वसत्यत्वरहितस्य ज्ञानानंदात्मकस्य शून्यवादिभिरप्यंगीकारात् तस्मात्सच्चिदानंदात्मकत्वमेव स्वरूपलक्षणामिति तन्न सिद्धांते घटादेः पारमार्थिकसत्यत्वाभावेनोक्तदोषासंस्पर्शात् सिद्धांतेनैवलक्षणप्रणयनात् अन्यथा पराभिमतजगत्कारणस्य सच्चिदानंदात्मकत्वाभावेन तत्राव्याप्तिप्रसंगात्, ततश्च सत्यत्वादिप्रत्येकमेव लक्षणमिति स्वरूपं न लक्षणं धर्मत्वाभावादित्याक्षिपति (नन्विति) परिहरति (नेति) ॥

म० प्र०—अस्य—जगतः (इतिवदतेति) अस्यादौजन्माद्यस्य यत इति सूत्रव्याख्याने इति शेषः । तद्विरोधः—भाष्यकारोक्त्या सह विरोधः । तस्य—सर्वज्ञादित्यादिभाष्यस्य (सर्वावभासनयोग्यविज्ञानाभिप्रायत्वादिति) सर्वावभासने सर्वदृश्यनिष्ठविषयत्वे सर्वदृश्यविषयकव्यवहारेवायोग्यं यद्विज्ञानं, तदभिप्रायकत्वादित्यर्थः तथाच सर्वज्ञादित्यस्य सर्वदृश्यावभासनयोग्यविज्ञानादित्यर्थ इति भावः । ननु यतः सर्वज्ञादित्यादिभाष्यस्योक्ताभिप्रायकत्वं त्वया कथमवगम्यत इत्यत आह (तदुक्तमिति) तस्य—कालसंबंधित्वरूपसत्यत्वस्य । घटादिसाधारणत्वात्—घटादिषुवृत्तित्वात्, तस्य—सत्यत्वे सति ज्ञानत्वस्य, ज्ञानेपि—अनात्मस्वरूपवृत्तिज्ञानेपि । परेण—नैयायिकादिना, ज्ञानानंदात्मकस्येति—माध्यमिकमते हि सर्वमभावादेव भवतीत्येवं भाष्यादौ प्रसिद्धस्याभावापरपर्य्यायशून्यपदार्थस्येति शेषः (शून्यवादिभिरिति) सुप्तोत्थितस्य सुषुप्तावहं नासमिति परामर्शाच्छून्यमेवात्मा अत एव “ सर्वमिदं शून्यात्मकमेवासदेवेदमग्र आसीत्” इति श्रुतेरिति वदद्भिरितिशेषः । शून्यस्य सत्यत्वं नास्ति ज्ञानानंदात्मकत्वं त्वस्तीत्यपि तदीयग्रंथेभ्य एव द्रष्टव्यमिति (उक्तदोषेति) अतिव्याप्तिरूपदोषेत्यर्थः । ननु पारमार्थिकसत्यत्वस्य ब्रह्मलक्षणत्वे परमाण्वाकाशादिष्वतिव्याप्तिः स्यादित्यत आह (सिद्धांतेनेति) सिद्धांते ब्रह्मभिन्ने कस्मिन्नापि सत्यत्वादीनामभावेन न कुत्राप्यतिव्याप्तिरिति भावः । अन्यथा स्वसिद्धांतेनैव लक्षणप्रणयनानंगीकारे । कारणस्य—परमाण्वादेः, तत्र—पराभिमतकारणे, अव्याप्तिप्रसंगात्—जगत्कारणलक्षणस्य सच्चिदानंदात्मकत्वस्याव्याप्तिप्रसंगात्, ततश्च—सिद्धांतेनैव लक्षणप्रणयनादेव, धर्मत्वाभावात्—असाधारणधर्मस्यैव लक्षणत्वेन स्वस्यस्ववृत्तिधर्मत्वाभावात् । परममूले (स्वस्यैवस्वापेक्षयेति) स्नस्यैव ब्रह्मण एत्र स्वापेक्षया ब्रह्मणः स्वरूपभूतसत्यत्वाद्यपेक्षया धर्मधर्मिभावकल्पनया सत्यत्वादिरूपेण ब्रह्मणो लक्षणत्वं ब्रह्मत्वेन रूपेण ब्रह्मणो लक्ष्यत्वमित्येवं धर्मधर्मिभावकल्पनयेत्यर्थः ॥

मू०—तदुक्तम् आनंदो विषानुभवो नित्यत्वं चेति संति धर्माः अपृथक्केपि चैतन्यात्पृथगिवावभासंते तटस्थलक्षणंनाम यावल्लक्ष्यकालमनवस्थितत्वेसति यद्व्यावर्त्तकं तदेव यथा गंधवत्त्वं पृथिवीलक्षणं महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गंधाभावात् प्रकृतेच जगज्जन्मादिकारणत्वम् अत्र जगत्पदेन कार्य्यजातं विवक्षितं कारणत्वं च कर्तृत्वमतोऽविद्यादौ नातिव्याप्तिः कर्तृत्वं च तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् ॥

Funding by IKS-MoE

शि० म०-लक्षणलक्षणेपारमार्थिकधर्मत्वस्य गौरवेणाप्रयोजकत्वादिति भावः । अत्र पंचपादिकाचार्य्यसंमतिमाह (तदुक्तमिति) स्वरूप लक्षणेऽतिव्याप्तिवारणाय यावदिति, लक्ष्यावृत्तितादृशधर्मे तद्वारणाय व्यावर्त्तकपदं, परमतेनाह (महाप्रलय इति) उभयमतेनाह (उत्पत्तिकाले इति) ब्रह्मणस्तटस्थलक्षणमाह (प्रकृतेचेति) ननु ब्रह्मणो जगच्छब्दान्तःपातिमायादिकारणत्वाभावादसंभवः जगच्छब्देन कार्य्यपरामर्शे कुलालादेरपि यत्किंचित्कार्य्यकारणत्वेनातिव्याप्तिरित्यत आह (अत्रेति । कार्य्यजातमिति) सर्वकार्य्यमित्यर्थः । ननु यावत्कार्य्यजन्मकारणत्वं न ब्रह्मलक्षणं तस्य प्रधानमायापरमाणुजीवशून्यसाधारणत्वादित्याशंक्याह (कारणंचेति । कर्तृत्वमिति) अदृष्टाद्वारकतावदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमित्यर्थः । तेनाचेतनानां प्रधानमायादीनां निरास इतिभावः ॥

म० प्र०-लक्षणलक्षणे-असाधारणधर्मो हि लक्षणमिति लक्षणलक्षणे पारमार्थिकधर्मत्वस्य पारमार्थिकासाधारणधर्मो हि लक्षणमित्यसाधारणधर्मनिष्ठपारमार्थिकत्वस्याप्रयोजकत्वादघटकत्वादित्यर्थः । पारमार्थिकत्वस्यासाधारणधर्माघटकत्वे हेतुमाह (गौरवेणेति) अत्र-सत्यत्वादीनांधर्मत्वे (यावदिति) यावदित्यारभ्य सतिपर्य्यंतमित्यर्थः । लक्ष्यावृत्तितादृशधर्मे-पृथिव्यादिलक्ष्यावृत्तिपृथिव्यादिलक्ष्यकालपर्य्यंतमनवस्थिते शाब्दज्ञानसुखादिरूपधर्मे । तद्वारणाय-अतिव्याप्तिवारणाय (उभयेति) नैयायिकवेदांतीत्यर्थः । आद्यक्षणे गुणानभिव्यक्तत्वाभिप्रायेणेयमुक्तिर्बोध्या । अन्यथा प्रश्नोपनिषद्भाष्यादावाकाशादीनां शब्दादिगुणेन सहोत्पत्तिश्रवणेनोक्तभाष्यविरोधः स्याद्वस्तुत उभयमतेनाहेति कथनमापातत इति बोध्यम् । कार्य्यपरामर्शे-यत्किंचित्कार्य्यग्रहणे सति, कारणत्वस्यप्रधानमायापरमाणुजीवशून्यसाधारणत्वादिति सांख्यैः स्वतंत्रप्रकृतौ वेदांतिभिरीश्वराश्रितमायायां नैयायिकैः परमाणुषु मीमांसकैरदृष्टद्वाराजीवेषु शून्यवादिभिः शून्येचनिखिलकार्य्यजन्मकारणत्वाभ्युपगमादित्यर्थः (अदृष्टाद्वारकेति) जीवादृष्टाद्वारकेत्यर्थः । अनेन विशेषणेन जीवानां निरासः जीवानां निखिलजगदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वानां स्वादृष्टद्वारकत्वादिति भावः ॥

मू०-ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च "यः सर्वज्ञः सर्ववित यस्य ज्ञानमयंतपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते" इत्यादि श्रुतिर्मानम् ॥

Funding by IKS-MoE

शि० म०–ननु जगत्कारणस्य तावदुपादानगोचरापरोक्षज्ञानवत्त्वसद्भावे नानुमानं प्रमाणं तर्काप्रतिष्ठानात् । नच स ईक्षांचक्रे इत्यादिश्रुतिः, तस्याः सर्वगोचरेक्षणे अप्रमाणत्वादित्याशंक्याह (ईश्वरस्येति) यः सर्वज्ञः सामान्याकारेण सर्ववित् विशेषतः यस्य भगवतो ज्ञानमयं तप औपाधिकमीक्षणमिति यावत् । तस्मादीक्षणसहकृतात् कारणाद्ब्रह्मण एतत्कार्य्यं ब्रह्मा हिरण्यगर्भः । नाम-घट इत्यादि, रूपं-शुक्लादि, अन्नं–व्रीहियवादि तदपि व्याकृतं नत्वव्याकृतम् ॥

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ॥
अन्नात्प्राणो मनस्सत्यं लोकाः कर्मसुचामृतम् ॥

इति पूर्ववाक्ये अन्नपदवेदनीयाव्याकृतनामरूपसृष्टेरभिधानात् । 'यः कालकालोगुणी सर्वविद्यः' इत्यादिश्रुतिरादिपदग्राह्या ॥

म० प्र०–(नानुमानंप्रमाणमिति) जगत्कारणं जगदुपादानगोचरापरोक्षज्ञानवच्चेतनत्वे सति कारणत्वात्, यत्र चेतनत्वे सति कारणत्वं तत्रोपादानगोचरापरोक्षज्ञानवत्त्वमिति सामान्यव्याप्तौ कुलालवदित्यनुमानं न प्रमाणमित्यर्थः (तर्काप्रतिष्ठानादिति) उक्तानुमानात्मकतर्कस्य जीवत्वरूपोपाधिमत्त्वेन निर्दोषत्वेन स्थित्यभावादित्यर्थः । सः–ईश्वरः, ईक्षां–दर्शनात्मकेक्षां, तस्याः–उक्तश्रुतेः (सर्वगोचरेति) निखिलकार्योपादानविषयकेत्यर्थः । औपाधिकं–मायारूपोपाधिजन्यम् (तपसेति) तपसामायाजन्येक्षणेन, चीयते–जलेन बीजमिव वर्द्धते, ब्रह्म- अक्षरं ब्रह्म, ततः–उपचितब्रह्मणः, अन्नं–अद्यते भुज्यते. इत्यन्नमव्याकृतं सर्वप्राणिसाधारणभोग्यं. अभिजायते–व्याचिकीर्षितावस्थारूपेणोत्पद्यते । अन्नात्–उक्ताद्व्याचिकीर्षितावस्थातोन्नात् प्राणःहिरण्यगर्भः । जायते इत्यनुषंगः, हिरण्यगर्भात्मनः–संकल्पविकल्पसंशयनिर्णयाद्यात्मकमभिजायते संकल्पाद्यात्मकमनसः, सत्यं–सत्याख्यमाकाशादिभूतपंचकमभिजायते सत्याख्यभूतपंचकादंडोत्पत्तिक्रमेण लोकाः भूरादयो जायंते तेभ्यो लोकेभ्यो मनुष्यादिप्राणिवर्णाश्रमक्रमेण कर्माणि जायंते कर्मसु निमित्तभूतेष्वमृतं कर्मजफलं यावत्कर्माणिकल्पकोटिशतैरपि न विनश्यंति तावत्फलं न विनश्यतीत्यमृतामित्यर्थः । यः–परमात्मा, कालकालः–सर्वनाशकस्यापि कालस्य कालः–स्वकीयापरोक्षैक्यज्ञानद्वारा नाशकः सर्वविद्य इत्यनेनापीश्वरस्योपादानगोचरापरोक्षज्ञानसद्भावः सूचित इति ॥

मू०–तादृशाचिकीर्षासद्भावे च "सोऽकामयत बहुस्यांप्रजायेय" इत्यादि श्रुतिर्मानं तादृशकृतौ च "तन्मनोऽकुरुत" इत्या

दिवाक्यं ज्ञानेच्छाद्यन्यतमगर्भलक्षणत्रितयं विवक्षितम्, अन्यथाव्यर्थविशेषणत्वापत्तेः अत एव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः ॥

शि० म०-(तादृशेति) तदुपादानगोचरेत्यर्थः । एवमग्रेपि (ज्ञानेच्छाद्यन्यतमेति) सकलकार्य्योपादानगोचरापरोक्षज्ञानाश्रयत्वं तादृशचिकीर्षाश्रयत्वं तादृशकृत्याश्रयत्वं चेति लक्षणत्रयं विवक्षितमित्यर्थः । तादृशज्ञानेच्छाकृत्याश्रयत्वस्य ब्रह्मलक्षणत्वे गौरवमित्याह (अन्यथेति) तर्हिस्थितिभंगगर्भमप्येकलक्षणं न स्यादित्याशंकामिष्टापत्त्या परिहरति (अतएवेति) व्यर्थविशेषणत्वादेव । ननु स्थित्यादिगर्भस्यापि न प्रत्येकं लक्षणत्वं स्थित्यनुकूलज्ञानवत्त्वस्येव लक्षणत्वेन शेषवैयर्थ्यादित्याशंक्य ॥

म०प्र०-परममूले (प्रजायेयेति) प्रजारूपेणोत्पद्येयेत्यर्थः । परममूले इत्यादिश्रुतिरित्यत्रादिपदेन तदैक्षतेत्याद्या श्रुतिर्ग्राह्या परममूले इत्यादि वाक्यमित्यत्रादिपदेन सप्राणमसृजतेत्याद्या श्रुतिर्ग्राह्या (तदुपादानेति) निखिलजगदुपादानेत्यर्थः (एवमग्रेपीति) तादृशकृतावित्यत्रापि तादृशपदस्य तदुपादानगोचरेति व्याख्यानं बोध्यमित्यर्थः (तादृशेति) सकलकार्य्योपादानगोचरेत्यर्थः (तादृशज्ञानेच्छाकृत्याश्रयत्वस्येति) सकलकार्य्योपादानगोचरापरोक्षज्ञानाश्रयत्वे सति सकलकार्य्योपादानगोचरचिकीर्षाश्रयत्वे चसति सकलकार्य्योपादानगोचरकृत्याश्रयत्वमित्यस्य. ब्रह्मलक्षणत्वे इत्यर्थः । गौरवम्–शरीरादिकृद्गौरवम् । परममूले (अन्यथेति) लक्षणत्रितयाविवक्षणे सतीत्यर्थः । तर्हि सकलकार्य्यजन्मानुकूलसकलकार्य्योपादानगोचरापरोक्षज्ञानाश्रयत्वं सकलकार्य्यजन्मानुकूलसकलकार्य्योपादानगोचरचिकीर्षाश्रयत्वं सकलकार्य्यजन्मानुकूलसकलकार्य्योपादानगोचरकृत्याश्रयत्वंचेति लक्षणत्रितयविवक्षणे सति (स्थितिभंगगर्भमपीति) सकलकार्य्यस्थितिभंगानुकूलसकलकार्य्यस्थितिभंगोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमित्याकारकस्थितिभंगगर्भमप्येकलक्षणं नस्यात्किंतु षडेव लक्षणानि स्युः । अथवा सकलकार्य्यस्थित्यनुकूलसकलकार्य्यस्थित्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं सकलकार्य्यभंगानुकूलसकलकार्य्यभंगोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति लक्षणद्वयं स्यादित्यर्थः । उक्तलक्षद्वयसिद्धांत्यभिप्रायं मत्वाशंकते (ननुस्थित्यादिगर्भस्येति) अत्रादिपदेन भंगोग्राह्यस्तथाच सकलकार्य्यस्थित्यनुकूलसकलकार्य्यस्थित्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं सकलकार्य्यभंगानुकूलसकलकार्य्यभंगोपादानगोचरापरोक्षज्ञानचिकीर्षा-

Funding by IKS-MoE

कृतिमत्त्वमित्येतयोरपि न प्रत्येकं लक्षणत्वं सकलकार्य्यस्थित्यनुकूलसकलकार्य्यस्थित्युपादानगोचरापरोक्षज्ञानवत्त्वमात्रस्य सकलकार्य्यभंगानुकूलसकलकार्य्यभंगोपादानगोचरापरोक्षज्ञानवत्त्वमात्रस्य च लक्षणत्वसंभवेन शेषयोश्चिकीर्षाकृतिमत्त्वयोर्वैयर्थ्यादित्यर्थः ॥

मू०—एवं च लक्षणानि नव संपद्यंते ब्रह्मणो जगज्जन्मादिकारणत्वे च "यतो वा इमानि भूताति जायंते येन जातानि जीवंति यत्प्रयंत्याभिसंविशांति" इत्यादिश्रुतिर्मानम् ॥

शि० म०—जन्मगर्भलक्षणवत्स्थितिगर्भं लयगर्भं च लक्षणत्रितयमेव विवक्षितं तथाच ब्रह्मणस्तटस्थलक्षणानि नव संपद्यंत इत्याह (एवंचेति) ननु ब्रह्मणो जगज्जन्मकर्तृत्वं न लक्षणं तद्धि सकलकार्य्योपादानविषयापरोक्षज्ञानवत्त्वं सकलकार्य्यानुकूलत्वाविशेषिततादृशज्ञानवत्त्वं वा, नाद्यः कार्य्यानुकूलतादृशज्ञानवत्त्वस्यैव कर्तृत्वव्यवहारप्रयोजकत्वेन तस्य कर्तृत्वाप्रयोजकत्वात्। न द्वितीयः सिद्धांते तादृशज्ञानस्य वृत्तिविशेषरूपतया तस्यापि कार्य्यत्वेन सकलकार्य्यानुकूलत्वाभावात । नहि तदेव तत्प्रतिकारणं तथाच नव लक्षणानीत्यसंगतमित्यपरितोषादाह (ब्रह्मण इति) तथाच मायाभिन्नत्वे सति जगज्जन्महेतुत्वं तत्स्थितिहेतुत्वं तद्विलयहेतुत्वमिति लक्षणत्रयमेव विवक्षितमिति भावः । यद्वा ब्रह्मण्येव जगतो जन्मस्थितिलयोपन्यासात् तस्य जगदुपादानत्वं सूच्यते । तदुक्तं भामत्यां, त्रिभिरस्योपादानत्वं सूच्यते इति तथाच सर्वकार्य्योपादानत्वं ब्रह्मणस्तटस्थलक्षणम्। उपादानत्वं चाकरे एव स्फुटमिति न मायायामतिव्याप्तिरिति भावः ॥

म०प्र०—एतामप्याशंकामिष्टापत्त्यापरिहरति (जन्मगर्भलक्षणवदित्यादिना नवसंपद्यंतेइति) सकलकार्य्यजन्मानुकूलसकलकार्य्योपादानगोचरापरोक्षज्ञानवत्त्वं सकलकार्य्यजन्मानुकूलसकलकार्योपादानगोचरचिकीर्षावत्त्वं सकलकार्य्यजन्मानुकूलसकलकार्य्योपादानगोचरकृतिमत्त्वं सकलकार्य्यस्थित्यनुकूलसकलकार्य्यस्थित्युपादानगोचरापरोक्षज्ञानवत्त्वं सकलकार्य्यस्थित्यनुकूलसकलकार्य्यस्थित्युपादानगोचरचिकीर्षावत्त्वं सकलकार्यस्थित्यनुकूलसकलकार्य्यस्थित्युपादानगोचरकृतिमत्त्वं सकलकार्यलयानुकूलसकलकार्य्यलयोपादानगोचरापरोक्षज्ञानवत्त्वं सकलकार्य्यलयानुकूलसकलकार्यलयोपादानगोचरचिकीर्षावत्त्वं सकलकार्य्यलयानुकूलसकलकार्य्यलयोपादानगोचरकृतिमत्त्वमिति नव लक्षणानिं संपद्यंते इत्यर्थः । तद्धि—सकलकार्य्यजन्म-

Funding by IKS-MoE

कर्तृत्वं हि (सकलकार्य्यानुकूलत्वविशेषिततादृशज्ञानवत्त्वंवेति) सकलकार्य्यजनकत्वे सति सकलकार्य्योपादानविषयकापरोक्षज्ञानवत्त्वं वेत्यर्थः (कार्य्यानुकूलतादृशज्ञानवत्त्वस्यैवेति) कार्य्यजनककार्य्योपादानगोचरापरोक्षज्ञानवत्त्वस्यैवेत्यर्थः तस्य—सकलकार्य्योपादानविषयकापरोक्षज्ञानवत्त्वस्येत्यर्थः। कर्तृत्वाप्रयोजकत्वात्—कर्तृत्वव्यवहाराहेतुत्वात्। तादृशज्ञानस्य—सकलकार्य्यजनकसकलकार्य्योपादानविषयकापरोक्षज्ञानस्य। वृत्तिविशेषरूपतया । मायावृत्तिरूपतया (नहितदेवतत्प्रतिकारणमिति) तदेवसकलकार्य्यजनकमायावृत्तिरूपसकलकार्य्योपादानगोचरापरोक्षज्ञानमेव, तत्प्रति—स्वंप्रतिनकारणं स्वस्य पौर्वापर्य्याभावादित्यर्थः । हेतुत्वं—कर्तृत्वभिन्नकारणत्वमात्रम्, इतीति—अत्रेत्येवेत्यन्वयः । भामत्यां—वाचस्पतिकृतभाष्यटीकायां, त्रिभिः—जन्मस्थितिलयैः, अस्य-ब्रह्मणः उपादानत्वंच—ब्रह्मणउपादानत्वंतु, आकरे—वेदान्तभाष्ये ॥

मू०—यद्वा निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम् उपादानत्वं च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणममानमायाधिष्ठानत्वं वा ॥

शि० म०—ननु जगदुपादानत्वं न लक्षणं तद्धि सकलकार्य्याध्यासाधिष्ठानत्वं तथा सत्यकार्य्यावस्थानं ब्रह्मणोन्यत्रेत्यद्वितीयब्रह्मासिद्धिप्रसंगादित्यपरितोषादाह (यद्वेति) शुक्त्यवच्छिन्ने चैतन्येऽतिव्याप्तिवारणाय निखिलेति, असंभववारणाय जगत्पदं ब्रह्मव्यतिरिक्तपरं, ननु न समवायिकारणत्वमुपादानत्वं समवायानभ्युपगमात्। नापि तदाकारेण परिणममानत्वं मायायामतिव्याप्तेः ब्रह्मणोऽपरिणामित्वेनासंभवाच्चेत्यत आह (उपादानत्वंचेति) तदध्यासाधिष्ठानत्वं तदुपादानत्वं जगत्पदं तु प्रकृताभिप्रायमिति बोध्यम् (जगदाकारेणेति) जगत्पदेनात्रकार्य्यजातं विवक्षितं निखिलपदं चानुषंजनीयम्। तथाच पूर्वोक्तविशिष्टचैतन्येनातिव्याप्तिर्न वासंभवः यद्यपि मायाधिष्ठानत्वमात्रमेव ब्रह्मणो लक्षणमस्तु तस्य “मायिनंतुमहेश्वरम्” इत्यादावीश्वरासाधारणधर्मत्वावगमात् तथापि तेन रूपेण ब्रह्मप्रतिपत्तौ तदन्याधिष्ठानमन्यदिति संभावनायामधिकरणांतरप्रमितस्य जगतो नेहनानास्तीत्यादिना ब्रह्मणि निषेधावगमेपि चत्वरप्रतीतघटवन्मिथ्यात्वानापत्त्याऽद्वैतब्रह्मासिद्धिप्रसंगात्। नच विशिष्टलक्षणेपि जगत्परिणामित्वस्य मायायामेवावगमादुक्तदोषतादवस्थ्यं ब्रह्मगतमायापरिणामस्य जगतः ब्रह्मगतत्वसंभवात्

अत एव शुक्त्यवच्छिन्नचैतन्यनिष्ठाज्ञानपरिणामरूपमपि रजतं तद्गतमेवेति राद्धांतः ॥

म० प्र०—तद्धि—जगदुपादानत्वंहि (अध्यासेति) आरोपेत्यर्थः । तथासति—ब्रह्मणः सकलकार्य्याध्यासाधिष्ठानत्वरूपोपादानत्वस्वीकारे सति (अकार्य्यावस्थानमिति) यथाऽज्ञातशुक्त्यादेरज्ञातशुक्त्याद्यारोपितरजतादिकार्य्याधिष्ठानत्वेप्यज्ञातशुक्त्याद्यकार्य्यं ज्ञातशुक्त्याद्यकार्य्यंव्यावहारिकरजताद्यवस्थानं शुक्त्यादिभ्योऽन्यत्र तथाब्रह्माकार्य्यावस्थानं ब्रह्मणोऽन्यत्र स्यादित्यर्थः । परममूले (यद्वेति) नच यद्वेत्यादिग्रंथेनाद्वितीयब्रह्मासिद्धिरूपदोषनिरासः कथमिति वाच्यम् । वक्ष्यमाणोपादानत्वनिर्वचनेनोक्तदोषनिरासादिति भावः । तदाकारेण—जगदाकारेण (प्रकृताभिप्रायमिति) प्रकृतब्रह्मणोलक्ष्यत्वाज्जगदध्यासाधिष्ठानत्वमुपादानत्वमित्युक्तं वस्तुतस्तु तदधिष्ठानत्वं तदुपादानत्वमित्येवोपादानलक्षणमित्यर्थः । विशिष्टचैतन्ये—शुक्त्यवच्छिन्नचैतन्ये नातिव्याप्तिः—निखिलपदस्यानुषंजनीयत्वेनातिव्याप्त्यभावः । जगदाकारेण परिणममानमायाधिष्ठानत्वरूपोपादानत्वस्य विवक्षितत्वेनासंभवस्याप्यभावः । तस्य—मायाधिष्ठानत्वस्य, तेनरूपेण—मायाधिष्ठानत्वेन रूपेण, तदन्याधिष्ठानमन्यत्—मायान्यप्रपंचाधिष्ठानमन्यत्, विशिष्टलक्षणेपि—जगदाकारेणपरिणममानविशेषणविशिष्टलक्षणेपि (उक्तदोषेति) अद्वैतब्रह्मासिद्धिप्रसंगरूपदोषेत्यर्थः । अतएव—अज्ञानपरिणामस्याज्ञानाधिष्ठानगतत्वसंभवादेव । तद्गतमेव—शुक्त्यवच्छिन्नचैतन्यगतमेव ॥

मू०—एतादृशमेवोपादानत्वमभिप्रेत्य "इदंसर्वंयदयमात्मा" ॥

शि० म०—ननु ब्रह्मणो न निखिलप्रपंचाध्यासाधिष्ठानत्वं तत्र प्रमाणाभावात् । नच पूर्वोक्ता यतोवेत्यादिश्रुतिर्मानमिति वाच्यम् । तस्याः सकलभूतोपादानत्वे प्रमाणत्वेपि ब्रह्मणो निखिलप्रपंचाध्यासाधिष्ठानत्वे प्रमाणाभावादित्यत आह एतादृशमेवेति इदं सर्वमिति बृहदारण्यके श्रूयते इदं ब्रह्मइदं क्षत्रमिमे लोका इमे देवा इमानि भूतानि इदं सर्वं यदयमात्मेति । अस्या अर्थः । यदिदं ब्रह्मादिभूतपर्य्यंतमिदं ब्रह्मेत्यादि पूर्ववाक्योपात्तं तत्सर्वमयमात्मेति अत्र च यः स्थाणुः स पुमानितिवद्ब्रह्मसत्तातिरिक्तसत्ताकप्रपंचनिषेधोऽभिप्रेतः । नचैतावता ब्रह्मण्यध्यस्तत्वं प्रपंचस्य न सिद्ध्यतीतिवाच्यम् । तत्सत्तातिरिक्तसत्ताशून्यत्वस्यैव तदध्यस्तत्वरूपत्वात । अन्यानिरुक्तेः । नचायुर्वैघृतमितिवन्निमित्ततया ब्राह्मणो देवतेतिवदाधारतया आदित्यो यूप इतिवत्सदृशतया वा सामान्याधिकरण्योपपत्तिरिति

वाच्यम् । तत्रैव प्रतिज्ञातस्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विज्ञातमित्यात्मविज्ञानेन सर्वविज्ञानस्य निमित्तादि पक्षे बाधापातादितिभावः ॥

म० प्र०-तत्र-ब्रह्मणो निखिलप्रपंचाध्यासाधिष्ठानत्वे (इदंब्रह्मेति) इदं हि वाक्यं बृहदारण्यकषष्ठाध्यायस्थमैत्रेयीब्राह्मणे स्थितम् । इदंब्रह्म-ब्रह्मपदवाच्यं ब्राह्मणत्वम्, । इदंक्षत्रं क्षत्रपदवाच्यं क्षत्रत्वम्, इमेलोकाः-भूरादयः, इमेदेवाः-इंद्रादयः, इमेवेदाः-ऋगादयः, इमानिभूतानि-पृथिव्यादीनि इदं सर्वमुक्तमनुक्तंच यदयं योयं द्रष्टव्य इति प्रकृतआत्मा स एव न ततः पृथगित्यर्थः (यः स्थाणुरिति) यः-स्थाणुः स्थाणुत्वेन पूर्वं ज्ञातः स पुमान् पुरुषसत्तातिरिक्तसत्ताभाववानित्यर्थः । एतावता-प्रपंचस्य ब्रह्मसत्तातिरिक्तसत्ताकत्वनिषेधेन, आयुरिति-यथाऽऽयुर्वैघृतमित्यत्र घृतस्यायुर्निमितत्वेनायुरायुर्निमित्तंघृतमित्यायुःपदस्य घृतपदेन सामानाधिकरण्यं यथा वा सर्वाहि देवता ब्राह्मणे निवसंतीति वाक्याद्ब्राह्मणानां देवताधिकरणत्वेन ब्राह्मणोदेवतेत्यत्र ब्राह्मणपदस्य ब्राह्मणः ब्राह्मणाधिकरणको देवतेति देवतापदेन सामानाधिकरण्यं यथा वायूपेस्वच्छत्वादिनादित्योयूप इत्यत्रादित्यपदस्यादित्यआदित्यसदृशः यूप इति यूपपदेन सामानाधिकरण्यं तद्वदुक्तबृहदारण्यकवाक्येपि ब्रह्मणः प्रपंचनिमित्तकारणत्वेन प्रपंचाधारत्वेन वा प्रपंचसदृशत्वेन वा इदं सर्वयदयमात्मेति सामानाधिकरण्यमित्यर्थः अत्रघृतस्यायुःसाधनत्वं घृते आयुष्ट्वाहार्य्यारोपे निमित्तं ब्रह्मणो देवताधारत्वं ब्राह्मणे देवतात्वाहार्य्यारोपे निमित्तं यूपे आदित्यसदृशत्वं यूपे आदित्यत्वाहार्य्यारोपेनिमित्तमिति भावः । तत्रैव-बृहदारण्यकेएव (आत्मनीतिं) अरे हे मैत्रेयि, खलु-निश्चयं यथास्यात्तथा दृष्टेऽपरोक्षज्ञाननिवृत्तावरणे आत्मनि सति इदं सर्वं विज्ञातं भवति ननु निश्चयात्मकात्मज्ञानं केन साधनेन भवतीत्याशंक्याह (श्रुतेइत्यादि) श्रुते आगमाचार्य्यवाक्यश्रवणजन्यज्ञानविषये आत्मनि सति, मते-उपपत्त्या मननविषये आत्मनि सतिविज्ञाते-निर्दिध्यासनविषये आत्मनि सति निश्चयात्मकात्मज्ञानं भवतीत्यर्थः ॥

मू०-सच्च त्यच्चाभवत् "बहुस्यां प्रजायेय" इत्यादिश्रुतिषु ब्रह्मप्रपंचयोस्तादात्म्यव्यपदेशः। घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोपि सच्चिदानंदरूपब्रह्मैक्याध्यासात् ॥

शि० म०-तथा (सच्चत्यच्चाभवादिति) तादात्म्यव्यपदेशोपि प्रपंचस्य ब्रह्मण्यध्यासे प्रमाणमित्याह (सच्चेति) पृथिव्यादिस्थूलभूतत्रयमपरोक्षत्वात्-सत् । वाय्वाकाशे परोक्षत्वात् त्यत् । नन्विदं सर्वं यदयमात्मे-

त्यत्र पूर्ववाक्योपात्तानां ब्रह्मक्षत्रलोकदेववेदप्रत्यक्षस्थूलभूतानां सच्चेत्यत्र स्थूलभूतानांब्रह्मण्यध्याससिद्धावप्यव्याकृतनामरूपयोर्नाध्यस्तत्वसिद्धिरित्यस्वरसादाह (बहुस्यामिति) सर्वविकारकारणब्रह्मनिष्ठेक्षणस्य सर्वविकारविषयत्वावश्यंभावेन सर्वकार्य्यपरत्वे बाधकाभावेन च "तदैक्षत बहुस्यां प्रजायेय" इत्यत्र बहुशब्दस्य सर्वकार्य्यपरत्वात् सर्वाध्याससिद्धिरिति भावः । नन्वेवमप्यकार्य्यप्रपंचस्य न ब्रह्मण्यध्यस्तत्वमुक्तवाक्यानां ब्रह्मणि विकाराध्यासे एव प्रमाणत्वादित्यपरितोषादाह (इत्यादिश्रुतिभिर्विति) एकमेवाद्वितीयं नेहनानास्तिकिंचन यत्रत्वस्य सर्वमात्मैवाभूत् ॥

मायामात्रमिदंद्वैतमद्वैतं परमार्थतः ॥

इत्यादिश्रुतय आदिपदग्राह्याः लौकिकाभेदव्यवहारोपि ब्रह्मणि प्रपंचाध्यासे मानामित्याह (घटःसन्निति) ननु इच्छाविषयत्वमिष्टत्वं तच्च घटस्य स्वाभाविकं तज्ज्ञानादेव तद्व्यवहारः नत्वानंदात्मकब्रह्मैक्याध्यासात् । अन्यथा दुःखे सदात्मकब्रह्माभेदव्यवहारात् ॥

म० प्र०—इत्यत्र—इत्यतः । अवश्यंभावेन अवश्यं वक्तव्यत्वेनान्यथासर्वविकारस्योत्पत्तिर्न स्यादिति भावः । सर्वकार्य्यपरत्वे—बहुशब्दस्य सर्वकार्य्यविषयकतात्पर्य्यवत्त्वे, एवमपि—ब्रह्मकार्य्यप्रपंचस्य ब्रह्मण्याध्याससिद्धावपि (एकमेवाद्वितीयमिति) यदि सर्वप्रपंचस्य ब्रह्मण्यध्यासो न स्यात्तदैकमेवाद्वितीयमिति श्रुत्युक्ताद्वितीयत्वं नेहनानास्तिकिंचनेत्यादिश्रुत्युक्तसर्वप्रपंचानिषेधयोर्व्याघातः स्यात् । द्वितीयस्य सत्त्वादिति भावः । मायामात्रमित्यादिस्तु मांडूक्यकारिकात्र श्रुतित्वोक्तिरीश्वरतुल्यैः प्रोक्तत्वादिति, अभेदव्यवहारः—प्रपंचस्य सत्यज्ञानानंदाभेदव्यवहारः । तच्च—इच्छाविषयत्वरूपेष्टत्वम्, स्वाभाविकं—अनागंतुकं ब्रह्मणिघटाद्यध्यासनिमित्तकं न भवतीति यावत्, तज्ज्ञानादेव—घटादिनिष्ठानागंतुकेच्छाविषयत्वरूपेष्टत्वज्ञानादेव । तद्व्यवहारः—घटइष्ट इत्यादिघटादिनिष्ठेष्टत्वादिव्यवहारः (नत्वानंदात्मकब्रह्मैक्याध्यासादिति) घटादेरानंदात्मकब्रह्मणितादात्म्याध्यासान्नेष्टत्वव्यवहार इत्यर्थः । अन्यथा—आनंदात्मकब्रह्मैक्याध्यासात घटादेरिष्टत्वव्यवहारस्वीकारे सति दुःखेसदात्मकब्रह्माभेदव्यवहारात्—दुःखमस्ति दुःखंसदिति दुःखेसदात्मकब्रह्मणस्तादात्म्यव्यवहारात् सत्यानंदयोरभेदाच्चेति शेषः ॥

मू०—नन्वानंदात्मकचिदध्यासात् घटादेरिष्टत्वव्यवहारेदुःखस्यापि तत्राध्यासात् तस्यापीष्टत्वादिव्यवहारापत्तिरीति

चेन्न । आरोपे सति निमित्तानुसरणं नतु निमित्तमस्तीत्यारोपः ॥

शि० म०–दुःखस्यापीष्टत्वापत्तिरिति (नन्विति) दुःखे ब्रह्मगतसत्त्वचित्वाध्यासेप्यानंदत्वाध्यासाभावान्नेष्टत्वव्यवहारः नह्यन्यगतकिंचिद्धर्माध्यासे तद्गतसर्वधर्मस्याध्यास इति नियमोऽस्ति तज्जनकदोषस्य कार्य्योन्नेयत्वादित्याह (नारोपइति) ॥

म० प्र०–परममूले (आनंदात्मकचिदध्यासादिति) घटादेरानंदात्मकचित्तादात्म्याध्यासादित्यर्थः । परममूले (तत्रेति) आनंदात्मकचितीत्यर्थः । परममूले (तस्यापीति) दुःखस्यापीत्यर्थः । सत्त्वचित्त्वाध्यासेपि–सत्त्वचित्त्वसंबंधाध्यासेपि, आनंदत्वाध्यासाभावात्–आनंदत्वसंबंधाध्यासाभावात् (तज्जनकदोषस्यकार्य्योन्नेयत्वादिति) रजताध्यासो दोषजन्यः अध्यासत्वाद्देहे आत्मबुद्धिवदित्यध्यासजनकदोषस्याध्यासरूपकार्य्येणकल्पनादित्यर्थः । अज्ञानमेवात्रमुख्यदोषस्ततसत्त्वादेवमिथ्याघटादिप्रपंचे सत्यत्वादिबुद्ध्युत्पत्तेः नचैवमध्यासस्याज्ञानरूपदोषाधीनत्वाभ्युपगमेऽध्यासरूपकार्य्यवैलक्षण्यं न स्यात्कार्य्यवैलक्षण्यस्यकारणवैलक्षण्याधीनत्वात्कारणस्य चाज्ञानस्यैक्यादिति वाच्यम् । उत्तरोत्तराध्यासंप्रति पूवपूर्वाध्यासजन्यसंस्काराणामसाधारणहेतूनां परस्परवैलक्षण्यात्तत्तत्कार्य्यवैलक्षण्योपपत्तेः । नचैवं तत्तत्संस्काराणामावश्यकत्वादज्ञानवैयर्थ्यमिति वाच्यम् । तत्तद्यवव्रीह्यादिरूपकार्य्यवैलक्षण्याय तत्तद्बीजानामसाधारणहेतूनामावश्यकत्वेपिसाधारणहेतुजलवैयर्थ्याभावमिवाज्ञानवैयर्थ्याभावात् । नचैवं पूर्वपूर्वाध्यासजन्यसंस्काररूपनिमित्तकारणवैलक्षण्येप्यज्ञानरूपोपादानवैलक्षण्याभावादध्यासरूपकार्य्यवैलक्षण्यानुपपत्तितादवस्थ्यं घटपटादिकार्य्याणासुपादानवैलक्षण्येनैव वैलक्षण्यदर्शनादिति वाच्यम् । खंडपटमहापटादौ तंतुरूपोपादानकत्वेपि निमित्तकारणवैलक्षण्येन परैर्वैलक्षण्योपगमाज्ज्ञानेच्छासुखदुःखादिकार्य्याणामात्मादिरूपैकोपादानकत्वेपि मनःसंयोगादृष्टादिरूपनिमितभेदेन नानादिरूपकार्य्यवैलक्षण्यस्य सर्वैरप्युपगमाच्च "अजामेकांलोहितशुक्लकृष्णाम्" इत्यादिवाक्येभ्यो निखिलकार्य्यप्रत्यज्ञानहेतुत्वस्य श्रुतत्वाच्चैवं जनिमारभ्य मातृपित्राद्युपदेशादिकं सादृश्यादिकंच बहुविधाध्यासरूपकार्य्यानुरूपं निमित्तकारणं ग्राह्यम् । विशेषदोषस्तु विशेषकार्य्यान्नेयः । तथाहि यथा रज्जुखंडे कदाचिन्मालाभ्रमः कदाचिद्वक्रदंडभ्रमः कदाचित्सर्पभ्रमस्तत्र रज्जौ मालाभ्रमकाले मंदांधकाररूपनिमित्तकारणेसत्यपि रज्जौ मालाभ्रमकाले कंपादिजनकसर्पाध्यासरूपादिशेषकार्य्याभावदर्शनेन् सर्पाध्यासहेतुपूर्वसर्पाध्यासजन्योद्बुद्धसंस्कारदूरदृष्टत्वादिरूपविशेषदोषाभावः कल्प्यते सर्पभ्रमकालेतूक्तदोषः कल्प्यते ॥

Funding by IKS-MoE

मू०—इत्यभ्युपगमेन दुःखादौ सच्चिदंशाध्यासेपि आनंदांशाध्यासाभावात् जगति नामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसंबंधात् तदुक्तम् ॥

अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकम् ॥
आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयमिति ॥

अथ जगतो जन्मक्रमो निरूप्यते तत्र सर्गाद्यकाले परमेश्वरः सृज्यमानप्रपंचवैचित्र्यहेतुप्राणिकर्मसहकृतः ॥

शि० म०—ननु घटादाविष्टत्वादेर्नाध्यासो युक्तः तत्र प्रतीयमानसर्वधर्मस्य ब्रह्मगतत्वेन तदीयस्वाभाविकधर्माभावात्सर्वत्रांशांतरवत्येवांशांतराध्यासस्य दृष्टत्वादित्याशंक्य प्रपंचस्यास्तिव्यावहारिकमंशद्वयमित्याह (जगतीति) उक्तेर्थे अभियुक्तसंमतिमाह (तदुक्तमिति) ननु परमेश्वरः कर्मसापेक्षः सन् निखिलकार्य्यं करोति निरपेक्षो वा नाद्यः । कर्मणोजगत्कारणत्वे प्रमाणाभावात्, अन्यथा कर्मणैव सृष्ट्युपपत्तौ ईश्वरवैयर्थ्यं नांत्यः विषमसृष्टिंनिर्मिमाणस्य पृथग्जनवद्रागद्वेषापत्तेरित्यत आह (सृज्यमानेति) अयं भावः परमेश्वरः कर्मसहकृत एव जगत्सृष्टिहेतुः, नचात्र प्रमाणाभावः सृष्टेरेवात्र प्रमाणत्वात् । अन्यथा विचित्रकार्य्यानुपपत्तेः तस्य विचित्रकारणजन्यत्वनियमात "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन इत्यादिश्रुतेश्चात एव न विषमसृष्टावीश्वरस्य रागद्वेषापत्तिः व्रीहियवादिसृष्टौ पर्जन्यवज्जगत्सृष्टावीश्वरः साधारणकारणं तत्तद्बीजानीव व्रीहियवादिवैषम्ये कांश्चिदत्यंतदुःखभाजः कांश्चिदत्यंतसुखभाजः करोतीति विषमसृष्टौ जीवगतकर्माण्यसाधारणकारणमिति ॥

म० प्र०—कंपादिजनकसर्पाध्यासरूपकार्य्यदर्शनात्सर्पभ्रमकाले हर्षादिजनकमालाध्यासरूपकार्य्याभावदर्शनेन मालाध्यासहेतूद्बुद्धशुभसंस्काराभावः कल्प्यते । एवमपि सत्त्वाद्यारोपदर्शनेन सत्त्वाद्यारोपहेतुपूर्वसत्त्वाद्यध्यासजन्योद्बुद्धसंस्कारादिकं कल्प्यते । दुःखे आनंदांशाध्यासाभावदर्शनेनोक्तसंस्काराभावादिकं कल्प्यते इत्यलमतिविस्तरेण । परममूले (इत्यभ्युपगमेनेति) एतन्न्यायांगीकारेणेत्यर्थः । परममूले (सच्चिदंशाध्यासेपीति) दुःखादौ सच्चिदंशाध्यासदर्शनेन दुःखादावुत्तरसच्चिदंशभ्रांति-

Funding by IKS-MoE

जनकपूर्वसच्चिदंशाध्यासजन्यसंस्कारसत्त्वेपीत्यर्थः । परममूले (आनंदांशाध्यासाभावादिति) दुःखादावुत्तरानंदांशभ्रांतिजनकपूर्वानंदांशाध्यासाभावेन दुःखादावुत्तरानंदांशभ्रांतिजनकपूर्वानंदांशभ्रांतिजन्यसंस्काराभावाद्दुःखादौनिष्टत्वव्यवहारापत्तिरित्यर्थः । तत्र–घटादिप्रपञ्चे सर्वत्र–सर्वस्मिन्नध्यासाधिष्ठाने, अन्यथा–कर्मणोजगत्कारणत्वस्वीकारे, निर्मिमाणस्य–निर्माणकर्तुरीश्वरस्य, पृथग्जनवत्–श्रेष्ठजनेभ्यः पृथक्चासौ जनः पृथक्जनः पामरस्तद्वत्, अत्र–परमेश्वरस्य कर्मसहकृतत्वे, सृष्टेरेव–विषमसृष्टेरेव अत्रपरमेश्वरस्य कर्मसहकृतत्वे, तस्य–विचित्रकार्य्यस्य, पुण्यः–पुण्यफलसम्यक्देहादिमान्, पापः–पापफलाशोभनदेहादिमान् ॥

सू०–अपरिमितानिरूपितशक्तिविशेषविशिष्टमायासहितः सन्, नामरूपात्मकनिखिलप्रपंचंप्रथमं बुद्धावाकलय्येदं करिष्यामीति संकल्पयति "तदैक्षतबहुस्यांप्रजायेय" इति "सोऽकामयत बहुस्यां प्रजायेय" इत्यादिश्रुतेः तत आकाशादीनि पंचभूतानि अपंचीकृतानि ॥

शि० म०–ननु गोपुरादिमहाकार्य्ये नानाकर्तृत्वदर्शनात् कथमसहायस्येश्वरस्य विचित्रप्रपंचकर्तृत्वमित्यत आह (अपरिमितेति) नन्वावश्यकत्वान्मायैव कर्मसहकृता दधिपरिणामिक्षीरवत् नामरूपाकारेण परिणमतां किमीश्वरेणेत्यत आह (नामरूपेति) यथाहि कुलालो बुद्धावालिख्य नामरूपे तथैव संकल्प्यघट इति नाम्ना रूपेण कंबुग्रीवादिना घटमुत्पादयति तथेश्वरोप्युत्पत्तेः पूर्वं यस्य कार्य्यस्य यन्नामयच्चास्य रूपमंतरेवाकलयति तथैवैतद्वस्तु करिष्यामीति संकलपयाति तथैव करोतीत्यर्थः । तत्र प्रमाणमाह (तदिति) तन्मनोऽकुरुतेत्यादिश्रुतिरादिपदग्राह्या तत इति ईक्षणसंकलपप्रयत्नानंतरमित्यर्थः । (आकाशादीनीति) प्रथममाकाशस्तदनंतरं वायुस्ततस्तेजस्ततो जलं ततः पृथिवीत्येवं क्रमवंति पंचभूतानि अपंचीकृतान्युत्पद्यंते इत्यर्थः । ननु छांदोग्ये तेज आदिका सृष्टिः श्रूयते तत्तेजोऽसृजतेति प्रश्नोपनिषदि प्राणादिका "स प्राणमसृजत" इति ऐतरेयेत्वेकदैव "सइमाँल्लोकानसृजतांभोमरीचीर्मरमापः" इति तथाच सृष्टेः कथमाकाशादित्वमिति चेन्न तावदाकाशादित्वे प्रमाणाभावः तैत्तिरीयके "तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुर्वायोरग्निः अग्नेराप

अद्भ्यः पृथिवी" इति सृष्टेराकाशादित्वस्यावगमात् । नच श्रुत्यंतरविरोधः ऐतरेयेपि गुणोपसंहारन्यायेनात्र श्रुतानां क्रमस्यावश्यंकल्पनीयत्वात् ॥

म० प्र०–(गोपुरेति) नगरद्वारेत्यर्थः । अत्रादिपदेन दुर्गादिमहाकार्य्यपरिग्रहः (नानाकर्तृत्वेति) नानापुरुषनिष्ठकर्तृत्वेत्यर्थः (असहायस्येति) नच कर्मसापेक्षेश्वरस्य विचित्रप्रपंचकर्तृत्वोक्तेः कथमसहायस्येत्युक्तिरिति वाच्यम् । अन्यपुरुषसहायाभावस्य तया विवक्षितत्वादिति, आवश्यकत्वात्–ईश्वरस्यजगत्कारणत्वेपि मायायास्तवमते नियमेन स्वीकारेण मायाया आवश्यकत्वात् । परममूले (बुद्धावाकलय्येति) अविद्यावृत्तिरूपज्ञानाविषयतां नीत्वेत्यर्थः । बुद्धौ–अन्तःकरणे आलिख्य–स्थापयित्वा ज्ञात्वेतियावत् । अस्य–कार्य्यस्य अन्तरेव अविद्यांतरेव । आकलयति–जानाति अविद्यावृत्तिविषयीकरोतीतियावत्, तत्–ब्रह्मकार्य्यक्षममिति मनोविशेषणंवा, एकदैव–युगपदेव, इमान्–वक्ष्यमाणांभ आदीन्, अंभः–द्यौः मरीचीः–अंतरिक्षलोकः, मरं–पृथिवीलोकः, आपः–अधोलोकाः सृष्टेराकाशादित्वे किं प्रमाणाभावः किंवाश्रुत्यंतरविरोधो नाद्यः इत्याह (नतावदिति) नद्वितीय इत्याह (नचश्रुतयंतरविरोधइति) स इमान् लोकानित्यादिश्रुत्यंतरविरोधोपि नेत्यर्थः । उक्तश्रुत्यंतरविरोधाभावेहेतुमाह (ऐतरेयेपीत्यादिना) गुणोपसंहारन्यायेन–वेदान्तवाक्यानामुपासनावाक्यानांचैकवाक्यतासंपत्तये एकस्यां शाखायामनुक्त आनंदादिरूपो गुणः शाखांतरीयवाक्येन ज्ञातव्य इत्यानंदादयः प्रधानस्येत्यादावुक्तोयो गुणोपसंहारन्यायस्तेन अत्र–"तस्माद्वाएतस्मादात्मन आकाशः संभूत" इत्यादि तैत्तरीयश्रुतौ ॥

मू०–तन्मात्रपदप्रतिपाद्यानि उत्पद्यंते ॥

शि० म०–नापि छांदोग्यश्रुतिविरोधः तस्यास्तेजोजनिप्रधानत्वेन श्रुत्यंतरावगताकाशादित्वनिवारणे सामर्थ्याभावात् । एकस्य वाक्यस्य व्यापारद्वयासंभवात् । तत्तेजोऽसृजतेत्यत्राकाशाद्वायुरितिवत् क्रमवाचकशब्दाभावाच्चेति भावः । महाभूतानि पंचैव भूरापोग्निमरुन्नभः तन्मात्राणि च तावंतीति पुराणे महाभूततन्मात्राणामेवावगतेः भूतानि पंच तन्मात्राणि पंच महाभूतानीति महोपनिषद्यपि तथैवावगमात् । कथं तद्व्यतिरेकेणापंचीकृतानामभ्युपगम इत्यत आह (तन्मात्रेति) ॥

म० प्र०–तस्याः छांदोग्यश्रुतेः, तेजोजनिप्रधानत्वेन–तेजआदिभूतोत्पत्तिप्रतिपादनपरत्वन, एकवाक्यस्य–तत्तेजोऽसृजतेत्याद्येकवाक्यस्य (व्यापारद्वयासंभवादिति)

Funding by IKS-MoE

तस्माद्वाएतस्यादात्मन इति श्रुत्यंतरावगताकाशादित्वनिवृत्त्यनुकूलव्यापारस्य तेज आदि भूतोत्पत्तिबोधानुकूलव्यापारस्य चाभावाच्छब्दबुद्धिकर्मणां विरम्यव्यापाराभाव इति न्यायादित्यर्थः । उक्तन्यायवाक्यस्यत्वयमर्थः । घटमानयेति वाक्यमेकदा प्रयुक्तं सद् घटकर्मककृतिसाध्यबलवदनिष्टाननुबंधीष्टसाधनानयनानुकूलकृतिं बोधयित्वा मध्ये विरम्यविश्रांतिं लब्ध्वा पुनरुक्तकृतिविषयकबोधाय न व्याप्रियते किंतु घटमानयेति वाक्यान्तरमेवोक्तकृतिविषयकबोधाय व्याप्रियते पटादिकर्मककृतिसाध्यबलवदनिष्टाननुबंधीष्टसाधनानयनानुकूलकृतिनिवृत्तिरूपार्थान्तरबोधाय वा न व्याप्रियते तद्बोधं न जनयति किंतु पटादिकं नानयेत्यादि वाक्यांतरमेवोक्तार्थांतरं बोधयति अयं घट इतिज्ञानमपि घटं विषयीकृत्य मध्ये विरम्यविश्रांतिं लब्ध्वाऽयं घट इति ज्ञानमेव पुनः घटं न विषयीकरोति किंत्वयं घट इति ज्ञानांतरमेव विषयीकरोति पटादिकं वा नविषयीकरोति किंत्वयं पट इत्यादिज्ञानांतरमेव पटादिकं विषयीकरोति एवं कर्मापि विभागादिद्वारोत्तरदेशसंयोगं जनयित्वा तदेव कर्म मध्ये विरम्यविश्रांतिं लब्ध्वापुनर्विभागादिद्वारोत्तरदेशसंयोगांतरं न जनयति किंतु कर्मान्तरमेवोत्तरदेशसंयोगांतरं जनयतीति महाभूतानि स्थूलभूतानि—तन्मात्राणि—सूक्ष्मभूतानि, तावंति—पंच (भूतानिपंचेति) तन्मात्राणिभूतानिपंचेत्यन्वयः । तन्मात्राणि—सूक्ष्माणि, तथैव—स्थूलसूक्ष्मभूतानामेव (तद्व्यतिरेकेणेति) स्थूलसूक्ष्मभूतभेदविशिष्टेत्यर्थः ।

मू०—तत्राकाशस्य शब्दो गुणः वायोस्तु शब्दस्पर्शौ तेजसस्तुशब्दस्पर्शरूपाणि अपांतु शब्दस्पर्शरूपरसाः पृथिव्यास्तु शब्दस्पर्शरूपरसगंधाः नतु शब्दस्याकाशमात्रगुणत्वं वाय्वादावपि तदुपलंभात् नचासौभ्रमः बाधकाभावात् ॥

शि० म०—यद्यपि तन्मात्रेषु गुणा नोपलभ्यंते तथापि तत्कार्य्येषु गुणदर्शनेन तत्कारणेष्वपि कारणत्वेन गुणानुमानादित्यभिप्रेत्य तत्रासाधारणगुणानाह (तत्रेति) शब्दस्पर्शाविति यद्यपि स्पर्शः साधारणगुणस्तथापि पार्थिववायवीययोरनुष्णाशीतत्वं तैजसाप्ययोरुष्णशीतत्वं एवं रसेपि वैजात्यमनुभवसिद्धमस्तीत्यसाधारण्यं बोध्यं नैयायिकमतं निराकरोति (नत्विति । वाय्वादाविति) प्रत्यक्षवाय्वादावित्यर्थः । तथा तन्मात्रेषु तदनुमानमिति भावः (बाधकाभावादिति) इदमापाततः । जलादावपि गंधोपलंभात् सोपि पृथिवीमात्रगुणो न स्यात् । नचायमौपाधिकः । नियतोपाध्यनुविधानाभा-

Funding by IKS-MoE

वात् । तदंतर्वर्तिपार्थिवभागसंबंधात्तदुपलंभ इति चेद्वाय्वाद्यंतर्वर्तिव्यापकाकाशसंबंधाच्छब्दोपलब्धिरिति तुल्यं, वस्तुतस्तु शब्दस्पर्शरूपरसगंधाश्चैते पृथिवीगुणाः । तेषु गंधहीनाश्चत्वारोऽपां गुणाः । तेषु गंधरसहीनास्त्रयो गुणा अग्नेः । शब्दस्पर्शाविति द्वौ वायोः । शब्द एक आकाशस्येति लौकिकोपनिषद्वचनं शब्दस्य वाय्वादिगुणत्वे मानमिति बोध्यम् ॥

म० प्र० तन्मात्रेषु—सूक्ष्माकाशादिभूतेषु, तत्कार्य्येषु—सूक्ष्मभूतकार्य्यस्थूलाकाशादिभूतेषु (गुणानुमानादिति) स्थूलाकाशादिभूतोपादानकारणसूक्ष्माकाशादिभूतानि स्वकार्य्यस्थूलाकाशादिभूतगुणजातियगुणवंति उपादानकारणत्वाद्यत्रयद्द्रव्योपादानकारणत्वं तत्र स्वोपादेयगुणजातीयगुणवत्त्वं मृदादिवदिति गुणानुमानादित्यर्थः । तत्र—स्थूलाकाशादिभूतेषु, साधारणगुणः—पृथिव्यप्तेजोवायुवृत्तिगुणः (पार्थिववायवीययोरिति) स्पर्शयोरिति शेषः । एवं तैजसाप्ययोरित्यत ऊर्ध्वमपि स्पर्शयोरिति शेषः, उष्णशीतत्वं—उष्णत्वं शीतत्वं च प्रत्यक्षवाय्वादौ स्थूलवाय्वादौ तन्मात्रेषु—सूक्ष्माकाशादिभूतेषु, तदनुमानं—स्थूलाकाशादिभूतोपादानेत्याद्युक्तरीत्या तेषां शब्दादिगुणानामनुमानम् । परममूले (असाविति) वाय्वादिषुशब्दोपलंभ इत्यर्थः । सोपि—गंधोपि, अयम्—जलादावुपलभ्यमानगंधः, औपाधिकः—जलादिवृत्तिपृथिवीसंबंधरूपोपाधिनिमित्तकः, नियतोपाध्यनुविधानाभावात्—अव्यभिचरितोपाधिनिरूपणाभावात् (तदंतर्वर्तीति) जलाद्यंतर्वर्त्तीत्यर्थः । तदुपलंभः—जलादौगंधोपलंभः वस्तुतस्त्विति बोध्यमित्यन्वयः । लौकिकोपनिषत्—लौकिकपदार्थविवेचनप्रधानालोकनाम्ना मुनिना प्रोक्तेतिलौकिकोपनिषत् ॥

मू०--इमानि भूतानि त्रिगुणमायाकार्य्याणि त्रिगुणानि, गुणाः सत्त्वरजस्तमांसि ।एतैश्च सत्त्वगुणोपेतैः पंचभूतैर्व्यस्तैर्यथाक्रमं श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि पंचेंद्रियाणि जायंते एतैरेव सत्त्वगुणोपेतैः पंचभूतैर्मिलितैर्मनोबुद्ध्यहंकारचित्तानि च जायन्ते श्रोत्रादीनां पंचानां क्रमेण दिग्वातार्कवरुणाश्विनोऽधिष्ठातृदेवताः ॥

शि० म०—भूतानां त्रिगुणत्वे हेतुमाह (त्रिगुणमायेति) मायायास्सत्त्वरजस्तमोगुणत्वे ‘अजामेकां लोहितशुक्लकृष्णाम्’ इत्यादिश्रुतिर्मानमित्युक्तमधस्तात् भूतानां सर्वदा गुणत्रयोपेतत्वेपि कार्य्यविशेषजनने कस्यचि-

Funding by IKS-MoE

द्गुणस्याविर्भाव इत्यभिप्रेत्याह (एतैरिति) सत्त्वगुणोपेतैरपंचीकृतैराकाशादिभिरित्यर्थः (मनइति) एकस्याप्यन्तःकरणस्य वृत्तिचातुर्विध्याच्चातुर्विध्यम् । तदुक्तं भागवते ॥

मनोबुद्धिरहंकारश्चित्तमित्यंतरात्मकम् ॥
चतुर्द्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया इति ॥

अत्रमन आदीनां गलांतर्वदनहृदयनाभयः स्थानानि मनसः स्थानं गलांतरं बुद्धेर्वदनमहंकारस्य हृदयं चित्तस्य नाभिरिति शारीरकोपनिषदि श्रवणादिति ध्येयम् (श्रोत्रादीनामिति) नचात्र प्रमाणाभावः । अचेतनानीन्द्रियाणिचेतनाधिष्ठितान्येव कार्य्यं जनयंति अचेतनकारणत्वात् मृद्वदित्यनुमानस्य मानत्वात् । नच जीवेन सिद्धसाधनमनपेक्षितदुर्गंधज्ञानस्योपेक्षिततृणज्ञानस्य च दर्शनात् ॥

म०प्र०—अधस्तात्—पूर्वस्मिन् प्रत्यक्षपरिच्छेदे (गुणत्रयेति) सत्त्वादिगुणत्रयेत्यर्थः वृत्तिचातुर्विध्यात्—संकल्पनिश्चयाभिमानानुसंधानात्मकवृत्तिचातुर्विध्यात् चातुर्विध्यं—संकल्पात्मकवृत्तिमदन्तःकरणं मनः निश्चयात्मकवृत्तिमदन्तःकरणं बुद्धिरभिमानात्मकवृत्तिमदन्तःकरणमहंकारः अनुसंधानात्मकवृत्तिमदन्तःकरणं चित्तमिति चातुर्विध्यम् (मनइति) इदं हि वाक्यं भागवततृतीयस्कंधषडधिकविंशत्यध्यायस्य चतुर्दशश्लोकात्मकम् अन्तरात्मकमन्तःकरणमिति चतुर्धालक्ष्यते नन्वेकस्यान्तःकरणस्य चतुर्धात्वं कथमित्यत आह (भेदइति) लक्षणरूपया व्यवच्छेदकरूपया वृत्त्यान्तःकरणस्य भेद इत्यर्थः । अत्र—मूले अस्येति ध्येयमित्यनेनान्वयः । अत्र श्रोत्राद्यधिष्ठातृदेवतासु । अचेतनकारणत्वात्—अचेतनत्वे सति शब्दाद्युपलब्धिकारणत्वात् जीवेन सिद्धसाधनं—श्रोत्रादीन्द्रियाणां जीवरूपचेतनाधिष्ठितत्वेनानुमाने सिद्धसाधनरूपो दोषः (अनपेक्षितेति) अनाकांक्षितेत्यर्थः । यदि जीवएवेन्द्रियाणां नियंता स्यात्तदा स्वानिष्टदुर्गंधादिज्ञानायेन्द्रियाणां प्रवर्त्तको न स्यात् प्रवर्त्तयतिचेन्द्रियाण्यतो जीवान्य इन्द्रियाणां नियंतानुमानेनसाध्यते इति न सिद्धसाधनमिति भावः ॥

मू०—मन आदीनां क्रमेण चंद्रचतुर्मुखशंकराच्युताधिष्ठातृदेवताः । एतैरेव रजोगुणोपेतैः पंचभूतैर्यथाक्रमं वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि जायंते तेषां च क्रमेण ॥

शि० म०—दिगादिदेवतानां च प्राणिकर्मवशेनान्यत्रापि प्रेरणसंभवात् । तदा श्रोत्रेण कर्णौच दिश इत्यादिभागवतवचनं तत्र प्रमाणं वस्तुतस्तु चक्षुःश्रोत्रघ्राणरसनत्वगिंद्रियाणां क्रमेणादित्यदिक्पृथिवीवरुणवायवोऽ

Funding by IKS-MoE

धिष्ठातृदेवताः सुबालोपनिषदि स्थानानि स्थानिभ्यो नीयंते इत्युपक्रम्य चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतं श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतं नासाध्यात्मं घ्रातव्यमधिमूतं पृथिवी तत्राधिदैवतं जिह्वाध्यात्मं रसयितव्यमधिभूतं च वरुणस्तत्राधिदैवत त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतमित्याम्नानादिति बोध्यम् (चंद्रेति) चंद्रब्रह्मशंकराविष्णवः क्रमेण मन आदीनामधिष्ठातृदेवताः मनोध्यात्मं मंतव्यमधिभूतं चंद्रस्तत्राधिदैवतं बुद्धिरध्यात्मं बोद्धव्यमधिभूतं ब्रह्मा तत्राधिदैवतमहंकारोध्यात्ममहंकर्तव्यमधिभूतं रुद्रस्तत्राधिदैवतं चित्तमध्यात्मं चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतमिति सुबालोपनिषदि श्रुतेः ॥

म०प्र०—अन्यत्रापि—दुर्गंधादावपि (तदाश्रोत्रेणेति) इदं हि वाक्यं: भागवततृतीयस्कंधे षड्विंशत्यध्याये अधिकषष्टिश्लोकात्मकं बोध्यम् । तदा श्रोत्रेण कर्णौच दिशो नोदतिष्ठत्ततो विराडित्यस्य भागवतवचनस्यायमर्थः श्रोत्रेण स्वांशश्रोत्रेन्द्रियेण सहदिशोदिगाख्यादिगभिमानिदेवताः कर्णौ कर्णाख्यगोलके विविशुस्तत इंद्रियैः सहेंद्रियदेवताप्रवेशनादपि तदा विराड् देहरूपो न उदतिष्ठन्नोत्थित एवं चक्षुरादिना सहादित्यादिप्रवेशेप्ययं विराड् नोत्थितोजीवप्रवेशे तूत्थित इति, तत्र—इंद्रियाणां देवतावत्त्वे वस्तुतस्त्विति बोध्यमित्यन्वयः, देवताइतिं—संतीति शेषः आदित्यादिदेवतासत्त्वेहेतुमाह (सुबालोपनिषदीत्यादिना) स्थानिभ्य—इंद्रियेभ्यः; स्थानानि—कर्णादिगोलकानि, नीयंते—देवताभिः प्राप्यंते आदित्यादिदेवताकर्तृकेन्द्रियरूपस्थानिप्रयोज्यप्राप्तिरूपसंबंधाश्रयभूतानि कर्णादिगोलकरूपस्थानानीति वाक्यार्थः(चक्षुरध्यात्ममिति) आत्मनि शरीरे इत्यध्यात्मंचक्षुषोऽध्यात्ममिति संज्ञाद्रष्टव्यस्याधिभूतमिति संज्ञा, तत्र—चक्षुषि अधिदैवतं अधिष्ठातृदेवता एवमुत्तरवाक्येष्वपि बोध्यम्, अहंकर्त्तव्यं—अहंकारविषयदेहादिकं परममूले (श्रोत्रादीनामिति) यद्यपि सुबालोपनिषदि घ्राणेंद्रियस्य पृथिवीदेवतोक्ता तथापि पृथिव्या एवाश्विरूपेणावस्थितत्वान्न विरोध इतिभावः ॥

मू०—वन्हीन्द्रऊपेंद्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः रजोगुणोपेतैः पंचभूतैर्मिलितैः पंचवायवः प्राणापानव्यानोदानसमानाख्या जायंते, तत्र प्राग्गमनवान् वायुःप्राणः, नासादिस्थानवर्ती अर्वाग्गमनवानपानः; पाय्वादिस्थानवर्त्ती ॥

शि०म०—(वह्नीन्द्रेति) वागध्यात्मं वक्तव्यमधिभूतमग्निस्तत्राधिदैवतं हस्तावध्यात्ममादातव्यमधिभूतमिंद्रस्तत्राधिदैवतं पादावध्यात्मं गंतव्य-

मधिभूतं विष्णुस्तत्राधिदैवतम् । पायुरध्यात्मं विसर्जयितव्यमाधिभूतं मृत्युस्तत्राधिदैवतं उपस्थोध्यात्ममानंदयितव्यमाधिभूतं प्रजापतिस्तत्राधिदैवतमिति तत्रैव श्रवणादिति भावः । प्राणं लक्षयति (तत्रेति) ऊर्ध्वगतिमत्त्वं प्राणस्य लक्षणं नचोदानेऽतिव्याप्तिः तस्योत्क्रांतिकाले ऊर्ध्वगतिमत्त्वेपि सर्वदा तदभावात् तस्यैव प्राणलक्षणत्वेन विवक्षितत्वात् । नच प्राणस्योर्ध्वगतिमत्त्वे प्रमाणाभाव इति वाच्यम् । अथ योयमूर्ध्वमुत्क्रामति एष वावस प्राण इति मैत्रेयोपनिषदि तथैव प्राणस्याभिहितत्वादिति भावः । तस्यासाधारणस्थानं नासिकेत्याह (नासेति) वायुः प्राणोभूत्वानासिके प्राविशदित्यैतरेयश्रुतिरत्रमानमन्यथा तदधिष्ठातृवायुदेवताया नासास्थानवर्तित्वं न स्यादिति बोध्यम् । अपानलक्षणमाह (अर्वागिति) तस्यार्वाग्गमनत्वेचाथयोयमर्वाचं संक्रामति एष वावसोपान इति मैत्रेयोपनिषत्प्रमाणमिति भावः (पाय्वादीति) नाभिमारभ्यपायुपर्यंतं तिष्ठतीत्यर्थः । नत्वपानः पायुप्रदेशमात्रवर्ती तथासति मृत्युरपानो भूत्वा नाभिं प्राविशदिति नाभिवर्तिमृत्युदेवताधिष्ठेयत्वप्रतिपादिकैतरेयश्रुतिविरोधापत्तेरिति भावः ॥

म०प्र०–(आनंदयितव्यमिति) आनंदं करोतीत्यानंदयति आनंदयितुं योग्यमित्यानंदयितव्यमानंदं कर्तुं योग्यमित्यक्षरार्थः । विलक्षणक्रियायुक्तौ स्त्रीपुरुषोपस्थेन्द्रियगोलकावानंदं कर्तुं योग्याविति प्रकृतार्थः । तत्रैव–सुबालोपनिषद्येव, तस्य–उदानस्य, उत्क्रांतिकाले–चरमशरीरप्राणवियोगकाले । तदभावात्–ऊर्ध्वगतिमत्त्वाभावात्, तस्यैव–सर्वदोर्ध्वगतिमत्त्वस्यैव, योयमिति–वायुरितिशेषः । ऊर्ध्वं–ऊर्ध्वस्थानं, उत्क्रामति–गच्छतिवावेत्यवधारणे स एष वायुः प्राण एवेति योजना, तथैव–सर्वदोर्ध्वगतिमत्त्वेनैव, तस्य–प्राणस्य, वायुः–महावायुः, प्राणोभूत्वा–शरीरप्रवेशात्पूर्वंव्यापकः सन् परिच्छिन्नोपाधिसंबंधेन परिच्छिन्नो भूत्वा, अत्र–प्राणस्यनासास्थानवत्त्वे, अन्यथा–प्राणस्यनासास्थानानंगीकारे (तदधिष्ठात्रिति) प्राणाधिष्ठात्रित्यर्थः । तस्य–अपानस्य अर्वाचम्–अधःस्थानं, संक्रामति–गच्छति (एषवावेति) अत्रवावपदमवधारणार्थकंसएषवायुरपानएवेति योजना । अपानोभूत्वा–अपानप्रेरकोभूत्वा । यद्वा मृत्युरपानो भूत्वेत्यभेदोक्तिर्मृत्युरूपदेवताया अपानं विनाऽनुपलब्धेरपानस्य च देवतां विना स्वकार्यकरणासामर्थ्यात्तयोरेकलोलीभावेन प्रवेशाभिप्रायेण बोध्या (मृत्युदेवताधिष्ठेयत्वेति) मृत्युदेवतानियम्यत्वेत्यर्थः ॥

मू०–विश्वग्गतिमान् व्यानः अखिलशरीरवर्ती । ऊर्ध्वगमनवानुत्क्रमणवायुरुदानः सकंठस्थानवर्ती अशितपीतान्नादि-

Funding by IKS-MoE

समीकरणकरः समानः नाभिस्थानवर्ती । तैश्च तमोगुणोपेतैरपंचीकृतभूतैः पंचीकृतानि भूतानि जायंते ॥

शि० म०–व्यानलक्षणमाह (विश्वगिति) येनैताः शिरा अनुव्याप्ता एषवाव सव्यान इति तत्रैव श्रवणादिति भावः। उदानं लक्षयति (ऊर्ध्वमिति) ननु ऊर्ध्वगतिमत्त्वं न लक्षणं प्राणस्यापि तथात्वेन तत्रातिव्याप्तेरित्याशंक्योत्क्रमणसमर्थवायुत्वं तेन विवक्षितमित्याह (उत्क्रमणेति) उत्क्रमणंचात्र देहादूर्ध्वगतिर्लोकांतरयात्राभिप्रेता अथैकयोर्ध्व उदानः। "पुण्येन पुण्यलोकं नयति पापेन पापमुभाभ्यां मनुष्यलोकम्" इति प्रश्नोपनिषद्वचनं तस्य लोकांतरगमयितृत्वे प्रमाणमित्यवधेयम् । अथवा पीताशितपानीयान्नाद्युद्गारक्रियाहेतुर्वायुरुदानः। अथयोयं पीतमशितमुद्गिरत्येषवावसउदान इति मैत्रेयोपनिषदस्तत्र प्रमाणत्वादिति भावः (अशितेति) अशितपीतान्नपानीययोः। स्थविष्ठभागं–पुरीषमूत्रोपादानं बहिर्निर्यापयितुमपाने स्थापयति मध्यमं भागं मांसलोहितोपादानं सूक्ष्मंच मनः प्राणोपकारकमंगोपांगेषु समानयति समान इत्यर्थः। अथ योयं स्थविष्ठमन्नं पीतमपाने स्थापयति अणिष्ठं चांगं समानयत्येष वाव स समान इति तत्रैवावगतिः। अयं च सकलांतर्वर्ती अन्यथा सकलांगेष्वशितादिसमीकरणानुपपत्तेरिति भावः । महाभूतोत्पत्तिमाह (तैश्चेति) पंचीकरणेपुराणवाक्यं प्रमाणमिति भावः ॥

म० प्र०–येन–वायुनेतिशेषः, शिराः नाड्यः, तत्रैव–मैत्रेयोपनिषद्येव । परममूले (विश्वगिति) नानाविधासर्वत इति यावत्, नलक्षणं-उदानलक्षणं न भवति तथात्वेन–ऊर्ध्वगतिमत्त्वेन उत्क्रमणेति जीवस्य देहाद्बहिर्गमनेत्यर्थः। तेन–ऊर्ध्वगमनशब्देन् देहादूर्ध्वगतिरित्यस्य व्याख्यानं लोकांतरयात्रेति यात्राच गमनमिति (अथेति) एकया एकशतनाडीनां मध्ये या ऊर्ध्वगासुषुम्नाख्या नाडी तयैकया, उदानः–आपादतलमस्तकं संचरन्नुदानसंज्ञकवायुः। उर्ध्वः–उर्ध्वदेशं प्राप्तः सन्, पुण्येन–शास्त्रविहितकर्मणा । पुण्यलोकं–पुण्यफलदेवादिस्थानं, नयति–प्रापयति, पापेन–शास्त्रनिषिद्धकर्मणा, पापं–पापफलतिर्यग्योन्यादिकं नयति उभाभ्यां–समपुण्यपापाभ्यां मनुष्यलोकं नयतीत्यर्थः । तस्य–उदानस्य । गमयितृत्वे गमनकारयितृत्वे उद्गारक्रियाहेतुः–ऊर्ध्वनयनात्मकच्छर्दक्रियाहेतुः। तत्र–उदानस्योद्गिरंणक्रियाहेतुत्वे, निर्यापयितुं–प्रापयितुं । अपाने–अपानपाय्वादिस्थाने, समानयति–प्रापयति, अंतर्वर्ती–शरीरांतरंगवर्ती, अन्यथा–समानस्य शरीरान्तः सकलांगव-

तिंत्वानंगीकारे, पुराणवाक्यं–स्कांदे ब्रह्मगीतायां पंचीकृत्यशिवाज्ञयेत्यादिवाक्यम् पृथिवीच पृथिवीमात्राच आपश्चापोमात्राच तेजश्च तेजोमात्रा च वायुश्च वायुमात्राचाकाशश्चाकाशमात्राचेत्याथर्वणश्रुतिरपि पंचीकरणे प्रमाणमित्यपि बोध्यमिति ॥

मू०–“तासांच त्रिवृतं त्रिवृतमेकैकां करणाणि” इति श्रुतेःपंचीकरणोपलक्षणार्थत्वात् पंचीकरणप्रकारश्चेत्थम्, आकाशमादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषान्तुचतुर्णामंशानां वाय्वादिषु संयोजनमेवं वायुं द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु योजनम्, एवं तेज आदीनामपि तदेवमेकैकभूतस्यार्द्धं स्वांशात्मकमर्द्धान्तरं चतुर्विधभूतमयमिति पृथिव्यादिषु स्वांशाधिक्यात्पृथिव्यादिव्यवहारः तदुक्तं वैशेष्यात्तुतद्वादस्तद्वाद इति ॥

शि० म०–ननु त्रिवृत्कृतिप्रतिपादकच्छांदोग्यश्रुतिविरोधेन पुराणादिवाक्यात् पंचीकृतिसिद्धिरित्याशंक्य तस्यास्त्रिवृत्कृतिपरत्वेन पंचीकृतिनिवृत्तिपरत्वाभावात् । एकस्य वाक्यस्य व्यापारद्वयाभावादित्यभिप्रेत्याह (तासामिति) ननु पंचतन्मात्रैस्समुदितैरेकमहाभूतोत्पत्तिर्यदि पंचीकरणशब्दार्थस्तदा पंचतन्मात्राणामेकत्रैवोपक्षयान्महाभूतांतरोत्पत्तिर्न स्यात् । तानि भूतानि प्रत्येकं पंचधाविभज्य तद्भूतांशे पंचसमुदायकरणं पंचीकरणमित्यभ्युपगतावेकैकत्र महाभूते पृथिव्यादिपंचव्यवहारापत्तिरित्याशंक्य पंचीकरणप्रक्रियामाह (पंचीकरणप्रकारइति) नन्वस्त्वेकभूतार्धभागे तदितरभूतार्द्धचतुर्थांशानांचतुर्णां संयोजनं पंचीकृतिस्तथापि न व्यवहारसांकर्य्यस्य प्रतीकारइत्यत आह (तदेवमिति) अत्र सूत्रकारसंमतिमाह तदुक्तमिति केचित्तु तेजोबन्नानि त्रीण्येव भूतानि त्रिवृत्कृतानि नतु पंचभूतानि पंचीकृतानि तथासत्याकाशे पार्थिवांशस्यापि भाने रूपवत्त्वेन चाक्षुषत्वापत्तेः । अभाने तद्व्यवहाराभावेन पंचीकृतिवैयर्थ्यात् किंच त्रिवृत्करणमेव युक्तं ‘तासां त्रिवृतं त्रिवृतमेकैकामकरोत्’ इति तस्यवश्रुतत्वान्नतुपंचीकृतिरस्या अश्रवणात् ॥

म० प्र०—तस्याः—त्रिवृत्कृतिप्रतिपादकच्छांदोग्यश्रुतेः (एकस्येति) शब्दबुद्धिकर्मणां विरम्यव्यापाराभाव इति न्यायेनैकवाक्यस्य त्रिवृत्कृतिबोधपंचीकृतिनिषेधबोधानुकूलतात्पर्यरूपव्यापारद्वयाभावादित्यर्थः । समुदितैः—मिलितैः, एकमहाभूतोत्पत्तिः—पृथिव्यादिषु मध्ये यस्य कस्यचिदेकमहाभूतस्य, पंचधाविभज्य—एकैकभूतस्य तुल्यपंचभागं कृत्वा, तद्भूतांशे—पंचधाकृतपृथिव्यादिभूतैकांशे, अत्र—पृथिव्यादिव्यवहारासांकर्ये द्वितीयाध्याये चतुर्थपादस्यांतिमसूत्रंवैशेष्यादित्यादि । ननु सर्वेषां त्रिवृत्करणे विशेषाभावादियं पृथिवीत्यादिवृद्धव्यवहारः कथं स्यादित्याशंक्याह । परममूले वैशेष्यादित्यादिस्तूक्तशंकानिरासार्थः । सर्वेषां पृथिव्यादीनां त्रिवृत्करणाविशेषेपि वैशेष्यात्स्वभागाधिक्यात्तद्वादः पृथिव्यादिवादः संगच्छते इत्यर्थः । तथासति—आकाशादिभूतपंचीकरणांगीकारे सति, तद्व्यवहाराभावेन—पृथिवीत्यादिव्यवहाराभावेन, तासां—तेजोबन्नरूपदेवतानां मध्ये । एकैकं—पृथिव्यादिरूपदेवतां त्रिवृतं त्रिवृतं—त्र्यंशंत्र्यंशं, तस्यैव—त्रिवृत्करणस्यैव. अस्याः—पंचीकृते ॥

मू०--तैश्चापंचीकृतभूतैर्लिंगशरीरम् परलोकयात्रानिर्वाहकंमोक्षपर्यंतं स्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेन्द्रियपंचककर्मेन्द्रियपंचकप्राणादिपंचकसंयुक्तं जायते ॥

शि० म०—तदुक्तं कल्पतरौ ।

संप्रदायाध्वना पंचीकरणं यद्यपि स्थितम् ।
तथापि युक्तदृष्टत्वाद्वाचस्पतिमतं शुभम् ॥
पृथिव्यबनलात्मत्वं गगने पवनेपि चेत् ।
रूपवत्त्वमहत्त्वाभ्यां चाक्षुषत्वं प्रसज्यते ॥
अर्द्धभूयस्त्वतः क्षित्याद्यविभावनकल्पने ।
व्यवहारपथा प्राप्तामुधा पंचीकृतिर्भवेत् ॥
अनपेक्ष्य फलं वेदसिद्धेत्येवेष्यते यदि ।
त्रिवृत्कृतिः श्रुतापंचीकृतिर्नक्वचनश्रुतेति ॥

त्रिवृत्करणप्रकारश्चैवं तेजोबन्नानि त्रीणि भूतानि प्रत्येकं द्विधाविदार्य्य प्रतिभूतमेकैकमर्द्धं द्विधा प्रस्फोटच इतरभूतार्द्धद्वये योजनमिति तन्न । गगनपवनयोः स्वांशाधिक्यात् । नच पृथिव्यबग्न्यंशाविभावनेन रूपवत्त्वाभावः । व्यवहारप्रयोजनाभावाद्व्यर्थपंचीकरणमित्युक्तमिति वाच्यम् । त्रिवृत्करणपक्षे पृथिव्या इवाप्तेजसोर्गंधवत्त्वादिव्यवहाराभावेन दोषसाम्यात् । नच प्रमाणाभावः । तस्योक्तत्वात् । त्रिवृत्कृति-

श्रुतेश्च तन्निवृत्तिपरत्वाभावेनाविरोधस्योक्तत्वात् । तस्मात्सुष्टूक्तं पंचीकृतानि भूताति जायंते इति पांचभौतिकं हि शरीरं तेषां समुदायः शरीरमिति मैत्रेयश्रुतेः । तच्च द्विविधं स्थूलं सूक्ष्मंचेति । तत्र स्थूलं करचरणाद्यवयवोपेतमन्यच्चापंचीकृतपंचभूतैरुत्पद्यत इत्याह (तैश्चेति) ननु परिदृश्यमानस्थूलशरीरेणेव जीवस्य सकलकार्य्यसंभवात किमनेन लिंगशरीरेणेत्यत आह (परलोकेति) स्थूलशरीरस्येहैवभस्मीभावे परलोकयात्रानुपपत्तिस्तन्निर्वाहकं सूक्ष्मांगमवश्यमेष्टव्यमिति भावः । तस्य परलोकयात्रानिर्वाहकत्वेहेतुमाह (मोक्षेति) प्राकृतप्रलयपर्य्यंतं स्थायीत्यर्थः । ननु “सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीत्यादौ सकलकार्य्यलयश्रवणेन लिंगशरीरस्यापि नाशात्कथं कार्य्यब्रह्मविनाशपर्य्यंतस्थायित्वमिति चेत न, ज्ञानशक्तिविशिष्टस्यासत्त्वाभ्युपगमादिति भावः ॥

म० प्र०–संप्रदायाध्वना–प्राचीनाचार्य्यवाक्येन, वाचस्पतिमतम्–त्रिवृत्करणांगीकाररूपवाचस्पतिमतं, शुभं–श्रेष्ठं तत्र हेतुमाह (युक्तिदृष्टत्वादिति) आकाशे पार्थिवांशस्यापि भाने इत्याद्युक्तयुक्तिभिर्निश्चितत्वादित्यर्थः (अविभावनेति) अप्रतीतीत्यर्थः । व्यवहारपथा–आकाशादीनां पंचीकृतिरिति प्राचीनाचार्य्यव्यवहाररूपमार्गेण । अनपेक्ष्यफलं–प्रयोजनं विनैव केचित्त्वित्यादिनोक्तंमतंनिषेधयाति (तन्नेत्यादिना) व्यवहारेति–आकाशादौ पृथिव्याद्यंशव्यवहारेत्यर्थः । तस्योक्तत्वात्–पंचीकरणे पुराणवाक्यं प्रमाणमिति पुराणवाक्यरूपप्रमाणस्योक्तत्वात्, तेषां–पंचभूतानां तच्च–पांचभौतिकशरीरंच, तत्र–शरीरंद्वययोर्मध्ये, अन्यच्च–सूक्ष्मं च (परलोकेति) जीवस्य स्वर्गादिलोकगमनेत्यर्थः । अनुपपत्तिः–असिद्धिः । भवत्यत इतिशेषः तन्निर्वाहकं जीवपरलोकगमनकरम्, सूक्ष्मांगं–सूक्ष्मशरीरं प्राकृतप्रलयेति प्रकृतिभवमहाप्रलयेत्यर्थः । विशिष्टस्य–लिंगशरीरस्येतिशेषः ॥

मू०–तदुक्तम् ॥

पंचप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ॥
अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति ॥

तच्च द्विविधं परमपरंचेति परं हिरण्यगर्भलिंगशरीरं अपरमस्मदादिलिंगशरीरं तत्र हिरण्यगर्भलिंगशरीरं महत्तत्त्वमस्मदालिंगशरीरमहंकार इत्याख्यायते । एवं तमोगुण-

युक्तेभ्यः पंचीकृतभूतेभ्यो भूम्यंतरिक्षस्वर्महर्जनतपःसत्याख्यस्योर्द्ध्वलोकसप्तकस्यातलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्मांडस्य जरायुजांडजस्वेदजोद्भिज्जाख्यानां चतुर्विधस्थूलशरीराणां चोत्पत्तिः । तत्र जरायुजानि जरायुभ्यो जातानि मनुष्यपश्वादीनि शरीराणि अंडजानि अंडेभ्यो जातानि । पक्षिपन्नगादिशरीराणि स्वेदजानि तु स्वेदाज्जातातानि यूका मशकादीनि उद्भिज्जानि तु भूमिमुद्भिद्यजातानि वृक्षादीनि ॥

शि० म०—उक्तावयवोपेतलिंगशरीरेप्रमाणमाह (तदुक्तमिति) लिंगशरीरं विभजते (तच्चेति) परं ब्रह्मांडव्यापि अपरं तदव्यापीत्यर्थः । हिरण्यगर्भलिंगशरीरस्य महत्तत्त्वव्यपदेशस्तस्य परत्वे प्रमाणमन्यथा शास्त्रादौ हिरण्यगर्भलिंगशरीरं महत् तदितरजीवलिंगशरीरमहंकारमात्रमिति व्यपदेशो न स्यादित्याह (तत्रेति एवंतमोगुणयुक्तेभ्यइति) तस्मात्तमः संजायते तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निः अग्नेरापः अद्भ्यः पृथिवीति तदंडं समभवत । संवत्सरमात्रमुषित्वा द्विधा अकरोदधस्ताद्भूमिमुपरिष्टादाकाशमिति सुबालोपनिषद्वचनं ब्रह्मांडस्य तमोगुणयुक्तोत्पन्नत्वे प्रमाणमत्र च भूम्याकाशशब्दयोरधोलोकसप्तकोर्ध्वलोकसप्तकपरत्वात् । अत एव संन्यासविधायिन्यारण्यश्रुतिरपि भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोकंचातलपातालवितलसुतलतलातलरसातलमहातलंब्रह्मांडंच विसर्जयेदिति चतुर्दशभुवनात्मकं ब्रह्मांडमाहेति भावः ॥

म० प्र०—महत्तत्त्वव्यपदेशः—हिरण्यगर्भलिंगशरीरं महत्तत्त्वमिति हिरण्यगर्भलिंगशरीरेमहत्तत्त्वव्यवहारः । तस्य—हिरण्यगर्भलिंगशरीरस्य, अन्यथा—हिरण्यगर्भलिंगशरीरस्य परत्वानंगीकारे, शास्त्रादौ—शारीरकादौ । तस्मात्—ईक्षणविशिष्टपरमेश्वरात् । तमः—महत्तत्वं, तमसः—महत्तत्वात्, भूतादिः—अहंकारः तमोगुणयुक्तापंचीकृताकाशादिभूतपंचकेन पंचीकरणद्वारा ब्रह्मांडोत्पत्तिमभिप्रेत्याह (तदंडंसमभवदिति) तत्—तस्मादपंचीकृतभूतपंचकादंडं ब्रह्मांडं समभवदजायत स्वनिर्मितांडे परमेश्वरः संवत्सरमात्रं वर्षपर्यंतमेवोषित्वावासं कृत्वाडं द्विधाऽकरोत् कृतवान् । द्विधाविभागमेवाह

दित्यत आह (तस्याइति) सुषुप्तिकाले सकले विलीने इति कैवल्योपनिषदि तत्काले सकलकार्य्यविलयस्य श्रवणादिति भावः।ननु सुषुप्तिकालस्य सकलकार्य्यप्रविलयाधारत्वे धर्माधर्मयोः स्मृतिहेतुसंस्कारस्य च तदाविनाशेन सुप्तोत्थितस्य सुखदुःखानुभवो घटादिस्मृतिश्च न स्यादित्यत आह (धर्माधर्मेति) ॥

म० प्र०–तस्य–हिरण्यगर्भस्य मूर्त्तित्रयांतर्भावेन मूर्त्तित्रयान्यतमांतर्भावेन । तत्र–हिण्यगर्भस्य मूर्तित्रयादन्यत्वे । परममूले (सवैइति) यो ब्रह्माहिरण्यगर्भोऽग्रे मन्वादिसृष्टेः प्राक्, समवर्त्तत–अजायत, स–हिरण्यगर्भः, प्रथमःशरीरी–प्रथमो जीव उच्यते स एव पुरुषः स एव भूतानांआदिकर्तोच्यते इत्यर्थः । अत्र हिरण्यगर्भस्य प्रथमशरीरित्वश्रवणेन जीवत्वावधारणान्मूर्तित्रयादन्यत्वमवगम्यते इति भावः । तस्य–हिरण्यगर्भस्य, तदन्यत्वे–मूर्त्तित्रयान्यत्वे, मंत्रवर्णंच–अतिरोहितार्थकमंत्ररूपवेदभागंच । तत्र–स्थितौ (सकलकार्य्यनाशइति) सकलकार्य्यनाशत्रैलोक्यमात्रनाशान्यतरनाश इत्यर्थः । अतो नैमित्तकप्रलये नाव्याप्तिः मूले नित्य इति लक्ष्यनिर्देशः लक्षणबोधकप्रलयसुषुप्तिशब्दौ सुषुप्तिकालीनप्रलयपरौ तथाच सुषुप्तिकालीनप्रलयो नित्यप्रलय इत्यर्थमभिप्रेत्याह (प्रतिदिनमिति) नित्यः नित्यप्रलयः । लक्ष्ये लक्षणं योजयति (सुषुप्तिकालीनश्चेति) तथा–नित्यप्रलयः । तत्काले–सुषुप्तिकाले, तदा–सुषुप्तिकाले ॥

मू०–तदा कारणात्मनावस्थानं । तेन सुप्तोत्थितस्य न सुखदुःखाद्यनुपपत्तिः नवा स्मरणानुपपत्तिः नच सुषुप्तावन्तःकरणस्य विनाशेन तदधीनप्राणादिक्रियानुपपत्तिः वस्तुतः श्वासाद्यभावेपि तदुपलब्धेः पुरुषांतरविभ्रममात्रत्वात् । सुषुप्तशरीरोपलंभवत् । नचैवं सुप्तस्य परेतादविशेषः । सुप्तस्य हि लिंगशरीरं संस्कारात्मनात्रैव वर्त्तते । परेतस्य तु लोकांतर इति वैलक्षण्यणात् । यद्वा अन्तःकरणस्य द्वे शक्ती ज्ञानशक्तिः क्रियाशक्तिश्चेति तत्र ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाशो न क्रियाशक्तिविशिष्टस्येति ॥

शि० म०–(कारणात्मनेति) अविद्यात्मनेत्यर्थः । ननु धर्मादिवदन्तःकरणस्याविद्यात्मनावस्थितत्वेन स्वरूपेण विनाशाच्छ्वासादिक्रियानुपपत्तिरित्याशंक्य निराकरोति (नचेति) किं सुषुप्तौ क्रियानुपपन्ना

तदुपलब्धिर्वा नाद्यः । इष्टापत्तेः नाद्वितीय इत्याह (वस्तुतइति) एवं सति सुषुप्त्युत्क्रांत्योर्भेदो न स्यादित्याशंक्य निराकरोति (नचैवमिति । संस्कारात्मनेति) नाशाख्यसंस्काराविद्यात्मनेत्यर्थः । ननु सुषुप्तौ सकलकार्य्यलयाभ्युपगमे सुप्तोत्थितस्य धर्मादिविनाशे सुखाद्यनुपपत्तिर्दुर्वारा कारणात्मनावस्थानमिति चेत् किमविद्यात्मनावस्थानं कारणात्मनावस्थानमित्यनेन विवक्षितमुतधर्मादेरपि स्वकार्य्यकारणत्वेन स्वरूपेणावस्थानम् । आद्ये धर्मादिकारणमाविद्यैव तदावर्तते इत्यर्थः स्यात् । तथाच सुखादिकारणधर्माद्यभावादुक्तदोषतादवस्थ्यं द्वितीये सकले विलीने इति श्रुतिविरोधः । अन्तःकरणस्यापि स्वरूपेणावस्थाने श्वासोपलब्धेर्भ्रमत्वप्रतिपादनविरोधश्चेत्यस्वरसादाह (यद्वेति । शक्तीइति) शक्तिः-सामर्थ्यं तच्च फलोपधानं विवक्षितं न स्वरूपयोग्यत्वं तस्य सर्वदा सत्त्वेन ज्ञानशक्तिविशिष्टान्तःकरणस्य सुषुप्तौ विनाश इत्युत्तरग्रंथविरोधात् ॥

म० प्र०-(सुषुप्त्युत्क्रांत्योरिति) उत्क्रांतिश्चात्र देहजीववियोगरूपाग्राह्या । परममूले (सुषुप्तशरीरोपलंभवदिति) यथा सुषुप्तिकाले सुप्तस्य ममेदं शरीरमिति शरीरादिसंबंधाध्यासाभावेन सुषुप्तदृष्ट्या शरीरादेरभावात्सुप्तस्य शरीरेऽन्यस्योपलंभो भ्रमात्मकस्तद्वदित्यर्थः । इदं च दृष्टिसृष्टिवादाभिप्रायेणेति ध्येयमिति परममूले (परेतादिति) मृतादित्यर्थः (नाशाख्यसंस्काराविद्यात्मनेति) यथा-दर्दुरस्य पृथिव्यां तिरोभावाख्यसंस्काररूपपृथिव्यात्मनावस्थानं तथालिंगशरीरस्यापि तिरोभावाख्यसंस्काररूपाविद्यात्मनावस्थानमित्यर्थः । अनेन-कारणात्मनावस्थानमिति शब्देन, स्वकार्य्यकारणत्वेन-धर्मादिकार्य्यसुखादिकारणत्वेन तदा-सुषुप्तौ (उक्तदोषेति) सुप्तोत्थितस्य सुखाद्यनुपपत्तिरूपदोषेत्यर्थः । परममूले (ज्ञानशक्तिरिति) ज्ञानाद्यनुकूलसामर्थ्यमित्यर्थः । परममूले (क्रियाशक्तिरिति) प्राणादिक्रियानुकूलसामर्थ्यमित्यर्थः । तच्च-सामर्थ्यंच, फलोपधानं-ज्ञानादिफलसंबंधरूपम्. स्वरूपयोग्यत्वम्-अन्तःकरणत्वरूपकारणतावच्छेदकधर्माक्रांतत्वरूपम्, तस्य-उक्तस्वरूपयोग्यत्वस्य ॥

मू०-प्राणाद्यवस्थानमविरुद्धं "यदासुप्तःस्वप्नं न कंचनपश्यति अथास्मिन्प्राणे एकधा भवति अथैनं वाक् सर्वैर्नामभिः सहाप्येति" "सता सोम्य तदा संपन्नो भवतिस्वमपीतो भवति" इत्यादिश्रुतिरुक्तसुषुप्तौमानम् ॥

शि० म०–(प्राणादीति) अत्रादिपदेन सावयवलिंगशरीरधर्माधर्मसंस्काराणां परिग्रहः । नच धर्मादेरपि कथं स्वरूपेणावस्थानमन्यथा सुषुप्तिकाले सकले विलीने इति श्रुतिविरोधापत्तेरिति वाच्यम् । धर्मादिकार्य्यस्य सुखादेर्विनाशेन तस्य कार्य्यविशिष्टकारणनाशपरत्वात् । अत एव कैवल्योपनिषदि पुनश्च जन्मान्तरकर्मयोगात्, स एव जीवः स्वपिति प्रबुद्ध इतिं तदुत्तरवाक्यं संगच्छते। अन्यथा कारणस्य धर्मादेः स्वरूपेण विनाशेन तद्विरोधापत्तेः । अत एव मांडूक्योपनिषदि "यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तम्' इति निर्वचनम् । अत एवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेदेति बृहदारण्यश्रुतिरपि, सुषुप्तौ सकलकार्य्यविलये कौशीतकश्रुतिप्रमाणमाह (यदेति) तत्र च्छांदोग्यश्रुतिं प्रमाणयति (सतासोम्यैति) ॥

म० प्र०–अत्र–मूले अन्यथा–धर्मादेः स्वरूपेणावस्थानस्वीकारे, तस्य–सुषुप्तावुक्तसकलकार्य्यलयबोधकश्रुतिवाक्यस्य, कार्य्यविशिष्टकारणनाशपरत्वात्–सुखादिकार्य्यविशिष्टधर्मादिकारणलयपरत्वात्, अतएव–सुषुप्तिकाले सकलकार्य्यलयबोधककैवल्योपानिषद्वाक्यस्य कार्य्यविशिष्टकारणनाशपरत्वादेव (तदुत्तरेति) सुषुप्तिकाले इत्यादिवाक्योत्तरेत्यर्थः । अन्यथा–सुषुप्तिकाले इत्यादिकार्य्यलयबोधकवाक्यानां कार्य्यविशिष्टकारणनाशपरत्वानंगीकारे किन्तु स्वरूपेण नाशपरत्वस्वीकारे, तद्विरोधापत्तेः–पुनश्च जन्मांतरकर्मयोगादित्यादि वाक्यविरोधापत्तेः, अतएव–कार्य्यलयबोधकवाक्यस्य कार्य्यविशिष्टकारणनाशपरत्वादेव, यत्र–यस्मिन्कालेसुप्तः उपरतेन्द्रियग्रामः न कंचनकामं कामयते कमपि पुण्यपापहेतुभूतपुत्रक्षेत्रादिकं नाभिलषति, नकंचनस्वप्नंपश्यति–कमपि शुभमशुभं वासनाविलासं नावलोकयति, तत्–कामाकामनस्वप्नानवलोकनरूपं सुषुप्तं गाढनिद्राप्राप्तिस्थानं निर्वचनं संगच्छते इति शेषः । अतएव–कार्य्यलयबोधकवाक्यस्य कार्य्यविशिष्टकारणनाशपरत्वादेव ('यत्रेति) नकामयते इत्यादेरिच्छादिरूपकार्य्याभावपरत्वेन स्वरूपेण पदार्थनाशपरत्वामिति भावः । प्राज्ञेनात्मना–ज्ञानस्वरूपब्रह्मणा, संपरिष्वक्तः–अभिन्नः न बाह्यं किंचन वेदेत्यस्य वेदनरूपकार्याभावपरत्वामिति भावः (श्रुतिरपीति) अस्याग्रे संगच्छते इति शेषः । परममूले (अथेति) अथसुषुप्तिकालेस्मिन्प्राणेंतर्यामिरूपे ब्रह्मणि, एकधा–भिन्नः अथ सुषुप्तिकाले एनं प्राणरूपांतर्यामिणमित्यर्थः परममूले (सतेति) हेसोम्य तदा सुषुप्तिकाले, सता–सद्रूपब्रह्मणा सह संपन्नो–अभेदंगतो पुरुषो भवति स्वमपीतो भवति अत्र स्वशब्देन सच्छब्दवाच्यात्मा परामृश्यते तथा च स्वं

स्वं प्रति सच्छब्दवाच्यात्मनि, अपीतोभवति–लीनोभवति तिरोहितोपाधिर्भवतीत्यर्थः । सति संपद्य न विदुरित्याद्या श्रुतिरादिपदग्राह्या ॥

मू०–प्राकृतप्रलयस्तु कार्य्यब्रह्मविनाशनिमित्तकः सकलकार्य्यनाशः यदातु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्य्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परममुक्तिः तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणासह विदेहकैवल्यम् ॥

ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥
परस्यान्ते कृतात्मानः प्रविशंति परं पदम् ॥

इतिश्रुतेः एवं तल्लोकवासिभिः सह कार्य्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्मांडांतर्वर्तिनिखिललोकतदन्तर्वर्तिस्थावरादीनांभौतिकानां भूतानांच प्रकृतौ मायायां लयो नतु ब्रह्मणि बाधरूपविनाशस्यैव ब्रह्मनिष्ठत्वात् अतःप्राकृतलय इत्युच्यते ॥

शि० म०–(प्राकृतेति) प्रकृतौ मायायां भवः प्राकृतप्रलय इत्यर्थः । नचसौषुप्तिकप्रलयेऽतिव्याप्तिः । तदाप्युखाद्रिविनाशस्यान्तःकरणनिष्ठत्वादिति भावः (तल्लोकवासिनामिति) सत्यलोकवासिनामित्यर्थः । यद्यपि कार्य्यब्रह्मविनाश एव प्रकृतोपयोगी तथापि तत्प्रमाणत्वेन वक्ष्यमाणवचनेन कृतात्मान इति पदमुत्पन्नब्रह्मसाक्षात्कारवत्परं 'प्रविशंति' पदं च विदेहकैवल्यपरं नतु लोकांतरावाप्तिपरमिति दर्शयितुं तदभिधानमिति बोध्यम् । नन्वयं प्रलयो न प्राकृतः ब्रह्मनिष्ठत्वादित्याशंक्य मायानिष्ठ एवायं प्रलयः । परिणाम्युपादानकालीननाशस्य तन्निष्ठत्वाभ्युपगमात । सत एव घटादिनाशो मृत्पिंडादिनिष्ठ इत्यभिप्रेत्याह (नन्विति । बाधेति) इदं च नाशस्य ब्रह्मान्यत्वमभ्युपेत्योक्तं वस्तुतस्तु बाधोपि न ब्रह्मनिष्ठः । तस्याधिष्ठानावशेषत्वादिति बोध्यम् ॥

म० प्र०–परममूले (प्रागेवेति) प्रलयात्पूर्वमेवेत्यर्थः । परममूले (ब्रह्मणेति) परस्य–हिर[illegible]र्भस्यांते मुक्तिसमये, प्रतिसंचरे–प्राकृतप्रलयसंप्राप्तेसति, कृतात्मानः–

Funding by IKS-MoE

साक्षात्कृतात्मानः सत्यलोकवासिनः सर्वे ब्रह्मणा सह परमं पदं ब्रह्म प्रविशंति—प्राप्नुवंतीत्यर्थः । ननु प्राकृतप्रलयनिरूपणाय कार्य्यब्रह्मविनाशस्यैवोपयोगित्वेन तदेत्यारभ्य विदेहकैवल्यमित्यंतग्रंथो व्यर्थ इत्याशंक्याह (यद्यपीत्यादिना) तत्प्रमाणत्वेन—प्राकृतप्रलये प्रमाणत्वेन, वक्ष्यमाणवचनेन—ब्रह्मणा सहेत्यादिवक्ष्यमाणवाक्येनेति दर्शयितुं, तदभिधानं—तदेत्यारभ्य विदेहकैवल्यमित्यंतग्रंथाभिधानमित्यर्थः । तन्निष्ठत्वाभ्युपगमात्—परिणाम्युपादानवृत्तित्वस्वीकारात्, अतएव—परिणाम्युपादानकालिकनाशस्य परिणाम्युपादानवृत्तित्वाभ्युपगमादेव परममूले, बाधरूपविनाशस्यैवेति—उपादानेन सह कार्य्यनाशस्यैवेत्यर्थः । इदंच—बाधरूपनाशस्यैव ब्रह्मनिष्ठत्वाभिधानं च, ब्रह्मान्यत्वं—भावाद्वैतमते नाशस्य ब्रह्मधर्मत्वाद्ब्रह्मान्यत्वम् ॥

मू०—कार्यब्रह्मणोदिवसावसाननिमित्तकस्त्रैलोक्यमात्रप्रलयोनैमित्तिकप्रलयः ब्रह्मादिवसश्चतुर्युगसहस्रपरिमितकालः चतुर्युगसहस्राणि ब्रह्मणोदिनमुच्यते ॥

इति वचनात् प्रलयकालः दिवसकालपरिमितः रात्रिकालस्य दिवसतुल्यत्वात् प्राकृतप्रलये नैमित्तिकप्रलयेच्च पुराणवचनानि प्रमाणानि ॥

द्विपरार्द्धेत्वतिक्रांते ब्रह्मणः परमेष्ठिनः ॥
तदा प्रकृतयः सप्त कल्प्यंते प्रलयायहि ॥
एषः प्राकृतिको राजन् प्रलयो यत्र लीयते ॥

इति वचनं प्राकृतप्रलये मानम् ॥

एषनैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ॥
शेतेऽनंतासने नित्यमात्मसात्कृत्य चाखिलम् ॥

इति वचनं नैमित्तिके प्रलये मानं तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारानिमित्तकः सर्वमोक्षः| सचैकजीववादे युगपदेव नानाजीववादे क्रमेण| 'सर्वेएकीभवंति, इत्यादिश्रुतेः| तत्राद्यास्त्रयोपिप्रलयाः कर्मोपरमनिमित्ताः| तुरीयस्तु ज्ञानोदयनिमित्तोऽज्ञानेन सहैवेति विशेषः| एवं [illegible]लयो

Funding by IKS-MoE

निरूपितः तस्येदानीं क्रमो निरूप्यते भूतानां भौतिकानां च न कारणलयक्रमेण लयः ॥

शि० म०–नैमित्तिकप्रलयं निरूपयति (कार्य्यब्रह्मणइति त्रैलोक्यमात्रेति) सत्यलोकतदंतर्वर्त्तिकार्य्यव्यतिरिक्तसकलकार्यविनाश इत्यर्थः । तुरीयश्चतुर्थः । सर्वमोक्ष इति सर्वकार्य्यविनाश इत्यर्थः । ननु मोक्षस्यापि प्रलयत्वेनैमित्तिकादिप्रलयाविशेषापत्तौ तद्वदेव मोक्षस्य पुरुषार्थत्वं न स्यादित्यत आह (तत्रेति) तथाच मोक्षस्यानर्थहेत्वविद्यानिवृत्तिरूपत्वात् पुरुषार्थत्वमिति भावः। जन्मवल्लयस्यापि क्रमाकांक्षत्वात्तत्क्रमनिरूपणं प्रतिजानीते (तस्येति) तर्ह्युत्पत्तिक्रम एव प्रलयेप्यस्तु नतु विपरीतक्रमः । क्लृप्तत्वादित्यत आह (भूतानामिति) ॥

म०प्र०–परममूले (त्रैलोक्येति) भूरादिलोकत्रयेत्यर्थः । परममूले (अनंतासनेइति) शेषरूपशय्यायामित्यर्थः । आत्मसात्–स्वाधीनीकृत्य तद्वदेव नैमित्तिकादिप्रलयवदेव, तथाच–तुरीयप्रलयस्य ज्ञानोदयनिमित्तकत्वेन नैमित्तिकप्रलयादिभ्यो वैलक्षण्ये सति (तत्क्रमेति) प्रलयक्रमेत्यर्थः । तर्हि–प्रलयक्रमस्य निरूपणीयत्वे सति (उत्पत्तिक्रमएवेति) यथा मायोपाधिकब्रह्मण आदावाकाशस्योत्पत्तिः पश्चादाकाशभावापन्नाद्ब्रह्मणः क्रमेण वाय्वादीनामुत्पत्तिस्तथा प्रथमं ब्रह्मण्याकाशस्य लयः पश्चादुत्पत्तिक्रमेणैव वाय्वादीनां लय इत्येव क्रमः प्रलयेऽप्यस्त्वित्यर्थः (विपरीतेति) प्रथमं पृथिव्या अप्सु लयोऽपांतेजसीत्यादिः विपरीतक्रम इत्यर्थः । क्लृप्तत्वात्–उत्पत्तिक्रमस्य प्रसिद्धत्वात् ॥

सू०–कारणलयसमये कार्य्याणामाश्रयमंतरेणावस्थानानुपपत्तेः । किंतु सृष्टिक्रमविपरीतक्रमेण तत्तत्कार्य्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकतयोपादाननाशस्याप्रयोजकत्वात् अन्यथान्यायमतेपि महाप्रलये पृथिवीपरमाणुगतरूपगंधरसादेरविनाशापत्तेःतथाच पृथिव्या अप्सु अपांतेजसि तेजसोवायौ वायोराकाशे आकाशस्य जीवाहंकारे तस्य हिरण्यगर्भाहंकारे तस्य चाविद्यायामित्येवं रूप एव प्रलयः ॥

शि० म०–उत्पत्तिक्रमस्यांगीकारे बाधकमाह (कारणेति । आश्रयमंतरेणेति) नच विनश्यदवस्थायामाश्रयमंतरेणैवावस्थानमत एवाना-

श्रिता अवतिष्ठंत इति न्यायसिद्धांत इति वाच्यम् तथासति सर्वदानिराश्रयत्वापत्तेः । ननु क्रमांतराभावादगत्या स एव क्रमः कल्प्यते इति चोदयति (किंत्विति) तदभावोऽसिद्ध इत्याह (सृष्टीति) नन्वाश्रयनाशानंतरमेव कार्य्यनाशः तस्यैव तद्धेतुत्वादित्यत आह (तत्तत्कार्येति) अयंभावः न तावदाश्रयनाशमात्रं हेतुः पाकरक्तघटे श्यामनाश आत्मनि गुणनाशश्च न स्यात् । नचाश्रयनाशः कार्य्यद्रव्यनाशे हेतुः द्व्यणुकनाशाभावप्रसंगात, नच तत्रासमवायिकारणनाशाद्व्यणुकनाशः आत्मनि पाकरक्ते घटे च विरोधिगुणाविभावाद्गुणनाश इति न दोष इतिवाच्यम् । अननुगमात कार्य्यजनकादृष्टनाशस्यानुगतस्यतत्तत्कार्य्यनाशजनकत्वसंभवेनाननुगमस्यान्याय्यत्वादिति अदृष्टनाशस्य कारणत्वानंगीकारे बाधकमाह (अन्यथेतिं) सिद्धांते परमाणोरनभ्युपगमादाह (न्यायमतेपीति) तथाचादृष्टनाशस्य सत्त्वात्स एव सर्वत्र प्रयोजकं इतिभावः ॥

म०प्र०-अतएव-आश्रयं विनैवाश्रितकार्य्यावस्थानसंभवादेव, अनाश्रिताः आश्रयरहिताः संतः, अवतिष्ठंते-आश्रयनाशोत्तरकाले आश्रितकार्य्याणां परैर्नाशाभ्युपगमादाश्रयनाशक्षणोत्तरक्षणावस्थानवंत आश्रितपदार्था भवंति । तथासति-आश्रयनाशोत्तरक्षणेकार्य्याणामाश्रयं विनावस्थानाभ्युपगमे । स एव-उत्पत्तिक्रमएव, तदभावः-उत्पत्तिक्रमात्क्रमांतराभावः । तस्यैव-आश्रयनाशस्यैव, तद्धेतुत्वात्-कार्य्यनाशहेतुत्वात् । तत्र-द्व्यणुके । दोषः-आत्मादौ गुणनाशाभावरूपो दोषः (अननुगमादिति) त्र्यणुकादिनाशत्वावच्छिन्ननाशं प्रत्याश्रयानाशस्य हेतुत्वं द्व्यणुकनाशत्वावच्छिन्ननाशं प्रत्यसमवायिकारणनाशस्य हेतुत्वं योग्यविभुगुणनाशत्वावच्छिन्ननाशं प्रति पाकरक्तघटे पूर्वगुणनाशत्वावच्छिन्ननाशं प्रति च विरोधिगुणोत्पत्तेर्हेतुत्वमिति कार्य्यतावच्छेदककारणतावच्छेदकयोरेकरूपत्वाभावापातादित्यर्थः । अनुगतस्य-अदृष्टनाशत्वरूपैकविधनाशकतावच्छेदकधर्मवतः । अननुगमस्य-अनेककार्य्यतावच्छेककारणतावच्छेदकस्य (अनभ्युपगमादिति) अनभ्युपगममभिप्रेत्येत्यर्थः । तथाच-कार्य्यनाशत्वावच्छिन्नकार्य्यनाशं प्रत्यदृष्टनाशस्य हेतुत्वाभ्युपगमे सति, सएव-अदृष्टनाशएव । सर्वत्र-सर्वकार्य्यनाशे, प्रयोजकः-कारणम् ॥

मू०-तदुक्तं विष्णुपुराणे

जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सु प्रलीयते ।
तेजस्यापः प्रलीयंते तेजो वायौ प्रलीयते ॥

Funding by IKS-MoE

वायुश्चलीयते व्योम्नि तच्चाव्यक्ते प्रलीयते ।
अव्यक्तं पुरुषे ब्रह्मन् निष्कले च प्रलीयते इति ॥

एवं विधप्रलयकारणत्वं तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणम्। ननु वेदांतैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपंचं ब्रह्म स्यादन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तेरितिचेन्न ॥

शि० म०–पृथिव्यादेरबादौ लये प्रमाणमाह (तदुक्तमिति) वस्तुतस्त्वाकाशस्येंद्रियेष्वेव लयः इंद्रियाणां तन्मात्रेषु तेषां जीवाहंकारे तस्य च हैरण्यगर्भाहंकारे तस्य च मायायामित्येवं बोध्यम्। पृथिव्यप्सु प्रलीयते आपस्तेजसि विलीयंते तेजो वायौ विलीयते वायुराकाशे आकाशमिंद्रियेषु इंद्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयंते भूतादिर्महति विलीयते महानव्यक्त इति सुबालोपनिषदि तथैव श्रवणात् । ननु तत्पदार्थनिरूपणे सक्रमप्रलयनिरूपणस्य कः प्रसंग इत्याशंक्य तस्य प्रकृतोपयोगमाह (एवंविधेति) ननु प्रपंचोपाधिकं जगज्जन्मादिकारणत्वं ब्रह्मणस्तटस्थलक्षणमित्युक्तं तदयुक्तं प्रमाणाभावात् । नच यतोवेत्यादिवाक्यं तत्र प्रमाणमित्युक्तमिति वाच्यम्, ब्रह्ममात्रपराणां वेदांतानां तत्रप्रामाण्याभावात् । अन्यथा सप्रपंचं ब्रह्म शास्त्रार्थः स्यादिति चोदयति (नन्विति) नहि योयोर्थः प्रतीयते स सर्वोपि शास्त्रार्थः सुरां पिबेदित्यादौ सुरापानकर्त्तव्यत्वस्यापि शास्त्रार्थत्वापत्तेः, किंतु यस्तात्पर्य्यविषयः यत्परः शब्दः स शब्दार्थ इत्यभ्युपगमात् सृज्यमानप्रपंचस्तु श्रुतिप्रतिपाद्योपि न तात्पर्य्यविषय इति न शास्त्रार्थः । नच निंदाश्रवणेन प्रायश्चित्तोपदेशेन च सुरापानकर्तव्यतायाः शास्त्रतात्पर्य्यविषयत्वाभावेपि प्रकृते तदभावेन सप्रपंचं ब्रह्म तात्पर्य्यविषयः स्यादिति वाच्यम् । "उदरमंतरं कुरुते अथ तस्य भयं भवति" ॥

आत्मनश्च परस्यापि यः करोत्यंतरं मिथः ।
तस्य भिन्नदृशो मृत्युर्विधत्ते भयमुल्बणम् ॥

म०प्र०–(तस्यचेति) जीवाहंकारस्य चेति प्रथमतच्छब्दार्थः (तस्यचोति) हैर- [illegible] च्छब्दार्थः । तत्र सक्रमप्रलयनिरूपणस्य (प्रकृतोति)

तत्पदार्थनिरूपणेत्यर्थः । प्रपंचोपाधिकं–प्रपंचनिमित्तकम् । तत्र–ब्रह्मणोजगज्जन्मादिकारणत्वे, अन्यथा–ब्रह्मणोजगज्जन्मादिकारणत्वे वेदान्तानां प्रामाण्याभ्युपगमे सति (सुरांपिबेदिति) कर्मविशेषोपकारतात्पर्य्येणेदं वाक्यं प्रवृत्तं नतूपभोगतात्पर्य्येण सुरापानविधानार्थवेदवाक्यं प्रवृत्तमिति भावः । यत्परः–योर्थःपरस्तात्पर्य्यविषयो यस्य शब्दस्य सयत्परः । सः–तात्पर्य्यविषयः, प्रकृते–जगत्सृष्ट्यादौ, तदभावेन–निंदाश्रवणप्रायश्चित्तोपदेशाभावेन, उल्बणं–दुःसहं महद्वा ॥

मू०–नहि सृष्टिवाक्यानां सृष्टौ तात्पर्य्यं किंत्वद्वये ब्रह्मण्येव तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः । इत्थं यदि सृष्टिमनुपन्यस्य प्रपंचस्य निषेधो ब्रह्मणि प्रतिपाद्येत तदा ब्रह्मणि प्रतिषिद्धस्य प्रपंचस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशंकायां न निर्विचिकित्सितमद्वितीयत्वं प्रतिपादितं स्यात् । ततःसृष्टिवाक्याद्ब्रह्मोपादेयत्वज्ञाने सत्युपादानं विना कार्य्यस्यान्यत्र सद्भावशंकाया निरस्ततया नेतिनेतीत्यादिना ब्रह्मण्यपि तस्यासत्त्वोपपादने प्रपंचस्य तुच्छत्वावगमे निरस्तनिखिलद्वैतविभ्रमखंडसच्चिदानंदैकरसं ब्रह्म सिद्ध्यतीति परंपरया सृष्टिवाक्यानामद्वितीये ब्रह्मण्येव तात्पर्य्यम् ॥

शि० म०–अंधंतमः प्रविशंति ये के चात्महनो जनाः ।
योऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते ।
किं न तेन कृतं पापंचौरेणात्मापहारिणा ॥

इत्येवमादिभेददर्शननिंदावचनस्य बहुलमुपलंभात् । प्रपंचस्य लोकावगतत्वेन तत्र तात्पर्य्यायोगात् । अज्ञातस्यैव शास्त्रतात्पर्य्यविषयत्वात् । प्रपंचपरत्वे 'नेहनानास्ति' इति, प्रतिषेधानुपपत्तेश्चेत्याशयेनाह (नहीति) ननु सृष्ट्यादिवाक्यानां कथमद्वितीयब्रह्मप्रतिपत्तौ विनियोगः नतावत्पुच्छब्रह्मप्रतिपत्तावन्नमयादिवाक्यवत् स्थूलारुंधतिन्यायेन सूक्ष्मब्रह्मप्रतिपत्तावुपयोगः । तद्वत्प्रपंचस्य ब्रह्मत्वेनानुपदेशात् । नाप्युपासनावाक्यवद्ब्रह्मज्ञानोपयोग्यन्तःकरणशुद्धिद्वारा उपासीतेत्यत्राश्रवणात । नच प्रतिषेध्यप्रपंचसमर्पकतया [illegible]

स्यापि प्रपंचस्य तत्र प्रतिषेधसंभवेन ब्रह्माधीनसृष्ट्यभिधानवैयर्थ्यापातात् । तथाच सृष्ट्यादिवाक्यानां सप्रपंचब्रह्मपरत्वाभावे अप्रामाण्यापत्तौ न निष्प्रपंचब्रह्मशास्त्रार्थ इत्याक्षिपति (तत्प्रतिपत्ताविति) यद्यप्यन्याधीनस्यापि प्रपंचस्य ब्रह्मणि प्रतिषेधः संभवति तथापि वायौ प्रतिषिद्धरूपवन्निषेध्यस्य पारमार्थिकत्वेपि संभवेन तन्मिथ्यात्वासिद्ध्या ब्रह्मणोऽद्वितीयत्वासिद्धिप्रसंगः ब्रह्माधीनसृष्टिस्थितिलयोपन्यासेतु प्रपंचस्य ब्रह्मोपादेयतया सिद्धस्य नेहनानास्तीत्यादिना तत्रैव निषेधे शुक्तिरूपवन्मिथ्यात्वावगतावद्वितीयं ब्रह्म सिद्ध्यतीत्याह (इत्थमिति) ॥

म०प्र०–प्रपंचपरत्वे–सृष्टिवाक्यानां प्रपंचविषयकतात्पर्यस्वीकारे, विनियोगः–संबंधः ब्रह्मप्रतिपत्त्यर्थत्वमिति यावत् (पुच्छेति) सर्वाधिष्ठानेत्यर्थः (स्थूलारुंधतीति) यथा लोके बालस्य सूक्ष्मारुंधतीज्ञानाय प्रथमं स्थूलनक्षत्रेष्वरुंधतीत्वस्याहार्योपदेश उपयोगी दृष्टस्तथासृष्टिवाक्यादिकमपि सूक्ष्मब्रह्मप्रतिपत्तावुपयोगिस्यादिति भावः । तद्वत्–अन्नमयादीनां ब्रह्मत्वोपदेशवत् । अत्र–सृष्टिवाक्यादौ तत्र–ब्रह्मप्रतिपत्तौ, तत्र–ब्रह्मणि । वायौप्रतिषिद्धरूपवत्–वायौ प्रतिषिद्धरूपस्य पृथिव्यादौ पारमार्थिकत्वेनावस्थानवत्, निषेध्यस्य–नेतिनेतिवाक्यबोधितनिषेधविषयप्रपंचस्य, संभवेन–निषेधसंभवेन । ब्रह्मोपादेयतया–ब्रह्मकार्यतया, तत्रैव–ब्रह्मण्येव ॥

सू०–उपासनाप्रकरणपठितसगुणब्रह्मवाक्यानामुपासनाविध्यपेक्षितगुणारोपमात्रपरत्वं न गुणपरत्वम् ॥

शि० म०-प्रसंगाद्वाक्यांतरस्यापि तदुपयोगमाह (उपासनेति) यद्वा ननु यथा यएषोंतरादित्ये हिरण्मयः पुरुष इत्यादिवाक्यानां सगुणब्रह्मपरत्वं तद्वत्सृष्टिवाक्यानामपि सप्रपंचब्रह्मपरत्वं स्यादित्याशंक्य किमुपासनाप्रकरणपठितानां हिरण्यमयादिवाक्यानां गुणपरत्वमुतनिर्गुणप्रकरणपठितानां द्वे वाव ब्रह्मणो रूपे मूर्तंचामूर्तंचेत्यादीनां तत्राद्यं दूषयति (उपासनेति । गुणारोपेति) वाचं धेनुमुपासीतेत्यादिवद्वास्तवगुणाभावेपि तदारोपमात्रेणोपासनासंभवात् । नचैवमपि तदारोपपरत्वं न ब्रह्मपरत्वमिति वाच्यम् । फलानुषंगरहितानामुपासनानां साक्षादन्तःकरणशुद्धिहेतूनां तद्द्वाराब्रह्मज्ञाने विनियोगात् । अत प

योगिनः कर्मकुर्वंति संगंत्यक्त्वात्मशुद्धये ॥

इति भगवद्गीतावचनं ददामि देयमित्येव यजे यष्टव्यमित्यपीत्यारण्यपर्वणि रुक्मिणीं प्रति द्रौपदीवचनं च फलोद्देशेन क्रियमाणानां चोपासनानां क्रममुक्तिफलकत्वात् ॥

म० प्र०-प्रसंगात्-स्मृतस्योपेक्षानर्हत्वरूपप्रसंगात्, वाक्यांतरस्य-सृष्टिवाक्यान्योपासनावाक्यस्य, तदुपयोगं-ब्रह्मप्रतिपत्तावुपयोगं, गुणपरत्वं-हिरण्यमयत्वादिधर्मपरत्वम् (इत्यादीनामिति) अस्य गुणपरत्वमिति पूर्वेणान्वयः । परममूले (नगुणपरत्वमिति) वास्तवधर्मपरत्वं न किंतुशुद्धसच्चिदानंदब्रह्मपरत्वमित्यर्थः (वाचमिति) वाचिधेनुत्वरूपवास्तवधर्माभावेपि वाचिधेनुत्वरूपधर्मारोपेणात्रवाक्ये उपासनविधानवदित्यर्थः । वास्तवगुणाभावेपि-ब्रह्मणि वास्तवधर्माभावेपि, तदारोपमात्रेण-धर्मकल्पनयैव, एवमपि-धर्मकल्पनयोपासनासंभवेपि, तदारोपपरत्वं-उपासनावाक्यानां धर्मकल्पनापरत्वं, फलानुषंगरहितानाम्-फलोद्देशेनाक्रियमाणानाम्. तद्द्वारा-अन्तःकरणशुद्धिद्वारा । विनियोगात्-संबंधात्, अतएव-फलकामनारहितोपासनादेरन्तःकरणशुद्धिद्वारा । ब्रह्मज्ञातार्थत्वादेव (भगवद्गीतावचनमिति) अस्याग्रे उपपद्यते इतिशेषः (ददामीति) अधिकारिणं प्रति धनादिकं देयं दातुं योग्यमित्येष बुद्ध्याहं ददामि दानं करोमि नतु फलकामनया एवं विहितं कर्म यष्टव्यं संपादयितुं योग्यमित्येव बुद्ध्याहं यजे कर्मकरोमि ननु फलकामनयेत्यर्थः । इदमपि वचनं फलकामनारहितयागदानादेरन्तःकरणशुद्धिद्वारा ब्रह्मज्ञानार्थत्वं बोधयतीति भावः । नन्वेवं फलोद्देशेन क्रियमाणोपासनाविषयकवाक्यानां ब्रह्मपरत्वं न स्यादित्याशंक्य तेषामपि वैराग्यादिद्वारा हिरण्यगर्भलोकप्राप्तिद्वारा च ब्रंह्मपरत्वमित्यंभिप्रेत्यह (फलोद्देशेनेति) क्रममुक्तिफलकत्वात्-सातिशयत्वादिदोषवत्फलकोपासनानिरूपणेन शुद्धान्तःकरणपुरुषस्यवैराग्यमुत्पद्यत इतिवैराग्याद्युत्पत्तिक्रमेण हिरण्यगर्भलोकावाप्तिक्रमेण च फलोद्देशेन क्रियमाणोपासनानां मुक्तिफलकत्वात् तथाच न पूर्वोक्तदोष इति भावः ॥

मू०-निर्गुणप्रकरणपठितानां सगुणवाक्यानां तु निषेधवाक्यापेक्षितनिषेध्यसंपादकत्वेनविनियोग इति न किंचिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते ॥

शि० म०-द्वितीयं निरस्यति (निर्गुणेति) बृहदारण्यके हि मूर्तंचैवामूर्तंच मर्त्यंचामृतंचेत्युपक्रम्य तदेतन्मूर्तं यदन्यद्वायोरंतरिक्षाच्चेत्यादिना वाय्वंतरिक्षव्यतिरिक्तं मूर्तं वाय्वंतरिक्षंचामूर्त्तमित्यादिभौतिकमुपन्यस्याध्यात्ममित्यादिना प्राणव्यतिरिक्त मूर्तं प्राण [illegible]

Funding by IKS-MoE

त्मिकमभिधाय अथात आदेशो नेति नेतीति निषेधातितत्र मूर्तादिगुणवाक्यानां निषेधवाक्यापेक्षितनिषेधप्रतियोगिसमर्पकतया प्रकरणार्थनिर्गुणब्रह्मज्ञाने विनियोग इत्यर्थः । ननु कर्मकांडवाक्यानां यथा ब्रह्मज्ञाने विनियोगाभावात् स्वार्थपरत्वं तथा सृष्ट्युपासनवाक्यानामप्यस्तु स्वार्थमात्रपरत्वं किंच ब्रह्मणो निष्प्रपंचत्वे कर्मवाक्यानां यावस्वर्गादिसाध्यसाधनभावप्रतिपादकानामसति स्वर्गादिलोकप्रपंचे कथं प्रामाण्यमिति चेत् न, तावदप्रामाण्यं स्वर्गयागादीनां व्यावहारिकत्वाभ्युपगमात् । नाप्यनुपयोगः अग्निहोत्रादीनामपि फलानुषंगरहितानामारादुपकारकत्वस्य 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' इत्यत्रसूत्रकारेणांगीकृतत्वेन चित्तशुद्धावुपयोगसंभवात्तदेतदाह (नकिंचिदपिवाक्यमद्वितीयब्रह्मप्रतिपादनेनेति) ॥

म० प्र०-(मर्त्यंचामृतंचेति) अत्र चकाराववधारणार्थौ । पूर्वोक्तमूर्तामूर्त्तयोरेव विशेषणं मर्त्यत्वादिकं मर्त्यंच क्षिप्रविनाश्येव, अमर्त्यंच-मोक्षात्प्रागविनाश्येव; अथ-मूर्त्तामूर्त्तादिप्रपंचाध्यारोपकथनानंतरं, अतः-मूर्तामूर्तादिप्रपंचापवादस्य ब्रह्मज्ञानार्थत्वात्, आदेशः-उपदेशः, तत्र-नेतिनेतीतिवाक्येन निषेधे सति मूर्तादिगुणवाक्यानांप्रकरणार्थनिर्गुणब्रह्मज्ञाने विनियोग इति संबंधः (विनियोगइति) तात्पर्यमुक्तब्रह्मज्ञानजनकत्वाख्यसंबंधो वा नत्वंगप्रधानसंबंधबोधकत्वरूपोत्रविनियोगस्तस्यात्रासंभवादित्यर्थः । फलानुषंगरहितानां-फलोद्देशेनाक्रियमाणानाम्, आरादुपकारकत्वस्य-अन्तःकरणशुद्ध्यादिरूपपरंपरयोपकारकत्वस्य (सर्वापेक्षेति) तृतीयाध्यायस्य चतुर्थपादस्य षडधिकविंशतिसंख्याकसूत्रमिदम् अस्यार्थः किं विद्याया आश्रमकर्मणामत्यंतमेवानपेक्षोक्तास्तिकाचिदपेक्षेति संशये विद्याग्नींधनाद्याश्रमकर्माणि नापेक्ष्यंते इत्येवमत्यंतानपेक्षायां प्राप्तायामिदमुच्यते (सर्वापेक्षाचेति) अपेक्षते च विद्या सर्वाण्याश्रमकर्माणि नात्यंतमनपेक्षैव । ननु विरुद्धमिदं वचनमपेक्षते च विद्याश्रमकर्माणि विद्यानापेक्षते चेत्यतो ब्रूमः उत्पन्नाहि विद्या स्वफलसिद्धिं प्रति न किंचिदन्यदपेक्षते स्वोत्पत्तिं प्रति त्वाश्रमकर्माण्यपेक्षते कुतो यज्ञादिश्रुतेः-तमेतमित्यादिश्रुतेः, अश्ववत्-यथाऽश्वस्यरथक्रियायां योग्यत्वं नतु लांगलक्रियायां योग्यत्वं तथा सर्वकर्मणान्तःकरणशुद्धिद्वाराज्ञानोत्पत्तौ योग्यत्वं नतुस्वफलाविद्यानिवृत्तौ योग्यत्वमिति ॥

मू०-तदेवं स्वरूपंतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैत[illegible]याप्रतिबिंबित[illegible]ति केचित् तेषामयमाशयः

जीवपरमेश्वरसाधारणचैतन्यमात्रं बिंबं तस्यैव बिंबस्याविद्यात्मिकायां मायायां प्रतिबिंबमीश्वरचैतन्यमन्तःकरणेषु प्रतिबिंबं जीवचैतंन्यं "कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वरः" इति श्रुतेः एतमन्ते जलाशयगतशरावगतसूर्य्यप्रतिबिंबयोरिव जीवपरमेश्वरयोर्भेदः ॥

शि० म०-नन्विदं लक्षणद्वयमयुक्तं लक्ष्याभावात् । तथाहि न तत्पदवाच्यं लक्ष्यं तद्धि न चिद्रूपं जीवस्यापि तथात्वात् । नाप्यविद्यावच्छिन्नो जीवः । मायावच्छिन्न ईश्वर इति वाच्यम् । तत्त्यविद्यामित्यादौ मायाविद्ययोः सामानाधिकरण्यव्यपदेशान्नतयोर्भेद इत्युक्तत्वात् । तस्माल्लक्ष्यानिरूपणाल्लक्षणद्वयं न युक्तमित्याशंक्याह (तदेवमिति) अविद्याप्रतिबिंबरूपमीश्वरचैतन्यं तत्पद्वाच्यं तदेव स्वरूपलक्षणतटस्थलक्षणयोर्लक्ष्यमित्यर्थः । नन्वविद्याप्रतिबिंबो जीवः, तत्कथमीश्वरस्याविद्याप्रतिबिंबत्वमित्याशंक्य एतन्मतेप्यन्तःकरणप्रतिबिंबो जीव इत्याह (तेषामिति) अन्तःकरणावच्छिन्नो जीवः तदनवच्छिन्न ईश्वर इति केचित्तन्न । स्मृतिविरोधादित्याह (कार्य्येति) कार्य्यमन्तःकरणं करणमविद्या किंच जीवेश्वरावन्तःकरणाविद्याप्रतिबिंबाविति युक्तं नत्ववच्छिन्नानवच्छिन्नौ तथासति जीवेश्वरयोरत्यंतभेदापत्तेरित्याह (एतन्मतेइति) ॥

म० प्र०-लक्षणद्वयं-स्वरूपलक्षणं तटस्थलक्षणं च । लक्ष्याभावात्-लक्षणद्वयलक्ष्याभावात्, लक्ष्यं-लक्षणद्वयलक्ष्यम् । तद्धि-तत्पद्वाच्यं हि । मायाविशिष्टचैतन्यघटकीभूतचैतन्यमात्रमुक्तस्वरूपलक्षणलक्ष्यं न भवतीत्यत्र हेतुमाह (जीवस्यापीति) जीवस्यापि चिद्रूपत्वेन लक्षणद्वयलक्ष्यत्वापातादित्यर्थः । मायाविशिष्टचैतन्यस्योक्तस्वरूपलक्षणगतटस्थलक्षणलक्ष्यत्वं निराकर्तुमाशंकते अविद्यावच्छिन्नइत्यादिना सामानाधिकरण्येति । अभेदेत्यर्थः मायाऽविद्ययोरभेदमभिप्रेत्याह (अविद्याप्रतिबिंबेति) तत्-तस्मात्कारणादविद्याप्रतिबिंबस्यजीवत्वात् एतन्मतेपि-(अविद्याप्रतिबिंब ईश्वर इतिपक्षेपि अपिशब्देन बिंबात्मकमीश्वरचैतन्यमितिवदतोऽनेकजीववादिनो मतस्य परिग्रहो बोध्यः । अन्तःकरणावच्छिन्नः-अन्तःकरणेन परिच्छिन्नतामापन्नः, तदनवच्छिन्नः-अन्तःकरणेन परिच्छिन्नतामनापन्नः (अत्यंतभेदेति) पारमार्थिकभेदेत्यर्थः । परम[illegible] (भेदइति) [illegible]शयगतसूर्यादि-

Funding by IKS-MoE

प्रतिबिंबयोः कल्पितभेदवज्जीवेश्वरयोरपि कल्पितभेद इति न ब्रह्मणोऽद्वितीयत्व हानिरिति भावः ॥

मू०—अविद्यात्मकोपाधेर्व्यापकतया तदुपाधिकेश्वरस्यापि व्यापकत्वम् । अन्तःकरणस्य परिच्छिन्नतया तदुपाधिकजीवस्यापि परिच्छिन्नत्वम् एतन्मते अविद्याकृतदोषाः जीव इव परमेश्वरेऽपि स्युः उपाधेः प्रतिबिंबपक्षपातित्वादित्यस्वरसात् । बिंबात्मकमीश्वरचैतन्यमित्यपरे तेषामयमाशयः एकमेवचैतन्यं बिंबत्वाक्रांतमीश्वरचैतन्यं प्रतिबिंबत्वाक्रांतं जीवचैतन्यम् बिंबप्रतिबिंबकल्पनोपाधिश्चैकजीववादे अविद्या अनेकजीववादे अन्तःकरणान्येव ॥

शि० म०—अपिच ईश्वरस्यानवच्छिन्नरूपत्वे ब्रह्मांडस्य सर्वजीवाक्रांततयाऽनवच्छिन्नस्य ब्रह्मणोस्माद्बहिरेवावस्थानापत्तौ सर्वगतत्वसर्वोपादानत्वसर्वांतर्यामित्वादि ब्रह्मणो न स्यात् । अविद्याप्रतिबिंबत्वपक्षेतु तत्सर्वमुपपद्यते इत्याशयेनाह (अविद्येति) जीवस्य तु न व्यापकत्वं तदुपाधेरव्यापकत्वादित्याह (अंतःकरणस्येति) एकजीववादे अविद्याप्रतिबिंबो जीव इति तत्र जीवेश्वरविभागो न स्यादिति प्रतिबिंबत्वे दोषे सत्येवदोषांतरमाह (एतन्मते इति) ननु सिद्धांते बिंबप्रतिबिंबयोरभेदेन चैतन्यस्यैव बिंबप्रतिबिंबात्मकतया कथमेकस्यैव जीवेश्वरभाव इत्याशंक्य तस्य बिंबत्वेनेश्वरत्वं प्रतिबिंबत्वेन जीवत्वंचाविरुद्धमित्याह (एकमेवेति) ननु बिंबप्रतिबिंबभावो यदि पारमार्थिकस्तदा निष्कलंकत्वविरोधः उपाधिश्च सन्निहितः पारमार्थिकः स्यादित्यद्वितीयत्वव्याघातः । यदि कल्पितस्तत्कल्पनोपाधिर्यद्यन्तःकरणं तदा एकजीववादानवकाशः यद्यविद्या तदा नाना जीववादादविरोध इत्याशंक्य मतभेदेन व्यवस्थितोपाधिमाह (बिंबेति) ॥

म० प्र०—अनवच्छिन्नरूपत्वे—अन्तःकरणेन परिच्छिन्नतानापन्नरूपत्वे । आक्रांततया—व्याप्ततया, अस्मात्—ब्रह्मांडात् (अविद्याप्रतिबिंबत्वेति) ईश्वरस्याविद्याप्रतिबिंबत्वेत्यर्थः । तत्सर्वं—सर्वगतत्वादिकं सर्वं, इतिहेतोः—जीवस्याविद्याप्रतिबिंबस्वरूपत्वाद्धेतोरिति यावत्, तत्र—एकजीववादे इति—इत्याकारके । प्रतिबिंबत्वे—ईश्वरस्यप्रति [illegible] परममूले (अविद्याकृतदोषाइति) कर्तृत्वभोक्तृत्वबद्धत्वमुक्त-

त्वादयो दोषा इत्यर्थः (चैतन्यस्यैवेति) चैतन्यमात्रनिष्ठबिंबप्रतिबिंवत्वप्रयोज्य-एकचैतन्यनिष्ठजीवेश्वरभावः कथमित्यर्थः तस्य–एकचैतन्यस्य । बिंबत्वेन–चलनाद्युपाधिधर्मशून्यत्वे सत्युपाधावभिव्यक्तत्वेनोपाधिनिमित्तकस्वप्रतियोगिकव्याप्यवृत्तिभेदाश्रयत्वे सत्यौपाधिकपरिच्छेदरहितत्वेन वा । प्रतिबिंबत्वेन–चलनाद्युपाधिधर्मवत्त्वे सत्युपाधावभिव्यक्तत्वस्वरूपत्वेन उपाधिनिमित्तकस्वप्रतियोगिकव्याप्यवृत्तिभेदाश्रयत्वे सत्यौपाधिपरिच्छिन्नत्वस्वरूपत्वेन वा निष्कलंकत्वाविरोधःनिष्कलं निष्क्रियमित्यादिश्रुतिबोधितनिर्धर्मकत्वानुपपत्तिः बिंबप्रतिबिंबभावस्य पारमार्थिकत्वमुपाधेर्नित्यसंन्निहितत्वं पारमार्थिकत्वं च विना न संभवतीत्युपाधिनिष्ठं नित्यसन्निहितत्वं पारमार्थिकत्वं च वाच्यम् । तथाच ब्रह्मणोऽद्वितीयत्वविरोधः स्यादित्यभिप्रेत्याह (उपाधिश्चेत्यादिना) नित्यसन्निहितः सर्वदाबिंबसमीपस्थः । तत्कल्पनेति बिंबप्रतिबिंबभावकल्पनेत्यर्थः ॥

मू०–अविद्यान्तः करणोपाधिप्रयुक्तो जीवपरभेदः उपाधिकृत दोषाश्च प्रतिबिंबे जीव एव वर्तंते नतु बिंबे परमेश्वरे उपाधेः प्रतिबिंबपक्षपातित्वात् एतन्मते च गगनसूर्यस्य जलादौ भासमानप्रतिबिंबसूर्यस्येव जीवपरयोर्भेदः । ननु ग्रीवास्थमुखस्य दर्पणप्रदेश इव बिंबचैतन्यस्य परमेश्वरस्य जीवप्रदेशे अभावात् तस्य सर्वांतर्यामित्वं न स्यादिति चेन्न । साभ्रनक्षत्रस्याकाशस्य जलादौ प्रतिबिंबितत्वे बिंबभूतमहाकाशस्यापि जलादिप्रवेशसंबंधदर्शनेन परिच्छिन्नबिंबस्य प्रतिबिंबदेशासंबंधेप्यपरिच्छिन्नब्रह्मबिंबस्य प्रतिबिंबप्रदेशसंबंधाविरोधात् । नच रूपहीनस्य ब्रह्मणो न प्रतिबिंबसंभवः रूपवत एव तथात्वदर्शनादिति वाच्यम् । नीरूपस्यापि रूपस्य प्रतिबिंबदर्शनात् । नच नीरूपस्य द्रव्यस्य प्रतिबिंबाभावनियमः आत्मनो द्रव्यत्वाभावस्योक्तत्वात् ॥

शि० म० मतभेदेन भेदमाह (अविद्यान्तःकरणेति पूर्वमतोक्तदोषोनात्र मते प्रसरतीत्याह (उपाध[illegible]ति) अत एव दर्पणगतमुखप्रतिबिंब एवश्यामावदातत्वादिकमिति भावः [illegible]पाधिकृते [illegible]कं स्वरू-

Funding by IKS-MoE

यत एव भेदसंभवादित्यत आह (एतन्मतेइति) ईश्वरस्य बिंबत्वे बाधकमाशंकते (नन्विति) सर्वांतर्यामित्वं न स्यादित्युपलक्षणं सर्वोपादानत्वं च न स्यादित्यपि बोध्यम् । परिच्छिन्नस्यैव बिंबस्य प्रतिबिंबदेशावृत्तित्वनियमोनापरिच्छिन्नस्येत्याह (नेति) ननु महाकाशो जलादौ न प्रतिबिंबते तत्रान्याकाशस्यैव भानसंभवादित्याशंक्याह (साभ्रेति) नचाभ्रादिकमेव तत्र न महाकाश इति वाच्यं प्रत्यभिज्ञाविरोधात् । किं नीरूपस्य प्रतिबिंबाभावनियमः उतनीरूपद्रव्यस्य तत्राद्यं निराकृत्य द्वितीयं दूषयति (नचेति । आत्मन इति) आत्मा न द्रव्यं तद्धि नसमवायिकारणं समवायानभ्युपगमात् । नापि गुणाश्रयः ब्रह्मणो निर्गुणत्वादित्युक्तत्वादित्यर्थः ॥

शि०म० प्र०–(पूर्वमतेति) ईश्वरस्य प्रतिबिंबस्वरूपत्वमतेत्यर्थः । अत्रमते–ईश्वरस्यबिंबस्वरूपत्वमते । परममूले (प्रतिबिंबपक्षपातित्वादिति) प्रतिबिंबेस्वधर्माधायकत्वादित्यर्थः । श्यामावदातत्वादिकं–दर्पणगतमलिनत्वशुद्धत्वादिकम् । भेदः–जीवेश्वरभेदः । परममूले (भेदइति) कल्पितभेदइत्यर्थः । परममूले (दर्पणप्रदेशइवेति) दर्पणप्रदेशोऽभाव इवेत्यर्थः । परममूले (तस्येति) बिंबचैतन्यस्वरूपपरमेश्वरस्येत्यर्थः । तत्र–जलादौ । अन्याकाशस्यैव–महाकाशान्यघटाद्याकाशस्यैवतत्र–जलादौ प्रतिबिंबत इति शेषः । नमहाकाशः–जलादौ प्रतिबिंबते इति शेषः । प्रत्यभिज्ञाविरोधात महाकाशएव जले प्रतिबिंबिताकाश इति प्रत्याभिज्ञाविरोधात् । परममूले (आकाशस्येति) महाकाशस्येत्यर्थः । परममूले (दर्शनेनेति) ज्ञानेनेत्यर्थः । परममूले (तथात्वेते) प्रतिबिंबितत्वेत्यर्थः तद्धि–आत्मस्वरूपंहि ॥

मू०–एकधाबहुधाचैव दृश्यते जलचंद्रवत् यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्नित्यादिवाक्येन ब्रह्मप्रतिबिंबाभावानुमानस्य बाधितत्वाच्च।तदेवं तत्पदार्थो निरूपित इदानीं त्वं पदार्थोनिरूप्यते एकजीववादे अविद्याप्रतिबिंबो जीवः ॥

शि०म०–ननु ब्रह्मणि कल्पितगुणांगीकारान्ननिर्गुणश्रुतिविरोधः । नचाकाशवद्ब्रह्मनीरूपद्रव्यमपि प्रतिबिंबतामिति वाच्यं तत्राप्यभ्रनक्षत्रादेरेव रूपवतः प्रतिबिंबितत्वसंभवेन नीरूपाकाशप्रतिबिंबस्यासंभवादित्यत आह (एकधेति) तत्पदार्थनिरूपणमुपसंहरति (तदेवमिति । अविद्याप्रतिबिं[illegible]) एकैवाविद्या '[illegible]ामेकाम्' इत्यादिश्रुतेः । नचेन्द्रो-

Funding by IKS-MoE

मायाभिरिति बहुवचनविरोधः। तस्य तद्गतशक्तिभेदपरत्वेन व्याख्यातत्वात्। तथाचाविद्योपाधेरेकत्वात्तत्प्रातिबिंबलक्षणोजीव एक इत्यर्थः। जीवैकत्वं च संप्रदायाध्वना स्थितमित्येतावतैव तत्पक्ष उपन्यस्तो नत्वयं पक्षो युक्तः। तथासति एकजीववादे अविद्याया एकत्वेन एकस्य मुक्तत्वेनेदानीं प्रपंचानुपलंभापत्तेः। पूर्वं मुक्त्यभावे वामदेवादिमुक्तिप्रतिपादकबहुवाक्यविरोधात्। वामदेवादीनामुत्पन्नब्रह्मसाक्षात्काराणामप्यमुक्तावर्वाचीनानामाषाढवाते चलति द्विपेन्द्रे चक्रीवतो वारिधिरेव काष्ठाइतिन्यायेन मुक्तिर्दूरोत्सारितास्यात्। नचैवं विवरणाचार्य्यैर्जीवैक्योक्तेस्तद्विरोध इति वाच्यम्॥

म० प्र०–(श्रुतिविरोधइति) तथाच ब्रह्मणि कल्पितगुणांगीकारेण ब्रह्मणो द्रव्यत्वसिद्धिः नीरूपद्रव्यब्रह्मणः प्रतिबिंबाभावसिद्धिश्चेति शेषः। तत्रापि–जलादावपि (आहेति) ब्रह्मणो द्रव्यत्वाभ्युपगमेपि ब्रह्मप्रतिबिंबासंभवरूपदोषाभाव इत्यभिप्रेत्य हेत्वंतरमाहेत्यर्थः। परममूले (एकधेति) उपाधिरहितरूपेणैकरूपः सन् परमात्मा बहुधोपाधिना नानाजीवेश्वररूपो ज्ञायते इत्यर्थः। परममूले (यथेति) एकोयं विवस्वान् सूर्योभिन्ना आपोऽनुगच्छन् वहुधा भवतीति योजना अत्रादिपदेनोपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मेति वाक्यशेषपरिग्रहः। तस्य–मायाभिरिति बहुवचनस्य (तद्गतेति) मायागतेत्यर्थः। परममूले (ब्रह्मप्रतिबिंबाऽभावानुमानस्येति) ब्रह्म न प्रतिबिंबते अचाक्षुषत्वाद्गंधादिवदिति ब्रह्मप्रतिबिंबाभावानुमानस्येत्यर्थः। संप्रदायाध्वना–प्राचीनवाक्येन, स्थितम्–प्राप्तम् अयं पक्षो न युक्त इत्यत्र हेतुमाह (एकजीववाद इत्यादिनेति) ननु पूर्वं कस्यापि मुक्तिर्नजातेतीदानीं न प्रपंचानुपलंभापत्तिरित्याशंक्याह (पूर्वमिति) दोषांतरमाह (वामदेवादीनामिति) आषाढवाते इति आषाढवायुसंबद्धे द्विपेन्द्रेगजेंद्रे। चलति–इतस्ततोदोलायमानेसति, चक्रीवतो–रासभस्य वारिधिरेव समुद्रएव, काष्ठा–विश्रामावधिरित्यर्थः। तद्विरोधः–नानाजीववादस्य विवरणाचार्य्योक्त्यासहविरोधः॥

शि०म०-तदुक्ते जीवपदप्रतिपाद्य एक एवेति शास्त्रदृष्टजीवैक्यपरत्वात्। अन्यथा तद्वचनस्य लोकसिद्धजीवभेदप्रतिषेधकत्वे अनंतजीवनिर्भासास्पदमेकरसं ब्रह्मेत्यहंकारटीकायां पद्मपादाचार्य्यैर्जीवभेदस्याभिधानात् तद्विरोधापत्तेः। अत एव विवरणाचार्य्यैः। शारीरिकन्यायसंग्रहे ग्रंथांतरे देवताधिकरणे तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तद्भवत्। तथा ऋषीणां तथा मनुष्याणामिति वाक्योदाहरणेन यस्य ज्ञानं तस्यैव मुक्तिरित्युक्तमत एव यावदधिकारमवस्थितिराधिकारिकाणामित्यत्र वासिष्ठादीन् ब्रह्मज्ञानिन उदाहृत्य तेषां [illegible] पौरोहित्याद्यधिका[illegible]णप्रारब्धपर्य्य-

[illegible]

तमवस्थानं तत ऊर्द्ध्वं मुक्तिरित्युक्तं तदेतत्पारमर्षसूत्रं 'भोगेन त्वितरेक्षपयित्वासंपद्यते' इति तस्माच्छ्रुतिसूत्रस्मृतिन्यायाविरोधाज्जीवैकत्वप्रवादोयं नादर्त्तव्यः परीक्षकैः ॥

म० प्र०—तदुक्तेः—विवरणाचार्य्योक्तेः, एकएव—वस्तुत एकएव, अन्यथा—विवरणाचार्य्योक्तेः शास्त्रदृष्टजीवैक्यपरत्वानंगीकारे अन्यथेत्यस्यैव वाविवरणं तद्वचनस्येत्यादि, तद्वचनस्य—विवरणाचार्य्यवचनस्य निर्भासास्पदम्—प्रतीत्यधिकरणं, तद्विरोधापत्तेः—पद्मपादाचार्य्यवचनविरोधापत्तेः । अतएव—विवरणाचार्य्योक्तेर्जीवपदप्रतिपाद्यो वस्तुत एकएवेति शास्त्रदृष्टजीवैक्यपरत्वादेव । तत्—ब्रह्म यो यः देव इति शेषः । तदभवत्—ब्रह्माभवत् (यावदधिकारमिति) तृतीयाध्यायस्य तृतीयपादस्य द्व्यधिकत्रिंशत्संख्याकमिदं सूत्रम् अस्यार्थः विदुषो वर्तमानदेहपातानंतरं देहांतरप्राप्तिरस्ति नवेति संशये सत्यस्त्येवेति पूर्वपक्षः कुतः अपांतरतमवशिष्टसनत्कुमारादीनां निर्गुणब्रह्मविदामपांतरतमः कलिद्वापरयोः संधौ विष्णुनियोगात्कृष्णद्वैपायनः संबभूवेत्यादिना पुनः पुनरुत्पत्तिस्मरणादिति पूर्वपक्षे प्राप्ते सिद्धांतमाह (यावदिति) अधिकारिकाणामपांतरतमप्रभृतीनां वेदप्रवर्तनादिषु लोकव्यवस्थाहेतुष्वधिकारेषु परमात्मना नियुक्तानां, यावदधिकारमवस्थितिः—यावत्प्रारब्धकर्मावस्थितिः प्रारब्धकर्मणः प्रतिबंधकस्यानेकशरीरभोग्यफलहेतोः फलस्य भोगेन नाशे विदेहमुक्तिप्रतिबंधकांतराभावादनादिसंसारे संचितकर्मणां ज्ञाननाश्यत्वेनाप्रतिबंधकत्वादप्रतिबद्धः । साक्षात्कारो वर्तमानदेहपातानंतरं कैवल्यं संपादयतीति न देहांतरप्राप्तिरप्रतिबद्धात्मसाक्षात्कारवतः । तथव श्रुतिः 'तस्यतावदेवचिरं यावन्न विमोक्ष्येथसंपत्स्य, इत्यप्रतिबद्धसाक्षात्कारवतः कैवल्यस्य वर्त्तमानदेहपातावधिं श्रावयतीति (तदेतदिति) तस्मिन्प्रकृतेऽर्थे एतदन्यदपीदंपारमर्षसूत्रमस्तीत्यर्थः । भोगेनेत्यादिसूत्रं हि चतुर्थाध्यायस्य प्रथमपादस्यैकोनविंशतिसंख्याकम् अस्यार्थः प्रारब्धकर्मणामनारब्धकार्य्ये एवत्वित्यत्र ज्ञानानिवर्त्त्यत्वेनोक्तानां निवृत्तिप्रकारमाह (भोगेनेति) किं ब्रह्मसाक्षात्कारवान् देहपातानंतरमपिसंसरति न वेति संशये देहपातात्पूर्वं यथासाक्षात्कारेपि संसारानुवृत्तिरेवंदेहपातानंतरमपिसंसारानुवृत्तिरिति पूर्वपक्षे प्राप्ते ब्रूमः संचितकर्मणां ज्ञानान्नाश उक्तः इतरेतु संचितक्रियमाणव्यतिरिक्तेआरब्धकार्य्येपुण्यपापेभोगेनक्षपयित्वाविद्वान् ब्रह्मसंपद्यते अथ संपत्स्ये ब्रह्मैव सन् ब्रह्माप्येतीत्यादिश्रुतिभ्यः देहपातात्पूर्वं प्रारब्धकर्मणां सत्त्वात्कुलालचक्रभ्रमिन्यायेन मिथ्याज्ञानरूपनिमित्तनाशेप्यविद्यालेशानुवृत्तिर्युक्ता तद्भोगानंतरं कस्यचिदपि कर्मणो जन्ममरणलक्षणसंसारहेतोरभावान्नसंसारस्तस्माद्भोगेन प्रारब्धकर्मनाशानंतरं विद्वान् स्वरूपानंदात्मनावस्थानलक्षणं स्वास्थ्यंमोक्षाख्यं लभते इति सिद्धमिति ॥

Funding by IKS-MoE

मू०-अनेकजीववादेत्वन्तःकरणप्रतिबिंबः स च जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् ॥

शि०म०-जीवैकत्वमतेन जीवस्य लक्षणमुक्त्वा तदनेकत्वमतेन लक्षणमाह (अनेकजीववादेत्विति) अन्तःकरणे प्रतिबिंब एव जीवो नत्वविद्यावच्छिन्नइत्यर्थः । तदुपाधेरेकत्वेन जीवनानात्वानुपपत्तेः । नन्वविद्यावच्छिन्नो जीवः स च नानैव मायाभिरिति श्रुत्या तदुपाधेरनेकत्वावगमात । अजामित्येकवचनश्रुतेरेकं वनमितिवत्समुदायाभिप्रायत्वादितिचेन्न, कार्य्योपाधिरयं जीव इतिस्मृतिविरोधात् । किंच स्वमपीतो भवतीत्यादि श्रुतौ ब्रह्मण्यौपाधिको लयः श्रूयते जीवस्याविद्योपाधिकत्वे तद्वचनं न स्यात अविद्यायास्तदाविनाशाभावात् अपिचैवं जीवस्योत्क्रांतिगत्यागतयो नोपपद्येरन् अविद्याया व्यापकत्वेन तदवच्छिन्नस्य गत्याद्यनुपपत्तेः उपाधेः प्रतिबिंबपक्षपातित्वात्तत्कृतादोषाः प्रतिबिंब एव वर्तते इत्युक्तं तत्र केते दोषा इत्याकांक्षायामाह (सचेति) अवस्थात्रयवानित्युपलक्षणं तुरीयनामकावस्थांतरमादायावस्थाचतुष्टयवानिति द्रष्टव्यं नचैक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिष्वित्यमृतबिंदूपनिषद्वचनविरोधः तस्यावस्थांतरोपलक्षणार्थत्वात् । जाग्रत्स्वप्नसुषुप्त्यादि प्रपंचं यत्प्रकाशते इति कैवल्योपनिषदि आदिपदेन तस्याभिधानात सुबालोपनिषदि योयं विज्ञानघनउत्क्रामन् प्राणं वहतीत्युपक्रम्य जागरितं स्वप्नं सुषुप्तं तुरीयं चेति तुरीयपदेनावस्थांतराभिधानात् । जाग्रत्स्वप्नः सुषुप्तिस्तुरीयमिति चतुर्विधावस्था इति शारीरकोपनिषदि स्पष्टमेवावस्थाचातुर्विध्यस्योक्तत्वाच्च । नच लक्षणतः सुषुप्त्यादावेवान्तर्भावः इति वाच्यम् । श्रुतिसिद्धविलक्षणावस्थांतरानुरोधेन तद्व्यावृत्तसुषुप्त्यादिलक्षणस्य सुषुप्त्यादिव्यावृत्तावस्थांतरलक्षणस्य चावश्यं कल्पनीयत्वात् प्रमाणसिद्धस्यलक्षणेन निवर्त्तनायोगात् । नचैवं मूर्च्छामरणाभ्यां षट्विधाः स्युरवस्था इति वाच्यम् । तयोरवस्थांतरत्वे प्रमाणाभावादिति दिक् ॥

म०प्र०-तदुपाधेः-अविद्यारूपजीवोपाधेः (स्वमपीतइति) अत्र स्वशब्देन सच्छब्दवाच्यात्मापरामृश्यते तथा च स्वं स्वं प्रति सच्छब्दवाच्ये आत्मानि अपीतो भवति-जीवो लीनो भवति अपि पूर्वस्य एते लयार्थत्वात्सुषुप्त्यवस्थायांमुपाधिलयेनोपाधिकृत विशेषाभावात् । स्वात्मनि सच्छब्दवाच्ये जीवः प्रलीन इवेत्यर्थः । तद्वचनं-स्वमपीत इति वचनं, उत्क्रांतिगत्यागतयः-चरमदेहप्राणा[illegible] [illegible]मनागम-

Funding by IKS-MoE

नानि, प्रतिबिंबपक्षपातित्वात्–प्रतिबिंबेस्वधर्माधायकत्वात्, तत्कृताः–उपाधिकृताः । तस्य–अमृतबिंदूपनिषद्वचनस्य, तस्य–तुरीयनामकावस्थांतरस्य, उत्क्रामन्–देहाद्बहिर्गच्छन् प्राणं वहति प्राणं कक्षीकृत्यगच्छति, तद्व्यावृत्तेति–तुरीयावस्थाऽवृत्तीत्यर्थः। सुषुप्त्यादिव्यावृत्तावस्थांतरलक्षणस्य–सकलोपाधितादात्म्याध्यासनिवृत्तिकालत्वरूपसुषुप्त्याद्यवृत्तितुरीयावस्थालक्षणस्य, कल्पनीयत्वात्–ऊह्यत्वात्, कल्पनीयत्वेहेतुमाह (प्रमाणसिद्धस्येति) तुरीयनामकावस्थांतरस्येतिशेषः । लक्षणेन–तुरीयावस्थावृत्तिसुषुप्त्यादिलक्षणेन–एवं–तुरीयनामकावस्थांतरस्वीकारे सति तयोः मूर्च्छामरणयोः ॥

मू०–तत्र जाग्रद्दशानाम इन्द्रियजन्यज्ञानावस्था अवस्थांतरे इन्द्रियाभावान्नातिव्याप्तिः इंद्रियजन्यज्ञानं चान्तःकरणवृत्तिः स्वरूपज्ञानस्यानादित्वात् साचान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतं तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य ॥

शि० म०–तत्र जाग्रदवस्थां निरूपयति (तत्रेति । इंद्रियजन्येति) इन्द्रियजन्यज्ञानोपलक्षितकालो जाग्रदित्यर्थः । तेन जाग्रतिसुखाद्यनुभवकाले औदासीन्यकालेच तद्विशिष्टत्वाभावान्नासंभवः इंद्रियपदव्यावर्त्यमाह (अवस्थांतरइति) सुषुप्तावित्यर्थः । नचैवमपि स्वप्नेऽतिव्याप्तिः तत्रेन्द्रियसत्त्वेपि तद्व्यापारोपरमादिति भावः । ननु सुषुप्ताविन्द्रियसद्भावपक्षेतत्रातिव्याप्तिरित्याशंक्य किमविद्यावृत्तिमादाय तत्रातिव्याप्तिः उतस्वरूपज्ञानमादाय नाद्यः जाग्रति जायमानबाह्यगोचरान्तःकरणवृत्तेरेवेन्द्रियजन्यत्वेन सर्वोपरमलक्षणसुषुप्तिकालवृत्त्यविद्यावृत्तेस्तज्जन्यत्वाभावादित्याह (इंद्रियजन्यज्ञानंचेति) द्वितीयं दूषयति (स्वरूपज्ञानस्येति) ननु निष्प्रयोजनेयमंतःकरणवृत्तिरतो नापेक्षा स्यादित्यत आह (साचेति) ननु चैतन्यप्रकाशसंबंधेनैव घटादिस्फुरणोपपत्तेर्नावरणभंगार्थावृत्तिरित्याशंक्य किं शुद्धचैतन्यं विषयावभासकमुतेश्वरचैतन्यं जीवचैतन्यं वा नाद्यः शास्त्राद्ब्रह्मणो निर्विकारत्वेन विषयानवभासकत्वात न द्वितीयः कल्पितबिंबभावस्यचैतन्यस्य विषयप्रकाशकत्वे तेन जीवस्य व्यावहारिकभेदेन मयावगतमिति घटसंबंधानवभासप्रसंगात् । सर्वदा सर्वविषयावभासापाताच्च । न तृतीयः अंतःकरणावच्छिन्नो जी[illegible]क्षे तस्य [illegible]टादिसंबंधाभावेनानवभासकत्वात् ।

अविद्याप्रतिबिंबः सर्वगतो जीव इति पक्षे तस्यावभासकत्वमिति चेत्तत्राह (तथाहीति) ॥

म०प्र०–तत्र–जाग्रदाद्यवस्थात्रयमध्ये (उपलक्षितकालइति) कदाचित्संबंधिव्यावर्तकरूपोपलक्षणव्यावर्त्यकाल इत्यर्थः । तेन–इंद्रियेत्यादिमूलवाक्यस्योक्तार्थकत्वेन (तद्विशिष्टत्वाभावादिति) व्यावहारिकेन्द्रियजन्यज्ञानसंबंधाभावात्प्राप्तो योऽसंभवोऽव्याप्तिः सा नास्तीत्यर्थः । एवमपि–सुषुप्तावतिव्याप्त्यभावेपि (स्वप्नेतिव्याप्तिरिति) स्वप्ने इंद्रियाणां सत्त्वेन स्वप्नस्यापीन्द्रियजन्यज्ञानकालत्वादिति शेषः । नचेति प्रतिज्ञायां हेतुमाह (तत्रेति) तद्व्यापारेति व्यावहारिकेन्द्रियव्यापारेत्यर्थः । तत्र–सुषुप्तौ (तज्जन्यत्वेति) इन्द्रियजन्यत्वेत्यर्थः । अतः–वृत्तिप्रयोजनाभावात्, अपेक्षा–वृत्त्यभ्युपगमः, शास्त्रात्–असंगोह्ययं पुरुष इत्यादि शास्त्रात्, तेन–कल्पितबिंबभावेश्वरचैतन्येन सह (मयेति) घटादिकं वस्तु मयावगतमित्यस्मदर्थजीवेन सह बहिर्घटाद्यर्थस्य यः संबंधावभासस्तदभावापातादित्यर्थः । ननु जीवस्य वस्तुत ईश्वरचैतन्याभेदात्कथं मयावगतमिति घटसंबंधानवभासप्रसंग इत्याशंक्याह (सर्वदेति) तस्य–जीवस्य ॥

मू०–जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ। घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतंत्रमवस्थापदवाच्यमभ्युपगंतव्यम् एवं सति सर्वदा न घटादेर्भानप्रसंगः अनावृत्तचैतन्यस्यैव भानप्रयोजकत्वात्। तस्य चावरणस्य सदातनत्वे कदाचिदपि घटादिभानं न स्यादिति तद्भंगे वक्तव्ये ॥

शि० म०–(जीवरूपतयेति) तदुपाध्योर्घटाविद्ययोरेकदेशस्थत्वाभावः । ननु घटाद्यावरकस्य मूलाज्ञानादत्यंतभेदेन नानाऽज्ञानापत्तावेकाज्ञानश्रुतिविरोध इत्याशंक्य तत्तद्विषयावरणस्य मूलाज्ञानगतशक्तिभेदतया तत्पारतंत्र्यान्नात्यंतभेद इत्याह (मूलाविद्येति) अतएवोक्तं विवरणाचार्य्यैः मूलाज्ञानस्यैवावस्थाभेदा रजताद्युपादानानीति । नन्वस्तु घटादिचैतन्यावरकमज्ञानं ततः किमित्यत आह (एवंसतीति) तथापि कथं न भानं लाघवेन चैतन्यस्यैव विषयावभासकत्वादित्याशंक्य रूपप्रत्यक्षज्ञानसमये घटतद्गतपा[illegible]णादिग्रहापत्त्या तत्तद्विषयावरणभंगविशिष्टचैतन्यस्यैव वाच्यतया [illegible]स्यापि [illegible]त्वादित्याह

(अनावृत्तेति) ननु घटादिविषयावरणं ब्रह्मावरणवत् संसारदशायामनिवर्त्यमावरणत्वादित्याशंक्य तद्वदेवेदानीं न भानप्रसंग इत्याह (तस्येति) ॥

म० प्र०—तदुपाध्योः—घटावच्छिन्नचैतन्याविद्यावच्छिन्नचैतन्योपाध्योः (एकदेशेति) शुद्धचेतनरूपैकदेशेत्यर्थः । घटाद्यावरकस्य—अवस्थापदवाच्यघटाद्यावरकाज्ञानस्य । एकाज्ञानश्रुतिविरोधः—अजामेकामित्याद्येकाज्ञानबोधकश्रुतिविरोधः, मूलाज्ञानगतशक्तिभेदतया-वह्निगतदाहकत्वप्रकाशकत्वाद्यनुकूलसामर्थ्यविशेषवन्मूलाज्ञानगतशक्तिविशेषतया, तत्पारतंत्र्यात्—मूलाज्ञानान्वयव्यतिरेकप्रयोज्यान्वयव्यतिरेकवत्त्वात्, नात्यंतभेदः—मूलाज्ञानादत्यंतभेदो न, अवस्थाभेदाः—अंशविशेषाः, ततः—घटादिचैतन्यावरकाज्ञानात् । किम्—कीदृशं फलं, लाघवेन—अनावृतचैतन्यस्य विषयभासकत्वापेक्षया चैतन्यमात्रस्य विषयावभासकत्वस्वीकारे लाघवेन, वाच्यतया—तत्तद्विषयभासकत्वं वक्तुमर्हतया (प्रामाणिकत्वादिति) तत्तद्विषयावरणभंगविशिष्टचैतन्यस्य विषयभासकत्वं विनारूपप्रत्यक्षसमये घटतद्गतपरिमाणादेरप्रत्यक्षत्वमनुपपन्नं सत्तत्तद्विषयावरणभंगविशिष्टचैतन्यस्य भासकत्वं कल्पयतीत्यर्थापत्तिसिद्धतयेत्यर्थः । तद्वदेव—ब्रह्मवदेव, इदानीं—संसारदशायाम् । न भासप्रसंगः—घटादीनां प्रत्यक्षत्वं न स्यात् ॥

मू०—तद्भंगजनकं न चैतन्यमात्रं तद्भासकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितं चैतन्यं परोक्षस्थलेपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वाऽऽवरणभंगजनकत्वमित्यावरणाभिभवार्थावृत्तिरित्युच्यते । संबंधार्थावृत्तिरित्यपरंमतं तत्राप्यविद्योपाधिकोऽपरिच्छिन्नो जीवः ॥

शि० म०—ननु आवरणभंगस्यापि चैतन्येनैवोपपत्तेः न तथा वृत्तिरित्याशंक्य किंचैतन्यमात्रं तन्निवर्तकं विशिष्टचैतन्यं वा नाद्य इत्याह (तद्भंगजनकमिति । तद्भासकस्येति) यद्यपि तृणादिप्रकाशकस्याप्यग्नेस्तन्नाशकत्वदर्शनान्नभासकत्वनिवर्त्तकत्वयोर्विरोधस्तथापि घटस्फुरणात्पूर्वंतत्सत्त्वेपि तदावरणभानस्यैव दर्शनेनान्वयव्यभिचारान्ननिवर्त्तकमित्यत्र तात्पर्य्यम् । द्वितीयं दूषयति (नापीति । वृत्तिविशेषस्येति) यावृत्तिर्यद्विषया प्रत्यक्षा सातदावरणभंजिकेत्यर्थः । ननु वृत्तिर्न निवर्त्तिका य[illegible]नमज्ञानंनिवर्त्तकं [illegible]व्यज्ञानस्यैव निवर्तकत्वाभ्युपग-

मादित्यत आह (तदुपाहितेति) अस्मिन्पक्षे तु वृत्तेरवच्छेदकतया तन्निवृत्तिप्रयोजकत्वमिति बोध्यम् उपसंहरति (इत्यावरणाभिभवार्थेति) आवरणाभिभवो नाम चितः प्रतिबिंब इत्येके आवरणशक्तिनाश इत्यन्ये तत्प्रतिबंध इत्यपरे खद्योतादिप्रकाशे महांधकारस्येवाज्ञानस्यैकदेशेन नाश इति संप्रदायविदः। तदुक्तं तत्त्वदीपने प्रतिकर्मव्यवस्थायामावरणाभिभवशब्देनावच्छिन्नात्माऽज्ञाननिवृतिरिति जीवस्य परिच्छिन्नत्वपक्षे वृत्तेः संबंधार्थत्वस्य सुनिरूप्यत्वादपरिच्छिन्नत्वपक्षे तावत्तदुपपादयति (तत्रेति)॥

म०प्र०–नतथावृत्तिः–आवरणभंगार्थावृत्तिर्न स्वीकार्य्या । विशिष्टचैतन्यं–वृत्त्युपहितचैतन्यं परममूले (तद्भासकस्येति) आवरणभासकस्येत्यर्थः । परममूले (तदनिवर्त्तकत्वादिति) आवरणानिवर्त्तकत्वात् । यत्र यद्भासकत्वं तत्र तदनिवर्तकत्वमिति व्याप्तेरित्यर्थः । उक्तव्याप्तेर्भंगमाशंक्य मूलवाक्यस्य तात्पर्य्यमाह (यद्यपीत्यादिना । तन्नाशकत्वेति) तृणादिनाशकत्वेत्यर्थः । घटस्फुरणात्पूर्वम्–घटादिज्ञानात्पूर्वम् तत्सत्त्वेपि–चैतन्यमात्रसत्त्वेपि (तदावरणेति) घटाद्यावरणेत्यर्थः । अन्वयव्यभिचारात्–चैतन्यमात्रसत्त्वेप्यावरणनाशरूपकार्य्याभावदर्शनात् । परममूले (तन्निवृत्त्यापत्तेरिति) अभानापादकावरणनिवृत्त्यापत्तेरित्यर्थः । अस्मिन्पक्षे–वृत्त्युपहितचैतन्यस्यावरणभंगजनकत्वमिति पक्षे, तन्निवृत्तिप्रयोजकत्वम्–आवरणनिवृत्तिकारणत्वम्, चितःप्रतिबिंबः–वृत्तिविशिष्टघटादौ चितोऽभिव्यक्तत्वं यथाराजकीयजनानां मध्ये एकस्याधिकारेऽपरस्थापनमेवैकस्य तिरस्कारस्तथा घटादौ चैतन्यप्रतिबिंब एव घटादिविषयकावरणाभिभव इति भावः । तत्प्रतिबंधः–आवरणस्य स्वकार्य्याक्षमत्वरूपनिरोधः आवरणापसारणं वा तत्त्वदीपने–चतुःसूत्रीव्याख्यानपंचपादिकाव्याख्यानविवरणव्याख्याने, प्रतिकर्मव्यवस्थायाम्–कस्यचित्पुंसः कदाचिदेव कश्चिदेवपदार्थः ज्ञानकर्म नसर्वस्य सर्वदा सर्वइति प्रतिनियतकर्मव्यवस्थायाम् (अवच्छिन्नेति) घटाद्यवच्छिन्नेत्यर्थः। सुनिरूपत्वात्–शरीरान्तः जीवस्य बाह्यघटादिसंबंधस्य वृत्तिंविनाऽसंभवाद्वृत्तेः संबंधार्थत्वस्येष्टत्वात् ॥

मू०–स च घटादिप्रदेशे विद्यमानोपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयाति । घटादिना संबंधाभावात् तत्तदाकारवृत्तिदशायां तु भासयाति तदा संबंधसत्त्वात्।नन्वविद्यो[illegible]िकस्यापरिच्छि[illegible]स्य स्वत-

एव समस्तवस्तुसंबद्धस्य वृत्तिविरहदशायां संबंधाभावाभिधानमसंगतम्, असंगत्वदृष्ट्या च संबंधाभावाभिधाने वृत्त्यनंतरमपि संबंधो न स्यादिति चेत् उच्यते, नहि वृत्तिविरहदशायां जीवस्य घटादिना सह संबंधसामान्यं निषेधामहे; किं तर्हि घटभानप्रयोजकं संबंधविशेषं स च संबंधविशेषो विषयस्य जीवचैतन्यस्य च व्यंग्यव्यंजकभावलक्षणः कदाचित्कस्तदाकारवृत्तिनिबंधनः ॥ का

शि० म०–नन्वपरिच्छिन्नत्वपक्षे जीवस्याविद्योपाधिवत्सकलसंयोगितया कथं तत्संबंधार्थावृत्तिरित्याशंक्य संबंधसत्त्वेपि घटादिभानप्रयोजकसंबंधाभावात्तदर्थावृत्तिरित्याशयेनाह (सचेति) आशयमविद्वान् शंकते (नन्विति) वृत्तिविरहदशायां संबंधाभावादित्येतत्संबंधसामान्यनिषेधपरं पारमार्थिकतन्निषेधपरं वा तत्राद्यं निराकृत्य द्वितीयं निरस्यति (असंगत्वेति) असंगो नहि सज्जते इत्यादिश्रुत्यापारमार्थिकप्रपंचसंबंधनिषेधावगमादित्यर्थः । (संबंधोनस्यादिति) पारमार्थिक इति शेषः । स्वाशयमुद्घाटयति (नहीति) ननु घटादिस्फुरणप्रयोजको न संयोगोऽतिप्रसंगात् । नापि समवायः अनभ्युपगमात् । अभ्युपगमेवा तस्य नित्यत्वादित्यत आह (सचेति व्यंग्येति) जीवस्य घटादिभासकत्वे तदाकारवृत्त्युपहितत्वं तद्भास्यत्वे घटादेस्तदुपाधिवृत्तिविषयत्वं प्रयोजकमित्यर्थः ॥

म० प्र०–(अविद्योपाधिवदिति) अविद्योपाधेर्यथा सकलकार्य्यसंबंधित्वंतद्वदित्यर्थः । अविद्योपाधिना सह यथा जीवसंबंधस्तद्वदिति वार्थः । तत्संबंधार्था–जीवसंबंधार्था, संबंधसत्त्वेपि–जीवचैतन्यस्य घटादिना सह घटादिनिष्ठाधेयतानिरूपिताधिष्ठानत्वाख्यसंबंधसत्त्वेपि (घटादिभानप्रयोजकेति) वक्ष्यमाणव्यंग्यव्यंजकभावलक्षणेत्यर्थः । तदर्था–व्यंग्यव्यंजकभावलक्षणजीवसंबंधार्था, आशयम्–व्यंग्यव्यंजकभावलक्षणसंबंधविशेषनिषेधविषयकाशयम्, इत्येतत्–वाक्यमितिशेषः (संबंधासामान्येति) कल्पिताकल्पितविभागशून्यसंबंधत्वावच्छिन्नसंबंधेत्यर्थः (तन्निषेधेति) संबंधनिषेधेत्यर्थः तस्य–समवायस्य (नित्यत्वादिति) वृत्तेर्वैयर्थ्यमिति शेषः । घटादिभासकत्वे–घटादिज्ञातृत्वे । तदाकारवृत्त्युपहितत्वं–घटाद्याकारवृत्तिबिंबितत्वम् । तद्भास्यत्वे–जीवभास्यत्वे ([illegible] वृत्तीति) जीवोप[illegible]ःकरणादिवृत्तीत्यर्थः ॥

Funding by IKS-MoE

सू०—तथाहि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात्स्वत एव जीवचैतन्याभिव्यंजनसमर्थं घटादिकं तु न तथा अस्वच्छद्रव्यत्वात् स्वाकारवृत्तिसंयोगदशायां तु वृत्त्याभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यंजनयोग्यताश्रयतयाच वृत्त्युदयानंतरं चैतन्यमभिव्यनक्ति तदुक्तं विवरणे अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयति दृष्टं चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसंबंधदशायां प्रतिबिंबग्राहित्वं यथा कुड्यादेर्जलादिसंयोगदशायां मुखादिप्रतिबिंबग्राहिता घटादेरभिव्यंजकत्वं च तत्प्रतिबिंबग्राहित्वं चैतन्याभिव्यक्तत्वं च स्य तत्र प्रतिबिंबितत्वम् ॥

शि० म०—ननु चैतन्यवद्वृत्तिरपि यदि प्रकाशस्वभावा तर्हि सैवास्तु घटप्रकाशिका किंचैतन्येन जडात्मिकाचेत्तर्हि वस्त्रादिनेव तया घटादेरावरणापत्तेरित्याशंक्य सवितृकिरणस्य दर्पणसंबंधेनेवात्यच्छान्तःकरणसंबंधाच्चैतन्यस्य विषयप्रकाशकत्वमुपपद्यते इत्याह (तथाहीति) तर्हि घटादेरस्वच्छतयाऽनवभासकत्वे विषयस्यापरोक्षस्थलेभिव्यंजकत्वाभ्युपगमो विरुद्धयेतेत्यंत आह (स्वाकारवृत्तीति) चैतन्यमभिव्यनक्तीत्यत्र घटादिकमित्यनुषंगः । ननु यस्य स्वच्छता तस्यवान्तःकरणस्य व्यंजकता नतु तत्संयोगिनो विषयस्येत्यत आह (दृष्टंचेति) ननु घटादेर्नचैतन्याभिव्यंजकत्वमिन्द्रियादेरेव साक्षात्कारणत्वेन व्यंजकत्वात् । नचालोकवद्घटावच्छिन्नचैतन्यगोचराज्ञानलक्षणतमोनिवर्तकतया विषयस्य व्यंजकत्वमिति वाच्यम् । वृत्तेरेवावरणनिवर्तकत्वेनोक्तत्वादित्याशंक्याह (घटादेरिति) ॥

म० प्र०—तर्हि—वृत्तेः प्रकाशस्वभावत्वे सैव वृत्तिरेव, तर्हि—वृत्तेर्जडात्मकत्वे । घटादेः घटाद्यवच्छिन्नचैतन्यस्य (सवितृकिरणस्येति) यथा सवितृदीपादिकिरणानां दर्पणादिसंबंधेन विशेषेण घटादिभासकत्वं नतु दर्पणादेः सवित्रादिकिरणावरकत्वं यथा वा नयनकिरणानामुपनेत्रसंबंधद्वा[illegible] विशेषेण रेखादिप्रकाशकत्वं नतूपनेत्रस्य नयनकिरणोपरोधकत्वं तथा स्वच्छान्तःकर[illegible]बंधेन घटादिचैत[illegible]यादिविष-

Funding by IKS-MoE

यप्रकाशकत्वंनत्वंतःकरणस्यघटादिचैतन्यावरकत्वमित्यर्थः । परमूले (स्वतएवेति) स्वरूपेणैवेत्यर्थः परमूले (अभिव्यंजनेति) प्रतिबिंबग्राहित्वेत्यर्थः । तर्हीत्यस्यैवानभासकत्वेत्यंतं विवरणम्, अनवभासकत्वे—अनभिव्यंजकत्वे (इत्यनुषंगइति) तथाच चैतन्यप्रतिबिंबग्राहित्वानुकूलव्यापारवद्घटादिकमित्यर्थः । तत्संयोगिनः—अन्तःकरणसंबंधिनः (साक्षादिति) घटाद्यपरोक्षज्ञानेत्यर्थः । परमूले (तत्प्रतिबिंबेति) चैतन्यप्रतिबिंबेत्यर्थः ॥

मू०—एवंविधाभिव्यंजकत्वासिद्ध्यर्थमेव वृत्तेरपरोक्षस्थले बाहर्निर्गमनांगीकारः परोक्षस्थलेतु वह्न्यादेर्वृत्तिसंयोगाभावेन चैतन्यानभिव्यंजकतया नापरोक्षत्वं तन्मते विषयाणामपरोक्षत्वं चैतन्याभिव्यंजकत्वमिति द्रष्टव्यम् । एवं जीवस्यापरिच्छिन्नत्वेपि वृत्तेः संबंधार्थत्वं निरूपितमिदानीं परिच्छिन्नत्वपक्षे संबंधार्थत्वं निरूप्यते । तथाहि अन्तःकरणोपाधिको जीवः ॥

शि० म०—ननु वृत्तिविषयस्य घटादेः कथं वृत्तिसंयोगादिवशादभिव्यंजकत्वं लाघवेन वृत्तिसंबधस्यैव तत्प्रयोजकत्वोपपत्तेरित्यत आह (एवंविधेति) अन्यथा संबंधमात्रस्य चैतन्याभिव्यंजकत्वप्रयोजकत्वे वृत्तेरपरोक्षस्थले बहिर्निर्गमनवैयर्थ्यापत्तेरिति भावः । किंच तत्संबंधमात्रस्यप्रयोजकत्वे परोक्षस्थले वह्न्यादेरपि वृत्तिविषयतया तत्संबंधित्वेनापरोक्षत्वापत्तिः वृत्तिसंयोगस्य प्रयोजकत्वे तु नायं दोष इत्याह (परोक्षेति) ननु संबंधस्यप्रयोजकत्वे वह्न्यादेरभिव्यंजकत्वेपि नापरोक्षत्वं संविदभिन्नत्वस्य विषयप्रत्यक्षलक्षणत्वेनोक्तस्य तत्राभावादित्यत आह (.एतन्मतेति) ॥

म० प्र०—कथं—केन हेतुना, लाघवेन—वृत्तिसंबद्धघटादेश्चैतन्याभिव्यंजकत्वापेक्षया वृत्तिसंबंधस्य चैतन्याभिव्यंजकत्वे लघुत्वेन, तत्प्रयोजकत्वोपपत्तेः—वृत्तिसंबंधसत्त्वे घटादौ चैतन्याभिव्यक्तिः वृत्तिसंबंधाभावे घटादिचैतन्याभिव्यक्त्यभाव इति वृत्तिसंबंधस्यैव घटादिचैतन्याभिव्यंजकत्वकारणत्वोपपत्तेः, अन्यथा—वृत्तिसंबद्धघटादेरभिव्यंजकत्वानंगीकारे ।.संबंधमात्रस्य—विषयविषयीभावादिसंबंधसामान्यस्य, तत्संबंधमात्रस्य—वृत्तिसंबंधसामान्यस्य, प्रयोजकत्वे—घटादिविषयचैतन्याभिव्यंजकत्वकारणत्वे (प[illegible]ति) परोक्षपर्व[illegible]वकरणे इत्यर्थः (वह्न्यादेरपीति) वह्न्या-

Funding by IKS-MoE

देरप्यपरोक्षत्वापत्तिरित्यन्वयः तत्र हेतुमाह (वृत्तिविषयतयातत्संबंधित्वेनेति) वह्न्यादेर्वृत्तिविषयताभिन्नो यो वृत्तिसंबंधस्तद्वत्त्वेनेत्यर्थः (नायंदोषइति) चैतन्यविषययोर्व्यंग्यव्यंजकभावलक्षणसंबंधविशेषार्थावृत्तिरंगीकृता वृत्तिरपि संयोगादिसंबंधविशेषेणैव चैतन्यविषययोर्व्यंग्यव्यंजकभावलक्षणसंबंधविशेषप्रयोजिका नतु विषयविषयिभावादिसंबंधसामान्येन चैतन्यविषययोर्व्यंग्यव्यंजकभावलक्षणसंबंधस्य प्रयोजिका विषयविषयिभावादिसंबंधसामान्येन वृत्तेश्चैतन्यविषययोर्व्यंग्यव्यंजकभावलक्षणसंबंधविशेषप्रयोजकत्वांगीकारे तु परोक्षपर्वताद्यधिकरणे वह्न्यादावपि विषयतासंबंधेन वृत्तेः सत्त्वात्परोक्षस्थले वह्न्यादेरपि प्रत्यक्षत्वापत्तिरिति भावः । संबंधस्य–वृत्तेर्विषयतादिसंबंधसामान्यस्य, प्रयोजकत्वे–यत्र वृत्तेर्विषयतादिसंबंधस्तत्र चैतन्याभिव्यंजकत्वमिति वृत्तेर्विषयतादिसंबंधसामान्यस्य विषयचैतन्याभिव्यंजकत्वाव्याप्यत्वे, तत्र–वह्न्यादौ परममूले (एतन्मतेइति) चैतन्यविषययोर्व्यंग्यव्यंजकभावलक्षणसंबंधार्थावृत्तिरिति मते इत्यर्थः ॥

मू०–तस्य च न घटाद्युपादानता घटादिदेशासंबंधात् । किंतु ब्रह्मैव घटाद्युपादानं । तस्य मायोपहितचैतन्यस्य सकलघटाद्यन्वयित्वात् । अत एव ब्रह्मणः सर्वज्ञता । तथाच जीवस्य घटाद्यधिष्ठानब्रह्मचैतन्याभेदमंतरेण घटाद्यवभासासंभवे प्राप्ते तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिद्ध्यर्थं घटाद्याकारवृत्तिरिष्यते । ननु वृत्त्यापि कथं प्रमातृविषयचैतन्ययोरभेदः संपाद्यते । घटान्तःकरणरूपोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासंभवादिति चेन्न वृत्तेर्बहिर्देशनिर्गमनांगीकारेण वृत्त्यन्तःकरणविषयाणामेकदेशस्थत्वेनोपधेयभेदाभावस्योक्तत्वात् । एवमपरोक्षस्थले मतभेदेन वृत्तेर्विनियोग उपपादितः । इंद्रियाजन्यविषयगोचरापरोक्षान्तःकरणवृत्त्यवस्था स्वप्नावस्था । जाग्रदवस्थाव्यावृत्त्यर्थमिंद्रियाजन्येति अविद्यावृत्तिमत्यां सुषुप्तावतिव्याप्तिवारणायान्तःकरणेति । सुषुप्तिर्नामाविद्यागोचराऽविद्यावृत्त्यवस्था ॥

शि० म०-जीवस्य परिच्छिन्नत्वेपि घटाद्यधिष्ठानचैतन्याभिन्नत्वेन स्वत एव तत्संबंधितया कथं वृत्तेस्संबंधार्थत्वमित्याशंक्य किं जीवस्य स्वत एव घटाद्यधिष्ठानत्वान्न वृत्तिसंबंधापेक्षा तदुपादानचैतन्याभेदाद्वा तत्राद्यं दूषयति (तस्यचेति) तर्हि चैतन्यमात्रं नोपादानं स्यात निष्कलंकत्वश्रुतिविरोधेन शुद्धचैतन्यस्याप्यनुपादानत्वादिति शंकते (किंत्विति) कल्पितबिंबभावमीश्वरपदवाच्यं ब्रह्मैवजगदुपादानमित्याह (ब्रह्मैवेति) द्वितीयेतु कल्पितभेदस्य जीवस्य तदुपादानचैतन्याभेदो न वृत्तिंविना संभवतीति वृत्तिसंबंधापेक्षादुर्वारेत्याह (तथाचेति) वृत्तिप्रयोजनमुपसंहरति (एवमिति) एवमिन्द्रियजन्यान्तःकरणवृत्त्यवस्थाजाग्रदितिजाग्रदवस्थां निरूप्य स्वप्नावस्थां निरूपयति (इंद्रियाजन्येति) यथाच स्वाप्नं ज्ञानमिन्द्रियाजन्यं तथोपपादितमधस्तात् ॥

म०प्र०-स्वतएव-वृत्तिंविनैव, तत्संबंधितया-घटादिसंबंधितया, स्वतएव-घटाद्युपादानचैतन्याभेदं विनैव (तदुपादानेति) घटाद्युपादानेत्यर्थः । तत्र-पक्षद्वययोर्मध्ये, तर्हि-जीवचैतन्यस्य घटाद्यनुपादानत्वे सति, निष्कलंकत्वश्रुतिविरोधेन-असंगोह्ययं पुरुषोऽसंगो नहि सज्जते इत्यादि निर्धर्मकत्वबोधकश्रुतिविरोधेन (तदुपादानेति) घटाद्युपादानेत्यर्थः । परममूले (तदवच्छिन्नेति) घटान्तःकरणावच्छिन्नेत्यर्थः । परममूले (विनियोगइति) उपयोगः सफलत्वमिति यावत् । परममूले (इन्द्रियाजन्येति) आगंतुकदोषजन्येत्यर्थः । तेन सुखादिगोचरतत्त्वमस्यादिवाक्यजन्यब्रह्मादिगोचरापरोक्षान्तःकरणवृत्त्यवस्थायां जाग्रतिस्वप्नलक्षणस्य नातिव्याप्तिरिति ध्येयम् ॥

मू०-जाग्रत्स्वप्नयोरविद्याकारवृत्तेरन्तःकरणवृत्तित्वान्न तत्रातिव्याप्तिः । अत्रकेचित् मरणमूर्च्छयोरवस्थांतरत्वमाहुः । अपरे सुषुप्तावेवतयोरंतर्भावमाहुः तत्र तयोरवस्थात्रयांतर्भावबहिर्भावयोस्त्वंपदार्थनिरूपणे उपयोगाभावान्न तत्र यत्यते तस्य मायोपाध्यपेक्षयैकत्वमन्तःकरणोपाध्यपेक्षया नानात्वं व्यवह्रियते । एतेन जीवस्याणुत्वंप्रत्युक्तं बुद्धेर्गुणेनात्मगुणेनचैवाराग्रमात्रोह्यवरोपि दृष्ट इत्यादौ जीवस्य बुद्धिशब्दवाच्यान्तःकरणपरिमाणोपाधिकस्य [illegible]त्वश्रवणात् ॥ रिमाणत्व

शि० म०–साक्षादविद्योपादानावृत्तिरविद्यावृत्तिः साच नित्यसुखगोचरा अविद्यागोचराचातएव सुप्तोत्थितानुभवः सुखमहमस्वाप्सं न किंचिदवेदिषमिति तदवस्थासुषुप्तिरिति विवक्षितम् । तेन घटमहं न जानामीत्यविद्यागोचरां परंपरया तदुपादानान्तःकरणवृत्तिमादाय जाग्रत्स्वप्नयोर्नातिव्याप्तिरित्याह (जाग्रादिति) रामानुजादिमतं दूषयति (एतेनेति) चैतन्यात्मकस्य जीवस्य किंपारमार्थिकमणुत्वमौपाधिकं वा नाद्यः अद्वितीयादिश्रुतिविरोधेन तदयोगात् । न द्वितीयः जीवस्याविद्योपाधिकत्वपक्षे तद्वदेवव्यापकत्वात्, अन्तःकरणोपाधित्वे च मध्यमपरिमाणत्वात् उपाधिपरिमाणसमानपरिमाणस्य घटावच्छिन्नाकाशादौ दर्शनात 'बुद्धेर्गुणेनाराग्रमात्र' इत्यौपाधिकपरिच्छेदश्रवणाच्च । क्वचिदणुत्वश्रवणस्य दुर्ज्ञेयवस्त्वभिप्रायत्वात् । अन्यथा अणोरणीयानिति श्रवणादात्मा अणोरप्यणुः स्यात् । अणुत्वे च प्रत्यक्षत्वानुपपत्तेः । शरीरव्यापिसुखाद्यनुभवानापत्तेश्च । नचात्मत्वमणुद्रव्यवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात पृथिवीत्ववत् मनोऽनणुत्वपक्षे मनस्त्वे व्यभिचारात् ॥

म०प्र०–(तदुपादानेति) अविद्योपादानेत्यर्थः । परममूले (तत्रेति) जाग्रत्स्वप्नयोरित्यर्थः । परममूले (अत्रेति) अवस्थानिरूपणावसरे इत्यर्थः । परममूले (तत्रेति) एवंवादिविवादेसतीत्यर्थः । परममूले (अवस्थात्रयेति) अवस्थात्रयान्यतमेत्यर्थः । परममूले (तत्रेति) मरणमूर्च्छयोरवस्थात्रयान्यतमान्तर्भावबहिर्भावयोः परममूले (तस्येति) जीवस्येत्यर्थः परममूले (एतेनेति) वक्ष्यमाणहेतुनेत्यर्थः परममूले (बुद्धेर्गुणेनेति) बुद्ध्यादिरूपोपाधेरल्पपरिमाणरूपगुणेनैवाराग्रमात्रोऽल्पपरिमाणको दृष्टः शास्त्रतोज्ञातः आत्मगुणेन निरुपाधिकस्वरूपात्मनोऽपरिच्छिन्नत्वादिलक्षणगुणेनैवावरो न वरो महान् यस्मात्स तथा दृष्ट इत्यर्थः । तदयोगात्–जीवस्य पारमार्थिकाणुत्वायोगात्, तद्वदेव–ईश्वरवदेव–

बालाग्रशतभागस्य शतधा कल्पितस्य च ॥
जीवोभागः सविज्ञेयः सचानंत्यायकल्प्यते ॥

इत्यादिश्रुतिमवलंब्य शंकते (आत्मत्वमिति । द्रव्यत्वसाक्षादिति) गुणत्वव्याप्यजातिरूपत्वादौ व्यभिचारवारणाय द्रव्यत्वेति घटत्वादौ व्यभिचारवारणाय साक्षादिति ॥

मू०–स च जीवः स्वयं प्रकाशः स्वप्नावस्थामधिकृत्यात्रायं
पुरुषः स्वयं ज्योतिरितिश्रुतेः ॥

शि० म०–अनात्मवृत्तित्वस्योपाधित्वात् आत्मत्वं नाणुनिष्ठमात्ममात्रवृत्तित्वादीश्वरत्ववदिति प्रयोगाच्च । तस्मान्नाणुर्जीव इति एवं जीवस्य जाग्रदवस्थादिकं कल्पितं धर्मं निरूप्य संप्रति तस्य पारमार्थिकं रूपं निरूपयति (सचेति) तत्र बृहदारण्यकोपनिषद्वचनं प्रमाणयति (स्वप्नावस्थामिति) नचायं शब्दः परमात्मपरः समनंतरवाक्यविरोधात । तथाहि आत्मैवास्य ज्योतिरित्युक्त्वा कतम आत्मा योयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुषः सवा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः संसृज्यते स उत्क्रामन् म्रियमाण इति चोक्त्वा उत्तरत्र स्वयं विहत्य स्वयं निर्माय स्वेनभासा स्वेनज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयं ज्योतिरित्यादिना स्वप्रकाशस्यैव स्वप्नावस्थामुपदर्शयंतो वेदांताजीवात्मानमेव स्पष्टमुपस्थापयंति तथाचास्य ज्योतिरात्मास्वरूपमित्यर्थः । राहोः शिर इतिवत् षष्ठ्युपपत्तेः तदेतदभिप्रेत्याह (स्वप्नावस्थामधिकृत्येति) ॥

म० प्र०–ननु मनसोऽनणुत्वमेव नास्तीति कथं मनस्त्वे व्यभिचार इत्याशंक्य नचेति प्रतिज्ञायामेव हेत्वंतरमाह (अनात्मेति) उपाधित्वादिति यत्राणुद्रव्यवृत्तित्वं तत्रानात्मवृत्तित्वं यथा पृथिवीत्वे इति साध्यव्यापकत्वं यत्र द्रव्यत्वसाक्षाद्व्याप्यजातित्वं तत्रानात्मवृत्तित्वं नास्ति यथाऽऽत्मत्वे इति साधनाव्यापकत्वमिति ध्येयम्, तस्य–जीवस्य, तत्र–आत्मनः स्वप्रकाशत्वे (समनंतरेति) अव्यवहितपूर्ववाक्येत्यर्थः (आत्मैवेति) अस्य शिरःपाण्यादिमतः कार्य्यकारणसंघातरूपपुरुषस्यात्मैवचिद्रूप आत्मैवज्योतिरित्यर्थः । कतम आत्मेत्यादिवाक्यजातं बृहदारण्यकषष्ठाध्यायस्थं बोध्यम् । हृद्यन्तः ज्योतिः पुरुषइत्यत ऊर्ध्वं सवा अयमित्यतः पूर्वं ससमानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव सहि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्योरूपाणीति वाक्यं बोध्यमस्य सर्वस्यायमर्थः । इह बुद्ध्यादयो बहवः पदार्थाः सांति तेषु कतम आत्मेति पृष्टे तत्स्वरूपं प्राणादिभिन्नत्वेन दर्शयति योयमिति हे राजन् यस्त्वया पृष्टः सोयं विज्ञानमयो विज्ञायतेऽनेनेतिव्युत्पत्तेर्विज्ञानं बुद्धिस्तन्मयस्तत्प्रायः प्राणेष्विति सामीप्यलक्षणासप्तमीविज्ञानमयस्य बुद्ध्यादिव्यतिरेकप्रदर्शनाय ज्ञानेन्द्रियकर्मेन्द्रियपंचवाय्वाख्यपंचदशप्राणसमीपस्थः हृद्यंतः ज्योतिः लक्षणया हृदयस्थबुद्धावंतर्वर्त्तमानं ज्योतिरात्मा आत्मनैवायं ज्योतिषेत्युपक्रमात् पुरुषः पूर्णः तथाच विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिः पुरुष इत्येतैः पंचविशेषणैः क्रमेण बुद्धिप्राणादि तत्सदृशबुद्धिवृत्त्यव्यापकत्वविषयकाः पंचशंकानि[illegible] एवं बुद्ध्याद्यतिरिक्त[illegible]मुक्तस्यात्मनो विद्यया बुद्ध्यध्यासादेव

संसारित्वमिति दर्शयितुमाह (सइति) सहृद्यंतज्योंतीरूप आत्मा समानः सन् बुद्धया सदृशः सन्नन्योन्यधर्माध्यासे सति तप्तायःपिंडवत्तादात्म्यमापन्नः सन्नेवोभौ लोकौ प्राप्तव्याविह लोकपरलोकावनुक्रमेणोपेतदेहं त्यजन्नन्यं च देहमुपाददत्संचरति न स्वतः एतदेवप्रत्यक्षेणाभिनीयदर्शयति (ध्यायतीवेति) यतो ध्यानव्यापारवती .बुद्धिरतस्तद्गतः सन्नवभासयन्नात्मापि ध्यायतीवध्यानं करोतीव ज्ञायते नतु परमार्थतो ध्यानं करोति तथा लेलायतीव बुद्धयादिकरणेषु प्राणादिवायुषु च चलत्सु तदवभासकतया तत्समानआत्मापि चलतीव नतु परमार्थतश्चलति । यथा चलंत्यां नावि नौस्थेन पुरुषेण तीरस्था वृक्षाश्चलंतीति प्रतीयंते तद्वदित्यर्थः । कुतो हेतोरेतदवगम्यते इत्यत आह (सहीति) हि यस्मात्स आत्मास्वप्नो भूत्वा स्वप्नकारपरिणतधीवृत्त्यवभासकत्वेन तदाकारो भूत्वेमं लोकं जागरितकार्य्यकरणसंघातलक्षणमतिक्रामति तदभिमानंत्यजतीति यावत् । तथा मृत्योरूपाणि चातिक्रामति मृत्युरज्ञानं रूप्यते ज्ञाप्यते यैरहंकारादिभिस्तानि मृत्योरूपाण्यतिक्रामत्यतः संचरणादिकं नात्मनः स्वाभाविकं स्वभावस्य वह्न्युष्णत्वस्येव स्वसद्भावे सत्यतिक्रमणायोगादित्यर्थः । यथैकस्मिन्देहे स्वप्नजागरिते आचरत आत्मनो देहव्यतिरिक्तत्वं तथेह लोकपरलोकयोः संचारोक्त्यापि तद्व्यतिरेकित्वमाह (सइति) सोयं प्रकृतः पुरुषो जायमानः उत्पद्यमानो नं घटादिवत्स्वरूपत उत्पद्यमानः किंतु शरीरमभिसंपद्यमानस्तत्रात्मभावं प्रतिपद्यमानो वै एव सन् पाप्मभिर्लक्षणया धर्माधर्माश्रयैः कार्य्यकरणैः संसृज्यते स एव पुनर्देहाद्यारंभककर्मक्षये सति म्रियमाण इत्यस्य व्याख्या उत्क्रामन् शरीरांतरसंयोगायोर्द्धमक्रामन् तानेव संसृष्टान् पाप्मनः कार्यकरणलक्षणान् विजहाति परित्यजत्यभिमानत्यागमात्रेणेत्यर्थः । स्वयं विहत्य स्वयमेव जाग्रद्देहं निःसंबंधमापाद्य स्वयं निर्मायस्वयमेव स्वकर्मानुसारेण प्रातिभासिकस्वप्नदेहं निष्पाद्य स्वेन आत्मीयेन भासा दीप्त्या वासनोपादानलक्षणान्तःकरणवृतिरूपप्रकाशस्वरूपेणेति यावत् स्वेन ज्योतिषाआत्मस्वरूपज्योतिषाऽलुप्तदृक् स्वरूपेण निर्मितवस्तुविषयीकुर्वन प्रस्वपित्यत्रास्यां स्वप्नावस्थायामयं पुरुष आत्मा स्वयमेव ज्योतिर्भवति तदादित्यादेरभावादिन्द्रियाणां चोपसंहतत्वान्मनसोविषयाकारेणैवापक्षयादिति परिशेषादित्यर्थः ॥

मू०-अनुभवरूपश्च प्रज्ञानघन एवेत्यादि श्रुतेः । अनुभवामीति व्यवहारस्तु वृत्तिप्रतिबिंबितचैतन्यमादायोपपद्यते । एवं त्वंपदार्थो निरूपितः ॥

शि० म०-किंच जीवः स्वप्रकाशः चिद्रूपत्वाच्चिद्वत् । स्वप्रकाशत्वं सजातीयप्रकाशाप्रकाश्यत्वम । नच [illegible] चिद्रूपत्वमसिद्धं [illegible] श्रवणा-

दित्याह (अनुभवरूपइति) योयं विज्ञानघनःइत्यादिश्रुतिरादिपदग्राह्या किंच घटज्ञानयोस्संबंध आत्मनिष्ठः ज्ञाननिष्ठत्वात्सत्तावत् । अपिच आत्मा ज्ञानरूप आत्मान्यविषयान्यत्वात् ज्ञानवत् नचाप्रयोजकता आत्मा यदि यावत्स्वस्थितिसमानकालीनज्ञानाविषयत्वे सति ज्ञानरूपो न स्यात् स्वनिष्ठप्रकारकस्वविशेष्यकसंशयादिविषयः स्यात् घटादिवदिति बाधकतर्कसत्त्वात्ततश्च जीवः स्वप्रकाशः ॥

म० प्र०—जीवः—जीवपदलक्ष्यः, चिद्रूपत्वात्—जडभिन्नत्वात्, चिद्वत्—ज्ञानत्वेनाभिमतमुख्यज्ञानपदार्थवत् (सजातीयेति) नच दीपादावपि तेजस्त्वेन सजातीयप्रकाशाप्रकाश्यत्वसत्त्वात्स्वप्रकाशत्वं स्यादिति वाच्यम् । इष्टत्वादन्यथाविभुत्वे सतीत्यस्यापिस्वप्रकाशलक्षणे निवेशादिति । परममूले (वृत्तिप्रतिबिंबितचैतन्यमिति) वृत्तिप्रतिबिंबितचैतन्याश्रयोहमिति प्रकारेणोपपद्यते नचास्मदर्थस्य प्रमातुः कथं वृत्तिप्रतिबिंबितचैतन्याश्रयत्वमिति वाच्यम् । प्रमातुर्वृत्त्याश्रयत्वेन वृत्त्युपहितचैतन्याश्रयत्वस्य संभवात् । नच वृत्त्याश्रयत्वमन्तःकरणस्यैव न प्रमातुरिति वृत्त्याश्रयत्वेनेत्युक्तिरनुपपत्तेरिति वाच्यं, प्रमातुरन्तःकरणघटितत्वेनान्तःकरणवृत्त्याश्रयत्वस्य संभवादित्यर्थः । घनः—मूर्तिः, संबंधः—विषयविषयीभावादिसंबंधः, आत्मनिष्ठः—आत्मनिष्ठाधिकरणतानिरूपिताधेयतावान्, ज्ञाननिष्ठत्वात्—ज्ञाननिष्ठाधिकरणतानिरूपिताधेयतावत्त्वात् । नच गुणत्वानात्मत्वविषयेंद्रियसंयोगजन्यत्वादिषु ज्ञाननिष्ठत्वस्य सत्त्वेन गुणत्वादिषु व्यभिचार इति वाच्यम् । ज्ञाने गुणत्वादीनामनंगीकारात्, नचोभयवादिसंमतदृष्टांताभावेनानुमानं न संभवतीति वाच्यम् । परसंमतदृष्टांतेनाप्यनुमानसंभवादिति, आत्मा—लक्ष्यात्मपदार्थः (आत्मान्यविषयान्यत्वादिति) विषयान्यत्वादित्युक्तेह्यात्मनोपि वृत्तिविषयत्वेन स्वरूपासिद्धिः स्यात्तद्वारणायात्मान्येति आत्मान्यत्वादित्युक्ते हि पुनः स्वरूपासिद्धिस्तद्वारणाय विषयान्यत्वेति (यावत्स्वस्थितीति) यावत् यावत्कालपर्यंतं स्वस्थितिः सुखदुःखादिस्थितिस्तत्समानकालीनं यज्ज्ञानं सुखदुःखादिज्ञानं तदविषयत्वे सति ज्ञानरूपत्वाभावो घटादिषु तत्रैव स्वं घटादयस्तन्निष्ठं यत् घटत्वादिकं तत्प्रकारकघटादिविशेष्यकसंशयादिविषयत्वमपिप्रथमस्वपदेन घटादिकं धर्तुं न शक्यते घटादिज्ञानस्य तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वेन यावद्घटादिस्थितिसमानकालीनघटादिज्ञानाप्रसिद्धेः सुखादिज्ञानस्य तु सुखादिस्थितिसमानकालीनत्वं संभवति सुखादीनां ज्ञातसत्ताकत्वेनाज्ञातसत्ताकत्वाभावात् । यत्र ज्ञानरूपत्वाभावस्तत्र स्वनिष्ठप्रकारकस्वविशेष्यकसंशयादिविषयत्वमित्युक्ते हि सुखादीनामपि संशयादिविषयत्वं स्यादतः स्वस्थितिसमानकालीनज्ञानाविषयत्वे सतीत्युक्तं उक्ततर्कासंभववारणाय यावदिति यावत्काल

मू०–अधुना तत्त्वं पदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभिधीयते ॥

शि० म०–विषयप्रतियोगिनिरूपणानंतरं विषयनिरूपणं प्रतिजानीते (अधुनेति । महावाक्येति) सत्यं ज्ञानमनंतं ब्रह्मेत्यादि वाक्यमवांतरवाक्यं तत्त्वमस्यहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादि वाक्यं महावाक्यं तेन शक्त्या लक्षणया वा तदैक्यं प्रतिपाद्यमित्यर्थः । अनेन चास्य विषयत्वमुक्तम् अन्याप्रतिपाद्यत्वे सति तत्प्रतिपाद्यस्य तद्विषयत्वात् । द्वादशलक्षणीधर्ममीमांसा सपरिकरधर्मनिरूपणपरान सिद्धार्थपरा विधिवाक्यानामेव तत्र विचारितत्वात् ॥

म०प्र०–स्वस्थितिर्भवति तावत्कालपर्य्यंतं ज्ञानं विवक्षितं नापि न्यूनकालिकं नाप्यधिककालिकमतो घटादिकाल न्यूनकालिकघटादिज्ञानमादाय नोक्ततर्कासंभवः आत्मा यदि यावत्स्वस्थितिसमानकालीनज्ञानाविषयत्वे सति ज्ञानरूपो न स्यात्तदा संशयादिविषयः स्यादित्युक्ते हि आत्मागुणो न वेति गुणत्वप्रकारकात्मविशेष्यकसंशयस्तु भवत्येवेति नैयायिकं प्रत्यनिष्टोद्भावनमेव न स्यादतः स्वनिष्ठप्रकारकेति अहं वा न वेति अहंत्वादिप्रकारकसंशयः स्यादिति भावः । स्वविशेष्यकपदानादाने तु इदं शरीरमहं वा नवेत्यहंत्वादिप्रकारकेदमर्थविशेष्यकसंशयो नैयायिकमते भवत्येवेति पुनरापि नैयायिकं प्रत्यनिष्टापादनं न स्यादतः स्वविशेष्यकेति अहं वा नवेत्यहंत्वप्रकारकास्मद्विशेष्यकसंशयः स्यादिति भावः (प्रतियोगिनिरूपणेति) ऐक्यनिरूपकतत्त्वंपदार्थनिरूपणेत्यर्थः अवांतरवाक्यं–तत्त्वं पदार्थान्यतरबोधकवाक्यम् । महावाक्यं–तत्त्वंपदार्थैक्यबोधकवाक्यं तेन–महावाक्येन, तदैक्यं–तत्त्वंपदार्थैक्यम्, अनेन–महावाक्यप्रतिपाद्यमिति वाक्येन, अस्य–ऐक्यस्य अन्यथाप्रतिपाद्यत्वे सति यत्प्रतिपाद्यत्वं यत्र तत्रतद्विषयत्वमिति सामान्यव्याप्तिमभिप्रेत्यैक्यस्य वेदांतविषयत्वे हेतुमाह (अन्याप्रतिपाद्यत्वेसतीति) वेदांतान्याप्रतिपाद्यत्वे सतीत्यर्थः । तत्प्रतिपाद्यस्य–वेदांतप्रतिपाद्यस्य । तद्विषयत्वात्–वेदांतविषयत्वात् ननु "तत्तु समन्वयात्" इति सूत्रे द्वादशाध्यायधर्ममीमांसाविचारितकर्मवाक्यैरपि ब्रह्मणः प्रतिपाद्यत्वस्वीकारात्सत्यतासिद्धिरित्याशंक्याह (द्वादशलक्षणीति) द्वादशाध्यायेत्यर्थः, सपरिकरधर्मनिरूपणपरा–अंगसमूहसहितयागादिरूपधर्मप्रतिपादकवाक्यार्थनिरूपणपरा, विधिवाक्यानां–लिङादिघटितयागादिबोधकवाक्यानां तत्र–धर्ममीमांसायाम् (विचारितत्वादिति) द्वादशलक्षणमीमांसाविचारितकर्मवाक्यानां परंपरया ब्रह्मप्रतिपत्तावुपयोगो न तु तत्त्वमस्यादिवाक्यवत्साक्षादुपयोग इति भावः ॥

सू०—ननु नाहमीश्वर इत्यादिप्रत्यक्षेण किंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माश्रयत्वादिलिंगेन द्वासुपर्णेत्यादिश्रुत्या ॥

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एवच ॥
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

इत्यादिस्मृत्या च जीवपरभेदस्यावगतत्वेन तत्त्वमस्यादिवाक्यमादित्यो यूपो यजमानः प्रस्तर इत्यादिवाक्यवदुपचरितार्थमेवेति चेन्न भेदप्रत्यक्षस्य संभावितकरणदोषस्यासंभावितदोषवेदजन्यज्ञानेन बाध्यमानत्वात् अन्यथा चंद्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्य चंद्रप्रादेशग्राहिप्रत्यक्षेण बाधापत्तेः पाकरक्ते घटे रक्तोयं न श्याम इति वत्साविशेषणे हीति न्यायेन जीवपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदाविषयत्वाच्च ॥

शि० म०—वेदांताश्च न विधिपराः । तात्पर्यविषयब्रह्मासिद्धिप्रसंगात् । तथाच न सत्यतासिद्धिरिति तत्त्वमस्यादिवाक्यं न जीवेश्वराभेदे प्रमाणं भेदग्राहिबहुप्रमाणविरोधादिति शंकते (नन्विति । किंचिज्ज्ञत्वेति) जीवेश्वरौ परस्परंभिन्नौ किंचिज्ज्ञत्वसर्वज्ञत्वलक्षणविरुद्धधर्माश्रयत्वात् । दहनतुहिनवदित्यर्थः । तर्हि तत्त्वमस्यादि वाक्यं न प्रमाणं स्यादित्यत आह (तत्त्वमस्यादीति) ननु प्रत्यक्षस्य ज्येष्ठतया प्रबलत्वेन बाधकत्वमित्यत आह (अन्यथेति) तर्हि भेदप्रत्यक्षस्याप्रामाण्यकल्पनमेवाभेदप्रामाण्ये बाधकमित्यत आह (पाकेति) ॥

म० प्र०—विधिपराः—विधीयमानयागादिकर्मपराः (ब्रह्मासिद्धिप्रसंगादिति) वेदान्तानां विधिपरत्वे ब्रह्माप्रतिपादकत्वादिति शेषः । तथाच—वेदांतानां विधिपरत्वाभावेसति (विरुद्धेति) एकाधिकरणावृत्तीत्यर्थः । किंचिज्ज्ञत्वसर्वज्ञत्वलक्षणेतिविशेषकथनं तु प्रकृताभिप्रायेण हेतुस्तु विरुद्धधर्माश्रयत्वंमेवेति ध्येयम् । दहनतुहिनवत्—अग्निहिमवत् । परममूले (संभावितकरणदोषस्येति) स्वाश्रयकरणजन्यत्वसंबंधेन संभाविताः करणानामिन्द्रियाणामपाटवत्वादयो दोषा यस्मिन् भेदप्रत्यक्षे स तथा तस्येत्यर्थः । परममूले (अन्यथेति) प्रत्यक्षस्यज्येष्ठतया प्रबलत्वेनागमजन्यज्ञानबाधकत्वस्वीकारे इत्यर्थः । तर्हि—भेदप्रत्यक्षस्यागमजन्यज्ञानेन

बाध्यत्वस्वीकारे सति परममूले (सविशेषणेहीति) शिखी ध्वस्तः दंडीं जातः रक्तोयं न श्याम इत्यादौ प्रसिद्धेन सविशेषणेहिं विधिंनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे इतिन्यायेनेत्यर्थः ॥

मू०–अत एव नानुमानमपि प्रमाणमागमविरोधात् मेरुपाषाणमयत्वानुमानवत् । नाप्यागमांतरविरोधस्तत्परातत्परवाक्ययोस्तत्परवाक्यस्य बलवत्त्वेन लोकसिद्धभेदानुवादिद्वासुपर्णादिवाक्यापेक्षया ॥

शि० म०–अनुमानं च न भेदे प्रमाणं नराशिरःशौचानुमानवदागमबाधादित्याह (अतएवेति) भेदग्राहिश्रुतिस्मृतिविरोधं निरस्यति (नाप्यागमांतरेति) ननु द्वासुपर्णेत्यादि वाक्यं प्रतीयमानभेदपरमेवास्तु बाधकाभावादित्याशंक्य शास्त्रस्याज्ञातार्थपरत्वात । भेदस्य च प्रत्यक्षादिप्रमाणावगतत्वात् न तत्परत्वमित्याह (लोकसिद्धेति) ननु तत्त्वमस्यादि वाक्यमपि नाभेदपरं प्रस्तरादिवाक्यवत्तस्योपचरितार्थत्वस्योक्तत्वादित्याशंक्य किंबाधकसत्त्वादभेदपरत्वाभावस्तात्पर्य्यस्य ग्राहकाभावाद्वा नाद्यः । प्रस्तरस्य यजमानत्वे बाधकवदभेदे बाधकाभावात् ॥

म० प्र०–अनुमानंच–जीवेशौ परस्परभिंन्नौ विरुद्धधर्माश्रयत्वाद्दहनतुहिनवदित्यनुमांनं च नरशिरःशौचानुमानवत्–सस्नेहं नरशिरोस्थि शुचिरस्थित्वात् शंखवदित्यनुमानं 'स्पृष्ट्वा नरास्थि सस्नेहं सवासा जलमाविशेत्' इत्याद्यागमेन यथा बाधितं तद्वत्, आगमबाधात्–तत्त्वमस्यादिवाक्यरूपागमबाधात् परममूले (अतएवेति) वक्ष्यमाणहेतोरेवेत्यर्थः । परममूले (मेरुपाषाणमयत्वानुमानवदिति) मेरुःपाषाणमयः पर्वतत्वाद्विंध्यादिवदित्यनुमानं सर्वतः सौवर्णः कुलगिरिराजोमेरुरित्याद्यागमेन यथा बाधितं तद्वदित्यर्थः । प्रस्तरादिवाक्यवत्–यजमानः प्रस्तर इत्यादिवाक्यस्य यथा सादृश्यरूपलाक्षणिकार्थपरत्वं तद्वत्, तस्य–तत्त्वमस्यादिवाक्यस्य (उपचारितार्थत्वेति) सादृश्यादिरूपलाक्षणिकार्थकत्वेत्यर्थः । बाधकवत्–प्रत्यक्षप्रमाणरूपबाधकवत्, अभेदे–तत्त्वंपदार्थाभेदे बाधकाभावात् प्रत्यक्षादिप्रमाणरूपबाधकाभावात् नच नाहमीश्वर इति प्रत्यक्षादिकमभेदे बाधकमिति वाच्यम् । तस्याप्रमात्वेन बाधकत्वाभावात् । सविशेषणे हीत्यादिन्यायेन विशेषणीभूतधर्मभेदविषयकत्वाच्चेति ॥

उपक्रमोपसंहाराद्यवगताद्वैततात्पर्य्यविशिष्टस्यतत्त्वमस्यादिवाक्यस्य प्रबलत्वात् । नच जीवपरैक्ये विरुद्धधर्माश्रयत्वानुपपत्तिः शीतस्यैव जलस्यौपाधिकौष्ण्याश्रयत्ववत्स्वभावतोनिर्गुणस्यैव तस्यान्तःकरणाद्युपाधिककर्तृत्वाद्याश्रयत्वप्रतिभासोपपत्तेः यदिच जलादावौष्ण्यमारोपितं तदा प्रकृतेपि तुल्यं नच सिद्धांते कर्तृत्वस्य क्वचिदप्यभावादारोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यं लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात् ।

शि० म०-नच प्रस्तरादिवाक्यवत्स्तुतिपरत्वं तात्पर्य्यबाधकं प्रस्तरं प्रहरतीति विधिशेषतयावगतत्वेन प्रस्तरस्य स्तुतिविषयत्वेपि जीवेश्वरयोर्विध्यन्वयादर्शनेन स्तुतिविषयत्वायोगात् न द्वितीय इत्याह (उपक्रमेति) अर्थापत्तिमाशंक्य निराकरोति (नचेति) ॥

म०प्र०-(प्रस्तरमिति) अग्न्यधिकरणकदर्भमुष्टिकर्मकप्रक्षेपेणेष्टं भावयेदित्यर्थः । स्तुतिपरत्वं-तत्त्वमस्यादिवाक्यस्य जीवस्तुतिपरत्वं, तात्पर्य्यबाधकम्-तत्त्वमस्यादिवाक्यस्याभेदतात्पर्य्यबाधकम् । विधिशेषतया-विधीयमानप्रक्षेपरूपकर्मशेषतया स्तुतिविषत्वेपि-यजमानःप्रस्तर इति स्तुतिविषयत्वेपि, जीवेश्वरयोः-जीवेश्वरपदलक्ष्ययोः, विध्यन्वयेति-विधीयमानकर्मान्वयेत्यर्थः । परममूले (विरुद्धधर्माश्रयत्वानुपपत्तिरिति) किंचिज्ज्ञत्वसर्वज्ञत्वविरुद्धधर्माश्रयत्वानुपपत्त्यां जीवेश्वरभेदः कल्प्यते इति भावः । परममूले (प्रकृतेपीति) आत्मन्यपीत्यर्थः । परममूले (तुल्यमिति) कर्तृत्वादिकमारोपितमित्यर्थः परममूले (अभावादिति) पारमार्थिककर्तृत्वाभावादित्यर्थः । परममूले (आरोप्यप्रमाहितसंस्काराभावेइति) आरोप्यकर्तृत्वादिविषयकपूर्वकालीनप्रमाजन्यसंस्काराभावे इत्यर्थः । परममूले (तस्येति) आरोप्यविषयकसंस्कारस्येत्यर्थः । भ्रमप्रमान्यतरजन्यारोप्यविषयकसंस्कारत्वेनारोप्यविषयकसंस्कारस्य हेतुत्वमिति भावः ॥

मू०-नच प्राथमिकारोपे का गतिः कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात् तत्त्वंपदवाच्ययोर्विशिष्टयोरैक्यायोग्यत्वेपि लक्ष्यस्वरूपयोरैक्यमुपपादितमेव अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थत्वंसोयमित्यादिवाक्य-

Funding by IKS-MoE

वत् नच कार्य्यपराणामेव प्रामाण्यं चैत्र पुत्रस्ते जात इत्यादौ सिद्धेपि संगतिग्रहात् ॥

शि० म०—संप्रदायमतेनाह (लक्ष्यस्वरूपयोरिति) नन्वस्तु वाक्ये लक्ष्यस्वरूपमात्रपरत्वं ततः किमित्यत आह (अतएवेति) ननु वेदांता न ब्रह्मपराः पदानां कार्य्यान्वितशक्त्यनुरोधेन कार्य्यपरत्वेनैव प्रामाण्यावधारणात् । तथाचादित्यो ब्रह्मेतिवत्तत्त्वमसीत्यभेदोपासनापरमित्याशंक्य सिद्धेपि संगतिग्रहस्योक्तत्वादिति दूषयति (नचेति) किंच नाभेदोपासनात्र विधेया उपासीतेत्यश्रवणात् । तत्त्वमस्यंते तद्धास्य विजज्ञाविति ब्रह्मविद्याया एव श्रवणाच्च । किंच 'तत्त्वमस्यादिवाक्यं नोपासनापरम् "अभयं वैजनकप्राप्तोसि तदात्मानमेवावेत् अहंब्रह्मास्मि" इति स्पष्टार्थश्रुत्यंतरानुसारेणास्पष्टार्थश्रुतेरपि व्याख्यानौचित्यात् । अत एव तं चतुर्धाकरोतीति वचनं स्पष्टार्थकवचनांतरानुसारादाग्नेयविषयं व्याख्यातम् । नचाहं ब्रह्मेत्यत्राप्यभेदोपासनमिति युक्तमवेदिति विरोधात् ॥

म०प्र०—वाक्ये—तत्त्वमस्यादिवाक्ये, ततः—तत्त्वमस्यादिवाक्यानां लक्ष्यस्वरूपमात्रपरत्वात्, किं—किंफलम्। परममूले (अतएवेति)—तत्त्वंपदलक्ष्यस्वरूपैक्यस्योपपादितत्वादेवेत्यर्थः । कार्य्यान्वितशक्त्यनुरोधेन—कृतिसाध्यविशिष्टेशक्त्यभ्युपगमेन, सिद्धेपि—प्रयोगकालेकृत्यसाध्येपि पुत्रादौ, संगतिग्रहस्य—पुत्रादिपदशक्तिग्रहस्य, अत्र—तत्त्वमसिवाक्यादौ (तद्धास्येति) अस्य—पितुर्वाक्यात्तद्ब्रह्म, ह प्रसिद्धः विजज्ञौ—श्वेतकेतुर्विज्ञातवानित्यर्थः । अभयम्—भयशून्यंब्रह्म (तदात्मानमेवेति) तदविद्याविशिष्टतयाऽधिकारित्वेनावस्थितं ब्रह्मनासित्वं संसारी किंतु सकलसंसारधर्मरहितं सच्चिदानंदैकरसं ब्रह्मैवासीति दयालुना आचार्य्येणबोधितमात्मानमेवावेदित्यर्थः । अतएव—स्पष्टार्थकश्रुत्यंतरानुसारेणास्पष्टार्थकश्रुतिव्याख्यानस्योचितत्वादेव, तम्—पुरोडाशम्, (स्पष्टार्थकवचनान्तरेति) आग्नेयं पुरोडाशंचतुर्धाकरोतीति वचनांतरेत्यर्थः ॥

मू०—एवं सर्वप्रमाणाविरुद्धं श्रुतिस्मृतीतिहासपुराणप्रतिपाद्यं जीवपरैक्यं वेदांतशास्त्रस्य विषय इति सिद्धम् ॥

इति श्रीवेदांतपरिभाषायां विषयपरिच्छेदः ॥ ७ ॥

शि०म०—आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत ॥
"तत्र को मोहः कः शोक एकत्वमनुपश्यतः" ॥
इत्येकत्वज्ञानस्यैव श्रुतौ पुमर्थत्वप्रतिपादना

Funding by IKS-MoE

जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते ॥
तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधात्प्रमुच्यते ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहमिति ॥
कैवल्योपनिषद्वचनाच्च ॥
यथा नदीनदो लोके सागरेणैकतामियात ॥
तद्वदात्माक्षरेणासौ निष्कलेनैकतामियात् ॥
इतिकूर्मपुराणवचनाच्च ॥
यदस्थूलमनण्वाख्यमप्रमेयमवर्णकम् ॥
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्मसंपद्यतेध्रुवमिति ॥
विश्वामित्रस्मृतेश्च ॥
अहमेवपरंब्रह्मवासुदेवाख्यमव्ययम् ॥
इतिस्यान्निश्चितो मुक्तोबद्ध एवान्यथाभवेदिति ॥
वररुचिवचनाच्च ॥
अत्रात्मव्यतिरेकेण द्वितीयं यो न पश्यति ॥
ब्रह्मभूतः स एवेह दक्षपक्ष उदाहृतः ॥
इतिदक्षस्मृतेश्च ॥
सर्वभूतांतरस्थाय नित्यशुद्धचिदात्मने ॥
प्रत्यक्चैतन्यरूपाय मह्यमेव नमोनमः ॥

इति वसिष्ठवचनाच्च अन्यथा तत्त्वमस्यादिवाक्यस्य भेदग्राहिप्रमाणविरोधेनाभेदे प्रामाण्याभावे श्रुतिपुराणवचनानि बाध्येरन् तस्मात्सिद्धं तत्त्वमस्यादिवाक्यस्य जीवपरैक्यपरत्वं तदेतत्सर्वमभिप्रेत्य उपसंहरति (एवमिति) ॥

इति श्री धर्मराजाध्वरींद्रात्मजश्रीरामकृष्णाध्वरिविरचिते
वेदांतचूडामणौ विषयपरिच्छेदः ॥ ७ ॥

म० प्र०—नदी—गंगायमुनादिः, नदः—सिंध्वादिः, दक्षपक्षः—स्वपक्षः । उदाहृतः—मयाकथितः । अन्यथा—अहंब्रह्मास्मीत्यादिवाक्यानामभेदोपासनापरत्वस्वीकारे अन्यथेत्यस्यैव वा विवरणं तत्त्वमस्यादिवाक्यस्येत्यादि ॥

इति श्रीमदुदासीनवरश्रीमद्ब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदासशब्दवाच्याविर्भूतायांधर्मराजाध्वरींद्रात्मजरामकृष्णाभिधेयविरचितविषयपरिच्छेदो[illegible]तशिखामणेः प्रभायां विषयपरिच्छेदः समाप्तः ॥ ७ ॥

Funding by IKS-MoE

अथ प्रयोजनपरिच्छेदः ८.

मू०-इदानीं प्रयोजनं निरूप्यते यदवगतं सत् स्ववृत्तितयेष्यते तत्प्रयोजनं तच्च द्विविधं मुख्यं गौणंचेति तत्र सुखदुःखाभावौ मुख्ये प्रयोजने तदन्यतरसाधनं गौणं प्रयोजनं सुखं चद्विविधं सातिशयं निरतिशयं चेति ॥

शि० म०-(यदवगतमिति) यद्येन रूपेण स्ववृत्तितया अवगतं तथैवेष्यते तेन रूपेण च प्रयोजनमित्यर्थः । अनागतसुखादिकं च स्ववृत्तितया सुखत्वेनानुमानात् ज्ञातं तेन रूपेणेष्यते सुखं मे भूयादिति पशुपुत्रादिकं त्विष्टसाधनत्वेनावगतमिच्छाविषय इति तेन रूपेण प्रयोजनं तथाच सुखादेर्गुणत्वादिनावगतौ सुखत्वादिना स्वात्मनि बाधदशायां चेच्छाविरहेपि न दोषः । नच पशुपुत्रादीनां कथं स्ववृत्तित्वं परंपरासंबंधेन स्ववृत्तित्वेऽतिप्रसंगादिति वाच्यम् । स्वलक्षणसंबंधेन स्ववृत्तित्वाभ्युपगमात् । स्वरूपसंबंधस्यापि साक्षात्संबंधत्वात् । द्वैविध्यमेवाह (मुख्यमिति) यत्स्वासाधारणरूपेणावगतं सादिष्यमाणं तन्मुख्यं प्रयोजनमतिरिक्तधर्मज्ञानापेक्षमिष्यमाणं गौणमित्यर्थः । तदुभयं क्रमेणोदाहराति (तत्रेति) सिद्धांते च सुखस्य द्वैविध्यमित्याह (सुखंचेति) ॥

संसारदावानलदग्धचेतायं शान्तभूतं शरणं गतोऽस्मिन् ॥
शान्तिसमाप्नोति परांनरोऽयं समे धवः श्रीगुरुनानकोऽस्तु ॥ १ ॥

म० प्र०-(यद्येन रूपेणेति) यत् सुखादिकं, येनरूपेण-सुखत्वादिरूपेण स्ववृत्तितयाऽवगतम्-ममेदं सुखमिति स्वसंबंधितया ज्ञातं सत्, तथैवेष्यते-सुखादिकं मे भूयादिति सुखत्वादिरूपेण स्ववृत्तितयेच्छाविषयीक्रियते तेन रूपेण सुखत्वादिरूपेण सुखादिकं प्रयोजनमित्यर्थः । यत्स्ववृत्तितयेष्यते इत्युक्तेहि राजसुखराजदारादेरपि ममेदं भूयादिति स्ववृत्तितयेच्छाविषयत्वेन राजसुखादावतिव्याप्तिः स्यात्तद्वारणाय स्ववृत्तितयावगतमिति दुःखादावतिव्याप्तिवारणाय स्ववृत्तितयेष्यते इति लक्ष्ये लक्षणं योजयति (अनागतेति । स्ववृत्तितयेति) अनागतसुखादिकं स्ववृत्तिविलक्षणसुखत्वादिमत्त्वादेतत्कालीनसुखादिवदि[illegible]ादिहेतुनास्व-

वृत्तितयाऽवगतमनागतसुखादिकं तेन रूपेण सुखादिकं मे भूयादिति सुखत्वादिरूपेणेष्यते इति सुखत्वादिरूपेणागतसुखादिकं प्रयोजनमित्यर्थः । येन रूपेण तथैवेष्यते इति शब्दयोः फलमाह (तथाचेति) नदोषः–अव्याप्तिरूपदोषो नास्ति, परंपरासंबंधेन–स्वसंयुक्तसंयुक्तसंयुक्तत्वादिरूपपरंपरासंबंधेन स्वंपुत्रादिकं तत्संयुक्तमाकाशादिकं तत्संयुक्तं जीवदेहाहिकं तत्संयुक्तत्वं जीवात्मनीति संबंधवाक्यार्थः । अतिप्रसंगात्–रासभपुरीषादेरपि जीवात्मवृत्तित्वप्रसंगात्, स्वलक्षणसंबंधेन–संबंधिद्वयसत्त्वरूपस्वरूपसंबंधेन (यदिति) सुखादिकमित्यर्थः । स्वासाधारणरूपेण–सुखाद्यसाधारणसुखत्वादिरूपेण नच दरिद्राणां राजसुखंमुख्यप्रयोजनं स्यात्तस्य सुखाद्यसाधारणसुखत्वादिरूपेणावगतत्वे सतीष्यमाणत्वादिति वाच्यम् । स्ववृत्तितयेत्यस्यापि निवेशादिति, अवगतं–प्रमाज्ञानविषयः अतिरिक्तधर्मज्ञानापेक्षम्–यागादिवृत्तियागत्वाद्यतिरिक्तेष्टसाधनत्वादिरूपधर्मज्ञानापेक्षम् ॥

मू०–तत्र सातिशयं सुखं विषयानुषंगजनितान्तःकरणवृत्तितारतम्यकृतानंदलेशाविर्भावविशेषः "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति" इति श्रुतेः। निरतिशयं सुखं च ब्रह्मैव आनंदो ब्रह्मेतिव्यजानात् विज्ञानमानंदं ब्रह्मेत्यादिश्रुतेः। आनंदात्मकब्रह्मावाप्तिश्च मोक्षः शोकनिवृत्तिश्च ॥

शि० म०–तत्र जन्यसुखं सातिशयमित्याह (तत्रसातिशयमिति) यथा काचिदन्तःकरणवृत्तिः सत्त्वगुणजन्यतयाचैतन्यगतज्ञानांशप्रतिबिंबग्राहित्वेन ज्ञानं तथा तादृशीवृत्तिस्तद्गतानंदलेशप्रतिबिंबग्राहकत्वात्सुखमिति व्यपदिश्यते तस्यां सुखलक्षणायां वृत्तावन्वयव्यतिरेकाभ्यां स्रक्चंदनवनितादिविषयसंबंधो हेतुः । अत एव तत्तारतम्यात्सुखतारतम्यमतएवचास्मदादिसुखाद्राजसुखमुत्कृष्टं तस्मात्सार्वभौमसुखमुत्कृष्टतरं ततश्चेन्द्रादिसुखमुत्कृष्टतममिति । ननु यद्यानंदप्रतिबिंबग्राहित्वादन्तःकरणवृत्तिरेव सुखं तदा सन्निहितपरिपूर्णानंदस्यापि ग्रहणसंभवेन सर्वमपि सुखमेकरूपं स्यादिति चेन्न । परिपूर्णज्ञानवदखंडानंदस्य मूलाविद्यावृत्तत्वेनेदानीं तद्भानायोगात् । नन्वस्तु निरतिशयानंदात्मकं ब्रह्म ततः किमित्यत आह (आनंदात्मकेति) ननु न ब्रह्मावाप्तिर्मोक्षस्तस्याः संसारदश[illegible]पि भावात् । निवृत्तशोकः–परिपूर्णानंदो न प्रागितिचेत्त-

Funding by IKS-MoE

र्ह्यावश्यकत्वात्सैव मुक्तिरित्यतस्तथैव पक्षांतरमाह (शोकनिवृत्तिरिति) अनर्थहेत्वविद्यानिवृत्तिरित्यर्थः ॥

म० प्र०–मुख्यप्रयोजनत्वमन्येच्छानधीनेच्छाविषयत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वमिति मुख्यप्रयोजनगौणप्रयोजनयोर्लक्षणान्तरं ग्रंथांतरीयमपि द्रष्टव्यमिति, तत्र–सातिशयनिरतिशयसुखयोर्मध्ये (ज्ञानांशेति) अंशांशिभावकल्पनयाचिदंशेत्यर्थः । अन्वयव्यतिरेकाभ्यां–स्रक्चंदनवनितादिविषयसंबंधसत्त्वे सुखलक्षणवृत्तिसत्त्वंस्रक्चंदनवनितादिविषयसंबंधाभावे सुखलक्षणवृत्त्यभावइत्यन्वयव्यतिरेकाभ्याम् । अत एव–सुखलक्षणवृत्तिंप्रतिस्रक्चंदनवनितादिविषयसंबंधस्य हेतुत्वादेव, तत्तारतम्यात्–स्रगादिविषयसंबंधस्य न्यूनाधिक्यात्, अतएव–सुखस्य न्यूनाधिक्यसंभवादेव, तस्मात्–राजसुखात्, ततश्च--सार्वभौमसुखाच्च एकरूपं--एकरसं न्यूनाधिक्यरहितमिति यावत्, परिपूर्णज्ञानवत्--परिपूर्णज्ञानस्य मूलाज्ञानावृत्तत्वेन यथाभानाभावस्तद्वत्, इदानीं–संसारदशायां (तद्भानेति) अखंडानंदभानेत्यर्थः । ततः--ब्रह्मणोनिरतिशयानंदात्मकत्वात् किंसिध्यतीतिशेषः । तस्याः--ब्रह्मावाप्तेः नप्रागिति--ब्रह्मज्ञानात्पूर्वंनभवतीत्यर्थः आवश्यकत्वात् शोकनिवृत्तेरावश्यकत्वात्, सैव--शोकनिवृत्तिरेव, तथैव--पूर्वपक्ष्युक्तप्रकारेणैव ॥

मू०–ब्रह्मविद्ब्रह्मैवभवति तरति शोकमात्मविदित्यादिश्रुतेः नतु लोकांतरावाप्तिः तज्जन्यवैषयिकानंदो वा मोक्षः । तस्य कृतकत्वेनानित्यत्वे मुक्तस्य पुनरावृत्त्यापत्तेः ॥

शि० म०–क्रमेण प्रमाणमाह (ब्रह्मेति) तरति शोकमित्यत्र शोकहेतुत्वात्तत्पदेनाविद्योक्ता तरणंचात्र तरति ब्रह्महत्यामितिवन्निवृत्तिरूपं विवक्षितं नतु सेतुं तरतीतिवत् शोकस्य मूर्त्तत्वाभावादिति ध्येयम् । लोकांतरप्राप्तिरेव मुक्तिरिति तार्किकाः कल्पयंति तान्प्रत्याह (नन्विति) लोकांतरावाप्तेः सुखदुःखाभावान्यतरत्वाभावात् स्वतःप्रयोजनत्वाभावादिति भावः । ननु वैकुण्ठादिलोकविशेषं गतानामानंदाविर्भावो भविष्यतीति चेन्न स्वरूपानंदाभिव्यक्त्यभ्युपगमे लोकांतरगमनवैयर्थ्यात् । ननु न लोकांतरावाप्तिः स्वतो मोक्षः किंतु तत्रत्यवैषयिकानंदद्वारा सच तत्रैवेति न लोकांतरगमनवैयर्थ्यमिति चेन्न किंसैव मुक्तिः उत तत्रत्यवैषयिकानन्दः नाद्यः । आवश्यकत्वान्मुख्यप्रयोजनत्वाच्च तस्यैव मुक्तित्वौचित्यात् । अन्यथा मुक्तेः स्वतःपुरुषार्थत्वाभावप्रसंगात् नाद्वितीय इत्याह (तज्जन्येति) वैषयिकानंदस्यमुक्तित्वे-

Funding by IKS-MoE

तस्य स्वर्गादिवत्सातिशयत्वापत्तौ मोक्षस्य परमपुरुषार्थत्वाभावप्रसंगात् । किंच वैषयिकानंदस्य मुक्तित्वे मुक्तिदशायां भेदापत्तौ यत्र त्वस्य सर्वमात्मैवाभूत् ॥

यावन्मोक्षं तु भेदः स्याज्जीवस्य च परस्य च ॥
ततः परं न भेदोस्ति भेदहेतोरभावतः ॥
विभेदजनके ज्ञाने नाशमात्यंतिकं गते ॥
आत्मनो ब्रह्मणो भेदमसंतं कः करिष्यति ॥

इत्यादिवचनविरोधापत्तिः किंच मुक्तिदशायां शरीराभावेन वैषयिकानंदानुपपत्तिः तस्य शरीरजन्यत्वनियमात् । अत एव स्वर्गशरीरकल्पनं नचात्रापि तत्कल्प्यत इति युक्तं अशरीरं वावसंतमित्यादि श्रुतिविरोधात् । किंच न ब्रह्मविदां लोकांतरगमनमस्ति न तस्य प्राणा उत्क्रामंति ॥

म०प्र०–तत्पदेन–शोकपदेन, अत्र–तरतिशोकमितिश्रुतौ, तार्किकाः–तर्ककुशला मीमांसकाः लोकांतराप्तेःस्वतःप्रयोजनत्वाभावादित्यन्वयः, स्वतः–स्वरूपेण, स्वरूपानंदाभिव्यक्त्यभ्युपगमे–स्वरूपाभिन्नानंदाभिव्यक्तेर्मोक्षपदार्थत्वाभ्युपगमे । तत्रत्येति–लोकांतरीयेत्यर्थः । सच–विलक्षणवैषयिकानंदस्तु, आवश्यकत्वात्–लोकांतरे आनंदस्यावश्यमभ्युपगमनीयत्वात्, तस्यैव–अवाप्तानंदस्यैव, अन्यथा–लोकांतरावाप्तेर्मुक्तित्वाभ्युपगमे । यावन्मोक्षम्–मोक्षात्पूर्वम् । भेदः–औपाधिकभेदः,ततःपरम्–ऐक्यबोधादुत्तरं, तस्य–वैषयिकानंदस्य, अत्रापि–मुक्तावपि, बत्–शरीरं (नतस्येति) तस्य–विदुषः प्राणा–वागादयो नोत्क्रामंति–देहाद्बहिर्नगच्छंति ॥

शि० म०–अत्रैव समवनीयंते इति श्रुतेर्नचार्चिरादिना गमनं श्रूयते इति तद्वचनस्य सगुणोपासकविषयत्वेन ब्रह्मविद्गमनस्यानभिधानात् । अतएवाब्रह्मविदामपि पंचाग्निविद्योपासकानामर्चिरादिना गमनं नचैवं ब्रह्मविदां तदनभ्युपगतावेतेन प्रतिपद्यमाना इमं मानवमावर्त्तन्नावर्त्तत इत्यर्चिरादिना गतानामपुनरावृत्तिश्रवणं विरुध्येतेति वाच्यम् । सगुणोपासकानामर्चिरादिना गतानामश्व इव रोमाणि विधूय पापमित्यादिश्रुत्यवगतनिरस्तसमस्तदोषाणां ब्रह्मलोक एव संपादितश्रवणादिसाधनानां तत्रैव ब्रह्मसाक्षात्कारसंपादनेन ब्रह्मणा सह परममुक्त्यभ्युपगमेनाविरोधात् । किंचलोकस्य प्रलयेप्यविनाशे "सदेवसोम्येदमग्र आसीत्" इत्यादिश्रुतिविरोधः । विनाशे मुक्तिशास्त्रवैयर्थ्यम् । अपिच वैकुण्ठादिप्राप्तानां मुक्तत्वेन जयविजयादीनां भगवद्द्वारिकाणां मुनिशापादिना

Funding by IKS-MoE

राक्षसादिदेहप्राप्तिर्नस्यात् नचार्चिरादिगमनस्य परंपरया अपुनरावृत्तिहेतुत्वेन जयविजयादयस्तवमतेपि न निवर्त्तेरन् इति वाच्यम् । नहि जयविजयावर्चिरादिना ब्रह्मलोकं गतौ किंतु वैकुंठाख्यं लोकांतरम् नहि तस्यैव ब्रह्मलोकत्वं प्रजापतेः सभांवेश्म प्रातिपद्यते इति वाक्यशेषेण कार्य्यब्रह्माधिष्ठितदेशविशेषस्यैव ब्रह्मलोकपदेनाभिधानात् । अपिच "ब्रह्मविद्ब्रह्मैवभवति ब्रह्मैव सन् ब्रह्माप्येति" इत्यादिश्रुतयो वैषयिकानंदस्य मोक्षत्वे न सामंजस्येनोपपद्येरन् अत एव "मामुपेत्यतुकौंतेय पुनर्ज्जन्म न विद्यते" इति स्पष्टमेव स्वस्य प्राप्यत्वंभगवतैवोक्तम् ।

एकाकिनः सदाब्रह्मध्यायिनोयोगिनो हि ये ।
तेषां तत्परमं स्थानं यद्वै पश्यंति सूरयः ।

इति विष्णुपुराणे परमस्थानपदेन ब्रह्मस्वरूपमेवोक्तम् एतेन तांत्रिकाणां मुक्तौ तारतम्यकल्पनमपास्तम् ब्रह्मात्मैक्ये अज्ञाननिवृत्तौ वा विशेषाभावात् तस्मान्निरस्तसमस्तक्लेशमभिव्यक्तपरिपूर्णानंदमात्माभिन्नं ब्रह्मैवमोक्ष इति श्रुतिस्मृतीतिहासपुराणन्यायकोविदैरभ्युपगंतव्यमिति संक्षेपः ॥

म०प्र०–ननु तर्ह्ययं मृत इति व्यवहारो न स्यादित्याशंक्यार्तभागप्रकरणस्थवाक्यमाह (अत्रैवेति) परे ब्रह्मण्येकतां गते विदुष्येव समवनीयंते लीयंते इत्यर्थः । तद्वचनस्य–तेऽर्चिषमभिसंभवंतीत्यादेरर्चिरादिमार्गेण लोकांतरगमनप्रतिपादकवाक्यस्य, अतएव–ब्रह्मविल्लोकांतरगमनानभिंधानादेव, अब्रह्मविदामपि–शुद्धब्रह्मविषयकबोधशून्यानामेव । तदनभ्युपगतौ–अर्चिरादिमार्गेणगमनानभ्युपगतौ) एतेन अर्चिरादिमार्गेण प्रतिपद्यमानाः–ब्रह्मलोकंगताः, तत्रैव–ब्रह्मलोके एव, मुक्तिशास्त्रवैयर्थ्यं–नसपुनरावर्त्तते इत्यादिमुक्तिशास्त्रवैयर्थ्यम्, तस्यैव–वैकुंठस्यैव (कार्य्यब्रह्माधिष्ठितेति) कार्य्यब्रह्मस्वामिकेत्यर्थः । अतएव–ब्रह्मावाप्तेर्मोक्षत्वादेव, सूरयः–ब्रह्मात्मैक्यविषयकबोधवंतः, एतेन–वक्ष्यमाणहेतुना ॥

मू०–ननु त्वन्मतेप्यानंदावाप्तेरनर्थनिवृत्तेश्च सादित्वे तुल्यः दोषः अनादित्वे मोक्षमुद्दिश्यश्रवणादौ प्रवृत्त्यनुपपत्तिरितिचेन्न सिद्धस्यैव ब्रह्मरूपस्यमोक्षस्यासिद्धत्वभ्रमेण तत्साधने प्रवृत्त्युपपत्तेरनर्थनिवृत्तिरप्यधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव ॥

शि० म०–नन्वानंदावाप्तिरनर्थहेत्वविद्यानिवृत्तिर्वा मोक्ष इत्युपगच्छतस्तव मतेपि तदुभयं सादि अनादिवा आद्ये कृतकत्वेनानित्यत्वापत्तावपुनरावृत्तिश्रुतिविरोधः । द्वितीये मोक्षस्यासिद्धत्वगर्भसाध्यत्वाभावेन तत्साधनश्रवणादौ प्रवृत्तिर्न स्यादिति तांत्रिकः परिनोदयति (नन्विति) उभयविधस्यापि मोक्षस्य ब्रह्मरूपतयाऽनादित्वेपि न प्रवृत्त्यनुपपत्तिरित्याह (सिद्धस्यैवेति । असिद्धत्वभ्रमेणेति) लाघवेनेष्टसाधनताज्ञानस्य भ्रमप्रमासाधारणतत्साधनताज्ञानत्वेनैव प्रवर्त्तकत्वमिति भावः । अनर्थनिवृत्तिरेव मुक्तिःसाचब्रह्मस्वरूपातिरिक्ता तत्त्वज्ञानात्प्रागसिद्धैव अद्वैतश्रुतेश्च भावाद्वैतपरत्वान्न तद्विरोध इति ये मन्यंते तेषां मतं दूषयति (अनर्थनिवृत्तिरपीति) आनंदलक्षणमुक्तिवदनर्थनिवृत्तिरपि ब्रह्मस्वरूपैवान्यथा अद्वैतश्रुतिविरोधात् । भावाद्वैतवादस्य च प्रक्रियामात्रत्वेनायुक्तत्वादिति भावः ॥

म० प्र०–तदुभयं–आनंदावाप्तिरनर्थहेतुत्वविद्यानिवृत्तिरित्युभयम्, असिद्धत्वगर्भसाध्यत्वाभावेन–सिद्धत्वात्यंताभावविशिष्टत्वे सति साधनैरभिव्यक्तत्वरूपसाध्यत्वाभावेन असिद्धत्वविशेषणानादाने तु सिद्धेपि वह्न्यादौ धूमादिसाधनैरभिव्यक्तत्ववन्मोक्षरूपब्रह्मण्यपि श्रवणादिसाधनैरभिव्यक्तत्वरूपसाध्यत्वसंभवेन ज्ञानद्वारा मोक्षसाधनश्रवणादौ प्रवृत्त्यनापादनमयुक्तं स्यादतो सिद्धत्वगर्भेति विशेषणं दत्तमिति तत्साधनेति–ज्ञानद्वारा मोक्षसाधनेत्यर्थः । तांत्रिकाः–शास्त्रकुशलाः उभयविधस्यापि–आनंदावाप्त्यनर्थहेत्वविद्यानिवृत्तिरूपस्यापि । लाघवेन–प्रवृत्तित्वावच्छिन्नप्रवृत्तिं प्रति प्रमेष्टसाधनताज्ञानत्वेन प्रमेष्टसाधनताज्ञानस्य कारणत्वापेक्षया प्रवृत्तित्वावच्छिन्नप्रवृत्तिंप्रतीष्टसाधनताज्ञानत्वेनेष्टसाधनताज्ञानस्य हेतुत्वे लाघवेन । भावाद्वैतपरत्वात्–अभावात्मकद्वितीयसत्यपदार्थे सत्यपि भावात्मकाद्वितीयसत्यपदार्थो नास्तीत्यर्थपरत्वात् अन्यथा–अनर्थनिवृत्तिरूपमुक्तेर्ब्रह्मरूपत्वानंगीकारे (अद्वैतश्रुतीति) एकमेवाद्वितीयमित्याद्यद्वैतश्रुतीत्यर्थः ॥

मू०–लोकेपि प्राप्तप्राप्तिपरिहृतपरिहारयोः प्रयोजनत्वं दृष्टमेव यथा हस्तगतविस्मृतसुवर्णादौ तव हस्ते सुवर्णमित्याप्तोपदेशादप्राप्तमिव प्राप्नोति यथावा वलयितचरणायां स्रजि सर्पत्वभ्रमवतः पुंसो नायं सर्प इत्याप्तवाक्यात्परिहृतस्यैव सर्पस्य परिहारः प्रसिद्धः एवं प्राप्तस्याप्यानंदस्य प्राप्तिः परिहृतस्याप्यनर्थस्यनिवृत्तिर्मोक्षः प्रयोजनं

स च ज्ञानैकसाध्यस्तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः ॥

शि० म०–नन्वस्त्वसाध्यत्वेपि मुक्तेस्तत्साधनत्वभ्रमात्कथंचिच्छ्रवणादौ प्रवृत्तिस्तथापि कथं पुरुषार्थत्वं साध्यस्यैव लोके पुरुषार्थत्वदर्शनेन साध्यत्वस्य पुरुषार्थत्वप्रयोजकत्वादित्याशंक्य किमेतत्पुरुषार्थत्वस्य व्याप्यं व्यापकं वा नाद्यः । व्याप्याभावेपि व्यापकसत्त्वानिरोधाभावात् । दुःखादौ व्यभिचाराच्च न द्वितीयः । प्राप्तेष्टपरिहृतानिष्टप्राप्तिपरिहारयोरसाध्यत्वेन व्यभिचारादित्याह (लोकेपीति) नन्वासिद्धत्वभ्रमाच्छ्रवणादौ प्रवृत्तस्य शब्दजन्यपरोक्षासिद्धत्वज्ञानमात्रात्कथं तद्भ्रमनिवृत्तिः । कथं वा तन्मूलाविद्यानिवृत्तिः । तदुभयस्य विरोधिसाक्षात्कारसाध्यत्वादिति चेत् न, तत्त्वमस्यादि वाक्यजन्यज्ञानस्यापरोक्षत्वाभ्युपगमात् । अत एव तदनुरूपदृष्टान्तमाह (यथेति) "हिरण्यदा अमृतत्वं भजंते" इत्यादिश्रुत्या मोक्षस्य कर्मसाध्यत्वावगमात् । ज्ञानकर्मणोः समुच्चय इति ये वदंति तान्निराचष्टे सचेति नान्य इति ॥

म० प्र०–तत्साधनत्वभ्रमात्–श्रवणादौमुक्तिसाधनत्वभ्रमात् । प्रयोजकत्वात्–ज्ञापकत्वात् । एतत्–साध्यत्वं व्याप्यं यत्र साध्यत्वं तत्र पुरुषार्थत्वमिति व्याप्यं व्यापकंवा यत्र पुरुषार्थत्वं तत्र जन्यत्वमिति व्यापकं वा । दुःखादौव्यभिचाराच्च दुःखादौ साध्यत्वसत्त्वेपि पुरुषार्थत्वाभावेन व्यापकाभाववद्वृत्तित्वरूपव्यभिचाराच्च । प्राप्तेष्टपरिहृतानिष्टप्राप्तिपरिहारयोः–प्राप्तेष्टप्राप्तिपरिहृतानिष्टपरिहारयोः । ननु मोक्षेऽसिद्धत्वभ्रमाच्छ्रवणादौ प्रवृत्तिसत्त्वेपि श्रवणजन्यपरोक्षासिद्धत्वज्ञानमात्रात्कथमपरोक्षासिद्धत्वभ्रमतदुपादानाविद्ययोर्निवृत्तिरिति शंकते (नन्विति । तद्भ्रमेति) असिद्धत्वभ्रमेत्यर्थः (तन्मूलेति) असिद्धत्वभ्रममूलेत्यर्थः । तदुभयस्य–असिद्धत्वभ्रमनिवृत्तिः असिद्धत्वभ्रमोपादानाविद्यानिवृत्तिरूपोभयस्य । अतएव–तत्त्वमस्यादिवाक्यजन्यज्ञानस्यापरोक्षत्वाभ्युपगमादेव (तदनुरूपेति) प्राप्तेष्टप्राप्तिपरिहृतानिष्टपरिहाररूपोक्तार्थानुकूलेत्यर्थः । परममूले (वलयितचरणायामिति) वलयितौ वेष्टितौ चरणौ यया सा तथा तस्यामित्यर्थः ॥

मू०–अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वनियमाच्च तच्च ज्ञानं ब्रह्मात्मैक्यगोचरं "अभयं वै जनकप्राप्तोसि तदात्मानमेवावेदहं ब्रह्मास्मि" इतिश्रुतेश्च ॥

Funding by IKS-MoE

तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति नारदीयवचनाच्च तच्च ज्ञानमपरोक्षरूपंपरोक्षत्वेऽपरोक्षभ्रमनिवर्तकत्वानुपपत्तेः तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति केचित् मनननिदिध्यासनसंस्कृतान्तःकरणादेवेत्यपरे तत्र पूर्वाचार्य्याणामयमाशयः ॥

शि०म०-तथाच मुक्तावुपायांतरप्रतिषेधेन हिरण्यदा अमृतत्व मित्यादेः प्रलयपर्य्यन्तस्थायिस्वर्गादिफलाभिप्रायत्वान्न दर्शपूर्णमासवज्ज्ञानकर्मणोः फले समुच्चयः किंच मोक्षस्य कर्मजन्यापूर्वसाध्यत्वे स्वर्गादिवत्सातिशयता क्षयिष्णुता शरीरसंबंधश्च स्यात् । अपि चानंदाविर्भावो मोक्ष आविर्भावश्चाविद्यानिवृत्तिः साच शुक्तिरूप्यादिस्थले विरोधिसाक्षात्कारमात्रसाध्यत्वावधारणान्न कर्मसाध्येत्याह (अज्ञाननिवृत्तेरिति) नन्वेवमपि जीवपरैक्यज्ञानं न मुक्तिहेतुर्मानाभावात्तरति शोकमात्मविदित्यादेश्च भेदज्ञानपक्षेप्युपपत्तेरित्यत आह (तच्चेति) ननु वाक्यजन्यज्ञानं मानर्थनिवर्तकं तस्य परोक्षत्वनियमादित्यत आह (तच्चेति) तत्त्वमस्यादिवाक्यजन्यं चाभेदज्ञानमपरोक्षरूपमेवेति तन्निवर्त्तकमित्यर्थः । ननु परोक्षजनकत्वस्वभावाद्वाक्यात्कथमपरोक्षधीरित्याशंक्याह (तच्चेति) तत्त्वमस्यादिवाक्यादिति साक्षादिति शेषः । तत्त्वमस्यादिवाक्यावगते ब्रह्मणि मनननिदिध्यासनजनितासंभावनानिवृत्तिसहकृतादन्तःकरणात् प्रत्यक्षप्रमाणादेवापरोक्षज्ञानमुत्पद्यते नतु वाक्यादित्याचार्य्यवाचस्पतिमिश्राव्याचक्षते तन्मतमाह (मननेति) ननु करणविशेषायत्तं कार्य्यं नहि कुटजबीजाद्यवांकुरोत्पत्तिर्दृष्टपूर्वेत्याशंक्य प्रत्यक्षपरिच्छेदोक्तमर्थं स्मारयति (तत्रपूर्वाचार्य्याणामिति) ॥

म० प्र०-तथाच-मोक्षस्य ज्ञानैकफलत्वे स्थले-अधिकरणे (साध्यत्वेति) अविद्यानिवृत्तेः साध्यत्वेत्यर्थः । एवमपि-अज्ञाननिवृत्तेर्ज्ञानैकसाध्यत्वानियमेपि तस्य-वाक्यजन्यज्ञानस्य, तन्निवर्तकं-अज्ञाननिवर्तकं (परोक्षजनकत्वेति) परोक्षज्ञानजनकत्वेत्यर्थः (साक्षादिति) तत्त्वमस्यादिवाक्यादित्यस्यादौ साक्षादिति पदस्यशेषइत्यर्थः । अवगते-परोक्षावगतिविषये करणविशेषायत्तं सामग्रीविशेषाधीनं (कुटजबीजेति) कुटजः पांडुरद्रुम इति त्रिकांडशेषात् । कुटजोवृक्षभेदे स्यादगस्त्यद्रोणयोरपीति मेदिनीकोशाच्च कुटजशब्दो वृक्षविशेषवाचकस्तस्य बीजादित्यर्थः ॥

Funding by IKS-MoE

मू०–संविदापरोक्ष्यं न करणविशेषोत्पत्तिनिबंधनं किंतु प्रमेयविशेषनिबंधनमित्युपपादितं तथाचब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरं शब्दजन्यं ज्ञानमपि अपरोक्षम् अत एव प्रतर्दनाधिकरणे प्रतर्दनं प्रति प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वेतीन्द्रप्रोक्तवाक्ये प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते सति मामुपास्वेत्यस्मच्छब्दानुपपत्तिमाशंक्य तदुत्तरत्वेन प्रवृत्ते "शास्त्रदृष्ट्यातूपदेशोवामदेववत्" इत्यत्र सूत्रे शास्त्रीया दृष्टिः शास्त्रदृष्टिरितितत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं शास्त्रदृष्टिशब्देनोक्तमिति ॥

शि० म०–शब्दप्रमाणकं च ज्ञानमपरोक्षमित्यत्र शास्त्रदृष्टिसूत्रमुपोद्बलयति (अतएवेति) यतो वाक्यजन्यज्ञानमपरोक्षमतः "शास्त्रदृष्ट्यातूपदेशोवामदेववत् " इत्यत्र शास्त्रीया दृष्टिरिति व्युत्पत्त्या तत्त्वमस्यादिवाक्यजन्यमहं ब्रह्मेति ज्ञानं शास्त्रदृष्टिशब्देनोक्तमितिसंबंधः । ननु यथा ब्रह्मदृष्टिरुत्कर्षादित्यत्र दृष्टिशब्देनोपासना तथात्रापि सैव विवक्षिता परोक्षधीरित्याशंक्य प्रतर्दनाधिकरणं संग्रहेण दर्शयति (प्रतर्दनेति) अस्ति हि कौषीतकब्राह्मणोपनिषदि इन्द्रप्रतर्दनाख्यायिका प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण चेत्याम्नाता तस्यां श्रूयत सहोवाच प्राणोऽस्मि प्रज्ञात्मातं मामायुरमृतमुपास्वेति तत्र किं प्राणशब्देन वायुरभिधीयते उतेन्द्रः उत जीवः परं ब्रह्मवेति चतुर्विधलिंगासंभवाच्चतुर्धा संशये इदं शरीरं परिगृह्य उत्थापयतीति वायुविकारप्राणलिंगस्य वक्तारं विजानीयादिति जीवलिंगस्य मामेव विजानीयादिति इन्द्रलिंगस्यानंदोऽजरोऽमृतः इत्यादि ब्रह्मलिंगानां च प्राबल्यदौर्बल्यविवेकाभावादनिर्णयः ॥

स० प्र०–शब्दप्रमाणकं–शब्दप्रमाणजन्यं, उपोद्बलयति–प्रमाणत्वेनोपन्यस्यति (ब्रह्मदृष्टिरुत्कर्षादिति) इदं हि सूत्रं चतुर्थाध्यायस्य प्रथमपादे पंचमम्, अस्यार्थः । पूर्वोक्तप्रतीकोपासनेषु ब्रह्माणि मनआदिदृष्टिः कर्त्तव्या उत मनआदौ ब्रह्मदृष्टि-

Funding by IKS-MoE

रीति संशये निकृष्टे उत्कृष्टबुद्धिः कर्त्तव्येति न्यायग्राहणाद्ब्रह्मण्यवे मन आदिदृष्टिर्ब्रह्मणः प्राधान्येनोपास्यत्वोपपत्तये कर्तव्येति पूर्वपक्षे प्राप्ते ब्रूमः मनआदावेव ब्रह्मदृष्टिः कार्य्या ब्रह्मण उत्कर्षादुत्कृष्टदृष्टौ हि निकृष्टे कृतायां निकृष्टस्योत्कृष्टता भवति यथाऽमात्येराजबुद्धिः फलाय नतु राज्ञ्यमात्यबुद्धिर्नचैवं प्राधान्याभाव इष्टत्वादिति । अत्रापि–शास्त्रदृष्टचातूपदेश इति सूत्रेपि, सैव–उपासनादृष्टिरेव, दैवोदासिः–दिवोदासस्यापत्यम् प्रियं प्रेमास्पदम्, धाम–गृहं स्वर्गाख्यं, युद्धेनच-समरयज्ञेनच । पौरुषेणच–पुरुषवृत्तियुद्धकारणोत्साहाख्यप्रयत्नेनच चकारावुभयोः कारणत्वसमुच्चयार्थाविति । परममूले (अस्मच्छब्दानुपपत्तिमिति) त्वंपदार्थेन किंचिज्ज्ञत्वादिविशिष्टेन तत्पदार्थस्याभेदो बाधित इति मामित्यस्मच्छब्दानुपपत्तिमित्यर्थः । वायुविकारप्राणलिंगस्येत्यादिषष्ठ्यंतानां प्रावल्यदौर्बल्यविवेकाभावादित्यनेनान्वयः ॥

सू०–अन्येषां त्वेवमाशयः ॥

शि०म०–अथवा जीवब्रह्मप्राणास्त्रय एवात्रौपास्याः । नचैवं वाक्यभेदो दोषमावहति वाक्यार्थावगमपूर्वकत्वात् पदार्थानां चोक्तेन मार्गेण स्वातंत्र्यात् । तस्मादुपास्यभेदादुपासनात्रैविध्यमिति पूर्वपक्षे प्राप्ते इदमुच्यते प्राणस्तथानुगमादिति प्राणशब्दवाच्यं ब्रह्मविज्ञेयं पौर्वापर्य्यालोचनया वाक्यस्य ब्रह्मपरत्वावगमात् । उपक्रमे हि तमेव चरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति हिततमत्वेन प्राण उपदिश्यते तथोपसंहारेपि आनंदोजरोमृत इत्यानंदत्वादिना नचेदं ब्रह्मणोन्यत्संभवति जीवप्राणलिंगानां च तदानुगुण्येन नेतव्यत्वात् अन्यथा भिद्येत वाक्यं नहि संभवत्येकत्वे वाक्यभेदः तदाहुराचार्य्य वाचस्पतिमिश्राः ॥

तस्मादनन्यथासिद्धब्रह्मलिंगानुसारतः ॥
एकवाक्यबलाज्जीवप्राणलिंगोपपादनमिति ॥

तस्मात्प्राणशब्दवाच्यं ब्रह्मैवतथाचेंद्रोक्तप्राणशब्दस्य ब्रह्मपरत्वावगमात्सूत्रस्थदृष्टिशब्दस्य नोपासनापरत्वं किंत्वपरोक्षज्ञानपरत्वम् । अतएवोपक्रमगतं मामेव विजानीहीति वचनं संगच्छत इति । ननु विषयविशेषनिबंधनस्य प्रत्यक्षलक्षणस्य वाक्यजन्यज्ञानेपि सत्त्वाच्छास्त्रदृष्टिसूत्रविरोधाच्च आचार्य्यवाचस्पतेस्तत्त्वमस्यादिवाक्योत्थज्ञानेपरोक्षत्वोक्तिरयुक्तेत्याशंक्याह (अन्येषांत्विति) ॥

म०प्र०–(त्रयएवेति) इंद्रस्य ब्रह्मणि जीवे वांतर्भावात्त्रय एवेत्युक्तमिति भावः । अत्र–प्राणोऽस्मि प्रज्ञात्मेत्यादिवाक्ये, एवं–जीवादित्रयाणामुपास्यत्वस्वीकारे, दोषम्–

Funding by IKS-MoE

गौरवरूपदोषम् (वाक्यार्थावगमपूर्वकत्वादिति) प्रकृतवाक्यभेदस्येतिशेषः यस्मिन्वाक्ये वाक्यभेदस्य वाक्यार्थानवगमपूर्वकत्वं तस्मिन्नेव वाक्ये वाक्यभेदस्य गौरवदोषप्रायकत्वमत्र तु वाक्यभेदस्य वाक्यार्थज्ञानपूर्वकत्वात् गौरवरूपदोषप्रायकत्वमिति भावः, पदार्थानां–जीवब्रह्मप्राणानाम्,उक्तेनमार्गेण–प्राबल्यदौर्बल्यविवेकाभावरूपमार्गेण वृणीष्वविचार्य मह्यं देहि। इदं–हिततमत्वानंदत्वादिकं, तदानुगुण्येन–ब्रह्मलिंगानुसारेण, नेतव्यत्वात्–व्याख्येयत्वात्, अन्यथा–ब्रह्मलिंगानुसारेण जीवप्राणलिंगानां व्याख्येयत्वानंगीकारे, उपपादनं–निरूपणं भवति। तस्मात्–हिततमत्वादीनां ब्रह्मान्यत्रासंभवात्, अत एव–सूत्रस्थदृष्टिशब्दस्यापरोक्षज्ञानपरत्वादेव, विषयविशेषनिबंधनस्य–प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वं ज्ञानगतप्रत्यक्षत्वमिति विषयघटितस्य॥

मू०–करणविशेषनिबंधनमेव ज्ञानानां प्रत्यक्षत्वं न विषयविशेषनिबंधनमेकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारदर्शनात् तथाच संवित्साक्षात्त्वे इंद्रियजन्यत्वस्यैव प्रयोजकतया न शब्दजन्यज्ञानस्यापरोक्षत्वम्। ब्रह्मसाक्षात्कारेपि मननानिदिध्यासनसंस्कृतं मन एवकरणं "मनसैवानुद्रष्टव्यम्" इत्यादि श्रुतेःमनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया नचैवं ब्रह्मण औपनिषदत्वानुपपत्तिः अस्मदुक्तमनसो वेदजन्यज्ञानानंतरमेव प्रवृत्ततया वेदोपजीवित्वात्। वेदानुपजीविमानांतरगम्यत्वस्यैव वेदगम्यत्वविरोधात् शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्यशास्त्रप्रयोज्यत्वादुपपद्यते॥

शि० म०–(करणविशेषेति) इन्द्रियजन्यत्वं ज्ञानानांप्रत्यक्षत्वमित्यर्थः। प्रत्यक्षत्वस्य विषयविशेषायत्तत्वे सूक्ष्मवस्तुनि परोक्षप्रमाणजन्यज्ञानानांप्रत्यक्षत्वं स्याद्विषयभेदाभावात्। नचेष्टापत्तिः तत्राप्रत्यक्षत्वव्यवहारविरोधात्। अस्ति सूक्ष्मवस्तुनि लिपिरेखादौ पश्याम्यहं लिपिमिति पटुकरणस्य पुनः स्थविरस्य तु करणापाटववतो न पश्यामीति व्यवहार इत्याह (एकस्मिन्निति) ननु इन्द्रियजन्यज्ञानत्वं न प्रत्यक्षत्वं मनसोऽनिन्द्रियत्वेन सुखादिप्रत्यक्षप्रतीतावव्याप्तेरिन्द्रियत्वे चानुमित्यादावतिव्याप्तेरित्याशंक्य नहीन्द्रियजन्यज्ञानत्वं प्रत्य-

क्षत्वं किंत्विन्द्रियत्वेन तज्जन्यज्ञानत्वमनुमितिश्च मनस्त्वेन तज्जन्येति नातिव्याप्तिः । एतन्मतेच मनस इन्द्रियत्वाभ्युपगमान्न सुखादिप्रत्यक्षेऽव्याप्तिरित्यभिप्रेत्याह (तथाचेति) नन्वन्यत्र यथा तथास्तु औपनिषदे ब्रह्मणि प्रमाणांतरनिवृत्तेरनर्थनिवर्तकापरोक्षप्रमितौ तत्त्वमस्यादिवाक्यं करणं कल्प्यते नच मनः करणमिदानीमपि ब्रह्मसाक्षात्कारापत्तेरित्यत आह (ब्रह्मेति । मनएवेति) प्रत्यक्षकरणत्वेन तस्य क्लृप्तत्वादिति भावः । मनसो ब्रह्मसाक्षात्कारकरणत्वे प्रमाणांतरमाह (मनसैवेति) तस्यमनोगम्यत्वे बाधकमाशंक्य निराकरोति (नचैवमिति) अपूर्वस्य वेदवेद्यत्वेपि तदुपजीव्यनुमानार्थापत्तिवेद्यत्ववदुपनिषद्वेद्यत्वेपि ब्रह्मणो मननादिसंस्कृततदुपजीविमनोवेद्यत्वं न विरुद्धमित्याह (अस्मदुक्तेति) शास्त्रदृष्टिसूत्रविरोधमुद्धरति (शास्त्रेति) ॥

म० प्र०—सूक्ष्मवस्तुनि—लिपिरेखादौ, तत्र—सूक्ष्मवस्तुनि इन्द्रियत्वेच मनस इन्द्रियत्वेतु, तज्जन्यज्ञानत्वम्,—इन्द्रियजन्यज्ञानत्वम्, तज्जन्येति—मनोजन्येत्यर्थः । अन्यत्र—ब्रह्मेतरवस्तुनि इदानीमपिसंसारदशायामपि, प्रत्यक्षकारणत्वेन—सुखाद्यपरोक्षज्ञानकरणत्वेन, तस्य—मनसः । अपूर्वस्य—धर्माधर्मरूपस्य, वेदवेद्यत्वेपि—लिङादिघटितवेदवाक्यगम्यत्वेपि (तदुपजीवीति) वेदसहकृतेन स्वर्गादिफलवैचित्र्यंविचित्रापूर्वनिमित्तकं वेदगम्यविचित्रफलत्वाद्यन्नैवं तन्नैवमात्मवदित्यनुमानेन स्वर्गादिफलवैचित्र्यं विचित्रापूर्वेण विनाऽनुपपन्नमिति तदभावव्यापकीभूताभावप्रतियोगित्वज्ञानरूपार्थापत्तिप्रमाणेनच यथापूर्वस्यवेद्यत्वंतद्वदित्यर्थः । (तदुपजीवीति) वेदसहकृतेत्यर्थः परममूले (शास्त्रप्रयोज्यत्वादिति) शास्त्राधीनत्वादित्यर्थः ॥

मू०—तदुक्तम् ॥

अपि संराधने सूत्राच्छास्त्रार्थध्यानजाप्रमा ॥
शास्त्रदृष्टिर्मता तां तु वेत्ति वाचस्पतिः परमिति ॥

शि० म०—कल्पतरुकारसंमतिमाह (तदुक्तमिति) अनयोश्च पूर्वमतमेव युक्तं ग्रंथकृदभिमतं तथाहि न तावत्करणविशेषनिबंधनं संवित्प्रत्यक्षत्वं मनस इन्द्रियत्वनिराकरणेन सुखादिप्रत्यक्षे अव्याप्तेः किंतु प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वमुक्तं सूक्ष्मवस्तुन्यसमर्थेन्द्रियस्य सन्निकर्षाभावेनांतःकरणस्य बहिर्निर्गमनाभावान्नोक्तदोषः तथाच ब्रह्मसाक्षात्कारे तत्त्वमस्यादिवाक्यमेव करणं मनसैवानुद्रष्ट-

Funding by IKS-MoE

व्यमिति श्रुतिश्च तत्सहकारित्वविषया अन्यथा मनःकरणककामिनीसाक्षात्कारवत् ध्यानसहकृततज्जन्यतया तस्याः प्रमात्वापत्तेः । मूलप्रमाणदार्ढ्यात् प्रामाण्यमिति चेत्तर्ह्यावश्यकत्वेनोपनिषद एव दशमस्त्वमसीतिवत्प्रमाणत्वोपपत्तेः तथाच मनोगम्यत्वाभावश्रुतिरपि मुख्यार्थसमर्थिता भवतीति ॥

म० प्र०–परममूले (अपिसंराधनेइति) शास्त्रार्थाध्यानजा–वेदांतशास्त्रार्थध्यानजा प्रमा शास्त्रदृष्टिर्मता "शास्त्रदृष्ट्यातूपदेशोवामदेववत्" इति सूत्रे शास्त्रदृष्टिशब्देनाभिमता तां शास्त्रार्थध्यानजां शास्त्रदृष्टिं वाचस्पतिरेव जानाति शास्त्रार्थध्यानजा प्रमैव शास्त्रदृष्टिरित्यत्र को हेतुरित्याशंक्याह अपि संराधने सूत्रात्–अपिच संराधने प्रत्यक्षानुमानाभ्यामिति सूत्रात्संराधनेपि भक्तिध्यानप्रणिधानाद्यनुष्ठानकालेपि निरस्तसमस्तप्रपंचमात्मानं योगिनः पश्यंति तत्र हेतुमाहप्रत्यक्षानुमानाभ्यामिति ज्ञानप्रसादेन शुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः ॥

यं विनिद्रा जितश्वासास्संतुष्टास्संजितेन्द्रियाः ।
ज्योतिः पश्यंति युंजानास्तस्मै योगात्मने नमः ॥

इति श्रुतिस्मृतिभ्यामित्यर्थः (सूक्ष्मवस्तुन्यसमर्थेति) लिपिरेखादिरूपसूक्ष्मवस्तुविषयकज्ञानजननासमर्थेत्यर्थः । उक्तदोषः–एकस्मिन्नेव सूक्ष्मवस्तुनि पटुकरणापटुकरणयोः प्रत्यक्षत्वाप्रत्यक्षत्वव्यवहारानुपपत्तिरूपदोषः । तथाच–संविदः प्रमाणचैतन्यस्य विषयचैतन्याभिन्नत्वरूपप्रत्यक्षत्वाभ्युपगमे दोषाभावे सति (तत्सहकारित्वेति) मनःसहकारित्वेत्यर्थः । अन्यथा–ऐक्यसाक्षात्कारे मनसः करणत्वे, ध्यानसहकृततज्जन्यतया–लक्ष्यैक्यगोचरप्रत्ययप्रवाहरूपध्यानसहकृतमनोजन्यतया, तस्य–ऐक्यसाक्षात्कारस्य (मूलप्रमाणेति) वेदांतवाक्यरूपमूलप्रमाणेत्यर्थः । प्रामाण्यम्–अभेदविषयकध्यानसहकृतमनोजन्यज्ञानस्य प्रमात्वम् । तर्हि–वेदांतवाक्यरूपमूलप्रमाणदार्ढ्यात् ध्यानसहकृतमनोजन्याभेदविषयकसाक्षात्कारस्य प्रामाण्ये सति, आवश्यकत्वेन–उपनिषद आवश्यकत्वेन, तथाच–उपनिषदः प्रमाणत्वे सति श्रुतिरपि–"यतो वाचो निवर्त्तंते" इत्यादिश्रुतिरपि, समर्थिता–उपपन्ना ॥

मू०–तच्च ज्ञानं पापक्षयाद्भवति स च कर्मानुष्ठानादिति परंपरया कर्मणां विनियोगः अत एव "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेन" इत्यादि श्रुतिः "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्त्तते" इत्यादिस्मृतिश्च संगच्छते ॥

Funding by IKS-MoE

शि०म०-तत्र यज्ञादीनां श्रेयःपरिपंथिकल्मषनिबर्हणद्वारोपयोग इति केचित्तन्न तत्त्वज्ञाने सति संचितस्य कर्मणो निवृत्तत्वेन मुक्तिप्रतिबंधकत्वायोगात । प्रारब्धस्य च भोगैकनाश्यत्वेन यज्ञादिनिबर्हणीयत्वायोगात । तस्मात्कर्मणां नमुक्तौ विनियोगः । किंतु पापानिवृत्तिद्वारा ब्रह्मसाक्षात्कारोत्पत्तावित्याह (तच्चेति) तत्र प्रमाणमाह (अतएवेति । तमेतमिति) तमेतमात्मानं वेदानुवचनयज्ञदानानाशकतपोभिर्वैत्तुमिच्छंतीतीच्छासाधनतया वेदानुवचनादीनि विधीयंते न तु विदंतीति ज्ञानसाधनतया, वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाश्च प्रत्ययार्थतया प्राधान्यात् । प्रधानेनच कार्य्यसंप्रत्ययात् । नहि राजपुरुषमानयेति वस्तुतः प्रधानमपि राजपुरुषविशेषणतया शब्दत उपसर्जनमानीयते अपितु पुरुष एवशब्दतस्तस्य प्राधान्यात् । एतानि च न साक्षाद्विविदिषाहेतवः किंतुदुरितनिबर्हणलक्षणपुरुषसंस्कारद्वारा 'यस्यैते चत्वारिंशत्संस्कारा' इत्यादिश्रुतेः ॥

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ॥
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ॥

इत्यादिवचनैश्च तथात्वावगमात् । ततश्चनित्यनैमित्तिककर्माणि मलापकर्षलक्षणपुरुषसंस्कारद्वाराविविदिषाहेतव इत्याचार्य्यवाचस्पतिमिश्रा व्याचक्षते ॥

म०प्र०-तत्र मोक्षे, निबर्हणद्वारा-नाशद्वारा तत्र-कर्मणां ब्रह्मसाक्षात्कारोत्पत्तिकारणत्वे, वस्तुतः-वस्तुसामर्थ्येन, शब्दतः-शब्दसामर्थ्येन (प्रत्ययार्थतयेति) प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति न्यायादिति भावः । कार्य्यसंप्रत्ययात्-इतरपदार्थान्वयरूपकार्य्यबोधात अपितु किंतु पुरुषएवानीयते इत्यन्वयः तस्य पुरुषस्य एतानि च यज्ञादिकर्माणि तु यस्यैते चत्वारिंशत्संस्कारा इति गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मअन्नप्राशननिष्क्रामणचौलउपनयनानि चत्वारिवेदव्रतानि स्नानं सह धर्मचारिणीसंयोगः पंचानां यज्ञानामनुष्ठानं अष्टकापार्वणं श्राद्धं श्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्तपाकसंस्था अग्न्याधेयमग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यान्याग्रहायणेष्टिर्निरूढपशुबंधः सौत्रामणीति सप्तहविर्यज्ञसंस्था अग्निष्टोमोत्यग्निष्टोम उक्थः षोडशी वाजपेयोऽतिरात्र आप्तोर्यामइति सप्तसोमयज्ञसंस्था इत्येतेचत्वारिंशत्संस्काराः इत्यादिश्रुतेरित्यादिपदेन संस्कारा इत्यस्याग्रेअष्टावात्मगुणाश्चसब्राह्मणः सायुज्यमाप्नोतीति वाक्यशेषो ग्राह्यः । दया सर्वभूतेषु क्षांतिरनसूया शौचमनायासो मांगल्यमकार्पण्यमस्पृहेत्यष्टावात्मगुणाः (महायज्ञैश्च) ॥

Funding by IKS-MoE

अध्ययनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ॥
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥

इति पंचमहायज्ञैश्च । तथात्वावगमात्—यज्ञादिकर्मणां दुरितनाशलक्षणपुरुषसंस्कारद्वारा विविदिषाहेतुत्वावगमात् ॥

मू०—एवं श्रवणमनननिदिध्यासनान्यपि ज्ञानसाधनानि मैत्रेयी ब्राह्मणे आत्मा वा अरे द्रष्टव्य इति दर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रवणमनननिदिध्यासनानां विधानात् ॥

शि० म०- विवरणाचार्यास्तु सर्वाण्येव कर्माणि तमेतं वेदानुवचनेनेत्यादिना ज्ञानसाधनत्वेन विधीयंते नत्विच्छासाधनतया शब्दतः प्रधानाया अपीच्छाया यज्ञादिसाध्यत्वायोगाद्वेदनस्य तूपसर्जनस्यापि स्वर्गादिवत्साध्यतया पुरुषार्थतया च भाव्यत्वेनान्वयोपपत्तेः । तथाचात्मानुभवकामो यज्ञादीननुतिष्ठेदिति विधिः परिणम्यते इति । ननु कर्मणां पापनिवृत्तिद्वारा ज्ञानजनकत्वे श्रवणादिवैयर्थ्यं स्यादित्याशंक्य नहि कर्मभिः पापनिवृत्तिस्तयाचाहत्यज्ञानमिति प्रणालिका विवक्षिता किंतु कर्मानुष्ठानात् पापनिवृत्त्या शुद्धसत्त्वोदये सति विषयदोषदर्शनसंजातवैराग्यादिसाधनसंपत्तौ, श्रवणादिद्वारेत्यभिप्रेत्याह (एवमिति). ननु श्रवणादेर्न ब्रह्मज्ञानहेतुत्वं मानाभावात् श्रोतव्य इत्यादेश्च श्रवणादिस्वरूपे एव प्रमाणत्वात् । स स्वर्गःस्यात् सर्वान्प्रत्यविशिष्टत्वादितिन्यायेन स्वर्गादिफलत्वकल्पनयैव विधेर्भाव्याकांक्षोपशमादित्याशंक्य एतावदरे खल्वमृतत्वमित्यर्थवादावगतमोक्षसाधनत्वेन बोधितस्य सन्निहितस्यैवं ब्रह्मज्ञानस्य फलत्वोपपत्तेर्नाश्रुतस्वर्गादिपरिकल्पनावकाश इत्याशयवानाह (मैत्रेयीति । विधानाद्विति) एतच्च नियमाविधिमभ्युपेत्य श्रवणस्य श्रूयमाणाव्यवहितयोग्यसाक्षात्कारजनकतायाः ॥

म० प्र०—(यज्ञादिसाध्यत्वायोगादिति) इष्टसाधने इच्छाया इष्टसाधनताज्ञानजन्यत्वादिति भावः । भाव्यत्वेन—यज्ञादिफलत्वेन । तया—पापनिवृत्त्या, आहत्य—स्वसामर्थ्येन, प्रणालिका—क्रमः, श्रवणादिस्वरूपेएव—नत्वात्मविषयकापरोक्षज्ञानजनकश्रवणादिस्वरूपे इत्येवकारार्थः । ननु श्रवणस्यात्मज्ञानफलनिंगीकारे फलमंतरेणाविध्यनुपपत्तेः श्रवणादिफलं वाच्यमित्याशंक्याह (सस्वर्गइति) विधेः—श्रवणादिविधेः भाव्योति—फलेत्यर्थः (एतावदरइति) एतावत्ससंन्यासेनेतिनेत्याद्युक्तरूपमात्मज्ञानमे]

Funding by IKS-MoE

चारे हे मैत्रेयि अमृतत्वममृतत्वसाधनामित्यर्थः । परममूले (मैत्रेयीब्राह्मणेइति) याज्ञवल्क्यस्य मैत्रेयीनामकस्वभार्य्यया सह संवादप्रकरणे इत्यर्थः । एतच्च–विधानादिति कथनं च, नियमविधिम्–श्रवणादिषु पक्षेऽप्राप्तस्य प्राप्तिविधायकनियमविधिम् । श्रवणादिषु नियमविध्यभ्युपगमे हेतुमाह (अपूर्वविधित्वेति) श्रवणादिषु प्रमाणांतराप्राप्तार्थप्रापकत्वरूपापूर्वविधित्वेत्यर्थः । श्रवणादिषु अपूर्वविधित्वायोगेहेतुमाह (श्रवणस्येत्यादिना) श्रवणस्य–दशमस्त्वमसीत्यादिवाक्यश्रवणस्य, योग्येति–प्रत्यक्षयोग्यदेवदत्तादिपुरुषेत्यर्थः ॥

शि० म०–अन्वयव्यतिरेकसहकृतप्रत्यक्षसिद्धतया ब्रह्मविचारेपि तन्मूलानुमानादेव ब्रह्मसाक्षात्कारहेतुत्वासिद्धेःअपूर्वविधित्वायोगात् । वस्तुतस्तत्र नियमोपि न संभवति व्यावर्त्याभावात् । तथाह्यात्मावाअरेश्रोतव्य इत्यत्र किं विषयनियम आत्मैव श्रोतव्य इति किंवा धात्वर्थनियमः श्रोतव्य एवेति अवहन्यादेवेतिवत् नाद्यः "तरति शोकमात्मवित्"इत्यादिश्रुत्या आत्मज्ञानस्यैव मोक्षहेतुत्वावगमेनानात्मविचारस्याप्राप्तेर्नापि द्वितीयः । मननादिविधिविरोधात् नचात्मज्ञानाय वेदांतवाक्यमेव विचारयेदिति नियमविध्याश्रयणे तेन पुराणवाक्यादिव्यावृत्तिसिद्धिरिति वाच्यम् । आत्मावा अरे द्रष्टव्य इत्यादिषु वेदांतवाक्यस्य पदार्थत्वेनाश्रवणात पदार्थनियमेचातिप्रसंगात् ॥

बिभेत्यल्पश्रुताद्वेदः मामयंप्रहरिष्यति ।
इतिहासपुराणाभ्यां वेदंसमुपबृंहयेदिति ॥

संभवपर्वणिवेदार्थनिर्णयोपायत्वेनेतिहासपुराणयोरपि विचार्य्यत्वंप्रतिपादनाच्च । किंच श्रवणं नामतात्पर्यावधारणं तदनुकूलामानसी क्रियावातदुभयं शाब्दज्ञानेहेतुः तत्र नियमविध्याश्रयणेश्रवणमेव शाब्दज्ञानहेतुर्नान्यदिति स्यात्तच्चनभवति आकांक्षादेस्तद्धेतुभूतस्यनिवृत्त्ययोगादन्यस्यव्यावर्त्यस्यासिद्धेः । नचैवं श्रवणस्यशाब्दज्ञानहेतुत्वेदर्शनोद्देशेन श्रवणं विधीयते इत्यसंगतंस्यादिति वाच्यम् सिद्धांते शाब्दज्ञानस्यापरोक्षरूपतया विरोधाभावात् ॥

म०प्र०–(अन्वयव्यतिरेकेति) अव्यवहितयोग्यार्थशब्दश्रवणसत्त्वे श्रूयमाणाव्यवहितयोग्यार्थसाक्षात्कारः तदभावे तदभाव इत्यन्वयव्यतिरेकेत्यर्थः । प्रत्यक्षसिद्धतया–मानसप्रत्यक्षसिद्धतया साक्षिरूपप्रत्यक्षसिद्धतया वा ब्रह्मविचारेपि ब्रह्मश्रवणेपि, तन्मूलानुमानादेव–अधिकारिनिष्ठब्रह्मप्रतिपादकवाक्यश्रवणं ब्रह्मसाक्षात्कारजनकंयोग्याव्यवहितार्थकशब्दश्रवणत्वात् यत्र योग्याव्यवहितार्थकशब्दश्रवणत्वं तत्र योग्याव्यवहितार्थसाक्षात्कारजनकत्वमिति सामान्यव्याप्तौ दशमस्त्वमसीत्यादिवाक्य-

Funding by IKS-MoE

श्रवणवदिति प्रत्यक्षमूलकानुमानादेव, तत्र-श्रवणादिषु, नियमोपि-नियमविधिरपि (किंविषयनियमइति) आत्मैव श्रोतव्य इति श्रवणविषये किं नियम इत्यर्थः (अनात्मविचारस्याप्राप्तेरिति) यद्यपिरागादनात्मश्रवणप्राप्तिरस्ति तथापि मोक्षफलकानात्मश्रवणस्य रागादप्राप्तेर्व्यावर्त्याभावः एकफलकोभयप्राप्तावेव नियमविधिस्वीकारादितिभावः । तेन-नियमेन, अपदार्थनियमे-श्रोतव्य इत्यत्रापदार्थवेदांतवाक्ये नियमस्वीकारे, अतिप्रसंगात्-अपदार्थत्वस्य तुल्यत्वेन पुराणवाक्यमेवविचारयेदिति नियमप्रसंगात्, समुपबृंहयेत्-संशयविपर्ययागोचरार्थप्रतिपादकतांनयेत् (तदनुकूलेति) तात्पर्य्यनिश्चयजनकेत्यर्थः । तत्र-उक्तश्रवणे, तच्च-श्रवणस्यैव शाब्दज्ञानहेतुत्वं च। नन्वाकांक्षाद्यन्यस्यैवैवकारेणव्यावृत्तिः स्यादित्याशंक्याह (अन्यस्येति) आकांशाद्यन्यस्येत्यर्थः । एवं-विधिंविनैव (शाब्दज्ञानेति) परोक्षशाब्दज्ञानेत्यर्थः । असंगतम्-शाब्दज्ञानस्य परोक्षत्वेनापरोक्षात्मज्ञानसाधनतयाश्रवणविधानमसंगतम् ॥

शि० म०-उक्तस्य श्रवणस्य तात्पर्य्यविषयकत्वेन परंपरया आत्मविषयतया श्रोतव्य इति निर्देशो न विरुध्यते किंच न वेदान्तानां श्रवणादिविधिपरत्वं वाक्यभेदप्रसंगात । अन्यथा ब्रह्मपरत्वाभावे ब्रह्मणोऽसिद्धिप्रसंगः । ननु सहकार्य्यंतरविधिः पक्षेण तृतीयं तद्वतोविध्यादिवदित्यत्र श्रोतव्य इत्यादि वाक्यानां विधायकत्वांगीकारान्न तद्विरोध इति चेत् न, पक्षेणेति वदता सूत्रकृता निपुणानां विध्यनपेक्षत्वं जडानां तु सर्वसंगपरित्यागपूर्वकब्रह्मज्ञाने प्रवृत्तिर्नस्यादिति. तेषामेव प्रवृत्तिसिद्ध्यर्थंविध्यंगीकरणमिति सूचितम् । अन्यथा पक्षेणेति विशेषणवैयर्थ्यापत्तेः । नचानुवादवैयर्थ्यं तस्य ह्ययमौपनिषद आत्मा यतो मोक्षहेतुसाक्षात्कारसाधनविचारविषय इति प्रकारेणात्मनः ॥

म० प्र०-ननु श्रवणस्य तात्पर्य्यविषयकत्वेनाऽऽत्मविषयकत्वाभावादात्मसाक्षात्कारमनूद्य श्रोतव्य इति श्रवणं विधीयते इत्युक्तिरनुपपन्नेत्याशंक्याह (उक्तस्येति) तात्पर्य्यनिश्चयरूपस्य तात्पर्य्यनिश्चयानुकूलमानसीक्रियारूपस्यवेत्यर्थः । परंपरया-स्वविषयविषयत्वरूपपरंपरया, स्वं-श्रवणमिति संबंधघटकस्वशब्दार्थः । वेदान्तानाम्-मैत्रेयीब्राह्मणस्थश्रोतव्यइत्यादिवाक्यानां, वाक्यभेदप्रसंगात्-मैत्रेयीब्राह्मणस्थश्रोतव्य इत्यादिवाक्यानाम् श्रवणादिविधिपरत्वे ब्रह्मपरत्वेच विषयभेदसत्त्वेन वाक्यभेदप्रसंगात्, अन्यथा-श्रोतव्य इत्यादिवाक्यानाम् श्रवणादिविधिपरत्वस्वीकारे अन्यथेत्यस्यैव वा विवरणं ब्रह्मपरत्वाभावे इति, ब्रह्मणोऽसिद्धिप्रसंगः-मैत्रेयीब्राह्मणस्य ब्रह्मपरत्वाभावेन मैत्रेयींप्रति ब्रह्मविषयकनिश्चयाभावप्रसंगः (सहकार्य्यंतरवि-

धिरिति) इदं हि सूत्रं तृतीयाध्याये चतुर्थपादस्यसप्तचत्वारिंशत्संख्याकम् । अस्यार्थः बृहदारण्यके हि बाल्यं च पांडित्यं च निर्विंद्याथ मुनिरमौनंच मौनंच निर्विंद्याथ ब्राह्मण इति श्रूयते अत्र किंनिदिध्यासनाख्यं मौनं विधीयते नवेति संशयेऽत्र विध्यभावादथमुनिरित्यत्र न मौनविधिरिति पूर्वपक्षे सिद्धांतमाह (सहाकार्य्यंतरविधिरिति) फलभूतसाक्षात्कारे श्रवणाद्यपेक्षाया सहकार्य्यंतरस्यमौनस्यानिदिध्यासनाख्यस्य विधिरित्यर्थः । ननुगार्हस्थ्यमाचार्य्यकुलं मौनंवानप्रस्थमित्यत्र मौनशब्दस्य पारिव्राज्ये प्रयोगात्कथमत्र मौनं निदिध्यासनं स्यादत आह (तृतीयमिति) श्रवणमननद्वयापेक्षया तृतीयं निदिध्यासनमेवात्रमौनं विधेयमित्यर्थः । कस्यायं मौनविधिस्तत्राह (तद्वतइति) ब्रह्मपरोक्षज्ञानवतः पूर्ववाक्ये प्रकृतस्य सन्यासिन इत्यर्थः । ननु सूक्ष्मवस्तुसाक्षात्कारहेतोः निदिध्यासनस्य प्राप्तत्वान्न विधेयत्वमत आह (पक्षेणेति) यस्मिन्पक्षेभेददर्शनप्राप्तिस्तस्मिन्पक्षे प्राप्त्यभावाद्विधिरर्थवानित्यर्थः । ननु ब्रह्मपरवाक्ये कथं मौनविधिरित्याशंक्य दृष्टांतमाह (विध्यादिवदिति) यथादर्शपूर्णमासप्रधानपरवाक्येऽन्वाधानादेरंगजातस्य विधिस्तद्वदित्यर्थः । प्रधानमारभ्यांगपर्य्यंतो विधिस्तस्यादिर्विध्यादिः प्रधानमिति यावदिति (नतद्विरोधइति) तस्य श्रवणादिविधेर्वाक्यभेदापत्त्यादिदोषैरनुपपत्तिर्नेत्यर्थः । तेषामेव–जडबुद्धीनामेव, अन्यथा–सर्वान्प्रातिविध्यंगीकारे (विशेषणेति) विशेषकथनेत्यर्थः । तस्य–अनुवादस्य ॥

श्रवणं नाम वेदांतानामद्वितीये ब्रह्मणि तात्पर्य्यावधारणानुकूलमानसी क्रिया । मननं नाम शब्दावधारितेर्थे मानांतरविरोधशंकायां तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः । निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्योपकृष्यात्मविषयकस्थैर्य्यानुकूलो मानसो व्यापारः ॥

शि० म०–विष्णुरुपांशुयष्टव्य इतिवत्स्तुत्यर्थत्वेनोपपत्तेः अतएव भाष्यकृता समन्वयसूत्रे लिङादयः श्रूयमाणा अप्यानियोज्यविषयत्वात्कुण्ठीभवंतीत्युक्तम् । अत एव द्वितीयवर्णके टीकाकृता यद्येवं किंविधिनास्वयमेव विज्ञानहेतौ पुरुषार्थसाधने प्रवर्त्तत इतिविध्यभावः कण्ठरवेणांगीकृतः तत्रैव च विवरणाचार्य्यैर्निदिध्यासितव्य इति चात्मप्रतिपादनपरवाक्यस्यवाक्यभेदाभावाय स्तुतिपरत्वादित्युक्तम् । तस्मादर्हार्थे द्रष्टव्यपदसमभिव्याहारेण प्रदर्शितन्यायेन श्रोतव्य इत्यादेरप्यर्हार्थत्वमेव युक्तं न विधायकत्वमित्यास्तामतिविस्तरः । ननु दर्शनवच्छ्रवणादे

Funding by IKS-MoE

रपि ज्ञानतया नानुष्ठेयत्वमित्याशंक्य श्रवणादिस्वरूपं निरूपयाति "(श्रवणंनामेत्यादिना) ननु ध्यानस्य निदिध्यासनपदवेदनीयस्य ध्येयगोचरसाक्षात्कारकारणत्वेपि मननश्रवणयोर्नहेतुत्वं ध्यानेन ब्रह्मसात्कारोत्पत्तिसमये तयोरभावादित्याशंक्य नहि तेषामेकरूपेण हेतुत्वमिह विवक्षितं किंतु ध्यानस्यसाक्षात् ॥

.मं० प्र०–विष्णुरुपांशुयष्टव्यइतिवत्–अयामित्वाय अनालस्यायोपांशु अस्फुटोच्चारणं यथा स्यात्तथा विष्णुर्यष्टव्यः पूजनीय इत्यर्थकस्य विष्णुरुपांशुयष्टव्योयामित्वायेत्यनुवादवाक्यस्य यथास्तुतिपरत्वं तद्वत् । नचोपांशुयाजमंतरा यजतीत्यस्य यथा विधिपरत्वं विष्णुरुपांशुयष्टव्य इत्यस्य स्तुतिपरत्वं तथामैत्रेयीब्राह्मणे विधिवाक्याभावात्कथं श्रोतव्य इत्यस्य स्तुतिपरत्वमिति वाच्यम् । अज्ञातज्ञापकस्य विधित्वेन मैत्रेयीब्राह्मणब्रह्मात्मवाक्यानामप्यज्ञातज्ञापकत्वसंभवेन श्रोतव्य इत्याद्यनुवादस्य स्तुतिपरत्वसंभवादिति । अतएव–वेदातानां मुख्यविधिपरत्वाभावादेव । समन्वयसूत्रे–तत्तुसमन्वयात् इति सूत्रे । अनियोज्यविषयत्वात्–वेदांतानां सिद्धब्रह्मपरत्वेन वेदांतेषु कार्य्याभावेन कार्य्यविषयकस्वकीयत्वज्ञानवत्पुरुषरूपनियो[illegible]भावेन कार्य्यविषयकस्वकीयत्वज्ञानवत्पुरुषरूपनियोज्यविषयकत्वाभावात्, द्विती[illegible]के–तत्तुसमन्वयादितिसूत्रद्वितीयव्याख्याने, टीकाकृता–वाचस्पतिसंज्ञकटीकाकारेण, एवं–नियोज्याभावः, तत्रैव–तत्तुसमन्वयादिति सूत्रद्वितीयव्याख्याने एव, तयोः–मननश्रवणयोः । तेषां–श्रवणमनननिदिध्यासनानां, एकरूपेण–अनन्यथासिद्धत्वे सत्यव्यवहितपूर्वक्षणवृत्तित्वस्वरूपेण ॥

मू०–तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणं "ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्" इत्यादिश्रुतेः। निदिध्यासने च मननं हेतुः। अकृतमननस्यार्थदार्ढ्याभावेन तद्विषयनिदिध्यासनायोगात्। मनने च श्रवणं हेतुः। श्रवणाभावे तात्पर्य्यानिश्चयेन शाब्दज्ञानाभावेन श्रुतार्थविषयकयुक्तत्वायुक्तत्वनिश्चयानुकूलमननायोगात्, तानि त्रीण्यपिज्ञानोत्पत्तौ कारणानीति केचिदाचार्य्या ऊचिरे। अपरेतु श्रवणं प्रधानं मनननिदिध्यासनयोस्तु श्रवणात्पराचीनयोरपिश्रवणफलब्रह्मदर्शननिर्वर्त्तकतया आरादुपकारकतयांऽगत्वमित्याहुः । तदप्यंगत्वं न तार्तीयशेषत्वरूपम् ॥

शि०म०—श्रवणमननयोस्तुमनननिदिध्यासनद्वारेत्याह (तत्रेति साक्षादिति) यद्यपि शक्तितात्पर्य्यविशिष्टवेदांतावधारणस्यैवापरोक्षज्ञानेसाक्षात्कारणत्वं तथापि शाब्दज्ञानपरोक्षनियमवादिमते ध्यानस्यैव साक्षाद्धेतुत्वाभ्युपगमात्तदभिप्रायेणोक्तमथवाऽप्रतिबद्धब्रह्मापरोक्षज्ञानमेवानर्थनिवृत्तिहेतुरन्यथा तत्त्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्ववादिमते मनननिदिध्यासनवैयर्थ्यात्तत्र प्रतिबंधकनिवर्त्तकध्यानस्य साक्षात्कारणत्वम् । ननु श्रवणादीनां न तावद्दर्शपूर्णमासवत् समप्रधानभावेन ब्रह्मज्ञानेहेतुत्वं तेषामेकरूपेणाहेतुत्वात् नापि प्रयाजदर्शादिवत् शेषशेषिभावेन श्रुतिलिंगादेस्तत्प्रमाणस्याभावादित्याशंक्य प्रधानाप्रधानौदासीन्येन कारणत्वमात्रं विवक्षितमित्याह (एतानीति) न तार्तीयेति तृतीयाध्यायनिरूपितशेषत्वलक्षणांगत्वं नेत्यर्थः ॥

म० प्र०—मनननिदिध्यासनद्वारा—श्रवणस्य मनननिदिध्यासनद्वारा, मननस्य तु नि[illegible]सनद्वारेति भावः (अवधारणस्यैवेति) अत्रैवकारेण ननु ध्यानस्येति ध्या[illegible]ष्ठसाक्षात्कारहेतुत्वव्यावृत्तिः, तदभिप्रायेण—शब्दज्ञानस्य परोक्षत्वनियमवादिमताभिप्रायेण, उक्तम्—ध्यानस्यात्मसाक्षात्कारकारणत्वमुक्तम्, अन्यथा-ब्रह्मापरोक्षज्ञानमात्रस्यानर्थनिवृत्तिहेतुत्वाभ्युपगमे, तत्र—अप्रतिबद्धब्रह्मापरोक्षज्ञाने । परममूले (अर्थदाढर्याभावेनेति) निदिध्यासनविषयनिश्चयाभावेनेत्यर्थः । परममूले (तद्विषयेति) श्रुतार्थविषयेत्यर्थः । समप्रधानभावेन—तुल्यप्रधानत्वेन, तेषां—श्रवणादीनाम्, तत्प्रमाणस्य—शेषशेषिभावविषयकप्रमाजनकस्य । परममूले (पश्चाचीनयोरिति) परपूर्वकस्यांचुधातोः पश्चाद्भाव्यर्थकत्वेनपश्चाद्भाविनोरित्यर्थः ॥

मू०—तस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृते श्रुत्याद्यभावे ऽसंभवात् । तथाहि व्रीहिभिर्यजेतेति दध्नाजुहोतीत्यादाविव मनननिदिध्यासनयोरंगत्वे न काचित्तृतीयाश्रुतिरस्ति नापि बर्हिर्देवसदनंदामीत्यादिमंत्राणां बर्हिःखंडनप्रकाशनसामर्थ्यवत् किंचिल्लिंगमस्ति नापि प्रदेशांतरपठितप्रवर्ग्यस्याग्निष्टोमे प्रवृणक्तीति वाक्यवत् श्रवणानुवादेन मनननिदिध्यासनविनियोजकं किंचिद्वाक्यमस्ति नापि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यावगतफलसाधनताकदर्शपौर्णमासप्रकरणे प्रयाजादीनामिव फल-

साधनत्वेनावगतस्य श्रवणस्यप्रकरणे मननिदिध्यासनयोराम्नानम् ॥

शि० म०–ननु कारणताग्राहकादेव प्रमाणान्मननादेरंगत्वमवसीयते इत्याशंक्य प्रधानसाधारणत्वान्न तस्य निश्चायकत्वमित्यभिप्रेत्याह (तस्येति) श्रुत्याद्यभावमेवोपपादयति (तथाहीति) साक्षाद्विनियोजिकां श्रुतिं निराकृत्य तदनुमानद्वारा विनियोजकलिंगादीन्याशंक्य निरस्यति (नापीति) ननु मननिदिध्यासनयोरप्राधान्येन प्रकरणाच्छ्रवणांगत्वमवगम्यते इत्याशंक्य सिद्धे हि श्रवणस्य ज्ञानलक्षणफलसाधनत्वेन प्राधान्ये तदाकांक्षालक्षणं प्रकरणं स्यात्तदेवतु नास्ति मानाभावात् । तथाहि किं दर्शपूर्णमासवद्विध्युद्देशे कामपदश्रवणात्फलान्वयः ॥

म० प्र०–कारणताग्राहकादेव–मंतव्यो निदिध्यासितव्य इत्यादिरूपादीत[illegible]क्षात्कारनिरूपितमननिदिध्यासननिष्ठकारणताग्राहकादेव, प्रधानसाधारणत्वात् [illegible]णतायाः प्रधानेपि वृत्तित्वात्, तस्य–कारणताग्राहकप्रमाणस्य, ननिश्चायकत्वं–म[illegible]दिनिष्ठांगत्वनिश्चायकत्वं न अंगप्रधानवाक्ययोर्भिन्नत्वेनैकवाक्यस्य प्रधानाप्रधानविधायकत्वमेव न संभवतीति भावः । नच मंतव्य इत्यादिभिन्नमेव वाक्यमिति वाच्यम्, भिन्नवाक्यत्वे विनिगमनाविरहेण मननस्य निदिध्यासनस्य वांगित्वमितरयोश्चांगत्वमित्यनिष्टापातात् । नच श्रवणं विनेतरमननिदिध्यासनानुपपत्त्या श्रवणस्य प्रधानत्वमितरयोरप्रधानत्वमिति वाच्यम् । अंगैर्विना प्रधानकर्मणोप्यनुपपन्नत्वेनांगेषु प्रधानत्वापत्तेरिति (तदनुमानेति) बर्हिश्छेदनं बर्हिर्देवसदनंदामीत्यनेन मंत्रेण बर्हिश्छेदनं कुर्यादिति श्रुतिबोधितं लिगवन्मंत्रबोधितत्वात् । यत्र लिंगवन्मंत्रबोधितत्वं तत्र श्रुतिबोधितत्वमिति सामान्यव्याप्तौ सदनकरणादिवदित्यादिश्रुत्यनुमानेत्यर्थः । आशंक्य–तार्तीयशेषशेषिभावप्रमाणत्वेनाशंक्य परममूले (प्रवृणक्तीति) प्रवर्ग्याख्यंकर्मकुर्यादित्यर्थः । परममूले इति वाक्यवदितिदेशांतरपठितप्रवर्ग्याख्यकर्मणोंगत्वबोधकत्वं यथैतद्वाक्यस्य तद्वदित्यर्थः (तदाकांक्षेति) उभयाकांक्षेत्यर्थः । तदेव श्रवणस्य ज्ञानलक्षणफलसाधनत्वेन प्राधान्यमेव दर्शपूर्णमासवत् दर्शपूर्णमासविधायकवाक्ये कामपदश्रवणाद्यथा दर्शपूर्णमासयोः स्वर्गफलान्वयस्तद्वत् विध्युद्देशे श्रवणविधिवाक्ये फलान्वयश्रवणस्यात्मसाक्षात्कारलक्षणफलेनान्वयः ॥

मू०–ननु द्रष्टव्य इति दर्शनानुवादेन श्रवणे विहिते सति [illegible] वत्तया श्रवणप्रकरणे तत्सन्निधावाम्नातयोर्मननिदि[illegible]

सनयोः प्रयाजन्यायेन प्रकरणादेवांगतेति चेन्न । ते ध्यानयोगानुगता अपश्यन्नित्यादि श्रुत्यंतरे ध्यानस्य दर्शनसाधनत्वेनावगतस्यांगाकांक्षायां प्रयाजन्यायेन श्रवणमननयोरेवांगत्वापत्तेः क्रमसमाख्ये च दूरनिरस्ते। किंच प्रयाजादिषु अंगत्वविचारः सप्रयोजनः पूर्वपक्षे विकृतिषु न प्रयाजानुष्ठानं सिद्धांते तु तत्रापि तदनुष्ठानमिति। प्रकृते तु श्रवणं न कस्यचित्प्रकृतिः येन मनननिदिध्यासनयोस्तत्राप्यनुष्ठानमंगत्वविचारफलं भवेत् । तस्मान्नतार्त्तीयशेषत्वं मनननिदिध्यासनयोः ॥

शि० म०–उत सिद्धसाध्यसमभिव्याहारे सिद्धं साध्यायोपयुज्यते इति [illegible]यात् । तत्राद्यं निराकृत्य द्वितीयमुत्थापयति (नन्विति) शृण्वंतो[illegible]बहवो यं न विद्युरिति वाक्यं श्रवणस्य ज्ञानसाधनत्वे वक्रोक्त्या मा[illegible]। तथा च श्रवणमेव प्रकरणीयमिति यदि ब्रूयात्तदा दोषांतरमाह (किंचेति । विकृतिष्विति) सौर्ययागादिष्वित्यर्थः ॥

म० प्र०–सिद्धं–स्वर्गादिकं साध्याय–यागादिसाध्यविधानाय, उपयुज्यते–उपयुक्तो भवति समर्थो भवतीति यावत् फले सति साधनविधानं दृष्टमिति भावः । नच दर्शनस्य जन्यत्वेन कथं सिद्धत्वमिति वाच्यम्, स्वर्गादीनां सिद्धत्वानुपपत्त्याऽजन्यत्वरूपसिद्धत्वासंभवेन प्रमाणांतरेण ज्ञातत्वरूपसिद्धत्वस्यावश्यंवक्तव्यत्वेन दर्शनस्य ब्रह्मविदाप्नोति परमित्याद्यर्थवादावगतत्वेन प्रमाणांतरेण ज्ञातत्वरूपसिद्धत्वसंभवात् न्यायात्फलान्वय इत्यन्वयः । तत्र–पक्षद्वयमध्ये । निराकृत्य–नापि दर्शपूर्णमासाभ्यामित्यादि ग्रंथेन निरस्य । परममूले (अंगतेति) सिद्धसाध्यसमभिव्याहारे इत्यादिन्यायेन श्रवणस्य दर्शनलक्षणफलवत्त्वे सिद्धे फलवत्सन्निधावफलं तदंगमिति न्यायेन मनननिदिध्यासनयोः प्रकरणप्रमाणाच्छ्रवणांगता स्यादिति पूर्वपक्ष्याशयः । परममूले (अंगत्वापत्तेरिति) न्यायापेक्षया वाक्यस्यप्रबलत्वेन ते ध्यानयोगानुगता अपश्यन्नित्यादिवाक्येन ध्यानस्य दर्शनलक्षणफलवत्त्वे निश्चिते प्रत्युतप्रकरणप्रमाणाच्छ्रवणमननयोरंगता स्यादिति सिद्धांत्याशय इति, वक्रोक्त्या–श्रवणस्य दर्शनलक्षणफलसाधनत्वेपि श्रवणस्य दर्शनलक्षणफलाभावोक्त्या, प्रकरणीयम्–प्रकरणप्रमाणवत्श्रवणस्य दर्शनलक्षणफलवत्त्वेन प्राधान्यमिति यावत् । परममूले (पूर्वपक्षेइति) प्रयाजादीनां दर्शपूर्णमासांगत्वाभावपक्षे, परममूले ([illegible] इति) प्रयाजादीनां दर्शपूर्णमासांगत्वपक्षे इत्यर्थः । परममूले तत्रापीति विकृतिष्वपीत्यर्थः, परममूले (तदनुष्ठानमिति) प्रयाजाद्यनुष्ठानमित्यर्थः ।

Funding by IKS-MoE

परममूले (प्रकृतेत्विति) द्रष्टव्य इत्यादिवाक्येत्वित्यर्थः । परममूले (येनेति) श्रवणस्य प्रकृतित्वेनेत्यर्थः । परममूले (तत्रापीति) श्रवणविकृतावपीत्यर्थः ॥

सू०–किंतु यथा घटादिकार्य्ये मृत्पिंडादीनां प्रधानकारणता चक्रादीनां सहकारिकारणतेति प्राधान्याप्राधान्यव्यपदेशः तथा श्रवणमनननिदिध्यासनानामपीति मंतव्यं सूचितंचैतद्विवरणाचार्य्यैः शक्तितात्पर्य्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात् मनननिदिध्यासनेतु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्य्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्यते इति प्र[illegible]मा-प्रत्यव्यवहितकारणस्य तात्पर्य्यविशिष्टशब्दावधार[illegible]ण-व्यवहिते मनननिदिध्यासने तदंगे अंगीक्रियेते इति-श्रवणादिषु च मुमुक्षूणामधिकारः ॥

शि० म०–एवं सति प्राधान्याप्राधान्यव्यपदेशं समर्थयति (किंतुयथेति) श्रवणमनननिदिध्यासनानां मध्ये श्रवणं प्रधानकारणं मननं निदिध्यासनं च तत्सहकारीत्यर्थः । नच ध्यानमेव साक्षात्कारणतया प्रधानमिति वाच्यम् । तत्पर्य्यविशिष्टवेदांतावधारणलक्षणश्रवणस्य प्रमेयावगमं प्रति कारणत्वेन प्राधान्यात् । इदमेव प्राधान्यं प्रथमवर्णके विवरणाचार्य्यैः सूचितमित्याह (सूचितंचेति) ननु ज्ञानसाधनतया श्रवणादिकं नानुष्ठेयं तत्राधिकारनिश्चयाद्दर्शादिके कर्मणि तन्निश्चयस्य प्रवृत्त्यंगत्वात् । नच नित्यानित्यविवेकवैराग्यशमदमादिसंपन्नोधिकारीति वाच्यं शमदमादीनां प्रकरणेन प्रमाणेनांगत्वावगमेन अधिकारनिमित्तत्वायोगादित्यत आह (श्रवणादिष्विति । मुमुक्षूणामिति) मोक्षसाधनब्रह्मज्ञानकामानामित्यर्थः । श्रवणादेर्ब्रह्मज्ञानफलकत्वेन तत्कामस्यैव तत्राधिकारौचित्यात उक्तंचैतत्पंचमवर्णके पंचपादिकाचार्य्यैः ब्रह्मज्ञानकामिनेदंशास्त्रं श्रोतव्यमिति ॥

म० प्र०–एवंसति–श्रवणादिषु तार्त्तीयशेषशेषिभावाभावे सति (प्राधान्येति) श्रवणादिष्वितिशेषः, तत्सहकारि–श्रवणस्य सहकारि । परममूले (अव्यवधा[illegible]ति) साक्षादित्यर्थः । परममूले (अव्यवधानादिति) अनन्यथासिद्धत्वे सत्यव[illegible]पूर्वक्षणवृत्तित्वादित्यर्थः । तत्र–श्रवणादिषु (अधिकारेति) अधिकारनिमित्त[illegible]विना-

धिकारानिश्चयादित्यर्थः । तन्निश्चयस्य—अधिकारनिश्चयस्य, अंगत्वावगमेन—श्रवणांगत्वनिश्चयेन अधिकारनिमित्तत्वायोगात् यस्मिन्पुरुषे शमदमादिसंबंधस्तस्मिन्पुरुषे श्रवणाधिकार इति शमदमादीनां श्रवणाधिकारप्रयोजकत्वाभावात् प्रयाजादीनामिव यस्यांगत्वेन ज्ञानं तस्याधिकारप्रयोजकत्वाभाव इति भावः । परममूले (व्यवहितेइति) उत्तरभाविनि फलं प्रतिव्यवहिते वेत्यर्थः । ननु मुमुक्षूणामित्यस्य मोक्षेच्छावतामित्यर्थमपहाय मोक्षसाधनब्रह्मज्ञानकामानामित्यर्थः किमिति क्रियते इत्यत आह (श्रवणादेरिति) तत्कामस्यैव—ब्रह्मज्ञानकामपुरुषस्यैव, तत्र—श्रवणादिषु (औचित्यादिति) मोक्षेच्छायां सत्यां तत्त्वज्ञानेच्छा तत्त्वज्ञानेच्छायां सत्यां श्रवणादिषु पुरुषप्रवृत्तिरिति तत्त्वज्ञानेच्छैवश्रवणादिषु पुरुषाधिकार इति भावः ॥

मू०—काम्ये कर्मणि फलकामस्याधिकारित्वात् मुमुक्षायां च नित्यानित्यविवेकस्येहामुत्रार्थफलभोगविरागस्य शमद[illegible]परतितितिक्षासमाधानश्रद्धानां विनियोगः ॥

[illegible]० म०—ननु सर्वाधिकारकमिदं किं न स्यादित्यत आह (काम्य इति । मुमुक्षायामिति) यद्यपि मोक्षसाधनब्रह्मज्ञानचिकीर्षाया एवाधिकारनिमित्तत्वात्तत्रैव नित्यानित्यविवेकादीनां युक्तो विनियोग इति तथापि मोक्षकामनाया एव तत्प्रयोजकत्वमिति दर्शयितुं मुमुक्षोपन्यासः। नहि मोक्षमकामयमानस्तत्साधनं ज्ञानं कामयते, नच नित्यानित्यविवेकादेः फलकामनाया हेतुत्वेमानाभाव इति वाच्यं श्रवणविधिप्रकरणे तत्संकीर्त्तनस्यैव मानत्वादन्यथासंकीर्त्तनवैफल्यंस्यात्तथाहि सोन्वेष्टव्य इति विधिप्रकरणे तद्यथेह कर्मचि[illegible] इत्यादिना नित्यानित्यविवेकः परीक्ष्यलोकान् कर्मचितानित्यादिना च इहामुत्रार्थफलभोगविरागः "शांतो दांत उपरतस्तितिक्षुः" इतिचशमादिर्दर्शितः विजिज्ञासस्वेति विचारविधिप्रकरणे वरुणंपितरमुपससारेति श्रुत्यंतरे च तद्विज्ञानार्थं सगुरुमेवाभिगच्छेदिति च गुरूपसदनं दर्शितम् । नच सर्वत्र फलश्रुतेस्तेषां फले एव विनियोगः स्यादिति वाच्यम् । शमादिषु फलश्रुतेरर्थवादत्वेन कामनोत्पादनद्वारा मुमुक्षोरधिकारप्रदर्शनार्थत्वेन वा फलश्रुतेरुपपत्तेः तदुक्तं विवरणाचार्य्यैः सर्वत्र फलश्रुतयः कामनोत्पादनद्वारा मुमुक्षोरधिकारप्रदर्शनार्था इति ॥

मू० प्र०—चिकीर्षायाः—संपादनेच्छायाः (अधिकारेति) श्रवणादिषुयोग्यतेत्यर्थ[illegible]त्रैव—ब्रह्मज्ञानचिकीर्षायामेव, तत्प्रयोजकत्वं—मोक्षसाधनब्रह्मज्ञानप्रयोजकत्वं, फल[illegible]याः—मोक्षकामनायाः, तत्संकीर्तनस्यैव—विवेकादिसंकीर्तनस्यैव, अन्यथा—विवेका[illegible]र्मोक्षकामनाहेतुत्वानंगीकारे (संकीर्त्तनेति) श्रवणविधिप्रकरणे विवेकादिसंकी

Funding by IKS-MoE

त्तेनेत्यर्थः । सः-आत्मा, अन्वेष्टव्यः-विचारितव्यः श्रवणीय इति यावत् । विजिज्ञासस्व-अन्नादिद्वारेण ब्रह्मविचारयस्व, सर्वत्र-सर्वेषु विवेकादिषु फलश्रुतेः । तेषां-विवेकादीनां फले-स्वफले, विनियोगः-संबंधः, अर्थवादत्वेन-श्रवणविध्यर्थवादत्वेन वाचस्पतिमते तु साक्षात्कारार्थवादत्वेन (कामनेति) मोक्षेच्छेत्यर्थः । अधिकारप्रदर्शनार्थत्वेन-शमादीनां फलश्रवणानंतरशमादिषु प्रवृत्तिः शमादिषु प्रवृत्त्यनंतरं मुमुक्षा ततः श्रवणादिषु मुमुक्षोरधिकार इत्यधिकारप्रदर्शनार्थत्वेन सर्वत्र-विवेकादिषु ॥

मू०-अंतरिंद्रियपरिग्रहः शमः बहिरिन्द्रियनिग्रहो दमः विक्षेपाभावं उपरतिः शीतोष्णादिद्वंद्वसहनं तितिक्षा चित्तैकाग्र्यं समाधानं गुरुवेदांतवाक्यविश्वासःश्रद्धा,अत्रोपरमशब्देन संन्यासोऽभिधीयते तथाच संन्यासिनामेव श्रवणेऽ[illegible] इति केचित् । अन्येतूपरमशब्दस्य संन्यासवाचकत्वा[illegible]वात् विक्षेपाभावमात्रस्य गृहस्थेष्वपि संभवाज्जनकादेर[illegible] ब्रह्मविचारस्य श्रूयमाणत्वात् ॥

शि० म०-शमदमादिशब्दार्थान्भेदेन व्याचष्टे (अंतरिन्द्रियेत्यादिना) अत्र संन्यासिनामेव ब्रह्मविद्यायामधिकार इत्यत्रोपरमशब्दं प्रमाणयंतः "संन्यासयोगाद्यतयःशुद्धसत्त्वाः" इति श्रुतिं तात्पर्यभ्रमादुपोद्बलयंतः समितपाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिं जनकरैक्वयवसिष्ठानां ब्रह्मविचारप्रतिपादिकामाख्यायिकां गृहस्थोपि विमुच्यते इति स्मृतिं चाच्छादयंतस्तदुपोद्बलतया च स्वाश्रमस्य मोक्षाश्रमनामधेयादिकयुक्त्याऽऽभासं वदंतो गृहस्थादिकृतसाष्टांगप्रणाममात्रेण स्वात्मानमधिकं मन्यमाना ब्रह्मविचारे गृहस्थादीनामधिकारं तेषु प्रद्वेषमात्रेण केचिद्भिक्षवो दूषयंति तेषां मतमाह (अत्रेति) अस्तूपरमशब्दार्थः संन्यासस्ततः किमित्याशंक्य संन्यासस्य मुमुक्षाद्वारा विचाराधिकारनिमित्तत्वात्संन्यासिनामेवाधिकारः सिद्ध्यतीत्याह (तथाचेति) किमुपरमशब्देन शक्त्या संन्यासावगमउतार्थात् लक्षणया वा तत्राद्यं निराकृत्य द्वितीयं निरस्यति (विक्षेपेति) ब्रह्मविचारविरोधिविषयांतरव्यासंगाभावस्य गृहस्थेष्वपि केषुचित्संभवेन तस्य संन्यासानुमा[illegible]त्वा[illegible]दित्यर्थः । तृतीयं दूषयति (जनकादेरपीति) तथाच गृहस्थादेर्ब्र[illegible]रप्रतिपादकश्रुत्यंतरविरोधान्न लक्षणाकल्पनमितिभावः ॥

म० प्र०–अत्र–संसारे, उपोद्बलयंतः–प्रमाणत्वेनोपन्यसंतः । आच्छादयंतः–अकथयंतःतदुपोद्बलतया स्मृत्याख्यायिकाच्छादनसहकारित्वेन तेषु–गृहस्थेषु परममूले, अत्रेति–शमादिषट्कसंपत्तिमध्ये परममूले (उपरमशब्देनेति) उपरमबोधकोपरतिशब्देनेत्यर्थः । उपरमशब्दार्थः–उपरमबोधकोपरतिशब्दार्थः । उपरमशब्देन उपरमबोधकोपरतिशब्देन, अर्थात्–संन्यासंविनोपरत्यनुपपत्त्या । तत्र–पक्षत्रयमध्ये (व्यासंगेति) चित्तसंचारेत्यर्थः । तस्य–ब्रह्मविचारविरोधिविषयांतरचित्तसंचाराभावस्य (अनुमापकत्वेति) कल्पकत्वेत्यर्थः ॥

मू०–सर्वाश्रमसाधारणं श्रवणादिविधानमित्याहुः सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारहेतुः तदुक्तम् ॥

[illegible]०–निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ॥
[illegible] मंदास्तेनुकंप्यंते सविशेषनिरूपणैः ॥

म०–ततश्च मुमुक्षासंपादकानां नित्यानित्यविवेकादीनामाश्र[illegible]ात्रसाधारणत्वेनाधिकारानिमित्तस्य मुमुक्षुत्वस्यापि सर्वसाधारणत्वादाश्रमिमात्राधिकारकमेव श्रवणादिविधानमित्याह (सर्वाश्रमेति) ननु मोक्षसाधनब्रह्मज्ञानायश्रवणादीनिकर्तव्यानीत्युक्तं तदयुक्तम् । सगुणोपासकानां हिरण्यगर्भलोकं गतानामकृतवेदांतश्रवणानामपि तत्रैवांते मुक्तिश्रवणादित्याशंक्य किमेतावता ब्रह्मसाक्षात्कारस्य व्यभिचारंचोदयस्युतश्रवणादेः । नाद्यः "नान्यः पंथाविद्यतेयनाय" "न कर्मणानप्रजया धनेन" इति च प्रतिषेधेन यज्ञादिव[illegible] सगुणोपासनस्यापि साक्षान्मुक्तिहेतुत्वाभावादित्यभिप्रेत्य द्वितीयं दूषयति (सगुणेति) चित्तैकाग्र्यलक्षणनिदिध्यासनद्वारा सगुणोपासनमपि ब्रह्मसाक्षात्कारहेतुरित्यर्थः । ननु सगुणविषयं ह्युपासनं तत्कथंनिर्गुणसाक्षात्कारोपयोगि अन्याविषयस्यापि हेतुत्वेऽतिप्रसंगात् । प्रागपिवैराग्यादिसंपन्नस्य इहैव श्रवणमनननिदिध्यासनसंभवेन तत एव तत्साक्षात्कारोपपत्तौ सगुणोपासनद्वारा निदिध्यासने गौरवं चेत्याशंक्य कल्पतरुकारोक्तं समाधानमाह (तदुक्तमिति) ये हि वैषयिकफलानुषंगरहितभवांतरानुष्ठितकर्मजनितचित्तवैमल्यतया अनादिदुर्वासनां विषयगोचरामुत्सार्य्य तद्दूषितं चित्तं वि[illegible]स्योपकृष्य ततो निर्विशेषं ब्रह्मध्यातुमीशते तेनाऽत्राधिकारिणः ये[illegible]नादिदुर्वासनाजनितविषयांतरविक्षेपवशात्प्रागुपास्तेर्निर्विशेषं ब्रह्म[illegible]क्ततया तत्त्वं साक्षात्कर्तुमसमर्थास्ते एव मंदा निरूपितसगु[illegible]पासनास्वधिकारिणः । तथाचाधिकारिभेदान्नोपासनावैयर्थ्यमितिभावः

Funding by IKS-MoE

म० प्र०–ततश्च–उपरतिशब्दस्य केनापि प्रकारेण संन्यासपरत्वाभानादेव, साधारणत्वेन–वृत्तित्वेन, सर्वसाधारणत्वात्–निखिलाश्रमिवृत्तित्वात् तत्रैव ब्रह्मलोके–एव, अंते–हिरण्यगर्भनाशकाले एव । व्यभिचारं–मोक्षफलेन व्यभिचारम् (श्रवणादेरिति) साक्षात्कारेण व्यभिचारं भवान्नोदयतीति शेषः । अतिप्रसंगात्–निर्गुणोपासनात्सगुणसाक्षात्कारापत्तिप्रसंगात्, प्रागपि–सगुणोपासनायाः प्रागपि, इहैव–अस्मिन् जन्मन्येव, ततएव–श्रवणादित एव (गौरवमिति) सगुणोपासनायावैयर्थ्यमिति भावः (भवांतरेति) जन्मांतरेत्यर्थः । तद्दूषितं–विषयगोचरानादिदुर्वासनारूपदोषविशिष्टम्, ततः–विषयगोचरानादिदुर्वासनारूपप्रतिबंधाभावात् । अत्र–सगुणब्रह्मो[illegible]प्पन्नासु, प्रागुपास्तेः–सगुणब्रह्मोपास्तेः पूर्वम् । तत्त्वं–ब्रह्म, नोपासनावैयर्थ्यम्–प्राग[illegible]ादिनाबोधितोपासनावैयर्थ्येन ॥

मू०–वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ॥
तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम् ॥
इति सगुणोपासकानां च अर्चिरादिमार्गेण ब्रह्मलो[illegible]नां
तत्रैव श्रवणादुत्पन्नतत्त्वसाक्षात्काराणां ब्रह्मणा सह मो[illegible] ॥

शि० म०–आद्यं दोषं निरस्यति (वशीकृतइति) एषां सगुणोपासकानां मनसि सगुणब्रह्मध्यानाभ्यासाद्ब्रह्मण्येव स्थिरीकृते सति निरुपाधिकस्यापि ध्यानसंभवेन तदेव ध्यातं निरुपाधिकतया साक्षात्कृतंभवतीत्यर्थः । तथाच विषयभेदाभावान्नातिप्रसंग इति भावः । ननु सगुणोपासनया वशीकृतचित्तानां निरुपाधिकब्रह्मध्यानादिहैवतत्साक्षात्कार इत्युक्तं तथासति प्रारब्धकर्मक्षये सत्यत्रैव विदेहकैवल्यापत्तौ उपासकानां कार्य्यब्रह्मणा सह मुक्तिरित्यभ्युपगमविरोध इत्याशंक्य नहि सर्वेषामुपासकानामिहैव ब्रह्मसाक्षात्कार इति ब्रूमः । किंतु निश्चिततात्पर्य्यकवेदांतावगतं तदनुकूलानुमानेन च संभावितं निर्विशेषं ब्रह्मसगुणोपासनया वशीकृतमनस्कतया ध्यातुं समर्थास्तेषामेव निरुपाधिकध्यानाभ्यासजनितब्रह्मसाक्षात्कारात्प्रारब्धक्षये सत्यत्रैव मुक्तिः । अन्येषां तु अकृतब्रह्मविचाराणां सगुणोपासकानां ब्रह्मलोकं गतानां तत्रैव साधितश्रवणादिसाधनानां साक्षात्कृतब्रह्मभावानां कार्य्यब्रह्मणा सह मुक्तिरित्यभिप्रेत्याह (सगुणोपासकानांचेति) उपासकानां केन मार्गेण ब्रह्मलोकगमनमित्याकांक्षायामाह (अर्चिरादीति) यत्राग्निवाय[illegible] गंतॄणां नेतारः सोऽर्चिरादिमार्गः । तथाच श्रुतिः ''स एव देवय[illegible]मासाद्याग्निलोकमायच्छति स वायुलोकं सवरुणलोकमिति [illegible]मभिसंभवंति'' इति ॥

म० प्र०—तदेव—निरुपाधिकब्रह्मैव, इहैव—वर्तमानजन्मन्येव, तत्साक्षात्कारः—निर्गुणब्रह्मसाक्षात्कारः । तथासति—वर्त्तमानदेहे एव निर्गुणब्रह्मसाक्षात्कारे सति तदनुकूलानुमानेन वेदांततात्पर्यं—सविषयकं तात्पर्यत्वात् गेहे घट इतिवाक्यतात्पर्यवत् । यद्वा अज्ञानाध्यासः साधिष्ठानकः अध्यासत्वात् शुक्तिरजताद्यध्यासवदित्यादिवेदांतानुकूलानुमानादिप्रमाणेन, अन्येषांतु—निश्चिततात्पर्यकवेदांतजन्यब्रह्मविषयकावगतिशून्यानां तु, यत्र—यस्मिन्मार्गे, स एव—उपासकएव, देवयानं—यांत्यनेनेतियानं मार्गो देवानां यानं देवयानमिति देवसंबंधिमार्गाभिन्नम् ॥

मू०—कर्मवतां धूममार्गेण पितृलोकं गतानामुपभोगेन कर्मक्षये सति पूर्वकृतसुकृतदुष्कृतानुसारेण ब्रह्मादिस्थावरांतेषु पुनरुत्पत्तिः तथाच श्रुतिः रमणीयचरणाः रमणीयां [illegible]मापद्यंते कपूयचरणाः कपूयां योनिमिति ॥

शि[illegible]—ननु यथा ग्रामं जिगमिषुं प्रति किंचिन्मार्गचिह्नमुपदिशति [illegible]ा वनं प्राप्य ततो न्यग्रोधं ततो ग्रामं प्राप्स्यतीति एवमर्चिरादिरपि मार्गचिह्नमेवोपदिश्यते अचेतनत्वात् । अथवा अर्चिराद्योभोगभूमयो लोकशब्दश्रवणादिति चेन्न, अर्चिरादेर्मार्गचिह्नत्वे भोगभूमित्वे वा गंतॄणां गमयित्रभावेन गमनानुपपत्तेः । नच स्वातंत्र्येण गमनं मूर्च्छितादिवत्तस्य सपिंडीकृतत्वात् । तस्मादर्चिषमग्निस्वामिकं प्राप्त इति, तेन वायुस्वामिकंच प्राप्तो वायुना वरुणस्वामिकमित्यभ्युपगंतव्यं तथाचाहुरार्य्यवाचस्पतिमिश्राः ॥

सपिंडीकरणानां हि सूक्ष्मदेहवतां गतौ ।
न स्वातंत्र्यं न चाग्न्याद्यानेतारोऽचेतनास्तवेति ॥

ननु विद्याभेदेन गमनद्वये सति सगुणविद्यावतामर्चिरादिमार्गेणेति विशेषोक्तिर्युज्यते । नच निर्गुणविद्यावतां मार्गोस्तीत्याशंक्य पुण्यकर्मणां मार्गांतरसद्भावात्तदपेक्षया मार्गविशेषकीर्त्तनमित्याह (कर्मवतामिति । धूमेति) ते धूमं संभवंति धूमाद्रात्रिमित्यादिश्रुतेरिति भावः (पितृलोकंगतानामिति) यद्यपि कर्मिणां मार्गविशेषजिज्ञासायां तत्कीर्तनमेव युक्तं तथापि प्रसंगात्तेषामुपभोगपुनरुद्भवादिकीर्त्तनम् अत एव वक्ष्यति इत्यलं[illegible] श्रुतातप्रपंचेनेति ॥

म[illegible]पदिश्यते—श्रुत्याकीर्त्यते (अचेतनत्वादिति) अग्न्यादीनामिति शेषः [illegible]वण[illegible]नतूपासकानां नेतार इति भावः, तस्य—उपासकस्य सपिंडीकृतत्वात्—ऽदृष्टादिनो कार्य्याक्षमेन्द्रियकत्वात् त्यक्तस्वस्थानकत्वाद्वा (इत्यभ्यु-

पगंतव्यमिति) उपासकस्योत्तरायणमार्गेणगमनक्रमस्तु प्रथमतोऽर्चिषं १ ततोऽहः २ ततः शुक्लपक्षं ३ ततो यान्षण्मासानादित्यउदङ्ङेति तान्षण्मासान् ४ ततः संवत्सरं ५ ततो देवलोकं ६ ततो वायुं ७ तत आदित्यं ८ ततश्चंद्रं ९ ततोविद्युतं १० ततो वरुणं ११ तत इंद्रं १२ ततः प्रजापतिं १३ ततो ब्रह्मलोकं १४ प्राप्नोतीति अत्रार्चिरादिशब्दैरर्चिराद्यभिमानिदेवता गृह्यन्ते इति न दोषः। परममूले (पितृलोकमिति) स्वरादिलोकमित्यर्थः । कर्मिगमनक्रमस्तु प्रथमतो धूमं १ ततो रात्रिं २ ततः कृष्णपक्षं ३ ततोदक्षिणायनषण्मासान् ४ मासेभ्यः पितृलोकं ५ पितृलोकादाकाशम् ६ आकाशाच्चंद्रमसमाप्नोतीति ७ अत्रापि धूमादिशब्दैर्धूमाद्यभिमानिदेवता [illegible]नासु, प्राग्रुपाः, तत्कीर्त्तनमेव-कर्मिमार्गविशेषकीर्त्तनमेव नतु कर्मिणामुपभोगपुनरुद्भवादि-[illegible]दिनाकीर्तनमित्येवकारार्थः । प्रसंगात्स्मृतस्योपेक्षानर्हत्वरूपप्रसंगात्, तेषां-कर्मिणाम् ॥

मू०-प्रतिषिद्धानुष्ठायिनां तु रौरवादिनरकविशेषेषु [illegible]

२० पोपचितं तीव्रदुःखमनुभूय सूकरादिषु तिर्यग्योनिषु [illegible]वरादिषु चोत्पत्तिरित्यलं प्रसंगादागतप्रपंचेनेति। निर्गु[illegible]ब्रह्मसाक्षात्कारवतस्तु न लोकांतरगमनं 'न तस्य प्राणा उत्क्रामंतीति' श्रुतेः किंतु यावत्प्रारब्धक्षयं सुखदुःखेह्य-नुभूय पश्चादपवृज्यते ॥

शि० म०-दुष्कृतकारिणां तु न धूमादिनाऽर्चिरादिना वा मार्गेण गमनप्रसक्तिः किंतु येन केनचित् कुत्सितेन मार्गेण भयंकरपुरुषैर्नरकविशेषपातनमित्याह (प्रतिषिद्धानुष्ठायिनामित्यादि) ननु निर्गुणविद्यावतोऽपि गतिरंगीकार्य्या, विद्यावत्त्वाविशेषात्, स एतान् ब्रह्मगमयतीत्यमानवपुरुषस्य परं ब्रह्मगमयितृत्वश्रवणाच्च। नचेदं ब्रह्मपदं कार्य्यब्रह्मपरं नपुंसकस्य परस्मिन्नेव ब्रह्मणि रूढस्य मुख्यार्थत्वसंभवे गुणकल्पनया कार्य्यपरत्वायोगात्। किंचेदं ब्रह्मपदं परब्रह्मपरमेव तत्प्रकरणे श्रूयमाणत्वादित्यत आह (निर्गुणेति) अयं भावः नतावत्परं ब्रह्म प्राप्यं तस्य सर्वात्मकस्य सर्वदा प्राप्तत्वात् । नचाप्राप्तत्वभ्रमात्प्राप्तमेव प्राप्नोतीति सांप्रतं तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारात्प्राक्तादृशभ्रमसंभवेऽपि तद्गतस्तदसंभवात्। तस्मादगत्या कार्य्यब्रह्मण्येव कथंचिद्ब्रह्मशब्दो व्याख्येयस्ततश्चामानवः पुरुषः सगुणोपासकानामेव लोकांतरवर्त्तिकार्य्यब्र[illegible]त्यभ्युपेयं तदाहुराचार्य्यवाचस्पतिमिश्राः ॥

कार्य्यस्याप्राप्तिपूर्वत्वादप्राप्तप्रापणे गतिः ॥
प्रापयेद्ब्रह्म नपरं प्राप्तत्वाज्जगदात्मकमिति ॥

Funding by IKS-MoE

तर्हि साक्षात्कारवतः सद्य एव विदेहकैवल्यं स्यादिति शंकते (किंत्विति) ज्योतिष्टोमादिस्वर्गस्यैहिकशरीरेणैव मोक्षस्य प्रारब्धकर्मणा प्रतिबंधात्तन्नाशानंतरमेव विदेहकैवल्यमित्याह (यावदिति) प्रारब्धं कार्य्यं युगकल्पादिपर्य्यंतमनुभोक्तव्यं सुखदुःखादिरूपं येन तत्प्रारब्धकर्म यथावसिष्ठादीनां पौरोहित्यादिप्रापकं कर्म तच्च प्रक्षिप्तशरवन्मध्ये न विनश्यति किंतु स्वकर्त्तव्यं सकलभोगमुत्पाद्यैव शाम्यतीत्यर्थः ॥

म० प्र०–गुणकल्पनया–लक्षणाकल्पनया, प्राप्यम्–अर्चिरादिमार्गेण प्राप्यं तादृशब्रह्मेति–अप्राप्तत्वब्रह्मेत्यर्थः । तद्वतः तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारवतः । तदसंभवात्–अप्राप्तत्वब्रह्मासंभवात्, कथंचित्–लक्षणतया ततश्च–तत्त्वमस्यादिवाक्यजन्यसाक्षात्कारवतो गमनासंभवादेव, अप्राप्तप्रापणे–अप्राप्तप्राप्त्यर्थं गौणं गम[illegible]०–त्वीति शेषः । सद्यएव–अज्ञाननाशेन तत्कार्य्यस्यापि नाशसंभवाज्ज्ञान[illegible]एव ॥

सू [illegible]नु क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुत्या ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति स्मृत्याचज्ञानस्य सकलकर्मनाशहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेन्न तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथसंपत्स्ये इत्यादिश्रुत्या नाभुक्तं क्षीयते कर्मेत्यादिस्मृत्याचोत्पादितकार्य्यकर्मव्यतिरिक्तानां संचितकर्मणामेव ज्ञानविनाश्यत[illegible]गमात् ॥

शि० म०–ब्रह्मसाक्षात्कारवतः प्रारब्धकर्मावस्थानमाक्षिपति (नन्विति) श्रुतिस्मृतिभ्यां प्रारब्धकार्य्याणां देहपातलक्षणावधिप्रतीक्षावगमेन क्षीयंतेचास्य कर्माणीति सामान्यश्रुतेरनारब्धकार्य्यकर्मविनाशपरत्वादनारब्धकार्य्याणामेव सुकृतदुष्कृतकर्मणां विद्यासामर्थ्याद्विनाश इत्याह (तस्येति) अन्यथा देवर्षीणां हिरण्यगर्भमनूद्दालकप्रभृतीनां ब्रह्मसाक्षात्कारवतां सद्यो न जीविता भवेत् श्रूयते चैषां श्रुतिस्मृतीतिहासपुराणेषु तत्त्वज्ञता महाकल्पसमयांतजीविता च नह्येते महाधियो न ब्रह्मविदः ब्रह्मविदश्चाल्पपुण्ययशसो मनुष्या [illegible]ति त[illegible]मादागमानुसारेण प्रारब्धकार्य्याणां सत्यपि तत्त्वसाक्ष[illegible]वस्थानं युक्तमिति भावः । ननु यदि तस्य तावदेव चिर[illegible]ति [illegible]रब्धकर्मावस्थानप्रतिपादिकश्रुत्यंतरवशात् क्षीयंते चास्य

Funding by IKS-MoE

कर्माणीति सामान्यश्रुतेरनारब्धकार्य्यपरत्वं तर्हि यथापुष्करपलाश आपो न श्लिष्यंते एवं हास्य सर्वे पाप्मानः प्रदूयंते इति विशेषश्रवणात्सामान्यवचनं पापे कर्मविशेषे उपसंहरणीयं किंचाधर्मस्य रागादिनिबंधनतया शास्त्रीयेन ब्रह्मज्ञानेन विनाशो युक्तः धर्मब्रह्मज्ञानयोस्तु शास्त्रीयत्वेन ज्योतिष्टोमदर्शपूर्णमासवदविरोधान्नोच्छेद्योच्छेदकभावः । अन्यथाऽनुत्पन्नफलस्यापि धर्मस्य नाशे स्वर्गादिसाधनत्वप्रतिपादकज्योतिष्टोमवाक्यस्याप्रामाण्यापत्तिः । तस्माद्दुष्कृतमेव संचितं कर्मज्ञानविनाश्यमित्याशंक्य नहि पापस्य संचितपापत्वप्रयुक्तं विद्यानिवर्त्यत्वम् ॥

म०प्र०—श्रुतिस्मृतिभ्यां—तस्य तावदेवचिरं यावन्न विमोक्ष्ये नाभुक्तंक्षीयते इत्यादि[illegible]तिस्मृतिभ्यां, प्रतीक्षावगमेन—स्थितेरवगतत्वेन, अन्यथा—अनारब्धकार्य्याणामेव[illegible]कृतदुष्कृतकर्मणां विद्यासामर्थ्याद्विनाशानभ्युपगमे किंतु सर्वकर्मनाशस्वी[illegible], न श्लिष्यंते—क्लेदनादिरूपं स्वकार्य्यं न कुर्वंति, प्रदूयंते—पापकर्मणा फलसंबंधा[illegible]ति॥

मू०—संचितं द्विविधं सुकृतं दुष्कृतं चेति तथाच श्रुतिः [illegible] पुत्रा दायमुपयांति सुहृदःसाधुकृत्यां द्विषंतः पापकृत्य[illegible] इति । ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्यप्रारब्धकर्मणोपि निवृत्तेः कथं ज्ञानिनो देहधारणमुपपद्यते इति चेन्नाप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतया प्रारब्धकर्मरूपप्रतिबंधकदशायामज्ञाननिवृत्तेरनंगीकारात् । नन्वेवमपि तत्त्वज्ञानादेकस्य मुक्तौ [illegible]र्वमुक्तिः स्यात् अविद्याया एकत्वेन तन्निवृत्तौ क्वचिदपि संसारायोगादितिचेन्न इष्टापत्तेरित्येके ॥

शि० म०—किंतु तन्निवर्त्याविद्यानिबंधनत्वप्रयुक्तं तच्चैतत्सुकृतेप्यविशिष्टम् । उभे एवैष एते तरतीति श्रुत्यंतरे सुकृतदुष्कृतयोरुभयोरपि ज्ञाननिवर्त्त्यत्वश्रवणात् "एवं हास्य सर्वे पाप्मानः प्रदूयंते" इत्यादिश्रुतेरपि सुकृतदुष्कृतनाशपरत्वात् । दृष्टप्रयोगश्चायं पुण्येपि पाप्मशब्दस्तद्यथा पुण्यपापे प्रक्रम्य सर्वे पाप्मानो निवर्त्तंते इत्यत्र ततश्च सुकृतदुष्कृतभेदेन द्विविधमपि ब्रह्मज्ञाननिवर्त्यमित्यभिप्रेत्याह (संचि[illegible]ति तस्य पुत्रा इति) यद्यपि सर्वात्मकस्य ज्ञानिन इष्टद्विष्टवि[illegible] तथापि ज्ञानपूर्वकालाभिप्रायेण परदृष्ट्या वा तत्संभवादिति म[illegible] ननु ब्रह्मज्ञानादज्ञानानिवृत्तौ न जानामीति व्यवहारात्तन्निव[illegible]

कर्मानिवृत्तिप्रसंगात् पूर्वावस्थातो विशेषाभावप्रसंगः । तन्निवृत्तौ-जीवन्मुक्तस्यदेहादिप्रपंचोऽनुपपन्न इति चोदयति (नन्विति) जीवन्मुक्तानां तत्त्वसाक्षात्कारात्पारमार्थिकत्वव्यावहारिकत्वसंपादनपटीयः शक्तिविशिष्टाज्ञानविनाशेपि प्रातिभासिकत्वसंपादनपटीयः शक्तिविशेषविशिष्टाज्ञानस्यानिवृत्तेर्देहादिधारणं युक्तमित्यभिप्रेत्याह (नाप्रतिबद्धेति) ननु सर्पबाधेपि भयकंपानुवृत्तिवज्जीवन्मुक्तस्याविद्या संस्कारवशादेव देहादिप्रपंचोस्तु किंशक्तिविशेषविशिष्टाज्ञानकल्पनया गौरवात्, शक्तिभेदेमानाभावाच्चेति चेन्नाविद्योपादेयदेहादिप्रपंचस्य तन्निवृत्तावव-स्थानायोगात् ॥

म०प्र०—तन्निवर्त्यैति—विद्यानिवर्त्यैत्यर्थः । तच्चैतत्—विद्यानिवर्त्याविद्यानिबंधनत्वं ([illegible]) नजानामीति व्यवहारादज्ञानानिवृत्तावित्यन्वयः (पारमार्थिकत्वेति प्रपं[illegible] र्थिकत्वादीत्यर्थः । तन्निवृत्तौ—अविद्यानिवृत्तौ ॥

म०—नचतत्त्वज्ञानोत्तरकालीनदेहादेरविद्यासंस्कार एवोपादा[illegible] नाविद्येति वाच्यं संस्कारस्यापि भावकार्य्यतयोपादानावश्यंभा[illegible] सत्योपादानत्वे सत्यत्वापातेनाविद्याया एवोपादानत्वे तन्निवृत्तौ संस्कारस्याप्यनुपपत्तेः । सर्पादिभ्रमबाधेपि भयकंपानुवृत्तिर्नभ्रमसंस्कारादिना अनंतरमपि स्मरणान्यथानुपपत्त्या संस्कारस्य तावत्कालं स्थायितया तावत्पर्य्यंतं भयाद्यनिवृत्त्यापत्तेः । किंतु सर्पभ्रमजनितभयप्रयुक्तधातुवैषम्यविशेषादेव धातुवैषम्यं च कार्य्यानुसारेण यावत्कार्य्यावस्थायीति कल्प्यते अतो न संस्कारवशाज्जीवन्मुक्तस्य देहादिप्रपंचः । किंतु शक्तिभेदविशिष्टाज्ञानात् । नच शक्तिभेदेमानाभावः । कार्य्यबलेनैव तत्कल्पनात् । तथाहि यथा विक्षेपावरणात्मककार्य्यद्वयबलेन तदनुकूलं शक्तिद्वयं कल्प्यते तथेहाप्यश्रुतवेदांतानां प्रपंचे पारमार्थिकत्वभ्रमः । श्रुतवेदांतानामनुत्पन्नब्रह्मसाक्षात्काराणां व्यावहारिकत्वभ्रमः । उत्पन्नब्रह्मसाक्षात्काराणां जनकयाज्ञवल्क्योद्दालकोद्धवप्रह्लादप्रभृतीनां यावद्देहपातं प्रातिभासिकत्वभ्रम इत्यविद्यायास्तिस्रः शक्तयः स्वीकार्य्याः एतदभिप्रेत्य ॥

तुच्छानिर्वचनीया च तात्त्विकी च त्रिधामता ॥
शक्त[illegible] मायाख्या त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥

[illegible]ीनैरुक्तम् । अत एव शास्त्रेण नश्यति पारमार्थिकत्वभ्रमः । नश्यतिच [illegible] द्व्यावहारिकत्वभ्रमः प्रारब्धनाशात्प्रातिभासिकत्वभ्रमनाश इति श[illegible]क्तत्रयस्यनाश इत्युक्तं तथाच श्रुतिः । "तस्याभिध्यानाद्योजना-

तत्त्वभावात्। भूयश्चांते विश्वमायानिवृत्तिः'' इति सर्वशक्तिविशिष्टाज्ञाननिवृत्तिरित्यर्थः ॥

म०प्र०–अनंतरमपि–सर्पभ्रमबाधोत्तरमपि, तावत्कालं–स्मरणपर्य्यंतम्। तावत्पर्य्यंतं–संस्कारपर्य्यंतं (विक्षेपेति) सर्पादिकार्य्येत्यर्थः (इहापीति) इह प्रपंचेपीत्यन्वयः। व्यावहारिकत्वभ्रमः–व्यावहारिकत्वप्रतीतिः । प्रातिभासिकत्वभ्रमः–प्रातिभासिकत्वप्रतीतिः। अतएव–अविद्यायाः शक्तित्रयस्वीकारादेव, श्रुतिरिति–अज्ञानस्य शक्तित्रितयविशिष्टत्वे क्रमशो नाशे वा श्रुतिरूपप्रमाणमपि भवतीत्यर्थः । तस्य–स्वप्रकाशब्रह्मणः, अभिध्यानात्–सुरनरतिर्य्यगादिविशेषेषु स देव एव स्वरूपप्रदतया कारणत्वेनानंदरूपतया पोषकत्वेन सर्वसाक्षित्वेन च वर्तते इत्यभिध्यानात्। संसारे पारमार्थिक- ादकाज्ञानांशनिवृत्तिः। योजनात्–कार्य्यकारणसंघातसाक्षिभूतो यो हरः सएवा- ीत्याकारकात् । तद्भावात्–द्वैतभ्रमतन्मूलाविद्यानिवर्त्तकापरोक्षसाक्षात्का ात् उभाभ्यांजन्मांतरापादकाज्ञाननिवृत्तिः। अंते–प्रारब्धकर्मांते द्वैतप्रति र्वाहकनिखिलाविद्यानिवृत्तिः ॥

मू०–अपरेत्वेतद्दोषपरिहारायैवेंद्रोमायाभिरिति बहुवचन नुगृहीतमविद्यानानात्वमंगीकर्त्तव्यमित्याहुः। अन्येत्वे वाविद्या तस्या एवाविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशो नत्वन्यं प्रति ब्रह्मस्वरू वरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमात्। नैकमुक्तौ सर्वमुक्तिः। अत एव च यावदधिकारमवस्थितिराधिकारिकाणामित्यस्मिन्नधिकरणेऽधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिंद्रादीनां देहधारणानुपपत्तिमाशंक्याधिकारापादकप्रारब्धकर्मसमाप्त्यनंतरं विदेहकैवल्यमिति सिद्धांतितं तदुक्तमाचार्य्यवाचस्पतिमिश्रैः ॥

उपासनादिसंसिद्धितोषितेश्वरचोदितम् ॥
अधिकारं समाप्यैते प्रविशंति परंपदमिति ॥

एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षेनोपपद्यत

शि० म०–ननु कस्यापि मुक्त्यभावे शुकवामदेवादिमु कश्रुतिस्मृतिविरोध इत्यरुच्या मतांतरमाह (अपरेति

Funding by IKS-MoE

लाघवसहकृतानुमानानुगृहीताजामित्येकवचनश्रुतिविरोधान्ना विद्यानानात्वं मायाभिरिति बहुवचनश्रुतिस्तद्गतशक्तिभेदमादायैवोपपन्ना नचोक्तदोषभयात्तन्नानात्वं वक्ष्यमाणरीत्या तद्दोषनिरासंसंभवादित्यस्वरसात्समाधानांतरमाह (अन्येत्विति) एकमुक्तौ न सर्वमुक्तिरित्येतत्सूत्रकारवचनेनापि द्रढयति (अतएवेति) नन्वेतत्सूत्रमन्यपरं कल्प्यतामित्यत आह (तदुक्तमिति) तथाचैकमुक्तौ सर्वमुक्तिरित्यभ्युपगतावेतदधिकरणविरोधो दुर्वार इत्याह (एतच्चेति) नन्वेकाविद्यागतनानाशक्त्यभ्युपगंतृमतेप्येकमुक्तौ सर्वमुक्तिरेव [illegible] आवरणशक्तिर्निवर्त्या इयंनेत्यत्र नियामकाभावेन ब्रह्मसाक्षा[illegible]र्वावरणशक्तिविशिष्टाविद्याविनाशावश्यंभावादित्याशंक[illegible]

[illegible]०-([illegible]ति) एकाविद्ययैवसर्वकार्यसंभवेपि यदि नानाविद्[illegible] स्वीक[illegible]ति लाघवतर्कसंहकृतविवादास्पदप्रपंच आविद्यकः मिथ्[illegible] च्छुरि[illegible]दवदित्यनुमानेत्यर्थः । तद्गतेति–मायागतेत्यर्थः (उक्तदोषेति– मुक्तौ [illegible]मुक्त्यापत्तिरूपदोषेत्यर्थः । वक्ष्यमाणरीत्या–तस्या एवाविद्याया इत्यादिपरममूले [illegible]कारेण, तद्दोषेति–एकमुक्तौ सर्वमुक्त्यापत्तिरूपदोषेत्यर्थः । परममूले (अतएवेति) एकमुक्तौसर्वमुक्त्यभावादेवेत्यर्थः । अन्यपरम्–अनुत्पन्नतत्त्वज्ञानपरम् । तथाच–अनुत्पन्नतत्त्वज्ञानपरत्वाभावे, परममूले (एतच्चेति) यावदधिकारमवस्थितिरित्याद्यधिक[illegible]मित्यर्थः ॥

मू०–तस्मादेकाविद्यापक्षेपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया तदेवं ब्र[illegible]ज्ञानान्मोक्षः स चानर्थनिवृत्तिर्निरतिशयब्रह्मानंदावाप्तिश्चेति सिद्धं प्रयोजनम् ॥

इति श्रीधर्मराजदीक्षितविरचितायां वेदांतपरिभाषायामष्टमः परिच्छेदः ॥

शि० म०–यथाशुक्तिसाक्षात्कारात्फलबलेनैकावरणशक्तिनाशः यथा सर्वज्ञानप्रागभावनिवृत्तिस्वरूपयोग्येन ज्ञानेन कस्यचिदेवप्रागभावस्य निवृत्तिरेवमन्येन प्रपंचोपलंभानुरोधेन यस्य ब्रह्मज्ञानं तदीयानर्थहेत्वावरणशक्तेरेव नाशो नान्यदीयसंसारहेत्वावरणशक्तीनामिति व्यव[illegible] (तस्मादिति) परिच्छेदप्रतिपाद्यमर्थं निगमयति तच्च [illegible] ॥

[illegible]मादलिखितं त्यक्तं प्रमादालस्यदोषतः ॥
[illegible]तत्क्षंतव्यं बुधैः सद्भिः क्षमा हि विदुषां धनम् ॥ १ ॥

सुवर्णखचिताकाराकृतिरेषा मया कृता ॥
विदुषामस्तु वेदांतशिखामणिरलंक्रिया ॥ २ ॥
अनेन मत्प्रबंधेन वेदांतार्थावलंबिना ॥
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यतु ॥ ३ ॥
वंदेहं वंदनीयानां वंद्यां वाचामधीश्वरीम् ॥
कामिताशेषकल्याणकलनाकल्पवल्लरीम् ॥ ४ ॥

इति श्रीमद्धर्मराजाध्वरीन्द्रात्मजरामकृष्णाध्वरिविरचिते वेदांतशिखामणावष्टमः परिच्छेदः ॥ ८ ॥

म० प्र०–फलबलेन–कालांतरीयरजतभ्रांतिबलेन, स्वरूपयोग्येन–कारणतावच्छे-
[illegible]ानत्वरूपधर्माक्रांतेन (सुवर्णेति) सुवर्णखचि[illegible]षणमिवाकारा [illegible] वो सा
हकनिरि[illegible] कृता एषा वेदांतशिखामणिः कृतिर्विदुषामलं [illegible] ीत
[illegible]ना । अशेषकल्याणकल्पनाकल्पवल्लरीम्–सकलसुखप्राप्तिहेतुकल्पवृक्षले

जातं यतो विश्वमिदं तु यस्मिन्स्थत्वा लयं याति भवांतकाले ॥
तं योगिवर्यं मुनि[illegible]ीक्ष्यं श्रीनानकाख्यं प्रणमामि नित्यम् ॥ १ ॥
भवदावाग्निसंतप्तानुद्धर्तुमिच्छया जनान् ॥
माययोपात्तकायं तं भजे श्रीचंद्रमीश्वरम् ॥ २ ॥
येभ्यो मया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥
कायेन वाचा मनसापि वंदे श्रीमद्गुरूणां चरणारविंदम् ॥ ३ ॥
यद्गीस्तुपूषेवतमोनिहंति मोहं श्री[illegible]मूहदांग्घ्री ॥
विद्यागुरूंस्तान्सततं नमामः श्रीब्रह्मविज्ञानपदाभिधेयान् ॥

इति श्रीमदुदासीनवरश्रीमद्ब्रह्मविज्ञानाभिधगुरुप्रसादलब्धोदासीनामरदासशब्दवाच्याविर्भूतायांधर्मराजाध्वरींद्रात्मजरामकृष्णाभिधेयविरचितवेदांतशिखामणेः प्रभायामष्टमः परिच्छेदः समाप्तः ॥ ८ ॥

पुस्तक मिलनेका ठिकाना–
खेमराज श्रीकृ
“श्रीवेङ्कटेश्वर” (स्टीम्) मुद्रण यन्त्रालयाध्यक्ष-

विह

ंच

Funding by IKS-MoE

Funding by IKS-MoE

Funding by IKS-MoE